4623.



श्रेष्ठी देवचन्द लालभाई जव्हेरी.

जन्म १९०९ वैक्रमाब्दे	निर्याणम् १९६२ वैक्रमाब्दे
कार्तिकशुक्लैकादश्यां, सूर्यपुरे	पौषकृष्णतृतीयायाम्, मुम्बय्याम्

The Late Seth Devchand Lalbhai Javeri

Born 1853 A D Surat — **Died 1906 A D Bombay**

The Lakshmi Art Printing Works Byculla

श्रीमलयगिरिकृत-टीका-संयुक्ता.

कर्मप्रकृतिः

श्रीवीतरागाय नमः ।

प्रणम्य कर्मद्रुमचक्रनेमिं, नमत्सुराधीशमरिष्टनेमिम् । कर्मप्रकृत्याः कियतां पदानां, सुखावबोधाय करोमि टीकाम् ॥ १ ॥ अयं गुणश्चूर्णिकृतः समग्रो, यदस्मदादिर्वदतीह किञ्चित् । उपाधिसंपर्कवशाद्विशेषो, लोकेऽपि दृष्टः स्फटिकोपलस्य ॥ २ ॥

इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्तमानाः सन्त इष्टदेवतानमस्कारपुरःसरमेव प्रवर्तन्ते । न चायमाचार्यो न शिष्ट इति शिष्टसमयपरिपालनाय, तथा श्रेयांसि बहुविघ्नानि भवन्ति उक्तं च—"श्रेयांसि बहुविघ्नानि, भवन्ति महतामपि । अश्रेयसि प्रवृत्तानां, क्वापि यान्ति विनायकाः ॥ १ ॥" इति । इदं च प्रकरणं सम्यग्ज्ञानहेतुत्वाच्छ्रेयोभूतमतो मा भूदत्र विघ्न इति विघ्नविनायकोपशान्तये चेष्टदेवतानमस्कारं । तथा न च प्रेक्षापूर्वकारिणः क्वचिदपि प्रयोजनादिविरहे प्रवर्तन्त इति प्रेक्षावतां प्रवृत्त्यर्थं प्रयोजनादिकं च प्रतिपिपादयिषुरादाविदमाह—

सिद्धं सिद्धत्थसुयं, वंदिय निद्धोयसव्वकम्ममलं । कम्मट्ठगस्स करणट्ठमुदयसंताणि वोच्छामि ॥ १ ॥

सिद्धमिति–इह पूर्वार्धेनेष्टदेवतानमस्कारस्याभिधानं, उत्तरार्धेन तु प्रयोजनादीनां । तत्र सितं बद्धं ध्मातं भस्मीकृतमष्टप्रकारं कर्म येन स सिद्धः । पृषोदरादित्वादिष्टरूपनिष्पत्तिः यथा ब्रुवन्तः सीदन्त्यस्यामिति बृसीत्यत्र । तं वन्दित्वेति क्रियायोगः । स च नामतोऽपि कश्चिद्भवति, विद्यासिद्धादिर्वा सिद्ध इति लोके प्रतीतस्ततस्तद्व्यवच्छेदार्थं यथोक्तान्वर्थसूचकमेव विशेषणमाह–निर्धौतसर्वकर्ममलं नितरामपुनर्भावेन धौतः सम्यग्दर्शनज्ञानचारित्रतपःसलिलप्रभावेणापगमितः सर्व एव कर्मैवाष्टप्रकारं जीवमालिन्यहेतुत्वात् मल इव मलो येन स निर्धौतसर्वकर्ममलः (त) । अनेनानादिशुद्धपुरुषप्रवादप्रतिक्षेप आवेदितो द्रष्टव्यः । विशेष्यमाह–सिद्धार्थसुतं सिद्धार्थस्य सिद्धार्थनरेन्द्रस्य, सुतमपत्यं वर्धमानस्वामिनमित्यर्थः । अनेन भगवत उत्तमजात्यैश्वर्यादिगुणसंपत्प्रकर्षमाह । अथवा सिद्धमिति विशेष्यं, सिद्धत्थसुयमिति विशेषणं । तत्र सिद्धार्थं सिद्धप्रयोजनं संसारान्निस्तारणस्य कृतत्वात् श्रुत द्वादशांगं यस्माद्भूत् स सिद्धार्थश्रुतस्तं । अनेन श्रुतस्य संसारनिस्तारणं प्रत्यविकलं सामर्थ्यमावेद्यते । यद्वा सिद्धार्थाः सिद्धप्रयोजना मोक्षप्राप्तिभावात् सुता इव सुताः शिष्या गणधरादयो यस्य स सिद्धार्थसुतस्तं । अनेन भगवतः संततेरपि विशिष्टफलातिशयभाक्त्वमावेदयति । अत एव च भगवान् प्रेक्षावतां प्रणामार्हः । तमित्थंभूतं वन्दित्वा । किमित्याह–वक्ष्यामि प्रतिपादयिष्यामि । कर्माष्टकस्य बन्धसंक्रमादिहेतुभूतं करणाष्टकं उदयसत्त्वे च । तत्र कर्माष्टकं ज्ञानावरणदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तरायरूपं । एतच्चान्यत्र पञ्चसंग्रहादौ सप्रपंचमभिहितमिति नेह प्रतन्यते, केवलं तत एवावधारणीयं । तस्य बन्धसंक्रमादि-

कारणभूतं । करणाना वीर्यविशेषरूपाणामष्टकं करणाष्टकं बन्धनादि वक्ष्यमाणं । तथा कर्मपुद्गलानां यथास्थितिबन्धा-
नामबाधाकालक्षयेणापवर्तनादिकरणविशेषतो वा उदयसमयप्राप्तानामनुभवनमुदयः । तेषामेव कर्मपुद्गलानां बन्धसं-
क्रमाभ्यां लब्धात्मलाभानां निर्जरणसंक्रमकृतस्वरूपप्रच्युत्यभावे सति सद्भावः सत्ता । इह करणाष्टकोदयसत्ता अभि-
धेयाः । तत्परिज्ञानं श्रोतॄणामनन्तरं प्रयोजनं, आचार्यस्य त्वनन्तरं प्रयोजनं परानुग्रहः । परंपराप्रयोजनं तूभयोरपि
निःश्रेयसावाप्तिः। संबन्धस्तूपायोपेयभावलक्षणः। तथाहि—वचनरूपापन्नं प्रकरणमुपायः, तत्परिज्ञानाद्यु(नं चो)पेयमिति॥१॥

तत्र यथोद्देशं निर्देश इतिन्यायात्प्रथमतः करणाष्टकमभिधित्सुराह—

वंधण १ संकमणु २ वट्टणा य ३ अववट्टणा ४ उदीरणया ५ ।
उवसामणा ६ निहत्ती ७ निकायणा ८ च त्ति करणाइं ॥ २ ॥

वंधणेति—इह करणशब्देन सह पर्यन्ते सामानाधिकरण्याभिधानात्प्रत्येकं करणशब्दोऽभिसंबन्धनीयः । तद्यथा—बन्ध-
नकरणं संक्रमकरणमित्यादि । तत्र बन्धो नाम कर्मपुद्गलाना जीवप्रदेशैः सह वह्न्ययःपिण्डवदन्योऽन्यानुगमः १ ।
संक्रमः प्रकृतिस्थित्यनुभागप्रदेशानामन्यकर्मरूपतया स्थितानामन्यकर्मस्वरूपेण व्यवस्थापनं २ । स्थित्यनुभागयोर्बृहत्क-
रणमुद्वर्तना ३ । तयोरेव ह्रस्वीकरणमपवर्तना ४ । कर्मपुद्गलानामकालप्राप्तानामुदयावलिकायां प्रवेशनमुदीरणा ५ ।
कर्मपुद्गलानामुदयोदीरणानिधत्तिनिकाचनाकरणायोग्यत्वेन व्यवस्थापनमुपशमना ६ । उद्वर्तनापवर्तनावर्जशेषकरणा-

योग्यत्वेन व्यवस्थापनं निधत्तिः ७। समस्तकरणायोग्यत्वेन व्यवस्थापनं निकाचना ८। उक्तस्वरूपबन्धादिनिबन्धनभूताश्च जीववीर्यविशेषा बन्धनादीनीत्युच्यन्ते, तथाव्युत्पत्तिभावात् । तथाहि—बध्यतेऽष्टप्रकारं कर्म येन तद्बन्धनं १। संक्रम्यतेऽन्यप्रकृत्यादिरूपतया व्यवस्थाप्यते येन तत्संक्रमणं २। उद्वर्त्यते प्राबल्येन प्रभूतीक्रियते स्थित्यादि यया जीववीर्यविशेषपरिणत्या सोद्वर्तना ३। अपवर्त्यते ह्रस्वीक्रियते स्थित्यादि यया साऽपवर्तना ४। अनुदयप्राप्तं (उदयाप्राप्तं) सत्कर्मदलिकमुदीर्यत उदयावलिकायां प्रवेश्यते यया सोदीरणा ५। उपशम्यते उदयोदीरणानिधत्तिनिकाचनाकरणायोग्यत्वेन व्यवस्थाप्यते कर्म यया सोपशमना ६। निधीयत उद्वर्तनापवर्तनावर्जकरणायोग्यत्वेन व्यवस्थाप्यते यया सा निधत्तिः ७। पृषोदरादित्वाच्छब्दरूपनिष्पत्तिः । तथा कच बन्धने, नितरां कच्यते स्वयमेव बन्धमायाति कर्म जीवस्य तथाविधसंक्लिष्टाध्यवसायपरिणतस्य, तत्प्रयुंक्ते जीव एव तथानुकूल्येन च्यवनात्, ततः प्रयोक्तृव्यापारे णिञ् (श्रीमं. आ-६-५) ततो निकाच्यतेऽवश्यवेद्यतया व्यवस्थाप्यते कर्म जीवेन यया सा निकाचना। अथवा कच बन्धने इति चौरादिकोऽप्यस्ति, ततो निकाच्यतेऽवश्यवेद्यतया निबध्यते यया कर्म सा निकाचना जीववीर्यविशेषपरिणतिः ८। चः समुच्चये। इतिः परिसमाप्तौ, एतावन्त्येव करणानि, नाधिकानि। इति ॥ २ ॥

---

१ श्रीमत्प्रणीत रुचिरतरमस्त्येव शब्दानुशासन सवृत्तिक, तत्र नामाख्यातकृदाख्यं यथार्थाख्य प्रकरणत्रय क्रमेण नवदशपट्पादप्रमाण, ततश्चात्र श्रीमलयगिरिपूज्यपादकृतिप्रकरणपादसूत्रसङ्ख्यासूचनं क्रमेणावसेयमध्यवसितवाङ्मयसारैः।

करणानि चामूनि जीववीर्यविशेषरूपाणीति प्रथमतो वीर्यमेव प्ररूपयति—

विरियंतरायदेसक्खएण सव्वक्खएण वा लद्धी। अभिसंधिजमियरं वा, तत्तो विरियं सलेसस्स ॥ ३ ॥

विरियमिति–वीर्यान्तरायस्य देशक्षयेण सर्वक्षयेण वा लब्धिर्वीर्यलब्धिरसुमतामुपजायते। तत्र देशक्षयेण छद्मस्थानां सर्वक्षयेण (च) केवलिनां। तस्याश्च वीर्यलब्धेः सकाशादुपजायमानं वीर्यं सलेश्यस्यापि च भवति, अलेश्यस्यापि च। केवलमिह सलेश्यवीर्येणाधिकार इति तदेवोपदर्शयति–'अभिसंधिजमियरं वा तत्तो विरियं सलेसस्स' ततस्तस्याः क्षायिकक्षायोपशमिकरूपाया वीर्यलब्धेः सकाशात् सलेश्यस्य वीर्यमभिसन्धिजमितरद्वा भवति। तत्र यद्बुद्धिपूर्वकं धावनवल्गनादिक्रियासु नियुज्यते तदभिसन्धिजं, इतरदनभिसन्धिजं। यद्भुक्तस्याहारस्य धातुमलत्वरूपपरिणामापादनकारणं एकेन्द्रियाणां वा तत्तत्क्रियानिबन्धनं, एतच्चाभिसन्धिजमनभिसन्धिजं वा वीर्यमवश्यं यथासंभवं सूक्ष्मबादरपरिस्पन्दरूपक्रियासहितं, योगसंज्ञमप्येतदेव। एकार्थिकानि चास्यामूनि–"जोगो विरियं थामो, उच्छाहपरिक्कमो तहा चिट्ठा। सत्ती सामत्थं चिय, जोगस्स हवंति पज्जाया ॥ १ ॥" इति ॥ ३ ॥

संप्रत्यस्यैव योगस्य परिणामादिहेतुतां भेदं च,तथा जीवप्रदेशेष्वस्य वैषम्येणावस्थाने कारणं च प्रतिपिपादयिषुरिदमाह—

परिणामालंबणगहणसाहणं तेण लद्धनामतिगं। कज्जब्भासन्नोन्नप्पवेसविसमीकयपएसं ॥ ४ ॥

परिणामेति–परिणमनं परिणामः। णिजन्तात् घञ्प्रत्ययः (श्रीम. कृ. ५–३) परिणामापादनमित्यर्थः। आलंब्यत

इत्यालंबनं, ज्ञावेऽनट् (श्रीम. कृ. ६-२)। गृहीतिर्ग्रहणं। तेषां साधनं साध्यतेऽनेनेति साधनं योगसंज्ञं वीर्यं, करणेऽनट् (श्रीम. कृ. ६-४)। तथाहि-तेन वीर्यविशेषेण योगसंज्ञकेनौदारिकादिशरीरप्रायोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा चौदारिकादिरूपतया परिणमयति। तथा प्राणापानज्ञाषामनोयोग्यान् पुद्गलान् प्रथमतो गृह्णाति, गृहीत्वा च प्राणापानादिरूपतया परिणमयति। परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्ध्ये तानेव पुद्गलानवलंबते। यथा मन्दशक्तिः कश्चिन्नगरे परिज्रमणाय यष्टिमवलंबते (मवष्टंज्नते)। ततस्तदवष्टंज्नतो जातसामर्थ्यविशेषः सन् तान् प्राणापानादिपुद्गलान् विसृजतीति परिणामालंबनग्रहणसाधनं वीर्यं। तेन च वीर्येण योगसंज्ञकेन मनोवाक्कायावष्टंज्नतो जायमानेन। 'लब्धनामतिगं ति' लब्धं नामत्रिकं। तद्यथा-मनोयोगो वाग्योगः काययोग इति। तत्र मनसा करणज्नूतेन योगो मनोयोगः, वाचा योगो वाग्योगः, कायेन योगः काययोगः। स्यादेतत्, सर्वेषु जीवप्रदेशेषु तुल्यक्षायोपशमिक्यादिलब्धिज्ञावेऽपि किमिति क्वचित्प्रज्नूतं क्वचित् स्तोकं क्वचित्स्तोकतरमित्येवं वैषम्येण वीर्यमुपलज्यत इत्यत आह-कज्जेत्यादि, यदर्थं चेष्टते तत्कार्यं, तस्याज्याशः, अज्यशनमज्याशः, अशूङ् व्याप्तावित्यस्याज्ञिपूर्वस्य घञन्तस्य प्रयोगः, कार्याज्याशः कार्यस्यासन्नता निकटीज्नवनमित्यर्थः। तथा जीवप्रदेशानामन्योऽन्यं परस्परं प्रवेशः शृंखलावयवानामिव परस्परं संबन्धविशेषः। ताज्यां कृत्वा विषमीकृताः प्रज्नूताल्पाल्पतरसज्ञावतो विसंस्थुलीकृताः प्रदेशा जीवप्रदेशा येन जीववीर्येण तत्कार्याज्याशान्योऽन्यप्रवेशविषमीकृतप्रदेशं। तथाहि-येषामात्मप्रदेशानां हस्तादिगतानामुत्पाद्यमानघटादिलक्षणकार्यनैकट्यं, तेषां प्रज्नूततरा चेष्टा। दूरस्थानामंसादिगताना स्वल्पा। दूरतरस्थानां तु पादादिगतानां स्वल्पतरा। अनुज्नव-

सिद्धं चैतत् । अपि च लोष्टादिनाऽभिघाते सति यद्यपि सर्वप्रदेशेषु युगपद्वेदनोपजायते, तथापि येषामात्मप्रदेशानाम-
भिघातकलोष्टादिद्रव्यनैकट्यं, तेषां तीव्रतरा वेदना, शेषाणा तु मन्दा मन्दतरा । तथेहापि जीवप्रदेशेषु परिस्पन्दात्मकं
वीर्यमुपजायमानं कार्यद्रव्यासन्नाशवशतः केषुचित्प्रभूतमन्येषु मन्दमपरेषु तु मन्दतमं भवति । एतच्चैवं जीवप्रदेशानां पर-
स्परं संबन्धविशेषे सति भवति, नान्यथा यथा शृंखलावयवानां । तथाहि–तेषा शृंखलावयवानां परस्परं संबन्धविशेषे
सति एकस्मिन्नवयवे परिस्पन्दमानेऽपरेऽप्यवयवाः परिस्पन्दन्ते । केवलं केचित् स्तोकमपरे स्तोकतरमिति । संबन्धविशे-
षाभावे त्वेकस्मिन् चलति नापरस्यावश्यंभावि चलनं, यथा गोपुरुषयोः, तस्मात्कार्यद्रव्यासन्नाशवशतो जीवप्रदेशानां
परस्परं संबन्धविशेषतश्च वीर्यं जीवप्रदेशेषु केषुचित्प्रभूतमन्येषु स्तोकमपरेषु तु स्तोकतरमित्येवं वैषम्येणोपजायमानं न
विरुध्यत इति ॥ ४ ॥

तदेवं वीर्यं प्रतिपाद्य संप्रत्यस्यैव जघन्याजघन्योत्कृष्टानुत्कृष्टत्वपरिज्ञापनाय प्ररूपणां चिकीर्षुरिमानर्थाधिकारानाह—

अविभागवग्गफड्डगअंतरठाणं अणंतरोवणिहा । जोगे परंपरावुड्ढिसमयजीवप्पबहुगं च ॥ ५ ॥

अविभागेति–योगे योगविषये । प्रथमतोऽविभागप्ररूपणा कार्या १ । ततो वर्गणाप्ररूपणा २ । ततः स्पर्धकस्य प्ररू-
पणा ३ । तदनन्तरमन्तरप्ररूपणा ४ । ततः स्थानप्ररूपणा ५ । ततोऽनन्तरोपनिधा ६ । ततः परंपरोपनिधा ७ । तदन-

---

१ एकप्रदेशावगाढौदारिकादिवर्गणाग्रहणवीर्यविचारोऽयमिति तूपाध्यायाः । परिश्रमवैचित्र्योपलम्भेः सर्वत्रैवमिति तु प्राच्य ।

न्तरं वृद्धिप्ररूपणा ८। ततः समयप्ररूपणा ९। ततो जीवानामल्पबहुत्वप्ररूपणेति १०। तत्र यस्यांशस्य प्रज्ञाछेदनकेन विभागः कर्तुं न शक्यते सोऽंशोऽविभाग उच्यते। किमुक्तं भवति? इह जीवस्य वीर्यं केवलिप्रज्ञाछेदनकेन छिद्यमानं छिद्यमानं यदा विभागं न प्रयच्छति, तदा सोऽन्तिमोऽंशोऽविभागः इति ॥ ५ ॥

ते चाविभागा एकैकस्मिन् जीवप्रदेशे यावन्तो भवन्ति तावन्त(त) आह—

पण्णाछेयणछिन्ना, लोगासंखेज्जगप्पएससमा। अविभागा एक्केक्के, होंति पएसे जहन्नेणं ॥ ६ ॥

पण्णेति—प्रज्ञाछेदनकेन छिन्नाः सन्तो ये वीर्यस्याविभागा जातास्ते एकैकस्मिन् जीवप्रदेशे चिन्त्यमाना जघन्येनाप्यसंख्येयलोकाकाशप्रदेशप्रमाणा भवन्ति। उत्कर्षतोऽप्यसंख्येयलोकाकाशप्रदेशप्रमाणा एव। किं तु ते जघन्यपदभाविवीर्याविभागापेक्षयाऽसंख्येयगुणा द्रष्टव्याः इति ॥ ६ ॥

उक्ताऽविभागप्ररूपणा, संप्रति वर्गणाप्ररूपणामाह—

जेसिं पएसाण समा, अविभागा सव्वतो य थोवतमा। ते वग्गणा जहन्ना, अविभागहिया परंपरओ ॥७॥

जेसिमिति—येषां जीवप्रदेशानां समास्तुल्यसंख्या वीर्याविभागा भवन्ति। सर्वतश्च सर्वेभ्योऽपि चान्येभ्योऽपि जीवप्रदेशगतवीर्याविभागेभ्यः स्तोकतमाः। ते जीवप्रदेशा घनीकृतलोकासंख्येयभागवर्त्यसंख्येयप्रतरगतप्रदेशराशिप्रमाणाः समुदिता एका वर्गणा। सा च जघन्या स्तोकाऽविभागयुक्तत्वात्। अविभागाधिका परंपरत इति ततः परा वर्गणा एकैकेनाविभागेनाधिका वक्तव्या। तद्यथा—जघन्यवर्गणातः परे ये जीवप्रदेशा एकेन वीर्याविभागेनाभ्यधिका घनीकृत-

लोकासंख्येयभागवर्त्यसंख्येयप्रतरगतप्रदेशराशिप्रमाणा वर्तन्ते, तेषां समुदायो द्वितीया वर्गणा । ततः परं द्वाभ्यां वीर्याविभागाभ्यामधिकानामुक्तसंख्याकानामेव जीवप्रदेशानां समुदायस्तृतीया वर्गणा । ततोऽपि त्रिभिर्वीर्याविभागैरधिकानां तावत्संख्याकानामेव जीवप्रदेशानां समुदायश्चतुर्थी वर्गणा । एवमेकैकवीर्याविभागवृद्ध्या वर्धमानानां तावतां तावतां जीवप्रदेशानां समुदायरूपा वर्गणा असंख्येया वक्तव्याः इति ॥ ७ ॥

ताश्च कियत्य इति तन्निरूपणार्थं स्पर्धकप्ररूपणामाह—

सेढिअसंखिअमित्ता, फड्डगमेत्तो अणंतरा नत्थि । जाव असंखा लोगा, तो बीयाई य पुव्वसमा ॥८॥

सेढीति—इह घनीकृतस्य लोकस्य या एकैकप्रदेशपंक्तिरूपा श्रेणिस्तस्याः श्रेणेरसंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावन्मात्रास्तावत्प्रमाणा यथोक्तस्वरूपा वर्गणाः समुदिता एकं स्पर्धकं, स्पर्धन्त इवोत्तरोत्तरवृद्ध्या वर्गणा अत्रेति स्पर्धकं । कृद्बहुलमिति (श्रीम. कृ. १–११) वचनादधिकरणे वुञ् । उक्ता स्पर्धकप्ररूपणा, सांप्रतमन्तरप्ररूपणामाह—'एत्तो अणंतरा नत्थि' इतः पूर्वोक्तस्पर्धकगतचरमवर्गणायाः परतो जीवप्रदेशा अनन्तरा न सन्ति । किमुक्तं भवति ? इत ऊर्ध्वमेकैकवीर्याविभागवृद्ध्या निरन्तरं वर्धमाना जीवप्रदेशा न लभ्यन्ते, किं तु सान्तरा एव । तथाहि—पूर्वोक्तस्पर्धकगतचरमवर्गणायाः परतो जीवप्रदेशा नैकेन वीर्याविभागेनाधिकाः प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिभिः, नापि चतुर्भिः, यावन्नापि संख्येयैः, किं त्वसंख्येयैरेवासंख्येयलोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यन्ते । ततस्तेषां समुदायो द्वितीयस्य स्पर्धकस्य प्रथमा वर्गणा । 'तो बीयाई य पुव्वसम त्ति' ततो द्वितीयस्पर्धकप्रथमवर्गणातः परतो द्वितीयादयो

वर्गणाः पूर्वसमाः पूर्वस्पर्धकस्येव वक्तव्या इत्यर्थः । तथाहि–प्रथमवर्गणायाः परतो जीवप्रदेशानामेकेन वीर्याविभागे-नाधिकानां समुदायो द्वितीया वर्गणा । द्वाभ्यां वीर्याविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । एवं तावद्वाच्यं यावत् श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा वर्गणा भवन्ति, तासां च समुदायो द्वितीयं स्पर्धकं । ततः परं पुनरप्येकेन वीर्याविभागेनाधिका जीवप्रदेशा न लभ्यन्ते, नापि द्वाभ्यां, नापि त्रिभिः, यावन्नापि संख्येयैः, किं त्वसंख्येयैरेवासंख्ये-यलोकाकाशप्रदेशप्रमाणैरभ्यधिकाः प्राप्यन्ते, ततस्तेषां समुदायस्तृतीयस्य स्पर्धकस्य प्रथमा वर्गणा । तत एकैकवीर्याविभागवृद्ध्या द्वितीयादयो वर्गणास्तावद्वाच्या यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा भवन्ति, तासां च समुदायस्तृतीयं स्पर्धकं । एवमसंख्येयानि स्पर्धकानि वाच्यानीति ॥ ८ ॥

तदेवं कृताऽन्तरप्ररूपणा, संप्रति स्थानप्ररूपणां करोति—

सेढिअसंखिअमेत्ताइं, फड्डगाइं जहन्नयं ठाणं । फड्डगपरिवुड्ढिअओ, अंगुलभागो असंखतमो ॥ ९ ॥

सेढीति–इह पूर्वोक्तानि स्पर्धकानि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि जघन्यं योगस्थानं भवन्ति । एतच्च सूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य भवप्रथमसमये वर्तमानस्य प्राप्यते । ततोऽन्यस्य जीवस्याधिकतरवीर्यस्य येऽल्पतरवीर्या जीवप्रदेशास्तेषां समुदायः प्रथमा वर्गणा । तत एकेन वीर्याविभागेन वृद्धानां समुदायो द्वितीया वर्गणा । द्वाभ्यां वीर्याविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । त्रिभिर्वीर्याविभागैरधिकानां समुदायश्चतुर्थी वर्गणा । एवं तावद्वाच्यं यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणा भवन्ति । तासां समुदायः प्रथमं स्पर्धकं । ततः प्राक्तनयोगस्थानप्रदर्शितप्र-

कारेण द्वितीयादीन्यपि स्पर्धकानि वाच्यानि । तानि च तावद्वाच्यानि यावच्छ्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि भवन्ति, ततस्तेषां समुदायो द्वितीयं योगस्थानं । ततोऽन्यस्य जीवस्याधिकतमवीर्यस्योपदर्शितप्रकारेण तृतीयं योगस्थानं वाच्यं । एवमन्यान्यजीवापेक्षया तावद्योगस्थानानि वाच्यानि, यावत्सर्वोत्कृष्टं योगस्थानं भवति । इह द्वितीये योगस्थाने प्रथमे स्पर्धके प्रथमवर्गणायां जीवप्रदेशाः प्रथमयोगस्थानचरमस्पर्धकचरमवर्गणागतवीर्याविभागापेक्षया असंख्येयैर्वीर्याविभागैरधिकाः प्राप्यन्ते । तृतीयेऽपि योगस्थाने प्रथमस्पर्धके प्रथमवर्गणायां जीवप्रदेशा द्वितीययोगस्थानचरमस्पर्धकचरमवर्गणागतवीर्याविभागापेक्षयाऽसंख्येयैर्वीर्याविभागैरधिकाः प्राप्यन्ते। एवं सर्वेष्वपि द्रष्टव्यं । तानि च योगस्थानानि सर्वाण्यपि कियन्ति भवन्तीति चेदुच्यते–श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि । ननु जीवानामनन्तत्वात्प्रतिजीवं च योगस्थानस्य प्राप्यमाणत्वादनन्तानि योगस्थानानि प्राप्नुवन्ति, कथमुच्यते श्रेण्यसंख्येयभागगतप्रदेशप्रमाणानीति ? नैष दोषः, यत एकैकस्मिन् योगस्थाने सदृशे सदृशे वर्तमानाः स्थावरजीवा अनन्ताः प्राप्यन्ते । ततः सर्वजीवापेक्षयापि सर्वाणि योगस्थानानि केवलिप्रज्ञया परिभाव्यमानानि यथोक्तप्रमाणान्येव प्राप्यन्ते, नोना(ततो ना)धिकानीति । कृता स्थानप्ररूपणा, सांप्रतमनन्तरोपनिधावसरः । तत्रोपनिधानमुपनिधा । धातूनामनेकार्थत्वान्मार्गणमित्यर्थः । अनन्तरेणोपनिधा अनन्तरोपनिधा, अनन्तरं योगस्थानमधिकृत्योत्तरस्य योगस्थानस्य स्पर्धकविषये मार्गणमित्यर्थः । तदेवाह–फड्डुगेत्यादि । अतः प्रथमाद्योगस्थानात् द्वितीयादिषु योगस्थानेषु प्रत्येकं स्पर्धकानां परिवृद्धिरंगुलभागोऽसंख्येयतमः, अंगुलमात्रक्षेत्रसत्केऽसंख्येयतमे भागे यावान् प्रदेशराशिस्तावत्प्रमाणानि पूर्वपूर्वयोगस्थानगतस्पर्धकापेक्षयोत्तरस्मिन्नुत्त-

रस्मिन् योगस्थाने स्पर्धकान्यधिकानि नवन्तीत्यर्थः । कथमेवं ज्ञा(जा)यत इति चेडुच्यते–इह प्रथमयोगस्थानगतवर्गणापेक्षया द्वितीययोगस्थानगतवर्गणा मूलत एव सर्वा अपि हीनहीनतरजीवप्रदेशा नवन्ति, प्रनूतप्रनूततरवीर्याणां जीवप्रदेशानां स्तोकस्तोकतरतया प्राप्यमाणत्वात् । ततोऽत्र विचित्रवर्गणावाहुल्यसंनवतो यथोक्तं स्पर्धकवाहुल्यमुपपद्यत एव । एवमुत्तरोत्तरेष्वपि योगस्थानेषु पूर्वपूर्वयोगस्थानगतस्पर्धकापेक्षया स्पर्धकवाहुल्यं परिनावनीयमिति ॥ ए ॥

तदेवं कृताऽनन्तरोपनिधा, सांप्रतं परंपरोपनिधाया अवसरः, तत्र परंपराया उपनिधा मार्गणं परंपरोपनिधा, तां चिकीर्षुराह––

सेढिअसंखियनागं, गंतुं गंतुं हवंति डुगुणाइं । पल्लासंखियनागो, नाणागुणहाणिगणाणि ॥ १० ॥

सेढीति–प्रथमाद्योगस्थानादारन्य श्रेणेरसंख्येयतमे नागे यावन्त आकाशप्रदेशास्तावन्मात्राणि योगस्थानानि गत्वा गत्वाऽतिक्रम्यातिक्रम्य यद्यत्परं योगस्थानं तत्र तत्र पूर्वयोगस्थानापेक्षया स्पर्धकानि द्विगुणानि नवन्ति । एतडुक्तं नवति–प्रथमे योगस्थाने यावन्ति स्पर्धकानि नवन्ति तदपेक्षया श्रेण्यसंख्येयनागगतप्रदेशराशिप्रमाणानि योगस्थानान्यतिक्रम्यानन्तरे योगस्थाने द्विगुणानि स्पर्धकानि नवन्ति । ततः पुनरपि ततो योगस्थानात्परतस्तावन्ति योगस्थानान्युल्लंघ्यापरस्मिन् योगस्थाने द्विगुणानि स्पर्धकानि प्राप्यन्ते । एवं नूयो नूयस्तावद्वाच्यं यावदन्तिमं योगस्थानं । कियन्ति पुनर्योगस्थानानि पूर्वपूर्वयोगस्थानापेक्षया द्विगुणद्विगुणस्पर्धकानि नवन्त्यत आह–'पल्लासंखियनागो त्ति' सूक्ष्मस्याद्धापल्योपमस्यासंख्येयतमे नागे यावन्तः समयास्तावत्प्रमाणानि द्विगुणवृद्धिस्थानानि नवन्ति । 'नाणागुणहाणिगणाणि त्ति'

नानारूपाणि यानि गुणहानिस्थानानि द्विगुणहानिस्थानानि तान्यपि पल्योपमासंख्येयभागगतसमयप्रमाणानि भवन्ति । तथाहि–उत्कृष्टाद्योगस्थानादारभ्याधोऽधोऽवतरणे सति यदा श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणानि योगस्थानान्युल्लंघितानि भवन्ति, तदाऽनन्तरेऽधस्तने योगस्थानेऽन्तिमयोगस्थानगतस्पर्धकापेक्षयाऽर्धानि स्पर्धकानि प्राप्यन्ते । ततः पुनरपि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणेषु योगस्थानेष्वतिक्रान्तेष्वधस्तने योगस्थानेऽर्धानि प्राप्यन्ते । एवं तावद्वाच्य यावज्जघन्यं योगस्थानमिति द्विगुणवृद्धिस्थानतुल्यानि द्विगुणहानिस्थानानि । यानि चामूनि द्विगुणवृद्धिस्थानानि द्विगुणहानिस्थानानि वा तानि सर्वस्तोकानि । तेभ्यः पुनरेकस्मिन् द्विगुणवृद्धिस्थानयोर्द्विगुणहानिस्थानयोर्वाऽन्तरे यानि योगस्थानानि तान्यसंख्येयगुणानि इति ॥ १० ॥

तदेवं कृता परंपरोपनिधा, सांप्रतं वृद्धिप्ररूपणां चिकीर्षुराह—

वुड्ढीहाणिचउक्कं तम्हा कालोत्थ अंतिमल्लाणं । अंतोमुहुत्तमावलि असंखभागो य सेसाणं ॥ ११ ॥

वुड्ढीति–क्षयोपशमो हि वीर्यान्तरायस्य क्वचित्कदाचित्कथंचिद्भवतीति तन्निबन्धनानि योगस्थानानि कदाचित्प्रवर्धमानानि भवन्ति कदाचिद्धीयमानानि । तत्र वृद्धिश्चतुर्धा, तद्यथा–असंख्येयभागवृद्धिः, संख्येयभागवृद्धिः, संख्येयगुणवृद्धिः, असंख्येयगुणवृद्धिः । एवं हानिरपि चतुर्धा, तद्यथा–असंख्येयभागहानिः, संख्येयभागहानिः, संख्येयगुणहानिः असंख्येयगुणहानिः । यस्मादेवं वृद्धिहान्योश्चतुष्कं वर्तते तस्मादत्र प्रत्येकं कालो नियतो वक्तव्यः । तत्रान्तिमयोर्वृद्धिहान्योरसंख्येयगुणलक्षणयोः प्रत्येकं ' कालो त्ति ' अन्तर्मुहूर्तं । शेषाणा त्वाद्यानां तिसृणां वृद्धीनां हानीनां

चावलिकाया असंख्येयजागमात्रः। एतडुक्तं जवति–तथाविधक्षयोपशमजावतो विवक्षितात् योगस्थानात् प्रतिसमयमपरस्मिन्नपरस्मिन्नसंख्येयगुणवृद्धे योगस्थाने यद्वर्तते जीवः साऽसंख्येयगुणवृद्धिः। यत्पुनः क्षयोपशमस्य मन्दमन्दतमजावतः प्रतिसमयमपरस्मिन्नसंख्येयगुणहीने योगस्थाने वर्तते साऽसंख्येयगुणहानिः। सा चासंख्येयगुणवृद्धिरसंख्येयगुणहानिर्वोत्कर्षतोऽन्तर्मुहूर्तं कालं यावन्निरन्तरं जवति। आद्याः पुनस्तिस्रो वृद्धयो हानयो वोत्कर्षत आवलिकाया असंख्येयजागमात्रं कालं, जघन्यतस्तु चतस्रोऽप्येकं द्वौ वा समयौ यावज्जवन्ति ॥ ११ ॥

स्यादेतत्, कियन्तं कालं यावत्पुनर्यथोक्तवृद्धिहानिरहिता जीवा योगस्थानेष्ववस्थिताः प्राप्यन्त इति प्रश्नावकाशमाशंक्य समयप्ररूपणामाह—

चउराई जावट्ठगमित्तो जाव डुगं ति समयाणं। पज्जत्तजहन्नाउ जावुक्कोसं ति उक्कोसो ॥ १२ ॥

चउराईति–चत्वार आदिर्यस्याः सा चतुरादिः समयानामवस्थितिकालनियामकानां वृद्धिः, सा च तावद्वाच्या यावदष्टकं। इत ऊर्ध्वं पुनः समयानां हानिर्वक्तव्या, सा च तावद्यावद्द्विकं। सा च चतुरादिका वृद्धिः 'पर्याप्तजघन्यात्' पर्याप्तसूक्ष्मनिगोदसत्कजघन्ययोगस्थानादारभ्य तावदवसेया यावदष्टकं। ततः परं हानिः, सापि तावद्यावडुत्कृष्टं योगस्थानं। एष उत्कृष्टोऽवस्थितिकालः। एतडुक्तं जवति–पर्याप्तसूक्ष्मनिगोदस्य सर्वाल्पवीर्यस्य सत्काज्जघन्याद्योगस्थानादारभ्य क्रमेण यानि योगस्थानानि श्रेण्यसंख्येयजागगतप्रदेशराशिप्रमाणानि तान्युत्कर्षतश्चतुरः समयान् यावदवस्थितानि प्राप्यन्ते। ततः परं यानि योगस्थानानि श्रेण्यसंख्येयजागगतप्रदेशराशिप्रमाणानि तान्युत्कर्षतः पञ्च समयान्।

ततः परं यानि योगस्थानानि पूर्वोक्तप्रमाणानि तान्युत्कर्षतः षड् समयान् । ततोऽपराणि यानि योगस्थानानि पूर्वोक्तप्रमाणानि तान्युत्कर्षतः सप्त समयान् । ततोऽपि पराणि यानि क्रमेण योगस्थानानि पूर्वोक्तसंख्याकानि तान्युत्कर्षतोऽष्टौ समयान् । ततः पराणि पुनर्यानि क्रमेण योगस्थानानि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणान्येव तान्युत्कर्षतः सप्त समयान् यावदवस्थितानि प्राप्यन्ते । तदनन्तरं यथोक्तसंख्याकान्येव योगस्थानान्युत्कर्षतः षड् समयान् । ततोऽपि पराणि यथोक्तप्रमाणान्येव योगस्थानानि पञ्च समयान् । एवं तावद्वाच्यं यावदन्तिमानि श्रेण्यसंख्येयभागगतप्रदेशराशिप्रमाणान्युत्कर्षतो द्वौ समयौ यावदवस्थितानि प्राप्यन्ते ॥ १२ ॥

तदेवमुक्तमुत्कृष्टमवस्थानकालमानं, सांप्रतं जघन्यमवस्थानकालमानमाह—

एगसमयं जहन्नं ठाणाणप्पाणि अठ्ठ समयाणि । उत्तं असंखगुणियाणि समयसो ऊण ठाणाणि ॥ १३ ॥

एगेति—सर्वेषामुक्तस्वरूपाणां योगस्थानानां जघन्यत एकसमयं यावदवस्थानं । तथा यान्यप्यपर्याप्तसूक्ष्मनिगोदयोग्यान्यसंख्येयानि योगस्थानानि पूर्वमनुक्तकालनियमानि तेषां जघन्यत उत्कर्षतो वा एकं समयं यावदवस्थानं। यतः सर्वोऽप्यपर्याप्तोऽपर्याप्तावस्थायां वर्तमानः प्रतिसमयमसंख्येयगुणरूपया योगवृद्ध्या वर्धते, ततस्तद्योगस्थानानामजघन्योत्कृष्टक्रमेकमेव समयं यावदवस्थानं। तदेवमुक्ता समयप्ररूपणा, साम्प्रतमेतेषामेव चतुरादिसमयानां योगस्थानानामल्पबहुत्वमाह—ठाणाणीत्यादि । अष्टसामयिकानि स्थानानि योगस्थानानि, (अल्पानि शेष) सप्तसामयिकादियोगस्थानानि प्रतीत्य स्तोकान्येव प्राप्यन्ते इति कृत्वा, तेभ्यः प्रत्येकसमयमसंख्येयगुणानि पूर्वोत्तररूपोभयपार्श्ववर्तीनि सप्तसामयिकानि, अल्पत-

रस्थितिकत्वात् । स्वस्थाने तु तानि द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि उभयपार्श्ववर्तीनि षट्सामयिकानि, स्वस्थाने तु परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि पञ्चसामयिकानि उभयपार्श्ववर्तीनि, स्वस्थाने तु परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि चतुःसामयिकानि उभयपार्श्ववर्तीनि स्वस्थाने तु परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि त्रिसामयिकानि, तेभ्योऽप्यसंख्येयगुणानि द्विसामयिकानि । 'समयसो कण ठाणाणि त्ति' समयशः समयेन समयेन ऊनानि अष्टसामयिकेभ्यो व्यतिरिक्तानि सप्तसामयिकादीनि स्थानानि योगस्थानानि ॥ १३ ॥

तदेवमुक्तं चतुरादिसमयानां योगस्थानानामल्पबहुत्वं, संप्रति तेषु योगस्थानेषु वर्तमानानां सूक्ष्मबादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियाणां पर्याप्तापर्याप्तानां जघन्योत्कृष्टयोगविषयेऽल्पबहुत्वमभिधित्सुराह—

सव्वत्थोवो जोगो साहारणसुहुमपढमसमयम्मि । बायरबियतियचउरमणसन्नपज्जत्तगजहन्नो ॥ १४ ॥

सव्वेति—इहासंख्येयगुण इति उत्तरगाथातः संबध्यते । साधारणस्य सूक्ष्मस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगः सर्वस्तोकः । ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततो द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः ॥ १४ ॥

आइदुगुक्कोसो सिं पज्जत्तजहन्नियरे य कमा। उक्कोसजहन्नियरो असमत्तियरे असंखगुणो ॥ १५ ॥

आईति—आदिद्विकमपर्याप्तसूक्ष्मबादरैकेन्द्रियलक्षणं तस्योत्कृष्टो योगः परिपाट्याऽसंख्येयगुणो वक्तव्यः । तद्यथा—लब्ध्यपर्याप्तकसंज्ञिपञ्चेन्द्रियजघन्ययोगात् सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्यैवोत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टोऽसंख्येयगुणः । 'सिं पज्जत्तजहन्नियरे य कमा' अनयोः सूक्ष्मबादरैकेन्द्रिययोः पर्याप्तयोर्जघन्य इतरश्चोत्कृष्टः । क्रमात् क्रमेणासंख्येयगुणो वक्तव्यः । तद्यथा—लब्ध्यपर्याप्तकबादरैकेन्द्रियोत्कृष्टयोगात् सूक्ष्मनिगोदस्य पर्याप्तस्य जघन्यो योगोऽसंख्येयगुणः । ततो बादरैकेन्द्रियस्य पर्याप्तकस्य जघन्ययोगोऽसंख्येयगुणः । ततः सूक्ष्मनिगोदस्य पर्याप्तस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि बादरैकेन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसंख्येयगुणः । 'उक्कोसजहन्नियरो असमत्तियरे असंखगुणो त्ति' असमाप्तोऽपर्याप्तो द्वीन्द्रियादिस्तस्मिन्नुत्कृष्ट इतरस्मिंश्च पर्याप्ते द्वीन्द्रियादौ जघन्य इतरश्चोत्कृष्टः परिपाट्याऽसंख्येयगुणो वक्तव्यः । तद्यथा—पर्याप्तकबादरैकेन्द्रियोत्कृष्टयोगात् द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततो द्वीन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य पर्याप्त-

रस्थितिकत्वात् । स्वस्थाने तु तानि द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि उभयपार्श्ववर्तीनि षट्सामयिकानि, स्वस्थाने तु परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि पञ्चसामयिकानि उभयपार्श्ववर्तीनि, स्वस्थाने तु परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि चतुःसामयिकानि उभयपार्श्ववर्तीनि स्वस्थाने तु परस्पर तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि त्रिसामयिकानि, तेभ्योऽप्यसंख्येयगुणानि द्विसामयिकानि । 'समयसो ऊण गणाणि त्ति' समयशः समयेन समयेन ऊनानि अष्टसामयिकेभ्यो व्यतिरिक्तानि सप्तसामयिकादीनि स्थानानि योगस्थानानि ॥ १३ ॥

तदेवमुक्तं चतुरादिसमयानां योगस्थानानामल्पबहुत्वं, संप्रति तेषु योगस्थानेषु वर्तमानानां सूक्ष्मबादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियाणां पर्याप्तापर्याप्तानां जघन्योत्कृष्टयोगविषयेऽल्पबहुत्वमभिधित्सुराह—

सव्वत्थोवो जोगो साहारणसुहुमपढमसमयम्मि । बायरबियतियचउरमणसन्नपज्जत्तगजहन्नो ॥ १४ ॥

सव्वेति—इहासंख्येयगुण इति उत्तरगाथातः संबध्यते । साधारणस्य सूक्ष्मस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगः सर्वस्तोकः । ततो बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततो द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्य प्रथमसमये वर्तमानस्य जघन्यो योगोऽसंख्येयगुणः ॥ १४ ॥

आइदुगुक्कोसो सिं पज्जत्तजहन्नगेयरे य कमा। उक्कोसजहन्नियरो असमत्तियरे असंखगुणो ॥ २५ ॥

आईति—आदिद्विकमपर्याप्तसूक्ष्मबादरैकेन्द्रियलक्षणं तस्योत्कृष्टो योगः परिपाट्याऽसंख्येयगुणो वक्तव्यः । तद्यथा—लब्ध्यपर्याप्तकसंज्ञिपञ्चेन्द्रियजघन्ययोगात् सूक्ष्मनिगोदस्य लब्ध्यपर्याप्तकस्यैवोत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि बादरैकेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टोऽसंख्येयगुणः । 'सिं पज्जत्तजहन्नगेयरे य कमा' अनयोः सूक्ष्मबादरैकेन्द्रिययोः पर्याप्तयोर्जघन्य इतरश्चोत्कृष्टः । क्रमात् क्रमेणासंख्येयगुणो वक्तव्यः । तद्यथा—लब्ध्यपर्याप्तकबादरैकेन्द्रियोत्कृष्टयोगात् सूक्ष्मनिगोदस्य पर्याप्तस्य जघन्यो योगोऽसंख्येयगुणः । ततो बादरैकेन्द्रियस्य पर्याप्तकस्य जघन्ययोगोऽसंख्येयगुणः । ततः सूक्ष्मनिगोदस्य पर्याप्तस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि बादरैकेन्द्रियस्य पर्याप्तस्योत्कृष्टो योगोऽसंख्येयगुणः । 'उक्कोसजहन्नियरो असमत्तियरे असंखगुणो त्ति' असमाप्तोऽपर्याप्तो द्वीन्द्रियादिस्तस्मिन्नुत्कृष्ट इतरस्मिंश्च पर्याप्ते द्वीन्द्रियादौ जघन्य इतरश्चोत्कृष्टः परिपाट्याऽसंख्येयगुणो वक्तव्यः । तद्यथा—पर्याप्तकबादरैकेन्द्रियोत्कृष्टयोगात् द्वीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि संज्ञिपञ्चेन्द्रियस्य लब्ध्यपर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततो द्वीन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततश्चतुरिन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तकस्य जघन्यो योगोऽसंख्येयगुणः । ततः संज्ञिपञ्चेन्द्रियस्य पर्याप्त-

कस्य जघन्यो योगोऽसंख्येयगुणः । ततो द्वीन्द्रियस्य पर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । ततस्त्रीन्द्रियस्य पर्याप्तक-
स्योत्कृष्टो योगोऽसंख्येयगुणः । ततोऽपि चतुरिन्द्रियस्य पर्याप्तकस्योत्कृष्टो योगोऽसंख्येयगुणः । पर्याप्तकाश्च सर्वत्रापि
करणपर्याप्ता वेदितव्याः ॥ १५ ॥

अमणाणुत्तरगेविज्जभोगभूमिगय तइयतणुगेसुं । कमसो असंखगुणिओ सेसेसु य जोगु उक्कोसा ॥ १६ ॥

अमणेति–'अमण त्ति' अमना असंज्ञी पर्याप्तचतुरिन्द्रियोत्कृष्टयोगात् असंज्ञिपञ्चेन्द्रियपर्याप्तकस्योत्कृष्टो योगोऽसं-
ख्येयगुणः । ततोऽनुत्तरोपपातिनां देवानामुत्कृष्टो योगोऽसंख्येयगुणः । ततो ग्रैवेयकाणां देवानामुत्कृष्टो योगोऽसंख्ये-
यगुणः । ततो भोगभूमिजा(गता)नां तिर्यङ्मनुष्याणामुत्कृष्टो योगोऽसंख्येयगुणः । ततोऽप्याहारकशरीरिणामुत्कृष्टो
योगोऽसंख्येयगुणः । ततः शेषाणां देवनारकतिर्यङ्मनुष्याणामुत्कृष्टो योगोऽसंख्येयगुणः । असंख्येयगुणकारश्च सर्व-
त्रापि सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगतप्रदेशराशिप्रमाणो द्रष्टव्यः । 'तइयतणुगेसुन्ति' तृतीया तनुराहारकशरीरं ॥१६॥

तदेवं कृता सप्रपञ्चं योगप्ररूपणा, सांप्रतमेभिर्योगैर्यत्करोति तदाह—

जोगेहिं तयणुरूवं परिणमइ गिण्हिऊण पंच तणू । पाउग्गे चालंबइ भासाणुमणत्तणे खंधे ॥ १७ ॥

जोगेहिं ति–योगैरनन्तरोक्तस्वरूपैः प्रायोग्यान् स्कन्धान् पुद्गलस्कन्धान् गृहीत्वा यथायोगं । 'पंचतणु त्ति' पञ्च
शरीराणि परिणमयति औदारिकादिपञ्चशरीरतया परिणमयतीत्यर्थः । कथं पुनर्गृह्णातीति चेदत आह–तदनुरूपं योगा-
नुरूपं । तथाहि–जघन्ययोगे वर्तमानः स्तोकान् पुद्गलस्कन्धान् गृह्णाति, मध्यमे मध्यमान्, उत्कृष्टे च योगे वर्तमानः

प्रभूतानिति । उक्तं चान्यत्रापि–" जोगणुरूवं जीवा परिणामतीह गिण्हिउं दलियन्ति " । अथवा तच्छब्देन पञ्च शरीराणि संबध्यन्ते । ततश्च तदनुरूपं पञ्चशरीरानुरूपं शरीरपञ्चकप्रायोग्यतयेत्यर्थः । पुद्गलस्कन्धान् गृह्णाति । तथा भाषाप्राणापानमनस्त्वप्रायोग्यान् पुद्गलस्कन्धान् प्रथमतो गृह्णाति । गृहीत्वा च भाषादित्वेन परिणमयति । परिणमय्य च तन्निसर्गहेतुसामर्थ्यविशेषसिद्ध्ये तान् पुद्गलस्कन्धानालंबते । ततस्तदवष्टम्भतो जातसामर्थ्यविशेषः सन् विसृजति, नान्यथा । तथाहि–यथा वृषदंशः स्वान्यंगान्यूर्ध्वं गमनाय प्रथमतः संकोचव्याजेनावलंबते, ततस्तदवष्टम्भतो जातसामर्थ्यविशेषः सन् तान्यंगान्यूर्ध्वं प्रक्षिपति, नान्यथा शक्नोति, द्रव्यनिमित्तं वीर्यं संसारिणामुपजायत इति वचनप्रामाण्यात्, तथेहापि भावनीयमिति ॥ १७ ॥

ननु जीवो योगैस्तदनुरूपपुद्गलस्कन्धान् गृह्णाति आलंबते चेत्युक्तं, तत्र के पुद्गला ग्रहणप्रायोग्याः, के चाग्रहणप्रायोग्या इति विनेयजनप्रश्नावकाशमाशंक्य ग्रहणाग्रहणप्रायोग्याः पुद्गलवर्गणाः प्ररूपयति—

परमाणुसंखऽसंखाऽणंतपएसा अभवणंतगुणा । सिद्धाणणंतभागो आहारगवग्गणा तितणू ॥ १८ ॥
अग्गहणंतरियाओ तेयगभासामणे य कम्मे य । धुवअधुवअच्चित्तासुन्नाचउअंतरेसुप्पिं ॥ १९ ॥
पत्तेगतणुसु बायरसुहुमनिगोए तहा महाखंधे । गुणनिप्फन्नसनामो असंखभागंगुलवगाहो ॥ २० ॥

परमाणु त्ति–एकैकपरमाणुरूपास्तथा संख्यातानां परमाणूनामसंख्यातानामनन्तानां च परमाणूनां समुदायरूपा वर्गणा

भवन्ति । तत्रैकैकपरमाणवः परमाणुवर्गणा । इह वर्गणाशब्दः समुदायवाची । तत एकैकस्मिन् परमाणौ वर्गणाशब्दोऽनेकपर्यायोपनिपातापेक्षया द्रष्टव्यः । यदि पुनः परमाणूनां वर्गणा परमाणुवर्गणेत्युच्येत, तर्हि जगति ये केचन परमाणवस्तेषां समुदायः परमाणुवर्गणेत्यापद्येत । तथा च सति "असंखभागंगुलवगाहो" इति विरुध्येत, एकैकपरमाणूना सर्वलोकगतत्वात् । तथा द्वयोः परमाण्वोः समुदायो द्विप्रदेशस्कन्धवर्गणाः । त्रयाणां परमाणूनां समुदायस्त्रिप्रदेशस्कन्धवर्गणाः । चतुर्णां परमाणूनां समुदायश्चतुःप्रदेशस्कन्धवर्गणाः । एवं तावद्वाच्यं यावत्संख्येया वर्गणा भवन्ति । असंख्यातानां च परमाणूनां समुदायरूपा असंख्येया वर्गणा वाच्याः, असंख्यातस्यासंख्यातभेदात्मकत्वात् । ततोऽनन्तानां परमाणूनां समुदायरूपा अनन्ता वर्गणा वाच्याः, अनन्तस्यानन्तभेदात्मकत्वात् । एताश्च मूलत आरभ्य सर्वा अपि जीवानामल्पपरमाणुतया स्थूलपरिमाणत्वेन चाग्रहणप्रायोग्याः अनन्तानन्ताना च परमाणूनां समुदायरूपाः काश्चिद्ग्रहणप्रायोग्याः काश्चिदग्रहणप्रायोग्याः । तत्राभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा ये परमाणवस्तत्समुदायात्मकाः स्कन्धाः । 'आहारगवग्गण त्ति' आहरणं आहारः ग्रहणमित्यर्थः । आहार एवाहारकः, तत्प्रायोग्या वर्गणा आहारकवर्गणा भवन्ति, ग्रहणप्रायोग्या वर्गणा भवन्तीत्यर्थः । किंविषया इत्यत आह–'तितणू इति' औदारिकवैक्रियाहारकरूपतनुत्रयविषये ग्रहणप्रायोग्या वर्गणा अग्रहणान्तरिता अग्रहणप्रायोग्यवर्गणान्तरिताः । तथा तैजसभाषाप्राणापानमनःकर्मणि च विषयेऽग्रहणप्रायोग्यवर्गणान्तरिता ग्रहणप्रायोग्या वर्गणा भवन्ति । तथाहि–अभव्या-

१ वर्गणायोग्यत्वमादायेति न्यायाचार्योपाध्यायाः

नन्तगुणसिद्धानन्तभागकल्पपरमाणुसमुदायरूपा वर्गणा औदारिकशरीरनिष्पादनाय ग्रहणप्रायोग्या भवति । सा च जघन्या । तत एकपरमाण्वधिकस्कन्धरूपा द्वितीया ग्रहणप्रायोग्या वर्गणा । द्विपरमाण्वधिकस्कन्धरूपा तृतीया ग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टा औदारिकशरीरग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टा वर्गणा विशेषाधिका । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । औदारिकशरीरग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा वर्गणाऽग्रहणप्रायोग्या, सा जघन्या । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वाच्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टा वर्गणा अनन्तगुणाः । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । एतासां चाग्रहणप्रायोग्यता औदारिकं प्रति प्रभूतपरमाणुनिष्पन्नत्वात् सूक्ष्मपरिमाणत्वाच्च वेदितव्या । वैक्रियं प्रति पुनः स्वल्पपरमाण्वात्मकत्वात् स्थूलपरिमाणत्वाच्चावसेया । एवमुत्तरत्रापि भावना कार्या । अग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा वर्गणा वैक्रियशरीरप्रायोग्या जघन्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया वैक्रियशरीरस्य ग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणा वैक्रियशरीरविषये ग्रहणप्रायोग्यास्तावद्वक्तव्या यावदुत्कृष्टा ग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिकाः । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । वैक्रियशरीरोत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा

द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा । जघन्यायाश्चोत्कृष्टा वर्गणा अनन्तगुणाः । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । तत उत्कृष्टाग्रहणप्रायोग्यवर्गणापेक्षया एकपरमाण्वधिकस्कन्धरूपा वर्गणा आहारकशरीरप्रायोग्या जघन्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया आहारकशरीरविषये ग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा आहारकशरीरविषये ग्रहणप्रायोग्या वर्गणास्तावद्वाच्या यावदुत्कृष्टा ग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । आहारकशरीरप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपाऽग्रहणप्रायोग्या जघन्यवर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टाऽनन्तगुणा । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । 'इह चूर्णिकृदादयः औदारिकवैक्रियाहारकशरीरप्रायोग्याणां वर्गणानामपान्तरालेऽग्रहणवर्गणा नेच्छन्ति, परं जिनभद्रगणिक्षमाश्रमणादिभिरिष्यन्त इति तन्मतेनोक्ताः' । आहारकशरीराग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा वर्गणा तैजसशरीरप्रायोग्या जघन्या वर्गणा भवति । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया तैजसशरीरप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपास्तैजसशरीरविषये ग्रहणप्रायोग्यवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा ग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या

एव जघन्याया अनन्ततमो भागः । तैजसशरीरप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा । जघन्यायाश्चोत्कृष्टाऽनन्तगुणा । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । अग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्या भाषाप्रायोग्या वर्गणा । यानि पुद्गलद्रव्याणि गृहीत्वा जन्तवः सत्यादिभाषारूपतया परिणमय्यालंब्य च विसृजन्ति, तानि भाषाप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया भाषाप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा भाषाप्रायोग्यास्तावद्वक्तव्या यावदुत्कृष्टा भाषाप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । उत्कृष्टभाषाप्रायोग्यवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा । जघन्यायाश्चोत्कृष्टाऽनन्तगुणा । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । अग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्या प्राणापानयोग्या वर्गणा । यानि पुद्गलद्रव्याणि गृहीत्वा जन्तवः प्राणापानरूपतया परिणमय्यालंब्य च विसृजन्ति तानि प्राणापानयोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया प्राणापानयोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपाः प्राणापानयोग्या वर्गणास्तावद्वक्तव्या

यावदुत्कृष्टा प्राणापानयोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या एव जघन्याया अनन्ततमो भागः । प्राणापानयोग्योत्कृष्टवर्गणापेक्षया चैकपरमाण्वधिकस्कन्धरूपा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टाऽनन्तगुणा । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । ततोऽग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षया एकपरमाण्वधिकस्कन्धरूपा मनःप्रायोग्या जघन्या वर्गणा । इह यानि पुद्गलद्रव्याणि जन्तवः सत्यादिमनोरूपतया परिणमय्यालंब्य च विसृजन्ति, तानि मनःप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया मनःप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा मनःप्रायोग्या वर्गणास्तावद्वाच्या यावदुत्कृष्टा मनःप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । तत उत्कृष्टमनःप्रायोग्यवर्गणापेक्षया एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्याऽग्रहणप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽग्रहणप्रायोग्या वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा अग्रहणप्रायोग्या वर्गणास्तावद्वाच्या यावदुत्कृष्टाऽग्रहणप्रायोग्या वर्गणा । जघन्यायाश्चोत्कृष्टाऽनन्तगुणा । गुणकारश्चाभव्यानन्तगुणसिद्धानन्तभागकल्पराशिप्रमाणो द्रष्टव्यः । ततोऽग्रहणप्रायोग्योत्कृष्टवर्गणापेक्षयैकपरमाण्वधिकस्कन्धरूपा कर्मप्रायोग्या जघन्या वर्गणा । इह यानि पुद्गलद्रव्याणि जन्तवो ज्ञानावरणीयादिरूपतया परिणमयन्ति, तानि कर्मप्रायोग्या वर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया कर्मप्रायोग्या

वर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपाः कर्मप्रायोग्या वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा कर्मप्रायोग्या वर्गणा भवति । जघन्यायाश्चोत्कृष्टा विशेषाधिका । विशेषश्च तस्या एव जघन्याया वर्गणाया अनन्ततमो भागः । 'भासामणे य' इत्यत्र चशब्दस्यानुक्तसमुच्चयार्थत्वाद् भाषावर्गणानन्तरमग्रहणवर्गणान्तरिताः प्राणापानवर्गणा द्रष्टव्याः । ताश्च भाविता एव । 'कम्मे य' इत्यत्र चशब्दः समुच्चये । इदानीमेतासामेवौदारिकादिप्रायोग्यवर्गणानां वर्णादि निरूप्यते–तत्रौदारिकशरीरप्रायोग्या वर्गणा अनन्तानन्तपरमाण्वात्मकाः पञ्चवर्णा द्विगन्धाः पंचरसा अष्टस्पर्शाश्च । एवं वैक्रियाहारकशरीरप्रायोग्या अपि वर्गणा द्रष्टव्याः । तैजसशरीरप्रायोग्या वर्गणाः पञ्चवर्णा द्विगन्धाः पञ्चरसाश्चतुःस्पर्शाः । तत्र मृदुलघुरूपौ द्वौ स्पर्शाववस्थितौ, अन्यौ तु द्वौ स्पर्शौ स्निग्धोष्णौ स्निग्धशीतौ रूक्षोष्णौ रूक्षशीतौ वा । एवं भाषाप्राणापानमनःकर्मप्रायोग्या अपि वर्गणा द्रष्टव्याः । तत्रौदारिकवर्गणाः प्रदेशार्थतया सर्वस्तोकाः । ताभ्यो वैक्रियशरीरप्रायोग्या वर्गणा अनन्तगुणाः । ताभ्य आहारकशरीरप्रायोग्या वर्गणा अनन्तगुणाः । ताभ्योऽपि तैजसशरीरप्रायोग्या वर्गणा अनन्तगुणाः । एवं भाषाप्राणापानमनःकर्मप्रायोग्या अपि वर्गणा यथोत्तरमनन्तगुणा वाच्याः । 'ध्रुवअध्रुवेत्यादि' कर्मप्रायोग्योत्कृष्टवर्गणानन्तरं ध्रुवाचित्तद्रव्यवर्गणास्तदनन्तरं चाध्रुवाचित्तवर्गणाः । ततः 'सुन्ना चउ त्ति' चतस्रो ध्रुवशून्यवर्गणाः । तासां च चतसृणां ध्रुवशून्यवर्गणानामन्तरे उपरिष्टात् प्रत्येकतनुषु बादरसूक्ष्मनिगोदे (दयोः) महास्कन्धे च वर्गणा यथासंख्यं भवन्ति । तद्यथा–प्रथमध्रुवशून्यवर्गणाया उपरि प्रत्येकशरीरवर्गणा, द्वितीयध्रुवशून्यवर्गणाया उपरि बादरनिगोदवर्गणा, तृतीयध्रुवशून्यवर्गणाया उपरि सूक्ष्मनिगोदवर्गणा, चतुर्थध्रुवशून्यवर्गणाया उपरि महास्कन्ध-

वर्गणा । तत्र कर्मप्रायोग्योत्कृष्टवर्गणानन्तरमेकपरमाण्वधिकस्कन्धरूपा जघन्या ध्रुवाचित्तद्रव्यवर्गणा । ततो द्विपरमा-
ण्वधिकस्कन्धरूपा द्वितीया ध्रुवाचित्तद्रव्यवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा ध्रुवाचित्तद्रव्यवर्गणास्तावद्वक्तव्या
यावदुत्कृष्टा ध्रुवाचित्तद्रव्यवर्गणा । ध्रुवाचित्तद्रव्यवर्गणा नाम याः सर्वदैव लोके प्राप्यन्ते । तथाहि–एतासां मध्येऽन्या
उत्पद्यन्तेऽन्या विनश्यन्ति, न पुनरेताभिः कदाचनापि लोको विरहितो भवति । अचित्तत्वं चासां जीवेन कदाचनापि
अग्रहणादवसेयं । जीवसंबन्धाद्धि सचित्तत्वमपि कथञ्चित् स्यात् यथौदारिकादिशरीराणामिति । जघन्यायाश्च वर्गणायाः
सकाशादुत्कृष्टा वर्गणा अनन्तगुणाः । गुणकारश्च सर्वजीवानन्तगुणराशिप्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्क-
न्धरूपा जघन्याऽध्रुवाचित्तद्रव्यवर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीयाऽध्रुवाचित्तद्रव्यवर्गणा । एवमेकैकप-
रमाण्वधिकस्कन्धरूपा अध्रुवाचित्तद्रव्यवर्गणास्तावद्वाच्या यावदुत्कृष्टाऽध्रुवाचित्तद्रव्यवर्गणा भवति । अध्रुवाचित्तद्र-
व्यवर्गणा नाम यासां मध्ये काश्चिद्वर्गणाः कदाचिल्लोके भवन्ति, कदाचिच्च न भवन्ति । अत एवैताः सान्तरनिरन्तरा अप्युच्य-
न्ते । जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टा वर्गणाऽनन्तगुणा । गुणकारश्च सर्वजीवानन्तगुणराशिप्रमाणो द्रष्टव्यः । तत
एकपरमाण्वधिकस्कन्धरूपा जघन्या प्रथमध्रुवशून्यवर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया प्रथमध्रुवशून्यवर्गणा ।
एवमेकैकपरमाण्वधिकस्कन्धरूपाः प्रथमध्रुवशून्यवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा प्रथमध्रुवशून्यवर्गणा भवति । ध्रुवशून्य-

१ भिन्नक्रम कथञ्चिदित्यस्मादग्रे योज्यश्च । यद्वा यथौदारिकादिशरीराणा जीवसबधात्कथञ्चित्सचित्तत्वमस्ति तथा भवेदासामपि, पर नैना-
स्त्याभिर्जीवसबन्ध इत्यचित्ता एवैता', कथञ्चित्सचित्तता तु स्वरूपतोऽचित्तत्वादौदारिकादिशरीराणाम् ।

वर्गणा नाम याः कदाचनापि लोके न भवन्ति। केवलमुपरितनवर्गणानां बाहुल्यपरिज्ञानार्थं प्ररूपणामात्रमेव क्रियते । जघन्यायाश्च वर्गणायाः सकाशादुत्कृष्टा वर्गणाऽनन्तगुणा । गुणकारश्च सर्वजीवानन्तगुणराशिप्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या प्रत्येकशरीरिद्रव्यवर्गणा। अथ केयं प्रत्येकशरीरिद्रव्यवर्गणा नाम ? उच्यते—प्रत्येकशरीरिणां यथासंभवमौदारिकवैक्रियाहारकतैजसकार्मणेषु शरीरनामकर्मसु ये प्रत्येकं विश्रसापरिणामेनोपचयमापन्नाः सर्वजीवानन्तगुणाः पुद्गलास्ते प्रत्येकशरीरिद्रव्यवर्गणा। तत एकपरमाण्वधिकस्कन्धरूपा द्वितीया प्रत्येकशरीरिद्रव्यवर्गणा। एवमेकैकपरमाण्वधिकस्कन्धरूपाः प्रत्येकशरीरिद्रव्यवर्गणास्तावद्वाच्या यावदुत्कृष्टा प्रत्येकशरीरिद्रव्यवर्गणा भवति। जघन्यायाश्चोत्कृष्टाऽसङ्ख्येयगुणा । गुणकारश्च सूक्ष्मक्षेत्रपल्योपमासंख्येयभागलक्षणः । कथमेतदवसीयत इति चेदुच्यते—इह सर्वोऽपि कर्मप्रदेशोपचयो योगाद्भवति, 'जोगा पयडिपएसं' इति वचनात् । ततो जघन्ये योगे सति जघन्यः कर्मप्रदेशोपचयो भवति, उत्कृष्टे चोत्कृष्टः । जघन्याच्च योगस्थानादुत्कृष्टं योगस्थानं सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगुणितमेव प्राप्यते नाधिकं । ततः कर्मप्रदेशोपचयादपि जघन्यादुत्कृष्टः कर्मप्रदेशोपचयः सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगुणित एव भवति, नाधिकः । तदाश्रिता च प्रत्येकशरीरिद्रव्यवर्गणा । ततः प्रत्येकशरीरिद्रव्यवर्गणाऽप्युत्कृष्टा जघन्यप्रत्येकशरीरिद्रव्यवर्गणापेक्षया सूक्ष्मक्षेत्रपल्योपमासंख्येयभागगुणितैव भवति । ततोऽनन्तरमेकपरमाण्वधिकस्कन्धरूपा जघन्या द्वितीयध्रुवशून्यवर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया द्वितीयध्रुवशून्यवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा द्वितीयध्रुवशून्यवर्गणास्तावद्वक्तव्या यावदुत्कृष्टा द्वितीयध्रुवशून्यवर्गणा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्चासंख्येयलोका-

काशप्रदेशराशिप्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या बादरनिगोदवर्गणा । अथ केयं बादरनिगोदद्रव्यवर्गणा नाम ? उच्यते—बादरनिगोदजीवानामौदारिकतैजसकार्मणेषु शरीरनामकर्मसु प्रत्येकं ये सर्वजीवानन्तगुणाः पुद्गला विश्रसापरिणामेनोपचयमायान्ति ते बादरनिगोदद्रव्यवर्गणा । तत्र बादरनिगोदजीवानां यद्यपि केषांचित् कियत्काल वैक्रियाहारकशरीरनामकर्मणी अपि संभवतः, तथापि ते प्रथमसमयादेव निरन्तरमुद्वल्यमानत्वादत्यन्तमसारे इति न विवक्ष्येते । ततो द्विपरमाण्वधिकस्कन्धरूपा वर्गणा द्वितीया बादरनिगोदद्रव्यवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा बादरनिगोदद्रव्यवर्गणा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्च क्षेत्रपल्योपमासंख्येयभागलक्षणः । अत्र युक्तिः प्रत्येकशरीरिद्रव्यवर्गणायामिव परिभावनीया । तत एकपरमाण्वधिकस्कन्धरूपा जघन्या तृतीयध्रुवशून्यवर्गणा । ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया तृतीयध्रुवशून्यवर्गणा । एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा तृतीयध्रुवशून्यवर्गणा भवति । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्चांगुलमात्रे क्षेत्रे आवलिकाया असंख्येयतमे भागे यावन्तः समयास्तावन्ति वर्गमूलानि गृह्यन्ते, गृहीत्वा च चरमस्य वर्गमूलस्यासंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्प्रमाणो द्रष्टव्यः । तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या सूक्ष्मनिगोदद्रव्यवर्गणा । सा च सूक्ष्मनिगोदवर्गणा बादरनिगोदद्रव्यवर्गणावदविशेषेणावगन्तव्या, यावदुत्कृष्टा । जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा । गुणकारश्चावलिकाया असंख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणो द्रष्टव्यः । यतः सूक्ष्मनिगोदजीवानां जघन्याद्योगस्थानादुत्कृष्टं योगस्थानं आवलिकाऽसंख्येयभागगुणि-

तमेव प्राप्यते, नाधिकं। योगाधीना च कर्मप्रदेशोपचयवृद्धिः, तदधीना च सूक्ष्मनिगोदवर्गणेति। तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या तुरीयध्रुवशून्यवर्गणा। ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया तुरीयध्रुवशून्यवर्गणा। एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा तुरीयध्रुवशून्यवर्गणा। जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा। गुणकारश्च प्रतरासंख्येयभागवर्त्यसंख्येयश्रेणिगताकाशप्रदेशराशिप्रमाणो द्रष्टव्यः। तत एकपरमाण्वधिकस्कन्धरूपा वर्गणा जघन्या महास्कन्धवर्गणा। महास्कन्धवर्गणा नाम ये पुद्गलस्कन्धा विश्रसापरिणामेन टंककूटपर्वतादिसमाश्रिताः। ततो द्विपरमाण्वधिकस्कन्धरूपा द्वितीया महास्कन्धवर्गणा। एवमेकैकपरमाण्वधिकस्कन्धरूपा वर्गणास्तावद्वक्तव्या यावदुत्कृष्टा भवति। जघन्यायाश्चोत्कृष्टाऽसंख्येयगुणा। गुणकारश्च पल्योपमासंख्येयभागरूपो द्रष्टव्यः। इमाश्च महास्कन्धवर्गणा यदा भूयान् त्रसकायो भवति तदा स्तोकाः प्राप्यन्ते, यदा त्वल्पस्तदा प्रभूता इति वस्तुस्वभाव एषः। एताश्च परमाणुवर्गणाद्या महास्कन्धवर्गणापर्यवसानाः 'गुणणिप्फन्नसनाम त्ति' गुणैः कृत्वा निष्पन्नं स्वं स्वकीयं नाम यासां ता गुणनिष्पन्नस्वनामानः। तथाहि—एकैकपरमाणवः परमाणुवर्गणा, द्वयोः परमाण्वोर्वर्गणा द्विपरमाणुवर्गणाः, इत्येवं नाम्नां यथार्थता विद्यते एव। तथा 'असंखभागंगुलवगाहो त्ति' सर्वासामपि वर्गणानामवगाहोऽङ्गुलस्यासंख्येयो भागः। तथाहि—एता वर्गणाः सर्वा अपि सर्वोत्कृष्टमहास्कन्धवर्गणापर्यवसानाः प्रदेशापेक्षया यथोत्तरं महत्यः। महत्तरा अपि भवन्त्यः प्रत्येकमेकैकाः सत्योऽङ्गुलासंख्येयभागमात्रक्षेत्रावगाहा एव विद्यन्ते। यदा पुनः सामस्त्येन प्रत्येकं विभज्यन्ते, तदा सर्वा अप्येताः परमाणुवर्गणाद्याः सर्वोत्कृष्टमहास्कन्धवर्गणापर्यवसानाः प्रत्येकमनन्तानन्ताः सकललो-

काश्रिता अवगन्तव्याः । तथा कार्मणशरीरप्रायोग्यवर्गणात आरभ्यार्वाक् यावदौदारिकशरीरप्रायोग्या वर्गणास्तावत् क्षेत्रावगाहोऽसंख्येयगुणो द्रष्टव्यः, तद्यथा—कर्मवर्गणावगाहक्षेत्रान्मनोवर्गणावगाहक्षेत्रं प्रदेशतोऽसंख्येयगुणं। ततोऽप्या- नप्राणावगाहक्षेत्रं प्रदेशतोऽसंख्येयगुणमित्यादि ॥ १८-१९-२० ॥

इह योगैस्तदनुरूपपुद्गलस्कन्धान् गृहीत्वा शरीरादिरूपतया परिणमयतीत्युक्तं, तत्र तान् पुद्गलान् किं जीवो देशेन गृह्णाति उत सर्वात्मनेत्येवं प्रश्नावकाशमाशंक्योत्तरं वितितीर्षुराह—

एगमवि गहणदव्वं सव्वप्पणयाएँ जीवदेसम्मि । सव्वप्पणया सव्वत्थ वावि सव्वे गहणखंधे ॥ २१ ॥

एग त्ति—इह जीवः स्वप्रदेशावगाढमेव दलिकं गृह्णाति, न त्वनन्तरपरंपरप्रदेशावगाढं । तत्रैकस्मिन् जीवप्रदेशे यद- वगाढं ग्रहणद्रव्यं ग्रहणप्रायोग्यं दलिकं तदेकमपि गृह्णाति । 'सयप्पणयाए त्ति' सर्वात्मना गृह्णाति सर्वैरेवात्मप्रदेशै- र्गृह्णातीत्यर्थः । जीवप्रदेशानां सर्वेषामपि शृंखलावयवानामिव परस्परं संबन्धविशेषभावात् । तथाहि—एकस्मिन् जीव- प्रदेशे स्वक्षेत्रावगाढग्रहणप्रायोग्यद्रव्यग्रहणाय व्याप्रियमाणे सर्वेऽप्यात्मप्रदेशा अनन्तरपरंपरतया तद्द्रव्यग्रहणाय व्याप्रि- यन्ते । यथा हस्ताग्रेण कस्मिंश्चिद्ग्राह्ये घटादिके गृह्यमाणे मणिबन्धकूर्परांसादयोऽपि तद्ग्रहणायानन्तरपरंपरतया व्याप्रि- यन्ते, तथा 'सव्वत्थ वावि त्ति' सर्वत्रापि सर्वेष्वपि जीवप्रदेशेषु येऽवगाढा ग्रहणप्रायोग्याः स्कन्धाः, तानपि ग्रहणप्रायो- ग्यान् स्कन्धान् सर्वान् गृह्णाति जीवः सर्वात्मना सर्वैरेवात्मप्रदेशैः एकैकस्कन्धग्रहणं प्रति सर्वजीवप्रदेशानामनन्तरपरं- परतया व्याप्रियमाणत्वात् इति ॥ २१ ॥

इह पुद्गलद्रव्याणां परस्परं संबन्धः स्नेहतो भवति। ततोऽवश्यं स्नेहप्ररूपणा कर्तव्या। सा च त्रिधा। तद्यथा—स्नेहप्रत्ययस्पर्धकप्ररूपणा, नामप्रत्ययस्पर्धकप्ररूपणा, प्रयोगप्रत्ययस्पर्धकप्ररूपणा च। तत्र स्नेहप्रत्ययस्य स्नेहनिमित्तस्य स्पर्धकस्य प्ररूपणा स्नेहप्रत्ययस्पर्धकप्ररूपणा। तथा शरीरबन्धननामकर्मोदयतः परस्परं बद्धानां शरीरपुद्गलानां स्नेहमधिकृत्य स्पर्धकप्ररूपणा नामप्रत्ययस्पर्धकप्ररूपणा। शब्दार्थश्चायं—नामप्रत्ययस्य बन्धननामनिमित्तस्य शरीरप्रदेशस्पर्धकस्य प्ररूपणा नामप्रत्ययस्पर्धकप्ररूपणा। तथा प्रकृष्टो योगः प्रयोगः, तेन प्रत्ययभूतेन कारणभूतेन ये गृहीताः पुद्गलास्तेषां स्नेहमधिकृत्य स्पर्धकप्ररूपणा प्रयोगप्रत्ययस्पर्धकप्ररूपणा। तत्र प्रथमतः स्नेहप्रत्ययस्पर्धकप्ररूपणार्थमाह—

नेहप्पच्चयफड्डगमेगं अविभागवग्गणा णंता। हस्सेण बहू बद्धा असंखलोगे दुगुणहीणा ॥ २२ ॥

नेहत्ति—स्नेहप्रत्ययं स्नेहनिमित्तं एकैकस्नेहाविभागवृद्धानां पुद्गलवर्गणानां समुदायरूपं स्पर्धकं स्नेहप्रत्ययस्पर्धकं। तच्चैकमेव भवति। तस्मिंश्च स्पर्धकेऽविभागवर्गणा एकैकस्नेहाविभागाधिकपरमाणुसमुदायरूपा वर्गणा अनन्ता द्रष्टव्याः। तत्र ह्रस्वेनाल्पेन स्नेहेन ये बद्धा युक्ताः पुद्गलास्ते बहवः, अर्थाच्च प्रभूतेन स्नेहेन बद्धाः स्तोकाः। तथा 'असंखलोगे दुगुणहीण त्ति' आदिवर्गणायाः परतोऽसंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य याऽनन्तरा वर्गणा तस्या पुद्गलाः प्रथमवर्गणागतपुद्गलापेक्षया द्विगुणहीना भवन्ति। पुनरपि ततोऽसंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्यानन्तरायां वर्गणायां पुद्गला द्विगुणहीना भवन्ति। एवं तावद्वाच्यं यावद्वक्ष्यमाणा संख्येयभागहानिगता चरमा वर्गणा। इयमत्र भावना—इह यः सर्वोत्कृष्टः स्नेहः स केवलिप्रज्ञाछेदनकेन छिद्यते, छित्त्वा छित्त्वा च निर्विभागा भागाः

पृथक् पृथक् व्यवस्थाप्यन्ते । तत्र जगति ये केचित् परमाणव एकेन स्नेहस्य निर्विभागेन भागेन युक्ताः सन्ति, तेषां समुदायः प्रथमा वर्गणा । ये पुनर्द्वाभ्यां स्नेहाविभागाभ्यां युक्ताः परमाणवः सन्ति, तेषां समुदायो द्वितीया वर्गणा । एवं त्रिभिः स्नेहाविभागैर्युक्तानां समुदायस्तृतीया वर्गणा । एवं संख्येयैः स्नेहाविभागैर्युक्तानां संख्येया वर्गणा वाच्या । असंख्येयैः स्नेहाविभागैर्युक्तानां पुनरसंख्येया वर्गणाः । अनन्तैः स्नेहाविभागैर्युक्तानां त्वनन्ता वर्गणाः । द्विधा चात्र प्ररूपणा, तद्यथा—अनन्तरोपनिधया परंपरोपनिधया च । तत्र तावत्प्रथमतोऽनन्तरोपनिधया प्ररूपणा क्रियते—प्रथमायां वर्गणायामेकस्नेहाविभागयुक्तपुद्गलसमुदायरूपाया यावन्तः पुद्गलास्तदपेक्षया द्वितीयस्यां वर्गणायां स्नेहाविभागद्वय-युक्तपुद्गलसमूहरूपायां पुद्गला असंख्येयभागहीना भवन्ति । ततोऽपि तृतीयस्या वर्गणायामसंख्येयभागहीनाः । एवं प्रति वर्गणामसंख्येयभागहान्या पुद्गलास्तावद्वाच्या यावदनन्ता वर्गणा गता भवन्ति । ततोऽनन्तरायां पुद्गलाः प्राक्त-नवर्गणागतपुद्गलापेक्षया संख्येयभागहीना भवन्ति । ततोऽग्रेतन्यामपि वर्गणायां पुद्गलाः संख्येयभागहीनाः । एवं संख्येयभागहान्यापि वर्गणा अनन्ता वाच्याः । ततोऽनन्तरायां वर्गणायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षया संख्ये-यगुणहीना भवन्ति । ततोऽग्रेतन्यामपि वर्गणाया पुद्गलाः संख्येयगुणहीनाः । एवं संख्येयगुणहान्याप्यनन्ता वर्गणा वाच्याः । ततोऽनन्तरायां वर्गणायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षयाऽसंख्येयगुणहीना भवन्ति । ततोऽग्रेतन्यामपि वर्गणायां पुद्गला असंख्येयगुणहीनाः । एवमसंख्येयगुणहान्याप्यनन्ता वर्गणा वक्तव्याः । ततोऽनन्तरायां वर्गणायां पुद्गलाः प्राक्तनवर्गणागतपुद्गलापेक्षयाऽनन्तगुणहीना भवन्ति । ततोऽग्रेतन्यामपि वर्गणायां पुद्गला अनन्तगुणहीनाः ।

एवमनन्तगुणहान्याप्यनन्ता वर्गणा वाच्याः यावत्सर्वोत्कृष्टा वर्गणाः। तदेवं कृताऽनन्तरोपनिधया प्ररूपणा, संप्रति परंपरोपनिधया क्रियते। तत्र प्रथमवर्गणायाः परतोऽसंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य या पराऽन्या वर्गणा तस्यां पुद्गलाः प्रथमवर्गणागतपुद्गलापेक्षया द्विगुणहीना भवन्ति, अर्धा भवन्तीत्यर्थः। ततः पुनरप्यसंख्येयलोकाकाशप्रदेशप्रमाणा वर्गणा अतिक्रम्य या पराऽनन्तरा वर्गणा तस्यां पुद्गला अर्धा भवन्ति। एवं भूयो भूयस्तावदवगन्तव्यं यावदसंख्येयभागहानिगता चरमा वर्गणा। ततः परं संख्येयभागहानिगता वर्गणाः संख्येया अतिक्रम्यानन्तरायां वर्गणायां पुद्गला असंख्येयभागहानिगतचरमवर्गणापुद्गलापेक्षयाऽर्धा भवन्ति। ततः पुनरपि संख्येया वर्गणा अतिक्रम्यानन्तरायां वर्गणायां पुद्गला अर्धा भवन्ति। एवं भूयो भूयस्तावद्वक्तव्यं यावत्संख्येयभागहानावपि चरमा वर्गणा। उपरितनीषु चतसृषु हानिषु इयं परंपरोपनिधा न संभवति। यतः प्रथमायामपि संख्येयगुणहानिवर्गणायां पुद्गलाः संख्येयभागहानिसत्कचरमवर्गणान्तर्गतपुद्गलापेक्षया संख्येयगुणहीनाः प्राप्यन्ते। संख्येयगुणहीनाश्च जघन्यतोऽपि त्रिगुणहीनाश्चतुर्गुणहीना वा गृह्यन्ते, न तु द्विगुणहीनाः, यतः संख्येयं प्रायः सर्वत्राप्यजघन्योत्कृष्टं त्रिप्रभृत्येव गृह्यते, न तु द्वौ, नापि सर्वोत्कृष्टं तदुक्तमनुयोगद्वारचूर्णौ—"सिद्धंते य जत्थ जत्थ संखेज्जगगहणं तत्थ तत्थ अजहन्नमणुक्कोसयं दट्ठव्वं ति"। तत इत ऊर्ध्वं द्विगुणहीना न प्राप्यन्ते, किंतु त्रिगुणचतुर्गुणादिहीना इति नेयं द्विगुणहान्या परंपरोपनिधा संभवति। तस्मान्मूलत आरभ्यान्यथात्र परंपरोपनिधया प्ररूपणा क्रियते—असंख्येयभागहानौ प्रथमान्तिमवर्गणयोरपान्तराले प्रथमवर्गणापेक्षया काश्चिद्वर्गणा असंख्येयभागहीनाः काश्चित्संख्येयभागहीनाः काश्चिरसंख्येय-

गुणहीनाः काश्चिदसंख्येयगुणहीनाः काश्चिदनन्तगुणहीनाः । एवमसंख्येयभागहानौ प्रथमवर्गणापेक्षया पञ्चापि हानयः संभवन्ति । संख्येयभागहानौ पुनरसंख्येयभागहानिवर्जाः शेषाश्चतस्रोऽपि हानयः संभवन्ति । तद्यथा–संख्येयभागहानिप्रथमान्तिमवर्गणयोरपान्तराले प्रथमवर्गणापेक्षया काश्चिद्वर्गणाः संख्येयभागहीनाः, काश्चित्संख्येयगुणहीनाः, काश्चिदसंख्येयगुणहीनाः काश्चिदनन्तगुणहीनाः । संख्येयगुणहानौ पुनरसंख्येयभागहानिसंख्येयभागहानिवर्जाः शेषास्तिस्रो हानयः संभवन्ति । तद्यथा–संख्येयगुणहानौ प्रथमान्तिमवर्गणयोरपान्तराले प्रथमवर्गणापेक्षया काश्चिद्वर्गणाः संख्येयगुणहीनाः, काश्चिदसंख्येयगुणहीनाः, काश्चिदनन्तगुणहीनाः । असंख्येयगुणहानौ पुनर्द्वे एव हानी । तथाहि–असंख्येयगुणहानौ प्रथमान्तिमवर्गणयोरपान्तराले प्रथमवर्गणापेक्षया काश्चिद्वर्गणा असंख्येयगुणहीनाः, काश्चिदनन्तगुणहीनाः । अनन्तगुणहानौ त्वनन्तगुणहानिरेवैका । तदेवं कृता परंपरोपनिधया प्ररूपणा । सांप्रतमल्पबहुत्वमुच्यते–तत्रासंख्येयभागहानौ वर्गणाः स्तोकाः । ताभ्यः संख्येयभागहानौ वर्गणा अनन्तगुणाः । ताभ्योऽपि संख्येयगुणहानौ वर्गणा अनन्तगुणाः । ताभ्योऽप्यसंख्येयगुणहानौ वर्गणा अनन्तगुणाः । ताभ्योऽप्यनन्तगुणहानौ वर्गणा अनन्तगुणाः । तथाऽनन्तगुणहानौ पुद्गलाः सर्वस्तोकाः । तेभ्योऽसंख्येयगुणहानौ पुद्गला अनन्तगुणाः । तेभ्योऽपि संख्येयगुणहानौ पुद्गला अनन्तगुणाः । तेभ्योऽपि संख्येयभागहानौ पुद्गला अनन्तगुणाः । तेभ्योऽप्यसंख्येयभागहानौ पुद्गला अनन्तगुणाः ॥ २२ ॥

तदेवमुक्तं सप्रपञ्चं स्नेहप्रत्ययं स्पर्धकं, इदानीं नामप्रत्ययस्पर्धकप्रयोगप्रत्ययस्पर्धकप्ररूपणां चिकीर्षुरिदमाह—

नामप्पओगपच्चयगेसु वि नेया अनंतगुणणाए। धणिया देसगुणा सिं जहन्नजेठे सगे कट्टु ॥ २३ ॥

नाम त्ति–इह नामप्रत्ययस्पर्धकप्ररूपणायां षडनुयोगद्वाराणि । तद्यथा–अविभागप्ररूपणा १, वर्गणाप्ररूपणा २, स्पर्धकप्ररूपणा ३, अन्तरप्ररूपणा ४, वर्गणापुद्गलस्नेहाविभागसकलसमुदायप्ररूपणा ५, स्थानप्ररूपणा ६, चेति । तत्र प्रथमतोऽविभागप्ररूपणा क्रियते–औदारिकादिशरीरपञ्चकप्रायोग्यानां परमाणूनां यो रसः, स केवलिप्रज्ञाछेदनकेन छिद्यते । छित्त्वा च निर्विभागा भागाः क्रियन्ते, ते च निर्विभागा भागा गुणपरमाणवो वा भावपरमाणवो वा प्रोच्यन्ते । एषाऽविभागप्ररूपणा । तत्रैकेन स्नेहाविभागेन युक्ताः शरीरयोग्याः पुद्गला न भवन्ति । किमुक्तं भवति ? औदारिकौदारिकबन्धनादीनां पञ्चदशाना बन्धनानामन्यतमस्यापि बन्धनस्य विषया न भवन्तीत्यर्थः । नापि द्वाभ्यां स्नेहाविभागाभ्यां युक्ता । नापि त्रिभिर्नापि संख्येयैर्नाप्यसंख्येयैर्नाप्यनन्तैः, किं त्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैः, ततस्तेषां पुद्गलानां समुदायः प्रथमा वर्गणा, सा च जघन्या । तत एकेन स्नेहाविभागेनाधिकानां पुद्गलानां समुदायो द्वितीया वर्गणा । द्वाभ्यां स्नेहाविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । एवमेकैकाविभागवृद्ध्या निरन्तरं तावद्वर्गणा वाच्या यावदभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा भवन्ति । एतासां च समुदाय एकं स्पर्धकं । तत इत ऊर्ध्वमेकेन स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिभिः, नापि संख्येयैः, नाप्यसंख्येयैः, नाप्यनन्तैः, किंत्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैरधिकाः प्राप्यन्ते । ततस्तेषां समुदायो द्वितीयस्य स्पर्धकस्य

प्रथमा वर्गणा । तस्यां कियन्तः स्नेहाविभागा इति चेदुच्यते—यावन्तः प्रथमस्पर्धकप्रथमवर्गणायां स्नेहाविभागास्तावन्तो द्विगुणाः । तत एकेन स्नेहाविभागेनाधिकानां परमाणूनां समुदायो द्वितीया वर्गणा । द्वाभ्यां स्नेहाविभागाभ्यामधिकानां समुदायस्तृतीया वर्गणा । एवमेकैकस्नेहाविभागवृद्ध्या निरन्तरं वर्गणास्तावद्वाच्या यावदभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा भवन्ति । ततस्तासा समुदायो द्वितीयं स्पर्धकं । ततः पुनरप्यत ऊर्ध्वमेकेन स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यन्ते. नापि द्वाभ्यां, नापि त्रिभिः, यावन्नापि संख्येयैः, नाप्यसंख्येयैः, नाप्यनन्तैः, किंत्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैः । ततस्तेषां परमाणूनां समुदायस्तृतीयस्पर्धकस्य प्रथमा वर्गणा । तस्यां कियन्तः स्नेहाविभागा इति चेदुच्यते—यावन्तः प्रथमस्पर्धकसत्कप्रथमवर्गणाया तावन्तस्त्रिगुणाः । तत एकेन स्नेहाविभागेनाधिकानां परमाणूनां समुदायो द्वितीया वर्गणा । द्वाभ्यां स्नेहाविभागाभ्यामधिकानां समुदायतृस्तीया वर्गणा । एवमेकैकस्नेहाविभागवृद्ध्या निरन्तरं वर्गणास्तावद्वाच्या यावदभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा भवन्ति । ततस्तासां समुदायस्तृतीयं स्पर्धकं । ततः पुनरप्यत ऊर्ध्वमेकेन स्नेहाविभागेनाधिकाः परमाणवो न प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिभिः, यावन्नापि संख्येयैः, नाप्यसंख्येयैः, नाप्यनन्तैः किंत्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैरधिकाः प्राप्यन्ते । ततस्तेषां समुदायश्चतुर्थस्य स्पर्धकस्य प्रथमा वर्गणा । तस्यां कियन्तः स्नेहाविभागा इति चेदुच्यते—प्रथमस्पर्धकसत्कप्रथमवर्गणाया यावन्तः स्नेहाविभागास्तावन्तश्चतुर्गुणाः । एवं यतिसंख्यं यतिसंख्यं स्पर्धकं चिन्तयितुमारभ्यते, तद्यथा—पञ्चमं दशमं विंशतितमं सहस्रतमं लक्षतमं तावत्संख्यागुणिताः प्रथमस्पर्धकसत्कप्रथमवर्गणागताः स्नेहाविभागास्तति-

संख्यस्य ततिसंख्यस्य स्पर्धकस्यादिवर्गणायां द्रष्टव्याः । तानि च स्पर्धकानि कियन्ति भवन्तीति चेदुच्यते–अभव्येभ्योऽनन्तगुणानि सिद्धानामनन्तभागकल्पानि । अन्तराणि कियन्ति भवन्तीति चेदुच्यते–रूपोनस्पर्धकतुल्यानि । तथाहि–चतुर्णामन्तराणि त्रीण्येव भवन्ति, नोनाधिकानि । एवमत्रापि भावनीयं । वर्गणास्वानन्तर्येण द्वे वृद्धी भवतः । तद्यथा–एकैकाविभागवृद्धिः, अनन्तानन्तविभागवृद्धिश्च । तत्रैकैकाविभागवृद्धिः स्पर्धकगतानां वर्गणानां यथोत्तरं, अनन्तानन्तविभागवृद्धिः पाश्चात्यस्पर्धकगतचरमवर्गणापेक्षयोत्तरस्पर्धकस्यादिवर्गणायाः, पारंपर्येण पुनः प्रथमस्पर्धकमत्कप्रथमवर्गणापेक्षया षडपि वृद्धयोऽवगन्तव्याः । तद्यथा–अनन्तभागवृद्धिः, असंख्येयभागवृद्धिः, संख्येयभागवृद्धिः, संख्येयगुणवृद्धिः, असंख्येयगुणवृद्धिः, अनन्तगुणवृद्धिश्चेति । तदेवं कृता वर्गणाप्ररूपणा स्पर्धकप्ररूपणा अन्तरप्ररूपणा च । सांप्रतं वर्गणागतपुद्गलस्नेहाविभागसमुदायप्ररूपणा क्रियते–तत्र प्रथमस्य शरीरस्थानस्य प्रथमायां वर्गणायां स्नेहाविभागाः स्तोकाः । ततो द्वितीयस्य शरीरस्थानस्य प्रथमवर्गणायामनन्तगुणाः । तेभ्योऽपि तृतीयशरीरस्थानस्य प्रथमवर्गणायामनन्तगुणाः । एवमनन्तगुणया श्रेण्या सर्वाण्यपि स्थानानि नेतव्यानि । शरीरस्थानानि च वक्ष्यमाणस्पर्धकसंख्याप्रमाणानि । संप्रति शरीरपरमाणूनामेव तत्तद्बन्धनयोग्यानामल्पबहुत्वमभिधीयते–तत्रौदारिकौदारिकबन्धनयोग्याः पुद्गलाः सर्वस्तोकाः । तेभ्य औदारिकतैजसबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्यौदारिककार्मणबन्धनयोग्या अनन्तगुणाः । तेभ्योऽप्यौदारिकतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तथा वैक्रियवैक्रियबन्धनयोग्याः पुद्गलाः सर्वस्तोकाः । तेभ्योऽपि वैक्रियतैजसबन्धनयोग्या अनन्तगुणाः । तेभ्योऽपि वैक्रियकार्मणबन्धनयोग्या अनन्तगुणाः ।

तेन्योऽपि वैक्रियतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तथा आहारकाहारकबन्धनयोग्याः पुजलाः सर्वस्तोकाः । तेन्योऽप्याहारकतैजसबन्धनयोग्या अनन्तगुणाः । तेन्योऽप्याहारककार्मणबन्धनयोग्या अनन्तगुणाः । तेन्योऽप्या हारकतैजसकार्मणबन्धनयोग्या अनन्तगुणाः । तेन्योऽपि तैजसतैजसबन्धनयोग्या अनन्तगुणाः । तेन्योऽपि तैजस- कार्मणबन्धनयोग्या अनन्तगुणाः । तेन्योऽपि कार्मणकार्मणबन्धनयोग्या अनन्तगुणा इति । सांप्रतं स्थानप्ररूपणाव- सरः । तत्र प्रथमं स्पर्धकमादौ कृत्वाऽजव्येन्योऽनन्तगुणैः सिद्धानन्तकल्पैर्जागैरनन्तैः स्पर्धकैरेकं प्रथमं शरीरप्रायोग्यं स्थानं जवति । ततस्तति्जिरेव स्पर्धकैरनन्तजागवृद्धैर्द्वितीयं शरीरस्थानं जवति । पुनस्तति्जिरेव स्पर्धकैरनन्तजागवृद्धै- स्तृतीयं शरीरस्थानं । एवं निरन्तरं पूर्वस्मात् पूर्वस्मादुत्तरोत्तराणि अनन्तजागवृद्धानि शरीरस्थानान्यंगुलमात्रक्षेत्रासं- ख्येयजागगतप्रदेशराशिप्रमाणानि वाच्यानि । एतानि च समुदितानि एकं कंमकमजिधीयते । तस्माच्च कंमकादुपरि यदन्यच्छरीरस्थानं तत्कंमकगतचरमशरीरस्थानापेक्षयाऽसंख्येयजागवृद्धं । तस्मात्पराणि पुनर्यान्यन्यानि शरीरस्थानानि अंगुलमात्रक्षेत्रासंख्येयजागगतप्रदेशराशिप्रमाणानि तानि सर्वाण्यपि यथोत्तरमनन्तजागवृद्धान्यवसेयानि । एतानि च समुदितानि द्वितीयं कंमकं । तस्माच्च द्वितीयात्कंमकादुपरि यदन्यच्छरीरस्थानं तत्पुनरपि द्वितीयकंडकगतचरमशरीर- स्थानापेक्षयाऽसंख्येयजागवृद्धं । ततः पराणि पुनरप्यन्यानि यानि शरीरस्थानानि अंगुलमात्रक्षेत्रासंख्येयजागगतप्रदेश- राशिप्रमाणानि तानि सर्वाण्यपि यथोत्तरमनन्तजागवृद्धान्यवसेयानि । एतानि च समुदितानि तृतीयं कंमकं । ततः पुनरप्येकमसंख्येयजागवृद्धं । ततः पुनरपि कंमकमात्राणि शरीरस्थानानि यथोत्तरमनन्तजागवृद्धान्यवसेयानि । एवम-

संख्येयभागान्तरितानि अनन्तभागवृद्धकंडकानि तावद्वाच्यानि यावदसंख्येयभागवृद्धानामपि स्थानानामन्तरान्तरा-
भाविनां कंडकं भवति । कंडकं नाम समयपरिभाषयाऽङ्गुलमात्रक्षेत्रासंख्येयभागगतप्रदेशराशिप्रमाणा संख्याऽभिधी-
यते । ततः पराणि यथोत्तरमनन्तभागवृद्धानि कंडकमात्राणि शरीरस्थानानि वाच्यानि । ततः परमेकं संख्येयभागवृद्ध-
स्थानं । ततो मूलादारभ्य यावन्ति स्थानानि प्रागतिक्रान्तानि तावन्ति तथैव (तथैव) निधाय पुनरप्येकं संख्येय-
भागवृद्धं स्थानमभिधानीयं । एवं वक्ष्यमाणक्रमेण षट्स्थानकवृद्ध्या शरीरस्थानानि तावद्वाच्यानि यावदसंख्येयलो-
काकाशप्रदेशप्रमाणानि भवन्ति । उक्ता नामप्रत्ययस्पर्धकप्ररूपणा, सांप्रतं प्रयोगप्रत्ययस्पर्धकप्ररूपणा क्रियते—तत्र प्रयोगो
योगः तत्स्थानवृद्ध्या यो रसः कर्मपरमाणुषु केवलयोगप्रत्ययतो बध्यमानेषु परिवर्धते स्पर्धकरूपतया तत्प्रयोगप्रत्यय-
स्पर्धकं । उक्तं च—"होइ पओगो जोगो तट्ठाणविवड्ढणाए जो उ रसो । परिवड्ढेई जीवे पयोगफड्डं तयं बेंति ॥ १ ॥"
तस्य पञ्चानुयोगद्वाराणि । तद्यथा—अविभागप्ररूपणा, वर्गणाप्ररूपणा, स्पर्धकप्ररूपणा, अन्तरप्ररूपणा, स्थानप्ररूपणा
चेति । एताश्च यथा नामप्रत्ययस्पर्धके प्रागभिहितास्तथैवात्राप्यवगन्तव्याः । तथाऽत्र प्रथमस्थानगतप्रथमवर्गणायां
सकलपुद्गलस्नेहाविभागाः सर्वस्तोकाः । तेभ्यो द्वितीयस्थानगतप्रथमवर्गणायामनन्तगुणाः । तेभ्योऽपि तृतीयस्थान-
गतप्रथमवर्गणायामनन्तगुणाः । एवं तावद्वेयं यावदन्तिमं स्थानं । तथा च प्रयोगप्रत्ययस्पर्धकसंग्रहगाथान्यत्रा-
प्युक्तं—"अविभागवग्गफड्डग अंतरठाणाई एत्थ जहपुव्विं । ठाणाइ वग्गणाओ अणंतगुणणाए गच्छंति ॥ १ ॥" अनादि-
शब्दात्कंडकादिपरिग्रहः । इदानीमल्पबहुत्वमुच्यते—स्नेहप्रत्ययस्पर्धकस्य जघन्यवर्गणायां सकलपुद्गलगताः स्नेहाविभागाः

सर्वस्तोकाः । ततस्तस्यैव स्नेहप्रत्ययस्पर्धकस्योत्कृष्टवर्गणायामनन्तगुणाः । तेभ्योऽपि नामप्रत्ययस्पर्धकस्य जघन्यवर्गणायामनन्तगुणाः । तेभ्योऽपि तस्यैवोत्कृष्टवर्गणायामनन्तगुणाः । तेभ्योऽपि प्रयोगप्रत्ययस्पर्धकस्य जघन्यवर्गणायामनन्तगुणाः । तेभ्योऽपि तस्यैवोत्कृष्टवर्गणायामनन्तगुणाः । उक्तं च–"तिण्हं पि फड्डुगाणं जहण्ण उक्कोसगा कमा ठविउं । णेयाणंतगुणाउ उ वग्गणा णेहफड्डाउ ॥ १ ॥" संप्रति गाथार्थो विव्रियते–नामप्रत्ययेषु प्रयोगप्रत्ययेष्वपि च स्पर्धकेषु अविभागवर्गणादयः प्राग्वज्ज्ञेयाः । तथाहि–स्नेहप्रत्ययस्पर्धक इवात्रापि अविभागवर्गणा एकैकस्नेहाविभागवद्रूपपरमाणुवर्गणा अनन्ताः । तथा स्तोकेन स्नेहेन बद्धाः पुद्गला बहव इतरे स्तोकाः स्तोकतराः । यच्च 'असंखलोगे दुगुणहीणा' इति तदत्रासंभवान्न संबध्यते । स्नेहप्रत्ययस्पर्धकेऽपि हि तत् यथासंभवं स्तोकमेव कालं यावत् योजितं । न पुनः सर्वत्रापि । तथा 'सिं ति' एषां स्नेहप्रत्ययनामप्रत्ययप्रयोगप्रत्ययस्पर्धकाना प्रत्येकं स्वके आत्मीये जघन्योत्कृष्टे वर्गणे बुद्ध्या पृथक् कृत्वा ततः क्रमेण तासु । 'धणिया देसगुण त्ति' धणिया निचिता देशगुणा निर्विभागभागरूपाः सकलपुद्गलगतस्नेहाविभागा इत्यर्थः । तेऽनन्तगुणनयाऽनन्तगुणिततया ज्ञातव्याः । तदेवं कृता पुद्गलानां परस्परं संबन्धहेतुभूतस्य स्नेहस्य प्ररूपणा । संप्रति बन्धनकरणसामर्थ्यतो बध्यमानकर्मपुद्गलानां प्रकृतिस्थित्यनुभागप्रदेशविभागो मन्दमतीनां सुखावबोधाय मोदकदृष्टान्तेन विभाव्यते–यथा किल कश्चिन्मोदको वातविनाशिद्रव्यनिष्पन्नः प्रकृत्या वातमुपशमयति, पित्तोपशमकद्रव्यनिष्पन्नः पित्तं, कफापहारिद्रव्यनिष्पन्नः कफमित्येवंस्वरूपा प्रकृतिर्मोदकस्य । तथा तस्यैव स्थितिः कस्यचिद्दिनमेकं, अपरस्य दिनद्वयं, अन्यस्य मासादिकं कालं यावत् । तथा तस्यैव रसः स्निग्धमधुरादिः कस्य-

चिदेकस्थानकोऽपरस्य द्विस्थानक इत्यादि । तथा तस्यैव प्रदेशाः कणिकादिरूपाः कस्यचिदेकप्रसृतिप्रमाणाः कस्यचिद्विप्रसृतिप्रमाणा इत्यादि । तथा कर्मणोऽपि किञ्चिज्ज्ञानमावृणोति, किञ्चिद्दर्शनं, किञ्चित्सुखदुःखे जनयति, किञ्चिन्मोहयतीत्येवंस्वरूपा प्रकृतिः । तथा स्थितिस्तस्यैव कर्मणः कस्यचित्त्रिंशत्सागरोपमकोटीकोटीप्रमाणा, अपरस्य सप्ततिसागरोपमकोटीकोटीप्रमाणा इत्यादि । तथा रसः कस्यचिदेकस्थानकोऽपरस्य द्विस्थानक इत्यादि । तथा प्रदेशाः कस्यचिद्बहुतराः कस्यचिच्च बहुतमा इति ॥ २३ ॥

तत्र प्रकृतिभेदत एव कर्मणां मूलोत्तरविभागो भवति नान्यथेत्यावेदयन्नाह—

मूलुत्तरपगईणं अणुभागविसेसओ हवइ भेओ । अविसेसियरसपगइओ, पगईबंधो मुणेयव्वो ॥ २४ ॥

मूलु त्ति–इह प्रकृतिशब्दो भेदपर्यायोऽप्यस्ति । तथा चाह भाष्यकृत्–"अहवा पयडी भेओ" इति । ततो मूलोत्तरप्रकृतीनां मूलोत्तरभेदानां कर्मणः संबन्धिनामनुभागविशेषतः स्वभावविशेषतो ज्ञानावारकत्वादिलक्षणात् भेदो भवति, नान्यथा । अनुभागशब्दश्चात्र स्वभावपर्यायोऽवगन्तव्यः । तदुक्तं चूर्णौ–"अणुभागो त्ति सहावो" इति । इह बन्धनकरणे प्रकृतिबन्धादयः प्रत्येकमुपरि सप्रपञ्चं वक्तव्याः । प्रकृत्यादयश्च प्रतिकर्म संकीर्णा इति कश्चिद्व्यामुह्येत, अतस्तन्मोहापनोदाय प्रकृतिबन्धं तुशब्दोपलक्षणद्वारेण अन्यांश्च स्थितिबन्धादीन् वैचित्र्येण (भेदेन) स्पष्टयन्नाह–'अविसेसियेत्यादि' । रसः स्नेहोऽनुभाग इत्येकार्थः । तस्य प्रकृतिः स्वभावः । अविशेषिताऽविवक्षिता रसप्रकृतिः,

उपलक्षणत्वात् स्थित्यादयोऽपि, यस्मिन्न विवक्षितो रसबन्धोऽविशेषितरसप्रकृतिः । प्रकृतिबन्धो ज्ञातव्य', तुशब्दस्याधिकार्थसंसूचनात् अविवक्षितरसप्रकृतिप्रदेशः स्थितिबन्धः, अविवक्षितप्रकृतिस्थितिप्रदेशो रसबन्ध , अविवक्षितप्रकृतिस्थितिरसः प्रदेशबन्ध इत्यपि द्रष्टव्यं । प्रकृतिबन्धे च यावन्त्यः प्रकृतयो बन्धमायान्ति, यश्च यासां बन्धं प्रति स्वामी, तदेतत्सर्वं शतकादवसेयं । प्रकृतिप्रदेशबन्धौ च योगतो भवतः "जोगा पयडिपएसं" इतिवचनात् । तत्र प्रकृतिबन्ध उक्तः । सांप्रतं प्रदेशबन्धो वक्तुमवसरप्राप्तः । तत्राष्टविधबन्धकेन जन्तुना यदेकेनाध्यवसायेन चित्रतागर्भेण गृहीतं दलिकं तस्याष्टौ भागा भवन्ति, सप्तविधबन्धकस्य तु सप्त भागाः, षड्विधबन्धकस्य षड्भागाः, एकविधबन्धकस्य एको भागः ॥ २४ ॥

संप्रत्युत्तरप्रकृतीनां भागविभागोपदर्शनार्थमाह—

जं सव्वघाइपत्तं सगकम्मपएसणंतमो भागो । आवरणाण चउद्धा तिहा य अह पंचहा विग्घे ॥ २५ ॥

जं ति–यत् कर्मदलिकं सर्वघातिप्राप्तं केवलज्ञानावरणीयादिरूपसर्वघातिप्रकृतिषु गतं तत् स्वकर्मप्रदेशानामनन्ततमो भागः स्वकीयाया ज्ञानावरणादिरूपाया मूलप्रकृतेर्यो मौलो भागस्तस्यानन्ततमो भाग इत्यर्थः । कात्र युक्तिरिति चेदुच्यते–इहाष्टानामपि मूलप्रकृतीनां प्रत्येकं ये स्निग्धतराः परमाणवस्ते स्तोकाः । ते च स्वस्वमूलप्रकृतिपरमाणूनामनन्ततमो भागः । त एव च सर्वघातिप्रकृतियोग्या इति यत्सर्वघातिप्राप्तं तत् स्वमूलप्रकृतिप्रदेशानामनन्ततमो भागः ।

१ तम्समुदाओ पगइबधो इति तु कापायिककर्म प्रतीत्य ।

तस्मिंश्चानन्ततमे भागेऽपसारिते शेषं यद्दलिकं तत्सर्वघातिप्रकृतिव्यतिरिक्तेभ्यः तत्काले बध्यमानेभ्यः स्वस्वमूलप्रकृत्यवान्तरभेदेभ्यो विभज्य विभज्य दीयते । तथाहि–'आवरणेत्यादि' आवरणयोर्ज्ञानावरणदर्शनावरणयोः प्रत्येकं सर्वघातिप्रकृतिनिमित्तमनन्ततमे भागेऽपसारिते सति शेषस्य दलिकस्य यथाक्रमं चतुर्धा त्रिधा च विभागः क्रियते, कृत्वा च शेषदेशघातिप्रकृतिभ्यो दीयते । तथा विघ्नान्तराये यो मूलभागः स समग्रोऽपि पञ्चधा कृत्वा दानान्तरायादिभ्यो दीयते । इयमत्र भावना–ज्ञानावरणीयस्य स्थित्यनुसारेण यो मूलभाग आगच्छति, तस्यानन्ततमो भागः केवलज्ञानावरणाय दीयते । शेषस्य चत्वारो भागाः क्रियन्ते, ते च मतिज्ञानावरणश्रुतज्ञानावरणावधिज्ञानावरणमनःपर्यवज्ञानावरणेभ्यो दीयन्ते । दर्शनावरणीयस्यापि यो मूलभाग आगच्छति तस्यानन्ततमं भागं षोढा कृत्वा निद्रापञ्चककेवलदर्शनावरणाभ्यां सर्वघातिभ्यां प्रयच्छति (जीवः) । शेषस्य च त्रयो भागाः क्रियन्ते, ते च चक्षुरचक्षुरवधिदर्शनावरणेभ्यो दीयन्ते । अन्तरायस्य पुनर्यो मूलभाग आगच्छति स समग्रोऽपि सर्वघात्यवान्तरभेदाभावात् पञ्चधा कृत्वा दानान्तरायादिभ्यो दीयते ॥ २५ ॥

मोहे दुहा चउहा य पंचहा वा वि बज्झमाणीणं । वेयणियाउयगोएसु बज्झमाणीण भागो सिं ॥ २६ ॥

मोहे त्ति–मोहे मोहनीये स्थित्यनुसारेण यो मूलभाग आगच्छति तस्यानन्ततमो भागः सर्वघातिप्रकृतियोग्यो द्विधा क्रियते, अर्धं दर्शनमोहनीयस्य, अर्धं चारित्रमोहनीयस्य । तत्रार्धं दर्शनमोहनीयस्य सत्कं समग्रमपि मिथ्यात्वमोहनीयस्य ढौकते । चारित्रमोहनीयस्य तु सत्कमर्धं द्वादशधा क्रियते, ते च द्वादशभागा आद्येभ्यो द्वादशकषायेभ्यो दीयन्ते ।

संप्रति शेषदलिकभागविधिरुच्यते—'मोहे दुहेत्यादि' शेषस्य च मूलभागस्य द्वौ भागौ क्रियेते, एकः कषायमोहनीयस्य, अपरो नोकषायमोहनीयस्य । तत्र कषायमोहनीयस्य भागः पुनश्चतुर्धा क्रियते, ते च चत्वारोऽपि भागाः संज्वलनक्रोधादिभ्यो दीयन्ते । नोकषायमोहनीयस्य तु भागः पञ्चधा क्रियते, ते च पञ्चापि भागा यथाक्रमं त्रयाणां वेदानामन्यतमस्मै वेदाय बध्यमानाय हास्यरतियुगलारतिशोकयुगलयोरन्यतरस्मै युगलाय भयजुगुप्साभ्यां च दीयन्ते। नान्येभ्यः, बन्धाभावात् । न हि नवापि नोकषाया युगपद्बन्धमायान्ति, किं तु यथोक्ताः पञ्चैव । तथा वेदनीयायुर्गोत्रेषु यो मूलभाग आभजति स एतेषामेव एकैकस्याः प्रकृतेर्बध्यमानाया ढौकते । द्विप्रभृतीनाममीषां युगपद्बन्धाभावात् ॥ २६ ॥

पिंडपगईसु बज्झंतिगाण वन्नरसगंधफासाणं । सव्वासिं संघाए तणुम्मि य तिगे चउक्के वा ॥ २७ ॥

पिंड त्ति—पिण्डप्रकृतयो नामप्रकृतयः । यदाह चूर्णिकृत्—"पिंडपगईउ नामपगईउ त्ति" । तासु मध्ये बध्यमानानामन्यतमगतिजातिशरीरबन्धनसंघातनसंस्थानांगोपांगानुपूर्वीणां वर्णगन्धरसस्पर्शागुरुलघूपघातपराघातोच्छ्वासनिर्माणतीर्थकराणामातपोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तप्रत्येकसाधारणस्थिरास्थिरशुभाशुभसुस्वरदुःस्वरसुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्त्यन्यतराणां च मूलभागो विभज्य समर्पणीयः । अत्रैव विशेषमाह—'वर्णेत्यादि' वर्णरसगन्धस्पर्शानां प्रत्येकं यद्भागलब्धं दलिकमायाति तत्सर्वेभ्यस्तेषामवान्तरभेदेभ्यो विभज्य विभज्य दीयते । तथाहि—वर्णनाम्नो यद्भागलब्धं दलिकं तत्पञ्चधा कृत्वा शुक्लादिभ्योऽवान्तरभेदेभ्यो विभज्य प्रदीयते । एवं

गन्धरसस्पर्शानामपि यस्य यावन्तो भेदास्तस्य संबन्धिनो भागस्य तति भागाः कृत्वा तावद्भ्योऽवान्तरभेदेभ्यो दातव्याः। तथा संघाते तनौ च प्रत्येकं यद्भागलब्धं दलिकमायाति तत्त्रिधा चतुर्धा वा कृत्वा त्रिभ्यश्चतुर्भ्यो वा दीयते। तत्रौदारिकतैजसकार्मणानि वैक्रियतैजसकार्मणानि वा त्रीणि शरीराणि संघातानि वा युगपद्बध्नता त्रिधा क्रियते, वैक्रियाहारकतैजसकार्मणरूपाणि चत्वारि शरीराणि संघातानि वा बध्नता चतुर्धा क्रियते ॥ २७ ॥

सत्तेक्कारविगप्पा बंधणनामाण मूलपगईणं। उत्तरसगपगईण य अप्पबहुत्ता विसेसो सिं ॥ २८ ॥

सत्तेति–बन्धननाम्नां भागलब्धं यद्दलिकमायाति तस्य सप्त विकल्पाः सप्तभेदा एकादश वा विकल्पाः क्रियन्ते। तत्रौदारिकौदारिक १ औदारिकतैजस २ औदारिककार्मण ३ औदारिकतैजसकार्मण ४ तैजसतैजस ५ तैजसकार्मण ६ कार्मणकार्मण ७ रूपाणि वैक्रियचतुष्कतैजसत्रिकरूपाणि वा सप्त बन्धनानि बध्नता सप्त। वैक्रियचतुष्काहारकचतुष्कतैजसत्रिकलक्षणान्येकादश बन्धनानि बध्नता एकादश। अवशेषाणां च प्रकृतीनां यद्भागलब्धं दलिकमायाति, तन्न भूयो विभज्यते, तासां युगपदवान्तरद्वित्र्यादिभेदबन्धाभावात्। तेन तासां तदेव परिपूर्णं दलिकं भवति। इहैकाध्यवसायगृहीतस्य कर्मदलिकस्य परमाणवो विभागशः कृत्वा मूलप्रकृतिभ्य उत्तरप्रकृतिभ्यश्च दत्ताः। तत्र न ज्ञायते जघन्यपदे उत्कृष्टपदे वा कस्याः कियान् भागस्ततो विशेषपरिज्ञानार्थमाह–'मूलपगईत्यादि' आसां मूलप्रकृतीनामुत्तरस्वप्रकृतीनां च परस्परं भागस्य विशेषोऽल्पबहुत्वात् शास्त्रान्तरोक्तात् द्रष्टव्यः। तत्र मूलप्रकृतीनामल्पबहुत्वं दर्श्यते–इह कर्मणां स्थित्यनुसारतो भाग आभजति, यस्य बृहती स्थितिस्तस्य बृहद्भागः, यस्य स्तोका तस्य स्तोक इति।

तत्रायुषो भागः सर्वस्तोकः । तस्य सर्वस्या (सर्वेभ्योऽ) प्यन्येभ्यः स्तोकस्थितिकत्वात् । तत्स्थितेरुत्कर्षतोऽपि त्रयस्त्रिंशत्सागरोपमप्रमाणत्वात् । ततो नामगोत्रयोर्भागो बृहत्तरः । तयोः स्थितेर्विंशतिसागरोपमकोटीकोटीप्रमाणत्वात् । स्वस्थाने तु द्वयोरपि परस्परं तुल्यः, समानस्थितिकत्वात् । ततोऽपि ज्ञानावरणदर्शनावरणान्तरायाणां बृहत्तमः । तेषां स्थितेस्त्रिंशत्सागरोपमकोटीकोटीप्रमाणत्वात्, स्वस्थाने तु परस्परं तुल्य एव, तुल्यस्थितिकत्वात् । ततोऽपि मोहनीयस्य बृहत्तमः, तस्य स्थितेः सप्ततिसागरोपमकोटीकोटीप्रमाणत्वात् । वेदनीयं यद्यपि ज्ञानावरणीयादिभिः सह समस्थितिकं, तथापि तस्य भागः सर्वोत्कृष्ट एव वेदितव्यः । अन्यथाऽस्पष्टतरस्वफलसुखदुःखोपदर्शकत्वानुपपत्तेः । इदानीं स्वस्वोत्तरप्रकृतीनामुत्कृष्टपदे जघन्यपदे चाल्पबहुत्वमभिधीयते—तत्रोत्कृष्टपदे सर्वस्तोकं केवलज्ञानावरणस्य प्रदेशाग्रं । ततो मनःपर्यवज्ञानावरणीयस्यानन्तगुणं । ततोऽवधिज्ञानावरणीयस्य विशेषाधिकं । ततः श्रुतज्ञानावरणीयस्य विशेषाधिकं । ततोऽपि मतिज्ञानावरणीयस्य विशेषाधिकं । तथा दर्शनावरणीये उत्कृष्टपदे सर्वस्तोकं प्रचलायाः प्रदेशाग्रं । ततो निद्राया विशेषाधिकं । ततोऽपि प्रचलाप्रचलाया विशेषाधिकं । ततोऽपि निद्रानिद्राया विशेषाधिकं । ततः स्त्यानर्द्धेर्विशेषाधिकं । ततः केवलदर्शनावरणीयस्य विशेषाधिकं । ततोऽवधिदर्शनावरणीयस्यानन्तगुणं । ततोऽचक्षुर्दर्शनावरणीयस्य विशेषाधिकं । ततोऽपि चक्षुर्दर्शनावरणीयस्य विशेषाधिकं । तथा सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमसातवेदनीयस्य । ततो विशेषाधिकं सातवेदनीयस्य । तथा मोहनीये सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमप्रत्याख्यानावरणमानस्य । ततोऽप्रत्याख्यानावरणक्रोधस्य विशेषाधिकं । ततोऽप्रत्याख्यानावरणमायाया विशेषाधिकं । ततोऽप्रत्याख्यानावरणलोभस्य विशे-

पाधिकं । ततः प्रत्याख्यानावरणमानस्य विशेपाधिकं । ततः प्रत्याख्यानावरणक्रोधस्य विशेपाधिकं । ततः प्रत्याख्यानावरणमायाया विशेपाधिकं । ततः प्रत्याख्यानावरणलोभस्य विशेपाधिकं । ततोऽनन्तानुबन्धिमानस्य विशेपाधिकं । ततोऽनन्तानुबन्धिक्रोधस्य विशेपाधिकं । ततोऽनन्तानुबन्धिमायाया विशेपाधिकं । ततोऽनन्तानुबन्धिलोभस्य विशेपाधिकं । ततो मिथ्यात्वस्य विशेपाधिकं । ततो जुगुप्साया अनन्तगुणं । ततो भयस्य विशेपाधिकं । ततो हास्यशोकयोर्विशेपाधिकं, स्वस्थाने तु द्वयोरपि परस्परं तुल्यं । ततो रत्यरत्योर्विशेपाधिकं, तयोः पुनः स्वस्थाने तुल्यं । ततः स्त्रीवेदनपुंसकवेदयोर्विशेपाधिकं, स्वस्थाने तु द्वयोरपि परस्परं तुल्यं । ततः संज्वलनक्रोधस्य विशेपाधिकं । ततः संज्वलनमानस्य विशेपाधिकं । ततः पुरुपवेदस्य विशेपाधिकं । ततः संज्वलनमायाया विशेपाधिकं । ततः संज्वलनलोभस्यासंख्येयगुणं । तथा चतुर्णामप्यायुपामुत्कृष्टपदे प्रदेशाग्रं परस्परं तुल्यं । नामकर्मणि उत्कृष्टपदे प्रदेशाग्रं गतौ देवगतिनरकगत्योः सर्वस्तोकं । ततो मनुजगतौ विशेपाधिकं । ततस्तिर्यग्गतौ विशेपाधिकं । तथा जातौ चतुर्णां द्वीन्द्रियादिजातिनाम्नामुत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं, स्वस्थाने तु तेपां परस्परं तुल्यं । तत एकेन्द्रियजातेर्विशेपाधिकं । तथा शरीरनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकशरीरस्य । ततो वैक्रियशरीरनाम्नो विशेपाधिकं । तत औदारिकशरीरनाम्नो विशेपाधिकं । ततस्तैजसशरीरनाम्नो विशेपाधिकं । ततोऽपि कार्मणशरीरनाम्नो विशेपाधिकं । एवं संघातननाम्न्यपि द्रष्टव्यं । तथा बन्धननाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकाहारकबन्धननाम्नः । तत आहारकतैजसनाम्नो विशेपाधिकं । तत आहारककार्मणबन्धननाम्नो विशेपाधिकं । तत आहारकतैजसकार्मणबन्धननाम्नो विशेपा-

धिकं । ततो वैक्रियवैक्रियशरीरबन्धननाम्नो विशेपाधिकं । ततो वैक्रियतैजसबन्धननाम्नो विशेपाधिकं । ततो वैक्रिय-
कार्मणबन्धननाम्नो विशेपाधिकं । ततो वैक्रियतैजसकार्मणबन्धननाम्नो विशेपाधिकं । तत औदारिकौदारिकबन्धननाम्नो
विशेपाधिकं । तत औदारिकतैजसबन्धननाम्नो विशेपाधिकं । तत औदारिककार्मणबन्धननाम्नो विशेपाधिकं ।
ततोऽप्यौदारिकतैजसकार्मणबन्धननाम्नो विशेपाधिकं । ततस्तैजसतैजसबन्धननाम्नो विशेपाधिकं । ततस्तैजसकार्मण-
बन्धननाम्नो विशेपाधिकं । ततः कार्मणकार्मणबन्धननाम्नो विशेपाधिकं । तथा संस्थाननाम्नि संस्थानानामाद्यन्तवर्जानां
चतुर्णामुत्कृष्टपदे प्रदेशाग्रं सर्वस्तोकं, स्वस्थाने तु तेपां परस्परं तुल्यं । ततः समचतुरस्रसंस्थानस्य विशेपाधिकं । ततोऽपि
हुंडसंस्थानस्य विशेपाधिकं । तथांगोपांगनाम्नि सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रमाहारकांगोपांगनाम्नः । ततो वैक्रियांगोपां-
गनाम्नो विशेपाधिकं । ततोऽप्यौदारिकांगोपांगनाम्नो विशेपाधिकं । तथा संहनननाम्नि सर्वस्तोकमाद्यानां पञ्चानां संहन-
नानामुत्कृष्टपदे प्रदेशाग्रं, स्वस्थाने तु तेपां परस्परं तुल्यं । ततः सेवार्तसंहननस्य विशेपाधिकं । तथा वर्णनाम्नि सर्वस्तो-
कमुत्कृष्टपदे प्रदेशाग्रं कृष्णवर्णनाम्नः । ततो नीलवर्णनाम्नो विशेपाधिकं । ततो लोहितवर्णनाम्नो विशेपाधिकं ।
ततो हारिद्रवर्णनाम्नो विशेपाधिकं । ततोऽपि शुक्लवर्णनाम्नो विशेपाधिकं । तथा गन्धनाम्नि सर्वस्तोकं सुरभि
गन्धनाम्नः । ततो विशेपाधिकं दुरभिगन्धनाम्नः । तथा रसनाम्नि सर्वस्तोकं कटुरसनाम्नः । ततस्तिक्तरसनाम्नो
विशेपाधिकं । ततः कपायरसनाम्नो विशेपाधिकं । ततः अम्लरसनाम्नो विशेपाधिकं । ततोऽपि मधुररसनाम्नो विशे-
पाधिकं । तथा स्पर्शनाम्नि सर्वस्तोकमुत्कृष्टपदे कर्कशगुरुस्पर्शनाम्नोः प्रदेशाग्रं, स्वस्थाने तु द्वयोरपि परस्परं तुल्यं ।

ततो मृदुलघुस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु द्वयोरपि तयोः परस्परं तुल्यं । ततो रूक्षशीतस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु तयोर्द्वयोरपि परस्परं तुल्यं । ततः स्निग्धोष्णस्पर्शनाम्नोर्विशेषाधिकं, स्वस्थाने तु तयोरपि द्वयोः परस्परं तुल्यं । तथानुपूर्वीनाम्नि सर्वस्तोकं प्रदेशाग्रं देवगतिनरकगत्यानुपूर्व्योः, स्वस्थाने तु द्वयोरपि परस्परं तुल्यं । ततो मनुजगत्यानुपूर्व्या विशेषाधिकं । ततस्तिर्यगानुपूर्व्या विशेषाधिकं । तथा सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं त्रसनाम्नः । ततो विशेषाधिकं स्थावरनाम्नः । तथा सर्वस्तोकं प्रदेशाग्रं पर्याप्तनाम्नः । ततो विशेषाधिकमपर्याप्तनाम्नः । एवं स्थिरास्थिरयोः शुभाशुभयोः सुभगदुर्भगयोः आदेयानादेययोः सूक्ष्मबादरयोः प्रत्येकसाधारणयोर्वाच्यं । तथा सर्वस्तोकमयशःकीर्तिनाम्नः प्रदेशाग्रं । ततो यशःकीर्तिनाम्नः संख्येयगुणं । शेषाणामातपोद्योतप्रशस्ताप्रशस्तविहायोगतिसुस्वरदुःस्वराणां परस्परं तुल्यमुत्कृष्टपदे प्रदेशाग्रं । निर्माणोच्छ्वासपराघातोपघातागुरुलघुतीर्थकराणां त्वल्पबहुत्वं नास्ति, यत इदमल्पबहुत्वं सजातीयप्रकृत्यपेक्षया, यथा कृष्णादिवर्णनाम्नः शेषवर्णापेक्षं, प्रतिपक्षप्रकृत्यपेक्षया वा यथा सुभगदुर्भगयोः । न चैताः परस्परं सजातीया अभिन्नैकमूलापिंडप्रकृत्यभावात् । नापि विरुद्धा युगपदपि बन्धसम्भवात् । तथा गोत्रे सर्वस्तोकमुत्कृष्टपदे प्रदेशाग्रं नीचैर्गोत्रस्य । ततो विशेषाधिकमुच्चैर्गोत्रस्य । तथाऽन्तराये सर्वस्तोकं दानान्तरायस्य । ततो

---

१ अत्र च श्रीमद्भिर्देवेन्द्रसूरिभिः स्वोपज्ञशतकवृत्तावन्यथा व्याख्यात प्रस्तुतप्रकरणाभिधया, तद्भविष्यति तदानीं कापि लेखकदोषमूला शोधकदोषमूला वा तादृशी काचन प्रतिरीका प्रतीवान्ये, दृश्यमानेषु त्वादर्शेषु न तथाविध. पाठः, युक्तिस्त्वेवविधेऽतीन्द्रियेऽयामर्येऽकिञ्चित्कर्येवेत्युपलभ्यमानः पाठ एव शरणम् ।

दानान्तरायस्य विशेषाधिकं। ततो भोगान्तरायस्य विशेषाधिकं । तत उपभोगान्तरायस्य विशेषाधिकं । ततो वीर्यान्तरायस्य विशेषाधिकं । तदेवमुक्तमुत्तरप्रकृतीनामुत्कृष्टपदे प्रदेशाग्राल्पबहुत्वं । संप्रति जघन्यपदे तदभिधीयते —तत्र सर्वस्तोकं जघन्यपदे प्रदेशाग्रं केवलज्ञानावरणीयस्य । ततो मनःपर्यवज्ञानावरणीयस्यानन्तगुणं । ततोऽवधिज्ञानावरणीयस्य विशेषाधिकं। ततः श्रुतज्ञानावरणीयस्य विशेषाधिकं। ततोऽपि मतिज्ञानावरणीयस्य विशेषाधिकं । तथा दर्शनावरणीये सर्वस्तोकं जघन्यपदे प्रदेशाग्रं निद्रायाः। ततः प्रचलाया विशेषाधिकं। ततो निद्रानिद्राया विशेषाधिकं। ततः प्रचलाप्रचलाया विशेषाधिकं । ततः स्त्यानर्धेर्विशेषाधिकं । ततः केवलदर्शनावरणस्य विशेषाधिकं । ततोऽवधिदर्शनावरणस्यानन्तगुणं। ततोऽचक्षुर्दर्शनावरणीयस्य विशेषाधिकं। ततोऽपि चक्षुर्दर्शनावरणीयस्य विशेषाधिकं। तथा मोहनीये सर्वस्तोकं जघन्यपदे प्रदेशाग्रमप्रत्याख्यानावरणमानस्य। ततोऽप्रत्याख्यानावरणस्य क्रोधस्य विशेषाधिकं। ततोऽप्रत्याख्यानावरणमायाया विशेषाधिकं। ततोऽप्रत्याख्यानावरणलोभस्य विशेषाधिकं। तत एवमेव प्रत्याख्यानावरणमानक्रोधमायालोभानन्तानुबन्धिमानक्रोधमायालोभानां यथोत्तरं विशेषाधिकं वक्तव्यं । ततो मिथ्यात्वस्य विशेषाधिकं। ततो जुगुप्साया अनन्तगुणं। ततो भयस्य विशेषाधिकं। ततो हास्यशोकयोर्विशेषाधिकं, स्वस्थाने तु तयोः परस्परं तुल्यं। ततो रत्यरत्योर्विशेषाधिकं। स्वस्थाने तु तयोरपि परस्परं तुल्यं। ततोऽन्यतरवेदस्य विशेषाधिकं । ततः संज्वलनमानक्रोधमायालोभानां यथोत्तरं विशेषाधिकं। तथायुषि सर्वस्तोकं जघन्यपदे प्रदेशाग्रं तिर्यग्मनुष्यायुषोः । ततो देवनारकायुषोरसंख्येयगुणं। तथा नाम्नि गतौ सर्वस्तोकं जघन्यपदे प्रदेशाग्रं तिर्यग्गतेः । ततो विशेषाधिकं मनुजगतेः।

ततो देवगतेरसंख्येयगुणं । ततो निरयगतेरसंख्येयगुणं । तथा जातौ सर्वस्तोकं चतुर्णां द्वीन्द्रियादिजातिनाम्नां । तत एकेन्द्रियजातेर्विशेषाधिकं । तथा शरीरनाम्नि सर्वस्तोकमौदारिकशरीरनाम्नः । ततस्तैजसशरीरनाम्नो विशेषाधिकं । ततः कार्मणशरीरनाम्नो विशेषाधिकं । ततो वैक्रियशरीरनाम्नोऽसंख्येयगुणं।ततोऽप्याहारकशरीरनाम्नोऽसंख्येयगुणं। एवं संघातननाम्नोऽपि वाच्यं । अंगोपांगनाम्नि सर्वस्तोकं जघन्यपदे प्रदेशाग्रमौदारिकांगोपांगनाम्नः । ततो वैक्रियांगोपांगनाम्नोऽसंख्येयगुणं।ततोऽप्याहारकांगोपांगनाम्नोऽसंख्येयगुणं। तथा सर्वस्तोकं जघन्यपदे नरकगतिदेवगत्यानुपूर्व्योः प्रदेशाग्रं। ततो मनुजगत्यानुपूर्व्या विशेषाधिकं। ततोऽपि तिर्यग्गत्यानुपूर्व्या विशेषाधिकं । तथा सर्वस्तोकं त्रसनाम्नः । ततो विशेषाधिकं स्थावरनाम्नः। एवं बादरसूक्ष्मयोः पर्याप्तापर्याप्तयोः प्रत्येकसाधारणयोश्च । शेषाणां तु नामप्रकृतीनामल्पबहुत्वं न विद्यते । तथा सातासातवेदनीययोरुच्चैर्गोत्रनीचैर्गोत्रयोरपि । अन्तराये पुनर्यथोत्कृष्टपदे तथैवावगन्तव्यं । इह यदा जन्तुरुत्कृष्टे योगस्थाने वर्तते, यदा च मूलप्रकृतीनामुत्तरप्रकृतीनां च स्तोकतराणां बन्धकः, तथा यदा संक्रमकाले प्रकृत्यन्तरदलिकानामुत्कृष्टः प्रदेशसंक्रमो भवति, तदोत्कृष्टप्रदेशाग्रसंभवः । तथाहि—उत्कृष्टे योगे वर्तमानो जीव उत्कृष्टं प्रदेशग्रहणं करोति। तथा स्तोकतराणां मूलप्रकृतीनामुत्तरप्रकृतीनां च यदा बन्धकस्तदा शेषाबध्यमानप्रकृतिलभ्योऽपि भागस्तासां बध्यमानानामागच्छति।तथा प्रकृत्यन्तरदलिकानामुत्कृष्टप्रदेशसंक्रमकाले विवक्षितासु प्रकृतिषु बध्यमानासु प्रभूताः कर्मपुद्गलाः प्रविशन्ति । तत एतेषु कारणेषु सत्सूत्कृष्टप्रदेशाग्रसंभवो भवति । विपर्यासे तु जघन्यप्रदेशाग्रसंभवः ॥ २८ ॥

१ श्रीमन्मलयाचार्यपादैरत्र साद्यादिप्ररूपणा स्वामित्वप्ररूपणा च कृता स्वविवरणे ।

तथाहि–प्रथमवर्गणापेक्षया द्वितीयवर्गणायां कर्मपरमाणवो विशेषहीनाः । ततोऽपि तृतीयस्यां वर्गणायां विशेषहीनाः । एवं तावद्वाच्यं यावत्सर्वोत्कृष्टा वर्गणा । एताश्च कथंभूता इत्याह–'अविज्ञागुत्तरियाउ त्ति' अविज्ञागोत्तरा एकैकस्नेहाविज्ञागाधिका इत्यर्थः । तथाहि–प्रथमवर्गणापरमाण्वपेक्षया ये परमाणव एकेन रसाविज्ञागेनाभ्यधिकास्तेषां समुदायो द्वितीया वर्गणा । तेभ्योऽप्येकेन रसाविज्ञागेनाधिकानां समुदायस्तृतीया वर्गणा । एवमेकैकाविज्ञागवृद्ध्या वर्गणास्तावद्वक्तव्या यावदज्ञव्येभ्योऽनन्तगुणाः सिद्धानामनन्तज्ञागकल्पा ज्ञवन्ति इति ॥ ३० ॥

कृता वर्गणाप्ररूपणा, संप्रति स्पर्धकप्ररूपणामाह–

फड्डुगमणंतगुणियं सवजिएहिं पि अंतरं एवं । सेसाणि वग्गणाणं समाणि ठाणं पढमभित्तो ॥३१॥

फड्डुगेति–अज्ञव्येभ्योऽनन्तगुणाः सिद्धानामनन्तज्ञागकल्पा अनन्ता वर्गणा एकं स्पर्धकं । एषा स्पर्धकप्ररूपणा । संप्रत्यन्तरप्ररूपणा क्रियते–इत ऊर्ध्वमेकेन रसाविज्ञागेनाभ्यधिकाः परमाणवो न प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिज्ञिः नापि संख्येयैः, नाप्यसंख्येयैः, नाप्यनन्तैः, किं त्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैरभ्यधिकाः प्राप्यन्ते । ततस्तेषां समुदायो द्वितीयस्य स्पर्धकस्य प्रथमा वर्गणा । तत एकेन रसाविज्ञागेनाधिकानां परमाणूनां समुदायो द्वितीया वर्गणा । द्वाभ्यां रसाविज्ञागाभ्यामधिकानां परमाणूनां समुदायस्तृतीया वर्गणा । एवमेकैकरसाविज्ञागवृद्ध्या वर्गणास्तावद्वाच्या यावदज्ञव्येभ्योऽनन्तगुणाः सिद्धानामनन्तज्ञागकल्पा ज्ञवन्ति । ततस्तासा समुदायो द्वितीयं स्पर्धकं । ततः पुनरप्यत ऊर्ध्वमेकेन रसाविज्ञागेनाभ्यधिकाः परमाणवो न प्राप्यन्ते, नापि द्वाभ्यां, नापि त्रिज्ञिः, नापि संख्येयैः, नाप्यसंख्येयैः,

नाप्यनन्तैः किं त्वनन्तानन्तैरेव सर्वजीवेभ्योऽनन्तगुणैः । ततस्तेषां समुदायस्तृतीयस्य स्पर्धकस्य प्रथमा वर्गणा । ततः पुनरप्यत ऊर्ध्वं यथोत्तरमेकैकरसाविभागवृद्ध्या द्वितीयादिका वर्गणास्तावद्वाच्या यावदभव्येभ्योऽनन्तगुणाः सिद्धानामनन्तभागकल्पा भवन्ति । ततस्तासां समुदायस्तृतीयं स्पर्धकं । एवं स्पर्धकानि तावद्वाच्यानि यावदभव्येभ्योऽनन्तगुणानि सिद्धानामनन्तभागकल्पानि भवन्ति । तेषां समुदाय एकमनुभागबन्धस्थानं । तथा चाह–"अणंतगुणियं सव्वजिएहिं पि" इत्यादि । प्रथमस्पर्धकचरमवर्गणाया द्वितीयस्पर्धकप्रथमवर्गणायाश्चान्तरमपि सर्वजीवेभ्योऽनन्तगुणितं द्रष्टव्यं । एषान्तरप्ररूपणा । एवं शेषाण्यपि स्पर्धकान्यन्तराणि च यथोक्तप्रमाणान्यवगन्तव्यानि । तानि च स्पर्धकानि एकानि एकस्पर्धकसत्कवर्गणानां समानि अभव्येभ्योऽनन्तगुणानि सिद्धानामनन्तभागकल्पानीत्यर्थः । एकं प्रथमं सर्वजघन्यमनुभागबन्धस्थानं भवति । अनुभागबन्धस्थानं नामैकेन काषायिकेणाध्यवसायेन गृहीतानां कर्मपरमाणूनां रससपर्धकसमुदायपरिमाणं ॥ ३१ ॥

कृता स्थानप्ररूपणा । कंडकप्ररूपणार्थमाह–

एत्तो अंतरतुल्लं अंतरमणंतभागुत्तरं बिइयमेवं । अंगुलअसंखभागो अणंतभागुत्तरं कम्मं ॥ ३२ ॥

एत्तो त्ति–इतः प्रथमस्थानादारभ्य द्वितीयस्थानादर्वाक् अन्तरमन्तरतुल्यं प्रागुक्तप्रमाणान्तरतुल्यं द्रष्टव्यं। इदमुक्तं भवति–यथा प्रथमस्पर्धकचरमवर्गणाया द्वितीयस्पर्धकादिवर्गणायाश्चान्तरं सर्वजीवेभ्योऽनन्तगुणं समुद्दिष्टं, एवमिहापि प्रथमस्थानान्तिमस्पर्धकचरमवर्गणाया द्वितीयस्थानाद्यस्पर्धकप्रथमवर्गणायाश्चान्तरं सर्वजीवेभ्योऽनन्तगुणमवगन्तव्यं । तच्च द्वितीयस्थानं

स्पर्धकापेक्षयाऽनन्तभागोत्तरमनन्तभागवृद्धं । यावन्ति प्रथमे स्थाने स्पर्धकानि तावन्त्योऽनन्तभागाधिकानि द्वितीये स्थाने स्पर्धकान्यवसेयानीत्यर्थः । एवं यथोत्तरमनन्तभागवृद्धान्युपदर्शितप्रकारेण स्थानानि तावद्वाच्यानि यावदङ्गुलासंख्येयभागगताकाशप्रदेशराशिप्रमाणानि भवन्ति । एतेषां च समुदाय एकं कंडकं । 'अणंतभागुत्तरं ति' अनन्तभागोत्तरं अनन्तभागोत्तरस्थानसमुदायरूपत्वात्कंडकमप्यनन्तभागोत्तरमुक्तं । एषा कंडकप्ररूपणा । संप्रति षट्स्थानप्ररूपणा क्रियते—तस्मात् प्रथमात् कंडकात् परं यदन्यदनुभागबन्धस्थानं भवति तत्स्पर्धकापेक्षयाऽसंख्येयभागाधिकं । तस्मात्पराणि तु कंडकमात्राणि स्थानानि यथोत्तरमनन्तभागवृद्धानि । ततः परं पुनरप्येकमन्यदनुभागबन्धस्थानमसंख्येयभागाधिकं । ततः पुनरपि कंडकमात्राणि स्थानानि यथोत्तरमनन्तभागवृद्धानि । ततो भूयोऽप्येकमसंख्येयभागाधिकं स्थानं । एवमनन्तभागाधिकैः कंडकप्रमाणैः स्थानैर्व्यवहितान्यसंख्येयभागाधिकानि स्थानानि तावद्वक्तव्यानि यावन्त्यपि कंडकमात्राणि भवन्ति । कंडकं च समयपरिभाषयाऽङ्गुलमात्रक्षेत्रासंख्येयभागगतप्रदेशराशिसंख्याप्रमाणमभिधीयते । ततश्चरमादसंख्येयभागाधिकात् स्थानात् पराणि यथोत्तरमनन्तभागवृद्धानि कंडकमात्राणि स्थानानि वाच्यानि । ततः संख्येयभागाधिकमेकं स्थानं वक्तव्यं । ततो मूलादारभ्य यावन्ति स्थानानि प्रागतिक्रान्तानि तावन्ति पुनरपि तथैवाभिधाय पुनरप्येकं संख्येयभागाधिकं स्थानं वक्तव्यं । अमूनि चैवं संख्येयभागाधिकानि स्थानानि तावद्वक्तव्यानि यावत्कंडकमात्राणि भवन्ति । तत उक्तक्रमेण भूयोऽपि संख्येयभागाधिकस्थानप्रसंगे संख्येयगुणाधिकमेकं स्थानं वक्तव्यं । ततः पुनरपि मूलादारभ्य यावन्त्यनुभागबन्धस्थानानि प्रागतिक्रान्तानि तावन्ति तथैव वाच्यानि ।

ततः पुनरप्येकं संख्येयगुणाधिकं स्थानं वक्तव्यं । ततो भूयोऽपि मूलादारभ्य यावन्ति स्थानानि प्रागतिक्रान्तानि तावन्त्यनुभागबन्धस्थानानि तथैव वक्तव्यानि । ततः पुनरप्येकं संख्येयगुणाधिकं स्थानं वक्तव्यं । अमून्यप्येवं संख्येयगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्कण्डकमात्राणि भवन्ति । ततः पूर्वपरिपाट्या पुनः संख्येयगुणाधिकस्थानप्रसंगेऽसंख्येयगुणाधिकं स्थानं वक्तव्यं । ततः पुनरपि मूलादारभ्य यावन्त्यनुभागबन्धस्थानानि प्रागतिक्रान्तानि तावन्ति तथैव पुनरपि वाच्यानि । ततः पुनरप्येकमसंख्येयगुणाधिकं स्थानं वक्तव्यं । ततो भूयोऽपि मूलादारभ्य तावन्त्यनुभागबन्धस्थानानि वक्तव्यानि । ततः पुनरप्येकमसंख्येयगुणाधिकं स्थानं वक्तव्यं । अमूनि चैवमसंख्येयगुणाधिकानि स्थानानि तावद्वाच्यानि यावत्कण्डकमात्राणि भवन्ति । ततः पूर्वपरिपाट्या पुनरप्यसंख्येयगुणाधिकस्थानप्रसंगेऽनन्तगुणाधिकं स्थानं वक्तव्यं । ततः पुनरपि मूलादारभ्य यावन्त्यनुभागबन्धस्थानानि प्रागभिहितानि तावन्ति पुनरपि तथैव वाच्यानि । ततो भूयोऽप्येकमनन्तगुणाधिकं स्थानं वक्तव्यं । ततो भूयोपि मूलादारभ्य तावन्ति स्थानानि तथैव वक्तव्यानि । ततः पुनरप्येकमनन्तगुणाधिकं स्थानं वक्तव्यं । एवमनन्तगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्कण्डकमात्राणि भवन्ति इति ॥ ३२ ॥

इदानीं सूत्रमनुस्रियते—

एगं असंखभागेणणंतभागुत्तरं पुणो कंडं। एवं असंखभागुत्तराणि जा पुव्वतुल्लाणि ॥ ३३ ॥

एगं ति–ततः प्रथमात् कण्डकादुपरि एकमनुभागबन्धस्थानं । 'असंखभागेण' असंख्येयेन भागेनाधिकं द्रष्टव्यं पूर्व-

स्थानगतस्पर्धकापेक्षयाऽसंख्येयभागाधिकैः स्पर्धकैरधिकं द्रष्टव्यमित्यर्थः । ततः पुनरप्यनन्तभागोत्तरं कंडकं यथोत्तरमनन्तभागवृद्धानां स्थानानां कंडकं । ततः पुनरप्येकमसंख्येयभागाधिकं स्थानं । एवमनन्तभागवृद्धकंडकव्यवहितान्यसंख्येयभागाधिकानि स्थानानि तावद्वक्तव्यानि यावत्पूर्वतुल्यानि भवन्ति, कंडकमात्राणि भवन्तीत्यर्थः । ततः पुनरप्यनन्तभागवृद्धस्थानानां कंडकमभिधाय ततः परमेकं संख्येयभागोत्तरं संख्येयभागाधिकमेकं स्थानं द्रष्टव्यं ॥ ३३ ॥

तथा चाह–

एगं संखेज्जुत्तरमेत्तो तीयाण तिछिया वीयं । ताण वि पढमसमाइं संखेज्जगुणोत्तरं एक्कं ॥ ३४ ॥

एगं ति–'एत्तो त्ति' इतः संख्येयभागाधिकात् स्थानात् परतो मूलादारभ्य यावन्त्यनुभागबन्धस्थानानि प्रागतिक्रान्तानि तावन्त्यतिक्रम्य गत्वा द्वितीयं संख्येयभागाधिकं स्थानं वक्तव्यं । तान्यपि संख्येयभागाधिकानि स्थानान्युपदर्शितप्रकारेण तावद्वाच्यानि यावत्प्रथमसमानि भवन्ति प्रथमकंडकतुल्यानि भवन्तीत्यर्थः । ततः पूर्वपरिपाट्या संख्येयभागाधिकस्थानप्रसंगे संख्येयगुणोत्तरं संख्येयगुणाधिकं स्थानमेकं वक्तव्यं ॥ ३४ ॥

एत्तो तीयाणि अइछियाणि विइयमवि ताणि पढमस्स । तुल्लाणसंखगुणियं एक्कं तीयाण एक्कस्स ॥ ३५ ॥

एत्तो त्ति–इतः संख्येयगुणोत्तरादनुभागबन्धस्थानात् यावन्ति मूलत आरभ्य प्रागतीतान्यतिक्रान्तान्यनुभागबन्धस्थानानि तावन्त्यतिक्रम्य द्वितीयं संख्येयगुणाधिकं स्थानं वक्तव्यं । तान्यप्येवं तावद्वक्तव्यानि यावत्प्रथमस्थानानन्तभागवृद्धस्थानकंडकस्य तुल्यानि भवन्ति । ततः पूर्वपरिपाट्या पुनः संख्येयगुणाधिकस्थानप्रसंगेऽसंख्येयगुणाधिकं

स्थानमेकं वक्तव्यं । ततो मूलत आरभ्य यावन्त्यतीतानि तावन्ति भूयोऽप्यतिक्रम्य गत्वा द्वितीयकमसंख्येयगुणाधिकं स्थानं वक्तव्यं ॥ ३५ ॥

विइयं ताणि समाइं पढमस्साणंतगुणियमेगं तो । तीयाणइच्छियाणंताण वि पढमस्स तुल्लाइं ॥ ३६ ॥

विइयं ति–तान्यप्यसंख्येयगुणाधिकानि स्थानानि प्रथमस्य मूलभूतस्यानन्तभागवृद्धकंडकस्य समानि तुल्यानि भवन्ति । ततः पूर्वपरिपाट्या पुनरप्यसंख्येयगुणाधिकस्थानप्रसंगेऽनन्तगुणितमनन्तगुणाधिकं स्थानमेकं वक्तव्यं । ततो मूलत आरभ्य यानि अनुभागबन्धस्थानानि अतीतानि तानि भूयोऽप्यतिक्रम्य गत्वा द्वितीयमनन्तगुणाधिकं स्थानं वक्तव्यं । एवं तान्यप्यनन्तगुणाधिकानि स्थानानि तावद्वक्तव्यानि यावत्प्रथमस्यानन्तभागवृद्धस्थानकंडकस्य तुल्यानि भवन्ति । ततः पूर्वपरिपाट्या पञ्चकवृद्ध्यनन्तर पुनरप्यनन्तगुणाधिकं स्थानमुत्पद्यते किं वा नेति चेदुच्यते–नोत्पद्यते, षट्स्थानकस्य परिसमाप्तत्वात् । एतत्प्रथमं षट्स्थानकं ॥ ३६ ॥

अस्मिंश्च षट्स्थानकेऽनन्तभागवृद्धिः, असंख्येयभागवृद्धिः, संख्येयभागवृद्धिः, संख्येयगुणवृद्धिः, असंख्येयगुणवृद्धिः अनन्तगुणवृद्धिश्चोक्ता । तत्र कियन्मात्रेणानन्तासंख्येयसंख्येयतमेन भागेन कियन्मात्रेण वाऽनन्तासंख्येयसंख्येयगुणकारेण वृध्दिर्भवतीति तत्परिज्ञानार्थमाह–

सव्वजियाणमसंखेज्जलोग संखेज्जगस्स जेट्ठस्स । भागो तिसु गुणणा तिसु छट्ठाणमसंखिया लोगा ॥३७॥

सव्वेति–आद्यासु तिसृषु वृद्धिष्वनन्तासंख्येयसंख्येयानां भागो यथाक्रमं सर्वजीवानामसंख्येयलोकाकाशप्रदेशानामुत्कृष्टस्य

च संख्येयस्य द्रष्टव्यः । उत्तरासु च तिसृषु वृद्धिषु गुणना गुणकारोऽनन्तासंख्येयसंख्येयानां यथाक्रममेतेषामेव सर्वजीवादीनामवगन्तव्या । इदमुक्तं भवति–प्रथमस्यानुभागबन्धस्थानस्य सर्वजीवसंख्याप्रमाणेन राशिना भागे हृते सति यल्लब्धं सोऽनन्तभाग इह ग्राह्यः, तेनाभ्यधिकं द्वितीयमनुभागस्थानं। तस्यापि सर्वजीवसंख्याप्रमाणेन राशिना भागे हृते सति यल्लब्धं तेनाभ्यधिकं तृतीयमनुभागबन्धस्थानं । एवं यद्यदनुभागबन्धस्थानमनन्तभागवृद्धमुपलभ्यते तत्तत्पाश्चात्यस्य पाश्चात्यस्यानुभागबन्धस्थानस्य सर्वजीवसंख्याप्रमाणेन राशिना भागे हृते सति यल्लभ्यते तेन तेनानन्ततमेन भागेनाभ्यधिकमवगन्तव्यं । तथाऽसंख्येयभागाधिकं नाम पाश्चात्यस्यानुभागबन्धस्थानस्यासंख्येयलोकाकाशप्रदेशप्रमाणेन राशिना भागे हृते सति यल्लभ्यते सोऽसंख्येयतमो भागः । तेनासंख्येयतमेन भागेनाभ्यधिकमसंख्येयभागाधिकं द्रष्टव्यं । तथा संख्येयभागाधिकं नाम पाश्चात्यस्यानुभागबन्धस्थानस्य उत्कृष्टेन संख्येयेन भागे हृते सति यल्लभ्यते स संख्येयतमो भागः । तेन संख्येयतमेन भागेनाभ्यधिकमवगन्तव्यं । तथा संख्येयगुणवृद्धं नाम पाश्चात्यमनुभागबन्धस्थानमुत्कृष्टसंख्येयकप्रमाणेन राशिना गुण्यते । गुणिते च सति यावान् राशिर्भवति एतावत्प्रमाणमवगन्तव्यं । तथाऽसंख्येयगुणवृद्धं नाम पाश्चात्यमनुभागबन्धस्थानमसंख्येयलोकाकाशप्रदेशसंख्याप्रमाणेन राशिना गुण्यते । गुणिते च सति यावान् राशिर्भवति तावत्प्रमाणमवसेयं । एवमनन्तगुणवृद्धमपि भावनीयं । प्रथमस्य षट्स्थानकस्य परिसमाप्तौ सत्यामुपरि यदन्यदनुभागस्थानमुपजायतेऽनन्तभागवृद्धं तत् द्वितीयस्य षट्स्थानकस्य प्रथममवगन्तव्यं । तदपि च द्वितीयं षट्स्थानकं पूर्वक्रमेण सकलमपि वक्तव्यं । एवं शेषाण्यपि षट्स्थानकानि वक्तव्यानि । तानि च तावद्वक्तव्यानि यावद-

संख्येयलोकाकाशप्रदेशराशिप्रमाणानि भवन्ति । तथा चाह–'ठाणाणमसंखिया लोगा' । अत्र कश्चित्प्रश्नयति–ननु प्रथमानुभागबन्धस्थानस्य सर्वजीवप्रमाणेन राशिना भागोऽपह्रियते किं रसाविभागापेक्षया उत परमाण्वपेक्षया यद्वा स्पर्धकापेक्षया ? तत्र न तावद्रसाविभागापेक्षया, प्रथमस्थानात् द्वितीयस्थानेऽपि रसाविभागानां संख्येयादिगुणनया प्राप्यमाणत्वात् । तथाहि–प्रथमे स्थाने प्रथमे स्पर्धके प्रथमवर्गणायामनन्ता अपि रसाविभागाः किलासत्कल्पनया सप्त । ततो द्वितीयस्यां वर्गणायामष्टौ । तृतीयस्यां नव । चतुर्थ्यां दश । इदमेकं स्पर्धकं । इत ऊर्ध्वं त्वेकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणाधिकाः । ते च किलासत्कल्पनया सप्तदश । एते च द्वितीयस्य स्पर्धकस्य प्रथमवर्गणायां । ततो द्वितीयस्यां वर्गणायामष्टादश । तृतीयस्यामेकोनविंशतिः । चतुर्थ्यां विंशतिः । इदं द्वितीयं स्पर्धकं । ततः पुनरप्यत ऊर्ध्वमेकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणाधिकाः । ते च किलासत्कल्पनया सप्तविंशतिः । एते च तृतीयस्य स्पर्धकस्य प्रथमवर्गणायां । ततो द्वितीयस्यां वर्गणायामष्टाविंशतिः । तृतीयस्यामेकोनत्रिंशत् । चतुर्थ्यां त्रिंशत् । इदं तु तृतीयं स्पर्धकं । ततः पुनरप्यत ऊर्ध्वमेकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणान्यधिकाः । ते च किलासत्कल्पनया सप्तत्रिंशत् । एते चतुर्थस्य स्पर्धकस्य प्रथमवर्गणायां । ततो द्वितीयस्यां वर्गणायामष्टात्रिंशत् । तृतीयस्यामेकोनचत्वारिंशत् । चतुर्थ्यां चत्वारिंशत् । इदं चतुर्थं स्पर्धकं। एतानि च किलासत्कल्पनया प्रथममनुभागबन्धस्थानं । अत्र च रसाविभागाः सर्वसंख्यया षट्सप्तत्यधिकानि त्रीणि शतानि । इत ऊर्ध्वं त्वेकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणान्यधिकाः । ते च किलासत्क-

ल्पनया सप्तचत्वारिंशत् । एते च द्वितीयस्य स्थानस्य प्रथमस्पर्धकस्य प्रथमवर्गणायां । ततो द्वितीयस्यां वर्गणायामष्ट-चत्वारिंशत् । तृतीयस्यामेकोनपञ्चाशत् । चतुर्थ्यां पञ्चाशत् । इदं द्वितीये स्थाने प्रथमं स्पर्धकं । इत ऊर्ध्वं त्वेकोत्तर-वृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणाधिकाः । ते च किलासत्कल्पनया सप्तपञ्चाशत् । एते च द्वितीयस्थाने द्वितीयस्पर्धकस्य प्रथमवर्गणायां । ततो द्वितीयस्यां वर्गणायामष्टपञ्चाशत् । तृतीयस्यामेकोनषष्टिः । चतुर्थ्यां षष्टिः । इदं द्वितीयस्थाने द्वितीयं स्पर्धकं । इत ऊर्ध्वमेकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणा-धिकाः । ते च किलासत्कल्पनया सप्तषष्टिः । एते च द्वितीये स्थाने तृतीयस्य स्पर्धकस्य प्रथमवर्गणायां । ततो द्विती-यस्यां वर्गणायामष्टषष्टिः । तृतीयस्यामेकोनसप्ततिः । चतुर्थ्यां सप्ततिः । इदं द्वितीये स्थाने तृतीयं स्पर्धकं । तत इत ऊर्ध्वं पुनरप्येकोत्तरवृद्ध्या रसाविभागा न प्राप्यन्ते, किंतु सर्वजीवानन्तगुणाधिकाः । ते च किलासत्कल्पनया सप्त-सप्ततिः । (एते च द्वितीये स्थाने चतुर्थस्य स्पर्धकस्य प्रथमवर्गणायां) ततो द्वितीयस्यां वर्गणायामष्टसप्ततिः । तृती-यस्यामेकोनाशीतिः । चतुर्थ्यामशीतिः । इदं च द्वितीयस्थाने चतुर्थं स्पर्धकं । एतानि च किलासत्कल्पनया द्वितीयं स्थानं । अत्र च रसाविभागाः सर्वसंख्यया षोडशाधिकं सहस्रं । तदेवं प्रथमस्थानगतरसाविभागापेक्षया द्वितीयस्थाने रसाविभागाः संख्येयगुणाः प्राप्यन्ते । उत्तरस्मिन्नुत्तरस्मिंस्तु स्थाने पूर्वपूर्वस्थानापेक्षया प्रभूताः प्रभूततमाः इति न क्वापि रसाविभागापेक्षया पूर्वस्थानादुत्तरस्य स्थानस्यानन्तभागाधिकत्वं प्राप्यते । नापि परमाण्वपेक्षयाऽनन्तभागाधि-कत्वसंभवः, यतो यथा यथाऽनुभागो वर्धते तथा तथा पुद्गलाः स्तोकाः स्तोकतराः प्राप्यन्ते । ततः प्रथमस्थानगत-

परमाण्वपेक्षया द्वितीये स्थाने परमाणवः किंचिदूना एव भवन्ति, नानन्तभागाधिकाः । एवमुत्तरेष्वपि स्थानेषु पूर्वपूर्वस्थानापेक्षया हीनहीनतरपरमाणुत्वं द्रष्टव्यं । नापि स्पर्धकापेक्षया प्रथमस्थानादीनां सर्वजीवप्रमाणेन राशिना भागापहारः संभवति, प्रथमस्थानादिगतस्पर्धकानामभव्यानन्तगुणसिद्धानन्तभागकल्पनयाऽतीव स्तोकत्वादिति ॥ अत्रोच्यते–इयं हि षट्स्थानकप्ररूपणा संयमश्रेण्यादिगतसकलषट्स्थानकव्यापकलक्षणतया प्ररूप्यते । ततो यद्यप्यनन्तगुणवृद्धात् स्थानादर्वाक्तनेषु स्थानेषु सर्वजीवप्रमाणेन राशिना स्पर्धकापेक्षया भागहारो न संभवति, तथाप्युत्तरेषु स्थानेष्वन्येष्वपि च द्वितीयादिषु षट्स्थानेषु तथा सर्वेष्वपि संयमश्रेण्यादिगतेषु संभवतीति न कश्चिद्विरोधः, बाहुल्येन सर्वत्रापि संभवात्, सर्वजीवप्रमाणेन राशिना भागो ह्रियत इतिवचनाच्च अनन्तगुणवृद्धात् स्थानादर्वागपि पूर्वस्थानेभ्य उत्तरोत्तरस्थानानां सर्वस्तोकानन्तभागाधिकत्वमवसेयं । यद्यपि च पूर्वपूर्वस्थानापेक्षयोत्तरोत्तरस्थानेषु किंचिद्धीनहीनतराः परमाणवः प्राप्यन्ते तथापि स्तोकस्तोकतरैः परमाणुभिर्वर्गणादीनां संभवादुक्तस्वरूपस्पर्धकबाहुल्यं न विरुध्यते । तदेवमुक्ता षट्स्थानकप्ररूपणा । सांप्रतमधस्तनस्थानप्ररूपणा क्रियते–तत्र प्रथमादसंख्येयभागवृद्धात्स्थानादधः कियन्त्यनुभागबन्धस्थानान्यनन्तभागवृद्धानि ? उच्यते–कंडकमात्राणि । तथा प्रथमात्संख्येयभागवृद्धात्स्थानात् अधः कियन्त्यसंख्येयभागवृद्धानि स्थानानि ? उच्यते–कंडकमात्राणि । तथा प्रथमात्संख्येयगुणवृद्धात्स्थानादधः कियन्ति संख्येयभागवृद्धानि स्थानानि ? उच्यते–कंडकमात्राणि । तथा प्रथमादसंख्येयगुणवृद्धात् स्थानादधः कियन्ति संख्येयगुणवृद्धानि स्थानानि ? उच्यते–कंडकमात्राणि । तथा प्रथमादनन्तगुणवृद्धात् स्थानादधः कियन्त्यसंख्येयगुणवृद्धानि स्थानानि ?

उच्यते—कंरूकमात्राणि । इयमुत्तरोत्तरस्थानादधोऽध आनन्तर्येण मार्गणा । इदानीमेकान्तरिता मार्गणा क्रियते—तत्र प्रथमादसंख्येयभागवृद्धात् स्थानादधः कियन्त्यनन्तभागवृद्धानि स्थानानि ? उच्यते—कंरूकवर्गः कंरूकं च । तथा प्रथमात्संख्येयगुणवृद्धात् स्थानादधः कियन्त्यसंख्येयभागवृद्धानि स्थानानि ? उच्यते—कंरूकवर्गः कंरूकं च । तथा प्रथमादसंख्येयगुणवृद्धात् स्थानादधः कियन्ति संख्येयभागवृद्धानि स्थानानि ? उच्यते—कंरूकवर्गः कंरूकं च । तथा प्रथमादनन्तगुणवृद्धात् स्थानादधः कियन्ति संख्येयगुणवृद्धानि स्थानानि ? उच्यते—कंरूकवर्गः कंरूकं च । एवमुक्तप्रकारेण द्व्यन्तरिता त्र्यन्तरिता चतुरन्तरिता च मार्गणा स्वधिया परिभावनीया ॥ ३७ ॥

तदेवं कृताऽधस्तनस्थानप्ररूपणा । सांप्रतं वृद्धिस्थानप्ररूपणा क्रियते—

वुड्ढी हाणी छक्कं तम्हा दोण्हं पि अंतमिल्लाणं । अंतोमुहुत्तमावलि असंखभागा उ सेसाणं ॥ ३८ ॥

वुड्ढि त्ति— इह जीवाः परिणतिविशेषतः कर्मपरमाणुष्वनुभागस्य षड्विधामुक्तस्वरूपां वृद्धिं हानिं वा कुर्वन्ति । तस्मात् कां वृद्धिं कियन्तं कालं यावत् कुर्वन्तीत्यवश्यं कालप्रमाणमभिधानीयं । तत्र द्वयोर्वृद्धिहान्योरन्तिमयोरनन्तगुणवृद्ध्यनन्तगुणहानिरूपयोरन्तर्मुहूर्तमवगन्तव्यं । किमुक्तं भवति ? अन्तर्मुहूर्तं कालं यावन्निरन्तरं जीवाः परिणामविशेषतः प्रतिसमयमनुभागान् पूर्वस्मात् पूर्वस्मादनन्तगुणवृद्धाननन्तगुणहीनान् वा बध्नन्ति । तथा शेषाणां पश्चानामाद्यानां वृद्धीनां हानीनां वा आवलिकाया असंख्येयभागमात्रः कालो वेदितव्यः । इदमुक्तं भवति—अनुभागानामाद्याः पञ्च वृद्धीर्हा-

नीर्वा आवलिकाया असंख्येयभागमात्रं कालं यावन्निरन्तरं जीवाः परिणामविशेषतः कुर्वन्ति । एषा च हानिवृद्धि-कालप्ररूपणोत्कर्षतोऽवगन्तव्या । जघन्यतस्तु सर्वा अपि वृद्धयो हानयो वा एकं द्वौ वा समयौ यावदवगन्तव्याः ॥२८॥

इदानीमेतेष्वनुभागस्थानेषु बन्धमाश्रित्यावस्थाने कालमानमाह—

चउराई जावट्ठगमेत्तो जावं दुगं तिसमयाणं । ठाणाणं उक्कोसो जहण्णउ सव्वहिं समउ ॥ ३९ ॥

चउराइ त्ति–चत्वार आदिर्यस्याः सा चतुरादिः वृद्धिः । सा च समयानामवस्थितकालनियामकानां तावद्द्रष्टव्या यावदष्टौ समयाः । इत ऊर्ध्वं पुनः समयाना हानिर्वक्तव्या । सा च तावद्वक्तव्या यावत् द्विकं । सा च वृद्धिर्हानिर्वा चतुरादिका स्थानानामनुभागबन्धस्थानानामुत्कर्षतो द्रष्टव्या । जघन्यतस्तु सर्वेषामपि समयः । इयमत्र भावना–यानि अनुभागबन्धस्थानानि जीवाः पुनः पुनस्तान्येव चतुरः समयान् यावद्बध्नन्ति तानि चतुःसामयिकानि । तानि च मूला-दारभ्यासंख्येयलोकाकाशप्रदेशराशिप्रमाणानि भवन्ति । तेभ्य उपरितनानि स्थानानि पञ्चसामयिकानि, तान्यप्यसंख्ये-यलोकाकाशप्रदेशराशिप्रमाणानि । तेभ्य उपरितनानि स्थानानि षट्सामयिकानि, तान्यप्यसंख्येयलोकाकाशप्रदेशरा-शिप्रमाणानि । तेभ्य उपरितनानि स्थानानि सप्तसामयिकानि, तान्यप्यसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि । तेभ्य उपरितनान्यष्टसामयिकानि, तान्यप्यसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि । तेभ्य उपरितनानि पुनः स्थानानि सप्त-सामयिकानि, तान्यप्यसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि । तेभ्य उपरितनानि षट्सामयिकानि, तान्यप्यसंख्ये-यलोकाकाशप्रदेशराशिप्रमाणानि । एवं तावद्वाच्यं यावद्द्विसामयिकानि ॥ ३९ ॥

तदेवं कृता समयप्ररूपणा । इदानीं यान्यनुभागबन्धस्थानानि अष्टसामयिकानि तानि यस्यां वृद्धौ हानौ वा प्राप्यन्ते तामाह—

दुसु जवमज्झं थोवाणि अट्ठसमयाणि दोसु पासेसु । समऊणियाणि कमसो असंखगुणियाणि उप्पिं च ॥४०॥

दुसु त्ति—द्वयोर्विकल्पयोरनन्तगुणवृद्ध्यनन्तगुणहानिरूपयोर्यवमध्यं वर्तते । यवस्य मध्यमिव यवमध्यं अष्टसामयिकान्यनुभागबन्धस्थानानीत्यर्थः । यथा यवस्य मध्यं पृथुलमुभयतः पार्श्वे च हीने हीनतरे, तथात्रापि कालतः पृथुलानि अष्टसामयिकानि अनुभागबन्धस्थानानि, उभयपार्श्ववर्तीनि च सप्तसामयिकादीनि कालतो हीनानि हीनतराणि । ततोऽष्टसामयिकानि यवस्य मध्यमिव यवमध्यं । तानि च प्रथमादष्टसामयिकात् स्थानादारभ्य सर्वाण्यप्यसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि अनन्तगुणवृद्धौ प्राप्यन्ते । सप्तसामयिकानां हि चरमादनुभागबन्धस्थानात् प्रथममष्टसामयिकं स्थानमनन्तगुणवृद्धं । ततः शेषाण्यपि तदपेक्षयाऽनन्तगुणवृद्धान्येव भवन्ति । तथाऽष्टसामयिकानां चरमादनुभागबन्धस्थानादुपरितनं सप्तसामयिकं स्थानमनन्तगुणवृद्धं । ततस्तदपेक्षया पाश्चात्यान्यष्टसामयिकान्यनुभागबन्धस्थानानि सर्वाण्यप्यनन्तगुणहीनान्येव भवन्ति । तदेवमष्टसामयिकान्यनन्तगुणवृद्धौ अनन्तगुणहानौ च प्राप्यन्ते । अष्टसामयिकानि चोपलक्षणं, तेनाद्यानि चतुःसामयिकानि सर्वान्तिमानि च द्विसामयिकानि वर्जयित्वा शेषाणि सर्वाण्यपि पञ्चसामयिकादीनि प्रत्येकमुक्तप्रकारेणानन्तगुणवृद्धावनन्तगुणहानौ च वेदितव्यानि । आद्यानि पुनः चतुःसामयिकान्यनन्तगुणहानावेव । तथाहि—पञ्चसामयिकमाद्यमनुभागबन्धस्थानं चतुःसामयिकचरमानुभागबन्ध-

स्थानापेक्षयाऽनन्तगुणवृद्धं । ततस्तदपेक्षया पाश्चात्यानि चतुःसामयिकानि सर्वाण्यप्यनुभागबन्धस्थानान्यनन्तगुणवृद्धानावेव प्राप्यन्ते, द्विसामयिकानि त्वनन्तगुणवृद्धावेव । तथाहि–त्रिसामयिकानां चरमादनुभागबन्धस्थानादाद्यं द्विसामयिकमनुभागबन्धस्थानमनन्तगुणवृद्धं, ततस्तदपेक्षया सर्वाण्यप्यनन्तगुणवृद्धान्येव । कृता यवमध्यप्ररूपणा । सांप्रतं चतुःसामयिकादीना स्थानानामल्पबहुत्वमाह–'थोवाणीत्यादि' सर्वस्तोकानि यवमध्यभूतानि अष्टसामयिकानि स्थानानि। अतिचिरबन्धकालयोग्यानि हि स्थानानि स्तोकान्येव प्राप्यन्ते इति कृत्वा तेभ्योऽसंख्येयगुणानि पूर्वोत्तरलक्षणोभयपार्श्ववर्तीनि सप्तसामयिकानि अल्पतरबन्धकालविषयत्वात् । स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि उभयपार्श्ववर्तीनि षट्सामयिकानि । स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि उभयपार्श्ववर्तीनि पञ्चसामयिकानि । स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि उभयपार्श्ववर्तीनि चतुःसामयिकानि । स्वस्थाने तु द्वयान्यपि परस्परं तुल्यानि । तेभ्योऽप्यसंख्येयगुणानि त्रिसामयिकानि । तेभ्योऽप्यसंख्येयगुणानि द्विसामयिकानि । 'दोसु पासेसु त्ति' अष्टसामयिकेभ्योऽनन्तरं द्वयोः पार्श्वयोः क्रमशः क्रमेण समयोनानि समयोनानि सप्तसामयिकादीनि स्थानानि असंख्येयगुणानि तावद्वक्तव्यानि यावच्चतुःसामयिकानि । तेभ्य उपरि च त्रिसामयिकानि द्विसामयिकानि च क्रमशोऽसंख्येयगुणानि वक्तव्यानीति गाथार्थः ॥ ४० ॥

संप्रति सर्वेषामेवानुभागबन्धस्थानाना समुदायमधिकृत्य विशेषसंख्यानिरूपणार्थमाह–

सुहुमगणिपवेसणया अगणिकाया य तेसि कायठिई। कमसो असंखगुणियाण(अ)ज्झवसाणाणि चणुभागे

सुहुमेति-सूक्ष्माग्नौ सूक्ष्माग्निकाये प्रवेशनमुत्पादो येषां ते सूक्ष्माग्निप्रवेशनकाः । तथाऽग्निकाया अग्निकायत्वेनावस्थिताः । तथा तेषामग्निकायानां कायस्थितिः कायस्थितिकालः । एते क्रमशः क्रमेणासंख्येयगुणिताः । तथाऽनुभागेऽनुभागविषयेऽध्यवसानानि, कार्ये कारणोपचारादध्यवसायनिर्वर्त्यानि यान्यनुभागबन्धस्थानानि, तान्यसंख्येयगुणानि । उक्तं च-"सुहुमगणिपविसंता चिट्ठंता तेसि कायठिइकालो । कमसो असंखगुणिओ तत्तो अणुभागठाणाइं ॥ १ ॥" इयमत्र भावना-य एकस्मिन् समये सूक्ष्माग्निकायेषु मध्ये प्रविशन्ति उत्पद्यन्ते ते स्तोकाः, ते चासंख्येयलोकाकाशप्रदेशप्रमाणाः । तेभ्योऽपि येऽग्निकायत्वेनावतिष्ठन्ते तेऽसंख्येयगुणाः तेभ्योऽप्यग्निकायस्थितिकालोऽसंख्येयगुणः । ततोऽप्यनुभागबन्धस्थानान्यसंख्येयगुणानि ॥ ४१ ॥

संप्रत्योजोयुग्मप्ररूपणावसरः-तत्रौजो विषमं, समं युग्मं, तत्प्ररूपणा चैवं-इह कश्चिद्विवक्षितो राशिः स्थाप्यते, तस्य कलिद्वापरत्रेताकृतयुगसंज्ञैश्चतुर्भिर्भागो ह्रियते । भागे च हृते सति यद्येकः शेषो भवति तर्हि स राशिः पूर्वपुरुषपरिभाषया कल्योज उच्यते, यथा त्रयोदश । अथ द्वौ शेषौ तर्हि द्वापरयुग्मः, यथा चतुर्दश । अथ त्रयः शेषास्ततस्त्रेतौजो यथा पञ्चदश । यदा तु न किञ्चिदवतिष्ठते, किं तु सर्वात्मना निर्लेप एव भवति, तदा स कृतयुगो यथा षोडश । उक्तं च-"[१]चउदस दावरजुम्मा तेरस कलिओज तह य कडजुम्मा । सोलस तेओजो खलु पन्नरसेवं खु विन्नेया ॥ १ ॥" ॥ ४१ ॥

तत्राविभागादयो यादृग्राशिरूपा वर्तन्ते तादृग्राशिरूपमाह—

---

१ किमिति पट्ट दश च विहायाश्रीयन्ते चतुर्दशेति चेच्चतुर्थचतुष्कत्वेनेत्यनुमन्ये ।

कडजुम्मा अविभागा ठाणाणि य कंडगाणि अणुभागे। पज्जवसाणमणंतगुणाउ उप्पिं न (अ)णंतगुणं ४२

कडजुम्मेति—अनुभागेऽनुभागविषयेऽविभागस्थानानि कंडकानि च कृतयुग्मानि कृतयुग्मराशिरूपाणि द्रष्टव्यानि। कृतौजोयुग्मप्ररूपणा। संप्रति पर्यवसानद्वारमाह—'पज्जवसाणेत्यादि'। अनन्तगुणादनन्तगुणवृद्धिकंडकादुपरि पञ्चवृद्ध्यात्मकानि सर्वाणि स्थानानि गत्वा पुनरनन्तगुणवृद्धं स्थानं न प्राप्यते, षट्स्थानस्य परिसमाप्तत्वात्। ततस्तदेव सर्वान्तिमं स्थानं षट्स्थानकस्य पर्यवसानमिति ॥ ४२ ॥

संप्रत्यल्पबहुत्वप्ररूपणार्थमाह—

अप्पबहुमणंतरउ असंखगुणियाणणंतगुणमाई । तव्विवरीयमियरउ संखेज्जक्खेसु संखगुणं ॥ ४३ ॥

अप्पेति—इह द्विधाऽल्पबहुत्वप्ररूपणा—अनन्तरोपनिधया परंपरोपनिधया च। तत्रैकस्मिन् षट्स्थानकेऽन्तिमस्थानादारभ्य पश्चानुपूर्व्याऽनन्तरोपनिधया प्ररूपणा क्रियते—अनन्तगुणान्यनन्तगुणवृद्धानि स्थानान्यादौ कृत्वा शेषाण्यसंख्येयगुणितानि वक्तव्यानि। तद्यथा—सर्वस्तोकान्यनन्तगुणवृद्धानि स्थानानि, कंडकमात्रत्वात्तेषां। तेभ्योऽसंख्येयगुण वृद्धानि स्थानान्यसंख्येयगुणानि। को गुणकारः? भण्यते—कंडकं एककंडकप्रक्षेपश्च। कुत एतदवसीयत इति चेदुच्यते—इह यस्मादेकैकस्यानन्तगुणवृद्धस्य स्थानस्याधस्तादसंख्येयगुणवृद्धानि स्थानानि कंडकमात्राणि प्राप्यन्ते। तेन कंडकं गुणकारः। अनन्तगुणवृद्धस्थानकंडकाच्चोपरि कंडकमात्राण्यसंख्येयगुणवृद्धानि स्थानानि प्राप्यन्ते, न त्वनन्तगुणवृद्धं स्थानं, तेनोपरितनकंडकस्याधिकस्य तत्र प्रक्षेपः। तेभ्योऽप्यसंख्येयगुणवृद्धेभ्यः स्थानेभ्यः संख्येयगुणवृद्धानि स्थानानि असंख्येयगुणानि। तेभ्योऽपि संख्येयभागाधिकानि स्थानान्यसंख्येयगुणानि। तेभ्योऽप्यसंख्येयभागाधिकानि स्थाना-

न्यसंख्येयगुणानि । तेभ्योऽप्यनन्तभागवृद्धानि स्थानान्यसंख्येयगुणानि । गुणकारश्च सर्वत्रापि कंडकं उपरि चैककं-डकप्रक्षेपः । तथाहि–एकैकस्यासंख्येयगुणवृद्धस्य स्थानस्याधस्तात् संख्येयगुणवृद्धानि स्थानानि कंडकमात्राणि प्राप्यन्ते। तेन कंडकं गुणकारः । असंख्येयगुणवृद्धकंडकाच्चोपरि कंडकमात्राणि संख्येयगुणवृद्धानि स्थानानि प्राप्यन्ते । तदनन्तरं त्वनन्तगुणवृद्धमेव स्थानं भवति, न त्वसंख्येयगुणवृद्धं । प्रथमाच्चानन्तगुणवृद्धात् स्थानादर्वाक् असंख्येयगुणवृद्धस्था-नापेक्षया संख्येयगुणवृद्धानि स्थानानि चिन्त्यन्ते । न तत ऊर्ध्वमपि । तेनोपर्येकस्यैव कंडकस्याधिकस्य प्रक्षेपः । एवं संख्येयभागवृद्धादीनामपि स्थानानामसंख्येयगुणत्वे गुणकारभावना भावनीया द्रष्टव्या । तदेवं कृताऽनन्तरोपनिधयाऽल्पबहुत्व-प्ररूपणा । संप्रति परंपरोपनिधया तां कुर्वन्नाह–'तविवरीयमियरउ त्ति' इतरत इतरस्यां परंपरोपनिधायां तद्विपरीतं येन क्रमेणोक्तमनन्तरोपनिधायां तद्विपरीतं द्रष्टव्यं । इहादित आरभ्य वक्तव्यमित्यर्थः । तथाहि–सर्वस्तोकानि अनन्त-भागवृद्धानि स्थानानि यस्मादाद्यानुभागबन्धस्थानादारभ्यानन्तभागवृद्धानि स्थानानि कंडकमात्राण्येव प्राप्यन्ते, नाधि-कानि । तेभ्योऽप्यसंख्येयभागवृद्धानि स्थानानि असंख्येयगुणानि । कथमिति चेदुच्यते–अनन्तभागवृद्धकंडकादुपरि-तनं प्रथममसंख्येयभागवृद्धं स्थानं यदि पाश्चात्यकंडकसत्कचरमस्थानापेक्षयाऽसंख्येयेन भागेनाधिकं; तत उपरित-नमनन्तभागवृद्धं स्थानं तदपेक्षया सुतरामसंख्येयभागवृद्धं भवति । अनन्तभागवृद्धं हि तत्प्रथमासंख्येयभागवृद्धस्था-नापेक्षया । अनन्तभागवृद्धकंडकसत्कचरमस्थानापेक्षया त्वसंख्येयभागाधिकमेव । तत उपरितनानि स्थानानि विशे-षतो विशेषतरतोऽसंख्येयभागाधिकानि तावद्द्रष्टव्यानि यावत्संख्येयभागाधिकं स्थानं न भवति । तदेवं यतः प्रथमा-

दसंख्येयभागवृद्धात् स्थानादारभ्य प्रथमात् संख्येयभागवृद्धात् स्थानादर्वागपान्तराले यानि स्थानानि तानि सर्वाण्य-
प्यसंख्येयभागवृद्धानि प्राप्यन्ते । तस्मादनन्तभागवृद्धेभ्यः स्थानेभ्योऽसंख्येयभागवृद्धानि स्थानान्यसंख्येयगुणानि
भवन्ति तेभ्योऽपि संख्येयभागवृद्धानि स्थानानि संख्येयगुणानि । कुत एतदवसीयत इति चेदुच्यते—प्रथमे संख्येय-
भागवृद्धे स्थाने पाश्चात्यमनन्तरस्थानमधिकृत्य संख्येयभागवृद्धिः प्राप्यते । तद्यदि प्रथमेऽपि संख्येयभागवृद्धे स्थाने
संख्येयभागवृद्धिः प्राप्ता, तर्हि ततः प्रथमात् स्थानादुत्तरेषामनन्तभागवृद्धासंख्येयभागवृद्धानां स्थानानां सुतरां संख्य-
यभागवृद्धिर्भवति । यतोऽनन्तभागवृद्धिरसंख्येयभागवृद्धिर्वा पूर्वपूर्वा(न)न्तरस्थानापेक्षया । प्रथमसंख्येयभागवृद्धात्पुनः
प्राक्तनमनन्तरं स्थानमधिकृत्य सर्वाण्यप्यनन्तभागवृद्धानि । असंख्येयभागवृद्धानि च स्थानानि यथोत्तरं सविशे-
सविशेषतरं संख्येयभागवृद्धानि भवन्ति । सविशेषतरसंख्येयभागवृद्धिश्च तावद्वक्तव्या यावन्मौलं द्वितीयं संख्येयभा-
गाधिकं स्थानं न भवति । द्वितीयं मौलं संख्येयभागाधिकं स्थानं द्वाभ्यां सातिरेकाभ्यां संख्येयभागाभ्यामधिकमव-
गन्तव्यं । तृतीयं त्रिभिः सातिरेकैः । चतुर्थं चतुर्भिः सातिरेकैः । एवं तावद्वाच्यं यावदुत्कृष्टसंख्येयतुल्यान्यन्तरान्तराभा-
वीनि मौलानि संख्येयभागवृद्धानि स्थानानि भवन्ति । एतावन्ति चान्तराले यावन्ति स्थानानि तावन्ति सर्वाण्यपि
संख्येयभागवृद्धानि स्थानानि किंत्वेकेन सर्वान्तिमेन स्थानेन न्यूनानि द्रष्टव्यानि । यत उत्कृष्टसंख्यातमसंख्येयभा-
गवृद्धं स्थानं संख्येयगुणं भवति, (द्विगुणत्वात्), ततस्तत्परित्यज्यते । तथेह यावन्ति असंख्येयभागवृद्धानि स्थानान्य-
नन्तरमुक्तानि तावन्ति एकैकस्मिन्नन्तरान्तराभाविना संख्येयभागवृद्धाना स्थानानामन्तरे प्राप्यन्ते । तानि चान्तरा-

न्तराभावीनि मौलानि संख्येयभागवृद्धानि स्थानानि प्रस्तुतचिन्तायामुत्कृष्टसंख्यातकतुल्यानि गृह्यन्ते । केवलं तदेवैकं सर्वान्तिमं संख्येयभागवृद्धं परित्यज्यते । ततोऽसंख्येयभागवृद्धेभ्यः स्थानेभ्यः संख्येयभागवृद्धानि स्थानानि संख्येयगुणान्येव भवन्ति । तेभ्योऽपि संख्येयगुणवृद्धानि स्थानानि संख्येयगुणानि । कथमिति चेदुच्यते–प्रथमात्संख्येयभागवृद्धात् स्थानात्प्राक्तनं यदनन्तरं स्थानं तदधिकृत्योत्तराणि अन्तरान्तराभावीनि मौलानि संख्येयभागवृद्धानि स्थानानि उत्कृष्टसंख्यातकतुल्यानि गत्वा चरमं स्थानं द्विगुणं साधिकमुपलब्धं । ततः पुनरपि तावन्मात्राण्येव स्थानानि गत्वा चरमं स्थानं सातिरेकं त्रिगुणं । एवमेव चतुर्गुणं । एवं तावद्वाच्यं यावदुत्कृष्टसंख्येयगुणं भवति । ततः पुनरप्युत्कृष्टसंख्यातकतुल्यानि स्थानानि गत्वा चरमं यदेकेन गुणेन वृद्धं भवति, तज्जघन्यासंख्येयगुणं भवति । तस्मात्संख्येयभागवृद्धेभ्यः स्थानेभ्यः संख्येयगुणवृद्धानि स्थानानि संख्येयगुणान्येव भवन्ति । तथा चाह–'संखेज्जक्खेसु संखगुणं' संख्येयाख्येषु संख्येयभागवृद्धसंख्येयगुणरूपेषु स्थानेषु संख्येयगुणं संख्येयगुणता वक्तव्या । तेभ्योऽपि संख्येयगुणवृद्धेभ्यः स्थानेभ्योऽसंख्येयगुणवृद्धानि स्थानानि असंख्येयगुणानि । कथमिति चेदुच्यते–इह यतः प्रागुक्तादनन्तराज्जघन्यासंख्येयगुणात् स्थानात् पराणि सर्वाण्यप्यनन्तभागवृद्धासंख्येयभागवृद्धसंख्येयभागवृद्धसंख्येयगुणवृद्धासंख्येयगुणवृद्धानि स्थानान्यसंख्येयगुणानि प्राप्यन्ते, ततः संख्येयगुणवृद्धेभ्यः स्थानेभ्योऽसंख्येयगुणवृद्धानि स्थानानि असंख्येयगुणानि भवन्ति । तेभ्योऽप्यनन्तगुणवृद्धानि स्थानान्यसंख्येयगुणानि । कथमिति चेदुच्यते–इह प्रथमादनन्तगुणवृद्धात् स्थानादारभ्य यावत् षट्स्थानकपरिसमाप्तिस्तावत् सर्वाण्यपि स्थानानि अनन्तगुणवृद्धानि । तथाहि–यदि प्रथ-

ममनन्तगुणवृद्धं स्थानं पाश्चात्यमनन्तरस्थानमधिकृत्यानन्तगुणाधिकं जातं। तत उत्तराणि अनन्तभागवृद्धादीनि स्थानानि तदपेक्षया सुतरामनन्तगुणवृद्धानि भवन्ति। यावन्ति च स्थानानि प्रागतिक्रान्तानि तावन्ति एकैकस्मिन्ननन्तगुणवृद्धानामन्तरान्तराभाविना स्थानानामन्तरे भवन्ति। कंडकमात्राणि च तान्यन्तराणि। ततः प्रागुक्तेभ्योऽसंख्येयगुणवृद्धेभ्यः स्थानेभ्योऽनन्तगुणवृद्धानि स्थानान्यसंख्येयगुणानि भवन्ति इति ॥ ४३ ॥

तदेवं कृताऽल्पबहुत्वप्ररूपणा, तत्करणाच्चोक्तान्यनुभागबन्धस्थानानि। सांप्रतमेतेष्वनुभागबन्धस्थानेषु निष्पादकत्वेन यथा जीवा वर्तन्ते तथा प्ररूपणा कर्तव्या। तत्र चाष्टावनुयोगद्वाराणि। तद्यथा—एकैकस्मिन् स्थाने जीवप्रमाणप्ररूपणा, अन्तरस्थानप्ररूपणा, निरन्तरस्थानप्ररूपणा, नानाजीवकालप्रमाणप्ररूपणा, वृद्धिप्ररूपणा, यवमध्यप्ररूपणा, स्पर्शनाप्ररूपणा, अल्पबहुत्वप्ररूपणा च। तत्र प्रथमत एकैकस्मिन् स्थाने नानाजीवप्रमाणप्ररूपणार्थमाह—

थावरजीवाणंता एक्केक्के तसजिया असंखेज्जा। लोगा सिमसंखेज्जा अंतरमह थावरे नत्थि ॥ ४४ ॥

थावरेति—एकैकस्मिन् स्थावराणां बन्धं प्रति प्रायोग्येऽनुभागबन्धस्थानेऽनन्ताः स्थावरजीवा बन्धकत्वेन प्राप्यन्ते। त्रसप्रायोग्ये चैकैकस्मिन्ननुभागबन्धस्थाने जघन्येनैको द्वौ वोत्कर्षतोऽसंख्येया आवलिकाया असंख्येयभागमात्रास्त्रसजीवाः प्राप्यन्ते। साम्प्रतमन्तरस्थानप्ररूपणामाह 'लोगा सिमेत्यादि' एषां त्रसजीवानामसंख्येया लोका असंख्येयलोकाकाशप्रदेशप्रमाणानि अनुभागबन्धस्थानानि अन्तरं, एतावन्ति बन्धं नायान्तीत्यर्थः। इदमुक्तं भवति—त्रसप्रायोग्यानि यानि स्थानानि त्रसजीवाना बन्धं नायान्ति, तानि जघन्यपदे एकं द्वे वा उत्कर्षतोऽसंख्येयलोकाकाशप्रदेशप्र-

माणानि भवन्ति । अथ स्थावरे स्थावरप्रायोग्येषु स्थानेषु अन्तरं न विद्यते सर्वाण्यपि स्थावरप्रायोग्याणि स्थानानि सर्वदैव स्थावरजीवैर्बध्यमानानि प्राप्यन्त इत्यर्थः। कथमेवं गम्यत इति चेदुच्यते–इह स्थावरजीवा अनन्ताः स्थावराणां बन्धं प्रति प्रायोग्यानि च स्थानानि पुनरसंख्येयानि ततोऽन्तरं न प्राप्यन्ते ॥ ४४ ॥

संप्रति निरन्तरस्थानप्ररूपणार्थमाह—

आवलिअसंखभागो तसा निरंतरं अहेगठाणम्मि। नाणा जीवा एवइकालं एगिंदिया निच्चं ॥४५॥

आवलीति–अत्र तृतीयार्थे प्रथमा । बन्धमाश्रित्य त्रसजीवैर्निरन्तराणि । किमुक्तं भवति ? त्रसजीवैर्निरन्तरं बध्यमानानि अनुभागबन्धस्थानानि जघन्येन द्वे त्रीणि वा प्राप्यन्ते, उत्कर्षत आवलिकाया असंख्येयभागमात्राणि । कथमेतदवसेयमिति चेदुच्यते–स्तोकास्त्रसजीवाः स्थानानि पुनस्त्रसप्रायोग्याणि असंख्येयानि, ततो न सर्वाणि त्रसजीवैः क्रमेण निरन्तरं बध्यमानानि प्राप्यन्ते, किं तूत्कर्षतोऽपि यथोक्तप्रमाणान्येव । संप्रति नानाजीवकालप्ररूपणार्थमाह–'अहेगठाणम्मीत्यादि' । एकैकमनुभागबन्धस्थानं नानाजीवैर्बध्यमानं कियन्तं कालं यावदविरहितं प्राप्यते इति प्रश्ने सति उत्तरं (दीयते)–त्रसप्रायोग्ये एकैकस्मिन्ननुभागबन्धस्थाने नानारूपास्त्रसा जीवा जघन्येनैकं समयं, उत्कर्षतः 'एवइकालं ति' एतावन्तं कालं पूर्वोक्तस्वरूपं आवलिकाया असंख्येयभागमात्रं कालं यावदित्यर्थः । निरन्तरं बन्धकत्वेन प्राप्यन्ते । परतोऽवश्यं तद्बन्धशून्यं भवतीत्यर्थः । इयमत्र भावना–एकैकं त्रसप्रायोग्यमनुभागबन्धस्थानमन्यैरन्यैश्च त्रसजीवैर्निरन्तरं बध्यमानं जघन्येनैकं समयं द्वौ वा समयौ यावत्प्राप्यते । उत्कर्षतस्त्वावलिकाया असंख्येय-

भागमात्रं कालं। 'एगिंदिया निच्चं ति' स्थावरप्रायोग्ये एकैकस्मिन्ननुभागबन्धस्थाने नानाजीवा एकेन्द्रिया नित्यं सर्व-
कालमविरहितं बन्धकत्वेन प्राप्यन्ते, न कदाचनापि तच्छून्यं भवतीत्यर्थः। इयमत्र भावना—एकैकं स्थावरप्रा-
योग्यमनुभागबन्धस्थानमन्यैरन्यैश्च स्थावरजीवैर्निरन्तरं बध्यमानं सर्वकालमवाप्यते, न तु कदाचनापि बन्धरहितं
भवतीति ॥ ४५ ॥

तदेवं कृता नानाजीवानाश्रित्य कालप्ररूपणा, संप्रति वृद्धिप्ररूपणावसरः। तत्र च द्वे अनुयोगद्वारे। तद्यथा—अन-
न्तरोपनिधा परंपरोपनिधा च। तत्रानन्तरोपनिधामाह—

थोवा जहन्नठाणे जा जवमज्झं विसेसओ अहिया। एत्तो हीणा उक्कोसगं ति जीवा अणंतरओ ॥ ४६ ॥

थोव त्ति—जघन्येऽनुभागबन्धस्थाने वर्तमाना जीवाः स्तोकाः। ततो द्वितीयेऽनुभागबन्धस्थाने विशेषा-
धिकाः। ततोऽपि तृतीयेऽनुभागबन्धस्थाने विशेषाधिकाः। एवं तावद्वाच्यं यावद्यवमध्यं [illegible]
यिकानीत्यर्थः। अत ऊर्ध्वं पुनर्जीवा अनन्तरानन्तरस्थाने क्रमेणाल्पाः। विशेषहीना विशेषहीना वक्तव्याः। तं
च तावद्यावदुत्कृष्टं त्रिसामयिकं स्थानमिति ॥ ४६ ॥

गताऽनन्तरोपनिधा। परंपरोपनिधामाह—

गंतूणमसंखेज्जे लोगे दुगुणाणि जाव जवमज्झं। एत्तो य दुगुणहीणा एवं उक्कोसगं जाव ॥ ४७ ॥

गंतूणमिति–जघन्यानुभागबन्धस्थानबन्धकेभ्यो जीवेभ्यो जघन्यानुभागबन्धस्थानादारभ्यासंख्येयलोकाकाशप्रदेशप्रमाणानि स्थानान्यतिक्रम्य परं यदनुभागबन्धस्थानं तद्बन्धका जीवा द्विगुणा वृद्धा भवन्ति । ततः पुनरपि तावन्ति स्थानान्यतिक्रम्यापरस्यानुभागबन्धस्थानस्य बन्धका द्विगुणवृद्धा भवन्ति । एव द्विगुणवृद्धिस्तावद्वक्तव्या यावद्यवमध्यं । ततोऽसंख्येयलोकाकाशप्रदेशप्रमाणानि स्थानान्यतिक्रम्यापरस्यानुभागबन्धस्थानस्य ये बन्धका जीवास्तेऽनन्तरमुक्तेभ्यो जीवेभ्यः सकाशात् द्विगुणहीना भवन्ति । ततः पुनरपि तावन्ति स्थानान्यतिक्रम्यापरस्यानुभागबन्धस्थानस्य बन्धका द्विगुणहीना भवन्ति । एवं द्विगुणहानिस्तावद्वक्तव्या यावत्स्वस्वप्रायोग्यं सर्वोत्कृष्टमनुभागबन्धस्थानं इति ॥ ४७ ॥

नाणंतराणि आवलियअसंखभागो तसेसु इयरेसुं । एगंतरा असंखिय गुणाइँ गाणंतराइं तु ॥ ४८ ॥

नाणंतराणीति–नानान्तराणि नानाप्रकाराणि द्विगुणवृद्धिद्विगुणहान्यपान्तरालरूपाणि यानि तानि त्रसेषु त्रसकायेषु आवलिकाया असंख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । ननु आवलिकाया असंख्येयभागमात्राण्येवानुभागबन्धस्थानानि त्रसजीवैर्निरन्तरं बध्यमानानि प्राप्यन्ते एतच्च प्रागेवोक्तं । तत्कथं त्रसेषु द्विगुणवृद्धिद्विगुणहान्यन्तराणि यथोक्तप्रमाणानि भवन्ति । एवं ह्येकापि द्विगुणवृद्धिर्द्विगुणहानिर्वा न प्राप्नोतीति भावः । नैष दोषः, यतः प्रागावलिकाऽसंख्येयभागमात्राणि त्रसजीवैर्निरन्तरं बध्यमानतया प्राप्यमाणान्युक्तानि । इह तु यद्यप्यावलिकाऽसंख्येयभागमात्रेभ्यः स्थानेभ्यः पराणि स्थानानि बध्यमानानि संप्रति न प्राप्यन्ते, तथापि कदाचित्प्राप्यन्ते । तेषु च जीवा उत्कृष्टपदे क्रमेण विशेषाधिका लभ्यन्ते । ततो यथोक्तप्रमाणानि द्विगुणवृद्धिद्विगुणहानिस्थानानि न विरुध्यन्ते । तथा

इतरेषु स्थावरेषु एकस्मादन्तरात्रसकायसत्कादसंख्येयगुणानि नानारूपाण्यन्तराणि भवन्ति । किमुक्तं भवति ? त्रसकायिकानामेकस्मिन् द्वयोर्द्विगुणवृध्ध्योर्द्विगुणहान्योर्वाऽपान्तराले यानि स्थानानि तेभ्योऽसंख्येयगुणानि स्थावरकायिकानां द्विगुणवृद्धिद्विगुणहान्यन्तराणि । इह त्रसजीवेषु द्विगुणवृद्धिद्विगुणहान्यन्तराणि स्तोकानि । एकस्मिन् द्विगुणवृद्धिस्थानयोर्द्विगुणहानिस्थानयोर्वाऽपान्तराले यानि स्थानानि तान्यसंख्येयगुणानि । एवं त्रसानां । स्थावराणां पुनर्द्वयोर्द्विगुणवृध्ध्योर्द्विगुणहान्योर्वा एकस्मिन्नपान्तराले यानि स्थानानि तानि स्तोकानि । द्विगुणवृद्धिद्विगुणहान्यन्तराणि पुनरसंख्येयगुणानि ॥ ४८ ॥

कृता वृद्धिप्ररूपणा संप्रति यवमध्यप्ररूपणा क्रियते—यवमध्यस्थानानि अष्टसामयिकानि शेषस्थानापेक्षयाऽसंख्येयभागमात्राणि । तथा यवमध्यस्याधस्तनानि स्थानानि स्तोकानि । ततो यवमध्यस्योपरितनानि असंख्येयगुणानि । उक्तं च "जवमज्झे ठाणाइं असंखभागो उ सेसठाणाणं । हेट्ठम्मि होंति थोवा उवरिम्मि असंखगुणियाणि ॥ १ ॥" कृता यवमध्यप्ररूपणा, संप्रति स्पर्शनाप्ररूपणामाह—

फासणकालो तीए थोवो उक्कोसगे जहन्ने उ । होइ असंखेज्जगुणो यउ कंडगे तत्तिउ चेव ॥ ४९ ॥
जवमज्झकंडगोवरि हेट्ठो जवमज्झउ असंखगुणो । कमसो जवमज्झुवरिं कंडगहेट्ठा य तावइउ ॥ ५० ॥
जवमज्झुवरि विसेसो कंडगहेट्ठा य सव्वहिं चेव । जीवप्पा बहुमेवं अज्झवसाणेसु जाणेज्जा ॥ ५१ ॥

फासणेति—अतीते काले एकस्य जीवस्योत्कृष्टे द्वे सामयिके इत्यर्थः । अनुभागबन्धस्थाने स्पर्शनाकालः स्तोकः । अतीते काले परिभ्रमता जन्तुना द्विसामयिकान्यनुभागबन्धस्थानानि स्तोकमेव कालं स्पृष्टानीत्यर्थः । जघन्ये पुनरनुभागबन्धस्थाने प्राथमिकेषु चतुःसामयिकेष्वित्यर्थः । अतीते काले स्पर्शनाकालोऽसंख्येयगुणः । 'कंडगे तत्ति छ चेव' कंडकं उपरितनानि चतुःसामयिकानि स्थानानि तेषु तावन्मात्रः स्पर्शनाकालो यावन्मात्र आद्येषु चतुःसामयिकेषु । ततो यवमध्येषु स्थानेषु अष्टसामयिकेष्वित्यर्थः । स्पर्शनाकालोऽसंख्येयगुणः । ततः कंडकस्योपरिवर्तिचतुःसामयिकस्थानसंघातरूपस्योपरितनेषु स्थानेषु त्रिसामयिकेष्वित्यर्थः । स्पर्शनाकालोऽसंख्येयगुणः । ततो यवमध्यस्याधस्तात् पञ्चषट्सप्तसामयिकेष्वसंख्येयगुणः । स्वस्थाने तु परस्परं तुल्यः । ततः क्रमशः क्रमेण यवमध्यादुपरितनेषु कंडकाच्चतुःसामयिकस्थानसंघातरूपादधस्तनेषु पञ्चषट्सप्तसामयिकेषु स्थानेषु तावन्मात्र एव स्पर्शनाकालो यावन्मात्रः पाश्चात्येषु पञ्चषट्सप्तसामयिकेषु । ततो यवमध्यस्योपरितनेषु द्विसामयिकपर्यन्तेषु सर्वेष्वपि स्थानेषु यः स्पर्शनाकालः स विशेषाधिकः । ततोऽपि कंडकस्य यवमध्यस्योपरिवर्तिचतुःसामयिकस्थानसंघातरूपस्याधस्तात् सर्वेष्वपि स्थानेषु जघन्यचतुःसामयिकपर्यन्तेषु स्पर्शनाकालः समुदितो विशेषाधिकः । ततोऽपि सर्वेष्वपि स्थानेषु स्पर्शनाकालो विशेषाधिकः । कृता स्पर्शनाप्ररूपणा संप्रत्यल्पबहुत्वप्ररूपणामाह—'जीवप्पा बहु' इत्यादि । यथा स्पर्शनाकालस्याल्पबहुत्वमुक्तं, एवं जीवानामपि अध्यवसानेषु अनुभागबन्धस्थाननिमित्तभूतेषु वर्तमानानामल्पबहुत्वं जानीयात् । तद्यथा—उत्कृष्टेष्वध्यवसानेषु द्विसामयिकानुभागनिबन्धनभूतेषु वर्तमाना जीवाः स्तोकाः । ततो जघन्येषु चतुःसामयिकानुभागबन्धनिबन्धनभूतेष्वसंख्येयगुणाः । एतावन्त

एव चोपरिवर्तिचतुःसामयिकानुभागबन्धस्थाननिबन्धनेष्वध्यवसानेषु । ततोऽपि यवमध्यकल्पानुभागबन्धस्थाननिबन्धनेष्वसंख्येयगुणाः । ततोऽपि त्रिसामयिकानुभागबन्धस्थाननिमित्तेष्वसंख्येयगुणाः । ततोऽप्याद्यपञ्चषट्सप्तसामयिकानुभागबन्धस्थानहेतुष्वध्यवसानेषु असंख्येयगुणाः । एतावन्त एवोपरितनपञ्चषट्सप्तसामयिकानुभागबन्धस्थाननिबन्धनेष्वध्यवसानेषु । ततो यवमध्योपरिवर्तिनिःशेषानुभागबन्धस्थाननिबन्धनभूतेष्वध्यवसानेषु वर्तमाना जीवा विशेषाधिकाः । ततोऽप्युपरिवर्तिपञ्चसामयिकपर्यवसानप्राथमिकचतुःसामयिकप्रभृतिसमस्तानुभागबन्धस्थाननिबन्धनेषु विशेषाधिकाः । ततोऽपि सर्वेष्वपि अनुभागबन्धस्थाननिबन्धनेषु विशेषाधिकाः । इति ॥ ४९ ॥ ५० ॥ ५१ ॥

तदेवमनुभागबन्धस्थानेषु तन्निबन्धनेषु चाध्यवसानेषु यथा जीवा वर्तन्ते, तथा प्ररूपणा कृता । संप्रत्येकैकस्मिन् स्थितिस्थानाध्यवसाये नानाजीवापेक्षया कियन्तोऽनुभागबन्धाध्यवसायाः प्राप्यन्त इति तन्निरूपणार्थमाह—

एक्केक्कम्मि कसायोदयम्मि लोगा असंखिया होंति। ठिइबंधट्ठाणेसु वि अज्झवसाणाण ठाणाणि ॥ ५२ ॥

एक्केक्कम्मि त्ति–एकैकस्मिन् कषायोदये स्थितिस्थाननिबन्धनभूते नानाजीवापेक्षयाऽनुभागबन्धाध्यवसायस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाणि "सकषायोदया हि कृष्णादिलेश्यापरिणामविशेषा अनुभागबन्धहेतव" इतिवचनात् असंख्येया लोका भवन्ति असंख्येयलोकाकाशप्रदेशप्रमाणानि भवन्तीत्यर्थः । तथा जघन्यस्थितेरारभ्योत्कृष्टां स्थितिं यावद्यावन्तः समयास्तावन्ति स्थितिस्थानानि । तथाहि–जघन्या स्थितिरेकं स्थितिस्थानं । सैव समयोत्तरा द्वितीयं स्थितिस्थानं । द्विसमयोत्तरा तृतीयं स्थितिस्थानं । एवं समयवृद्ध्या तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एवं चासंख्येयानि

स्थितिस्थानानि भवन्ति । तेषु चासंख्येयेषु स्थितिबन्धस्थानेषु प्रत्येकमेकैकस्मिन् स्थितिबन्धस्थानेऽध्यवसायस्थानानि तीव्रतीव्रतरमन्दमन्दतरादिकषायोदयविशेषरूपाणि असंख्येयलोकाकाशप्रदेशप्रमाणानि भवन्ति ॥ ५२ ॥

संप्रत्यनुभागबन्धाध्यवसायस्थानाना वृद्धिमार्गणा क्रियते । सा द्विधा–अनन्तरोपनिधया परंपरोप निधया च । तत्रानन्तरोपनिधया तावद्वृद्धिमार्गणा चिकीर्षुराह—

थोवाणि कसाउदये अज्झवसाणाणि सव्वडहरम्मि । बिइयाइ विसेसहियाणि जाव उक्कोसगं ठाणं ॥५३॥

थोवाणि त्ति–'सव्वडहरम्मि त्ति' सर्वजघन्ये कषायोदये स्थितिबन्धहेतावनुभागबन्धाध्यवसायस्थानानि कृष्णादिलेश्यापरिणामविशेषरूपाणि स्तोकानि । ततो द्वितीयादौ यथोत्तरं विशेषाधिकानि तावद्वाच्यानि यावदुत्कृष्टं स्थितिबन्धाध्यवसायस्थानं । एतदुक्तं भवति–द्वितीये कषायोदये विशेषाधिकानि । ततोऽपि तृतीये विशेषाधिकानि । ततोऽपि चतुर्थे विशेषाधिकानि । एवं तावद्वाच्यं यावदुत्कृष्टं कषायोदयरूपं स्थितिबन्धाध्यवसायस्थानं इति ॥ ५३ ॥

कृताऽनन्तरोपनिधया वृद्धिमार्गणा, संप्रति परंपरोपनिधया तामभिधित्सुराह—

गंतूणमसंखेज्जे लोगे दुगुणाणि जाव उक्कोसं । आवलिअसंखभागो नाणागुणवुड्ढिठाणाणि ॥ ५४ ॥

गंतूणं ति–जघन्यात् कषायोदयादारभ्यासंख्येयलोकाकाशप्रदेशप्रमाणानि कषायोदयस्थानानि गत्वाऽतिक्रम्य परं यद्भवति स्थितिबन्धाध्यवसायस्थानं तस्मिन्ननुभागबन्धाध्यवसायस्थानानि जघन्यकषायोदयस्थानसत्कानुभागबन्धाध्यव-

सायस्थानापेक्षया द्विगुणानि भवन्ति । पुनरपि तावन्ति कषायोदयस्थानानि गत्वा यदपरं स्थितिबन्धाध्यवसायस्थानं तस्मिन् द्विगुणानि भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावदुत्कृष्टं कषायोदयस्थानं । यानि चान्तरान्तरा नानारूपाणि द्विगुणवृद्धिस्थानानि भवन्ति तानि कियन्तीति चेदुच्यते—आवलिकाया असंख्येयभागः आवलिकाया असंख्येयभागे यावन्तः समयास्तावत्प्रमाणानि भवन्तीत्यर्थः ॥ ५४ ॥

सव्वासुभपगईणं सुभपगईणं विवज्जयं जाण । ठिइबंधट्ठाणेसु वि आउगवज्जाण पगडीणं ॥ ५५ ॥

सव्वेति—सर्वासामशुभप्रकृतीनां ज्ञानावरणपञ्चकनवदर्शनावरणासातवेदनीयमिथ्यात्वषोडशकषायनवनोकषायनरकायुःपञ्चेन्द्रियजातिवर्जजातिचतुष्टयसमचतुरस्रवर्जसंस्थानपञ्चकवज्रर्षभनाराचवर्जसंहननपञ्चककृष्णनीलवर्णदुरभिगन्धतिक्तकटुरसकर्कशगुरुरूक्षशीतस्पर्शरूपाशुभकुवर्णादिनवकनरकगतिनरकानुपूर्वीतिर्यग्गतितिर्यगानुपूर्व्यप्रशस्तविहायोगत्युपघातस्थावरसूक्ष्मापर्याप्तसाधारणास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रान्तरायपञ्चकलक्षणाना सप्ताशीतिसंख्यानामेषाऽनन्तरोक्ताऽनुभागबन्धाध्यवसायस्थानानां वृद्धिमार्गणा द्रष्टव्या । 'सुभपगईणमित्यादि' शुभानां प्रकृतीनां सातवेदनीयतिर्यगायुर्मनुष्यायुर्देवायुर्देवगतिमनुष्यगतिपञ्चेन्द्रियजातिशरीरपञ्चकसंघातपञ्चकबन्धनपञ्चदशकसमचतुरस्रसंस्थानांगोपांगत्रयवज्रर्षभनाराचसंहननशुभवर्णाद्येकादशकदेवानुपूर्वीमनुष्यानुपूर्वीपराघातागुरुलघूच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्रलक्षणानामेकोनसप्ततिसंख्यानां विपर्ययं जानीहि । तद्यथा—उत्कृष्टे कषायोदयेऽनुभागबन्धाध्यवसायस्थानानि सर्वस्तोकानि । द्विचरमे कषायोदये विशे-

पाधिकानि । त्रिचरमे कपायोदये विशेपाधिकानि। चतुश्चरमे कपायोदये विशेपाधिकानि। एवं तावद्वाच्यं यावत्सर्वजघन्यं कपायोदयस्थानं । इयमनन्तरोपनिधया वृद्धिमार्गणा । परंपरोपनिधया तु वृद्धिमार्गणेयं–उत्कृष्टकपायोदयस्थानादारभ्यासंख्येयलोकाकाशप्रदेशराशिप्रमाणानि कपायोदयस्थानानि अधोभागेनातिक्रम्य यदपरमधः कपायोदयस्थानं तस्मिन्ननुभागबन्धाध्यवसायस्थानानि उत्कृष्टकपायोदयसत्कानुभागबन्धाध्यवसायस्थानापेक्षया द्विगुणानि भवन्ति । पुनरपि तावन्ति कपायोदयस्थानानि ततः प्रभृत्यधोभागेनातिक्रम्य यदपरमधःकपायोदयस्थानं तस्मिन् द्विगुणानि भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावज्जघन्यं कपायोदयस्थानं । यानि चान्तरान्तरा नानारूपाणि द्विगुणवृद्धिस्थानानि तान्यावलिकाया असंख्येयभागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । अमूनि चावलिकाया असंख्येयभागमात्राणि शुभप्रकृतीनां अशुभप्रकृतीनां च प्रत्येकं द्विगुणवृद्धिस्थानानि स्तोकानि । एकस्मिन्नपि द्विगुणवृध्ध्यपान्तराले कपायोदयस्थानानि असंख्येयगुणानि । तदेवं स्थितिबन्धहेतुष्वध्यवसायेषु अनुभागबन्धहेतूनामध्यवसायानां प्ररूपणा कृता । संप्रति स्थितिबन्धस्थानेष्वनुभागबन्धप्ररूपणां चिकीर्पुराह–'ठिइबंधेत्यादि' स्थितिबन्धस्थानेष्वपि आयुर्वर्जानां सर्वासा प्रकृतीनां कपायोदयेष्वनुभागबन्धाध्यवसायस्थानवदनुभागबन्धस्थानानि वक्तव्यानि। तद्यथा–तत्र पूर्वोक्तानामायुर्वर्जानामशुभप्रकृतीनां जघन्यस्थितावनुभागबन्धस्थानान्यसंख्येयलोकाकाशप्रदेशप्रमाणानि, तानि च स्तोकानि। ततो द्वितीयस्थितौ विशेषाधिकानि । ततोऽपि तृतीयस्थितौ विशेपाधिकानि । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः। तथा पूर्वोक्तानामायुर्वर्जानां शुभप्रकृतीनामुत्कृष्टस्थितावनुभागबन्धस्थानान्यसंख्येयलोकाकाशप्रदेशप्रमाणानि, तानि च स्तोकानि । तेभ्यः समयोनाया-

मुत्कृष्टस्थितौ विशेषाधिकानि । ततोऽपि द्विसमयोनायामुत्कृष्टस्थितौ विशेषाधिकानि । एवं तावद्वाच्यं यावज्जघन्या स्थितिः । इति ॥ ५५ ॥

तदेवं कृताऽनन्तरोपनिधया वृद्धिमार्गणा, संप्रति परंपरोपनिधया तां चिकीर्षुराह—

पल्लासंखियभागं गंतुं दुगुणाणि आउगाणं तु । थोवाणि पढमबंधे ठिइयाइ असंखगुणियाणि ॥ ५६ ॥

पल्लेति—पूर्वोक्तानामायुर्वर्जानामशुभप्रकृतीनां जघन्यस्थितेरारभ्य पल्योपमासंख्येयभागमात्राणि स्थितिस्थानान्यतिक्रम्य यदपरं स्थितिस्थानं तस्मिन् अनुभागबन्धस्थानानि जघन्यस्थितिसत्कानुभागबन्धस्थानेभ्यो द्विगुणानि भवन्ति। ततः पुनरपि तावन्ति स्थितिस्थानान्यतिक्रम्य यदपरं स्थितिस्थानं तस्मिन् द्विगुणान्यनुभागबन्धस्थानानि भवन्ति । एवं भूयो भूयस्तावद्वाच्यं यावदुत्कृष्टा स्थितिः । तथा पूर्वोक्तानामायुर्वर्जानां शुभप्रकृतीनामुत्कृष्टस्थितेरारभ्य पल्योपमासंख्येयभागमात्राणि स्थितिस्थानान्यतिक्रम्य यदपरमधःस्थितिस्थानं तस्मिन्ननुभागबन्धस्थानान्युत्कृष्टस्थितिस्थानसत्कानुभागबन्धस्थानेभ्यो द्विगुणानि भवन्ति । ततः पुनरपि तावन्ति स्थितिस्थानान्यधोऽवतीर्याधस्तनं यदपरं स्थितिस्थानं तस्मिन् द्विगुणानि भवन्ति । एवं तावद्वाच्यं यावज्जघन्या स्थितिः । एतानि च शुभप्रकृतीनां अशुभप्रकृतीनां च प्रत्येकं द्विगुणवृद्धिस्थानानि आवलिकाया असंख्येयभागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । तथा द्विगुणवृद्धिस्थानानि स्तोकानि आवलिकाया असंख्येयभागमात्रत्वात् । एकस्मिन् द्विगुणवृद्ध्योरपान्तराले स्थितिस्थानानि असंख्येयगुणानि पल्योपमासंख्येयभागमात्रत्वात् । तथा चतुर्णामप्यायुषां जघन्यायां स्थितौ सर्वस्तोकान्यनुभागबन्धस्थानानि । ततः

समयाधिकायां जघन्यस्थितौ असंख्येयगुणानि । ततोऽपि द्विसमयाधिकायामसंख्येयगुणानि । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः इति ॥ ५६ ॥

सांप्रतमनुभागबन्धस्थानानां तीव्रमन्दतापरिज्ञानार्थमनुभागबन्धाध्यवसायस्थानानामनुकृष्टिमभिधातुकाम आह—

घाईणमसुभवण्णरसगंधफासे जहन्नठिइबंधे । जाणज्झवसाणाइं तदेगदेसो य अन्नाणि ॥ ५७ ॥
पल्लासंखिय भागो जावं बिइयस्स होइ बिइयम्मि । आ उक्कस्सा एवं उवघाए वा वि अणुकड्ढि ॥ ५८ ॥

घाईणमिति–इह प्रायो ग्रन्थिदेशे वर्तमानस्याभव्यजीवस्य यो जघन्यस्थितिबन्धस्तस्मात् स्थितिवृद्धौ अनुकृष्टिरभिधीयमानाऽनुसर्तव्या सातवेदनीयमनुजद्विकदेवद्विकतिर्यग्द्विकपञ्चेन्द्रियजातित्रसबादरपर्याप्तप्रत्येकसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्रनीचैर्गोत्राणामभव्यप्रायोग्यजघन्यबन्धादयोऽपिअनुसर्तव्याः। तत्र घातिना पञ्चविधज्ञानावरणनवविधदर्शनावरणमिथ्यात्वषोडशकषायनवनोकषायपञ्चविधान्तरायलक्षणानां कर्मणामशुभगन्धवर्णरसस्पर्शे च । अत्र षष्ठ्यर्थे सप्तमी । अशुभानां वर्णगन्धरसस्पर्शानां च कृष्णनीलदुरभिगन्धतिक्तकटुकगुरुकर्कशरूक्षशीतरूपाणां जघन्यस्थितिबन्धे यान्यनुभागबन्धाध्यवसायस्थानानि तेषामेकदेशो द्वितीये स्थितिबन्धेऽनुवर्तते, अन्यानि च भवन्ति । इदमुक्तं भवति–जघन्यस्थितिबन्धारंभे यान्यनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि द्वितीयस्थितिबन्धारंभे प्राप्यन्ते, अन्यानि च भवन्ति । द्वितीयस्थिति-

वन्धारंज्ने च यान्यनुज्ञागवन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं ज्ञागं मुक्त्वा शेषाणि सर्वाण्यपि तृतीयस्थितिवन्धारंज्ने प्राप्यन्ते, अन्यानि च ज्ञवन्ति । तृतीयस्थितिवन्धारंज्ने च यान्यनुज्ञागवन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं ज्ञागं मुक्त्वा शेषाणि सर्वाण्यपि चतुर्थस्थितिवन्धारंज्ने प्राप्यन्ते, अन्यानि च ज्ञवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयज्ञागमात्राः स्थितयो गता ज्ञवन्ति । अत्र जघन्यस्थितिवन्धारंज्नज्ञाविनामनुज्ञागवन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता । ततोऽनन्तरमुपरितने स्थितिवन्धे द्वितीयस्थितिवन्धारंज्नज्ञाविनामनुज्ञागवन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमियर्ति । तथा चाह–'बिइयस्स होइ बिइयंमि' द्वितीयस्य स्थितिवन्धस्य संबन्धिनामनुज्ञागवन्धाध्यवसायस्थानानामनुकृष्टिर्द्वितीये यत्र जघन्यस्थितिवन्धारंज्नज्ञाविनामनुज्ञागवन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता । ततोऽनन्तरे परिनिष्ठां याति । तृतीयस्थितिवन्धारंज्नज्ञाविनां चानुज्ञागवन्धाध्यवसायस्थानानामनुकृष्टिस्ततोऽप्यनन्तरे परिसमाप्तिं याति । एवं तावद्वाच्यं यावद्वुक्तप्रकृतीनामात्मीयात्मीयोत्कृष्टा स्थितिर्ज्नवति । तथा चाह–'आ उक्कस्सा एवं' एवममुना प्रकारेण आ उत्कर्षादवगन्तव्यं । तथोपघातेऽप्येवमेवानुकृष्टिरज्ञिधातव्या, यथा घातिप्रकृतीनामज्ञिहिता अनुकृष्टिरिति अनुकर्षणमनुकृष्टिरनुवर्तनमित्यर्थः ॥ ५७ ॥ ५८ ॥

परघाउज्जोउस्सासायवधुवनाम तणुउवंगाणं । पडिलोमं सायस्स उ उक्कोसे जाणि समऊणे ॥ ५९ ॥
ताणि य अन्नाणेवं ठिइबंधो जा जहन्नगमसाए । हेठुज्जोयसमेवं परत्तमाणीण उ सुज्ञाणं ॥ ६० ॥

परघेति–पराघातोद्योतोच्छ्वासातपानां शुज्ञवर्णाद्येकादशकागुरुलघुनिर्माणरूपाणां ध्रुवनाम्नां । 'तणुउवंगाणं ति' इह

तनुग्रहणेन शरीरसंघातबन्धनानि गृह्यन्ते । ततश्च शरीरपञ्चकसंघातपञ्चकबन्धनपञ्चदशकांगोपांगत्रयाणां चानुकृष्टिः प्रतिलोममभिधातव्या । तद्यथा–एतासां प्रकृतीनामुत्कृष्टस्थितिबन्धारंभे यान्यनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि एकसमयोनोत्कृष्टस्थितिबन्धारंभे प्राप्यन्ते, अन्यानि च भवन्ति । एकसमयोनोत्कृष्टस्थितिबन्धारंभे च यान्यनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं भागं मुक्त्वा शेषाणि सर्वाण्यपि द्विसमयोनोत्कृष्टस्थितिबन्धारंभे प्राप्यन्ते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः स्थितयोऽधोऽधोऽतिक्रान्ता भवन्ति ।। अत्रोत्कृष्टस्थितिबन्धारंभभाविनामनुभागबन्धाध्यवसायस्थानानां स्थितिस्थाने स्थितिस्थानेऽसंख्येयासंख्येयभागमोचनेनानुकृष्टिः परिसमाप्ता । ततोऽनन्तरमधस्तने स्थितिस्थाने एकसमयोनोत्कृष्टस्थितिबन्धारंभभाविनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिनिष्ठां याति । ततोऽप्यधस्तनतरे द्विसमयोनोत्कृष्टस्थितिबन्धारंभभाविनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमियर्ति । एवं तावद्वाच्यं यावदुक्तप्रकृतीनां सर्वासामपि आत्मीया जघन्या स्थितिर्भवति । 'सायस्सेत्यादि' सातस्योत्कृष्टां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि समयोनोत्कृष्टस्थितिबन्धारंभेऽपि तानि भवन्ति अन्यानि च । यानि समयोनोत्कृष्टस्थितिबन्धारंभे भवन्ति द्विसमयोनोत्कृष्टस्थितिबन्धारंभेऽपि तानि भवन्ति अन्यानि च । एवं तावद्वाच्यं यावदसातेऽसातस्य जघन्यः स्थितिबन्धः । किमुक्तं भवति ? यावत्प्रमाणाः स्थितयोऽसातस्य जघन्यानुभागबन्धप्रायोग्याः सातेन च सह परावर्त्य परावर्त्य बध्यन्ते, तावत्प्रमाणासु सातस्य स्थितिषु तानि चान्यानि चेत्येवंक्रमोऽनुसरणीयः । 'हेडुज्जोयसमं ति' अधस्तादुद्योतसमं वक्तव्यं

यथा प्रागुद्योतस्याभिहितं तथात्रापि वक्तव्यमित्यर्थः । तद्यथा–असातस्य जघन्यस्थितिबन्धादधस्तने स्थितिस्थाने यान्यनुभागबन्धाध्यवसायस्थानानि तानि कानिचिदुपरितनस्थितिस्थानसत्कानि कानिचिदन्यानि । तस्मादप्यधस्तने स्थितिस्थाने यानि अनुभागबन्धाध्यवसायस्थानानि तानि कानिचित्प्राक्तनस्थितिस्थानसत्कानि, कानिचिदन्यानि । अनेन च क्रमेणाधोमुखं तावन्नेयं यावत्पल्योपमासंख्येयभागमात्राः स्थितयो गता भवन्ति । तत्र चासातजघन्यस्थितिबन्धतुल्यस्थितिस्थानसत्कानामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिं याति । एतदुक्तं भवति–असातजघन्यस्थितिबन्धतुल्यस्थितिस्थानसत्कानामनुभागबन्धाध्यवसायस्थानानामधोऽध एकैकस्मिन् स्थितिस्थानेऽसंख्येये भागे व्यवच्छिद्यमाने पल्योपमासंख्येयभागमात्रासु स्थितिष्वतिक्रान्तासु सर्वात्मना परिसमाप्तिर्भवतीति । ततोऽसातजघन्यबन्धतुल्यस्थितिस्थानादधस्तनस्थितिस्थानसत्कानामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः पल्योपमासंख्येयभागमात्रादधःस्थितौ निष्ठामेति । एवं तावद्वाच्यं यावत्सातस्य जघन्या स्थितिः । 'एवं परित्तमाणीण उ सुभाणं' यथा सातवेदनीयस्योक्तं, तथा सर्वासां परावर्तमानप्रकृतीनां शुभानां मनुजद्विकदेवद्विकपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्ररूपाणां पञ्चदशसंख्याना नामग्राहमनुकृष्टिरभिधातव्या इति ५९-६०

इदानीमसातस्योच्यते—

जाणि असायजहन्ने उदहिपुहुत्तं ति ताणि अन्नाणि । आवरणसमुप्पेवं परित्तमाणीणमसुभाणं ॥६१॥

जाणि त्ति–असातस्य जघन्यस्थितिबन्धारंभे यान्यनुभागबन्धाध्यवसायस्थितिस्थानानि तानि समयाधिकजघन्यस्थि-

तिबन्धारंभेऽपि भवन्ति, अन्यानि च । यानि समयाधिकजघन्यस्थितिबन्धारंभेऽनुभागबन्धाध्यवसायस्थानानि तानि द्विसमयाधिकजघन्यस्थितिबन्धारंभेऽपि भवन्ति, अन्यानि च । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वं भवति । यावन्मात्रासु सातवेदनीयस्य स्थितिषु तानि चान्यानि चेत्येवंक्रमोऽनुकृष्टेरभिहितस्तावत्प्रमाणास्वेवासातवेदनीयस्थितिष्वपि जघन्यस्थितेरारभ्य तानि चान्यानि चेत्येवमनुकृष्टिरभिधातव्या । एता एव च स्थितयः सर्वजघन्यानुभागबन्धप्रायोग्याः । यत एतावत्यः स्थितयः सातात्परावृत्य परावृत्य बध्यन्ते । परावर्तमानश्च प्रायो मन्दपरिणामो भवति । तत एतासु जघन्यानुभागबन्धसंभवः । इत ऊर्ध्वं त्वसातमेव केवलं बध्नाति । तदपि च तीव्रतरेण परिणामेन । ततो न तत्र जघन्यानुभागबन्धसंभव इति । 'आवरणसमं उप्पिं ति' तत उपरितनीनां स्थितीनां यथा ज्ञानावरणीयादेरुक्तं तदेकदेशोऽन्यानि चेति तथैवाभिधातव्यं । तद्यथा–असातस्य जघन्यानुभागबन्धप्रायोग्यानां स्थितीनां या चरमा स्थितिस्तद्बन्धारंभे यान्यनुभागबन्धाध्यवसायस्थानानि, तेषामेकदेशस्तदुपरितनस्थितिबन्धारंभेऽनुवर्तते, अन्यानि च भवन्ति । ततोऽप्युपरितनस्थितिबन्धारंभे प्राक्तनस्थितिस्थानसत्कानुभागबन्धाध्यवसायस्थानानामेकदेशोऽनुवर्तते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः स्थितयो गता भवन्ति । अत्र जघन्यानुभागबन्धप्रायोग्यचरमस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमेति । ततोऽप्युपरितनस्थितिबन्धे जघन्यानुभागबन्धप्रायोग्यस्थित्यनन्तरस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिं याति । एवं तावद्वाच्यं यावदसातस्योत्कृष्टा स्थितिर्भवति । 'एवं परित्तमाणीणमसुभाणं' यथाऽसातवेदनीयस्योक्तं एवं शेषाणामपि परावर्तमानप्र-

कृतीनामशुभानां नरकद्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयप्रथमवर्जसंस्थानप्रथमवर्जसंहननाप्रशस्तविहायोगतिस्थावर-सूक्ष्मसाधारणापर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिरूपाणां सप्तविंशतिसंख्यानां प्रत्येकं नामग्राहमनुकृष्टिरभिधातव्या । इति ॥ ६१ ॥

इदानीं तिर्यग्द्विकनीचैर्गोत्राणामनुकृष्टिमभिधातुकाम आह—

सेकाले सम्मत्तं पडिवज्जंतस्स सत्तमखिईए । जो ठिइबंधो हस्सो इत्तो आवरणतुल्लो य ॥ ६२ ॥

जा अभवियपाउग्गा उप्पिमसायसमया उ आ(जा)जेट्ठा।एसा तिरियगतिदुगे नीयागोए य अनुकड्ढी ६३

से त्ति—सप्तमपृथिव्यां वर्तमानस्य नारकस्य 'सेकाले' अनन्तरसमये सम्यक्त्वं प्रतिपत्तुकामस्य यो ह्रस्वो जघन्यः स्थितिबन्ध इत ऊर्ध्वं स्थितिबन्धोऽनुकृष्टिमधिकृत्यावरणतुल्यो ज्ञातव्यः । स च तावद्यावदभव्यप्रायोग्या जघन्या स्थितिः । तत्र तिर्यग्गतिमधिकृत्य भावना क्रियते—सप्तमपृथिव्यां वर्तमानस्य नारकस्य सम्यक्त्वं प्रतिपत्तुकामस्य तिर्यग्गतेर्जघन्यां स्थितिं बध्नतो यान्यनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं भागं मुक्त्वाऽन्यानि सर्वाण्यपि द्वितीयस्थितिबन्धारंभेऽनुवर्तन्ते, अन्यानि च भवन्ति । द्वितीयां च स्थितिं बध्नतो यानि अनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयतमं भागं मुक्त्वाऽन्यानि सर्वाण्यपि तृतीयस्थितिबन्धारंभेऽनुवर्तन्ते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः स्थितयो गता भवन्ति । अत्र जघन्यस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमियर्ति । तत उपरितनस्थितिबन्धारंभे द्वितीयस्थितिस्थानसत्कानुभागबन्धाध्यवसायस्थानाना-

मनुकृष्टिः परिसमाप्तिं याति । ततोऽप्युपरितनस्थितिबन्धारम्भे तृतीयस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टि-परिसमाप्तिमेति । एवं तावद्वाच्यं यावदभव्यप्रायोग्यो जघन्यस्थितिबन्धः । 'उवरिं अभावसमया उ आ जेट्ठ' तत उपरिष्टात् अभव्यप्रायोग्यजघन्यस्थितिबन्धादारभ्येत्यर्थः । अभातेन समता तुल्यता ज्ञातव्या । 'आ जेट्ठ त्ति' यावज्ज्येष्ठोत्कृष्टा स्थितिः । एतदुक्तं भवति-अभव्यप्रायोग्यां जघन्यां स्थितिं बध्नतो यानि अनुभागबन्धाध्यवसायस्थानानि तानि तत उपरितनस्थितौ सर्वाणि भवन्ति, अन्यानि च । तस्यामपि यानि अनुभागबन्धाध्यवसायस्थानानि तानि उपरितनस्थितौ सर्वाणि भवन्ति, अन्यानि च । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वं । एताश्च प्रायोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषयाः स्थितयः । एता हि मनुष्यगतिरूपया प्रतिपक्षप्रकृत्या सह परावृत्य परावृत्य बध्यन्ते । परावृत्य बन्धे च प्रायः परिणामो मन्द उपजायते । तत एता जघन्यानुभागबन्धविषयाः । एतासां चरमस्थितौ यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि तदुपरितनस्थितिबन्धारम्भेऽनुवर्तन्ते, अन्यानि च भवन्ति । तत्रापि यानि अनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि तत उपरितनस्थितिबन्धारम्भेऽनुवर्तन्ते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः स्थितयो गता भवन्ति । अत्र जघन्यानुभागबन्धविषयचरमस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता । तत उपरितने स्थितिबन्धे जघन्यानुभागबन्धविषयचरमस्थित्यनन्तरस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिं याति । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । 'एसा तिरियगतिदुगे नीयागोए य अणुकड्ढी'

एषाऽनन्तरोक्ताऽनुकृष्टिः तिर्यग्गतिद्विके तिर्यग्गतितिर्यगानुपूर्वीलक्षणे नीचैर्गोत्रे च द्रष्टव्या । तत्र यथा तिर्यग्गतौ भाविता तथा तिर्यगानुपूर्व्यां नीचैर्गोत्रे च स्वयमेव भावनीयेति ॥ ६२–६३ ॥

संप्रति त्रसादिचतुष्कस्यानुकृष्टिमभिधातुकाम आह—

तसबायरपज्जत्तगपत्तेयगाण परघाय तुल्लाउ । जाव ठारसकोडाकोडी हेठा य साएणं ॥ ६४ ॥

तस त्ति–त्रसबादरपर्याप्तप्रत्येकनाम्नामनुकृष्टिः पराघाततुल्या पराघातस्येव द्रष्टव्या । सा चोपरितनात् स्थितिस्थानादारभ्याधोऽधोऽवतरणेन यावदधस्तादष्टादशकोटीकोट्यः सागरोपमाणां तिष्ठन्ति । ततोऽधस्तात् सातेन तुल्यानुकृष्टिरभिधातव्या । तत्र त्रसनाम्नो भाव्यते–तत्र त्रसनाम्न उत्कृष्टस्थितिबन्धारंभे यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि समयोनोत्कृष्टस्थितिबन्धारंभेऽनुवर्तन्ते, अन्यानि च भवन्ति । समयोनोत्कृष्टस्थितिबन्धारंभेऽपि च यान्यनुभागबन्धाध्यवसायस्थानानि तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि द्विसमयोनोत्कृष्टस्थितिबन्धारंभेऽपि अनुवर्तन्ते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः स्थितयो गता भवन्ति । अत्रोत्कृष्टस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता । ततोऽधस्तने स्थितिस्थाने समयोनोत्कृष्टस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिं याति । ततोऽप्यधस्तने स्थितिस्थाने द्विसमयोनोत्कृष्टस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्तिमेति । एवमधोऽधोऽवतरणेन तावद्वाच्यं यावदधस्तादष्टादशसागरोपमकोटीकोट्यस्तिष्ठन्ति । ततोऽष्टादशसागरोपमकोटीकोटीचरमस्थितौ यान्यनुभागबन्धाध्यवसा-

मनुकृष्टिः परिसमाप्तिं याति । ततोऽप्युपरितनस्थितिबन्धारंभे तृतीयस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टि-
परिसमाप्तिमेति । एवं तावद्वाच्यं यावदभव्यप्रायोग्यो जघन्यस्थितिबन्धः । 'उप्पिं असायसमया उ आ जेट्ठ' तत
उपरिष्टात् अभव्यप्रायोग्यजघन्यस्थितिबन्धादारभ्येत्यर्थः । असातेन समता तुल्यता ज्ञातव्या । 'आ जेट्ठ त्ति' यावज्ज्ये-
ष्ठोत्कृष्टा स्थितिः । एतदुक्तं भवति–अभव्यप्रायोग्यां जघन्यां स्थितिं बध्नतो यानि अनुभागबन्धाध्यवसायस्थानानि
तानि तत उपरितनस्थितौ सर्वाणि भवन्ति, अन्यानि च । तस्यामपि यानि अनुभागबन्धाध्यवसायस्थानानि तानि
उपरितनस्थितौ सर्वाणि भवन्ति, अन्यानि च । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वं । एताश्च प्रायोऽभव्यप्रा-
योग्यजघन्यानुभागबन्धविषयाः स्थितयः । एता हि मनुष्यगतिरूपया प्रतिपक्षप्रकृत्या सह परावृत्य परावृत्य बध्यन्ते ।
परावृत्य बन्धे च प्रायः परिणामो मन्द उपजायते । तत एता जघन्यानुभागबन्धविषयाः । एतासां चरमस्थितौ यान्य-
नुभागबन्धाध्यवसायस्थानानि तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि तदुपरितनस्थितिबन्धारंभेऽनुवर्तन्ते,
अन्यानि च भवन्ति । तत्रापि यानि अनुभागबन्धाध्यवसायस्थानानि, तेषामसंख्येयं भागं मुक्त्वा शेषाणि सर्वाण्यपि
तत उपरितनस्थितिबन्धारंभेऽनुवर्तन्ते, अन्यानि च भवन्ति । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमात्राः
स्थितयो गता भवन्ति । अत्र जघन्यानुभागबन्धविषयचरमस्थितिसत्कानुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परि-
समाप्ता । तत उपरितने स्थितिबन्धे जघन्यानुभागबन्धविषयचरमस्थित्यनन्तरस्थितिसत्कानुभागबन्धाध्यवसायस्थाना-
नामनुकृष्टिः परिसमाप्तिं याति । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । 'एसा तिरियगतिदुगे नीयागोए य अणुकड्ढी'

जघन्यस्थितेरारभ्योर्ध्वमुखं क्रमेणानन्तगुणो वक्तव्यः । शुभप्रकृतीनां तूत्कृष्टस्थितेरारभ्याधोमुखं यावज्जघन्या स्थितिः । तदियं सामान्यतस्तीव्रमन्दताऽभिहिता, संप्रति विशेषत उच्यते–तत्र घातिकर्मणामप्रशस्तवर्णगन्धरसस्पर्शानामुपघातस्य च जघन्यायां स्थितौ जघन्योऽनुभागः सर्वस्तोकः । ततो द्वितीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽपि तृतीयस्यां स्थितौ जघन्यानुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्तनकंडकं भवति । निवर्तनकंडकं नाम यत्र जघन्यस्थितिबन्धारंभभाविनामनुभागबन्धाध्यवसायस्थानानामनुकृष्टिः परिसमाप्ता । तत्पर्यन्ता मूलत आरभ्य स्थितयः पल्योपमासंख्येयभागमात्रप्रमाणा उच्यन्ते । इति ॥ ६५ ॥

निव्वत्तणा उ एक्किक्कस्स हेट्ठोवरिं तु जेट्ठियरे । चरमठिईणुक्कोसो परित्तमाणीण उ विसेसो ॥ ६६ ॥

निव्वत्तण त्ति–ततो निवर्तनकंडकस्य चरमस्थितौ जघन्यानुभागाज्जघन्यस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कंडकादुपरि प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततो द्वितीयस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कंडकादुपरिस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽधस्तनतृतीयस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽधस्तनादुपरि तृतीयस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कंडकादुपरि तृतीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवमेकैकोऽधस्तादुपरि च यथाक्रमं ज्येष्ठ उत्कृष्ट इतरश्च जघन्योऽनुभागोऽनन्तगुणतया तावद्वाच्यो यावदुत्कृष्टायां स्थितौ जघन्योऽनुभागोऽनन्तगुणः । कंडकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागोऽद्याप्यनुक्तस्तिष्ठति । शेषः सर्वोऽप्युक्तः । ततः सर्वोत्कृष्टायाः स्थितेर्जघन्यानुभागात् कंडकमात्राणां स्थितीना प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः । ततो-

ऽप्यनन्तरायामुपरितनस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽप्यनन्तरायामुपरितनस्थितावुत्कृष्टोनुभागोऽनन्तगुणः ।
एवं निरन्तरमुत्कृष्टोऽनुभागोऽनन्तगुणतया तावद्वक्तव्यो यावदुत्कृष्टा स्थितिः । तथा चाह–'चरमठिईणुक्कोसो' चरम-
स्थितीनां कण्डकमात्राणां पल्योपमासंख्येयभागमात्राणामित्यर्थः । उत्कृष्टोऽनुभागो निरन्तरमनन्तगुणतया नेतव्यः ।
इदानीं शुभप्रकृतीनां तीव्रमन्दताभिधानावसरः–तत्र पराघातप्रकृतिमधिकृत्योच्यते–पराघातस्योत्कृष्टायां स्थितौ जघ-
न्यपदे जघन्योऽनुभागः सर्वस्तोकः । ततः समयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽपि द्विसमयो-
नायामुत्कृष्टस्थितौ जघन्योनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत्पल्योपमासंख्येयभागमानाः स्थितयो गता भवन्ति
निवर्तनकण्डकमतिक्रान्तं भवतीत्यर्थः । तत उत्कृष्टायां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततो निवर्तनकण्डकादधः
प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततः समयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततो निवर्तनकण्ड-
कादधो द्वितीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत्पराघातस्य जघन्यस्थितौ जघन्यानुभागोऽन-
न्तगुणः कण्डकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागोऽद्याप्यनुक्तस्तिष्ठति । शेषः सर्वोऽप्युक्तः । ततो जघन्यस्थितेरार-
भ्योर्ध्वं कण्डकमात्राः स्थितीरतिक्रम्य चरमायां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः । ततोऽधस्तनस्थितावुत्कृष्टो-
ऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावज्जघन्यस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवं शरीरपञ्चकसंघातपञ्चकबन्ध-
नपञ्चदशकाङ्गोपाङ्गत्रयप्रशस्तवर्णगन्धरसस्पर्शागुरुलघूच्छ्वासातपोद्योतनिर्माणतीर्थकराणामपि भावनीयं । 'परित्तमाणीण उ
विसेसो' परावर्तमानप्रकृतीनां विशेषो द्रष्टव्यः । स चैव–यावतीनां तानि चान्यानि चेत्येवमनुकृष्टिरभिहिता तावतीना

सर्वासामपि जघन्योऽनुभागस्तावन्मात्र एव द्रष्टव्यः । तानि चान्यानि चेत्येवमनुकृष्टिविषयान्यस्तु परतो जघन्यो यथोत्तरमनन्तगुणस्तावद्वक्तव्यो यावत् कंडकस्यासंख्येया भागा गता भवन्ति, एकोऽवशिष्यते ॥ ६६ ॥

तथा चाह—

ताणन्नाणि त्ति परं असंखभागाहिं कंडगेक्काण । उक्कोसियरानेया जा तक्कंडकोवरि समत्ती ॥ ६७ ॥

ताणि त्ति–तानि चान्यानि चेत्येवमनुकृष्टेः परं कंडकस्यासंख्येयेभ्यो भागेभ्य ऊर्ध्वं कंडकमात्राणामेकैकस्याश्च स्थितेर्यथासंख्यमुत्कृष्टा इतरे च जघन्या अनुभागा अनन्तगुणा ज्ञेयाः । एतदुक्तं भवति–तानि चान्यानि चेत्येवमनुकृष्टेः परं जघन्योऽनुभागो यथोत्तरमनन्तगुणस्तावद्वाच्यो यावत् कंडकमात्राणां स्थितीनामसंख्येया भागा गता भवन्ति, एकोऽवतिष्ठते । ततो यतः स्थितेरारभ्य तानि चान्यानि चेत्येवमनुकृष्टिरारब्धा, तत्प्रभृतीनां स्थितीनां कंडकमात्राणां यथोत्तरमनन्तगुणतयोत्कृष्टोऽनुभागो वक्तव्यः । ततो यतः स्थितिस्थानाज्जघन्यानुभागमुक्त्वा निवृत्तस्तत उपरितने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणो वाच्यः । एवमेकैकं जघन्यानुभागमुत्कृष्टानुभागानां च कंडकं कंडकं तावद्वदेत् यावज्जघन्यानुभागविषयाणां स्थितीनां तानि चान्यानि चेत्येवमनुकृष्टेः परं कंडकं परिपूर्णं भवति । उत्कृष्टाश्चानुभागाः सागरोपमशतपृथक्त्वतुल्या भवंति । तत उपरि जघन्योऽनुभागोऽनन्तगुणः । पश्चादेक उत्कृष्टोऽनुभागः । ततः पुनरप्येको जघन्योऽनुभागः, पुनरप्येक उत्कृष्टोऽनुभागः, एवं तावद्वाच्यं यावज्जघन्यानुभागविषयाः स्थितयः सर्वा अपि परिसमाप्ता भवन्ति । उत्कृष्टानुभागविषयाश्च कंडकमात्राः स्थितयोऽद्याप्यनुक्तास्तिष्ठन्ति । शेषाः सर्वा अप्युक्ताः । ततस्तासा

यथोत्तरमुत्कृष्टोऽनुभागोऽनन्तगुणो वाच्यः । तथा चाह–'जा तकंडकोवरि समत्ती' यावत्तेषां जघन्यानुभागानां कंड-
कस्य चोपरितनस्य परिसमाप्तिः । इदमुक्तं भवति–अनन्तगुणतयाऽभिहितानां जघन्यानुभागविषयाणां स्थितीनां कंड-
कादुपरि एकैकोत्कृष्टानुभागान्तरिता जघन्यानुभागास्तावद्वक्तव्या यावत्तेषां सर्वेषामपि परिसमाप्तिरुपजायते । ततो ये
कंडकमात्रा उत्कृष्टानुभागाः केवलास्तिष्ठन्ति, तेऽपि यथोत्तरमनन्तगुणास्तावद्वाच्या यावत्सर्वसमाप्तिर्भवतीति गाथार्थः ।
तत्र सातासाते अधिकृत्य भावना विधीयते–सातस्योत्कृष्टायां स्थितौ जघन्योऽनुभागः सर्वस्तोकः । ततः समयोनाया-
मुत्कृष्टस्थितौ जघन्योऽनुभागस्तावन्मात्र एव । द्विसमयोनायामप्युत्कृष्टस्थितौ जघन्योनुभागस्तावन्मात्र एव । एवमधो-
धोऽवतीर्य तावद्वक्तव्यो यावत्सागरोपमशतपृथक्त्वमतिक्रान्तं भवति । ततोऽधस्तनस्थितौ जघन्योऽनुभागोऽनन्तगुणः ।
ततोऽप्यधस्तनस्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत् कंडकस्यासंख्येयभागा गता भवन्ति, एको-
वशिष्यते । एताश्च स्थितयः संख्येयभागहीनकंडकमात्राः साकारोपयोगसंज्ञा इति व्यवह्रियन्ते, साकारोपयोगेनैवैतासां
बध्यमानत्वात् । तत उत्कृष्टस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः । तत' समयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभा-
गोऽनन्तगुणः । ततोऽपि द्विसमयोनायामुत्कृष्टस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमधोऽधोऽवतरणेनोत्कृष्टोऽनुभागो-
ऽनन्तगुणस्तावद्वक्तव्यो यावत्कंडकमात्राः स्थितयोऽतिक्रान्ता भवन्ति । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा
निवृत्तस्ततोऽधस्तात् स्थितिस्थाने जघन्योनुभागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तानामुत्कृष्टानुभागविषयाणां स्थिती-
नामधस्तात् कंडकमात्रासु उत्कृष्टोऽनुभागः क्रमेणानन्तगुणो वाच्यः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा

निवृत्तस्ततोऽधस्तने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणो वक्तव्यः । ततः पुनरपि कंडकमात्राणां स्थितीनामुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकस्याः स्थितेर्जघन्योऽनुभागः कंडकमात्राणां च स्थितीनामुत्कृष्टोऽनुभागोऽनन्तगुणतया तावद्वाच्यो यावज्जघन्यानुभागविषयाणामेकैकस्थितीना तानि चान्यानि चेत्येवमनुकृष्टेः परं कंडकं परिपूर्णं भवति । उत्कृष्टानुभागविषयाश्च स्थितयः सागरोपमशतपृथक्त्वमात्राः। तत एकस्याः स्थितेर्जघन्यानुभागोऽनन्तगुणः। ततः सागरोपमशतपृथक्त्वादधस्तनस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तस्थितिस्थानादधस्तनस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततः सागरोपमशतपृथक्त्वादधस्तनद्वितीयस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकैकं जघन्यमुत्कृष्टं चानुभागमनन्तगुणतया वदन् तावद्व्रजेद्यावत्सर्वजघन्या स्थितिः । कंडकमात्राणां च स्थितीनामुत्कृष्टानुभागा अद्याप्यनुक्तास्तिष्ठन्ति, शेषाः सर्वेऽप्युक्ताः । ततस्तेऽप्यधोऽधः क्रमेणानन्तगुणा वक्तव्या यावत्सर्वजघन्या स्थितिः । एवं मनुष्यगतिमनुष्यानुपूर्वीदेवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्राणामपि वक्तव्यं । संप्रत्यसातवेदनीयस्योच्यते—तत्रासातस्य जघन्यस्थितौ जघन्योऽनुभागः सर्वस्तोकः । द्वितीयस्या स्थितौ जघन्योऽनुभागस्तावन्मात्र एव । तृतीयस्यामपि स्थितौ जघन्योऽनुभागस्तावन्मात्र एव । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वं भवति । तत उपरितनस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततो द्वितीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत्कंडकस्यासंख्येया भागा गता भवन्ति, एकोऽवतिष्ठते । ततोऽसातस्य जघन्यस्थितावुत्कृष्टपदे उत्कृष्टोऽनुभागोऽनन्तगुणः । ततो द्वितीयस्यां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः ।

ततोऽपि तृतीयस्यां स्थितावुत्कृष्टोऽनुन्नागोऽनन्तगुणः । एवं तावद्वाच्यं यावत् कंरुकमाना· स्थितयो गता नवन्ति ।
ततो यतः स्थितिस्थानाज्जघन्यमनुन्नागमुक्त्वा निवृत्तस्तत उपरितने स्थितिस्थाने जघन्योऽनुन्नागोऽनन्तगुणः । ततः
प्रागुक्ताडुत्कृष्टानुन्नागविषयात्कंरुकाडुपरि प्रथमस्थितौ उत्कृष्टोऽनुन्नागोऽनन्तगुणः । ततोऽपि द्वितीयस्यां स्थितौ उत्कृ-
ष्टोऽनुन्नागोऽनन्तगुणः । ततोऽपि तृतीयस्या स्थितौ उत्कृष्टोऽनुन्नागोऽनन्तगुणः । एवं तावद्वाच्यं यावत्पुनरपि कंरुक-
मात्राः स्थितयो गता नवन्ति । ततः पुनरपि यतः स्थितिस्थानाज्जघन्यानुन्नागमुक्त्वा निवृत्तस्तस्योपरितने स्थितिस्थाने
जघन्योऽनुन्नागोऽनन्तगुणः । ततो नूयोऽपि प्रागुक्तकंरुकद्वयाडुपरि कंरुकमात्राणां स्थितीनामुत्कृष्टोऽनुन्नागो यथोत्त-
रमनन्तगुणो वक्तव्यः । एवमेकैकस्याः स्थितेर्जघन्योऽनुन्नागः कंरुकमानानां च स्थितीनामुत्कृष्टोऽनुन्नागोऽनन्तगुणतया
तावद्वक्तव्यो यावज्जघन्यानुन्नागविषयाणामेकैकस्थितीना तानि चान्यानि चेत्येवमनुकृष्टेः परं कंरुकं परिपूर्णं नवति ।
उत्कृष्टानुन्नागविषयाश्च स्थितयः सागरोपमशतपृथक्त्वमात्राः । तत उपरि एकस्याः स्थितेर्जघन्योऽनुन्नागोऽनन्तगुणो
वाच्यः । ततः सागरोपमशतपृथक्त्वाडुपरितनस्थितावुत्कृष्टोऽनुन्नागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तात् स्थितिस्थाना-
डुपरितने स्थितिस्थाने जघन्योऽनुन्नागोऽनन्तगुणः । ततः सागरोपमशतपृथक्त्वाडुपरि द्वितीयस्यां स्थितावुत्कृष्टोऽनुन्ना-
गोऽनन्तगुणः । एवमेकैकं जघन्यमुत्कृष्टं चानुन्नागमनन्तगुणं वदन् तावद्व्रजेद्यावदसातवेदनीयस्य सर्वोत्कृष्टा स्थिति-
र्नवति । कंरुकमात्राणां च स्थितीनामुत्कृष्टानुन्नागा अद्याप्यनुक्ता अवतिष्ठन्ते, शेषाः सर्वेऽप्युक्ताः । ततस्तेऽपि यथो-
त्तरमनन्तगुणा वक्तव्या यावडुत्कृष्टा स्थितिः । एवं नरकगतिनरकानुपूर्वीपंचेन्द्रियजातिवर्जजातिचतुष्टयप्रथमवर्जसंस्थानप-

कप्रथमवर्जसंहननपञ्चकाप्रशस्तविहायोगतिस्थावरसूक्ष्मापर्याप्तसाधारणास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तीनामपि तीव्रमन्दताऽभिधातव्या । संप्रति तिर्यग्गतेस्तीव्रमन्दताऽभिधीयते–सप्तमपृथिव्यां वर्तमानस्य नैरयिकस्य सर्वजघन्ये स्थितिस्थाने जघन्यपदे जघन्योनुभागः सर्वस्तोकः । ततो द्वितीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽपि तृतीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्तनकंडकमतिक्रान्तं भवति । ततो जघन्यस्थितावुत्कृष्टपदे उत्कृष्टोऽनुभागोऽनन्तगुणः । ततो निवर्तनकंडकादुपरि प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततो द्वितीयस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततः कंडकादुपरि द्वितीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततस्तृतीयस्यां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावदभव्यप्रायोग्यजघन्यानुभागबन्धस्याधश्चरमस्थितिः । अभव्यप्रायोग्यजघन्यानुभागबन्धस्याधः कंडकमात्राणां स्थितीनामुत्कृष्टानुभागा अद्याप्यनुक्ताः सन्ति, शेषास्तूक्ताः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषये प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः । द्वितीयस्या स्थितौ जघन्योऽनुभागस्तावन्मात्र एव । तृतीयस्यामपि स्थितौ जघन्योऽनुभागस्तावन्मात्र एव । एवं तावद्वाच्यं यावत्सागरोपमशतपृथक्त्वमात्राः स्थितयोऽतिक्रान्ता भवन्ति । एतासां च स्थितीनां पूर्वपुरुषैः परावर्तमानजघन्यानुभागबन्धप्रायोग्या इति नाम कृत । एतासां चोपरि प्रथमस्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽपि द्वितीयस्या स्थितौ जघन्यानुभागोऽनन्तगुणः । ततोऽपि तृतीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावन्निवर्तनकंडकस्य असंख्येया भागा गता भवन्ति, एकोऽवतिष्ठते । ततो यतः स्थितिस्थानादुत्कृष्टमनुभागमुक्त्वा निवृत्तस्तत उपरितने द्वितीये स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्त-

गुणः । ततोऽप्युपरितने स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽपि तृतीये स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावदभव्यप्रायोग्यजघन्यानुभागबन्धस्याधश्चरमा स्थितिः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्ततः उपरितने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषये प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । ततोऽपि द्वितीयस्यां स्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवं तावद्वाच्यं यावत् कंडकमात्राः स्थितयोऽतिक्रान्ता भवन्ति । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्तत उपरितने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणः । ततोऽप्यभव्यप्रायोग्यजघन्यानुभागबन्धविषये कंडकादुपरि पुनरपि कंडकमात्राणां स्थितीनामुत्कृष्टोऽनुभागो यथोत्तरमनन्तगुणो वक्तव्यः । एवमेकस्याः स्थितेर्जघन्यमनुभागं कंडकमात्राणां च स्थितीनामुत्कृष्टमनुभागं वदता तावद्गन्तव्यं यावदभव्यप्रायोग्यजघन्यानुभागबन्धविषये चरमस्थितिः । ततो यतः स्थितिस्थानाज्जघन्यमनुभागमुक्त्वा निवृत्तस्तत उपरितने जघन्योऽनुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धस्योपरि प्रथमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । तत उपरि प्रागुक्ताज्जघन्यानुभागबन्धादुपरि द्वितीयस्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततः प्रागुक्तादुत्कृष्टानुभागादुपरितने स्थितिस्थाने उत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकस्याः स्थितेर्जघन्यमेकस्याश्चोत्कृष्टमनुभागं वदता तावद्गन्तव्यं यावदुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः । कंडकमात्राणां च स्थितीनामुत्कृष्टानुभागा अद्याप्यनुक्ताः सन्ति, शेषाश्च सर्वेऽप्युक्ताः । ततस्ते यथोत्तरमनन्तगुणास्तावद्वक्तव्या यावदुत्कृष्टा स्थितिः । एवं तिर्यगानुपूर्व्या नीचैर्गोत्रस्य च तीव्रमन्दताऽभिधातव्या । संप्रति त्रसनाम्नोऽभिधीयते—त्रसनाम्न उत्कृष्ट-

स्थितौ जघन्यपदे जघन्योऽनुभागः सर्वस्तोकः। ततः समयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततोऽपि द्विसमयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः। एवमधोऽधोऽवतरणेन जघन्योऽनुभागोऽनन्तगुणतया तावद्वक्तव्यो यावत्कण्डकमात्राः स्थितयोऽतिक्रान्ता भवन्ति। तत उत्कृष्टायां स्थितौ उत्कृष्टोऽनुभागोऽनन्सगुणः। ततः कण्डकादधः प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततः समयोनायामुत्कृष्टस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः। ततः कण्डकादधस्तन्यां द्वितीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततो द्विसमयोनायामुत्कृष्टस्थितौ उत्कृष्टोनुभागोऽनन्तगुणः। एवं तावद्वाच्यं यावदष्टादशसागरोपमकोटीकोटीनामुपरितनी स्थितिः। अष्टादशकोटीकोटीनां चोपरि कण्डकमात्राणां स्थितीनामुत्कृष्टानुभागा अद्याप्यनुक्ताः सन्ति। शेषं सर्वमुक्तं। ततोऽष्टादशकोटीकोटीनां सत्कायामुत्कृष्टस्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततः समयोनायामुत्कृष्टस्थितौ जघन्योऽनुभागस्तावन्मात्र एव। द्विसमयोनायामप्युत्कृष्टस्थितौ जघन्योऽनुभागस्तावन्मात्र एव। एवमधोऽधोऽवतरणेन तावद्वाच्यं यावदभव्यप्रायोग्यो जघन्यस्थितिबन्धः। ततोऽधस्तन्यां प्रथमस्थितौ जघन्योऽनुभागोऽनन्तगुणः। ततो द्वितीयस्यां स्थितौ जघन्योऽनुभागोऽनन्तगुणः। एवं तावद्वाच्यं यावत्कण्डकस्यासंख्येया भागा गता भवन्ति, एकोऽवतिष्ठते। ततोऽष्टादशसागरोपमकोटीकोटीनामुपरिष्टात् कण्डकमात्राणां स्थितीनां चरमस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः। ततो द्विचरमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। ततस्त्रिचरमस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः। एवमधोऽधोऽवतरणेन तावद्वाच्यं यावत्कण्डकमतिक्रान्तं भवति, अष्टादशकोटीकोटीनामुपरि अनन्तरा स्थितिरतिक्रान्ता भवतीत्यर्थः। ततो यतः स्थितिस्थानाज्जघन्यमनुभागमभिधाय निवृ-

स्तततोऽधस्तने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणः । ततः पुनरप्यष्टादशसागरोपमकोटीकोटीनां सत्कायाश्चरमस्थितेरारभ्याधोऽधः कंडकमात्राणां स्थितीनामुत्कृष्टोऽनुभागोऽनन्तगुणो वक्तव्यः । ततो यतः स्थितिस्थानाज्जघन्यानुभागमभिधाय निवृत्तस्ततोऽधस्तने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणः । ततः पुनरपि प्रागुक्तात्कंडकादधः कंडकमात्राणां स्थितीनामधोऽधः क्रमेणोत्कृष्टा अनुभागा अनन्तगुणा वक्तव्याः । एवमेकस्याः स्थितेर्जघन्यमनुभागं कंडकमात्राणां स्थितीनामुत्कृष्टाननुभागान् वदता तावन्नन्तव्यं यावदभव्यप्रायोग्यजघन्यानुभागबन्धविषये जघन्या स्थितिः । ततो यतः स्थितिस्थानाज्जघन्यानुभागमुक्त्वा निवृत्तस्ततोऽधस्तने स्थितिस्थाने जघन्योऽनुभागोऽनन्तगुणः । ततोऽभव्यप्रायोग्यजघन्यानुभागबन्धविषयादधः प्रथमस्थितौ उत्कृष्टोऽनुभागोऽनन्तगुणः । ततः प्रागुक्ताज्जघन्यानुभागादधः स्थितौ जघन्योऽनुभागोऽनन्तगुणः । ततोऽप्यभव्यप्रायोग्यजघन्यानुभागबन्धविषयादधो द्वितीयस्थितावुत्कृष्टोऽनुभागोऽनन्तगुणः । एवमेकस्याः स्थितेर्जघन्यमनुभागमेकस्याश्च स्थितेरुत्कृष्टं वदताऽधोऽधस्तावदवतरीतव्यं यावज्जघन्या स्थितिः । कंडकमात्राणां च स्थितीनामुत्कृष्टा अनुभागा अद्याप्यनुक्ताः सन्ति, शेषाः सर्वेऽप्युक्ताः । ततस्तेऽप्यधोऽधः क्रमेणानन्तगुणास्तावद्वक्तव्या यावज्जघन्या स्थितिः । एवं बादरपर्याप्तप्रत्येकनाम्नामपि तीव्रमन्दताऽभिधातव्या । (विशेषतस्त्वनुकृष्टिस्तीव्रमन्दता च पट्स्थापनातोऽवसेया) । साद्यनादिप्ररूपणा । स्वामित्वं घातिसंज्ञा स्थानसंज्ञा शुभाशुभप्ररूपणा (प्रत्ययप्ररूपणा विपाकप्ररूपणा) च यथा शतके तथाऽवगन्तव्या । इति ॥ ६७ ॥

१ श्रीमदुपाध्यायन्यायाचार्यास्तु साद्यनादिप्ररूपणा स्वामित्वप्ररूपणा चात्रैव व्यधुरित्यदिशुश्च शेषा रसविपाकनिरूपणा व्याहृताः ।

तदेवमुक्तोऽनुभागबन्धः । संप्रति स्थितिबन्धाभिधानावसरः । तत्र च चत्वार्यनुयोगद्वाराणि । तद्यथा—स्थितिस्थानप्ररूपणा, निषेकप्ररूपणा, अबाधाकंडकप्ररूपणा, अल्पबहुत्वप्ररूपणा च । तत्र स्थितिस्थानप्ररूपणार्थमाह—

ठिइबंधट्ठाणाइं सुहुमअपज्जत्तगस्स थोवाइं । बायरसुहुमेयरबितिचउरिंदियअमणसन्नीणं ॥ ६८ ॥
संखेज्जगुणाणि कमा असमत्तियरे य बिंदियाइम्मि । नवरमसंखेज्जगुणाइँ संकिलेसाइँ (य) सव्वत्थ ॥६९॥

ठिइ त्ति—इह जघन्यस्थितेरारभ्योत्कृष्टां स्थितिं यावत् यावन्तः समयास्तावत्प्रमाणानि स्थितिस्थानानि । तथाहि—जघन्यायाः स्थितेरेकं स्थितिस्थानं । सैव समयाधिका द्वितीयं स्थितिस्थानं । द्विसमयाधिका तृतीयं स्थितिस्थानं । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । तानि च स्थितिस्थानानि सूक्ष्मस्यापर्याप्तस्य सर्वस्तोकानि । तेभ्योऽपर्याप्तबादरस्य संख्येयगुणानि । तेभ्योऽपि सूक्ष्मपर्याप्तकस्य संख्येयगुणानि । तेभ्योऽपि पर्याप्तबादरस्य संख्येयगुणानि । एतानि च पल्योपमासंख्येयभागगतसमयप्रमाणानि द्रष्टव्यानि । ततोऽपर्याप्तद्वीन्द्रियस्यासंख्येयगुणानि । कथमेवं गम्यते इतिचेदुच्यते—द्वीन्द्रियाणामपर्याप्तानां स्थितिस्थानानि पल्योपमासंख्येयभागगतसमयप्रमाणानि, पाश्चात्यानि च पल्योपमासंख्येयभागगतसमयप्रमाणानि । ततः पाश्चात्येभ्योऽमून्यसंख्येयगुणान्येवोपपद्यन्ते । तेभ्योऽपि द्वीन्द्रियस्य पर्याप्तस्य स्थितिस्थानानि संख्येयगुणानि । तेभ्योऽपि त्रीन्द्रियस्यापर्याप्तकस्य संख्येयगुणानि । तेभ्योऽपि तस्यैव पर्याप्तस्य संख्येयगुणानि । तेभ्योऽपि चतुरिन्द्रियस्यापर्याप्तस्य संख्येयगुणानि । तेभ्योऽपि चतुरिन्द्रियस्य पर्याप्तस्य संख्येयगुणानि । तेभ्योऽप्यसंज्ञिपञ्चेन्द्रियस्यापर्याप्तस्य संख्येयगुणानि । तेभ्योऽप्यसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य संख्येयगुणानि । तेभ्योऽपि संज्ञिपञ्चेन्द्रियस्या-

पर्याप्तस्य संख्येयगुणानि । तेभ्योऽपि संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य संख्येयगुणानि । 'अममत्तियरेय त्ति' असमाप्तानामपर्याप्तानामितरेषां च पर्याप्ताना बादरादीनां स्थितिस्थानानि क्रमेण संख्येयगुणानि वक्तव्यानीति । नवरमेकेन्द्रियाणा स्थितिस्थानान्यभिधायानन्तरं द्वीन्द्रियस्य प्रथमे भेदेऽपर्याप्तरूपे स्थितिबन्धस्थानान्यसंख्येयगुणानि वक्तव्यानि । तथैव च युक्तिपूर्वं प्रागुक्तानि । 'संकिलेसा य सवत्र' संक्लेशाश्च सर्वत्र सर्वेषु स्थानेष्वसंख्येयगुणा वक्तव्याः, आस्तां द्वीन्द्रियस्य, प्रथमभेदेऽपर्याप्तलक्षणे स्थितिस्थानान्यसंख्येयगुणानीति चशब्दार्थः । तद्यथा—सूक्ष्मस्यापर्याप्तस्य संक्लेशस्थानानि सर्वस्तोकानि । तेभ्योऽपर्याप्तबादरस्यासंख्येयगुणानि । तेभ्योऽपि पर्याप्तसूक्ष्मस्यासंख्येयगुणानि । तेभ्योऽपि पर्याप्तबादरस्यासंख्येयगुणानि । तेभ्योऽपि द्वीन्द्रियस्यापर्याप्तस्यासंख्येयगुणानि । एवं पर्याप्तद्वीन्द्रियपर्याप्तापर्याप्तत्रीन्द्रियचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियाणां यथोत्तरमसंख्येयगुणानि वक्तव्यानि । कथमेवं गम्यते सर्वत्राप्यसंख्येयगुणानि संक्लेशस्थानानीति चेदुच्यते—इह सूक्ष्मस्यापर्याप्तस्य जघन्यस्थितिबन्धारंभे यानि संक्लेशस्थानानि तेभ्यः समयाधिकजघन्यस्थितिबन्धारंभे संक्लेशस्थानानि विशेषाधिकानि । तेभ्योऽपि द्विसमयाधिकजघन्यस्थितिबन्धारंभेऽपि विशेषाधिकानि । एवं तावद्वाच्यं यावत्तस्यैवोत्कृष्टा स्थितिस्तदुत्कृष्टस्थितिबन्धारंभे च संक्लेशस्थानानि जघन्यस्थितिसत्कसंक्लेशस्थानापेक्षयाऽसंख्येयगुणानि लभ्यन्ते । यदेतदेवं तदा सुतरामपर्याप्तबादरस्य संक्लेशस्थानानि अपर्याप्तसूक्ष्मसत्कसंक्लेशस्थानापेक्षयाऽसंख्येयगुणानि भवन्ति । तथाहि—अपर्याप्तसूक्ष्मसत्कस्थितिस्थानापेक्षया बादरापर्याप्तस्य स्थितिस्थानान्यसंख्येयगुणानि । स्थितिस्थानवृद्धौ च संक्लेशस्थानवृद्धिः । ततो यदा सूक्ष्मापर्याप्तस्यापि स्थितिस्थानेष्वतिस्तोकेषु जघन्यस्थितिस्थानसत्कसं-

क्लेशस्थानापेक्षया उत्कृष्टे स्थितिस्थाने संक्लेशस्थानान्यसंख्येयगुणानि भवन्ति, तदा बादरापर्याप्तस्थितिस्थानेषु सूक्ष्मापर्याप्तस्थितिस्थानापेक्षयाऽसंख्येयगुणेषु सुतरां भवन्ति । एवमुत्तरत्रापि असंख्येयगुणत्वं भावनीयमिति ॥ ६८–६९ ॥

एमेव विसोहीओ विग्घावरणेसु कोडिकोडीओ । उदही तीसमसाते अद्धं थीमणुयदुगसाए ॥ ७० ॥

एमेव त्ति–'एमेव विसोहीओ त्ति' यथा संक्लेशस्थानान्यसंख्येयगुणतया प्रागुक्तानि एवमेवासंख्येयगुणतयैवेत्यर्थः । विशोधयोऽपि विशोधिस्थानान्यपि वक्तव्यानि । यतो यान्येव संक्लिश्यमानस्य संक्लेशस्थानानि तान्येव विशुध्यमानस्य सतो विशुद्धिस्थानानि भवन्ति । एतच्च प्रागेव सप्रपञ्चं भावितं, नेह भूयो भाव्यते । ततो विशोधिस्थानान्यपि संक्लेशस्थानवत् क्रमेण सर्वत्राप्यसंख्येयगुणानि वक्तव्यानि । सांप्रतमुत्कृष्टेतरस्थितिप्रतिपादनार्थमाह–'विग्घ त्ति' अन्तरायमावरणं ज्ञानावरणं दर्शनावरणं च । तत्र पञ्चानामन्तरायप्रकृतीना पञ्चानां ज्ञानावरणप्रकृतीना नवानां च दर्शनावरणप्रकृतीनां असातवेदनीयस्य चोत्कृष्टा स्थितिस्त्रिंशत्सागरोपमाणां कोटीकोट्यः । इह द्विधा स्थितिः कर्मरूपतावस्थानलक्षणाऽनुभवयोग्या च । तत्र कर्मरूपतावस्थानलक्षणामेव स्थितिमधिकृत्य जघन्योत्कृष्टप्रमाणाभिधानमिदमवगन्तव्यं । अनुभवप्रायोग्या पुनरबाधाकालहीना । येषां च कर्मणां यावत्यः सागरोपमकोटीकोट्यस्तेषां तावन्ति वर्षशतानि अबाधाकालः । तथाहि–मतिज्ञानावरणस्य त्रिंशत्सागरोपमकोटीकोट्य उत्कृष्टा स्थितिरतस्तस्याबाधाकालोऽप्युत्कृष्टस्त्रिंशद्वर्षशतान्यवगन्तव्यः । यतस्तन्मतिज्ञानावरणमुत्कृष्टस्थितिकं बद्धं सत्त्रिंशद्वर्षशतानि यावन्न काञ्चिदपि स्वोदयतो जीवस्य बाधामुत्पादयति । अबाधाकालहीनश्च कर्मदलिकनिषेकः । एवं श्रुतज्ञानावरणादीनामप्युक्तप्रकृतीनामबाधाकालोऽबाधाकालहीनश्च कर्म-

दलिकनिषेको ज्ञातव्यः । तथा स्त्रीवेदे मनुष्यद्विके मनुष्यगतिमनुष्यानुपूर्वीरूपे, सातवेदनीये च पूर्वोक्तस्य स्थितिप्रमाणस्यार्धमुत्कृष्टस्थितितया द्रष्टव्यं पञ्चदशसागरोपमकोटीकोट्यः स्त्रीवेदादीनामुत्कृष्टा स्थितिरवगन्तव्येत्यर्थः । पञ्चदशवर्षशतान्यबाधाकालोऽबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ३० ॥

तिविहे मोहे सत्तरि चत्तालीसा य वीसई य कमा । दस पुरिसे हासरई देवदुगे खगइचेट्ठाए ॥ ३१ ॥

तिविहे त्ति–त्रिविधे त्रिप्रकारे मोहे मोहनीये मिथ्यात्वलक्षणे दर्शनमोहनीये, षोडशकषायलक्षणे कषायमोहनीये, नपुंसकवेदारतिशोकभयजुगुप्सारूपे च नोकषायमोहनीये, यथासंख्यमुत्कृष्टा स्थितिः सागरोपमकोटीकोट्यः सप्ततिः चत्वारिंशत् विंशतिश्च । यथासंख्यमेव च सप्त चत्वारि द्वे च वर्षसहस्रे अबाधाकालः अबाधाकालहीनश्च कर्मदलिकनिषेकः । इह पुरुषवेदहास्यरतीनां विशेषतो वक्ष्यमाणत्वात् स्त्रीवेदस्य चोक्तत्वान्नोकषायमोहनीयग्रहणेन नपुंसकवेदारतिशोकभयजुगुप्सानामेव ग्रहणमवगन्तव्यं । 'दस पुरिसेत्यादि' पुरुषे पुरुषवेदे हास्ये रतौ देवद्विके देवगतिदेवानुपूर्वीरूपे खगतौ चेष्टाया प्रशस्तविहायोगतौ दशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः । दशवर्षशतानि चाबाधाकालः । अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ३१ ॥

थिरसुभपंचगउच्चे चेवं संठाणसंघयणमूले । तव्वीयाइ विवुड्ढी अट्ठारससुहुमविगलतिगे ॥ ३२ ॥

थिर त्ति–स्थिरे, शुभपञ्चके शुभसुभगसुस्वरादेययशःकीर्तिरूपे, उच्चैर्गोत्रे च । तथा 'संठाणसंघयणमूले त्ति' मूले प्रथमे संस्थाने समचतुरस्रलक्षणे, प्रथमे च संहनने वज्रर्षभनाराचसंज्ञे । एवं पूर्वोक्तप्रकारेणोत्कृष्टा स्थितिरवगन्तव्या

दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिरवगन्तव्येत्यर्थः । दश वर्षशतानि चाबाधा । अबाधाकालहीनश्च कर्मदलिकनिषेकः । 'तव्वीयाइ विवुड्ढी' तेषां संस्थानानां संहननाना च मध्ये द्वितीयादिषु द्वितीयतृतीयादिषु संस्थानेषु संहननेषु च द्विवृद्धिः द्विकवृद्धिः क्रमेणावसेया। तद्यथा–द्वितीययोः संस्थानसंहननयोर्द्वादश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, द्वादश वर्षशतानि चाबाधाकालः । अबाधाकालहीनश्च कर्मदलिकनिषेकः। तृतीययोः संस्थानसंहननयोश्चतुर्दश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, चतुर्दश वर्षशतानि चाबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः। चतुर्थयोः संस्थानसंहननयोः षोडश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, षोडश वर्षशतान्यबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । पञ्चमयोः संस्थानसंहननयोरष्टादश सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, अष्टादश वर्षशतानि चाबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । षष्ठयोः संस्थानसंहननयोर्विंशतिसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, द्वे वर्षसहस्रे अबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । 'अट्ठारस सुहुमविगलतिगे' सूक्ष्मत्रिके सूक्ष्मापर्याप्तसाधारणरूपे, विकलत्रिके द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिलक्षणे, अष्टादशसागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, अष्टादश वर्षशतान्यबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ३२ ॥

तित्थगराहारदुगे अंतो वीसासनिच्चनामाणं । तेत्तीसुदही सुरनारयाउ सेसाउ पल्लतिगं ॥ ३३ ॥

तित्थगर त्ति–तीर्थंकरे, आहारकद्विके आहारकशरीराहारकांगोपांगरूपे अन्तःकोटीकोटी उत्कृष्टा स्थितिः । अन्तर्मुहूर्तमबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । 'वीसासनिच्चनामाणं' शेषाणां नामप्रकृतीनां नरकगतिनरकानु-

पूर्वातिर्यग्द्विकैकेन्द्रियजातिपञ्चेन्द्रियजातितैजसकार्मणौदारिकवैक्रियशरीरौदारिकांगोपांगवैक्रियांगोपांगवर्णगन्धरसस्पर्शा-गुरुलघूपघातपराघातोच्छ्वासातपोद्योताप्रशस्तविहायोगतित्रसस्थावरबादरपर्याप्तप्रत्येकास्थिराशुभदुर्भगदुःस्वरानादेयायशः-कीर्तिनिर्माणलक्षणानां नीचैर्गोत्रस्य च विंशतिः सागरोपमकोटीकोट्य उत्कृष्टा स्थितिः, विंशतिर्वर्षशतानि चाबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः। 'तेत्तीसुदही सुरनारयाउ' सुरायुषो नारकायुषश्चोत्कृष्टा स्थितिस्त्रयस्त्रिंशदुदधयश्च सागरोपमाणि पूर्वकोटीत्रिभागाभ्यधिकानीति शेषः। पूर्वकोटीत्रिभागश्चाबाधाकालः। अबाधाकालहीनश्च कर्मदलिकनिषेकः। 'सेसाउ पल्लतिगं' शेषायुषोर्मनुष्यतिर्यगायुषोः पल्यत्रिकं त्रीणि पल्योपमानि पूर्वकोटीत्रिभागाभ्यधिकानीति शेषः। पूर्वकोटी-त्रिभागश्चाबाधाकालः। अबाधाकालहीनश्च कर्मदलिकनिषेकः। एतच्च पूर्वकोट्यायुषश्चतुर्गतिगमनयोग्यान् उत्कृष्टस्थितिब-न्धकान् तिर्यग्मनुष्यान् प्रति द्रष्टव्यं। तानेवाश्रित्य यथोक्तरूपाया उत्कृष्टस्थितेः पूर्वकोटित्रिभागरूपायाश्चाबाधाया: प्राप्यमाणत्वात् ॥ ७३ ॥

सांप्रतमसंज्ञिपञ्चेन्द्रियादीन् बन्धकानाश्रित्यायुषामुत्कृष्टां स्थितिं प्रतिपादयन्नाह—

आउचउक्कुक्कोसो पल्लासंखेज्जभागममणेसु। सेसाण पुव्वकोडी साउतिभागो अबाहा सिं ॥ ७४ ॥

आउ त्ति—अमनस्केष्वसंज्ञिपञ्चेन्द्रियेषु पर्याप्तेषु आयुरुत्कृष्टस्थितिबन्धकेषु चतुर्णामप्यायुषां परभवसंबन्धिनामुत्कृष्टा स्थितिः पल्योपमासंख्येयभागमात्रा पूर्वकोटित्रिभागाभ्यधिकेति शेषः। पूर्वकोटित्रिभागश्चाबाधाकालः। अबाधाकालही-नश्च कर्मदलिकनिषेकः। शेषाणां चैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियाणां पर्याप्तानामसंज्ञिपञ्चेन्द्रियसंज्ञिपञ्चेन्द्रियाणां

चापर्याप्तानामायुष्युत्कृष्टस्थितिबन्धकानां परभवायुष उत्कृष्टस्थितिबन्धः पूर्वकोटीत्र्यंशत्रयस्त्रिंशत्सागराण्यधिको वेदितव्यः । 'गिं ति' एषां स्वस्वत्रिभागोऽबाधाकालः । अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७४ ॥

इदानीमायुर्वर्जानां सर्वकर्मणामबाधाकालपरिमाणप्रतिपादनार्थमाह—

वाससहस्समबाहा कोडाकोडीदसगस्स सेसाणं । अणुवाओ अणुवट्टणगाउसु छम्मासिगुक्कोसो ॥ ७५ ॥

वास त्ति–कोटीकोटीदशकस्य दशानां सागरोपमकोटीकोटीनां वर्षसहस्रं दशवर्षशतानि अबाधा भवति । शेषाणां द्वादशचतुर्दशपञ्चदशाष्टादशविंशतित्रिंशच्चत्वारिंशत्सप्ततीनामनुपातोऽनुसारः कर्तव्यः, त्रैराशिकमनुसर्तव्यमित्यर्थः । तथाहि–यदा दशानां सागरोपमकोटीकोटीनां वर्षसहस्रमबाधा प्राप्यते, तदा द्वादशानां सागरोपमकोटीकोटीनां वर्षसहस्रं शतद्वयं चाबाधा भवति, चतुर्दशानां वर्षसहस्रं शतचतुष्टयं च । एवं सर्वत्राप्यनुसर्तव्यं । 'अणुवट्टणगाउसु छम्मासिगुक्कोसो' अनपवर्तनीयायुष्केषु देवनारकासंख्येयवर्षायुष्कतिर्यग्मनुष्येषु परभवायुष्कोत्कृष्टस्थितिबन्धकेषु परभवायुष उत्कृष्टाऽबाधा षाण्मासिकी षण्मासप्रमाणा द्रष्टव्या । षण्मासावशेष एव तेषां परभवायुर्बन्धसद्भावात् । केचित्पुनर्युगलधर्मिणां पल्योपमासंख्येयभागप्रमाणामबाधामिच्छन्ति । तदुक्तं–"पलियासंखिज्जंसं जुगधम्माणं वयंतन्ने" ।।इति।।७५।।

तदेवमुत्कृष्टा स्थितिः, संप्रति जघन्यामभिधातुकाम आह—

भिन्नमुहुत्तं आवरणविग्घदंसणचउक्कलोभंते । बारस सायमुहुत्ता अट्ठ य जसकित्तिउच्चेसु ॥ ७६ ॥

भिन्न त्ति–पञ्चानां ज्ञानावरणीयानां पञ्चानामन्तरायाणां चतुर्णां दर्शनावरणानां चक्षुरचक्षुरवधिकेवलदर्शनावरण-

रूपाणां सर्वान्तिमस्य च लोभस्य संज्वलनसंज्ञस्य भिन्नमुहूर्तमन्तर्मुहूर्तं जघन्या स्थितिः, अन्तर्मुहूर्तमबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । सातवेदनीयस्य जघन्या स्थितिर्द्वादश मुहूर्ताः, अन्तर्मुहूर्तं चाबाधाकालः, अबाधाकालहीनश्च कर्मदलिकनिषेकः । इह कापायिक्या एव स्थितेर्जघन्यत्वप्रतिपादनमभिप्रेतं, अतो द्वादश मुहूर्ता इत्युक्तं । अन्यथा सातवेदनीयस्य जघन्या स्थितिः समयद्वयमात्रापि सयोगिकेवल्यादौ प्राप्यते । तथा यशःकीर्त्युच्चैर्गोत्रयोरष्टौ मुहूर्ता जघन्या स्थितिः, अन्तर्मुहूर्तमबाधा, अबाधाकालहीनश्च कर्मदलिकनिषेकः ॥ ७६ ॥

दो मासा अद्धं संजलणे पुरिस अठ वासाणि । भिन्नमुहुत्तमबाहा सव्वासिं सव्वहिं हस्से ॥ ७७ ॥

दो मास त्ति–संज्वलनानां द्वौ मासौ । अर्धार्धं च जघन्या स्थितिः । एतदुक्तं भवति–संज्वलनक्रोधस्य द्वौ मासौ जघन्या स्थितिः । संज्वलनमानस्य मासः । संज्वलनमायाया अर्धमासः । तथा पुरुषे पुरुषवेदस्याष्टौ वर्षाणि जघन्या स्थितिः । सर्वत्राप्यन्तर्मुहूर्तमबाधा । अबाधाकालहीनश्च कर्मदलिकनिषेकः । अबाधाकालप्रमाणप्रतिपादनार्थमाह– 'भिन्नेत्यादि' सर्वासामपि प्रकृतीनामुक्तानां वक्ष्यमाणानां च सर्वस्मिन्नपि ह्रस्वे जघन्ये स्थितिबन्धे भिन्नमुहूर्तमबाधा द्रष्टव्या । तथैव च प्राक् प्रतिपादिता वक्ष्यते चेति ॥ ७७ ॥

संप्रत्यायुषो जघन्यस्थितिप्रतिपादनार्थमाह—

खुड्डागभवो आउसु उववायाउसु समा दस सहस्सा । उक्कोसा संखेज्जा गुणहीण आहारतित्थयरे ॥७८॥

खुड्डागभवो त्ति–तिर्यगायुषो मनुष्यायुषश्च जघन्या स्थितिः क्षुल्लकभवः । तस्य किं मानमिति चेदुच्यते–आवलिकानां द्वे शते षट्पञ्चाशदधिके । अपि चैकस्मिन्मुहूर्ते घटिकाद्वयप्रमाणे सप्तत्रिंशच्छतानि त्रिसप्तत्यधिकानि प्राणापानानां हृष्टानवकल्पजन्तुसत्कानां भवन्ति । एकस्मिंश्च प्राणापाने साधिकाः सप्तदश क्षुल्लकभवाः । सकले च मुहूर्ते पञ्चषष्टिसहस्राणि पञ्च शतानि षट्त्रिंशदधिकानि क्षुल्लकभवानां भवन्ति । अत्रापि "मणुदुगं इस्से" इतिवचनादन्तर्मुहूर्तमबाधा, अबाकालहीनश्च कर्मदलिकनिषेकः । तथा उपपातायुषो देवानां नारकाणां चायुषो जघन्या स्थितिर्दश वर्षसहस्राणि, अन्तर्मुहूर्तमबाधा, अबाधाकालहीनश्च कर्मदलिकनिषेकः । अधुना तीर्थकराहारकयोर्जघन्यां स्थितिमभिधातुकाम आह–'इकोसेत्यादि' आहारकशरीराहारकांगोपांगतीर्थकरनाम्नां योत्कृष्टा स्थितिः प्रागुक्ताऽन्तःसागरोपमकोटीकोटीप्रमाणा सा संख्येयगुणहीना जघन्या स्थितिर्भवति । सापि चान्तःसागरोपमकोटीकोटीप्रमाणैव । ननु तीर्थकरनामकर्म तीर्थकरभवादर्वाक् तृतीये भवे बध्यते । तदुक्तं–"बज्झइ तं तु भयवओ तइयभवो(वे)सक्कइत्ताणं" तत्कथं जघन्यतोऽप्यन्तःसागरोपमकोटीकोटीप्रमाणा तस्य स्थितिरुपपद्यते ? तदयुक्तं, अभिप्रायापरिज्ञानात् । "बज्झइ तं तु" इत्यादिकं निकाचनापेक्षयोक्तं, इतरथा तु तृतीयभवादर्वाक्तरामपि बध्यते । उक्तं च विशेषणवता–"कोडाकोडीअयरोवमाण तित्थयरनामकम्मठिई । बज्झइ य तं अणंतरभवम्मि तइयम्मि निद्दिट्ठं ॥ १ ॥" ततः कथमेतत्परस्परं युज्यते ? अत्रोत्तरं–"जं बज्झइ

१ वनस्पतिष्वेवैत्याजघन्यके मतान्तरं तदिति भद्रगुप्ता । वनस्पतौ [illegible] निगोदादिमार्गात्, तथात्र नरादीनां जघन्यमन्तर्मुहूर्तमित्यपि सिद्ध द्वाभ्यामानरभ्य समयेभ्य अंतर्मुहूर्तव्यपदेशात् इति केचित् ।

त्ति जणियं तत्र निकाइज्जइ त्ति नियमोऽयं । तदवंझफलं नियमा जयणा अनिकाइयावत्ते ॥ १ ॥ " आह–यदि तीर्थंकरनाम्नो जघन्यापि स्थितिरन्तःसागरोपमकोटीकोटीप्रमाणा, तर्हि तावत्याः स्थितेस्तिर्यग्भवभ्रमणमन्तरेण पूरयितुमशक्यत्वात् तिर्यग्गतावपि तीर्थंकरनामसत्कर्मा जन्तुः कियन्तं कालं यावद्भवेत् । तथा च सत्यागमविरोधः । आगमे हि तिर्यग्गतौ तीर्थंकरनामसत्कर्मा सन् प्रतिषिध्यते । नैष दोषः, निकाचितस्यैव तीर्थंकरनामकर्मणस्तिर्यग्गतौ सतः प्रतिषेधात् । उक्तं च–"जमिह निकाइयतित्थं तिरियभवे तं निसेहियं संतं । इयरम्मि नत्थि दोसो उवट्टोवट्टणासज्झे ॥ १ ॥ " अस्या अक्षरगमनिका–इहास्मिन् प्रवचने यत्तीर्थंकरनामकर्म निकाचितमवश्यवेद्यतया स्थापितं तदेव स्वरूपेण सद्विद्यमानं तिर्यग्गतौ निषिद्धं । इतरस्मिन् पुनरनिकाचिते उद्वर्तनापवर्तनासाध्ये तिर्यग्भवे विद्यमानेऽपि न कश्चिद्दोष इति । अत्रापि चान्तर्मुहूर्तमबाधा । ततः परं दलिकरचनायाः संभवादवश्यं प्रदेशोदयसंभवः[1] ॥ ७८ ॥

उक्तशेषाणां प्रकृतीनां जघन्यस्थितिप्ररूपणार्थमाह—

वग्गुक्कोसठिईणं मिच्छत्तुक्कोसगेण जं लद्धं । सेसाणं तु जहन्नो पल्लासंखेज्जगेणूणो ॥ ७९ ॥

वग्गुक्कोस त्ति–इह ज्ञानावरणप्रकृतिसमुदायो ज्ञानवरणीयवर्ग इत्युच्यते । एवं दर्शनावरणप्रकृतिसमुदायो दर्शनावरणीयवर्गः । वेदनीयप्रकृतिसमुदायो वेदनीयवर्गः । दर्शनमोहनीयप्रकृतिसमुदायो दर्शनमोहनीयवर्गः । चारित्रमोहनीयप्रकृतिसमुदायश्चारित्रमोहनीयवर्गः । नोकषायमोहनीयप्रकृतिसमुदायो नोकषायमोहनीयवर्गः । नामप्र-

१ कस्यचिदेवेत्येके, उदये चास्य प्रदेशत आज्ञैश्वर्यादय इति । यत्तु दशवर्षसहस्राणीति पञ्चसङ्ग्रहे तद्ग्रन्थकृदभिप्रायोत्तीर्णमिति न्यायाचार्याः।

प्रकृतिसमुदायो नामवर्गः । गोत्रप्रकृतिसमुदायो गोत्रवर्गः । अन्तरायप्रकृतिसमुदायोऽन्तरायवर्गः । एतेषां वर्गाणां स्वस्वी-
यास्वीयोत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोट्यादिप्रमाणा, तस्या मिथ्यात्वस्योत्कृष्टया स्थित्या सप्ततिसागरोपमकोटी-
कोटीप्रमाणया भागे हृते सति यल्लभ्यते तत्पल्योपमासंख्येयभागन्यूनं यथोक्तशेषाणां प्रकृतीनां जघन्यस्थितेः परिमाणम-
वसेयम्[1] । तथाहि—दर्शनावरणीयवेदनीययोरुत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोटीप्रमाणा, तस्या मिथ्यात्वस्थित्या सप्त-
तिसागरोपमकोटीकोटीप्रमाणया भागे हृते सति 'शून्यं शून्येन पातयेत्' इति वचनाल्लब्धास्त्रयः सागरोपमसप्तभागाः, ते
पल्योपमासंख्येयभागहीना निद्रापञ्चकासातवेदनीययोर्जघन्या स्थितिः । एवं मिथ्यात्वस्य सप्त सप्त भागाः पल्योपमासं-
ख्येयभागहीनाः, संज्वलनवर्जानां द्वादशकषायाणां चत्वारः सप्तभागाः पल्योपमासंख्येयभागहीनाः । तथा नोकषायमो-
हनीयस्य नामकर्मणो गोत्रस्य च स्वस्योत्कृष्टायाः स्थितेर्विंशतिसागरोपमकोटीकोटीप्रमाणाया मिथ्यात्वस्थित्या सप्तति-
सागरोपमकोटीकोटीप्रमाणया भागे हृते सति यौ लब्धौ द्वौ सागरोपमस्य सप्तभागौ, तौ पल्योपमासंख्येयभागहीनौ
पुरुषवेदवर्जानामष्टानां नोकषायाणां देवगतिनरकगतिवैक्रियद्विकाहारकद्विकयशःकीर्तितीर्थकरवर्जशेषनामप्रकृतीनां
नीचैर्गोत्रस्य च जघन्या स्थितिः । वैक्रियषट्कस्य देवगतिदेवानुपूर्वीनरकगतिनरकानुपूर्वीवैक्रियशरीरवैक्रियांगोपांगरूप-
स्य द्वौ सप्तभागौ सहस्रगुणितौ पल्योपमासंख्येयभागहीनौ जघन्या स्थितिः । एतावत्प्रमाणां वैक्रियषट्कस्य जघन्यस्थितिब-
न्धका असंज्ञिपञ्चेन्द्रियास्ते च जघन्यां स्थितिमेतावतीमेव बध्नन्ति, न न्यूनाम् । तदुक्तम्—"वेउव्विछक्के तं सहस्स (ताडि-

१ [illegible] ।

घउके तं सहस) ताभियं जं असण्णिणो तेसिं । पलियासंखंसूणं ठिइ अबाहूणियनिसेगो ॥ १ ॥" अस्या अक्षरगमनिका—"वग्गुक्कोसठिईणं मिच्छुक्कोसियाए" इत्यनेन करणेन यल्लब्धं तत् सहस्रताभितं गुणितं । ततः पल्योपमस्यासंख्येयेनांशेन भागेन न्यूनं सत् वैक्रियषट्के उक्तस्वरूपे जघन्यस्थितेः परिणाममवसेयं । कुत इत्याह—यद्यस्मात्कारणात्तेषां वैक्रियषट्कलक्षणानां कर्मणां असंज्ञिपञ्चेन्द्रिया एव जघन्यस्थितेर्बन्धकाः । ते च जघन्यां स्थितिमेतावतीमेव बध्नन्ति, न न्यूनां, अन्तर्मुहूर्तमबाधा, अबाधाकालहीना च कर्मस्थितिः कर्मदलिकनिषेक इति ॥ ७९ ॥

संप्रत्येकेन्द्रियादीनां जघन्योत्कृष्टस्थितिबन्धप्रतिपादनार्थमाह—

एसेगिंदियडहरो सव्वासिं ऊणसंजुउ जेठो । पणवीसा पन्नासा सयं सहस्सं च गुणकारो ॥ ८० ॥
कमसो विगलअसन्नीण पल्लसंखेज्जभागहा इयरो । विरए देसजइदुगे सम्मचउक्के य संखगुणो ॥८१॥

एसे त्ति—सर्वासां प्रकृतीनां वैक्रियषट्काहारकतीर्थकरवर्जितानामेषोऽनन्तरोक्तो "वग्गुक्कोसठिईणं मिच्छुक्कोसगेण जं लद्धं" । "पलिउवमासंखेज्जभागेणूणो" इत्येवंलक्षणः स्थितिबन्धो डहरो जघन्य एकेन्द्रियाणां द्रष्टव्यः । तथाहि—ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामुत्कृष्टा स्थितिस्त्रिंशत्सागरोपमकोटीकोटीप्रमाणा, तस्या मिथ्यात्वस्थित्योत्कृष्टया सप्ततिसागरोपमकोटीकोटीप्रमाणया भागे हृते सति लब्धाः सागरोपमस्य त्रयः सप्तभागास्ते च पल्योपमासंख्येयभागहीनाः क्रियन्ते, एतावत्प्रमाणां जघन्यां स्थितिं ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानामेकेन्द्रिया बध्नन्ति, न न्यूनां । एवं मिथ्यात्वस्य जघन्यां स्थितिमेकं सागरोपमं पल्योपमासंख्येयभागहीनं कषायमोहनीयस्य ।

चतुरः सागरोपमस्य सप्तभागान् पल्योपमासंख्येयभागहीनान् नोकषायाणां । तथा वैक्रियषट्काहारकद्विकतीर्थंकरवर्जितानां शेषनामप्रकृतीनां गोत्रप्रकृतिद्वयस्य च द्वौ सागरोपमस्य सप्तभागौ पल्योपमासंख्येयभागहीनावेकेन्द्रिया बध्नन्ति । 'ऊणसंजुत्त जेट्ठ त्ति' स एव जघन्यः स्थितिबन्ध ऊनेन पल्योपमासंख्येयभागलक्षणेन संयुतः सन्नुत्कृष्टस्थितिबन्ध एकेन्द्रियाणां वेदितव्यः । तद्यथा—ज्ञानावरणपञ्चकदर्शनावरणनवकासातवेदनीयान्तरायपञ्चकानां त्रयः सागरोपमस्य सप्तभागाः परिपूर्णा उत्कृष्टः स्थितिबन्धः । एवं सर्वत्रापि भावनीयं । उक्त एकेन्द्रियाणां जघन्योत्कृष्टः स्थितिबन्धः । संप्रति विकलेन्द्रियाणामाह—'पणवीसेत्यादि' एकेन्द्रियाणां सत्क उत्कृष्टः स्थितिबन्धः पञ्चविंशत्यादिना गुणकारेण गुणितः सन् क्रमशः क्रमेण विकलानां विकलेन्द्रियाणां द्वित्रिचतुरिन्द्रियलक्षणानामसंज्ञिनां चासंज्ञिपञ्चेन्द्रियाणां चोत्कृष्टः स्थितिबन्धो वेदितव्यः । तद्यथा—एकेन्द्रियाणामुत्कृष्टः स्थितिबन्धः पञ्चविंशत्या गुणितो द्वीन्द्रियाणामुत्कृष्टः स्थितिबन्धो भवति । स एवैकेन्द्रियाणामुत्कृष्टः स्थितिबन्धः पञ्चाशता गुणितस्त्रीन्द्रियाणामुत्कृष्टः स्थितिबन्धः । शतेन गुणितश्चतुरिन्द्रियाणां । सहस्रेण गुणितोऽसंज्ञिपञ्चेन्द्रियाणामिति । 'पल्लसंखेज्जभागहा इयरो' स एव द्वीन्द्रियादीनामात्मीय आत्मीय उत्कृष्टः स्थितिबन्धः पल्योपमासंख्येयभागहीनः सन् इतरो जघन्यः स्थितिबन्धो वेदितव्यः । संप्रति सर्वेषामपि जघन्योत्कृष्टस्थितिबन्धानामल्पबहुत्वमभिधीयते—तत्र सूक्ष्मसंपरायस्य जघन्यस्थितिबन्धः सर्वस्तोकः । ततो बादरपर्याप्तकस्य जघन्यः स्थितिबन्धोऽसंख्येयगुणः । ततोऽपि सूक्ष्मपर्याप्तकस्य जघन्यः स्थितिबन्धो विशेषाधिकः ।

---

१ पल्योपमसंख्येयभागयुत इति पञ्च० । २ स्वाभाविक एकेन्द्रियसत्कः पञ्चविंशत्यादिगुणित इति पञ्च० ।

ततोऽप्यपर्याप्तबादरस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तसूक्ष्मस्य जघन्यः स्थितिबन्धो विशेषाधिकः ।
ततोऽपि अपर्याप्तसूक्ष्मस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तबादरस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः ।
ततोऽपि सूक्ष्मपर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि बादरपर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः ।
ततो द्वीन्द्रियस्य पर्याप्तस्य जघन्यः स्थितिबन्धः संख्येयगुणः । ततस्तस्यैवापर्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः ।
ततोऽपि तस्यैव द्वीन्द्रियस्यापर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि द्वीन्द्रियपर्याप्तस्योत्कृष्टः स्थितिबन्धो
विशेषाधिकः । ततोऽपि त्रीन्द्रियपर्याप्तस्य जघन्यः स्थितिबन्धः संख्येयगुणः । ततोऽपि तस्यैव त्रीन्द्रियस्याप-
र्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽपि त्रीन्द्रियापर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽपि
पर्याप्तत्रीन्द्रियस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततश्चतुरिन्द्रियस्य पर्याप्तकस्य जघन्यः स्थितिबन्धः संख्येयगुणः ।
ततोऽप्यपर्याप्तचतुरिन्द्रियस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽप्यपर्याप्तचतुरिन्द्रियस्योत्कृष्टः स्थितिबन्धो विशे-
षाधिकः । ततोऽपि पर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽसंज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यः स्थितिबन्धः
संख्येयगुणः । ततोऽपि तस्यैवापर्याप्तस्य जघन्यः स्थितिबन्धो विशेषाधिकः । ततोऽपि तस्यैवापर्याप्तस्योत्कृष्टः स्थिति-
बन्धो विशेषाधिकः । ततोऽपि तस्यैव पर्याप्तस्योत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततः संयतस्योत्कृष्टः स्थितिबन्धः
संख्येयगुणः । 'विरए इत्यादि' विरते संयते, अत्र च जघन्य उत्कृष्टश्च स्थितिबन्ध उक्त एव । ततो देशयतिद्विके देश-
विरतद्विके जघन्योत्कृष्टस्थितिबन्धलक्षणे, तथा सम्यक्त्वचतुष्केऽविरतसम्यग्दृष्टौ पर्याप्तेऽपर्याप्ते च प्रत्येकं जघन्योत्कृष्ट-
स्थितिबन्धके स्थितिबन्धो यथोत्तरं संख्येयगुणो वक्तव्यः । तद्यथा—संयतोत्कृष्टस्थितिबन्धात् देशविरतस्य जघन्यः स्थिति-

बन्धः संख्येयगुणः । ततो देशविरतस्योत्कृष्टः स्थितिबन्धः संख्येयगुणः । ततः पर्याप्ताविरतसम्यग्दृष्टेर्जघन्यः स्थितिबन्धः संख्येयगुणः । ततोऽप्यपर्याप्ताविरतसम्यग्दृष्टेर्जघन्यः स्थितिबन्धः संख्येयगुणः ततोऽप्यपर्याप्ताविरतसम्यग्दृष्टेरुत्कृष्टः स्थितिबन्धः संख्येयगुणः । ततोऽपि पर्याप्ताविरतसम्यग्दृष्टेरुत्कृष्टः स्थितिबन्धः संख्येयगुणः ॥ ८१ ॥

सन्नीपज्जत्तियरे अब्भिंतरओ य (उ) कोडिकोडीओ । उक्कोसो सन्निस्स होइ पज्जत्तगस्सेव ॥ ८२ ॥

सन्नि त्ति–अविरतसम्यग्दृष्टेः पर्याप्तस्य सत्कादुत्कृष्टस्थितिबन्धात् संज्ञिपञ्चेन्द्रियस्य पर्याप्तस्य जघन्यः स्थितिबन्धः संख्येयगुणः । ततोऽपि तस्यैवापर्याप्तस्य जघन्यः स्थितिबन्धः संख्येयगुणः । ततोऽपि तस्यैवापर्याप्तस्य संज्ञिपञ्चेन्द्रियस्योत्कृष्टः स्थितिबन्धः संख्येयगुणः । 'अब्भिंतरओ य (उ) कोडिकोडीओ त्ति' संयतस्योत्कृष्टात् स्थितिबन्धादारभ्य यावदपर्याप्तसंज्ञिपञ्चेन्द्रियस्योत्कृष्टः स्थितिबन्ध एष सर्वोऽपि सागरोपमकोटीकोट्या अभ्यन्तर एव द्रष्टव्यः । एकेन्द्रियादीनां तु सर्वजघन्यसर्वोत्कृष्टस्थितिबन्धपरिमाणं प्रागेव प्रत्येकमुक्तं । संज्ञिपञ्चेन्द्रियपर्याप्तकस्य पुनरुत्कृष्टः स्थितिबन्धो य एव प्रागोघेन सामान्येनोक्त उत्कृष्टः स्थितिबन्धः स एव वेदितव्यः ॥ ८२ ॥

तदेवं कृता स्थितिस्थान (बन्ध) प्ररूपणा । संप्रति निषेकप्ररूपणावसरः । तत्र च द्वे अनुयोगद्वारे–अनन्तरोपनिधा परंपरोपनिधा च । तत्रानन्तरोपनिधाप्ररूपणार्थमाह—

मोत्तूण सगमबाहं पढमाए ठिइए बहुतरं दव्वं । एत्तो विसेसहीणं जावुक्कोसं ति सव्वेसिं ॥ ८३ ॥

१ आयुर्वर्जानामिति ख०।

मोत्तूण त्ति–सर्वस्मिन्नपि कर्मणि बध्यमाने आत्मीयमबाधाकालं मुक्त्वा परित्यज्य ऊर्ध्वं दलिकनिक्षेपं करोति । तत्र प्रथमायां स्थितौ समयलक्षणायां प्रभूततरं द्रव्यं कर्मदलिकं निषिञ्चति । 'एत्तो विसेसहीणं ति' इतः प्रथमस्थितेरूर्ध्वं द्वितीयादिषु स्थितिषु समयसमयप्रमाणासु विशेषहीनं विशेषहीनं कर्मदलिकं निषिञ्चति । तथाहि–प्रथमस्थितेः सकाशात् द्वितीयस्थितौ विशेषहीनं । ततोऽपि तृतीयस्थितौ विशेषहीनं । ततोऽपि चतुर्थस्थितौ विशेषहीनं । एवं विशेषहीनं विशेषहीनं तावद्वाच्यं यावत्तत्तत्समयबध्यमानकर्मणामुत्कृष्टा स्थितिश्चरमसमय इत्यर्थः ॥ ८३ ॥

कृताऽनन्तरोपनिधाप्ररूपणा, संप्रति परंपरोपनिधाप्ररूपणार्थमाह—

पल्लासंखियभागं गंतुं डुगुणूणमेवमुक्कोसा । नाणंतराणि पल्लस्स मूलभागो असंखतमो ॥ ८४ ॥

पल्ल त्ति–अबाधाकालादूर्ध्वं प्रथमस्थितौ यन्निषिक्तं कर्मदलिकं तदपेक्षया द्वितीयादिषु स्थितिषु समयसमयरूपासु विशेषहीनं विशेषहीनतरं दलिकमारभ्यमाणं पल्योपमासंख्येयभागमात्रासु स्थितिष्वतिक्रान्तासु दलिकं द्विगुणोनं भवति, अर्धं भवतीत्यर्थः । ततः पुनरप्यत ऊर्ध्वमेतदपेक्षया विशेषहीनं विशेषहीनतरं दलिकमारभ्यमाणं पल्योपमासंख्येयभागमात्रप्रमाणासु स्थितिष्वतिक्रान्तासु अर्धं भवति । एवमर्धार्धहान्या तावद्वाच्यं यावदुत्कृष्टा स्थितिः स्थितेश्चरमसमय इत्यर्थः । कियन्ति पुनरेवंद्विगुणहानि स्थानानि भवन्तीत्येतन्निरूपणार्थमाह–'नाणंतराणीत्यादि' नानाप्रकाराणि यान्यन्तराणि अन्तरान्तराद्विगुणहानिस्थानानि भवन्ति, तान्युत्कृष्टस्थितिबन्धे पल्योपमस्य संबन्धिनः प्रथमवर्गमूलस्यासंख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । उक्तं च–"पलिउवमस्स मूला असंखभागम्मि जत्तिया समया।

तावइया हाणीउ विइवंधुक्कोसए नेया ॥ १ ॥" ननु मिथ्यात्वमोहनीयस्योत्कृष्टस्थितेः सप्ततिसागरोपमकोटीकोटीप्रमाणत्वादेतावत्यो हानयः संभवन्तु, आयुषस्तूत्कृष्टस्थितेस्त्रयस्त्रिंशत्सागरोपमसमयमात्रत्वात् कथमेतावत्यो हानयः संभवन्तीति ? उच्यते—इहासंख्येयतमो भागोऽसंख्येयभेदात्मकः, असंख्यातस्यासंख्यातभेदभिन्नत्वात् । ततः पल्योपमप्रथमवर्गमूलस्यासंख्येयतमो भाग आयुष्यतीवाल्पतरो गृह्यते इत्यविरोधः । तथा सर्वाणि द्विगुणहानिस्थानानि स्तोकानि । एकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानानि असंख्येयगुणानि इति ॥ ७४ ॥

कृता निषेकप्ररूपणा, संप्रत्यबाधाकंडकप्ररूपणार्थमाह—

मोत्तूण आउगाइं समए समए अबाहहाणीए । पल्लासंखियभागं कंडं कुणअप्पबहुमोसिं ॥ ७५ ॥

मोत्तूण त्ति—आयूंषि चत्वार्यपि मुक्त्वा शेषाणां सर्वेषामपि कर्मणामबाधाहानौ समये समये पल्योपमासंख्येयभागलक्षणं कंडकमुत्कृष्टस्थितेः सकाशाद्धीनं करोति । तथाहि—उत्कृष्टायामबाधायां वर्तमानो जीवः स्थितिमुत्कृष्टां बध्नाति परिपूर्णामेकसमयहीनां वा । एवं यावत्पल्योपमासंख्येयभागहीनां वा । यदि पुनरुत्कृष्टाऽबाधा एकेन समयेन हीना भवेत्ततो नियमात्पल्योपमासंख्येयभागमात्रेण कंडकेन हीनामेवोत्कृष्टां स्थिति बध्नाति । तामप्येकसमयहीनां वा द्विसमयहीनां वा यावत्पल्योपमासंख्येयभागहीनां वा । यदि पुनर्द्वाभ्यां हीनोत्कृष्टाऽबाधा भवेत्ततो नियमात्पल्योपमासंख्येयभागलक्षणकंडकद्वयहीनामेवोत्कृष्टां स्थितिं बध्नाति । तामप्येकसमयहीनां वा यावत्पल्योपमासंख्येयभागहीनां वा । एवं यतिभिः समयैरूनाऽबाधा भवति, ततिभिरेव कंडकैः पल्योपमासंख्येयभागलक्षणैरूना स्थितिर्द्रष्टव्या । यावदेकत्र जघ-

न्याऽबाधा भवति, अन्यत्र च जघन्या स्थितिः । तदेवमबाधागतसमयसमयहान्या स्थितेः कंडकहानिप्ररूपणा कृता । संप्रत्यल्पबहुत्वप्ररूपणार्थमाह–'अप्पबहुमेमिं' एषां वक्ष्यमाणानामल्पबहुत्वं वक्तव्यं ॥ ८५ ॥

केषामिति चेत्तानेवाह—

बंधाबाहाणुक्कसि(स्स)यरं कंडकअबाहबंधाणं । ठाणाणि एक्कनाणंतराणि अठेण कंडं च ॥ ८६ ॥

बंध त्ति–'बंधाबाहाणुकसियरं ति' उत्कृष्टः स्थितिबन्धो जघन्यः स्थितिबन्धः. उत्कृष्टाऽबाधा जघन्याऽबाधा । 'कंडकअबाहबंधाणं ठाणाणि त्ति' कंडकस्थानानि अबाधास्थानानि स्थितिबन्धस्थानानि च । 'एग (क) नाणंतराणि त्ति' एकं द्विगुणहान्योरन्तरं नानारूपाणि चान्तराणि द्विगुणहानिस्थानरूपाणि । 'अठेण कंडं च त्ति' जघन्याऽबाधाहीनया उत्कृष्टाऽबाधया जघन्यस्थितिहीनाया उत्कृष्टस्थितेर्भागे हृते सति यावान् भागो लभ्यते तावान् अर्थेन कंडकमित्युच्यते इत्याम्नायिका व्याख्यानयन्ति । चः समुच्चये । पञ्चसंग्रहे पुनरेतस्य स्थानेऽबाधाकंडकस्थानानीत्युक्तं । तत्र चैवं मूलटीकाकारेण व्याख्या कृता–अबाधा च कंडकानि चाबाधाकंडकं समाहारो द्वन्द्वः तस्य स्थानानि अबाधाकंडकस्थानानि । तयोर्द्वयोरपि स्थानसंख्येत्यर्थः । एतेषां दशानां स्थानानामल्पबहुत्वमुच्यते–तत्र संज्ञिपञ्चेन्द्रियेषु पर्याप्तेषु अपर्याप्तकेषु वा बन्धकेषु आयुर्वर्जानां सप्तानां कर्मणां सर्वस्तोका जघन्याऽबाधा । सा चान्तर्मुहूर्तप्रमाणा । ततोऽबाधास्थानानि कंडकस्थानानि चासंख्येयगुणानि । तानि तु परस्परं तुल्यानि । तथाहि–जघन्यामबाधामादिं कृत्वोत्कृष्टाऽबाधाचरमसमयमभिव्याप्य यावन्तः समयाः प्राप्यन्ते, तावन्त्यबाधास्थानानि भवन्ति । तद्यथा–जघन्याऽबाधा एकमबाधा-

स्थानं सैव समयाधिका द्वितीयं । द्विसमयाधिका तृतीयं । एवं तावद्वाच्यं यावदुत्कृष्टाबाधाचरमसमयः । एतावन्त्येव चाबाधाकंडकानि, जघन्याबाधात आरभ्य समयं समयं प्रति कंडकस्य प्राप्यमाणत्वात् । एतच्च प्रागेवोक्तं । तेभ्य उत्कृष्टाबाधा विशेषाधिका, जघन्याबाधायास्तत्र प्रवेशात् । ततो दलिकनिषेकविधौ द्विगुणहानिस्थानानि असंख्येयगुणानि, पल्योपमप्रथमवर्गमूलासंख्येयभागगतसमयप्रमाणत्वात् । तत एकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसंख्येयगुणानि, तेषामसंख्येयानि पल्योपमवर्गमूलानि परिमाणमिति कृत्वा तेभ्योऽपि अर्थेन कंडकमसंख्येयगुणं । तस्माज्जघन्यः स्थितिबन्धोऽसंख्येयगुणः, अन्तःसागरोपमकोटीकोटीप्रमाणत्वात् । संज्ञिपञ्चेन्द्रिया हि श्रेणिमनारूढा जघन्यतोऽपि स्थितिबन्धमन्तःसागरोपमकोटीकोटीप्रमाणमेव कुर्वन्ति । ततोऽपि स्थितिबन्धस्थानान्यसंख्येयगुणानि । तत्र ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामेकोनत्रिंशद्गुणानि समधिकानि मिथ्यात्वमोहनीयस्यैकोनसप्ततिगुणानि समधिकानि । नामगोत्रयोरेकोनविंशतिगुणानि समधिकानि । तेभ्य उत्कृष्टा स्थितिर्विशेषाधिका, जघन्यस्थितेरबाधायाश्च तत्र प्रवेशात् । तथा संज्ञिपञ्चेन्द्रियेष्वसंज्ञिपञ्चेन्द्रियेषु वा पर्याप्तकेषु प्रत्येकमायुषो जघन्याऽबाधा सर्वस्तोका । ततो जघन्यः स्थितिबन्धः संख्येयगुणः, स च क्षुल्लकभवरूपः । ततोऽबाधास्थानान्यसंख्येयगुणानि । जघन्याबाधारहितः पूर्वकोटीत्रिभागरहित इति कृत्वा । ततोऽप्युत्कृष्टाऽबाधा विशेषाधिका, जघन्याबाधाया अपि तत्र प्रवेशात् । ततो द्विगुणहानिस्थानान्यसंख्येयगुणानि, पल्योपमप्रथमवर्गमूलासंख्येयभागगतसमयप्रमाणत्वात् । तेभ्योऽप्येकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसंख्येयगुणानि । तत्र युक्तिः प्रागुक्तावगन्तव्या । ततः स्थितिबन्धस्थानान्यसंख्येयगुणानि । तेभ्योऽप्युत्कृष्टः स्थितिबन्धो विशे-

पाधिकः, जघन्यस्थितेरबाधायाश्च तत्र प्रवेशात्। तथा पञ्चेन्द्रियेषु संज्ञिष्वसंज्ञिष्वपर्याप्तेषु चतुरिन्द्रियत्रीन्द्रियद्वीन्द्रियबादर-सूक्ष्मैकेन्द्रियेषु च पर्याप्तापर्याप्तेषु प्रत्येकमायुषः सर्वस्तोका जघन्याऽबाधा। ततो जघन्यः स्थितिबन्धः संख्येयगुणः, स च क्षुल्लकभवरूपः। ततोऽबाधास्थानानि संख्येयगुणानि। ततोऽप्युत्कृष्टाऽबाधा विशेषाधिका। ततोऽपि स्थितिबन्धस्थानानि संख्येयगुणानि, जघन्यस्थितिन्यूनपूर्वकोटिप्रमाणत्वात्। तत उत्कृष्टः स्थितिबन्धो विशेषाधिकः, जघन्यस्थितेरबाधायाश्च तत्र प्रवेशात्। तथाऽसंज्ञिपञ्चेन्द्रियचतुरिन्द्रियत्रीन्द्रियद्वीन्द्रियसूक्ष्मबादरैकेन्द्रियेषु पर्याप्तापर्याप्तेष्वायुर्वर्जानां सप्तानां कर्मणां प्रत्येकमबाधास्थानानि कण्डकानि च स्तोकानि परस्परं च तुल्यानि, आवलिकाऽसंख्येयभागगतसमयप्रमाणत्वात्। ततो जघन्याऽबाधाऽसंख्येयगुणा, अन्तर्मुहूर्तप्रमाणत्वात्। ततोऽप्युत्कृष्टाऽबाधा विशेषाधिका, जघन्याबाधाया अपि तत्र प्रवेशात्। ततो द्विगुणहीनानि स्थानान्यसंख्येयगुणानि। तत एकस्मिन् द्विगुणहान्योरन्तरे निषेकस्थानान्यसंख्येयगुणानि। ततोऽर्थेन कण्डकमसंख्येयगुणं। ततोऽपि स्थितिबन्धस्थानान्यसंख्येयगुणानि, पल्योपमासंख्येयभागगतसमयप्रमाणत्वात्। ततोऽपि जघन्यस्थितिबन्धोऽसंख्येयगुणः। ततोऽप्युत्कृष्टस्थितिबन्धो विशेषाधिकः, पल्योपमासंख्येयभागेनाभ्यधिकत्वादिति ॥ ८६ ॥

तदेवमुक्तमल्पबहुत्वं, इदानीं स्थितिबन्धाध्यवसायस्थानप्ररूपणा कर्तव्या। तत्र च त्रीण्यनुयोगद्वाराणि। तद्यथा—स्थितिसमुदाहारः, प्रकृतिसमुदाहारः, जीवसमुदाहारश्च। समुदाहारः प्रतिपादनं। तत्र स्थितिसमुदाहारेऽपि त्रीण्यनुयोगद्वाराणि। तद्यथा—प्रगणना, अनुकृष्टिः, तीव्रमन्दता च। तत्र प्रगणनाप्ररूपणार्थमाह—

ठिइबंधे ठिइबंधे अज्झवसाणाणसंखया लोगा । ह्रस्सा विसेसवुड्ढी आऊणमसंखगुणवुड्ढी ॥ ८३ ॥

ठिइबंधे त्ति—इह सर्वेषामपि कर्मणां जघन्यस्थितेः प्रभृति उत्कृष्टस्थितिपर्यन्तमतिक्रम्य यावन्तः समयास्तावन्ति स्थितिस्थानानि जघन्यस्थितिसहितानि प्रत्येकं भवन्ति । एकैकस्मिंश्च स्थितिस्थाने बध्यमाने तद्बन्धहेतवः काषायिका अध्यवसाया नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणाः प्राप्यन्ते । अत्र च द्वेधा प्ररूपणा । तद्यथा—अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया प्ररूपणामाह—'ह्रस्सा विसेसवुड्ढी' आयुर्वर्जानां कर्मणां ह्रस्वात् जघन्यात् स्थितिस्थानात् यत्तो द्वितीयादिषु स्थितिस्थानेष्वनन्तरेषु विशेषवृद्धिः विशेषाधिका वृद्धिर्वक्तव्या । तद्यथा—ज्ञानावरणीयस्य जघन्यस्थितौ तद्बन्धहेतुभूता अध्यवसाया नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणाः । ते चान्यापेक्षया सर्वस्तोकाः । ततो द्वितीयस्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्थितौ विशेषाधिकाः । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एवं सर्वेष्वपि कर्मसु वाच्यं । 'आऊणमसंखगुणवुड्ढी' आयुषां जघन्यस्थितेरारभ्य प्रतिस्थितिस्थानमसंख्येयगुणवृद्धिर्वक्तव्या । तद्यथा—आयुषो जघन्यस्थितौ तद्बन्धहेतुभूता अध्यवसाया असंख्येयलोकाकाशप्रदेशप्रमाणाः । ते च सर्वस्तोकाः । ततो द्वितीयस्थितावसंख्येयगुणाः । ततोऽपि तृतीयस्थितावसंख्येयगुणाः । एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः ॥ ८३ ॥

१ [illegible]

तदेवं कृताऽनन्तरोपनिधया प्ररूपणा, संप्रति परंपरोपनिधया तां करोति—

पल्लासंखियभागं गंतुं दुगुणाणि जाव उक्कोसा । नाणंतराणि अंगुलमूलच्छेयणमसंखतमो ॥ ८८ ॥

पल्ल त्ति–आयुर्वर्जानां सप्तानां कर्मणां जघन्यस्थितौ यान्यध्यवसायस्थानानि, तेभ्यः पल्योपमासंख्येयभागमात्राः स्थितीरतिक्रम्य परस्मिन्नन्तरे स्थितिस्थाने द्विगुणान्यध्यवसायस्थानानि भवन्ति । तेभ्योऽपि पल्योपमासंख्येयभागमात्राः स्थितीरतिक्रम्यानन्तरे स्थितिस्थाने द्विगुणान्यध्यवसायस्थानानि भवन्ति । एवं द्विगुणवृद्धिस्तावद्वक्तव्या यावदुत्कृष्टा स्थितिरिति । एकस्मिन् द्विगुणवृद्ध्योरन्तरे स्थितिस्थानानि पल्योपमवर्गमूलान्यसंख्येयानि । नानाद्विगुणवृद्धिस्थानानि चांगुलवर्गमूलच्छेदनकासंख्येयतमभागप्रमाणानि । एतदुक्तं भवति–अंगुलमात्रक्षेत्रगतप्रदेशराशेर्यत् प्रथमं वर्गमूलं तन्मनुष्यप्रमाणहेतुराशिपक्षवर्तिच्छेदनविधिना तावच्छिद्यते, यावद्भागं न प्रयच्छति । तेषां च छेदनकानामसंख्येयतमे भागे यावन्ति छेदनकानि तावत्सु यावानाकाशप्रदेशराशिस्तावत्प्रमाणानि नानाद्विगुणस्थानानि भवन्तीति ॥ ८८ ॥

तदेवं कृता प्रगणना । सांप्रतमनुकृष्टिश्चिन्त्यते । सा च न विद्यते । तथाहि–ज्ञानावरणीयस्य जघन्यस्थितिबन्धे यान्यध्यवसायस्थानानि, तेभ्यो द्वितीयस्थितिबन्धेऽन्यानि, तेभ्योऽपि तृतीयस्थितिबन्धेऽन्यानि, एवं तावद्वाच्यं यावदुत्कृष्टा स्थितिः । एवं सर्वेषामपि कर्मणां द्रष्टव्यं । इदानीं तीव्रमन्दता वक्तुमवसरप्राप्ता, सा स्थाप्या, अग्रे वक्ष्यमाणत्वात् । तदेवमभिहितः स्थितिसमुदाहारः । संप्रति प्रकृतिसमुदाहार उच्यते । तत्र च द्वे अनुयोगद्वारे । तद्यथा–प्रमा-

णानुगमः, अल्पबहुत्वं च । तत्र प्रमाणानुगमे ज्ञानावरणीयस्य सर्वेषु स्थितिबन्धेषु कियन्त्यध्यवसायस्थानानि ? उच्यते—असंख्येयलोकाकाशप्रदेशप्रमाणानि । एवं सर्वकर्मणामपि द्रष्टव्यं । इदानीमल्पबहुत्वमभिधातुकाम आह—

ठिइदीहयाएँ कमसो असंखगुणियाणणंतगुणणाए। पढमजहन्नुक्कोसं बितिय जहन्नाइया चरमा॥७०॥

ठिइदीहयाएत्ति–स्थितिदीर्घतया क्रमशः क्रमेणाध्यवसायस्थानान्यसंख्येयगुणानि वक्तव्यानि । यस्य यतः क्रमेण दीर्घा स्थितिस्तस्य ततः क्रमेणाध्यवसायस्थानान्यसंख्येयगुणानि वक्तव्यानीत्यर्थः। तथाहि—सर्वस्तोकान्यायुषः स्थितिबन्धाध्यवसायस्थानानि । तेभ्योऽपि नामगोत्रयोरसंख्येयगुणानि । नन्वायुषः स्थितिस्थानेषु यथोत्तरमसंख्येयगुणा वृद्धिः, नामगोत्रयोस्तु विशेषाधिका, तत्कथमायुरपेक्षया नामगोत्रयोरसंख्येयगुणानि भवन्ति ? उच्यते—आयुषो जघन्यस्थितावध्यवसायस्थानान्यतीव स्तोकानि, नामगोत्रयोः पुनर्जघन्यायां स्थितौ अतिप्रभूतानि, स्तोकानि चायुषः स्थितिस्थानानि, नामगोत्रयोस्त्वतिप्रभूतानि, ततो न कश्चिद्दोषः। नामगोत्रयोः सत्कस्थितिबन्धाध्यवसायस्थानेभ्यो ज्ञानावरणीयदर्शनावरणीयवेदनीयान्तरायाणां स्थितिबन्धाध्यवसायस्थानान्यसंख्येयगुणानि। कथमिति चेदुच्यते—इह पल्योपमासंख्येयभागमात्रासु स्थितिष्वतिक्रान्तासु द्विगुणवृद्धिरुपलभ्यते। तथा च सत्येकैकस्यापि पल्योपमस्यान्तेऽसंख्येयगुणानि लभ्यन्ते, किं पुनर्दशसागरोपमकोटीकोट्यन्ते इति तेभ्योऽपि कषायमोहनीयस्य स्थितिबन्धाध्यवसायस्थानान्यसंख्येयगुणानि। तेभ्योऽपि दर्शनमोहनीयस्य स्थितिबन्धाध्यवसायस्थानान्यसंख्येयगुणानि । उक्तः प्रकृतिसमुदाहारः, संप्रति स्थितिसमुदाहारे या प्राक् तीव्रमन्दता नोक्ता साऽभिधीयते—'अणंतेत्यादि' प्रथमायां स्थितौ जघन्यं स्थितिबन्धाध्यवसायस्थानं । ततस्तस्यामेवोत्कृष्टं ।

ततो द्वितीयस्थितौ जघन्यं । एवमादि आ चरमात् उत्कृष्टस्थितौ चरमं स्थितिबन्धाध्यवसायस्थानं यावत्क्रमेणानन्तगुणतया वक्तव्यं । तद्यथा—ज्ञानावरणीयस्य जघन्यस्थितौ जघन्यस्थितिबन्धाध्यवसायस्थानं सर्वमन्दानुभावं । ततस्तस्यामेव जघन्यस्थितौ उत्कृष्टमध्यवसायस्थानमनन्तगुणं । ततोऽपि द्वितीयस्थितौ जघन्यं स्थितिबन्धाध्यवसायस्थानमनन्तगुणं । ततोऽपि तस्यामेव द्वितीयस्थितौ उत्कृष्टमनन्तगुणं । एवं प्रतिस्थिति जघन्यमुत्कृष्टं च स्थितिबन्धाध्यवसायस्थानमनन्तगुणतया तावद्वक्तव्यं यावदुत्कृष्टायां स्थितौ चरमं स्थितिबन्धाध्यवसायस्थानमनन्तगुणम् ॥ ७९ ॥

तदेवं स्थितिसमुदाहारोऽपि निरवशेष उक्तः प्रकृतिसमुदाहारश्च । संप्रति जीवसमुदाहारमभिधित्सुराह—

बंधंती धुवपगडी परित्तमाणिग सुभाण तिविहरसं। चउ तिग विठाणगयं विवरीयतिगं च असुभाणं॥८०॥

बंधंतित्ति—ज्ञानावरणीयपञ्चकदर्शनावरणीयनवकमिथ्यात्वषोडशकषायभयजुगुप्सातैजसकार्मणवर्णगन्धरसस्पर्शागुरुलघूपघातनिर्माणान्तरायपञ्चकलक्षणाः सप्तचत्वारिंशत्संख्या ध्रुवप्रकृतीर्बध्नन्ति । परावर्तमानशुभप्रकृतीनां सातवेदनीयदेवगतिमनुजगतिपञ्चेन्द्रियजातिवैक्रियाहारकौदारिकशरीरसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननांगोपांगत्रयमनुजानुपूर्वीदेवानुपूर्वीपराघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसादिदशकतीर्थंकरनामनरकायुर्वर्जशेषायुष्कत्रयोच्चैर्गोत्रलक्षणानां चतुस्त्रिंशत्संख्यानां त्रिविधं त्रिप्रकारं । तद्यथा—चतुःस्थानगतं त्रिस्थानगतं द्विस्थानगतं चरममनुभागं बध्नन्ति । इह शुभप्रकृतीनां रसः क्षीरादिरसोपमः । अशुभप्रकृतीनां तु घोषातकीनिंबादिरसोपमः । उक्तं च—"घोसाडइनिंबुवमो

असुभाण सुभाण खीरखंडुवमो" इति । क्षीरादिरसश्च स्वाभाविक एकस्थानिक उच्यते । द्वयोस्तु कर्षयोरावर्तने कृते सति योऽवशिष्यते एकः कर्षः स द्विस्थानिकः । त्रयाणां कर्षाणामावर्तने कृते सति य उद्धरित एकः कर्षः स त्रिस्थानगतः । चतुर्णां तु कर्षाणामावर्तने कृते सति योऽवशिष्टः एकः कर्षः स चतुःस्थानगतः । एकस्थानगतोऽपि रसो जललवबिन्दुचुलुकप्रसृत्यञ्जलिकरककुंभद्रोणादिषु प्रक्षेपात् मन्दमन्दतराद्यसंख्यभेदत्वं प्रतिपद्यते । एवं द्विस्थानगतादिष्वपि रसेष्वसंख्येयभेदत्वं वाच्यं । एतदनुसारेण च कर्मणामपि रसेष्वेकस्थानगतत्वादि स्वधिया परिभावनीयं । एकस्थानगताच्च रसात् कर्मणां द्विस्थानगतादयो रसा यथोत्तरमनन्तगुणा वाच्याः । तदुक्तं—"अणंतगुणिया कमेणियरे" । तथा केवलज्ञानावरणवर्जानां चतुर्णां ज्ञानावरणीयानां, केवलदर्शनावरणवर्जानां त्रयाणां चक्षुरादिदर्शनावरणीयानां, पुरुषवेदसंज्वलनचतुष्टयान्तरायपञ्चकानां च सर्वसंख्यया सप्तदशप्रकृतीनां बन्धमाश्रित्य चतुर्धापि रसः सम्भवति । तद्यथा—एकस्थानगतो द्विस्थानगतस्त्रिस्थानगतश्चतुःस्थानगतश्च । शेषाणां तु शुभप्रकृतीनामशुभप्रकृतीनां वा द्विस्थानगतः त्रिस्थानगतश्चतुःस्थानगतश्च । न तु कदाचनाप्येकस्थानगत इति वस्तुस्थितिः । तत्र शुभप्रकृतीनां चतुःस्थानगतादिक्रमेण रसस्य त्रैविध्यं प्रतिपाद्य सम्प्रत्यशुभप्रकृतीनां रसस्य त्रैविध्यमाह—'विवरीयतिगं च असुहाणं' ता एव ध्रुवप्रकृतीर्बध्नन्तो यदि परावर्तमाना अशुभप्रकृतीर्बध्नंति तदा तासामनुभागं विपरीतत्रिकं विपरीतं त्रिकं यस्य स तथा तं बध्नन्ति । तद्यथा—द्विस्थानगतं त्रिस्थानगतं चतुःस्थानगतं च । इह ध्रुवप्रकृतीनां जघन्या स्थितिं बध्नन् शुभप्रकृतीनां बन्धमागतानां चतुःस्थानगतं रसं बध्नाति, अशुभप्रकृतीनां तु द्विस्थानगतं । अजघन्यां ध्रुवप्रकृतीनां स्थितिं बध्नन् शुभप्रकृतीनामशुभप्रकृतीनां वा यथा-

योगं बन्धमागतानां त्रिस्थानगतं रसं बध्नाति । उत्कृष्टां च स्थितिं ध्रुवप्रकृतीना बध्नन् शुभप्रकृतीनां द्विस्थानगतं, अशुभप्रकृतीनां चतुःस्थानगतं रसं बध्नाति । ततः शुभप्रकृतिगतरसत्रैविध्यक्रमापेक्षयाऽशुभप्रकृतीनां रसत्रैविध्यक्रमस्य वैपरीत्यमुक्तं ॥ ८० ॥

अथ के शुभप्रकृतीनां चतुःस्थानगतं त्रिस्थानगतं द्विस्थानगतं वा रसं बध्नन्ति ? उच्यते—

सवविसुद्धा बंधंति मज्झिमा संकिलिठ्ठतरगा य । धुवपगइ जहन्नठिइं सवविसुद्धा उ बंधंति ॥८१॥
तिठाणे अजहन्नं बिठाणे जेठ्ठगं सुभाण कमा । सठाणे उ जहन्नं अजहन्नुक्कोसमियरासिं ॥ ८२ ॥

सव त्ति—ये सर्वविशुद्धा जन्तवस्ते परावर्तमानशुभप्रकृतीना चतुःस्थानगतं रसं बध्नन्ति । ये पुनर्मध्यमपरिणामास्ते त्रिस्थानगतं रसं बध्नन्ति । संक्लिष्टतरपरिणामास्तु द्विस्थानगतं । ये पुनस्तद्योग्यक्रमिकानुसारेण सर्वविशुद्धाः परावर्तमाना अशुभप्रकृतीर्बध्नन्ति ते तासां द्विस्थानगतं रसं निवर्तयन्ति । मध्यमपरिणामास्त्रिस्थानगतं । संक्लिष्टतरपरिणामास्तु चतुःस्थानगतं । 'धुवपगईत्यादि' ये सर्वविशुद्धाः शुभप्रकृतीनां चतुःस्थानगतं रसं बध्नन्ति, ते ध्रुवप्रकृतीनां जघन्यां स्थितिं निवर्तयन्ति । 'तिठाणे' इति षष्ठ्यर्थे सप्तमी, परावर्तमानशुभप्रकृतीनां त्रिस्थानगतस्य रसस्य ये बन्धकास्ते ध्रुवप्रकृतीनामजघन्यां मध्यमा स्थितिं बध्नन्ति । द्विस्थानगतस्य रसस्य ये बन्धकास्ते ध्रुवप्रकृतीनां ज्येष्ठामुत्कृष्टां स्थितिं बध्नन्ति । तथा इतरासां परावर्तमानाशुभप्रकृतीनां ये द्विस्थानगतं रसं बध्नन्ति, ते ध्रुवप्रकृतीना जघन्यां स्थितिं स्वस्थाने स्वविशुद्धिक्रमिकानुसारेणेत्यर्थः, बध्नन्ति, परावर्तमानाशुभप्रकृतिसत्कद्विस्थानगतरसबन्धहेतुविशुद्ध्यनुसारेण

जघन्यां स्थितिं बध्नन्ति, न त्वतिजघन्यामित्यर्थः । जघन्यस्थितिबन्धो हि ध्रुवप्रकृतीनामेकान्तविशुद्धौ संभवति, न च तदानीं परावर्तमानाशुभप्रकृतीनां बन्धाः संभवन्ति । ये पुनः परावर्तमानाशुभप्रकृतीनां त्रिस्थानगतस्य रसस्य बन्धकाले ध्रुवप्रकृतीनामजघन्या स्थितिं बध्नन्ति । तथा ये परावर्तमानाशुभप्रकृतीनां चतुःस्थानगतं रसं बध्नन्ति ते ध्रुवप्रकृतीनामुत्कृष्टां स्थितिं निवर्तयन्ति ॥ ८१ ॥ ८२ ॥

इह द्विधा प्ररूपणा—अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया प्ररूपणामाह—

थोवा जहन्नियाए होंति विसेसाहिउदहिसयाइं । जीवा विसेसहीणा उदहिसयपुहुत्त मो जाव ॥८३॥

थोव त्ति—परावर्तमानानां शुभप्रकृतीनां चतुःस्थानगतरसबन्धकाः सन्तो ज्ञानावरणीयादीना ध्रुवप्रकृतीनां जघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । द्वितीयस्या स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्या स्थितौ विशेषाधिकाः । एवं तावद्विशेषाधिका वक्तव्या यावत्प्रभूतानि सागरोपमशतान्यतिक्रान्तानि भवन्ति । ततः परं विशेषहीनास्तावद्वक्तव्या यावद्विशेषहानावपि 'उदहिसयपुहुत्तं ति' प्रभूतानि सागरोपमशतानि भवन्ति । 'मो' इति पादपूरणे । पृथक्त्वशब्दोऽत्र बहुत्ववाची । यदाह चूर्णिकृत्—"पुहुत्तसद्दो बहुत्तवाचीति' । इति ॥ ८३ ॥

एवं तिट्ठाणकरा विट्ठाणकरा य आ सुभुक्कोसा । असुभाणं विट्ठाणे तिचउट्ठाणे य उक्कोसा ॥८४॥

एवं ति—परावर्तमानानां शुभप्रकृतीनां त्रिस्थानगतं रसं निवर्तयन्तः सन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां स्थितौ विशेषाधिकाः ।

एवं तावद्वाच्यं यावत्प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वक्तव्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतानि गच्छन्ति । तथा परावर्तमानाशुभप्रकृतीनां द्विस्थानगतं रसं निवर्तयन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां विशेषाधिकाः । एवं तावद्वाच्यं यावत्प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । ततः परं विशेषहीनास्तावद्वक्तव्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतानि प्रयान्ति । परावर्तमानाशुभप्रकृतीनां च द्विस्थानगतरसबन्धका एवं तावद्वक्तव्या यावत्तासां परावर्तमानशुभप्रकृतीनामुत्कृष्टा स्थितिः उत्कृष्टस्थितिगतद्विस्थानरसबन्धका इत्यर्थः, 'असुभाणमित्यादि' अशुभपरावर्तमानप्रकृतीनां प्राग्दर्शितक्रमेण प्रथमतो द्विस्थानगतरसबन्धका वक्तव्याः । ततस्त्रिस्थानगतरसबन्धका वक्तव्याः । ततश्चतुःस्थानगतरसबन्धकाः । ते च तावद्वक्तव्या यावदुत्कृष्टा स्थितिः । इयमत्र भावना—अशुभपरावर्तमानप्रकृतीनां जघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां स्थितौ विशेषाधिकाः । एवं विशेषाधिका विशेषाधिकास्तावद्वक्तव्या यावत्प्रभूतानि सागरोपमशतानि गच्छन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वक्तव्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतानि यान्ति । अशुभपरावर्तमानप्रकृतीनां त्रिस्थानगतरसबन्धकाः सन्तो ध्रुवप्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । एवं प्रागिव तावद्वाच्यं यावद्विशेषहानावपि प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । तथाऽशुभपरावर्तमानप्रकृतीनां चतुःस्थानगतरसबन्धकाः सन्तो ध्रुव-

प्रकृतीनां स्वप्रायोग्यजघन्यस्थितौ बन्धकत्वेन वर्तमाना जीवाः स्तोकाः । ततो द्वितीयस्यां स्थितौ विशेषाधिकाः । ततोऽपि तृतीयस्यां स्थितौ विशेषाधिकाः । एवं तावद्वाच्यं यावच्छतपृथक्त्वानि सागरोपमशतानि गच्छन्ति । ततः परं विशेषहीना विशेषहीनास्तावद्वक्तव्या यावद्विशेषहानावपि प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । अशुभपरावर्तमानप्रकृतीनां च चतुःस्थानगतरसबन्धका एवं विशेषहीना विशेषहीनास्तावद्वक्तव्या यावत्तासामशुभपरावर्तमानप्रकृतीनामुत्कृष्टा स्थितिर्भवति, उत्कृष्टस्थितिगतचतुःस्थानकरसबन्धका इत्यर्थः ॥ ८४ ॥

तदेवं कृताऽनन्तरोपनिधया प्ररूपणा, संप्रति परंपरोपनिधया तामाह—

पल्लासंखियमूलानि गंतुं दुगुणा य दुगुणहीणा य । नाणंतराणि पल्लस्स मूलभागो असंखतमो॥८५॥

पल्ल त्ति—परावर्तमानशुभप्रकृतीनां चतुःस्थानगतरसबन्धका ध्रुवप्रकृतीनां जघन्यस्थितौ बन्धकत्वेन वर्तमाना ये जीवास्तदपेक्षया जघन्यस्थितेः परतः पल्योपमस्यासंख्येयानि वर्गमूलानि पल्योपमस्यासंख्येयेषु वर्गमूलेषु यावन्तः समयास्तावत्प्रमाणाः स्थितीरतिक्रम्यापरस्मिन् स्थितिस्थाने वर्तमाना जीवा द्विगुणा भवन्ति । ततः पुनरपि पल्योपमासंख्येयवर्गमूलप्रमाणाः स्थितीरतिक्रम्यानन्तरे स्थितिस्थाने द्विगुणा भवन्ति । एवं द्विगुणास्तावद्वक्तव्या यावत्प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । ततः परं पल्योपमासंख्येयवर्गमूलप्रमाणाः स्थितीरतिक्रम्यापरस्मिन् स्थितिस्थाने विशेषवृद्धिगतचरमस्थितौ बन्धकत्वेन वर्तमाना ये जीवास्तदपेक्षया द्विगुणहीना भवन्ति अर्धा भवन्तीत्यर्थः । ततः पुनरपि पल्योपमासंख्येयवर्गमूलप्रमाणाः स्थितीरतिक्रम्यापरस्मिन् स्थितिस्थानेऽर्धा भवन्ति । एवं तावद्वाच्यं यावद्द्विगुणहानावपि

प्रभूतानि सागरोपमशतान्यतिक्रामन्ति । एवं परावर्तमानशुभप्रकृतीनां त्रिस्थानरसबन्धका द्विस्थानगतरसबन्धकाश्च, अशुभपरावर्तमानप्रकृतीनां तु द्विस्थानरसबन्धकास्त्रिस्थानरसबन्धकाश्चतुःस्थानरसबन्धकाश्च वक्तव्याः । एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा स्थितिस्थानानि पल्योपमस्यासंख्येयानि वर्गमूलानि पल्योपमस्यासंख्येयेषु वर्गमूलेषु यावन्तः समयास्तावत्प्रमाणानीत्यर्थः । नानान्तराणि नानाल्पद्विगुणवृद्धिद्विगुणहानि(लक्षणानि)स्थानानि पल्योपमस्य संबन्धिनः । प्रथमवर्गमूलस्यासंख्येयतमे भागे यावन्तः समयास्तावत्प्रमाणानि भवन्ति । नानाद्विगुणवृद्धिद्विगुणहानिस्थानानि स्तोकानि । एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा स्थितिस्थानानि असंख्येयगुणानि ॥ ९५ ॥

अणगारप्पाउग्गा बिठाणगया उ दुविहपगडीणं । सागारा सव्वठ वि हिठा थोवाणि जवमज्झा ॥ ९६ ॥
ठाणाणि चउठाणा संखेज्जगुणाणि उवरिमेवं ति(एवं) । तिठाणे बिठाणे सुभाणि एगंतमीसाणि ॥९७॥
उवरिं मिस्साणि जहन्नगो सुभाणं तउ विसेसहिउ । होइ सुभाण जहन्नो संखेज्जगुणाणि ठाणाणि॥९८॥
बिठाणे जवमज्झा हेठा एगंत मीसगाणुवरिं । एवं तिचउठाणे जवमज्झाउ य डायठिई ॥ ९९ ॥
अंतो कोडाकोडी सुभबिठाण जवमज्झउ उवरिं । एगंतगा विसिठा सुभजिठा डायठिइजेठा ॥ १०० ॥

अणगार त्ति–द्विविधानामपि शुभानामशुभानां च परावर्तमानप्रकृतीनां रसा अनाकारप्रायोग्याः बन्धं प्रत्यनाकारोपयोगयोग्या बन्धमधिकृत्य तथाविधमन्दपरिणामयोग्या इत्यर्थः । नियमात् द्विस्थानगता एव नान्ये । तुरेवकारार्थः ।

उक्तं च–"तुः स्याद्भेदेऽवधारणे"। साकाराः साकारोपयोगयोग्या बन्धमधिकृत्य तीव्रपरिणामयोग्याः। पुनः सर्वत्रापि द्विस्थानादौ प्राप्यन्ते द्विस्थानगतास्त्रिस्थानगताश्चतुःस्थानगताश्च रसा बन्धमाश्रित्य साकारोपयोगयोग्या भवन्तीत्यर्थः। इदानीं सर्वस्थितिस्थानानामल्पबहुत्वमाह–'हिट्ठा थोवाणीत्यादि'परावर्तमानशुभप्रकृतीनां चतुःस्थानकरसयवमध्यादधः स्थितिस्थानानि सर्वस्तोकानि। तेभ्यश्चतुःस्थानकरसयवमध्यस्यैवोपरि स्थितिस्थानानि संख्येयगुणानि। तेभ्योऽपि परावर्तमानशुभप्रकृतीना त्रिस्थानकरसयवमध्यादधः स्थितिस्थानानि संख्येयगुणानि। तेभ्योऽपि त्रिस्थानकरसयवमध्यस्योपरि स्थितिस्थानानि संख्येयगुणानि। 'एवं तिठाणे त्ति' एवं संख्येयगुणतयाऽध उपरि च त्रिस्थानेऽपि रसे स्थितिस्थानानि वक्तव्यानीत्यर्थः। तेभ्योऽपि परावर्तमानशुभप्रकृतीनां द्विस्थानकरसयवमध्यादधः स्थितिस्थानानि एकान्तसाकारोपयोगयोग्यानि संख्येयगुणानि। तेभ्योऽपि द्विस्थानकरसयवमध्यादधः पाश्चात्येभ्य ऊर्ध्वं स्थितिस्थानानि मिश्राणि साकारानाकारोपयोगयोग्यानि संख्येयगुणानि। तेभ्योऽपि द्विस्थानकरसयवमध्यस्योपरि मिश्राणि स्थितिस्थानानि संख्येयगुणानि। तेभ्योऽपि शुभानां परावर्तमानप्रकृतीनां जघन्यः स्थितिबन्धः संख्येयगुणः। ततोऽप्यशुभपरावर्तमानप्रकृतीना जघन्यः स्थितिबन्धो विशेषाधिकः। ततोऽप्यशुभपरावर्तमानप्रकृतीनामेव द्विस्थानकरसयवमध्यादध एकान्तसाकारोपयोगयोग्यानि स्थितिस्थानानि संख्येयगुणानि। ततस्तासामेव परावर्तमानाशुभप्रकृतीनां द्विस्थानकरसयवमध्यादधः पाश्चात्येभ्य ऊर्ध्वं मिश्राणि स्थितिस्थानानि संख्येयगुणानि। तेभ्योऽपि तासामेवाशुभपरावर्तमानप्रकृतीनां द्विस्थानकरसयवमध्यादुपरि स्थितिस्थानानि मिश्राणि संख्येयगुणानि। तेभ्योऽप्युपरि एकान्तसाकारोपयोगयोग्यानि स्थितिस्था-

नानि संख्येयगुणानि । तेभ्योऽपि तासामेव परावर्तमानाशुभप्रकृतीना त्रिस्थानकरसयवमध्यादधः स्थितिस्थानानि संख्येयगुणानि । तेभ्योऽपि त्रिस्थानकरसयवमध्यस्योपरि स्थितिस्थानानि संख्येयगुणानि । तेभ्योऽप्यशुभपरावर्तमानप्रकृतीनामेव चतुःस्थानकरसयवमध्यादधः स्थितिस्थानानि संख्येयगुणानि । तेभ्योऽपि यवमध्यादुपरि डायस्थितिः संख्येयगुणा । यतः स्थितिस्थानादपवर्तनाकरणवशेनोत्कृष्टा स्थितिं याति तावती स्थितिर्डायस्थितिरित्युच्यते । ततोऽपि सागरोपमाणामन्तःकोटीकोटीसंख्येयगुणा । ततोऽपि परावर्तमानशुभप्रकृतीनां द्विस्थानकरसयवमध्यस्योपरि यानि मिश्राणि स्थितिस्थानानि तेषामुपर्येकान्तसाकारोपयोगयोग्यानि स्थितिस्थानानि संख्येयगुणानि । तेभ्योऽपि परावर्तमानशुभप्रकृतीनामुत्कृष्टः स्थितिबन्धो विशेषाधिकः । ततोऽप्यशुभपरावर्तमानप्रकृतीनां बद्धा डायस्थितिर्विशेषाधिका । यतः स्थितिस्थानात् मांडूकप्लुतिन्यायेन डायां फालां दत्वा या स्थितिर्बध्यते ततः प्रभृति तदन्ता तावती स्थितिर्बद्धा डायस्थितिरिहोच्यते । सा चोत्कर्षतोऽन्तःसागरोपमकोटीकोट्यूना सकलकर्मस्थितिप्रमाणा वेदितव्या । तथाहि—अन्तःसागरोपमकोटीकोटीप्रमाणं स्थितिबन्धं कृत्वा पर्याप्तसंज्ञिपञ्चेन्द्रिय उत्कृष्टां स्थितिं बध्नातीति नान्यथा । ततोऽपि परावर्तमानाशुभप्रकृतीनामुत्कृष्टः स्थितिबन्धो विशेषाधिक इति ॥

संप्रत्यस्मिन् विषये जीवानामल्पबहुत्वमाह—

संखेज्जगुणा जीवा कमसो एएसु दुविहपगईणं । असुभाणं तिठाणे सव्वुवरि विसेसउ अहिया ॥१०१॥

संखेज त्ति—सर्वस्तोकाः परावर्तमानशुभप्रकृतीनां चतुःस्थानकरसबन्धका जीवाः । तेभ्योऽपि त्रिस्थानकरसबन्धकाः

संख्येयगुणाः । तेभ्योऽपि द्विस्थानकरसबन्धकाः संख्येयगुणाः । तेभ्योऽपि परावर्तमानाशुभप्रकृतीनां द्विस्थानकरसब-
न्धकाः संख्येयगुणाः । तेभ्योऽपि चतुःस्थानकरसबन्धकाः संख्येयगुणाः । तेभ्योऽपि त्रिस्थानकरसबन्धका विशेषा-
धिकाः । तथा चाह–'असुभाणमित्यादि' अशुभानामशुभप्रकृतीनां त्रिस्थाने त्रिस्थानकस्य रसस्य बन्धकाः सर्वेषा-
मुपरि विशेषाधिका वक्तव्याः ॥ ॥

एवं बंधणकरणे परूविए सह हि बंधसयगेणं । बंधविहाणाहिगमो सुहमभिगंतुं लहुं होइ ॥ १०२ ॥

। बंधकरणं सम्मत्तं ।

एवं ति–एवमुक्तप्रकारेणास्मिन् बन्धनकरणे बन्धशतकेन बन्धशतकाख्येन ग्रन्थेन सह प्ररूपिते सति । एतेन शिव-
शतककर्मप्रकृत्योरेककर्तृकता आवेदिता द्रष्टव्या । बन्धविधानस्य पूर्वगतस्य सुखमधिगन्तुं सुखेन ज्ञातुमिच्छतस्त्वा-
धिगमोऽवबोधो लघु शीघ्रं भवति ॥ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायां बन्धनकरणम् ॥

---

१ अत्रापि लिखितेयं गाथाद्विकव्याख्या व्याख्यानार्थं ।

तदेवमुक्तं बन्धनकरणं । संप्रत्युद्देशक्रमेण वक्तुमनसरप्राप्तं संक्रमकरणं । संक्रमश्च प्रकृतिस्थित्यनुभागप्रदेशरूपविषयभेदाच्चतुर्विधः । तत्र प्रथमतः संक्रमस्य सामान्यलक्षणमभिधातुकाम आह–

सो संकमो त्ति वुच्चइ जं बंधणपरिणओ पओगेणं । पगयंतरत्थदलियं परिणमयइ तयणुभावे जं ॥ १ ॥

सो संकमु त्ति–इह जीवो यद्बन्धनपरिणतो यस्याः प्रकृतेर्बन्धनेन बन्धकत्वेन परिणतः । अनेन किलेदमावेद्यते–यदि जीवस्तथारूपबन्धनपरिणामपरिणतो भवति ततः कर्मवर्गणापुद्गला अपि कर्मरूपतया परिणमन्ते, नान्यथा । उक्तं च–"जीवपरिणामहेऊ कम्मत्ता पुग्गला परिणमंति । पोग्गलकम्मनिमित्तं जीवो वि तहेव परिणमइ ॥ १ ॥" अस्या अक्षरगमनिका–जीवस्य सत्कात् परिणामादध्यवसायाद्धेतोः, जीवपरिणामं हेतुमाश्रित्येत्यर्थः । कर्मवर्गणान्तःपातिनो जीवस्वप्रदेशावगाढाः पुद्गलाः कर्मरूपतया ज्ञानावरणीयादिकर्मरूपतया परिणमन्ते । अथ जीवस्यापि तथारूपः परिणामः कस्माद्भवतीति चेदुच्यते–'पुग्गलेत्यादि' पुद्गलरूपं प्राग्बद्धं कर्म विपाकोदयप्राप्तं तन्निमित्तं तत्सामर्थ्यादिति भावः । जीवोऽपि तथैव प्रदेशावगाढकर्मवर्गणान्तःपातिपुद्गलकर्मरूपतापत्तिहेतुतयैव परिणमत इति ॥ 'पओगेणं ति' प्रयोगेण संक्लेशसंज्ञितेन विशोधिसंज्ञितेन वा वीर्यविशेषेण । विवक्षितायाः प्रकृतेरन्या प्रकृतिः प्रकृत्यन्तरं विवक्षितबध्यमानप्रकृतिव्यतिरिक्ताऽन्या प्रकृतिरित्यर्थः । तत्रस्थं दलिकं तदनुभावेन बध्यमानप्रकृतिस्वभावेन यत्परिणमयति परिणमनमापादयति स संक्रम उच्यते । एतदुक्तं भवति–बध्यमानासु प्रकृतिषु मध्येऽबध्यमानप्रकृतिदलिकं प्रक्षिप्य बध्यमानप्रकृतिरूपतया यत्तस्य परिणमनं, यच्च वा बध्यमानानां प्रकृतीनां दलिकरूपस्येतरेतररूपतया परिणमनं तत्सर्वं संक्रमणमि-

त्युच्यते। तत्र बध्यमानप्रकृतिष्वबध्यमानप्रकृतीनां संक्रमो यथा—सातवेदनीये बध्यमानेऽसातवेदनीयस्य, उच्चैर्गोत्रे वा नीचैर्गोत्रस्येत्यादि। बध्यमानानां परस्परं संक्रमो यथा—बध्यमाने मतिज्ञानावरणीये बध्यमानमेव श्रुतज्ञानावरणं संक्रमयति, श्रुतज्ञानावरणे वा बध्यमाने बध्यमानमेव मतिज्ञानावरणीयमित्यादि। उक्तं यत्प्रकृतिबन्धकत्वेन परिणत आत्मा तदनुभावेन प्रकृत्यन्तरस्थं दलिकं यत्परिणमयति स संक्रम उच्यते ॥ १ ॥

एतच्च लक्षणं दर्शनत्रिकव्यतिरेकेणान्यत्र द्रष्टव्यं, दर्शनत्रिके पुनर्बन्धं विनापि संक्रमोऽवगन्तव्यः। तथा चाह—

दुसु वेगे दिट्ठिदुगं बंधेण विणा वि सुद्धदिट्ठिस्स। परिणामइ जीसे तं पगईए पडिग्गहो एसा ॥ २ ॥

दुसु त्ति—शुद्धदृष्टेः सम्यग्दृष्टेर्द्वयोः सम्यक्त्वसम्यग्मिथ्यात्वयोराधारभूतयोर्मिथ्यात्वं, एकस्मिंश्च सम्यक्त्वे सम्यग्मिथ्यात्वं बन्धं विनापि संक्रामति। इयमत्र भावना—इह मिथ्यात्वस्यैव बन्धो न सम्यक्त्वसम्यग्मिथ्यात्वयोः। यतो मिथ्यात्वपुद्गला एव मदनकोद्रवस्थानीया औषधविशेषकल्पेनौपशमिकसम्यक्त्वानुगतेन विशोधिस्थानेन त्रिधा क्रियन्ते, तद्यथा—शुद्धा अर्धविशुद्धा अविशुद्धाश्च। तत्र विशुद्धाः सम्यक्त्वं, अर्धविशुद्धाः सम्यग्मिथ्यात्वं, अविशुद्धा मिथ्यात्वं। तत्र विशुद्धसम्यग्दृष्टिः सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धं विनापि तत्र मिथ्यात्वं संक्रमयति, सम्यग्मिथ्यात्वं च सम्यक्त्वे इति। तदेवमुक्तं संक्रमस्य सामान्यलक्षणं, सम्प्रति यासु प्रकृतिषु प्रकृत्यन्तरस्थं दलिकं संक्रमयति तासां संज्ञान्तरमाह—'परिणामेत्यादि' यस्यां प्रकृतौ आधारभूतायां तत्प्रकृत्यन्तरस्थं दलिकं परिणमयति स्वस्वरूपतामापादयति एषा प्रकृतिराधारभूता पतद्ग्रह उच्यते। पतद्ग्रह इव पतद्ग्रहः संक्रम्यमाणप्रकृत्याधार इत्यर्थः ॥ २ ॥

संक्रमलक्षणं च प्रागुक्तमतिप्रसक्तमिति तत्रापवादमाह—

मोहदुगाउगमूलपगडीण न परोप्परंमि संकमणं । संकमबंधुदउव्वट्टणा(णत्त)लिगाइणकरणाइं ॥ ३ ॥

मोह त्ति–मोहद्विकं दर्शनमोहनीयं चारित्रमोहनीयं च, तयोः परस्परं संक्रमो न भवति । तथाहि–न दर्शनमोहनीयं
चारित्रमोहनीये संक्रमयति, चारित्रमोहनीयं वा दर्शनमोहनीये । तथा आयूंषि चत्वार्यपि न परस्परं संक्रमयति, नापि
मूलप्रकृतीः परस्परं संक्रमयति । तथाहि–न ज्ञानावरणीये दर्शनावरणीयं संक्रमयति, नापि दर्शनावरणीये ज्ञानावर-
णीयं । एवं सर्वास्वपि मूलप्रकृतिषु भावनीयं । अपि च यस्मिन् दर्शनमोहनीये यो जन्तुरवतिष्ठते, स तदन्यत्र न संक्र-
मयति । यथा मिथ्यादृष्टिर्मिथ्यात्वं, सम्यग्मिथ्यादृष्टिः सम्यग्मिथ्यात्वं, सम्यग्दृष्टिः सम्यक्त्वं, तथा सासादनाः सम्य-
ग्मिथ्यादृष्टयश्च न किमपि दर्शनमोहनीयं क्वापि संक्रमयन्ति, अविशुद्धदृष्टित्वात् । बन्धाभावे हि दर्शनमोहनीयस्य
संक्रमो विशुद्धदृष्टेरेव भवति, नाविशुद्धदृष्टेः । अन्यच्च परप्रकृतिसंक्रान्तं दलिकमावलिकामात्रं कालं यावदुद्वर्तनादि-
सकलकरणायोग्यमवगन्तव्यं, न केवलं संक्रान्तमपि तु बन्धाद्यावलिकागतमपि । तथा चाह–'संकमेत्यादि' संक्रमाव-
लिकागतं, बन्धावलिकागतं, उदयावलिकागतं, उद्वर्तनावलिकागतं, आदिशब्दादुपशान्तं मोहनीयं दर्शनमोहनीयत्रि-
करहितमित्येतानि सर्वाण्यप्यकरणानि सकलकरणायोग्यान्यवसेयानि । दर्शनत्रिकं तूपशान्तमपि संक्रमयति ॥ ३ ॥

तदेवं लक्षणापवादोऽभिहितः । संप्रति क्रमेणोत्क्रमेण वाऽविशेषण(षेण)संक्रमे प्राप्ते सति नियममाह–

अंतरकरणम्मि कए चरित्तमोहे णुपुव्विसंकमणं । अन्नत्थ सेसिगाणं च सव्वहिं सव्वहा बंधे ॥ ४ ॥

अंतरकरणंमि त्ति–अन्तरकरणविधिरग्रे उपशमनाकरणाभिधानावसरे प्रतिपादयिष्यते । तत्रोपशमश्रेण्यां चारित्रमोहनीयोपशमनार्थमेकविंशतेः प्रकृतीनां, क्षपकश्रेण्यां पुनः कषायाष्टकक्षपणानन्तरं त्रयोदशप्रकृतीनामन्तरकरणे कृते सति, चारित्रमोहे पुरुषवेदसंज्वलनचतुष्टयग्रहणे । अत्र हि चारित्रमोहनीयग्रहणेनैता एव पञ्च प्रकृतयो गृह्यन्ते, न शेषाः । बन्धाभावात् । तत्रानुपूर्वीपरिपाट्या संक्रमणं भवति, न त्वनानुपूर्व्या । तथाहि–पुरुषवेदं संज्वलनक्रोधादावेव संक्रमयति, नान्यत्र । संज्वलनक्रोधमपि संज्वलनमानादावेव, न तु पुरुषवेदे । संज्वलनमानमपि संज्वलनमायादावेव, न तु संज्वलनक्रोधादौ । संज्वलनमायामपि संज्वलनलोभे एव, न तु संज्वलनमानादाविति । 'अन्नत्थ त्ति' अन्तरकरणादन्यत्र पञ्चानामपि पुरुषवेदादिप्रकृतीनां शेषाणां पुनः प्रकृतीना । 'सव्वहिं त्ति' सर्वस्मिन्नप्यवस्थाविशेषेऽन्तरकरणावस्थायामन्यत्र वा इत्यर्थः । सर्वैः प्रकारैः क्रमेणोत्क्रमेण वा संक्रमोऽवगन्तव्यः । किं सर्वदैव ? नेत्याह–बन्धे बन्धकाले, न त्वन्यदा यथोक्तं प्राक् ॥ ४ ॥

तदेवं संक्रमस्य सामान्यलक्षणविधिरपवादो नियमश्चोक्तः । संप्रति यदुक्तं यस्याः प्रकृतेर्बन्धः सा प्रकृत्यन्तरदलिकसंक्रमणं प्रति पतद्ग्रह इति तत्रापवादमाह—

तिसु आवलियासु समऊणियासु अपडिग्गहा उ संजलणा ।
दुसु आवलियासु पढमठिईए सेसासु वि य वेदो ॥ ५ ॥

तिसु त्ति–अन्तरकरणे कृते प्रथमस्थितौ तिसृष्वावलिकासु समयोनासु सतीषु सत्स्वपि संज्वलना अपतद्ग्रहाः,

पतद्ग्रहा न भवन्ति । एतदुक्तं भवति–चतुर्ष्वपि संज्वलनेषु प्रथमस्थितौ तिसृष्वावलिकासु समयोनास्वावलिकात्रिकशेषायां सत्यां बध्यमानेष्वपि नान्यत्प्रकृत्यन्तरदलिकं तेषु संक्रामति, तेन तदानीमपतद्ग्रहा[1] । तथाऽन्तरकरणे कृते सति द्व्यावलिकयोः प्रथमस्थितिसत्कयोः समयोनयोः सत्योर्वेदः पुरुषवेदः पतद्ग्रहो न भवति, न किमपि तत्र प्रकृत्यन्तरदलिकं संक्रामतीत्यर्थः । वेदश्चेह पुरुषवेद एव द्रष्टव्यः, न स्त्रीनपुंसकवेदौ, तदानीं तयोर्बन्धाभावादेवापतद्ग्रहत्वसिद्धेः । अपि च मिथ्यात्वे क्षपिते सति सम्यग्मिथ्यात्वस्य मिथ्यात्वसम्यग्मिथ्यात्वयोश्च क्षपितयोः सम्यक्त्वस्योद्वलितयोस्तु सम्यक्त्वसम्यग्मिथ्यात्वयोर्मिथ्यात्वस्यापतद्ग्रहताऽनुक्तापि द्रष्टव्या, न खलु तत्रापि किंचित् संक्रामतीति ॥ ५ ॥

संप्रति साद्यनादिप्ररूपणामाह—

साइअणाईधुवअधुवा य सव्वधुवसंतकम्माणं । साइअधुवा य सेसा मिच्छावेयणीयनीएहिं ॥ ६ ॥

साइ त्ति—सम्यक्त्वसम्यग्मिथ्यात्वनरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकतीर्थकरोच्चैर्गोत्ररूपाश्चतुर्विंशतिप्रकृतयोऽध्रुवसत्कर्माणि आयुश्चतुष्टयं च । शेषं पुनस्त्रिंशदुत्तरं प्रकृतिशतं ध्रुवसत्कर्म । ततोऽपि सातासातवेदनीयनीचैर्गोत्रमिथ्यात्वरूपं चतुष्टयमपनीयते । ततः शेषस्य षड्विंशत्युत्तरप्रकृतिशतस्य साद्यादिरूपतया चतुर्विधोऽपि संक्रमो भवति । तथाहि–अमूषां ध्रुवसत्प्रकृतीनां संक्रमविषयप्रकृतिबन्धव्यवच्छेदे सति संक्रमो न भवति । ततः पुनरपि तासां संक्रमविषयप्रकृतीनां स्वबन्धहेतुसंपर्कतो बन्धारम्भे सति भवति, ततोऽसौ सादिः, तत्तद्बन्धव्यवच्छेदस्थानमप्राप्तस्य पुन-

---

१ सत्ताका ।

[illegible] ॥ २ ॥

[illegible]—

मिच्छत्तजडा य परिग्गहम्मि [illegible] । [illegible] साहू [illegible] ॥ ३ ॥

[illegible] ॥ ३ ॥

तदेवमेकैकप्रकृतीनां संक्रमस्य पतद्ग्रहत्वस्य च साद्यनादिप्ररूपणा कृता । संप्रति प्रकृतिस्थानेषु तां चिकीर्षुरतिदेशमाह—

पगईठाणे वि तहा पडिग्गहो संकमो य बोधव्वो । पढमंतिमपगईणं पंचसु पंचण्ह दो वि भवे ॥ ८ ॥

पगईठाणे त्ति—यथैकैकस्याः प्रकृतेः पतद्ग्रहत्वं संक्रमश्च साद्यादिरूप उक्तस्तथा प्रकृतिस्थानेष्वपि बोद्धव्यः । द्व्यादीनां च प्रकृतीनां समुदायः प्रकृतिस्थानं । तत्र प्रथमतो ज्ञानावरणीयस्य तत्समानवक्तव्यत्वादन्तरायस्य च संक्रमपतद्ग्रहत्वात् स्थानप्रतिपादनार्थमाह—'पढमंतिमेत्यादि' प्रथमप्रकृतेर्ज्ञानावरणीयस्य अन्तिमप्रकृतेरन्तरायस्य संबन्धिनीनां प्रत्येकं पञ्चानामपि प्रकृतीनां पञ्चस्वपि प्रकृतिषु द्वावपि संक्रमपतद्ग्रहभावौ भवतः । एतदुक्तं भवति—ज्ञानावरणीयान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं संक्रमे पतद्ग्रहभावे च भवतीति । तौ चेमौ संक्रमपतद्ग्रहभावौ साद्यादिरूपतया चतुःप्रकारौ । तथाहि—उपशान्तमोहगुणस्थानके तयोरभावात्, ततः प्रतिपाते न पुनः संभवात् सादी, तत्स्थानमप्राप्तस्य पुनरनादी, ध्रुवाध्रुवता चाभव्यभव्यापेक्षया भावनीया ॥ ८ ॥

संप्रति दर्शनावरणीयस्य संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—

नवगछक्कचउक्के नवगं छक्कं च चउसु बिइयम्मि । अन्नयरस्सिं(स्से)अन्नयरा वि य वेयणीयगोएसु ॥ ९ ॥

नवग त्ति—द्वितीये दर्शनावरणीये नवकषट्कचतुष्केषु नवकं संक्रामति, षट्कं च चतसृषु प्रकृतिषु । तेनेह द्वे संक्रमस्थाने । तद्यथा—नवकं, षट्कं च । त्रीणि पतद्ग्रहस्थानानि, तद्यथा—नवकं षट्कं चतुष्कं च । तत्र नवकरूपे पतद्ग्रहे मिथ्या-

दृष्टयः सासादनाश्च नवविधदर्शनावरणीयबन्धका नवकमपि संक्रमयन्ति । अयं च नवकरूपः पतद्ग्रहः साद्यादिरूपतया चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—सम्यग्मिथ्यादृष्ट्यादिगुणस्थानेषु न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तद्स्थानकमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । तथा सम्यग्मिथ्यादृष्टिगुणस्थानकादारभ्यापूर्वकरणस्यासंख्येयतमं भागं यावन्नवविधदर्शनावरणीयसत्कर्माणः षड्विधदर्शनावरणीयबन्धकाः षट्के नवकं संक्रमयन्ति । अयं तु षट्करूपः पतद्ग्रहः साद्यध्रुवः, कादाचित्कत्वात् । तथाऽपूर्वकरणस्य संख्येयतमे भागे निद्राप्रचलयोर्बन्धव्यवच्छेदे तत ऊर्ध्वं सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावदुपशमश्रेण्यां नवविधदर्शनावरणीयसत्कर्माणश्चतुर्विधदर्शनावरणीयबन्धकाश्चतुष्के नवकं संक्रमयन्ति । अयमपि च चतुष्करूपः पतद्ग्रहः साद्यध्रुवः, कदाचिद्भावात् । नवकरूपः संक्रमश्चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि-सूक्ष्मसंपरायात्परत उपशान्तमोहे न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । क्षपकश्रेण्यां पुनरनिवृत्तिकरणाद्धायाः संख्येयतमे भागेऽवशिष्टे सति स्त्यानर्द्धित्रिकक्षयात् परतः सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावत् षड्विधदर्शनावरणीयसत्कर्माणश्चक्षुरादिदर्शनावरणीयचतुष्टयं बध्नन्तस्तस्मिन् दर्शनावरणचतुष्के षट्कं संक्रमयन्ति । इमावपि संक्रमपतद्ग्रहौ साद्यध्रुवौ, कादाचित्कत्वात् । अतः परं तु न संक्रमो नापि पतद्ग्रहत्वमिति । संप्रति वेदनीयगोत्रयोः संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—'अन्नयरस्से इत्यादि' वेदनीये गोत्रे चान्यतरस्यां प्रकृतौ बध्यमानायामन्यतराऽबध्यमाना प्रकृतिः संक्रामति । तेन या यत्र संक्रामति सा तस्याः पतद्ग्रहः । इतरा च संक्रमस्थानं । तत्र सातबन्धकानां

तदेवमेकैकप्रकृतीनां संक्रमस्य पतद्ग्रहत्वस्य च साद्यनादिप्ररूपणा कृता । संप्रति प्रकृतिस्थानेषु तां निर्दिदिक्षुरतिदेशमाह—

पगईठाणे वि तहा पडिग्गहो संकमो य बोधव्वो। पढमंतिमपगईणं पंचसु पंचण्ह दो वि भवे ॥ ८ ॥

पगईठाणे त्ति—यथैकैकस्याः प्रकृतेः पतद्ग्रहत्वं संक्रमश्च साद्यादिरूप उक्तस्तथा प्रकृतिस्थानेष्वपि बोद्धव्यः। द्वित्र्यादीनां च प्रकृतीनां समुदायः प्रकृतिस्थानं । तत्र प्रथमतो ज्ञानावरणीयस्य तत्समानवक्तव्यत्वादन्तरायस्य च संक्रमपतद्ग्रहत्वात् स्थानप्रतिपादनार्थमाह—'पढमंतिमेत्यादि' प्रथमप्रकृतेर्ज्ञानावरणीयस्य अन्तिमप्रकृतेरन्तरायस्य संबन्धिनीनां प्रत्येकं पञ्चानामपि प्रकृतीनां पञ्चस्वपि प्रकृतिषु द्वावपि संक्रमपतद्ग्रहभावौ भवतः। एतदुक्तं भवति—ज्ञानावरणीयान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं संक्रमे पतद्ग्रहभावे च भवतीति। तौ चेमौ संक्रमपतद्ग्रहभावौ साद्यादिरूपतया चतुष्प्रकारौ । तथाहि—उपशान्तमोहगुणस्थानके तयोरभावात्, ततः प्रतिपाते च पुनः सद्भावात् सादी, तत्स्थानमप्राप्तस्य पुनरनादी, ध्रुवाध्रुवता चाभव्यभव्यापेक्षया भावनीया ॥ ८ ॥

संप्रति दर्शनावरणीयस्य संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—

नवगछक्कचउक्के नवगं छक्कं च चउसु बिइयम्मि। अन्नयरस्सिं(स्से)अन्नयरा वि य वेयणीयगोएसु ॥ ९ ॥

नवग त्ति—द्वितीये दर्शनावरणीये नवकषट्कचतुष्केषु नवकं संक्रामति, षट्कं च चतसृषु प्रकृतिषु । तेनेह द्वे संक्रमस्थाने । तद्यथा—नवकं, षट्कं च । त्रीणि पतद्ग्रहस्थानानि, तद्यथा—नवकं षट्कं चतुष्कं च । तत्र नवकरूपे पतद्ग्रहे मिथ्या-

दृष्टयः सासादनाश्च नवविधदर्शनावरणीयबन्धका नवकमपि संक्रमयन्ति । अयं च नवकरूपः पतद्ग्रहः साद्यादिरूपतया चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—सम्यग्मिथ्यादृष्ट्यादिगुणस्थानेषु न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानकमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । तथा सम्यग्मिथ्यादृष्टिगुणस्थानकादारभ्यापूर्वकरणस्यासंख्येयतमं भागं यावन्नवविधदर्शनावरणीयसत्कर्माणः षड्विधदर्शनावरणीयबन्धकाः षट्के नवकं संक्रमयन्ति । अयं तु षट्करूपः पतद्ग्रहः साद्यध्रुवः, कादाचित्कत्वात् । तथाऽपूर्वकरणस्य संख्येयतमे भागे निद्राप्रचलयोर्बन्धव्यवच्छेदे तत ऊर्ध्वं सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावदुपशमश्रेण्यां नवविधदर्शनावरणीयसत्कर्माणश्चतुर्विधदर्शनावरणीयबन्धकाश्चतुष्के नवकं संक्रमयन्ति । अयमपि च चतुष्करूपः पतद्ग्रहः साद्यध्रुवः, कदाचिद्भावात् । नवकरूपः संक्रमश्चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि-सूक्ष्मसंपरायात्परत उपशान्तमोहे न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । क्षपकश्रेण्यां पुनरनिवृत्तिकरणाद्धायाः संख्येयतमे भागेऽवशिष्टे सति स्त्यानर्द्धित्रिकक्षयात् परतः सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावत् षड्विधदर्शनावरणीयसत्कर्माणश्चक्षुरादिदर्शनावरणीयचतुष्टयं बध्नन्तस्तस्मिन् दर्शनावरणचतुष्के षट्कं संक्रमयन्ति । इमावपि संक्रमपतद्ग्रहौ साद्यध्रुवौ, कादाचित्कत्वात् । अतः परं तु न संक्रमो नापि पतद्ग्रहत्वमिति । संप्रति वेदनीयगोत्रयोः संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—'अन्नयरस्से इत्यादि' वेदनीये गोत्रे चान्यतरस्यां प्रकृतौ बध्यमानायामन्यतराऽबध्यमाना प्रकृतिः संक्रामति । तेन या यत्र संक्रामति सा तस्याः पतद्ग्रहः । इतरा च संक्रमस्थानं । तत्र सातबन्धकाना

मिथ्यादृष्टिप्रभृतीनां सूक्ष्मसंपरायपर्यन्तानां सातासातसत्कर्मणां सातवेदनीयं पतद्ग्रहः, असातं संक्रमस्थानं । असातब-न्धकानां पुनर्मिथ्यादृष्टिप्रभृतीनां प्रमत्तसंयतपर्यन्तानां सातासातसत्कर्मणां असातवेदनीयं पतद्ग्रहः, सातवेदनीयं तु संक्रमस्थानं । इमौ च सातासातरूपौ संक्रमपतद्ग्रहौ साद्यध्रुवौ भूयो भूयः परावृत्य(त्ति)भावात् । तथा मिथ्यादृष्टिप्रभृतीनां सूक्ष्मसंपरायपर्यन्तानामुच्चैर्गोत्रबन्धकानामुच्चनीचैर्गोत्र(बन्ध) सत्कर्मणामुच्चैर्गोत्रं पतद्ग्रहः, नीचैर्गोत्रं तु संक्रमस्थानं । नीचैर्गोत्रबन्धकानां तु मिथ्यादृष्टिसासादनानामुच्चनीचैर्गोत्रसत्कर्मणां नीचैर्गोत्रं पतद्ग्रहः, उच्चैर्गोत्रं तु संक्रम्यमाणं (मस्थानं)। इमावप्युच्चैर्गोत्रनीचैर्गोत्ररूपौ संक्रमपतद्ग्रहौ प्रागिव साद्यध्रुवौ भावनीयौ ॥ ९ ॥

संप्रति मोहनीयस्य संक्रमपतद्ग्रहत्वस्थानप्रतिपादनावसरस्तत्र प्रथमतः संक्रमासंक्रमस्थाननिर्देशं चिकीर्षुराह—

अठचउरहियवीसं सत्तरसं सोलसं च पन्नरसं । वज्जिय संकमठाणाइं होंति तेवीसइं मोहे ॥ १० ॥

अठ त्ति–अष्टाधिका चतुरधिका च विंशतिः अष्टाविंशतिश्चतुर्विंशतिश्चेत्यर्थः । तथा सप्तदश षोडश पञ्चदश चेत्य-मूनि स्थानानि वर्जयित्वा शेषाणि एकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशैकादशद्वादशत्रयोदशचतुर्दशाष्टादशैकोनविंशति-विंशत्येकविंशतिद्वाविंशतित्रयोविंशतिपञ्चविंशतिषड्विंशतिसप्तविंशतिलक्षणानि त्रयोविंशतिसंख्यानि मोहनीये संक्रम-स्थानानि भवन्ति । तथाहि–अष्टाविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति मिथ्या-त्वव्यतिरिक्ताः शेषाः सप्तविंशतिः संक्रामन्ति । तत्र चारित्रमोहनीयं पञ्चविंशतिप्रकृत्यात्मकं परस्परं संक्रामति । सम्य-क्त्वसम्यग्मिथ्यात्वयोः मिथ्यात्वे । तथा सम्यक्त्वे उद्वलिते सति सप्तविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यग्मिथ्या-

त्वस्य पतद्ग्रह इति तद्व्यतिरिक्ताः शेषाः षड्विंशतिः संक्रामन्ति । सम्यग्मिथ्यात्वेऽप्युद्वलिते सति षड्विंशतिसत्कर्मणः पञ्च-
विंशतिः । अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणः पञ्चविंशतिः, मिथ्यात्वस्य संक्रमाभावात्, न हि तत् चारित्र-
मोहनीये संक्रामति, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं संक्रमाभावात् । अथौपशमिकसम्यग्दृष्टेरष्टाविंशतिस-
त्कर्मणः सम्यक्त्वलाभादावलिकाया ऊर्ध्वं वर्तमानस्य सम्यक्त्वे मिथ्यात्वसम्यग्मिथ्यात्वयोः संक्रमः । तेन तत् पतद्ग्रह
इति । तस्मिन्नपसारिते शेषा सप्तविंशतिः संक्रमे प्राप्यते । तस्यैव चौपशमिकसम्यग्दृष्टेरष्टाविंशतिसत्कर्मण आवलिकाया
अभ्यन्तरे वर्तमानस्य सम्यग्मिथ्यात्वं सम्यक्त्वे न संक्रामति । यतो मिथ्यात्वपुञ्जा एव सम्यक्त्वानुगति (त)विशोधिसञ्जा-
वतः सम्यग्मिथ्यात्वलक्षणं परिणामान्तरमापादिताः । अन्यप्रकृतिरूपतया परिणामान्तरापादनं च संक्रमः, संक्रमावलि-
कागतं च सकलकरणायोग्यमिति सम्यक्त्वलाभादावलिकाया अभ्यन्तरे वर्तमानेन सम्यग्मिथ्यात्वं सम्यक्त्वे न संक्रम्यते,
किं तु केवलं मिथ्यात्वमेव । ततः सम्यग्मिथ्यात्वेऽप्यपसारिते शेषा षड्विंशतिः संक्रामति । चतुर्विंशतिस्तु संक्रमे न प्राप्यते, यत-
श्चतुर्विंशतिसत्कर्मा सम्यग्दृष्टिर्मिथ्यात्वं गतः सन् यद्यप्यनन्तानुबन्धिनो भूयोऽपि बध्नाति, तथापि तान् सतोऽपि न संक्रमय-
ति, बन्धावलिकागतस्य सर्वकरणायोग्यत्वात् । मिथ्यात्वं च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसारिते शेषा त्रयो-
विंशतिरेव संक्रामति । अथवा चतुर्विंशतिसत्कर्मणः सम्यग्दृष्टेः सम्यक्त्वं मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसा-
रिते शेषा त्रयोविंशतिः संक्रामति । तस्यैव मिथ्यात्वे क्षपिते द्वाविंशतिः । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य
चारित्रमोहनीयस्यान्तरकरणे कृते सति लोभसंज्वलनस्यापि संक्रमो न भवति, "अन्तरकरणे कृते पुरुषवेदसंज्वलनचतुष्टययो-

रानुपूर्व्या संक्रमो भवतीतिवचनप्रामाण्यात् अनन्तानुबन्धिचतुष्टयस्य च विसंयोजितत्वादुपशान्तत्वाद्वा संक्रमाभावः ।
सम्यक्त्वं च मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति संज्वलनलोभानन्तानुबन्धिचतुष्टयसम्यक्त्वरूपाः षडष्टाविंशतेरपनीयन्ते
शेषा द्वाविंशतिः संक्रामति । तस्यैवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य नपुंसकवेदे उपशान्ते एकविंशतिः ।
द्वाविंशतिसत्कर्मणो वा सम्यक्त्वं न क्वापि संक्रामतीत्येकविंशतिः संक्रमे प्राप्यते । यद्वा क्षपकश्रेण्यां वर्तमानस्य क्षप-
कस्य यावदद्याप्यष्टौ कषाया न क्षयमुपयान्ति तावदेकविंशतिः संक्रमे प्राप्यते । औपशमिकसम्यग्दृष्टेः संबन्धिन्याः
प्रागुक्ताया एकविंशतेः स्त्रीवेदे उपशान्ते सति शेषा विंशतिः संक्रामति । यद्वा क्षायिकसम्यग्दृष्टेरुपशमश्रेणिं प्रतिपन्नस्य
चारित्रमोहनीयस्यान्तरकरणे कृते लोभसंज्वलनस्यापि प्रागुक्तयुक्तेः संक्रमो न भवतीति तस्मिन्नपसारिते विंशतिः
संक्रमे प्राप्यते । ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः । स्त्रीवेदे उपशान्तेऽष्टादश । औपशमिकसम्यग्दृष्टेरुपश-
मश्रेण्यां वर्तमानस्य प्रागुक्ताया विंशतेः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दश संक्रामन्ति । ततः पुरुषवेदे उपशान्ते
त्रयोदश । यद्वा क्षपकस्य क्षपकश्रेण्यां वर्तमानस्य प्रागुक्ताया एकविंशतेरष्टसु कषायेषु क्षीणेषु शेषास्त्रयोदश संक्रामन्ति ।
तस्यैव क्षपकस्य चारित्रमोहनीयस्यान्तरकरणे कृते संज्वलनलोभस्य प्रागुक्तयुक्तेः संक्रमो न भवतीति तस्मिन्नपसारिते
शेषा द्वादश संक्रामन्ति । अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्योऽष्टादशभ्यः षट्सु नोकषायेषू-
पशान्तेषु सत्सु शेषा द्वादश संक्रामन्ति । ततः पुरुषवेदे उपशान्ते एकादश । क्षपकस्य वा प्रागुक्ताभ्यो द्वादशभ्यो नपुं-
सकवेदे क्षीणे शेषा एकादश संक्रामन्ति । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां प्रागुक्ताभ्यस्त्रयोदशभ्योऽप्रत्याख्यान-

प्रत्याख्यानावरणक्रोधद्विके उपशान्ते शेषा एकादश संक्रमे प्राप्यन्ते । क्षपकश्रेण्यामेकादशभ्यः स्त्रीवेदे क्षीणे शेषा दश संक्रामन्ति । औपशमिकसम्यग्दृष्टेर्वोपशमश्रेण्या वर्तमानस्यैकादशभ्यः संज्वलनलोभे उपशान्ते शेषा दश संक्रामन्ति । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्य एकादशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे क्रोधद्विके उपशान्ते शेषा नव संक्रामन्ति । तस्यैव संज्वलनक्रोधेऽप्युपशान्तेऽष्टौ । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्यो दशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विके उपशान्ते शेषा अष्टौ संक्रामन्ति । तस्यैव संज्वलनमाने उपशान्ते सप्त । क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्योऽष्टाभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विके उपशान्ते शेषाः षट् संक्रामन्ति । तस्यैव संज्वलनमान उपशान्ते पञ्च । यद्वौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यः सप्तभ्यः प्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते शेषाः पञ्च संक्रामन्ति । तस्यैव संज्वलनमायायामुपशान्तायां चतस्रः । अथवा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्ताभ्यो दशभ्यः षट्सु नोकषायेषु क्षीणेषु शेषाश्चतस्रः प्रकृतयः संक्रामन्ति । तस्यैव पुरुषवेदे क्षीणे तिस्रः । अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यः पञ्चभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते शेषास्तिस्रः संक्रामन्ति । तस्यैव संज्वलनमायायामुपशान्तायां द्वे । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यश्चतसृभ्यः प्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे लोभद्विके उपशान्ते शेषे द्वे प्रकृती संक्रामतः । अथवा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्ताभ्यस्तिसृभ्यः संज्वलनक्रोधे क्षीणे द्वे संक्रामतः । तस्यैव संज्वलनमाने क्षीण एका ।

तदेवं परिभाव्यमानेऽष्टाविंशतिचतुर्विंशतिसप्तदशषोडशपञ्चदशलक्षणानि संक्रमस्थानानि न प्राप्यन्ते इति प्रतिषिध्यन्ते। तेषु च प्रतिषिद्धेषु शेषाणि त्रयोविंशतिसंख्यानि संक्रमस्थानान्यवगन्तव्यानि। एतेषु संक्रमस्थानेषु मध्ये पञ्चविंशतिप्रकृत्यात्मकं संक्रमस्थानं साद्यादिरूपतया चतुष्प्रकारं। तद्यथा—साद्यनादि ध्रुवमध्रुवं च। तत्राष्टाविंशतिसत्कर्मणः सम्यक्त्वसम्यग्मिथ्यात्वयोरुद्वलितयोर्भवत् सादि, अनादिमिथ्यादृष्टेरनादि, अध्रुवध्रुवता भव्याभव्यापेक्षया। शेषाणि तु संक्रमस्थानानि साद्यध्रुवाणि, कादाचित्कत्वात् ॥ १० ॥

कृता मोहनीये संक्रमासंक्रमस्थानप्ररूपणा। संप्रति पतद्ग्रहापतद्ग्रहस्थानप्ररूपणार्थमाह—

सोलस बारसगट्ठग वीसग तेवीसगाइगे छच्च। वज्जिय मोहस्स पडिग्गहा उ अट्ठारस हवन्ति ॥११॥

सोलस त्ति—षोडश द्वादशाष्टौ विंशतिस्त्रयोविंशत्यादयश्च षट्। तद्यथा—त्रयोविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिश्च। एतानि स्थानानि वर्जयित्वा शेषाण्येकद्वित्रिचतुःपञ्चषट्सप्तनवदशैकादशत्रयोदशचतुर्दशपञ्चदशसप्तदशाष्टादशैकोनविंशत्येकविंशतिद्वाविंशतिलक्षणानि अष्टादश पतद्ग्रहस्थानानि भवन्ति। तत्र कस्मिन् पतद्ग्रहे काः प्रकृतयः संक्रामन्तीत्येतदुच्यते—तत्र मिथ्यादृष्टेरष्टाविंशतिसत्कर्मणो मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसारिते शेषा सप्तविंशतिर्मिथ्यात्वषोडशकषायान्यतरवेदभयजुगुप्साहास्यरतियुगलारतिशोकयुगलान्यतरयुगललक्षणायां द्वाविंशतौ संक्रामति। तस्यैव सम्यक्त्व उद्वलिते सप्तविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यग्मिथ्यात्वस्य पतद्ग्रह इति तस्मिन्नपसारिते शेषा षड्विंशतिः प्रागुक्तायां द्वाविंशतौ संक्रामति। तस्यैव मिथ्यादृष्टेः

सम्यग्मिथ्यात्व उद्वलिते षड्विंशतिसत्कर्मणो मिथ्यात्वे न किमपि संक्रामतीति न तत्कस्यचित्पतद्ग्रह इति तस्मिन् प्रागुक्ताया द्वाविंशतेरपनीते शेषे एकविंशतिप्रकृतिसमुदायात्मके पतद्ग्रहे पञ्चविंशतिः संक्रामति। अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणो मिथ्यात्वं न क्वापि संक्रामति, नापि तत्रान्या प्रकृतिरित्याधाराधेयभावपरिभ्रष्टं मिथ्यात्वमपनीयते, ततः शेषा पञ्चविंशतिः प्रागुक्तायामेकविंशतौ संक्रामति। तथा चतुर्विंशतिसत्कर्मा मिथ्यात्वं गतः सन् यद्यपि मिथ्यात्वप्रत्ययतो भूयोऽप्यनन्तानुबन्धिनो बध्नाति, तत्रापि बन्धावलिकागतं सकलकरणायोग्यमिति कृत्वा सतोऽपि तान् न संक्रमयति। मिथ्यात्वं च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहस्ततोऽनन्तानुबन्धिचतुष्टयमिथ्यात्ववर्जिताः शेषास्त्रयोविंशतिप्रकृतयः प्रागुक्तायां द्वाविंशतौ संक्रामन्ति। तदेवं मिथ्यादृष्टेर्द्वाविंशतिपतद्ग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिसंक्रमाः। एकविंशतिपतद्ग्रहो च पञ्चविंशतिसंक्रम उक्तः शेषः संक्रमः पतद्ग्रहो वा न संभवति। सासादनसम्यग्दृष्टेस्तु शुद्धदृष्टित्वाभावाद्दर्शनमोहनीयत्रयस्य संक्रमाभावः। ततोऽस्य सर्वदा एकविंशतिरूपे पतद्ग्रहे पञ्चविंशतिरेव संक्रामति। सम्यग्मिथ्यादृष्टेरपि शुद्धदृष्टित्वाभावाद्दर्शनत्रयस्य संक्रमाभाव इति अष्टाविंशतिसत्कर्मणः सप्तविंशतिसत्कर्मणो वा पञ्चविंशतिः। चतुर्विंशतिसत्कर्मणः पुनरेकविंशतिः द्वादशकषायपुरुषवेदभयजुगुप्साऽन्यतरयुगलद्वयरूपसप्तदशप्रकृतिसमुदायरूपे पतद्ग्रहे संक्रामति। तदेवमुक्तौ सासादनसम्यग्मिथ्यादृष्टी। संप्रत्यविरतदेशविरतप्रमत्ताप्रमत्तेषु संक्रमाणां तुल्यत्वात् युगपत्पतद्ग्रहा उच्यन्ते—तेषामविरतादीनामौपशमिकसम्यग्दृष्टीनां सम्यक्त्वोत्पादप्रथमसमयादारभ्य यावदावलिकामात्रं तावत् सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहतैव भवति, न संक्रमः, इति शेषा षड्विंशतिरविरतानां द्वा-

शकषायपुरुषवेदभयजुगुप्साऽन्यतरयुगलसम्यक्त्वसम्यग्मिथ्यात्वरूपे एकोनविंशतिपतद्ग्रहे, देशविरतानां प्रत्याख्याना-
वरणसंज्वलनकषायपुरुषवेदभयजुगुप्साऽन्यतरयुगलसम्यक्त्वसम्यग्मिथ्यात्वलक्षणे पञ्चदशपतद्ग्रहे, प्रमत्ताप्रमत्तानां
संज्वलनचतुष्टयपुरुषवेदसम्यक्त्वसम्यग्मिथ्यात्वभयजुगुप्साऽन्यतरयुगलरूपे एकादशपतद्ग्रहे संक्रामति । तेषामेवाविरत-
सम्यग्दृष्ट्यादीनामानलिकायाः परतः सम्यग्मिथ्यात्वं संक्रमे पतद्ग्रहे च लभ्यते इति सप्तविंशतिः प्रागुक्तेषु त्रिषु पतद्ग्र-
हेषु संक्रामति । तथा तेषामेवाविरतसम्यग्दृष्ट्यादीनामनन्तानुबन्धिषूद्वलितेषु चतुर्विंशतिसत्कर्मणां क्षायोपशमिकसम्य-
ग्दृष्टीनां सम्यक्त्वं पतद्ग्रह इति कृत्वा शेषा त्रयोविंशतिः प्रागुक्तेष्वेकोनविंशत्यादिषु त्रिषु पतद्ग्रहेषु संक्रामति । ततो
मिथ्यात्वे क्षपिते सति सम्यग्मिथ्यात्वं पतद्ग्रहभावे न लभ्यते, मिथ्यात्वं च संक्रमे न लभ्यते । ततः शेषा द्वाविंशतिर-
विरतदेशविरतसंयतानां यथासंख्यमष्टादशचतुर्दशदशरूपेषु पतद्ग्रहेषु संक्रामति । ततः सम्यग्मिथ्यात्वे क्षपिते सति सम्य-
ग्मिथ्यात्वस्य न संक्रमो नापि पतद्ग्रह इत्येकविंशतिरविरतादीनां यथासंख्यं सप्तदशत्रयोदशनवकरूपेषु पतद्ग्रहेषु संक्रा-
मति । संप्रत्यौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य संक्रममाश्रित्य पतद्ग्रहविधिरुच्यते—चतुर्विंशतिसत्कर्मणः सम्यक्त्वं
मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह एवेति कृत्वा तस्मिन्नपसारिते शेषा त्रयोविंशतिः पुंवेदसंज्वलनचतुष्टयसम्यक्त्वसम्य-
ग्मिथ्यात्वरूपे सप्तकपतद्ग्रहे संक्रामति । तस्यैवोपशमश्रेण्यां वर्तमानस्यान्तरकरणे कृते संज्वलनलोभस्य संक्रमो न भव-
तीति तस्मिन्नपसारिते शेषा द्वाविंशतिः पूर्वोक्त एव सप्तकपतद्ग्रहे संक्रामति । तस्यैव नपुंसकवेदे उपशान्ते सप्तकपत-
द्ग्रहे एकविंशतिः । ततः स्त्रीवेदे उपशान्ते विंशतिः । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां " इसु

आवलियासु पढमठिईसु सेसासुऽविय वेदो" इतिवचनात् पुरुषवेदः पतद्ग्रहो न भवति । ततः प्रागुक्तात् सप्तकात्पुरुषवेदेऽपनीते शेषे षट्करूपे पतद्ग्रहे प्रागुक्ता विंशतिः संक्रामति। ततः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दशप्रकृतयः प्रागुक्त एव षट्करूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावत्संक्रामन्ति यावत्समयोनमावलिकाद्विकं । ततः पुरुषवेदे उपशान्ते शेषास्त्रयोदश षट्करूपे पतद्ग्रहे संक्रामन्ति । ताश्च तत्र तावद्यावदन्तर्मुहूर्तं । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनक्रोधोऽपि "तिसु आवलियासु समऊणियासु अपडिग्गहाउ संजलणा" इति वचनात् पतद्ग्रहो न भवतीति प्रागुक्तात् षट्कात्तस्मिन्नपसारिते शेषे पञ्चकरूपे पतद्ग्रहे ता एव त्रयोदश प्रकृतयः संक्रामन्ति । ततोऽप्रत्याख्यानप्रत्याख्यानावरणक्रोधद्विके उपशान्ते शेषा एकादश प्रागुक्त एव पञ्चकपतद्ग्रहे संक्रामन्ति। ताश्च तावद्यावत्समयोनावलिकाद्विकं । ततः संज्वलनक्रोधे उपशान्ते शेषा दश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमानोऽपि पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपनीते शेषे चतुष्करूपे पतद्ग्रहे ता एव दश प्रकृतयः संक्रामन्ति। ताश्च तावद्यावत्समयोनमावलिकाद्विकं। ततोऽप्रत्याख्यानप्रत्याख्यानावरणरूपे मानद्विके उपशान्ते शेषा अष्टौ प्रकृतयश्चतुष्करूपे एव पतद्ग्रहे संक्रामन्ति। ततः संज्वलनमाने उपशान्ते सप्त । ताश्च सप्त चतुष्करूपे पतद्ग्रहेऽन्तर्मुहूर्तं कालं यावत्संक्रामन्ति । ततः संज्वलनमायायाः प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमायाऽपि पतद्ग्रहो न भवतीति चतुष्कात्तस्यामपगतायां शेषे त्रिकरूपे पतद्ग्रहे पूर्वोक्ताः सप्त संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उप-

शान्ते शेषाः पञ्च प्रकृतयस्त्रिकरूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनमायायामुपशान्तायां शेषाश्चतस्रः प्रकृतयः संक्रामन्ति । ताश्च तावद्यावदन्तर्मुहूर्तं । ततोऽनिवृत्तिबादरसंपरायचरमसमयेऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे लोभद्विके उपशान्ते शेषे द्वे प्रकृती संक्रामतः । ते च मिथ्यात्वसम्यग्मिथ्यात्वलक्षणे । न चैते संज्वलनलोभे संक्रामतः, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं संक्रमाभावात् । ततस्तस्यापि पतद्ग्रहता न भवतीति द्वयोरेव ते द्वे संक्रामतः । तत्र मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः, सम्यग्मिथ्यात्वं सम्यक्त्वे । तदेवमौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुक्तः । संप्रति क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुच्यते—तत्रानन्तानुबन्धिचतुष्टयदर्शनत्रिकरूपे सप्तके क्षपिते सति एकविंशतिसत्कर्मा सन् क्षायिकसम्यग्दृष्टिरुपशमश्रेणिं प्रतिपद्यते । तस्य चान्तर्मुहूर्तं कालं यावत्पुरुषवेदसंज्वलनचतुष्टयरूपे पञ्चकपतद्ग्रहे एकविंशतिः संक्रामति । ततोऽन्तरकरणे कृते सति संज्वलनलोभस्य संक्रमो न भवतीति एकविंशतेस्तस्मिन्नपनीते शेषा विंशतिः पञ्चकपतद्ग्रहे संक्रामति । सा चान्तर्मुहूर्तं कालं यावत् । ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः । सापि चान्तर्मुहूर्तं कालं यावत् । ततः स्त्रीवेदे उपशान्ते शेषा अष्टादश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे संक्रामन्ति । ताश्च तत्र तावत् यावदन्तर्मुहूर्तं । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदः पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपगते शेषे चतुष्करूपे पतद्ग्रहे ता एवाष्टादश प्रकृतयः संक्रामन्ति । ततः षट्सु नोकषायेषूपशान्तेषु शेषा द्वादश प्रकृतयश्चतुष्करूपे एव तस्मिन् पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः पुरुषवेद उपशान्ते एकादश । ताश्चतुष्करूपे पत-

द्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनक्रोधोऽपि पतद्ग्रहो न भवतीति चतुष्कात्तस्मिन्नपगते शेषे त्रिकरूपे पतद्ग्रहे ताः पूर्वोक्ता एकादश प्रकृतयः संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे क्रोधद्विके उपशान्ते शेषा नव प्रकृतयः पूर्वोक्त एव त्रिकरूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनक्रोधे उपशान्तेऽष्टौ संक्रामन्ति ताश्च त्रिकरूपे पतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिका-त्रिकशेषायां संज्वलनमानोऽपि पतद्ग्रहो न भवतीति त्रिकात्तस्मिन्नपनीते शेषे द्विकरूपे पतद्ग्रहे पूर्वोक्ता अष्टौ प्रकृतयः संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विक उपशान्ते शेषाः षट् प्रकृतयो द्विकपतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनमान उपशान्ते पञ्च संक्रामन्ति । ताश्च द्विकरूपे पतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमायायाः प्रथमस्थितौ समयो-नावलिकात्रिकशेषायां संज्वलनमायापि पतद्ग्रहो न भवतीति द्विकात्तस्यामपगतायां शेषे संज्वलनलोभ एवैकस्मिंस्ताः पञ्च प्रकृतयः संक्रामन्तीति । ताश्च तावद्यावत् समयोनावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे माया-द्विके उपशान्ते शेषास्तिस्रः प्रकृतयः संज्वलनलोभे संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततः संज्व-लनमायायामुपशान्तायां शेषे द्वे अप्रत्याख्यानप्रत्याख्यानावरणलोभलक्षणे प्रकृती संज्वलनलोभे संक्रामतः । ते चान्त-र्मुहूर्तं कालं यावत् । ततोऽनिवृत्तिबादरसंपरायगुणस्थानकचरमसमये ते अप्युपशान्ते इति न किमपि क्वापि संक्रामति।

तदेवं क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुक्तः संप्रति क्षायिकसम्यग्दृष्टेः क्षपकश्रेण्यां संक्रमपतद्ग्रहविधिरभिधीयते—तत्र क्षायिकसम्यग्दृष्टिरेकविंशतिसत्कर्मा क्षपकश्रेणिं प्रतिपद्यते । तस्य चानिवृत्तिबादरसंपरायगुणस्थानं प्राप्तस्य पुरुषवेदसंज्वलनचतुष्टयरूपे पञ्चकपतद्ग्रहे प्रथमत एकविंशतिप्रकृतयः संक्रामन्ति । ततोऽष्टसु कषायेषु क्षीणेषु त्रयोदश । ताश्चान्तर्मुहूर्तं कालं यावत् । ततोऽन्तरकरणे कृते सति संज्वलनलोभस्य संक्रमो न भवतीति शेषा द्वादश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे संक्रामन्ति । ताश्चान्तर्मुहूर्तं कालं यावत् । ततो नपुंसकवेदे क्षीणे एकादश । ता अपि अन्तर्मुहूर्तं कालं यावत् । ततः स्त्रीवेदे क्षीणे दश । ता अप्यन्तर्मुहूर्तं कालं यावत् तस्मिन्नेव पञ्चकरूपे पतद्ग्रहे संक्रामन्ति । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदः पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपनीते शेषे चतुष्करूपे पतद्ग्रहे ता एव दश संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः षट्सु नोकषायेषु क्षीणेषु शेषाश्चतस्रः प्रकृतयस्तस्मिन्नेव चतुष्करूपे पतद्ग्रहे संक्रामन्ति । ततः पुरुषवेदः क्षीणः । तत्समये च संज्वलनक्रोधस्यापि पतद्ग्रहता न भवतीति तस्मिन्नपगते शेषासु तिसृषु प्रकृतिषु तिस्रः प्रकृतयः संक्रामन्ति । ताश्चान्तर्मुहूर्तं कालं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनक्रोधः क्षीयते । तत्समये च संज्वलनमानस्यापि पतद्ग्रहता न भवतीति शेषयोर्द्वयोः प्रकृत्योर्द्वे प्रकृती संक्रामतः । ते चान्तर्मुहूर्तं कालं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनमानोऽपि क्षीयते । तत्समयमेव च संज्वलनमायाया अपि पतद्ग्रहता न भवति । तत एकस्यामेव संज्वलनलोभलक्ष-

णायां प्रकृतौ संज्वलनमायालक्षणा एका प्रकृतिः संक्रामति। सा चान्तर्मुहूर्तं कालं यावत्। तत आवलिकाद्विकेन कालेन संज्वलनमायापि क्षीयते। तत ऊर्ध्वं न किमपि कापि संक्रामति ॥ ११ ॥

संप्रति यथोक्तरूपेषु पतद्ग्रहेषु प्रत्येकं संक्रमस्थानानि सकलयन्नाह—

छव्वीससत्तवीसाण संकमो होइ चउसु ठाणेसु। बावीसपन्नरसगे एक्कारस इगुणवीसाए ॥ १२ ॥

छव्वीस त्ति—चतुर्षु स्थानेषु पतद्ग्रहरूपेषु। तद्यथा—द्वाविंशतौ, पञ्चदशके, एकादशके, एकोनविंशतौ च षड्विंशति-सप्तविंशत्योः संक्रमो भवति। तत्र द्वाविंशतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतौ अविरतसम्यग्दृष्टेः ॥ १२ ॥

सत्तरसएक्कवीसासु संकमो होइ पन्नवीसाए। नियमा चउसु गईसु नियमा दिट्ठी कए तिविहे ॥१३॥

सत्तरस त्ति—सप्तदशकैकविंशत्योः पञ्चविंशतेः संक्रमो भवति। तत्र सप्तदशके मिश्रदृष्टेः एकविंशतौ मिथ्यादृष्टेः सासादनस्य च। अयं च पञ्चविंशतेः सप्तदशकैकविंशत्योः संक्रमो नियमाच्चतसृष्वपि गतिषु प्राप्यते। नियमाच्च सप्तदशके सासादनैकविंशतौ च पञ्चविंशतेः संक्रमः त्रिविधायां त्रिप्रकारायां दृष्टौ दर्शनमोहनीये कृतायां वेदितव्यः। मिथ्यादृष्टेस्त्वेकविंशतौ पञ्चविंशतिसंक्रमोऽनादिमिथ्यादृष्टेरपि भवति। 'कए' इति '(ति)विहे' इति च पुंस्त्वनिर्देशः प्राकृतत्वात् ॥ १३ ॥

बावीसपन्नरसगे सत्तगएक्कारसिगुणवीसासु। तेवीसाए नियमा पंच वि पंचिंदिएसु भवे ॥ १४ ॥

बावीस त्ति–त्रयोविंशतेः संक्रमो द्वाविंशतिपञ्चदशकसप्तकैकादशकैकोनविंशतिरूपेषु पञ्चसु पतद्ग्रहेषु भवति। तत्र द्वाविंशतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतौ अविरतसम्यग्दृष्टेः। एतानि च पञ्च पतद्ग्रहस्थानानि पञ्चेन्द्रियेष्वेव भवन्ति ॥ १४ ॥

चोद्दसगदसगसत्तगअट्ठारसगे य होइ बावीसा। नियमा मणुयगईए नियमा दिट्ठी कए दुविहे ॥१५॥

चोद्दस त्ति–द्वाविंशतिः संक्रमयोग्या भवति चतुर्दशके दशके सप्तकेऽष्टादशके च। तत्र चतुर्दशके देशविरतस्य, दशके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, अष्टादशकेऽविरतसम्यग्दृष्टेः। एषा च द्वाविंशतिर्नियमान्मनुजगतौ भवति, नान्यत्र। नियमाच्च दृष्टौ द्विविधायां कृतायां सम्यक्त्वसम्यग्मिथ्यात्वयोरेव सतोरित्यर्थः ॥ १५ ॥

तेरसगनवगसत्तगसत्तारसपणगएक्कवीसासु। एक्कावीसा संकमइ सुद्धसासाणमीसेसु ॥ १६ ॥

तेरस त्ति–त्रयोदशकनवकसप्तकसप्तदशकपञ्चकैकविंशतिरूपेषु षट्सु पतद्ग्रहेष्वेकविंशतिः संक्रामति। केषु जीवेष्वित्याह–शुद्धसासादनमिश्रेषु शुद्धेषु विशुद्धदृष्टिषु अविरतसम्यग्दृष्ट्यादिषु सासादनमिश्रेषु। तत्र त्रयोदशके देशविरतस्य, नवके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, सप्तदशकेऽविरतसम्यग्दृष्टेर्मिश्रदृष्टेश्च, पञ्चके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य क्षपकश्रेण्यां वा। एकविंशतौ सासादनस्य। इह यैराचार्यैश्चतुर्विंशतिसत्कर्मा सन्नुपशमश्रेणीतः प्रतिपतन् मिथ्यात्वाभिमुखः सासादन इष्यते, तन्मते सासादनस्यैकविंशतावेकविंशतिः संक्रमेऽभि-

हिता अन्यथा पुनरनन्तानुबन्ध्युदयसहितस्य सासादनस्यैकविंशतौ पञ्चविंशतिरेव संक्रमे प्राप्यते। साच प्रागेवोक्ता ॥१६॥

एत्तो अविसेसा संकमंति उवसामगे व खवगे वा। उवसामगेसु वीसा य सत्तगे छक्क पणगे य॥ १७॥

एत्तोत्ति—इत ऊर्ध्वमविशेषाः सप्तदश संक्रमाः संक्रामन्ति, उपशमके क्षपके वा। तत्र विंशतिः संक्रमयोग्या सप्तके षट्के पञ्चके चौपशमिकेषु प्राप्यते। तत्रापि सप्तके षट्के चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। पञ्चके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां ॥ १७ ॥

पंचसु एगुणवीसा अट्ठारस पंचगे चउक्के य। चउदस छसु पगईसु तेरसगं छक्कपणगंमि ॥ १८ ॥

पंचसु त्ति–पञ्चके एकोनविंशतिः संक्रामति। सा च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य। तथा तस्यैवाष्टादश संक्रामन्ति पञ्चके चतुष्के च। तथा चतुर्दश षट्सु प्रकृतिषु। ताश्चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा त्रयोदशकं षट्के पञ्चके च। तत्र षट्के औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, पञ्चके क्षपकश्रेण्यां ॥ १८ ॥

पंच चउक्के बारस एक्कारस पंचगे तिगचउक्के। दसगं चउक्कपणगे नवगं च तिगंमि बोधव्वं ॥ १९ ॥

पंच त्ति–पञ्चके चतुष्के च द्वादश संक्रामन्ति। ताश्च पञ्चके क्षपकश्रेण्यां, चतुष्के क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथैकादश पञ्चके त्रिके चतुष्के च संक्रामन्ति। तत्र पञ्चके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां (वर्तमानस्य, क्षपकश्रेण्यां) त्रिके चतुष्के च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां च तथा दशकं चतुष्के पञ्चके च संक्रामति। तच्चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य क्षपकश्रेण्यां च। तथा नवकं त्रिके बोद्धव्यं। तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य ॥१९॥

अट्ठ दुगतिगचउक्के सत्त चउक्के तिगे य बोधव्वा । छक्कं दुगम्मि नियमा पंच तिगे एक्कगदुगे या॥२०॥

अट्ठ त्ति—अष्टौ द्विके त्रिके चतुष्के च संक्रामन्ति । तत्र द्विके त्रिके च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, चतुष्के औपशमिकसम्यग्दृष्टेः । तथा सप्त त्रिके चतुष्के च बोद्धव्याः । ताश्च त्रिके चतुष्के चौपशमिकसम्यग्दृष्टेरेवोपशमश्रेण्यां वर्तमानस्य वेदितव्याः । तथा षट्कं द्विके एव नियमाज्जानीत । तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य । तथा पञ्च त्रिके एकके द्विके च संक्रामन्ति । तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य । द्विके एकके च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां ॥ २० ॥

चत्तारि तिगचउक्के तिन्नि तिगे एक्कगे य बोधव्वा । दो दुसु एक्काए विय एक्का एक्काएँ बोधव्वा ॥२१॥

चत्तारि त्ति—चतस्त्रिके चतुष्के च संक्रामन्ति । तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, चतुष्के क्षपकश्रेण्यां । तथा तिस्रस्त्रिके एकके च बोद्धव्याः । तत्र त्रिके क्षपकश्रेण्यां, एकके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां । तथा द्वे प्रकृती द्वयोरेकस्यां च संक्रामतः । तत्र द्वयोः क्षपकश्रेण्यामौपशमिकसम्यग्दृष्टेश्चोपशमश्रेण्या । एकस्यां तु क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां । तथैकप्रकृतिरेकस्यां बोद्धव्या । सा च क्षपकश्रेण्यामेव । एतच्च पतद्ग्रहेषु संक्रमस्थानसंकलनं प्रागुक्तसप्रपंचपतद्ग्रहेषु संक्रमस्थानसंबन्धं षट्कादौ प्रस्तार्य परिभावनीयम् ॥ २१ ॥

संप्रति पतद्ग्रहेषु संक्रमस्थानसंकलने मार्गणोपायानाह—

अणुपुव्विअणाणुपुव्वी झीणमझीणे य दिट्ठिमोहम्मि । उवसामगे य खवगे य संकमे मग्गणोवाया ॥ २२ ॥

अणुपुव्वि त्ति—पतद्ग्रहेषु संक्रमे संक्रमस्थानसंकलनचिन्तायामेते मार्गणोपायाः । तथाहि–किमिदं संक्रमस्थानमानुपूर्व्या संक्रमे उपपद्यतेऽनानुपूर्व्या वोभयत्र वा ? तथा क्षीणे दृष्टिमोहे आहोश्विदक्षीणे उभयत्र वा ? । तथोपशमके उतश्वित् क्षपके उभयत्र वेति ? ॥ २२ ॥

तदेवमुक्तो मोहनीयस्य प्रपञ्चतः संक्रमपतद्ग्रहविधिः । संप्रति नामकर्मणोऽभिधीयते । तत्र द्वादश नामकर्मणः संक्रमस्थानानि । तथा चाह—

तिदुगेगसयं छप्पणचउतिगनउई य इगुणनउईया । अठचउदुगेक्कसीई संकमा बारस य छट्ठे ॥२३॥

तिदुगेगसयंति–षष्ठे नामकर्मणि द्वादश संक्रमस्थानानि । तद्यथा–त्र्युत्तरशतं, द्व्युत्तरशतं, एकोत्तरशतं, षण्णवतिः, पञ्चनवतिः, चतुर्नवतिः, त्रिनवतिः, एकोननवतिः, अष्टाशीतिः, चतुरशीतिः द्व्यशीतिः, एकाशीतिश्चेति । तत्र नाम्नः सर्वसंख्यया त्र्युत्तरं प्रकृतिशतं । तद्यथा–गतिचतुष्टयं, जातिपञ्चकं, शरीरपञ्चकं, संघातपञ्चकं, बन्धनपञ्चदशकं, संस्थानषट्कं, संहननषट्कं, अंगोपांगत्रयं, वर्णपञ्चकं, गन्धद्विकं, रसपञ्चकं, स्पर्शाष्टकं, अगुरुलघु, आनुपूर्वीचतुष्टयं, पराघातोपघातोच्छ्वासातपोद्योतविहायोगतिद्विकत्रसस्थावरबादरसूक्ष्मसाधारणप्रत्येकपर्याप्तापर्याप्तस्थिरास्थिरशुभाशुभसुभगदुर्भगदुःस्वरसुस्वरादेयानादेयायशःकीर्तियशःकीर्तिनिर्माणतीर्थकराणि च । एतदेव च तीर्थकरवर्जं द्व्युत्तरशतं । अथवा यशःकीर्तिरहितं द्व्युत्तरशतं । तीर्थकरयशःकीर्तिरहितमेकोत्तरशतं । त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः । सैव तीर्थकररहिता पञ्चनवतिः । अथवा यशःकीर्तिरहिता पञ्चनवतिः । यशःकीर्तितीर्थकररहिता चतुर्नवतिः । तीर्थकररहिता पञ्चनवतिरेव

देवगतिदेवानुपूर्व्योरुद्वलितयोस्त्रिनवतिः । अथवा नरकगतिनरकानुपूर्वीरहिता त्रिनवतिः । उत्तरगतान्नरकगतिनरकानुपूर्वीतिर्यग्गतितिर्यगानुपूर्वीपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतलक्षणासु त्रयोदशसु प्रकृतिषु क्षीणासु यशःकीर्तौ चापनीतायामेकोननवतिर्भवति । सैव तीर्थकररहिताऽष्टाशीतिः । त्रिनवतेर्वैक्रियसप्तके उद्वलिते नरकगतिनरकानुपूर्व्योश्चोद्वलितयोः शेषा चतुरशीतिर्भवति । मनुजगतिमनुजानुपूर्व्योरुद्वलितयोर्द्व्यशीतिः । अथवा पञ्चनवतिः प्रागुक्तासु त्रयोदशसु प्रकृतिषु क्षीणासु यशःकीर्तौ चापनीतायां द्व्यशीतिः । सैव तीर्थकररहिता एकाशीतिः । एतानि नाम्नः संक्रमस्थानानि ॥ २३ ॥

संप्रति पतद्ग्रहस्थानप्रतिपादनार्थमाह—

तेवीसपंचवीसा छव्वीसा अठवीसगुणतीसा । तीसेक्कतीसएगं पडिग्गहा अठ नामस्स ॥ २४ ॥

तेवीस त्ति—त्रयोविंशतिः, पञ्चविंशतिः, षड्विंशतिः, अष्टाविंशतिः, एकोनत्रिंशत्, त्रिंशत्, एकत्रिंशत्, एका चेत्यष्टौ नाम्नः पतद्ग्रहस्थानानि भवन्तीति ॥ २४ ॥

संप्रति काः प्रकृतयः कुत्र संक्रामन्तीत्येतन्निरूपणार्थमाह—

एक्कगडुगसय पणचउनउई ता तेरसूणिया वावि । परभवियबंधवोछेय उपरि सेढीएँ एक्कस्स ॥ २५ ॥

एक्कग त्ति—पारभविकीनां परभववेद्यानां नामप्रकृतीनां देवगतिप्रायोग्यैकत्रिंशदादीनां बन्धव्यवच्छेदे सति उपरि द्वयोरपि श्रेण्योरुपशमक्षपकश्रेणिरूपयोरेकस्यां यशःकीर्तिलक्षणायां प्रकृतौ बध्यमानायामष्टौ संक्रमस्थानानि संक्रामन्ति ।

तद्यथा–एकोत्तरशतं, द्व्युत्तरशतं, पञ्चनवतिः, चतुर्नवतिः । 'ता इति' तान्येवानन्तरोदितानि चत्वारि संक्रमस्थानानि त्रयोदशन्यूनानि चत्वारि भवन्ति । तद्यथा–अष्टाशीतिः, एकोननवतिः, द्व्यशीतिः, एकाशीतिश्चेति । तत्र त्र्युत्तरशतसत्कर्मणो यशःकीर्तिर्बध्यमाना पतद्ग्रह इति तस्यामुत्सारितायां शेषं द्व्युत्तरशतं यशःकीर्तिपतद्ग्रहे संक्रामति । एवमेव द्व्युत्तरशतसत्कर्मण एकोत्तरं शतं । तथा षण्णवतिसत्कर्मणो यशःकीर्तिः पतद्ग्रह इति तस्यामुत्सारितायां शेषा पञ्चनवतिः तस्यां यशःकीर्तौ संक्रामति । एवमेव पञ्चनवतिसत्कर्मणश्चतुर्नवतिः । तथा त्र्युत्तरशतसत्कर्मणस्त्रयोदशसु पूर्वोक्तेषु नामकर्मसु क्षीणेषु सत्सु यशःकीर्तिः पतद्ग्रह इति तस्यामपगतायां शेषा एकोननवतिर्यशःकीर्तौ संक्रामति । द्व्युत्तरशतसत्कर्मणः पुनस्त्रयोदशसु क्षीणेष्वष्टाशीतिः संक्रामति । षण्णवतिसत्कर्मणस्तु नामत्रयोदशके क्षीणे द्व्यशीतिः । पञ्चनवतिसत्कर्मण एकाशीतिः ॥ २५ ॥

एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे चत्वारि संक्रमस्थानानि तथा चाह—

तिगदुगसयं छपंचगनउई य जइस्स एक्कतीसाए। एगंतसेढिजोगे वज्जिय तीसिगुणतीसासु ॥ २६ ॥

तिग त्ति–यतेरप्रमत्तस्यापूर्वकरणस्य च देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुरस्रसंस्थानवैक्रियांगोपागदेवानुपूर्वीपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तितैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकराहारकद्विकलक्षणामेकत्रिंशतं बध्नतस्तस्यामेकत्रिंशति एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे त्र्युत्तरं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिरिति चत्वारि संक्रमस्थानानि संक्रामन्ति । तत्र त्र्युत्तरशतं तीर्थकराहारकयोर्बन्धात्र-

लिकायामपगतायामेकत्रिंशत्प्रकृतिपतद्ग्रहे संक्रामति । तीर्थंकरनाम्नः पुनर्बन्धावलिकायामनपगतायां द्व्युत्तरशतं । आहा-
रकसप्तकस्य तु बन्धावलिकायामनपगतायां पण्णवतिः । तीर्थंकराहारकसप्तकयोः पुनर्बन्धावलिकायामनपगतायां पञ्चन-
वतिः । 'एगंतेत्यादि' एकान्तेन श्रेणियोग्यानि यानि संक्रमस्थानानि एकोत्तरशतचतुर्नवत्येकोननवत्यष्टाशीत्येकाशीतिरू-
पाणि । एतानि हि श्रेणावेव वर्तमानेन यशःकीर्तावेकस्यां बध्यमानायां संक्रम्यमाणानि प्राप्यन्ते, नान्यत्र । ततस्तानि
वर्जयित्वा शेषाणि त्र्युत्तरशतद्व्युत्तरशतपण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि त्रिंशत्पतद्ग्रहे एकोनत्रिंशत्प-
तद्ग्रहे च सप्त संक्रमस्थानानि भवन्ति । तत्र त्र्युत्तरशतसत्कर्मणो देवस्य सम्यग्दृष्टेस्तैजसकार्मणवर्णादिचतुष्कागुरुलघूप-
घातनिर्माणपञ्चेन्द्रियजात्यौदारिकशरीरौदारिकांगोपांगसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननमनुजगतिमनुजानुपूर्वीत्रस-
बादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्तिपराघातोच्छ्वासप्रशस्तविहायोगतितीर्थंकरल-
क्षणां मनुजगतिप्रायोग्यां तीर्थंकरनामसहितां त्रिंशतं बध्नतस्त्र्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति । त्र्युत्तरशतसत्क-
र्मणोऽप्रमत्तसंयतस्यापूर्वकरणस्य वा देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुरस्रसंस्थानवैक्रियांगोपांगदेवानुपूर्वीपराघा-
तोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तितैजसकार्मणवर्णादिचतुष्कागुरुलघूपघा-
तनिर्माणाहारकद्विकलक्षणां देवगतिप्रायोग्यां त्रिंशतं बध्नतो त्र्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति । अथवा त्र्युत्त-
रशतसत्कर्मणामेकेन्द्रियादीनामुद्योतसहितां द्वीन्द्रियादिप्रायोग्यां तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कतिर्य-
ग्गतितिर्यगानुपूर्वीद्वीन्द्रियाद्यन्यतमजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगदुःस्वरानादेययशःकी-

र्त्ययशःकीर्त्यन्यतरौदारिकशरीरौदारिकांगोपांगान्यतमसंस्थानान्यतमसंहननाप्रशस्तविहायोगतिपराघातोद्योतोच्छ्वासलक्षणां त्रिंशतं बध्नतां द्व्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति। पण्णवतिसत्कर्मणां देवनारकाणां मनुजगतिप्रायोग्यां तीर्थकरनामसहितां प्रागुक्तां त्रिंशतं बध्नतां तस्मिन् त्रिंशत्पतद्ग्रहे पण्णवतिः संक्रामति । पञ्चनवतिसत्कर्मणामप्रमत्तापूर्वकरणसंयतानामाहारकद्विकसहितां प्रागुक्तां देवगतिप्रायोग्यां त्रिंशतं बध्नतामाहारकसप्तकस्य बन्धावलिकायामनपगतायां पञ्चनवतिस्त्रिंशत्पतद्ग्रहे संक्रामति । अथवा पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां द्वीन्द्रियादिप्रायोग्यामुद्योतसहितां प्रागुक्तां त्रिंशतं बध्नतां पञ्चनवतिस्त्रिंशत्पतद्ग्रहे संक्रामति । त्रिनवतिसत्कर्मणां चतुरशीतिसत्कर्मणां द्व्यशीतिसत्कर्मणां चैकेन्द्रियादीनां विकलेन्द्रियपञ्चेन्द्रियतिर्यग्गतिप्रायोग्यां प्रागुक्तामुच्छ्वाससहितां त्रिंशतं बध्नतां यथाक्रमं त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च त्रिंशत्पतद्ग्रहे संक्रामति । एकोनत्रिंशत्पतद्ग्रहेऽप्येतान्येव सप्त संक्रमस्थानानि । तत्र त्र्युत्तरशतसत्कर्मणामविरतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां देवगतिप्रायोग्यां तीर्थकरनामसहितां देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरसमचतुरस्रसंस्थानतैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकरलक्षणामेकोनत्रिंशतं बध्नतां त्र्युत्तरशतमेकोनत्रिंशत्पतद्ग्रहे संक्रामति । एतेषामेवाविरतादीनां त्रयाणां प्रागुक्तामेकोनत्रिंशतं बध्नतां तीर्थकरनाम्नो बन्धावलिकायामनपगतायां द्व्युत्तरशतं तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अथवैकेन्द्रियादीनां द्व्युत्तरशतसत्कर्मणां द्वीन्द्रियादिप्रायोग्यां प्रागुक्तामेव त्रिंशतमुद्योतरहितामेकोनत्रिंशतं बध्नतां द्व्युत्तरशतमेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अवि

रतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां पणवतिसत्कर्मणां प्रागुक्ताया देवगतिप्रायोग्याया त्रिंशत आहारकद्विकेऽपनीते तीर्थंकरनाम्नि च तत्र प्रक्षिप्ते सति या संजातैकोनत्रिंशत् तां बध्नतां पणवतिस्तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अथवा नैरयिकस्य तीर्थंकरनामसत्कर्मणो मिथ्यादृष्टेरपर्याप्तावस्थायां वर्तमानस्य मनुजगतिप्रायोग्यां मनुजगतिमनुजानुपूर्वीपञ्चेन्द्रियजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगदुर्भगान्यतरादेयानादेयान्यतरयशःकीर्त्ययशःकीर्त्यन्यतरसंस्थानषट्कान्यतमसंस्थानसंहननषट्कान्यतमसंहननवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणौदारिकशरीरौदारिकांगोपांगसुस्वरदुःस्वरान्यतरपराघातोच्छ्वासप्रशस्ताप्रशस्तान्यतरविहायोगतिलक्षणामेकोनत्रिंशतं बध्नतः पणवतिरेकोनत्रिंशति संक्रामति । अविरतसम्यग्दृष्टीनां देशविरतानां प्रमत्तसंयतानां च पणवतिसत्कर्मणां प्रागुक्तां तीर्थंकरनामसहितां देवगतिप्रायोग्यामेकोनत्रिंशतं बध्नतां तीर्थंकरनामकर्मणो बन्धावलिकायामनपगतायामेकोनत्रिंशति पञ्चनवतिः संक्रामति । यद्वा पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां द्वीन्द्रियादिप्रायोग्या प्रागुक्ता या त्रिंशत् सैवोद्योतरहितैकोनत्रिंशत्, तां बध्नतां तस्यामेवैकोनत्रिंशति पञ्चनवतिः संक्रामति । त्रिनवतिचतुरशीतिद्व्यशीतयो यथा त्रिंशत्पतद्ग्रहेऽभिहितास्तथात्रापि भावनीयाः ॥ २६ ॥

अठावीसाए वि ते बासीइतिसयवज्जिया पंच । ते च्चिय बासीइजुया सेसेसुं ठन्नउई य वज्जा ॥२७॥

अट्ठावीसाए त्ति–अष्टाविंशतावपि तान्येव पूर्वोक्तानि द्व्यशीतिम्युत्तरशतवर्जितानि शेषाणि द्व्युत्तरशतपणवतिपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि पञ्च संक्रमस्थानानि संक्रामन्ति । तत्र मिथ्यादृष्टेर्नरकगतिप्रायोग्यां नरकगतिनर-

कानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगहुंडसंस्थानपराघातोच्छ्वासाप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगदुःस्वरानादेयायशःकीर्तिवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणलक्षणां, तथा मिथ्यादृष्टेः सम्यग्दृष्टेर्वा देवगतिप्रायोग्यां तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणदेवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरलक्षणामष्टाविंशतिं बध्नतो द्व्युत्तरशतसत्कर्मणो द्व्युत्तरशतमष्टाविंशतिपतद्ग्रहे संक्रामति। तथा मनुष्यस्य तीर्थंकरनामसत्कर्मणः पूर्वमेव नरके बद्धायुष्कस्य सतो नरकाभिमुखस्य सतो मिथ्यात्वं प्रपन्नस्य नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतः षण्णवतिसत्कर्मणोऽष्टाविंशतिपतद्ग्रहे षण्णवतिः संक्रामति। यथा द्व्युत्तरशतस्य भावना कृता तथा पञ्चनवतेरपि भावना कार्या। केवलं द्व्युत्तरशतस्थाने पञ्चनवतिरित्युच्चारणीयं। तथा मिथ्यादृष्टेस्त्रिनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो वैक्रियसप्तकदेवगतिदेवानुपूर्वीणां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति। अथवा पञ्चनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामेवाष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्व्योर्बन्धावलिकाया अभ्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति। त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति। अथवा पञ्चनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्व्योर्बन्धावलिकाया अभ्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति।

तथा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्देवगतिप्रायोग्यामष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्वीवैक्रियसप्तकानां बन्धावलिकाया अभ्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ संक्रामति । अथवा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकाया अभ्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ संक्रामति । षड्विंशत्यादिपतद्ग्रहेषु संक्रमस्थानान्याह—'ते चियेत्यादि' शेषेषु षड्विंशतिपञ्चविंशतित्रयोविंशतिलक्षणेषु पतद्ग्रहेषु तान्येव पूर्वोक्तानि द्व्युत्तरशतादीनि षण्णवतिरहितानि द्व्यशीतियुतानि पञ्च संक्रमस्थानानि संक्रामन्ति। तद्यथा—द्व्युत्तरशतं पञ्चनवतिस्त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च । तत्रैकेन्द्रियादीनां नरयिकवर्जितानां द्व्युत्तरशतसत्कर्मणां पञ्चनवतिसत्कर्मणां च तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कैकेन्द्रियजातिहुण्डकसंस्थानौदारिकशरीरतिर्यग्गतितिर्यगानुपूर्वीस्थावर (बादर) पर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिपराघातोच्छ्वासातपोद्योतान्यतररूपामेकेन्द्रियप्रायोग्यां षड्विंशतिं बध्नतां द्व्युत्तरशतं पञ्चनवतिश्च तस्यामेव षड्विंशतौ संक्रामति । तथा तेषामेवैकेन्द्रियादीनां देववर्जानां त्रिनवतिसत्कर्मणां देवनारकवर्जानां चतुरशीतिसत्कर्मणां च तामेव पूर्वोक्तां षड्विंशतिं बध्नतां त्रिनवतिश्चतुरशीतिश्च तस्यामेव षड्विंशतौ संक्रामति । तथा तेषामेवैकेन्द्रियादीनां देवनारकमनुष्यवर्जानां द्व्यशीतिसत्कर्मणां तामेव पूर्वोक्तां षड्विंशतिं बध्नतां द्व्यशीतिस्तस्यामेव षड्विंशतौ संक्रामति। तथा पञ्चविंशतिपतद्ग्रहे तान्येव पञ्च संक्रमस्थानानि चिन्त्यन्ते—तत्रैकेन्द्रियपर्याप्तप्रायोग्यां पूर्वोक्तामेव षड्विंशतिमातपेनोद्योतेन वा रहिता पञ्चविंशतिं बध्नतामेकद्वित्रिचतुरिन्द्रियादीनां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिसत्कर्मणां यथासंख्यं तस्यामेव पञ्चविंशतौ द्व्युत्तरशतं

पञ्चनवतिः त्रिनवतिः चतुरशीतिः द्व्यशीतिश्च संक्रामति । अथवाऽपर्याप्तविकलेन्द्रियातिर्यक्पञ्चेन्द्रियमनुजप्रायोग्यां
तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणद्वीन्द्रियाद्यन्यतमजातिहुंडसंस्थानसेवार्तसंहननौदारिकशरीरौदारिकागो-
पांगतिर्यग्गतितिर्यगानुपूर्वीत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिलक्षणां पञ्चविं-
शतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतादिसत्कर्मणां पञ्चविंशतौ द्व्युत्तरशतादीनि पंच संक्रमस्थानानि
संक्रामन्ति । तथा पर्याप्तकैकेन्द्रियप्रायोग्यां वर्णादिचतुष्कागुरुलघूपघातनिर्माणतैजसकार्मणहुंडसंस्थानौदारिकशरीरैके-
न्द्रियजातितिर्यग्गतितिर्यगानुपूर्वीबादरसूक्ष्मान्यतरस्थावरपर्याप्तप्रत्येकसाधारणान्यतरास्थिराशुभदुर्भगानादेयायशःकीर्ति-
लक्षणां त्रयोविंशतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिसत्कर्मणां यथा-
संख्यं द्व्युत्तरशतादीनि पञ्च संक्रमस्थानानि संक्रामन्ति ॥ २७ ॥

तदेवमुक्तः प्रकृतिसंक्रमः । संप्रति स्थितिसंक्रमाभिधानावसरः । तत्र चैतेऽर्थाधिकाराः । तद्यथा–भेदो विशेषल-
क्षणं उत्कृष्टस्थितिसंक्रमणप्रमाणं जघन्यस्थितिसंक्रमप्रमाणं साद्यादिप्ररूपणा स्वामित्वप्ररूपणा चेति । तत्र भेदविशेषलक्ष-
णयोः प्रतिपादनार्थमाह—

ठिइसंकमो त्ति वुच्चइ मूलुत्तरपगईउ य जा हि ठिई। उव्वट्टिया उ ओवट्टिया व पगइं निया वऽण्णं ॥२८॥

ठिइ त्ति–इह 'मूलुत्तरपगईउ' इत्यत्र षष्ठ्यर्थे पञ्चमी । ततोऽयमर्थः–हि स्फुटं या स्थितिर्मूलप्रकृतीनामष्टसंख्यानामु-
त्तरप्रकृतीनां वाऽष्टपञ्चाशदधिकशतसंख्यानां संबन्धिनी उद्वर्तिता ह्रस्वीभूता सती दीर्घीकृता, अपवर्तिता वा दीर्घीभूता

सती ह्रस्वीकृता, अन्यां वा प्रकृतिं नीता पतद्ग्रहप्रकृतिस्थितिषु मध्ये नीत्वा निवेशिता स स्थितिसंक्रम उच्यते । एतदुक्तं भवति-द्विविधः स्थितिसंक्रमो मूलप्रकृतिस्थितिसंक्रम उत्तरप्रकृतिस्थितिसंक्रमश्च। तत्र मूलप्रकृतिस्थितिसंक्रमोऽष्टप्रकारः। तद्यथा-ज्ञानावरणीयस्य यावदन्तरायस्य । उत्तरप्रकृतिस्थितिसंक्रमोऽष्टपंचाशदधिकशततधा । तद्यथा-मतिज्ञानावरणीयस्य श्रुतज्ञानावरणीयस्य यावद्वीर्यान्तरायस्य । 'तदेवं मूलुत्तरपगईउ' इत्यनेन भेद उक्तः । 'उवट्टिया व' इत्यादिना तु विशेषलक्षणं त्रिप्रकारं । तत्र कर्मपरमाणूनां ह्रस्वस्थितिकालतामपहाय दीर्घकालतया व्यवस्थापनमुद्वर्तना। कर्मपरमाणूनामेव दीर्घस्थितिकालतामपहाय ह्रस्वस्थितिकालतया व्यवस्थापनमपवर्तना । यत्पुनः संक्रम्यमाणप्रकृतिस्थितीनां पतद्ग्रहप्रकृतौ नीत्वा निवेशनं तत्प्रकृत्यन्तरनयनं, स्थितीनां चान्यत्र निवेशनं स्थितियुक्तानां परमाणूनामवसेयं, स्थितेरन्यत्र नेतुमशक्यत्वात् । इदं च विशेषलक्षणं सामान्यलक्षणे सत्येवावगन्तव्यं, न सर्वथा तदपवादेन, तेन मूलप्रकृतीनां परस्परं संक्रमप्रतिषेधात्, तासामन्यप्रकृत्यन्तरनयनलक्षणः स्थितिसंक्रमो न भवति, किं तु भावेन उद्वर्तनापवर्तनालक्षणौ संक्रमौ। उत्तरप्रकृतीनां तु त्रयोऽपि संक्रमा द्रष्टव्याः ॥ २८ ॥

तदेवं भेदविशेषलक्षणे प्रतिपाद्य संप्रत्युत्कृष्टस्थितिसंक्रमपरिमाणप्रतिपादनार्थमाह—

तीसासत्तरि चत्तालीसावीसुदहिकोडि कोडीणं । जेठ्ठा आलिगदुगहा सेसाण वि आलिगतिगूणा ॥२९॥

तीस त्ति-इह सर्वासां प्रकृतीनां बन्धमाश्रित्योत्कृष्टा स्थितिः प्रागेव बन्धनकरणे प्रतिपादिता । अत्र पुनः संक्रमे उत्कृष्टा स्थितिश्चिन्त्यमाना द्विधा प्राप्यते-बन्धोत्कृष्टा संक्रमोत्कृष्टा च । तत्र या बन्धादेव केवलादुत्कृष्टा स्थितिर्लभ्यते

सा बन्धोत्कृष्टा । या पुनर्बन्धेऽबन्धे वा सति संक्रमादुत्कृष्टा स्थितिर्भवति सा संक्रमोत्कृष्टा । तत्र यासामुत्तरप्रकृतीनां स्वस्वमूलप्रकृत्यपेक्षया स्थितेर्न्यूनता न भवति, किं तु तुल्यतैव, ता बन्धोत्कृष्टा ज्ञातव्याः । ताः सप्तनवतिसंख्याः । तद्यथा—ज्ञानावरणपञ्चकं, दर्शनावरणनवकं, अन्तरायपञ्चकं, आयुश्चतुष्टयं, असातवेदनीयं, नरकद्विकं, तिर्यग्द्विकं, एकेन्द्रियजाति, पञ्चेन्द्रियजातिः, तैजससप्तकं, औदारिकसप्तकं, वैक्रियसप्तकं, नीलतिक्तवर्जमशुभवर्णसप्तकं, अगुरुलघु, पराघातं, उपघातं, उच्छ्वासातपोद्योतानि, निर्माणं, षष्ठं संस्थानं, षष्ठं संहननं, अशुभविहायोगतिः, स्थावरं, त्रसचतुष्कं, अस्थिरषट्कं, नीचैर्गोत्रं, षोडश कषायाः, मिथ्यात्वं च । सर्वसंख्यया सप्तनवतिः । अत्र नरकतिर्यगायुषी यद्यपि स्वमूलप्रकृत्यपेक्षया तुल्यस्थितिके न भवतः, तथापि संक्रमोत्कृष्टत्वाभावात्ते बन्धोत्कृष्टे उक्ते । शेषास्त्वेकषष्टिप्रकृतयः संक्रमोत्कृष्टाः । ताश्चेमाः—सातवेदनीयं, सम्यक्त्वं, सम्यग्मिथ्यात्वं, नव नोकषायाः, आहारकसप्तकं, शुभवर्णाद्येकादशकं, नीलं, तिक्तं, देवद्विकं, मनुजद्विकं, द्वित्रिचतुरिन्द्रियजातयः, अन्तर्वर्जानि संस्थानानि, अन्तवर्जानि संहननानि, प्रशस्तविहायोगतिः, सूक्ष्मं, साधारणं, अपर्याप्तं, स्थिरशुभसुभगसुस्वरादेययशःकीर्तितीर्थकरोच्चैर्गोत्राणि च । तत्र बन्धोत्कृष्टानां मतिज्ञानावरणीयादिमिथ्यात्वषोडशकषायनरकद्विकादीनां यथाक्रमं त्रिंशत्सप्ततिचत्वारिंशद्विंशतिसागरोपमकोटीकोटीस्थितिकानां ज्येष्ठ उत्कृष्टः स्थितिसंक्रमः 'आ(व)लियदुगहृ त्ति' आवलिकाद्विकहीनः। तथाहि—स्थितिर्बद्धा सती बन्धावलिकायामतीतायां सत्यां संक्रामति । तत्राप्युदयावलिका सकलकरणायोग्येति कृत्वोदयावलिकात उपरितनी । ततो बन्धोत्कृष्टानां मतिज्ञानावरणीयानामुत्कृष्टः स्थितिसंक्रमो बन्धावलिकाद्विकहीन एव प्राप्यते । इहोदयवतीनामनुदयवतीनां वा

प्रकृतीनामुदयसमयादारभ्यावलिकामात्रा स्थितिरुदयावलिकेति पूर्वग्रन्थेषु व्यवह्रियते । तथा चाह- 'तीसासत्तरिचत्ता-लीसा' इत्यनेन ग्रन्थेनेह मिथ्यात्वस्य सप्ततिसागरोपमकोटीकोटीस्थितिरस्योत्कृष्टतः स्थितिसंक्रम आवलिकाद्विकहीन उक्तस्तथाऽप्यन्तर्मुहूर्तोनोऽवगन्तव्यः । यतो मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वा जघन्यतोऽप्यन्तर्मुहूर्तं कालं यावन्मिथ्यात्वे एवावतिष्ठते । ततः सम्यक्त्वं प्रतिपद्य मिथ्यात्वस्य स्थितिमन्तर्मुहूर्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च संक्रमयति । ततो-ऽन्तर्मुहूर्तोन एवास्योत्कृष्टः स्थितिसंक्रमः । वक्ष्यति च-'मिच्छत्तमुक्कोसो' इत्यादि । इह पुनर्यत् सप्तत्यादीत्युपादानं तदशे-षाणामपि बन्धोत्कृष्टानां प्रकृतीनां व्याप्तिपुरःसरमविशेषेणावलिकाद्विकहीनोत्कृष्टस्थितिसंक्रमप्रदर्शनार्थं । 'सेसाणमा(व)लिगतिगूणो त्ति' शेषाणां संक्रमोत्कृष्टानामावलिकात्रिकहीन उत्कृष्टः स्थितिसंक्रमः । तथाहि-बन्धावलिकायामतीतायां सत्यामावलिकात उपरितनी स्थितिः सर्वाप्यन्यत्र प्रकृत्यन्तरे आवलिकाया उपरि संक्रामति । तत्र च संक्रान्ता सती आवलिकामात्रं कालं यावत्सकलकरणायोग्येति कृत्वा संक्रमावलिकायामतीतायां सत्यामुदयावलिकात उपरितनी स्थिति-स्ततोऽप्यन्यत्र प्रकृत्यन्तरे संक्रामति । ततः संक्रमोत्कृष्टानामुत्कृष्टः स्थितिसंक्रम आवलिकात्रिकहीन एव । तद्यथा-नर-कद्विकस्य विंशतिसागरोपमकोटीकोटीप्रमाणामुत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकायामतीतायां सत्यामावलिकात उपरि-तनीं ता सर्वामपि स्थितिं मनुजद्विकं बध्नन् तत्र मनुजद्विके संक्रमयति, तत्र च संक्रान्ता सती आवलिकामात्रं कालं यावत्सकलकरणायोग्येति कृत्वा संक्रमावलिकायामतिक्रान्तायां सत्यामुदयावलिकात उपरितनीं तां सर्वामपि स्थितिं देवद्विकं बध्नन् तत्र संक्रमयति । एवमन्यासामपि संक्रमोत्कृष्टानामुत्कृष्टः स्थितिसंक्रम आवलिकात्रिकहीनो ज्ञातव्यः ॥२९॥

तदेवं यासां प्रकृतीनां बन्धे सति संक्रमादुत्कृष्टा स्थितिर्भवति, तासामेव तत् उत्कृष्टस्थितिसंक्रमपरिमाणमुक्तं। संप्रति पुनर्यासां बन्धेन विना संक्रमादेव केवलादुत्कृष्टा स्थितिर्लभ्यते, तासामुत्कृष्टस्थितिसंक्रमपरिमाणनिरूपणार्थमाह—

मिच्छत्तस्सुक्कोसो भिन्नमुहुत्तूणगो उ सम्मत्ते। मिस्सेवंतोकोडाकोडी आहारतित्थयरे ॥ ३० ॥

मिच्छत्तस त्ति—मिथ्यात्वस्योत्कृष्टः स्थितिसंक्रमो भिन्नमुहूर्तोनोऽन्तमुहूर्तोनस्तथा सम्यक्त्वे सम्यक्त्वस्य मिश्रे मिश्रस्य चोत्कृष्टः स्थितिसंक्रमो भिन्नमुहूर्तोनः। तुशब्दस्याधिकार्थसंसूचनादावलिकाद्विकहीनश्च वेदितव्यः। इयमत्र भावना—दर्शनमोहनीयत्रितयसत्कर्मा मिथ्यादृष्टिरुत्कृष्टे संक्लेशे वर्तमानो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्वा ततोऽन्तर्मुहूर्तमात्रानन्तरं मिथ्यात्वात् प्रतिपत्त्यविशुद्धिमासादयन् सम्यक्त्वं प्रतिपद्यते। ततो मिथ्यात्वस्योत्कृष्टां स्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणामन्तर्मुहूर्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च संक्रमयति। सा च संक्रान्ता सती संक्रमावलिकायामतीतायामुदयावलिकात उपरितनी सम्यक्त्वस्थितिमपवर्तनाकरणेन स्वस्थाने संक्रमयति। सम्यग्मिथ्यात्वस्थितिमपि संक्रमावलिकायामतीतायामुदयावलिकात उपरितनी सम्यक्त्वे संक्रमयति अपवर्तयति च। तदेवं मिथ्यात्वस्यान्तर्मुहूर्तोनः सम्यक्त्वसम्यग्मिथ्यात्वयोस्त्वन्तर्मुहूर्तावलिकाद्विकहीन उत्कृष्टः स्थितिसंक्रमः। इह तीर्थंकरस्याहारकसप्तकस्य चोत्कृष्टः स्थितिबन्धोऽन्तःसागरोपमकोटीकोटीप्रमाणः सत्कर्माप्येतेषामन्तःसागरोपमकोटीकोटीप्रमाणमेव ततः संशयः किमेताः संक्रमोत्कृष्टा उत बन्धोत्कृष्टा इति तदपनोदार्थमाह—'अंतोकोडाकोडीत्यादि' आहारके आहारकसप्तके तीर्थंकरे च संक्रमतः 'स्थितिसत्कर्म अन्तःसागरोपमकोटीकोटी, अत एताः संक्रमोत्कृष्टाः। यद्यपि च बन्धेऽप्यन्तःसागरोपमकोटीकोटीप्रमाणं स्थितिस-

त्कर्मान्निदितं, तथापि बन्धोत्कृष्टायाः स्थितेः सकाशात् संक्रमोत्कृष्टा स्थिति संख्येयगुणा द्रष्टव्या । उक्तं च चूर्णौ— "बंधठिइओ संतकम्मठिई संखिज्जगुणा" । ननु नामकर्मण उत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोटीप्रमाणा तत आहारके तीर्थंकरे च सक्रमादुत्कृष्टा स्थितिः प्राप्यमाणा बन्धावलिकोदयावलिकारहिता विंशतिसागरोपमकोटीकोटीप्रमाणेन लभ्यते, कथमुच्यते तीर्थंकराहारकयोः संक्रमतोऽप्युत्कृष्टा स्थितिरन्तःसागरोपमकोटीकोटीप्रमाणेति ? तदयुक्तमभिप्रायापरिज्ञानात् । तथाहि—तीर्थंकराहारकयोः प्रकृत्यन्तरस्य स्थितिः संक्रामति बन्धकाले नान्यदा, बन्धश्चानयोर्यथाक्रमं विशुद्धसम्यग्दृष्टेः संयतस्य च, विशुद्धसम्यग्दृष्टीनां संयतानां च स्थितिसत्कर्म सर्वेषामपि कर्मणामायुर्वर्जानामन्तःसागरोपमकोटीकोटीप्रमाणं नाधिकं । ततः संक्रमोऽप्येतावन्मात्र एव प्राप्यते नाधिक इत्यदोषः ॥ ३० ॥

संप्रति सर्वासां प्रकृतीनां बन्धोत्कृष्टानां संक्रमोत्कृष्टानां वा संक्रमणकाले यावती स्थितिः प्राप्यते तावतीं निर्दिदिक्षुराह—

सव्वासिं जट्ठिइगो सावलिगो सो अहाउगाणं तु । बंधुक्कोसुक्कोसो साबाहठिईए जट्ठिइगो ॥ ३१ ॥

सव्वासि ति-सर्वासां प्रकृतीनां संक्रमो यत्स्थितिकः संक्रमणकाले या स्थितिर्विद्यते सा यत्स्थितिरित्युच्यते । सा यस्य संक्रमस्यास्ति स संक्रमो यत्स्थितिकः । या स्थितिर्विद्यते यस्यासौ यत्स्थितिक इति बहुव्रीहिसमाश्रयणात् । सावलिक आवलिकया सहितो द्रष्टव्यः । एतदुक्तं भवति—यः प्रागुक्तः संक्रमः स आवलिकया सहितः सन् यावान् भवति तावती संक्रमकाले स्थितिरित्यर्थः । ततो बन्धोत्कृष्टानामावलिकाहीना संक्रमोत्कृष्टानां त्वावलिकाद्विकहीना संक्रमकाले

सर्वा स्थितिर्वेदितव्या । तथाहि—संक्लेशादिकारणवशात उत्कृष्टां स्थितिं वध्वा वन्धावलिकायामतीतायामुदयावलिकात उपरितनीं स्थितिमन्यत्र प्रकृत्यन्तरे संक्रमयितुमारभते । ततो बन्धोत्कृष्टानामेकावलिकाहीना संक्रमकाले सर्वा स्थितिः प्राप्यते । संक्रमोत्कृष्टानां पुनर्वन्धावलिकानां संक्रमावलिकयोरतीतयोरुदयावलिकातः परतो वर्तमानां स्थितिमन्यत्र संक्रमयति । तेन संक्रमोत्कृष्टानामावलिकाद्विकहीना संक्रमकाले सर्वा स्थितिरवाप्यते । अथायुषामुत्कृष्टा स्थितिः किं वन्धोत्कृष्टा उत संक्रमोत्कृष्टा ? उच्यते—वन्धोत्कृष्टैव । तथा चाह—'अहाउगाणमित्यादि' आयुषामुत्कृष्टः स्थितिसंक्रमो वन्धोत्कृष्ट एव न संक्रमोत्कृष्टः । यतो नायुषा परस्परं संक्रमः "मोहदुगाउगमूलप्पगडीण न परोप्परंमि संकमणं" इति-वचनात् । 'सावाहठिई इत्यादि' आयुषां सावाधा अवाधासहिता या सर्वा स्थितिः सा यत्स्थितिरवगन्तव्या । केवलं "वंधुक्कोसाणं आवलिगूणा ठिई जट्ठिइ" इतिवचनात् वन्धावलिकोना द्रष्टव्या । तथाहि—आयुर्बन्धे प्रवर्तमान एव प्रथमसमये यद्बद्धं दलिकं तद्बन्धावलिकातीतं सदुद्वर्तयति । तत उद्वर्तनारूपसंक्रमे वन्धावलिकोना सावाधा यत्स्थितिः प्राप्यते । अथवाऽपवर्तनापि निर्व्याघातत्वाविन्यायुषो वन्धावलिकायामतीतायां सर्वदैव प्रवर्तते । ततस्तामधिकृत्य यथोक्ता यत्स्थितिरवसेया ॥ ३१ ॥

तदेवमुक्तमुत्कृष्टस्थितिसंक्रमपरिमाणं । संप्रति जघन्यस्थितिसंक्रमपरिमाणप्रतिपादनावसरः । जघन्यस्थितिसंक्रमश्च द्विधा—स्वप्रकृतौ परप्रकृतौ च । तत्र स्वप्रकृतौ जघन्यस्थितिसंक्रमप्रतिपादनार्थमाह—

आवरणविग्घदंसणचउक्कलोभंतवेयगाऊणं । एगा ठिई जहन्नो जट्ठिइ समयाहिगावलिगा ॥ ३२ ॥

आवरण त्ति–पञ्चानां ज्ञानावरणीयप्रकृतीनां 'विग्घत्ति' पञ्चानामन्तरायप्रकृतीनां, चतसृणां दर्शनावरणप्रकृतीनां चक्षुरचक्षुरवधिकेवलदर्शनावरणलक्षणानां, सञ्ज्वलनलोभस्य, वेदकसम्यक्त्वस्य, चतुर्णां चायुषां, सर्वसंख्यया विंशतिप्रकृतीनां आत्मीयात्मीयसत्ताव्यवच्छेदसमये समयाधिकावलिकाशेषायां स्थितावुदयावलिका सकलकरणायोग्येति तदुपरितनावलिकात उपरितनी समयमात्रा स्थितिरपवर्तनाख्येन करणेनाधस्तने उदयावलिकात्रिभागे समयाधिके संक्रामति। तदा च सो-स्थितिपरिमाणं समयाधिकावलिका। तथा चाह–'जट्ठिइ' इत्यादि ॥ ३२ ॥

निद्दादुगस्स एक्का आवलिगदुगं असंखभागो य। जट्ठिइ हासछक्के संखिज्जाओ समाओ य ॥ ३३ ॥

निद्द त्ति–निद्राद्विकस्य निद्राप्रचलालक्षणस्य जघन्यः स्थितिसंक्रमः स्वसंक्रमान्ते स्वस्थितेरुपरितनी एका समयमात्रा स्थितिः, सा आवलिकाया अधस्तने त्रिभागे निक्षिप्यते। तदानीं च यत्स्थितिः सर्वा स्थितिः आवलिकाद्विकं तृतीयस्या आवलिकाया असंख्येयो भागः। अत्र वस्तुस्वभाव एव यन्निद्राद्विकस्यावलिकाऽसंख्येयभागाधिकावलिकाद्विकशेषायां स्थितावुपरितनी समयमात्रैका स्थितिः संक्रामति, न पुनर्मतिज्ञानावरणीयादीनामिव समयाधिकावलिकाशेषायामिति। सम्प्रति यासां परप्रकृतिषु संक्रमो जघन्यस्थितिसंक्रमस्ताः प्रतिपादयति–'हासछक्के' इत्यादि, हास्येनोपलक्षितं षट्कं हास्यषट्कं हास्यरत्यरतिभयशोकजुगुप्सालक्षणं, तस्य क्षपकेणापवर्तनाकरणेन संख्येयवर्षप्रमाणा स्थितिः कृता। ततः सा स्वनिर्लेपनावसरे संज्वलनक्रोधे प्रक्षिप्यमाणा जघन्यः स्थितिसंक्रमः ॥ ३३ ॥

सोणमुहुत्ता जट्ठिइ जहन्नबंधो उ पुरिससंजलणे। जट्ठिइ सगऊणजुत्तो आवलीगदुगूणओ तत्तो ॥३४॥

सोणमुहुत्त त्ति—संक्रमणकाले सैव संख्येयवर्षप्रमाणा स्थितिः सोनमुहूर्ताऽन्तर्मुहूर्तेनाभ्यधिका यत्स्थितिः सर्वा स्थितिः। तथाहि—अन्तरकरणे वर्तमानस्ता संख्येयवर्षप्रमाणां स्थितिं संज्वलनक्रोधे संक्रमयति, अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, कि तु तत ऊर्ध्वं, ततोऽन्तरकरणकालेनाभ्यधिका संख्येयवर्षप्रमाणा स्थितिर्हास्यषट्कस्य जघन्यस्थितिसंक्रमकाले यत्स्थितिः। 'जहन्नबंधो' इत्यादि, पुरुषवेदस्य संज्वलनानां च यो जघन्यः स्थितिबन्धः प्रागुक्तः। तद्यथा—पुरुषवेदस्याष्टौ संवत्सराणि, संज्वलनक्रोधस्य मासद्वयं, संज्वलनमानस्य मासः, संज्वलनमायाया अर्धमासः, स एव जघन्यः स्थितिब-न्धोऽबाधाकालोनस्तेषां जघन्यः स्थितिसंक्रमः। अबाधारहिता हि स्थितिरन्यत्र संक्रामति, तत्रैव कर्मदलिकसंभवात्, 'अबाधाकालोना कर्मस्थितिः कर्मनिषेकः' इति वचनात्, जघन्यस्थितिबन्धे चाऽबाधाऽन्तर्मुहूर्तप्रमाणा। न च जघन्य-स्थितिसंक्रमणकालेऽबाधाकालमध्ये प्राग्बद्धं सत्कर्म प्राप्यते, तस्य तदानीं सर्वस्यापि क्षीणत्वात्। ततोऽन्तर्मुहूर्तहीन एवैतेषां पुरुषवेदादीनां स्वस्वो जघन्यस्थितिबन्धो जघन्यस्थितिसंक्रमः, तदानीं चैतेषां यत्स्थितिः सर्वा स्थितिः स्वकीये-नोनेनाबाधारूपान्तर्मुहूर्तलक्षणेन युक्तोऽबाधाकालसहित इत्यर्थः। जघन्यः स्थितिबन्धः। ततः पुनरप्यावलिकाद्विके-नोनो हीनः सन् द्रष्टव्यः। एतदुक्तं भवति—जघन्यस्थितिसंक्रमेऽबाधाकालः प्रक्षिप्यते। तत्प्रक्षेपानन्तरं चावलिकाद्विकं ततोऽपसार्यते। तदुत्सारणे च कृते यावती स्थितिर्भवति, एतावती जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः। आवलिका-द्विकं कस्मादुत्सार्यत इति चेदुच्यते—बन्धव्यवच्छेदानन्तरं बन्धावलिकायामतीतायां चरमसमयबद्धाः पुरुषवेदादिप्रकृति-लताः संक्रमयितुमारब्धाः। आवलिकामात्रेण च कालेन ताः संक्रम्यन्ते। संक्रमावलिकाचरमसमये च जघन्यः स्थिति-

संक्रमः प्राप्यते । ततो बन्धावलिकासंक्रमावलिकारहित एवाबाधारहितो जघन्यः स्थितिबन्धो जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः ॥ ३४ ॥

संप्रति केवलिसत्कर्मणां जघन्यस्थितिसंक्रमप्ररूपणार्थमाह—

जोगंतियाण अंतोमुहुत्तिउ सेसयाण पल्लस्स। भागो असंखियतमो जहिंगो आलिगाइ सह ॥ ३५ ॥

जोगंतियाण त्ति—योगिनि सयोगिकेवलिनि संक्रममाश्रित्यान्तः पर्यन्तो यासां ता योग्यन्तिकाः नरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतवर्जाः शेषा नाम्नो नवतिप्रकृतयः सातासातवेदनीयोच्चैर्गोत्रनीचैर्गोत्राणि एतासां सयोगिकेवलिचरमसमये सर्वापवर्तनयाऽऽन्तर्मुहूर्तिकी स्थितिर्भवति । सा चापवर्त्यमाना उदयावलिकारहिता जघन्यस्थितिसंक्रमः, उदयावलिकासकलकरणायोग्येति कृत्वा नापवर्त्यते, तया चावलिकया सहिताऽपवर्तनारूपजघन्यस्थितिसंक्रमकाले तासां यत्स्थितिः । नन्वासां प्रकृतीनामयोगिकेवलिनि समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यः स्थितिसंक्रमः कस्मान्नाभिधीयते, क्षीणकषाय इव मतिज्ञानावरणीयादीनामिति ? उच्यते—अयोगिकेवली भगवान् सकलसूक्ष्मबादरयोगप्रयोगरहितो मेरुरिव निष्प्रकंपो नैकमप्यष्टानां करणानां मध्ये करणं प्रवर्तयति, निष्क्रियत्वात् । केवलमुदयप्राप्तानि वेदयते । ततः सयोगिकेवलिन एवैतासां जघन्यः स्थितिसंक्रमः प्राप्यते । 'सेसियाणेत्यादि' उक्तशेषाणां प्रकृतीनां स्त्यानर्द्धित्रिकमिथ्यात्वसम्यग्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणनपुंसकस्त्रीवेदनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मातपोद्योतसाधारणलक्षणानां द्वात्रिंशत्प्रकृतीना-

मात्मीयात्मीयक्षपणकाले यश्चरमः संछोजः पल्योपमासंख्येयभागमात्रः स जघन्यः स्थितिसंक्रमः । यत्स्थितिकस्तु सर्व-स्थितियुक्तस्तु स एवावलिकया सह युक्तो वेदितव्यः । अयमिह संप्रदायः—स्त्रीनपुंसकवेदवर्जानां प्रकृतीनामेकामधस्ता-दावलिकां मुक्त्वाशेषमुपरितनं पल्योपमासंख्येयभागमात्रं चरमखंडमन्यत्र संक्रमयति । ततस्तासा जघन्यस्थितिसंक्रम-काले यत्स्थितिः स एव जघन्यस्थितिसंक्रम आवलिकयाऽभ्यधिको वेदितव्यः । स्त्रीनपुंसकवेदयोस्त्वन्तर्मुहूर्तेनाभ्यधिको यतस्तयोश्चरमं स्थितिखंडमन्तरकरणे स्थितः सन् संक्रमयति । अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, किं तु तत ऊर्ध्वं, अन्तरकरणं चान्तर्मुहूर्तप्रमाणं । ततोऽन्तर्मुहूर्तयुक्तो जघन्यस्थितिसंक्रमस्तयोर्यत्स्थितिरवसेया । शेषाणां तु प्रकृ-तीनामन्तरकरणं न भवति, ततस्तासामावलिकायुक्त एव यत्स्थितिः ॥ ३५ ॥

तदेवमुक्तं जघन्यस्थितिसंक्रमपरिमाणं । संप्रति साद्यनादिप्ररूपणावसरः । सा च द्विधा—मूलप्रकृतीनामुत्तरप्रकृ-तीनां च । तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

मूलठिई अजहन्नो सत्तण्ह तिहा चउविहो मोहे। सेस विगप्पा तेसिं दुविगप्पा संकमे होंति ॥ ३६ ॥

मूलठिइ त्ति—इह जघन्यादन्यत्सर्वमजघन्यं यावदुत्कृष्टं । उत्कृष्टादन्यत्सर्वमपि यावज्जघन्यं तावदनुत्कृष्टं । तत्र मोह-नीयवर्जाना सप्तानां कर्मणामजघन्यस्थितिसंक्रमस्त्रिधा । तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च । तथाहि—ज्ञानावरणदर्शनावरणा-न्तरायाणां क्षीणकषायस्य समयाधिकावलिकाशेषाया स्थितौ वर्तमानस्य जघन्यः स्थितिसंक्रमो भवति । नामगोत्रवेदनीयायुषां तु सयोगिकेवलिचरमसमयेऽन्तर्मुहूर्तप्रमाणे आवलिकारहितो जघन्यः स्थितिसंक्रमः । स च सादिरध्रुवश्च । तस्मादन्यः

सर्वोऽपि स्थितिसंक्रमोऽजघन्यः। स चानादिः, ध्रुवोऽभव्यानां भव्यानामध्रुवः,। 'चउविहो मोहेत्ति' मोहे मोहनीयेऽजघन्यः स्थितिसंक्रमश्चतुर्विधः। तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—मोहनीयस्य जघन्यः स्थितिसंक्रमः सूक्ष्मसंपरायस्य क्षपकस्य समयाधिकावलिकायां शेषायां स्थितौ, ततोऽसौ सादिरध्रुवश्च। तस्माच्च जघन्यादन्यः सर्वोऽप्यजघन्यः। स च क्षायिकसम्यग्दृष्टेरुपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया। शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणास्तेषां कर्मणां संक्रमे संक्रमविषये द्विविकल्पा भवन्ति। तद्यथा—सादयोऽध्रुवाश्च। तथाहि—य एवोत्कृष्टां स्थितिं बध्नाति स एवोत्कृष्टं स्थितिसंक्रमं करोति, उत्कृष्टां च स्थितिं बध्नाति उत्कृष्टे संक्लेशे वर्तमानः। न चोत्कृष्टः संक्लेशः सर्वदैव लभ्यते, किं त्वन्तरान्तरा, शेषकालं त्वनुत्कृष्टः। तत एतौ द्वावपि साद्यध्रुवौ। जघन्यश्च साद्यध्रुवः प्रागेव भावितः ॥ ३६ ॥

संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

धुवसंतकम्मिगाणं तिहा चउद्धा चरित्तमोहाणं। अजहन्नो सेसेसु य दुहेतरासिं च सव्वत्थ ॥ ३७ ॥

धुव त्ति—ध्रुवं सत्कर्म यासां ता ध्रुवसत्कर्मिकास्त्रिंशदुत्तरशतसंख्याः। तथाहि—नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकतीर्थकरनामसम्यक्त्वसम्यग्मिथ्यात्वोच्चैर्गोत्रायुश्चतुष्टयलक्षणा अष्टाविंशतिसंख्या अध्रुवसत्कर्मिका। प्रकृतयस्ता अष्टापञ्चाशदधिकात् शतादपनीयन्ते। ततः शेषं त्रिंशदुत्तरमेव शतं ध्रुवसत्कर्मिकाणां भवति। तस्मादपि चारित्रमोहनीयप्रकृतयः पञ्चविंशतिसंख्या अपनीयन्ते, तासां पृथग्वक्ष्यमाणत्वात्। ततः शेषस्य पञ्चोत्तरशतस्य स्वस्वक्षपण-

पर्यवसाने जघन्यः स्थितिसंक्रमो भवति । स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स चानादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया । चारित्रमोहनीयप्रकृतीनां पञ्चविंशतिसंख्यानामजघन्यः स्थितिसंक्रमश्चतुर्धा । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—उपशमश्रेण्यामुपशान्तौ सत्यां संक्रमाभावः, उपशमश्रेणितः प्रच्यवने च पुनरप्यजघन्यं स्थितिसंक्रममारभते, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया । 'सेसेसु य दुहा' शेषेषूत्कृष्टानुत्कृष्टजघन्येषु द्विधा प्ररूपणा कर्तव्या । तद्यथा—सादिरध्रुवश्च । तत्रोत्कृष्टानुत्कृष्टयोर्यथा मूलप्रकृतिषु भावना कृता तथात्रापि कर्तव्या । जघन्यस्थितिसंक्रमः स्वस्वक्षयावसरे प्राप्यते, ततोऽसौ सादिरध्रुवश्च । 'इयरासिमित्यादि' इतरासामध्रुवसत्कर्मणां पूर्वोक्तानामष्टाविंशतिसंख्यानां सर्वत्रापि सर्वेष्वपि जघन्याजघन्योत्कृष्टानुत्कृष्टेषु द्विधा प्ररूपणा कर्तव्या । तद्यथा—सादिरध्रुवश्च । सा च साद्यध्रुवताऽध्रुवसत्कर्मत्वादेव परिभावनीया ॥ ३७ ॥

संप्रति क्रमप्राप्तं स्वामित्वमभिधानीयं । तच्च द्वेधा—उत्कृष्टस्थितिसंक्रमस्वामित्वं जघन्यस्थितिसंक्रमस्वामित्वं च । तत्रोत्कृष्टस्थितिसंक्रमस्वामित्वं प्रतिपिपादयिषुराह—

बन्धाउ उक्कोसो जासिं गंतूण आलिगं परउ । उक्कोससामिउ संकमाउ जासिं दुगं तासिं ॥ ३८ ॥

वंधाउ त्ति—यासां प्रकृतीनां बन्धात् बन्धनात् उत्कृष्टः स्थितिबन्धो भवति तासां त एवोत्कृष्टस्थितिबन्धका देवनैरयिकतिर्यङ्मनुष्याः । 'गंतूण आलिगं परउ त्ति' बन्धावलिकां गत्वाऽतिक्रम्य परतः बन्धावलिकायामतीतायामित्यर्थः । उत्कृष्टस्वामिनः उत्कृष्टस्थितिसंक्रमस्वामिन उत्कृष्टां स्थितिं संक्रमयन्तीत्यर्थः । यासां पुनः प्रकृतीनामुत्कृष्टा स्थितिः

संक्रमेण प्राप्यते तासां द्विकं बन्धावलिकासंक्रमावलिकालक्षणं गत्वाऽतिक्रम्य परत उत्कृष्टस्वामिनः, बन्धावलिकासंक्र-मावलिकयोरतीतयोरुत्कृष्टस्थितिसंक्रमस्वामिनो भवन्तीत्यर्थः ॥ ३८ ॥

सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टस्थितिसंक्रमस्वामिनमाह—

तस्संतकम्मिगो वंधिऊण उक्कोसगं मुहुत्तंतो। सम्मत्तमीसगाणं आवलिया सुद्धदिठी उ ॥ ३ए ॥

तस्संतकम्मिगो त्ति—तत्सत्कर्मा सम्यक्त्वसम्यग्मिथ्यात्वसत्कर्मा मिथ्यादृष्टिरुत्कृष्टां स्थितिं सप्ततिसागरोपमकोटीकोटी-प्रमाणां बध्वा ततोऽन्तर्मुहूर्तादनन्तरं मिथ्यात्वात् प्रतिपत्य सम्यक्त्वं प्रतिपद्यते। ततोऽसौ शुद्धदृष्टिः सम्यग्दृष्टिरन्त-र्मुहूर्तोनामुत्कृष्टां मिथ्यात्वस्थितिं सम्यक्त्वसम्यग्मिथ्यात्वयोः संक्रमयति। ततः संक्रमावलिकायामतीतायामुदयावलिकात उपरितनीं सम्यक्त्वस्थितिमपवर्तनाकरणेन स्वस्थाने संक्रमयति। सम्यग्मिथ्यात्वस्थितिमपि संक्रमावलिकायामतीताया-मुदयावलिकात उपरितनीं सम्यक्त्वे संक्रमयति, अपवर्तयति च। तत एवं तिसृणामपि दर्शनमोहनीयप्रकृतीनामुत्कृष्ट-स्थितिसंक्रमस्वामी सम्यग्दृष्टिरेवेति ॥ ३ए ॥

तदेवमुक्त उत्कृष्टस्थितिसंक्रमस्वामी, संप्रति जघन्यस्थितिसंक्रमस्वामिनमाह—

दंसणचउक्कविग्घावरणं समयाहिगालिगा छउमो। निद्दाणावलिगदुगे आवलियअसंखतमसेसे ॥ ४० ॥

दंसण त्ति—चक्षुरचक्षुरवधिकेवलदर्शनावरणीयानां 'विग्घ त्ति' पञ्चानामन्तरायप्रकृतीना पञ्चानां च ज्ञानावरणीयप्रकृ-तीनां जघन्यस्थितिसंक्रमस्वामी 'छउमो त्ति' क्षीणकषायवीतरागच्छद्मस्थः स्वगुणस्थानकस्य समयाधिकावलिकाशेषे

वर्तमानः । तथा निद्रयोर्निद्राप्रचलयोः स एव क्षीणकषायवीतरागछद्मस्थो द्वयोरावलिकयोः शेषयोस्तृतीयस्याश्चावलिकाया असंख्येयतमे भागे शेषे वर्तमानो जघन्यस्थितिसंक्रमस्वामी भवति ॥ ४० ॥

वेदकसम्यक्त्वस्य जघन्यस्थितिसंक्रमस्वामिनमाह—

समयाहिगालिगाए सेसाए वेयगस्स कयकरणे । सक्खवगचरमखंडगसंछुभणादिट्ठिमोहाणं ॥ ४१ ॥

समय त्ति–दर्शनमोहनीयक्षपको मनुष्यो जघन्यतोऽपि वर्षाष्टकादुपरि वर्तमानो मिथ्यात्वसम्यग्मिथ्यात्वे क्षपयित्वा सम्यक्त्वं च सर्वापवर्तनयाऽपवर्त्य सम्यक्त्व वेदयमानस्ततः सम्यक्त्वे क्षपितशेषे सति कश्चिच्चतसृणां गतीनामन्यतमस्यां गतौ प्रयाति । ततश्चतुर्गतिकानामन्यतमः सम्यक्त्वस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानः 'कयकरणे त्ति' कृतकरणः क्षपणकरणेऽभ्युद्यतो जघन्यस्थितिसंक्रमस्वामी भवति । मिथ्यात्वसम्यग्मिथ्यात्वयोर्जघन्यस्थितिसंक्रमस्वामिनमाह–'सक्खवगेत्यादि' दृष्टिमोहयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोः क्षपणकाले यच्चरमखंडं संछुभणं सर्वापवर्तनेनापवर्त्य परस्थाने पल्योपमासंख्येयभागमात्रचरमखंडे प्रक्षेपणं तत्र वर्तमानो मनुष्योऽविरतसम्यग्दृष्टिर्देशविरतः प्रमत्तोऽप्रमत्तो वा जघन्यस्थितिसंक्रमस्वामी भवति ॥ ४१ ॥

समउत्तरालिगाए लोभे सेसाए सुहुमरागस्स । पढमकसायाण विसंजोयणसंछोभणाए उ ॥ ४२ ॥

समउत्तरेति–सूक्ष्मसंपरायस्य स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य लोभे लोभस्य जघन्यः स्थितिसंक्रमो भवति । इदमिह तात्पर्यम्–सूक्ष्मसंपरायः स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानो

लोजमत्कजघन्यस्थितिसंक्रमस्वामी जवति । अनन्तानुबन्धिनां जघन्यस्थितिसंक्रमस्वामिनमाह–'पढमेत्यादि' प्रथमकषायाणामनन्तानुबन्धिनां विसंयोजने विनाशने या चरमा पल्योपमासंख्येयजागमात्रा संछोजणा प्रक्षेपणं तत्र वर्तमानश्चतुर्गतिकानामन्यतमः सम्यग्दृष्टिर्जघन्यस्थितिसंक्रमस्वामी जवति ॥ ५२ ॥

चरिमसजोगे जा आत्थ तासि सो चेव सेसगाणं तु। खवगक्कमेण अनियट्टिबायरो वेयगो वेए॥ ५३॥

चरिमत्ति–या (स) योग्यन्तिकाः प्रकृतयश्चतुर्नवतिसंख्याः प्रागुक्तास्तासा स एव सयोगिकेवली चरमापवर्तने वर्तमानो जघन्यस्थितिसंक्रमस्वामी जवति । शेषप्रकृतीना जघन्यस्थितिसंक्रमस्वामिनमाह–'सेसगाणमित्यादि' शेषाणां स्त्यानर्द्धित्रिकनामत्रयोदशकाष्टकषायनवनोकषायसंज्वलनक्रोधमानमायालक्षणानां षड्त्रिंशत्प्रकृतीनां क्षपणक्रमेण क्षपणपरिपाट्या चरमे पल्योपमासंख्येयजागादिमात्रे संछोजणे वर्तमानोऽनिवृत्तिबादरो जघन्यस्थितिसंक्रमस्वामी जवति । 'वेयगो वेदेत्ति' वेदको वेदे वेदस्य जघन्यस्थितिसंक्रमस्वामी । इयमत्र जावना–पुरुषवेदोदये वर्तमानः पुरुषवेदस्य, स्त्रीवेदोदये वर्तमानः स्त्रीवेदस्य, नपुंसकवेदोदये वर्तमानो नपुंसकवेदस्यानिवृत्तिबादरसंपरायश्चरमसंक्रमं कुर्वन् जघन्यस्थितिसंक्रमस्वामी वेदितव्यः । अन्येन हि वेदेन क्षपकश्रेणिमारूढस्यान्यस्य वेदस्य जघन्यस्थितिसंक्रमो न लन्यते । तथाहि–येन वेदेन क्षपकश्रेणिमारोहति तस्य वेदस्योदयोदीरणापवर्तनादिजिः स्थितेः (तिः) पुद्गलाश्च बहवः परिसटन्ति । ततो यद्यपि नपुंसकवेदेन क्षपकश्रेणिं प्रपन्नः स्त्रीवेदनपुंसकवेदौ युगपत्क्षपयति, तथापि नपुंसकवेदस्यैव जघन्यः स्थितिसंक्रमः प्राप्यते, न स्त्रीवेदस्य उदयोदीरणयोरजावात् । स्त्रीवेदेन च प्रतिपन्नो नपुंसकवेदक्षयानन्तरमन्तर्मुहूर्तेन कालेन स्त्रीवेदं

क्षपयति। एतावता च कालेनोदयोदीरणाभ्या वह्वी स्थितिस्त्रुट्यति। यद्यपि च पुरुषवेदेनापि प्रतिपन्नस्यैतावान् कालो लभ्यते तथापि तस्य स्त्रीवेदसत्के उदयोदीरणे न भवत इति स्त्रीवेदप्रतिपन्नस्यैव स्त्रीवेदस्य जघन्यः स्थितिसंक्रमो, न शेषस्य। तथा पुरुषवेदेन क्षपकश्रेणिं प्रपन्नो हास्यादिषट्कक्षयानन्तरं पुरुषवेदं क्षपयति, अन्यथा तु हास्यादिषट्कसहितं। उदितस्य च वेदस्योदीरणापि प्रवर्तते इति वह्वी स्थितिस्त्रुट्यति। पुरुषवेदस्यापि पुरुषवेदारूढस्यैव जघन्यः स्थितिसंक्रमो न शेषस्य ॥ ४३ ॥

तदेवमुक्तः स्थितिसंक्रमः, संप्रत्यनुभागसंक्रमाभिधानावसरः, तत्र चैतेऽर्थाधिकारास्तद्यथा—भेदस्पर्धकप्ररूपणा, विशेषलक्षणप्ररूपणा, उत्कृष्टानुभागसंक्रमप्रमाणप्ररूपणा, जघन्यानुभागसंक्रमप्रमाणप्ररूपणा, साद्यनादिप्ररूपणा, स्वामित्वं चेति। तत्र भेदप्ररूपणार्थमाह—

मूलुत्तरपगइगतो अणुभागे संकमो जहा बंधे। फड्डगनिद्देसो सिं सव्वेयरघायऽघाईणं ॥ ४४ ॥

मूलुत्तरत्ति—अनुभागेऽनुभागविषये संक्रमो मूलोत्तरप्रकृतिगतः। किमुक्तं भवति ? द्विधाऽनुभागसंक्रमस्तद्यथा—मूलप्रकृत्यनुभागसंक्रम उत्तरप्रकृत्यनुभागसंक्रमश्च। ते च मूलोत्तरप्रकृतिभेदा यथा वन्धे वन्धशतकेऽभिहितास्तथात्रापि द्रष्टव्याः।कृता भेदप्ररूपणा, स्पर्धकप्ररूपणार्थमाह—'फड्डगेत्यादि' आसां सर्वघातिनीनां देशघातिनीनामघातिनीनां प्रकृतीनां स्पर्धकनिर्देशः स्पर्धकप्ररूपणा यथा शतके कृता तथात्रापि कर्तव्या। तथापि किंचिदुच्यते—तत्र च केवलज्ञानावरणकेवलदर्शनावरणाद्यद्वादशकषायनिद्रापंचकमिथ्यात्वलक्षणानां विंशतिप्रकृतीना रसस्पर्धकानि सर्वघातीनि, सर्वं स्वघात्यं

केवलज्ञानादिलक्षणं गुणं घातयंतीति सर्वघातीनि, तानि च ताम्रभाजनवत् निश्छिद्राणि घृतवत् स्निग्धानि द्राक्षावत्तनु-
प्रदेशोपचितानि स्फटिकाभ्रहारवच्चातीव निर्मलानि । उक्तं च-"नो घाएइ सविसयं सयलं नो होइ सव्वघाइरसो । नो
निच्छिड्डो निद्धो तणुओ फलिहब्भहरविमलो ॥ १ ॥" मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्व-
लनचतुष्टयनवनोकषायान्तरायपञ्चकलक्षणानां पञ्चविंशतिसंख्यानां देशघातिप्रकृतीनां देशघातीनि रसस्पर्धकानि भवन्ति ।
स्वस्य ज्ञानादेर्गुणस्य देशमेकदेशं मतिज्ञानादिलक्षणं घातयन्तीत्येवंशीलानि देशघातीनि । तानि चानेकप्रकारच्छिद्रशतसं-
कुलानि । तथाहि-कानिचिदनेकबृहच्छिद्रशतसंकुलानि वंशदलनिर्मापितकटवत् । कानिचिन्मध्यमानेकच्छिद्रशतसंकुलानि
कंबलवत् । कानिचित्पुनरतीवसूक्ष्मानेकच्छिद्रशतसंकुलानि तथाविधवस्त्रवत् । तथा तानि स्तोकस्नेहानि विशिष्टनैर्मल्य-
रहितानि च भवन्ति । तथा चोक्तं-"देसविघाइत्तणओ इयरो कडकंबलंसुसंकासो । विविहबहुछिद्दभरिओ अप्पसिणेहो
अविमलो य ॥ १ ॥" वेदनीयायुर्नामगोत्राणां संबन्धिन एकादशोत्तरप्रकृतिशतस्याघातिनो रसस्पर्धकान्यघातीनि वेदि-
तव्यानि । केवलं वेद्यमानसर्वघातिरसस्पर्धकसंबन्धात्तान्यपि सर्वघातीनि भवन्ति । यथेह लोके स्वयमचौराणामपि
चौरसंबन्धाच्चौरता । उक्तं च-"जाण न विसओ घाइत्तणम्मि ताणं पि सव्वघाइरसो । जायइ घाइसगासेण चोरया
वेहऽचोराणं ॥ १ ॥" ॥ ४४ ॥

संप्रति दर्शनमोहनीयस्य स्पर्धकप्ररूपणार्थमाह—

सव्वेसु देसघाईसु सम्मत्तं तदुवरिं तु वा मिस्सं । दारुसमाणस्साणंतमोत्ति मिच्छत्तमुप्पिमओ ॥ ४५ ॥

सव्वेसु त्ति—इह दर्शनमोहनीयस्य सत्कर्म प्रतीत्य द्विविधानि रसस्पर्धकानि । तद्यथा—देशघातीनि सर्वघातीनि च । तत्र यानि देशघातीनि स्पर्धकानि एकस्थानकरसोपेतानि द्विस्थानकरसोपेतानि च । तेषु सर्वेष्वपि सम्यक्त्वं 'तदुवरिं तु वा मिस्सं' यत्र देशघातीनि स्पर्धकानि निष्ठितानि तत उपरि सम्यग्मिथ्यात्वस्य स्पर्धकानि भवन्ति । तानि च सर्वघातीनि द्विस्थानकरसोपेतानि च । तानि सम्यग्मिथ्यात्वस्य स्पर्धकानि तावद्द्रष्टव्यानि यावत् 'दारुसमाणस्साणंतमोत्ति' दारुसमान इति द्विस्थानको रसस्तस्य संबन्धिनां स्पर्धकानामनन्ततमो भागो गतो भवति । ततो यत्र सम्यग्मिथ्यात्वस्य स्पर्धकानि निष्ठां यान्ति, ततः प्रभृति द्विस्थानकत्रिस्थानकचतुःस्थानकरसोपेतानि स्पर्धकानि सर्वाण्यपि मिथ्यात्वस्य द्रष्टव्यानि ॥ ४५ ॥

कृता स्पर्धकप्ररूपणा, संप्रति विशेषलक्षणप्ररूपणार्थमाह—

तत्थट्ठपयं उव्वट्टिया व ओवट्टिया व अविभागा । अणुभागसंकमो एस अन्नपगइं निया वावि ॥ ४६ ॥

तत्थ त्ति—तत्रानुभागसंक्रमेऽर्थपदं याथात्म्यनिर्धारणमिदं यदुत उद्वर्तिताः प्रभूतीकृता यद्वाऽपवर्तिता ह्रस्वीकृता अथवाऽन्यां प्रकृतिं नीता अन्यप्रकृतिस्वभावेन परिणमिताः अविभागा अनुभागाः । एष सर्वोऽप्यनुभागसंक्रमः । तत्र मूलप्रकृतीनामुद्वर्तनापवर्तनारूपौ द्वावेव संक्रमौ नान्यप्रकृतिनयनरूपः संक्रमः, तासां परस्परं संक्रमाभावात् । उत्तरप्रकृतीना तु त्रयोऽपि संक्रमाः ॥ ४६ ॥

तदेवमुक्तं विशेषलक्षणं, संप्रत्युत्कृष्टानुभागसंक्रमप्रमाणप्रतिपादनार्थमाह—

दुविहपमाणे जेट्ठो सम्मत्तदेसघाइ दुट्ठाणा । नरतिरियाऊआयवमिस्से वि य सव्वघाइम्मि ॥ ४७ ॥

दुविह त्ति–द्विविधे प्रमाणे स्थानप्रमाणे घातित्वप्रमाणे च ज्येष्ठ उत्कृष्टोऽनुभागसंक्रमः सम्यक्त्वस्य देशघातिनि द्विस्थानके रसस्पर्धके संक्रम्यमाणे वेदितव्यः । एतदुक्तं भवति–सम्यक्त्वस्य घातित्वमाश्रित्य देशघातिस्थानमाश्रित्य सर्वोत्कृष्टद्विस्थानकरसोपेतं स्पर्धकपटलं यदा संक्रामति तदा तस्योत्कृष्टोऽनुभागसंक्रम इति । नरायुस्तिर्यगायुरातपसम्यग्मिथ्यात्वानां स्थानं प्रतीत्य सर्वोत्कृष्टद्विस्थानकरसोपेतघातित्वमाश्रित्य सर्वघातिनि रसस्पर्धके उत्कृष्टोऽनुभागसंक्रमः । अत्रापीयं भावना–नरतिर्यगायुरातपसम्यग्मिथ्यात्वानां सर्वोत्कृष्टद्विस्थानकरसोपेतं सर्वघातिरसस्पर्धकं यदा संक्रामति तदा स तेषामुत्कृष्टोऽनुभागसंक्रमः । अत्र नरतिर्यगायुरातपानां "इति चउठाणा उ सेसाउ" इतिवचनात् द्वित्रि-चतुःस्थानकरससंभवेऽपि यत् द्विस्थानकरसस्पर्धकस्यैव संक्रमे उत्कृष्टोऽनुभागसंक्रम उक्तः, स एवं ज्ञापयति–एतेषां कर्मणां तथास्वाभाव्यादेव त्रिस्थानकचतुःस्थानकरसस्पर्धकानामुद्वर्तनापवर्तनाप्रकृत्यन्तरनयनरूपस्त्रिप्रकारोऽपि संक्रमो न भवतीति ॥ ४७ ॥

सेसासु चउठाणे मंदो संमत्तपुरिससंजलणे । एगठाणे सेसासु सव्वघाइंमि दुठाणे ॥ ४८ ॥

सेसासु त्ति–शेषाणामुक्तव्यतिरिक्ताना प्रकृतीनां स्थानमाश्रित्य सर्वोत्कृष्टश्चतुःस्थानको घातित्वमाश्रित्य सर्वघाती रसो यदा संक्रामति तदा स तासामुत्कृष्टोऽनुभागसंक्रमः । तदेवमुक्तमुत्कृष्टानुभागसंक्रमप्रमाणं । संप्रति जघन्यानुभागसंक्रम-

प्रमाणप्रतिपादनार्थमाह—'मंदो त्ति' सम्यक्त्वस्य पुरुषवेदस्य संज्वलनाना चैकस्थानके रसे संक्रामति मन्दो जघन्योऽनुभागसंक्रमो वेदितव्यः । एतदुक्तं भवति—सम्यक्त्वस्य सर्वविशुद्ध एकस्थानको रसो यदा संक्रामति तदा तस्य जघन्योऽनुभागसंक्रमः, पुरुषवेदसंज्वलनानां च क्षपणकाले यानि समयोनावलिकाद्विकबद्धानि स्पर्धकानि एकस्थानरसोपेतानि तानि यदा संक्रामन्ति तदा स तेषां जघन्योऽनुभागसंक्रमः । 'सेसासु इत्यादि' शेषासूक्तव्यतिरिक्तासु सर्वासु प्रकृतिषु सर्वघातिनि द्विस्थानकरसोपेते स्पर्धके संक्रम्यमाणे जघन्योऽनुभागसंक्रमो वेदितव्यः । इदमत्र तात्पर्य—सम्यक्त्वपुरुषवेदसंज्वलनचतुष्टयव्यतिरिक्तानां शेषप्रकृतीनां घातित्वमाश्रित्य सर्वघातीनि, स्थानमाश्रित्य द्विस्थानकरसोपेतानि मन्दानुभावानि यानि रसस्पर्धकानि तानि यदा संक्रामन्ति तदा स तासां जघन्योऽनुभागसंक्रमः । इह यद्यपि मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणान्तरायपञ्चकानामेकस्थानकोऽपि रसो बन्धे प्राप्यते तथापि क्षयकालेऽपि प्राग्बद्धो द्विस्थानकोऽपि रसः संक्रामति, नैकस्थानकः केवल इति जघन्यसंक्रमविषयतया नैतेषामेकस्थानकरस उक्तः ॥ ४८ ॥

तदेवमुक्तं जघन्यानुभागसंक्रमपरिमाणं । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा—मूलप्रकृतिसाद्यनादिप्ररूपणा उत्तरप्रकृतिसाद्यनादिप्ररूपणा च । तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

अजहण्णो तिण्णि तिहा मोहस्स चउव्विहो अहाउस्स । एवमणुक्कोसो सेसिगाण तिविहो अणुक्कोसो ४९

सेसा मूलपगइसु दुविहा अह उत्तरासु अजहण्णो । सत्तरसण्ह चउद्धा तिविकप्पो सोलसण्हं तु ॥ ५० ॥

अजहण्णो त्ति–ज्ञानावरणदर्शनावरणान्तरायलक्षणानां त्रयाणां कर्मणामजघन्योऽनुभागसंक्रमस्त्रिप्रकारस्तद्यथा–अनादिरध्रुवो ध्रुवश्च तथाहि–क्षीणकषायस्यैतेषां कर्मणां समयाधिकावलिकाशेषायां स्थितौ जघन्यानुभागसंक्रमो भवति, स च सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यजघन्यः, स चानादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । मोहनीयस्याजघन्योऽनुभागसंक्रमश्चतुर्विधः । तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि–सूक्ष्मसंपरायस्य क्षपकस्य मोहनीयस्य समयाधिकावलिकाशेषायां स्थितौ जघन्योऽनुभागसंक्रमो भवति । स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्योपशान्तमोहगुणस्थानके न भवति । उपशान्तमोहगुणस्थानकाच्च प्रतिपततः सतः पुनरपि भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् । आयुषस्त्वनुत्कृष्टोऽनुभागसंक्रमश्चतुर्विधः । तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि–अप्रमत्तो देवायुष उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायाः परतः संक्रमयितुमारभते । तं च तावत्संक्रमयति यावदनुत्तरसुरभवे स्थितस्य त्रयस्त्रिंशत्सागरोपमाण्यतिक्रामन्ति । आवलिकामात्रा स्थितिरवतिष्ठते । ततोऽन्योऽनुभागसंक्रम आयुषः सर्वोऽप्यनुत्कृष्टः । स च सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । शेषाणां नामगोत्रवेदनीयानामनुत्कृष्टोऽनुभागसंक्रमस्त्रिविधस्त्रिप्रकारः । तद्यथा–अनादिरध्रुवो ध्रुवश्च । तथाहि–सूक्ष्मसंपरायेण क्षपकेण स्वगुणस्थानकस्य चरमसमये तेषां नामगोत्रवेदनीयानां सर्वोत्कृष्टोऽनुभागो बध्यते । बन्धावलिकायामतीतायां यावत्सयोगिचरमसमयस्तावत्संक्रामति । स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चानादिः, आदेरभावात् । ध्रुवाध्रुवौ पूर्ववत् । उक्तशेषेषु विकल्पेषु द्विधा प्ररूपणा कर्तव्या । तद्यथा–सादिर-

॥ ९४ ॥

ध्रुवश्च । तत्र चतुर्णां घातिकर्मणा उत्कृष्टानुत्कृष्टजघन्येषु जघन्यः सादिरध्रुवश्च भावित एव । उत्कृष्टः कदाचिन्मिथ्यादृष्टिर्भवति, अन्यदा तु तस्याप्यनुत्कृष्टः, अत एतौ साद्यध्रुवौ । शेषाणा चतुर्णामघातिकर्मणां जघन्याजघन्योत्कृष्टेषु मध्ये उत्कृष्टो भावित एव । जघन्यः सूक्ष्मस्यापर्याप्तस्यैकेन्द्रियस्य हतप्रभूतानुभागसत्कर्मणो लभ्यते, नान्यस्य । प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यः । तत एतावपि साद्यध्रुवौ । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह–'अहेत्यादि' उत्तरासूत्तरप्रकृतिषु मध्ये सप्तदशानां कर्मणामनन्तानुबन्धिचतुष्टयसंज्वलनचतुष्टयनवनोकषायलक्षणानामजघन्योऽनुभागसंक्रमश्चतुर्धा । तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि–एतेषामनन्तानुबन्धिवर्जानां त्रयोदशकर्मणां स्वस्वक्षयपर्यवसानावसरे जघन्यस्थितिसंक्रमकाले जघन्योऽनुभागसंक्रमः प्राप्यते । अनन्तानुबन्धिनां पुनरुद्वलनासंक्रमेणोद्वल्य भूयोऽपि मिथ्यात्वप्रत्ययतो बद्धानां बन्धावलिकायामतीताया द्वितीयावलिकायाः प्रथमसमये जघन्योऽनुभागसंक्रमः । एतदन्यः पुनः सर्वोऽप्येतासां सप्तदशप्रकृतीनामजघन्यः । स चोपशमश्रेण्यामुपशान्तानामेतासां न भवति ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । तथा पञ्चविधज्ञानावरणस्त्यानर्द्धित्रिकवर्जपड्दर्शनावरणपञ्चविघ्नान्तरायलक्षणानां षोडशकर्मणामजघन्योऽनुभागसंक्रमस्त्रिविकल्पस्त्रिप्रकारस्तद्यथा–अनादिरध्रुवो ध्रुवश्च । तथाहि–एतेषां षोडशकर्मणां जघन्यानुभागसंक्रमः क्षीणकषायस्य स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य प्राप्यते । ततोऽन्यः सर्वोऽप्यजघन्यः, तस्य चादिर्न विद्यते इत्यनादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया ॥ ५० ॥

तिविहो छत्तीसाए णुक्कोसो ह नवगस्स य चउद्धा। एयासिं सेसा सेसगाण सव्वे य दुविगप्पा ॥५१॥

तिविहो त्ति–सातवेदनीयपञ्चेन्द्रियजातितैजसकार्मणसमचतुरस्रसंस्थानशुक्लोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघूष्णशीत (स्निग्धोष्ण) लक्षणशुभवर्णादिकादशकागुरुलघूच्छ्वासपराघातप्रशस्तविहायोगतित्रसादिदशकनिर्माणलक्षणाना षट्त्रिंशत्प्रकृतीनामुत्कृष्टोऽनुभागसंक्रमस्त्रिविधस्त्रिप्रकारः। तद्यथा–अनादिर्ध्रुवोऽध्रुवश्च। तथाहि–आसां षट्त्रिंशत्प्रकृतीनां क्षपक आत्मीयात्मीयबन्धव्यवच्छेदकाले उत्कृष्टमनुभागं बध्नाति बद्ध्वा च बन्धावलिकायामतीतायां संक्रमयितुमारभते। तं च तावत्संक्रमयति यावत्सयोगिकेवलिचरमसमयः। ततः क्षपकसयोगिकेवलिवर्जस्य शेषस्यानुत्कृष्ट एवानुभाग एतासां संक्रामति। तस्य चादिर्न विद्यत इत्यनादिः ध्रुवाध्रुवौ अभव्यभव्यापेक्षया। 'अहेत्यादि' अथशब्दस्तथा निर्धारणे। नवकस्य उद्योतवज्रर्षभनाराचसंहननौदारिकसप्तकलक्षणस्यानुत्कृष्टोनुभागसंक्रमश्चतुर्विधः। तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि–एतेषामुद्योतवर्जानामष्टानां कर्मणा सम्यग्दृष्टिर्देवोऽत्यन्तविशुद्धपरिणाम उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां संक्रमयति। उद्योतनाम्नः पुनः सप्तमनरकपृथिव्यां वर्तमानो नैरयिको मिथ्यादृष्टिः सम्यक्त्वं प्रतिपत्तुकाम उत्कृष्टमनुभागबन्धं करोति। ततो बन्धावलिकायामतीतायां संक्रमयति। तं च जघन्येनान्तर्मुहूर्तमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां यावत्। इह यद्यपि सप्तमनरकपृथिव्यां चरमेऽन्तर्मुहूर्तेऽवश्यं मिथ्यात्वं गच्छति तथाप्यग्रेतने भवेऽन्तर्मुहूर्तानन्तरं यः सम्यक्त्वं प्रतिपद्यते स इह गृह्यते। ततोऽपान्तराले स्तोको मिथ्यात्वकालो भवन्नपि चिरंतनग्रन्थेषु न विवक्षित इत्यस्माभिरपि द्वे षट्षष्टी सागरोपमाणां यावदित्युक्तं। तत उत्कृष्टात्प्रतिपतितस्यानुत्कृष्टः। स च सादिः।

तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ भव्याभव्यापेक्षया । 'एयासिमित्यादि' एतासां सप्तदशषोडशषट्त्रिंशन्नवकरूपाणां प्रकृतीनामुक्तशेषा विकल्पा उक्तसप्तदशादिव्यतिरिक्तानां च शेषप्रकृतीनामशीतिसंख्यानां सर्वेऽप्युत्कृष्टानुत्कृष्टजघन्याजघन्या द्विविकल्पा द्विप्रकारा ज्ञातव्याः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—सप्तदशानां षोडशानां चोत्कृष्टोऽनुभागसंक्रमो मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य प्राप्यते । शेषकालं तु तस्याप्यनुत्कृष्ट एव । अत एव तौ द्वावपि साद्यध्रुवौ । जघन्यो भावित एव । तथा षट्त्रिंशत्प्रकृतीनां नवकस्य च जघन्योऽनुभागसंक्रमः सूक्ष्मैकेन्द्रिये हतप्रभूतानुभागसत्कर्मणि प्राप्यते । प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्यस्तत एतौ साद्यध्रुवौ । उत्कृष्टो भावित एव । शेषाणां प्रकृतीनां संज्ञिनि पञ्चेन्द्रिये पर्याप्ते शुभानां वैक्रियसप्तकदेवद्विकोच्चैर्गोत्रातपतीर्थकराहारकसप्तकमनुजद्विकनरकायुर्वर्जशेषायुस्त्रयरूपाणां चतुर्विंशतिसंख्यानां विशुद्धावशुभानां च स्त्यानर्द्धित्रिकासातवेदनीयदर्शनमोहनीयत्रितयाप्रत्याख्यानप्रत्याख्यानावरणकषायनरकायुर्नरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयप्रथमवर्जसंस्थानप्रथमवर्जसंहननाशुभवर्णादिनवकाप्रशस्तविहायोगत्युपघातस्थावरदशकनीचैर्गोत्ररूपाणां षट्पञ्चाशत्संख्यानां संक्लेशे उत्कृष्टोऽनुभागबन्धो लभ्यते । शेषकालं त्वनुत्कृष्टः । एवं संक्रमोऽपि । तत एतौ साद्यध्रुवौ । जघन्योऽनुभागसंक्रमः पुनः सूक्ष्मैकेन्द्रिये हतप्रभूतानुभागसत्कर्मणि प्राप्यते । प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्यः । तत एतावपि साद्यध्रुवौ ॥ ५१ ॥

कृता साद्यनादिप्ररूपणा। संप्रति स्वामित्वं वक्तव्यं। तत्र द्विधा–उत्कृष्टानुभागसंक्रमस्वामित्वं, जघन्यानुभागसंक्रमस्वामित्वं च। तत्रोत्कृष्टानुभागसंक्रमस्वामित्वमभिधित्सुस्तत्कालप्रमाणनियमनार्थमिदमाह—

उक्कोसगं पबंधिय आवलियमइच्छिऊण उक्कोसं। जाव न घाएइ तगं संकमइ य आ मुहुत्तंतो ॥५२॥

उक्कोसगं ति–मिथ्यादृष्टिरुत्कृष्टमनुभागं बद्ध्वा तत आवलिकामतिक्रम्य बन्धावलिकायाः परत इत्यर्थः। तमुत्कृष्टमनुभागं संक्रमयति तावद्यावन्न विनाशयति कियन्तं कालं यावत्पुनर्न विनाशयतीति चेदुच्यते–आमुहूर्तान्तः अन्तर्मुहूर्तं यावदित्यर्थः। परतो मिथ्यादृष्टिः शुभप्रकृतीनामनुभागं संक्लेशेन अशुभप्रकृतीनां तु विशुद्ध्याऽवश्यं विनाशयति॥५२॥

संप्रति स्वामी प्रतिपाद्यते—

असुभाणं अन्नयरो सुहुम अपज्जगाइ मिच्छो य। वज्जिय असंखवासाउए य मणुओववाए य ॥५३॥

असुभाणं ति–अशुभाना प्रकृतीना पञ्चविधज्ञानावरणनवविधदर्शनावरणासातवेदनीयाष्टाविंशतिविधमोहनीयनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयप्रथमवर्जसंस्थानप्रथमवर्जसंहनननीलकृष्णदुरभिगन्धतिक्तकटुरूक्षशीतकर्कशगुरूपघाताप्रशस्तविहायोगतिस्थावरसूक्ष्मसाधारणापर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रपञ्चविधान्तरायलक्षणानामष्टाशीतिसंख्यानामन्यतरः सूक्ष्मापर्याप्तादिः, आदिशब्दात् पर्याप्तसूक्ष्मपर्याप्तापर्याप्तबादरद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञितिर्यक्पञ्चेन्द्रियमनुष्यदेवनारकपरिग्रहः। तत एतेषामन्यतमो मिथ्यादृष्टिरुत्कृष्टमनुभागसंक्रमं करोति। केवलमसंख्येयवर्षायुषो मनुष्यतिरश्चो ये च देवाः स्वभवाच्च्युता मनुष्येपूत्पद्यन्ते तांश्च मनुष्योपपातान् आनतप्रमुखान्

देवान् वर्जयित्वा । एते हि मिथ्यादृष्टयोऽपि नाशुभप्रकृतीनामुक्तस्वरूपाणामुत्कृष्टमनुभागं बध्नन्ति, तीव्रसंक्लेशाभावात् । ततश्चोत्कृष्टानुभागसंक्रमाभाव इति तेषां वर्जनं ॥ ५३ ॥

सव्वत्थायावुज्जोयमणुयगइ पंचगाण आऊणं । समयाहिगालिगा सेसगत्ति सेसाण जोगंता ॥ ५४ ॥

सव्वत्थ त्ति–सर्वत्र सर्वेषु सूक्ष्मापर्याप्तादिषु नैरयिकपर्यवसानेषु असंख्येयवर्षायुस्तिर्यग्मनुष्येषु मनुष्योपपातेषु च देवेषु आनतादिषु मिथ्यादृष्टिषु सम्यग्दृष्टिषु वा । आतपस्योद्योतस्य मनुजगतिपञ्चकस्य मनुजगतिमनुजानुपूर्व्यौदारिकद्विकवज्रर्षभनाराचसंहननलक्षणस्य । अत्रौदारिकद्विकग्रहणादौदारिकसप्तकं गृह्यते, तथाविवक्षणात् । ततः सर्वसंख्यया द्वादशानां प्रकृतीनामुत्कृष्टोऽनुभागसंक्रमो वेदितव्यः । तथाहि–सम्यग्दृष्टिः शुभमनुभागं न विनाशयति, किंतु विशेषतो द्वे षट्षष्टी सागरोपमाणां यावत् परिपालयति । तत उत्कर्षत एतावन्तं कालं यावदुत्कृष्टमनुभागमविनाश्य पश्चात्सर्वत्र यथायोग्यमुत्पद्यते । ततो मिथ्यादृष्टिष्वप्यनन्तरोक्तप्रकृतीनामुत्कृष्टोऽनुभागसंक्रमोऽन्तर्मुहूर्तं कालं यावदवाप्यते । आतपोद्योतयोश्चोत्कृष्टोऽनुभागो मिथ्यादृष्टिनैव बध्यते । ततो न तत्र तयोरुत्कृष्टानुभागसंक्रमाभावः । मिथ्यात्वाच्च प्रतिपत्य सम्यक्त्वं गते सम्यग्दृष्टावपि प्राप्यते । न च सम्यग्दृष्टिः सन् तयोरुत्कृष्टमनुभागं विनाशयति, शुभप्रकृतित्वात् । ततो द्वे षट्षष्टी अपि सागरोपमाणां यावदुत्कर्षतस्तयोस्तत्र संक्रमो द्रष्टव्यः । तथा चतुर्णामायुषामुत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां यावत्समयाधिकावलिका शेषा तावदुत्कृष्टानुभागसंक्रमः प्राप्यते । शेषाणां तु शुभप्रकृतीनां सातवेदनीयदेवद्विकपञ्चेन्द्रियजातिवैक्रियसप्तकाहारकसप्तकतैजससप्तकसमचतुरस्रसंस्थानशुक्ललोहितहारिद्रवर्णसुरभिगन्धकषायाम्लमधु-

ररसमृदुलघुस्निग्धोष्णस्पर्शप्रशस्तविहायोगत्युच्छ्वासागुरुलघुपराघातत्रसादिदशनिर्माणतीर्थकरोच्चैर्गोत्रलक्षणानां चतुःपञ्चाशत्संख्यानामात्मीयात्मीयबन्धव्यवच्छेदसमये उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायाः परतस्तमुत्कृष्टमनुभागं संक्रमयति यावत्सयोगिकेवलिचरमसमयः । तथा चैतासां प्रकृतीनामुत्कृष्टानुभागसंक्रमस्वामिनः प्रायोऽपूर्वकरणादयः सयोगिकेवलिपर्यवसाना द्रष्टव्याः ॥ ५४ ॥

तदेवमुक्त उत्कृष्टानुभागसंक्रमस्वामी, संप्रति जघन्यानुभागसंक्रमस्वामिनं प्रतिपिपादयिषुर्जघन्यानुभागसंक्रमसंभवपरिज्ञानार्थमाह—

खवगस्संतरकरणे अकए घाईण सुहुमकम्मुवरिं। केवलिणो णंतगुणं असन्निउ सेसअणुभागं ॥ ५५ ॥

खवगस्स त्ति–यावदद्याप्यन्तरकरणं न विधीयते तावत्क्षपकस्य सर्वघातिनीनां देशघातिनीनां च प्रकृतीनां संबन्धी अनुभागः सूक्ष्मैकेन्द्रियसत्कादनुभागसत्कर्मणोऽनन्तगुणो भवति । अन्तरकरणे तु कृते सति सूक्ष्मैकेन्द्रियस्यापि सत्कादनुभागसत्कर्मणो हीनो भवति । तथा शेषाणामप्यघातिनीनामशुभप्रकृतीनामसातवेदनीयप्रथमवर्जसंस्थानप्रथमवर्जसंहननकृष्णनीलदुरभिगन्धतिक्तकटुगुरुकर्कशरूक्षशीतोपघाताप्रशस्तविहायोगतिदुर्भगदुःस्वरानादेयास्थिराशुभापर्याप्तायशःकीर्तिनीचैर्गोत्रलक्षणानां त्रिंशत्संख्यानां केवलिनोऽनुभागसत्कर्म असंज्ञिपञ्चेन्द्रियसत्कादनुभागसत्कर्मणोऽनन्तगुणं वेदितव्यं । तथा च सति सर्वघातिनीनां देशघातिनीनां च प्रकृतीनां जघन्यानुभागसंक्रमसंभवः क्षपकस्यान्तरकरणे कृते

सति वेदितव्यः । शेषाणां त्वशुभप्रकृतीनामुक्तरूपाणां जघन्यानुभागसंक्रमसंभवः, न सयोगिकेवलिनि, किंतु हतसमुत्पत्तिकर्मणः सूक्ष्मैकेन्द्रियादेः, तस्यैव वक्ष्यमाणत्वात् ॥ ५५ ॥

इह 'संकमई य आमुहुत्तंतो' इतिवचनात्सम्यग्दृष्टयो मिथ्यादृष्टयो वा किलान्तर्मुहूर्तात्परतः सर्वप्रकृतीनामनुभागघातं कुर्वन्तीति प्रसक्तं, तत्रापवादमाह—

सम्मद्दिट्ठी न हणइ सुभाणुभागे असम्मदिट्ठी वि । सम्मत्तमीसगाणं उक्कोसं वज्जिया खवणं ॥ ५६ ॥

सम्मद्दिट्ठि त्ति–इह याः शुभप्रकृतयः सातवेदनीयदेवद्विकमनुजद्विकपञ्चेन्द्रियजातिप्रथमसंस्थानप्रथमसंहननौदारिकवैक्रियसप्तकाहारकसप्तकतैजससप्तकशुभवर्णाद्येकादशकागुरुलघूपघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसादिदशकनिर्माणतीर्थंकरोच्चैर्गोत्रलक्षणाः षट्षष्टिसंख्यास्तासां सर्वासामपि शुभमनुभागमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां यावत्सम्यग्दृष्टिर्न विनाशयति । असम्यग्दृष्टिर्मिथ्यादृष्टिः । अपिशब्दात्सम्यग्दृष्टिश्च सम्यग्मिथ्यात्वयोरुत्कृष्टमनुभागं न विनाशयति । क्षपणं क्षपणकालं वर्जयित्वा । एतदुक्तं भवति–क्षपणकाले सम्यग्दृष्टिरपि सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टमनुभागं विनाशयति, तेन क्षपणकालो वर्ज्यते । तथा चोक्तं पञ्चसंग्रहमूलटीकायां–"सम्यग्दृष्टयो मिथ्यादृष्टयश्च सम्यक्त्वसम्यग्मिथ्यात्वयोर्नोत्कृष्टमनुभागं विनाशयन्ति, अपि तु क्षपकः सम्यग्दृष्टिर्विनाशयति उभयोरपि दृष्ट्योरिति" । मिथ्यादृष्टिः पुनः सर्वासामपि शुभप्रकृतीनां संक्लेशेनाशुभप्रकृतीनां तु विशुद्ध्याऽन्तर्मुहूर्तात्परत उत्कृष्टमनुभागमवश्यं विनाशयति ॥ ५६ ॥

तदेवं जघन्यानुभागसंक्रमस्वामित्वप्रतिपादनाय भावना कृता । संप्रति जघन्यानुभागसंक्रमस्वामित्वमेवाह—

अंतरकरणा उवरिं जहन्नठिइसंकमो उ जस्स जहिं । घाईणं नियगचरमरसखंडे दिठिमोहदुगे ॥ ५७ ॥

अंतरकरण त्ति–अन्तरकरणादूर्ध्वं घातिकर्मप्रकृतीनां मध्ये यस्याः प्रकृतेर्यत्र गुणस्थानके जघन्यस्थितिसंक्रम उक्तः, तस्यास्तत्र जघन्यानुभागसंक्रमोऽपि वेदितव्यः । एतदुक्तं भवति–अन्तरकरणे कृते सति अनिवृत्तिबादरसंपरायः क्षपको नवनोकषायसंज्वलनचतुष्टयानां क्षपणक्रमेण जघन्यस्थितिसंक्रमणकाले जघन्यानुभागसंक्रमं करोति । ज्ञानावरणपञ्चकान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणनिद्राप्रचलारूपदर्शनावरणषट्कानां क्षीणकषायः समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यानुभागसंक्रमं करोति । 'नियगेत्यादि' दर्शनमोहनीयद्विकस्य सम्यक्त्वसम्यग्मिथ्यात्वरूपस्य क्षपणकाले निजकचरमरसखंडे आत्मीयात्मीयचरमरसखंडसंक्रमणकाले जघन्यानुभागसंक्रमो भवति ॥ ५७ ॥

आऊण जहण्णठिइं बंधिय जावत्थि संकमो ताव । उव्वलणतित्थसंजोयणा य पढमालियं गंतु ॥ ५८ ॥

आऊण त्ति–चतुर्णामप्यायुषां जघन्यां स्थितिं बद्ध्वा, जघन्यां हि स्थितिं बध्नन् जघन्यमनुभागं बध्नातीति जघन्यस्थितिग्रहणं । ततो जघन्यां स्थितिं बद्ध्वा बन्धावलिकायाः परतस्तावज्जघन्यानुभागं संक्रमयति यावत्समयाधिकावलिकाशेषा भवति । ततो जघन्यां स्थितिं बद्ध्वा यावदस्ति संक्रमस्तावज्जघन्यानुभागसंक्रमः प्राप्यते । तथा नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रलक्षणानामेकविंशत्युद्वलनप्रकृतीनां तीर्थकरस्यानन्तानुबन्धिनां च जघन्यमनुभागं बद्ध्वा प्रथमावलिकां बन्धावलिकालक्षणां गत्वाऽतिक्रम्य, बन्धावलिकायाः परत इत्यर्थः । जघन्यमनुभागं संक्रम-

यति । कः संक्रमयतीति चेदुच्यते—वैक्रियसप्तकदेवद्विकनरकद्विकानामसंज्ञिपञ्चेन्द्रियो, मनुष्यद्विकोच्चैर्गोत्रयोः सूक्ष्मनिगोदः, आहारकसप्तकस्याप्रमत्तः, तीर्थंकरस्याविरतसम्यग्दृष्टिः, अनन्तानुबन्धिनां पश्चात्कृतसम्यक्त्वो मिथ्यादृष्टिः संक्रमयतीति ॥ ५८ ॥

सेसाण सुहुम हयसंतकम्मिगो तस्स हेट्ठउ जाव । बंधइ तावं एगिंदिउ व णेगिंदिउ वावि ॥ ५९ ॥

सेसाण त्ति—उक्तशेषाणां शुभानामशुभानां वा प्रकृतीनां सप्तनवतिसंख्यानां यः सूक्ष्मैकेन्द्रियो वायुकायिकोऽग्निकायिको वा हतसत्कर्मा, हतं विनाशितं प्रभूतमनुभागसत्कर्म येन स हतसत्कर्मा, स तस्यात्मनः कस्यानुभागसत्कर्मणोऽधस्तात् ततः स्तोकतरमित्यर्थः । अनुभागं तावद्बध्नाति यावदेकेन्द्रियस्तस्मिन्नन्यस्मिन् वा एकेन्द्रियभवे वर्तमानोऽनेकेन्द्रियो वेति स एव हतसत्कर्मा एकेन्द्रियोऽन्यस्मिन् द्वीन्द्रियादिभवे वर्तमानो यावदन्यं बृहत्तरमनुभागं न बध्नाति, तावत्तमेव जघन्यमनुभागं संक्रमयति ॥ ५९ ॥

तदेवमुक्तोऽनुभागसंक्रमः । संप्रति प्रदेशसंक्रमाभिधानावसरः । तत्र चैतेऽर्थाधिकाराः, तद्यथा—सामान्यलक्षणं भेदैः साद्यनादिप्ररूपणा उत्कृष्टप्रदेशसंक्रमस्वामी जघन्यप्रदेशसंक्रमस्वामी च । तत्र सामान्यलक्षणप्रतिपादनार्थमाह—

जं दलियमन्नपगइं निज्जइ सो संकमो पएसस्स । उव्वलणो विज्झाउ अहापवत्तो गुणो सव्वो ॥ ६० ॥

जं ति—यत्संक्रमप्रायोग्यं दलिकं कर्मद्रव्यं अन्यप्रकृतिं नीयते अन्यप्रकृतिरूपतया परिणम्यते स प्रदेशसंक्रमः । उक्तं सामान्यलक्षणं । संप्रति भेदमाह—'उव्वलणो' इत्यादि । प्रदेशसंक्रमः पञ्चधा । तद्यथा—उद्वलनासंक्रमः, विध्यातसंक्रमः,

यथाप्रवृत्तसंक्रमः, गुणसंक्रमः, सर्वसंक्रमश्च । तत्र यथोद्देशं निर्देश इति न्यायात्प्रथमत उद्वलनासंक्रमस्य लक्षणमभिधीयते–इहानन्तानुबन्धिचतुष्टयसम्यक्त्वसम्यग्मिथ्यात्वदेवद्विकनरकद्विकवैक्रियचतुष्काहारकचतुष्कमनुजद्विकोच्चैर्गोत्रलक्षणानां सप्तविंशतिप्रकृतीनां प्रथमतः पल्योपमासंख्येयभागमात्रं स्थितिखंडमन्तर्मुहूर्तेन कालेनोत्किरति । ततः पुनरपि द्वितीयं स्थितिखंडं पल्योपमासंख्येयभागमात्रमेव, केवलं प्रथमात् स्थितिखंडात् विशेषहीनमन्तर्मुहूर्तेन कालेनोत्किरति । ततोऽपि तृतीयं स्थितिखंडं पल्योपमासंख्येयभागमात्रं, द्वितीयात् स्थितिखंडात् विशेषहीनमन्तर्मुहूर्तेन कालेनोत्किरति । एवं पल्योपमासंख्येयभागमात्राणि स्थितिखंडानि पूर्वस्मात् पूर्वस्मात् स्थितिखंडाद्विशेषहीनानि तावद्वाच्यानि यावत् द्विचरमं स्थितिखंडं । सर्वाण्यपि च तानि प्रत्येकमन्तर्मुहूर्तेन कालेनोत्कीर्यन्ते । इह च द्विधा प्ररूपणा–अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया प्रथमस्थितिखंडस्य प्रभूता स्थितिः । ततो द्वितीयस्य विशेषहीना । ततोऽपि तृतीयस्य विशेषहीना । एवं यावद्द्विचरमं स्थितिखंडं । कृताऽनन्तरोपनिधया प्ररूपणा । संप्रति परंपरोपनिधया क्रियते–तत्र प्रथमस्थितिखंडापेक्षया कानिचित् स्थितिखंडानि स्थित्यपेक्षयाऽसंख्येयभागहीनानि, कानिचित्संख्येयभागहीनानि, कानिचित् संख्येयगुणहीनानि, कानिचिदसंख्येयगुणहीनानि । यदा तु प्रदेशपरिमाणं चिन्त्यते, तदा प्रथमस्थितिखंडात् द्वितीयं स्थितिखंडं दलिकापेक्षया विशेषाधिकं । ततोऽपि तृतीयं विशेषाधिकं, एवं तावद्वाच्यं यावत् द्विचरमं स्थितिखंडं । इयमनन्तरोपनिधा । परंपरोपनिधा पुनरियं–प्रथमात् स्थितिखंडाद्दलिकमपेक्ष्य किंचिदसंख्येयभागाधिकं, किंचित्संख्येयभागाधिकं, किंचित्संख्येयगुणाधिकं, किंचिदसंख्येयगुणाधिकं, स्थितिखंडानां चोत्करणविधिरयं–प्रथमसमये स्तोकं

दलिकमुत्किरति । द्वितीये समयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वाच्यं यावदन्तर्मुहूर्तस्य चरमसमयः । गुणकारश्चात्र पल्योपमासंख्येयभागलक्षणो वेदितव्यः । एवं सर्वेष्वपि स्थितिखंडेषु द्रष्टव्यं । दलिकं चोत्कीर्य क्व प्रक्षिप्यत इति चेदुच्यते—किंचित्स्वस्थाने किंचित्परस्थाने । तत्र कियत्प्रक्षिप्यत इति विशेषतो निरूप्यते—प्रथमे स्थितिखंडे प्रथमसमये यत्कर्मदलिकमन्यप्रकृतिषु प्रक्षिपति तत् स्तोकं । यत् स्वस्थान एवाधस्तात्प्रक्षिप्यते तत्ततोऽसंख्येयगुणं । ततोऽपि द्वितीयसमये यत्स्वस्थाने प्रक्षिप्यते तदसंख्येयगुणं । परप्रकृतिषु पुनर्यत् प्रक्षिप्यते तत्प्रथमसमयपरस्थानप्रक्षिप्ताद्विशेषहीनं । तृतीयसमये यत्स्वस्थाने प्रक्षिप्यते तत् द्वितीयसमयस्वस्थानप्रक्षिप्तादसंख्येयगुणं । यत्पुनः परप्रकृतिषु प्रक्षिप्यते, तत् द्वितीयसमयपरस्थानप्रक्षिप्ताद्विशेषहीनं । एवं तावद्वाच्यं यावदन्तर्मुहूर्तचरमसमयः । एवं सर्वेष्वपि स्थितिखंडेषु द्विचरमस्थितिखंडपर्यवसानेषु वाच्यं । संप्रति चरमखंडस्य विधिरुच्यते—चरमस्थितिखंडं द्विचरमस्थितिखंडापेक्षयाऽसंख्येयगुणं तदपि चरमस्थितिखंडमन्तर्मुहूर्तेन कालेनोत्कीर्यते । तत्र च यत्स्वस्थानं तदुदयावलिकागतं मुक्त्वा शेषं सर्वं परस्थाने प्रक्षिपति । तद्यथा—प्रथमसमये स्तोकं, द्वितीये समयेऽसंख्येयगुणं, ततोऽपि तृतीयसमयेऽसंख्येयगुणं, एवं यावच्चरमसमयः । चरमसमये तु यत्परप्रकृतिषु प्रक्षिप्यते दलिकं स सर्वसंक्रम उच्यते । तत्र यावत्प्रमाणं द्विचरमस्थितिखंडसत्कं कर्मदलिकं चरमसमये परप्रकृतिषु संक्रमयति, तावत्प्रमाणं चेच्चरमस्थितिखंडस्य कर्मदलिकं प्रतिसमयमपह्रियते तर्हि तच्चरम स्थितिखंडमसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिर्निर्लेपीभवति । एषा कालतो मार्गणा । क्षेत्रतः पुनरियं—यावत्प्रमाणं द्विचरमस्थितिखंडसत्कं कर्मदलिकं परप्रकृतिषु संक्रमयति, तावत्प्रमाणं कर्मदलिकं चरम-

स्थितिखंरुस्य सत्कमेकत्रापह्रियते, अन्यत्र एक आकाशप्रदेशः । एवमपह्रियमाणं चरमस्थितिखंरुमंगुलमानक्षेत्रगतप्रदेश-
राशेरसख्येयतमेन नागेनापह्रियते । अंगुलस्यासंख्येयतमे नागे यावन्त आकाशप्रदेशास्तावन्ति चरमस्थितिखंडे यथो-
क्तप्रमाणानि खंकानि नवन्तीत्यर्थः । यावत्प्रमाणं पुनर्द्विचरमस्थितिसंक्रमरकं कर्मदलिकं स्वस्थाने संक्रमयति, तावत्प्रमाणं
चेच्चरमस्थितिखंरुस्य कर्मदलिकं प्रतिसमयमपह्रियते तर्हि तच्चरमं स्थितिखंरुं पल्योपमासंख्येयनागमात्रगतैः समयै-
र्निर्लेपीनवति ॥ ६० ॥

तदेवमुक्तमुद्वलनासंक्रमलक्षणं । संप्रत्येतदेव लक्षणं योजयन्नाहारकसप्तकस्योद्वलनासंक्रमकारकमाह—

आहारतणू जिन्नमुहुत्ता अविरइगउं पउवलए। जा अविरतो त्ति उव्वलइ पल्लनागे असंखतमे ॥ ६१ ॥

आहार त्ति–आहारकसप्तकसत्कर्माऽविरतिर्विरतनावं गतः सन् अन्तर्मुहूर्तात्परत आहारकतनूं । इहाहारकग्रहणे-
नाहारकसप्तकं गृहीतं द्रष्टव्यं । तत आहारकसप्तकं । 'पउवलए त्ति' प्रोद्वलयति । कियता पुनः कालेनोद्वलयतीति
चेदुच्यते–यावदविरतिस्तावदुद्वलयति । एतेनाविरतिप्रत्यया आहारकसप्तकस्योद्वलना प्रतिपादिता द्रष्टव्या । अविर-
तिश्चानन्तमपि कालं यावन्नवति, ततो नियममाह–'पल्लनागे असंखतमे' पल्योपमस्यासंख्येयतमेन नागेन सर्वमुद्व-
लयतीत्यर्थः ॥ ६१ ॥

अंतोमुहुत्तमद्धं पल्लासंखिज्जमित्तठिइखंडं। उक्किरइ पुणो वि तहा ऊणूणमसंखगुणहं जा ॥ ६२ ॥

अंतोमुहुत्तं ति–अन्तर्मुहूर्तप्रमाणामद्धां यावदन्तर्मुहूर्तेन कालेनेत्यर्थः । पल्योपमासंख्येयनागमात्रं स्थितिखंरुमु-

त्किरति । एष विधिः प्रथमखंडस्य । ततः पुनरपि तथा तेनैव प्रकारेणान्तर्मुहूर्तेन कालेनान्यत् पल्योपमासंख्येयभागमात्रं खंडं पूर्वस्मादूनमूनतरमुत्किरति । एवं तावद्वाच्यं यावत् द्विचरमं स्थितिखंडं । तच्च प्रथमस्थितिखंडादसंख्येयगुणहीनं ॥ ६२ ॥

तं दलियं सट्ठा(ठा)णे समए समए असंखगुणियाए । सेढीए परठाणे विसेसहाणीएँ संछुभइ ॥ ६३ ॥

तं ति–तदुत्कीर्यमाणं दलिकं समये समये स्वस्थाने असंख्येयगुणितया श्रेण्या संछुभते प्रक्षिपति । यत्पुनः परस्थाने परप्रकृतौ तद्विशेषहान्या । तद्यथा–प्रथमसमये यत् परप्रकृतौ प्रक्षिपति तत् स्तोकं । यत्पुनः स्वस्थाने स्वाधस्तात् प्रक्षिप्यते, तत्ततोऽसंख्येयगुणं । ततोऽपि द्वितीयसमये यत् स्वस्थाने प्रक्षिप्यते तदसंख्येयगुणं । परप्रकृतिषु पुनर्यत् प्रक्षिप्यते तत्प्रथमसमये परस्थानप्रक्षिप्ताद्विशेषहीनं । एवं तावत्प्रतिसमयं वाच्यं यावदन्तर्मुहूर्तस्य चरमसमयः । एष प्रथमस्थितिखंडस्योत्करणविधिः । एवमन्येषामपि द्रष्टव्यं ॥ ६३ ॥

जं दुचरमस्स चरिमे अन्नं संकमइ तेण सव्वं पि । अंगुलअसंखभागेण हीरए एस उव्वलणा ॥ ६४ ॥

जं ति–द्विचरमस्थितिखंडस्य चरमसमये यत् कर्मदलिकमन्यां प्रकृतिं संक्रमयति, तेन मानेन तावत्प्रमाणेन दलिकेनेत्यर्थः । यदि चरमं स्थितिखंडमपह्रियते । ततः कालतोऽसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते क्षेत्रतः पुनरंगुलमात्रक्षेत्रासंख्येयतमेन भागेन । एषा प्रागुक्ता द्विचरमस्थितिखंडं यावदाहारकसप्तकस्योद्वलना ॥ ६४ ॥

संप्रति चरमस्थितिखंडकस्य वक्तव्यतामाह—

चरमसंखिज्जगुणं अणुसमयमसंखगुणियसेढीए ।
देइ परत्थाणे ए(णेवं)वं संछुभंती णि(एव)मवि कसिणो ॥ ६५ ॥

चरमं ति–द्विचरमस्थितिखंडाच्चरमं स्थितिखंडं स्थित्यपेक्षयाऽसंख्येयगुणं । तथा तस्य चरमखंडस्य यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं परस्थाने परप्रकृतिषु । अनुसमयं प्रतिसमयं । असंख्येयगुणनया श्रेण्या प्रक्षिपति । तद्यथा–प्रथमसमये स्तोकं, द्वितीयसमयेऽसंख्येयगुणं, तृतीयसमयेऽसंख्येयगुणं, एवं यावच्चरमसमयः । एवममुना प्रकारेण परप्रकृतौ प्रक्षिप्यमाणानां प्रकृतीनां । अपिः संभावने । चरमसमये यः कृत्स्नसंक्रमो भवति स सर्वसंक्रमः । एतेन सर्वसंक्रमस्य लक्षणं प्रतिपादितं द्रष्टव्यं ॥ ६५ ॥

संप्रति वेदकसम्यक्त्वादीनामुद्वलनासंक्रमकारकानाह—

एवं मिच्छद्दिट्ठिस्स वेयगं मीसगं ततो पच्छा । एगिंदियस्स सुरदुगमओ सवेउव्वि निरयदुगं ॥ ६६ ॥

एवं ति–अष्टाविंशतिसत्कर्मा मिथ्यादृष्टिः प्रथमत एवमुपदर्शितेन प्रकारेण सम्यक्त्वमुद्वलयति, ततः सम्यग्मिथ्यात्वं । तथा एकेन्द्रियाहारकसप्तकरहिता या नामकर्मणः पञ्चनवतिप्रकृतयस्तत्सत्कर्मा देवगतिदेवानुपूर्व्यौ पूर्वोक्तेन विधिना युगपदुद्वलयति ततोऽनन्तरं वैक्रियसप्तकं नरकद्विकं च युगपदुद्वलयति ॥ ६६ ॥

सुहुमतसेगो उत्तममज्झ य नरदुगमज्झानियट्टिम्मि । खवीयाए निरयं संजोयणविछित्तुयसे य ॥ ८७ ॥

सुहुम त्ति-सूक्ष्मत्रसनामकाशिको वायुकायिकश्च । उत्तमं गोत्रमुच्चैर्गोत्रं । सप्तमः पूर्वोक्त स्थितिरुत्कर्षयति । ततो नरद्विकं मनुजगतिमनुजानुपूर्वीरूपम् । तद्वयं मिथ्यादृष्टिकर्तृकत्वेन प्रतिपादितम् । संप्रति गत्यन्तरेः प्रतिपाद्यते–'अनि-यट्टिम्मि खवीयाए त्ति' अनिवृत्तिबादरोऽनिवृत्तिकाले क्षपकः । किमित्यपि समानन्तरमिति चेदुच्यते–आसां प्रकृतीनां बन्धस्य पश्चात्तावत् संक्लेशेन जघन्यस्थित्या कर्मेण नाति यावत् मिथ्यादृष्टेः, तत्परिणामानां चरमेण कालेन सम्यग्दृ-ष्टीनां बन्धविच्छेदानन्तरं । अनिवृत्तिबादरसम्परायेऽष्टप्रकृतीनामुत्कर्षः । तत्कृतः स्थिति–अनिवृत्तिबा-दरसंपरायः क्षपकः स्थानर्द्धित्रिकनामकर्मोदयेन समन्यान्तानामष्टानामुत्कृष्टां स्थितिमुत्कृष्टसंक्लेशेन कालेनोत्कर्षयति । 'निरयं' इत्यादि, निरयं नरकायुः प्रकृति-लक्षणं केऽपि तत्प्रथमसमयेऽनिवृत्तेः । संयोजनाविछित्तुगं च । अत्र तृतीये सप्तमी, संयोजनानामनन्तानुबन्धिनां विसं-योजकस्य च मिथ्यात्वसम्यग्मिथ्यात्वयोश्च पूर्वोक्तस्थित्युत्कर्षणाऽसम्पूर्णेन कालेनोत्कर्षणा ॥ ८७ ॥

तदेवमुत्कर्षणासंक्रमः उक्तः । सम्प्रति मिथ्यात्वसंक्रमस्य लक्षणमाह–

जासि न बंधो गुणभवपच्चयओ तासि होइ मिच्छत्तं । अंगुलअसंखभागो ववहारो तेण सेसस्स ॥ ८८ ॥

जासि त्ति–यासां प्रकृतीनां गुणप्रत्ययतो भवप्रत्ययतो वा बन्धो न जायते तासां मिथ्यात्वसंक्रमोऽसंक्रमः । तत्र गुणप्रत्ययतो गुणप्रत्ययतो वा बन्धं नायातीति चेदुच्यते–तत्र या मिथ्यादृष्टिगुणस्थानान्ताः गोत्रस्य च तत्सम्पर्काणां नामा-

दनादिषु गुणप्रत्ययतो बन्धो न भवति। नामादनान्तानां पञ्चविंशतिप्रकृतीनां सम्यग्मिथ्यादृष्ट्यादिषु, अविरतसम्यग्दृष्ट्यन्तानां दशानां देशविरतादिषु, देशविरतान्तानां च चतसृणां प्रमत्तादिषु, प्रमत्तान्तानां षण्णामप्रमत्तादिषु, गुणप्रत्ययतो बन्धो न भवति। ततस्तासां तत्र तत्र विध्यातसंक्रमः प्रवर्तते। तथा वैक्रियसप्तकदेवद्विकनरकद्विकैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणपर्याप्तातपलक्षणानां विंशतिप्रकृतीनां नैरयिका मिथ्यात्वादिरूपे हेतौ विद्यमानेऽपि भवप्रत्ययतो बन्धका न भवन्ति। नरकद्विकदेवद्विकवैक्रियसप्तकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मापर्याप्तसाधारणानां सप्तदशप्रकृतीनां समस्ता अपि देवा भवप्रत्ययतो बन्धका नोपजायन्ते। एकेन्द्रियजात्यातपस्थावरनाम्नामपि तु सनत्कुमारादयः। संहननषट्कसमचतुरस्रवर्जसंस्थानपञ्चकनपुंसकवेदमनुजद्विकौदारिकसप्तकतिर्यगेकान्तयोग्यस्थावरादिप्रकृतिदशकदुर्भगादित्रिकनीचैर्गोत्राप्रशस्तविहायोगतिप्रकृतीनां त्वसंख्येयवर्षायुषः। एवं यस्य यस्य यत् यत् कर्म भवप्रत्ययतो गुणप्रत्ययतो वा न बन्धमायाति तत्तत्तस्य तस्य विध्यातसंक्रमयोग्यं वेदितव्यं। दलिकप्रमाणनिरूपणार्थमिदमाह—'अंगुलेत्यादि' यावत्प्रमाणं कर्मदलिकं प्रथमसमये विध्यातसंक्रमेण परप्रकृतिषु प्रक्षिप्यते, तेन मानेन शेषस्य दलिकस्यापहारे क्रियमाणेऽङ्गुलस्यासंख्येयतमेन भागेनापहारो भवति। इयमत्र भावना—यावत्प्रमाणं प्रथमसमये कर्मदलिकं विध्यातसंक्रमेण प्रकृत्यन्तरे प्रक्षिप्यते, तावत्प्रमाणैः खंडैः शेषं सर्वमपि तत्प्रकृतिगतं दलिकमपह्रियमाणमंगुलमात्रस्य क्षेत्रस्यासंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्संख्याकैरपह्रियते। इदं क्षेत्रतो निरूपणं। कालतस्त्वसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहारः। अयं च विध्यातसंक्रमः प्रायो यथाप्रवृत्तसंक्रमावसाने वेदितव्यः॥ ६८॥

इदानीं गुणसंक्रमस्य लक्षणमाह—

गुणसंकमो अबज्झंतिगाण असुभाणपुव्वकरणाई । बंधे अहापवत्तो परित्तिओ वा अबंधे वि ॥ ६९ ॥

गुणसंकमो त्ति—अपूर्वकरणादयोऽपूर्वकरणप्रभृतयोऽबध्यमानानामशुभप्रकृतीनां संबन्धि कर्मदलिकं प्रतिसमयमसंख्येयगुणतया बध्यमानासु प्रकृतिषु यत्प्रक्षिपन्ति स गुणसंक्रमः । गुणेन प्रतिसमयमसंख्येयलक्षणेन गुणकारेण संक्रमो गुणसंक्रमः । तथाहि—मिथ्यात्वातपनारकायुर्वर्जानां मिथ्यादृष्टियोग्यानां त्रयोदशानामनन्तानुबन्धितिर्यगायुरुद्योतवर्जानां च सासादनयोग्यानामेकोनविंशतिप्रकृतीनां यतो मिथ्यात्वमनन्तानुबन्धिनश्चापूर्वकरणादौ अत एवाविरतसम्यग्दृष्ट्यादयः क्षपयन्ति । आतपोद्योते च शुभे, अशुभप्रकृतीनां च गुणसंक्रमः, आयुषां च परप्रकृतौ न संक्रमः, ततो मिथ्यात्वादिप्रकृतीनामिह वर्जनं । तथाऽप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकास्थिराशुभायशःकीर्तिशोकारत्यसातवेदनीयानां सर्वसंख्यया षट्चत्वारिंशत्प्रकृतीनां अशुभानामबध्यमानानामपूर्वकरणादारभ्य गुणसंक्रमो भवति । निद्राद्विकोपघाताशुभवर्णादिनवकहास्यरतिभयजुगुप्सानां त्वपूर्वकरणे स्वस्वबन्धव्यवच्छेदादारभ्य गुणसंक्रमो वेदितव्यः । अपरोऽर्थः—अपूर्वकरणादयोऽपूर्वकरणसंज्ञकरणवर्तिप्रभृतयोऽशुभप्रकृतीनामबध्यमानानां दलिकमसंख्येयगुणनया श्रेण्या बध्यमानासु प्रकृतिषु यत्प्रक्षिपन्ति स गुणसंक्रमः । तेन क्षपणकालेऽनन्तानुबन्धिमिथ्यात्वसम्यग्मिथ्यात्वानामप्यपूर्वकरणादारभ्य गुणसंक्रमः प्रवर्तते । तदेवमुक्तं गुणसंक्रमस्य लक्षणं । संप्रति यथाप्रवृत्तसंक्रमस्य प्रतिपादयति—'बंधे' इत्यादि, ध्रुवबन्धिनीनां प्रकृतीनां बन्धे सति यथाप्रवृत्तसंक्रमः प्रवर्तते । 'परित्तिओ वा' इति, परित्ति अनेन परावर्तमानाः प्रकृतयउच्यन्ते । ता-

मामबन्धेऽपि आस्तां बन्धे इत्यपिशब्दार्थः । यथाप्रवृत्तसंक्रमो भवति । इयमत्र भावना—सर्वेषामपि संसारस्थानामसुमतां ध्रुवबन्धिनीनां बन्धे परावर्तमानप्रकृतीनां तु स्वस्वभवबन्धयोग्यानां बन्धेऽबन्धे वा यथाप्रवृत्त संक्रमो भवति ॥ ६९ ॥

सांप्रतमेतैरेवोद्वलनासंक्रमविध्यातसंक्रमगुणसंक्रमयथाप्रवृत्तसंक्रमैरपहारकालस्याल्पबहुत्वमभिधीयते—

थोवोवहारकालो गुणसंकमणेण संखगुणणाए । सेसस्स अहापवत्ते विज्झाए उव्वलणनामे ॥ ७० ॥

थोवो त्ति—उद्वलनासंक्रमाभिधानावसरे यत्प्रागभिहितं चरमखण्डं तच्छेषमित्युच्यते । तस्य शेषस्य यदि गुणसंक्रममानेनापहारः क्रियते, ततोऽन्तर्मुहूर्तमात्रेण कालेन सकलमपि तदपह्रियते । ततो गुणसंक्रमेणापहारकालः सर्वस्तोकः । ततो यथाप्रवृत्तसंक्रमेणापहारकालोऽसंख्येयगुणः । यतस्तदेव चरमखण्डं यदि यथाप्रवृत्तसंक्रमेणापह्रियते तर्हि पल्योपमासंख्येयभागमात्रेण कालेनापह्रियते । ततो विध्यातसंक्रमेणापहारकालोऽसंख्येयगुणः । यतस्तदेव चरमखण्डं यदि विध्यातसंक्रमेणापह्रियते ततोऽसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते । ततोऽप्युद्वलनासंक्रमेणापहारकालोऽसंख्येयगुणः । तथाहि—तदेव चरमखण्डं द्विचरमस्थितिखण्डस्य चरमसमये यत्परप्रकृतौ प्रक्षिप्यते तेन मानेन चेदपह्रियते, ततोऽतिप्रभूताभिरसंख्येयोत्सर्पिण्यवसर्पिणीभिरपह्रियते । ततः पाश्चात्यादयमुद्वलनासंक्रमेणापहारकालोऽसंख्येयगुणः ॥ ७० ॥

इह प्राग्यथाप्रवृत्तसंक्रमस्य कालो नोक्तः, उद्वलनासंक्रमेऽपि यद्विचरमं स्थितिखण्डं तस्य चरमसमये स्वस्थाने यत्कर्मदलिकं प्रक्षिप्यते तेन मानेन शेषस्य चरमस्थितिखण्डस्यापहारकालो नोक्तस्ततस्तन्निरूपणार्थमाह—

पल्लासंखियभागेणहापवत्तेण सेसगवहारो । उव्वलणेण वि थिबुगो अणुइन्नाए उ जं उदए ॥ ७१ ॥

पल्ल त्ति–उद्वलनासंक्रमे यच्चरमं स्थितिखण्डं तस्य यदि यथाप्रवृत्तसंक्रमणमानेनापहारः क्रियते, तर्हि पल्योपमासंख्येयभागमात्रेण कालेन निःशेषतोऽपहारो भवति । उद्वलनासंक्रमेणापि द्विचरमस्थितिखण्डकस्य चरमसमये स्वस्वस्थाने प्रक्षिप्यते दलिकं तेन मानेन चरमस्थितिखण्डस्यापहारकालः पल्योपमासंख्येयभागलक्षणो वेदितव्यः । तत एतौ द्वावपि तुल्यौ । इहान्योऽपि पञ्चः स्तिबुकसंक्रमोऽस्ति, पर नासौ संक्रमकरणे गण्यते, करणलक्षणाभावात् । करणं हि सलेश्यं वीर्यमुच्यते । अत्र च लेश्यातीतोऽपि भगवानयोगिकेवली द्विचरमसमये द्विसप्ततिप्रकृतीः स्तिबुकसंक्रमेण संक्रमयति । अपि च स्तिबुकसंक्रमेण संक्रान्तं दलिकं न सर्वथा परप्रकृतिरूपतया परिणमते । ततो नासौ संक्रमे गण्यते । परमेषोऽपि संक्रम इति संक्रमप्रस्तावात्तल्लक्षणनिरूपणार्थमाह—'थिबुगो' इत्यादि अनुदीर्णाया अनुदयप्राप्तायाः सत्कं यत्कर्मदलिकं सजातीयप्रकृतावुदयप्राप्तायां समानकालस्थितौ संक्रमयति संक्रमश्च नानुभवति, यथा मनुजगतावुदयप्राप्तायां शेषं गतित्रयं एकेन्द्रियजातौ जातिचतुष्टयमित्यादि स स्तिबुकसंक्रमः । एष एव च प्रदेशानुभवः ॥ ७१ ॥

तदेवमुक्तं लक्षणं भेदश्च । संप्रति साद्यनादिप्ररूपणा कर्तव्या । तत्र मूलप्रकृतीनां परस्परं संक्रमो न भवति, तत उत्तरप्रकृतीनामेव साद्यनादिप्ररूपणामाह—

धुवसंकम अजहन्नो णुक्कोसो तासि वा विवज्जित्तु । आवरणनवगविग्घं ओरालियसत्तगं चेव ॥ ७२ ॥

साइयमाइ चउद्धा सेसविगप्पा य सेसगाणं च । सव्वविगप्पा नेया साई अधुवा पएसम्मि ॥ ७३ ॥

धुवसंकम त्ति–प्रागुक्तानां ध्रुवसंक्रमेणां षड्विंशत्युत्तरशतसंख्यानामजघन्यः प्रदेशसंक्रमश्चतुर्धा चतुःप्रकारः । तद्यथा–

सादिरनादिर्ध्रुवोऽध्रुवश्च । तत्र क्षपितकर्मांशो वक्ष्यमाणलक्षणः क्षपणार्थमभ्युद्यतो ध्रुवसत्कर्मप्रकृतीनां सर्वासामपि जघन्यं प्रदेशसंक्रमं करोति, स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स चोपशमश्रेण्यां बन्धव्यवच्छेदे सति सर्वासामपि प्रकृतीनां न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । अनुत्कृष्टोऽपि प्रदेशसंक्रमो ध्रुवसत्कर्मप्रकृतीनां चतुर्धा । किं सर्वासां? नेत्याह—आवरणनवकं ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयलक्षणं, तथाऽन्तरायपञ्चकमौदारिकसप्तकं च वर्जयित्वा शेषस्य पञ्चोत्तरप्रकृतिशतस्य । तथाहि—सर्वासामपि प्रकृतीनां गुणितकर्मांशे वक्ष्यमाणलक्षणे क्षपणार्थमभ्युद्यते उत्कृष्टः प्रदेशसंक्रमः प्राप्यते, नान्यत्र । ततोऽसौ सादिः । तस्मादन्यः सर्वोऽप्यनुत्कृष्टः, स चोपशमश्रेण्यां व्यवच्छिद्यते, ततः प्रतिपाते च भवति, ततोऽसौ सादिः-तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । 'सेसेत्यादि' शेषविकल्पाः पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च ज्ञानावरणीयाद्येकविंशतिप्रकृतीनां जघन्योत्कृष्टानुत्कृष्टाः सादयोऽध्रुवाश्च । तत्र पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च साद्यध्रुवतया भावित एव ज्ञानावरणीयादीनां चोत्कृष्टः प्रदेशसंक्रमो गुणितकर्मांशे मिथ्यादृष्टौ कदाचिल्लभ्यते, शेषकालं त्वनुत्कृष्टः । तत एतौ द्वावपि साद्यध्रुवौ । जघन्यस्तु साद्यध्रुवतया भावित एव । शेषप्रकृतीनां च सर्वेऽप्युत्कृष्टानुत्कृष्टजघन्याजघन्यविकल्पा अध्रुवसत्कर्मत्वात् मिथ्यात्वध्रुवसत्कर्मणोऽपि सदैव पतद्ग्रहाप्राप्तेर्नीचैर्गोत्रसातासातवेदनीयानां तु परावर्तमानत्वात् सादयोऽध्रुवाश्चावगन्तव्याः ॥ ७२–७३ ॥

तदेवं कृता साद्यनादिप्ररूपणा । साम्प्रतमुत्कृष्टप्रदेशसंक्रमस्वामित्वमभिधातव्यं । तच्च गुणितकर्मांशे लभ्यत इति तन्निरूपणार्थमाह—

जो बायरतसकालेणूणं कम्मठिइं तु पुढवीए । बायर(रि) पज्जत्तापज्जत्तगदीहेयरद्धासु ॥ ७४ ॥

जोगकसाउक्कोसो बहुसो निच्चमवि आउबंधं च । जोगजवेणुवरिल्लठिइनिसेगं बहुं किच्चा ॥ ७५ ॥

जो बायर त्ति–इह द्विधा त्रसाः–सूक्ष्मा बादराश्च । तत्र बादरा द्वीन्द्रियादयः, सूक्ष्मास्तेजोवायुकायिकाः । तत्र सूक्ष्मत्रसव्यवच्छेदार्थं बादरग्रहणं । बादरत्रसानां द्वीन्द्रियादीनां यः कायस्थितिकालः पूर्वकोटीपृथक्त्वाभ्यधिकद्विसहस्र-सागरोपमप्रमाणः, तेनोना कर्मस्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणां यावत् पृथिव्यां बादरे बादरपृथिवीकायभवेषु स्थित्वा । कथं स्थित्वेत्यत आह–'पज्जत्तापज्जत्तगदीहेयरद्धासु' त्ति दीर्घेतराद्धाभ्यां पर्याप्तापर्याप्तयोर्यथासंख्येन योजना। ततोऽयमर्थः–दीर्घाद्धं पर्याप्तभवेषु, इतराद्धं स्तोकाद्धमपर्याप्तभवेषु । प्रभूतेषु पर्याप्तभवेषु स्तोकेषु चापर्याप्तभवेषु स्थित्वेत्यर्थः । तत्रापि बहुशोऽनेकवारं । योगकषायोत्कृष्ट उत्कृष्टेषु योगस्थानेषु उत्कृष्टेषु च काषायिकेषु संक्लेशपरिणामेषु वर्तित्वा । इह शेषैकेन्द्रियेभ्यो बादरपृथिवीकायस्य प्रभूतमायुस्तेनाऽऽयतिं तस्य प्रभूतकर्मपुद्गलोपादानं । बलवत्तया च तस्यातीव वेदनासहिष्णुत्वं । तेन तस्य प्रभूतकर्मपुद्गलपरिशाटो न भवतीति बादरपृथ्वीकायिकग्रहणं । अपर्याप्तभवग्रहणं च परिपूर्णकायस्थितिपरिग्रहार्थं । तेषां चापर्याप्तकभवानां स्तोकानां पर्याप्तकभवानां च प्रभूतानां ग्रहणं प्रभूतकर्मपुद्गलपरिशाटाभावप्राप्त्यर्थं, अन्यथा हि निरन्तरमुत्पद्यमानम्रियमाणेषु बहवः पुद्गलाः परिशटन्ति । न च तेन प्रयोजनं । उत्कृष्टेषु

च योगस्थानेषु वर्तमानः प्रभूतं कर्मदलिकमादत्ते, उत्कृष्टसंक्लेशपरिणामश्चोत्कृष्टां स्थितिं बध्नाति प्रभूतां चोद्वर्तयति स्तोकं चापवर्तयति, अतो योगकषायोत्कृष्टग्रहणं। 'निच्चमित्यादि' नित्यं सर्वकालं जघन्ये आयुर्बन्धकाले जघन्ये योगे वर्तमान आयुर्बन्धं कृत्वा। उत्कृष्टे हि आयुःप्रायोग्ये योगे वर्तमानः प्रभूतानायुःपुद्गलान् आदत्ते, तथास्वाभाव्यात ज्ञानावरणीयस्य प्रभूतान् पुद्गलान् परिशाटयति। न च तेन प्रयोजनं, अतो जघन्ययोगग्रहणं। तथोपरितनीषु स्थितिषु निषेकं कर्मदलिकस्यात्मरूपं बहु स्वभूमिकानुसारेणातिशयेन प्रभूतं कृत्वा। एवं बादरपृथ्वीकायिकेषु मध्ये पूर्वकोटिपृथक्त्वान्यधिकसागरोपमसहस्रद्वयन्यूनाः सप्ततिसागरोपमकोटीकोटीः संस्थित ततो विनिर्गच्छति। विनिर्गत्य च बादरत्रसकायेषु द्वीन्द्रियादिषु मध्ये समुत्पद्यते ॥ ७४-७७ ॥

वायरतसेसु तक्कालमेवमंते य सत्तमखिइए। सव्वलहुंपज्जत्तो जोगकसायाहिओ बहुसो ॥ ७६ ॥

वायर त्ति-एवं पूर्वोक्तेन विधिना-"पज्जत्तापज्जत्तगदीहेयरआउगेसु ॥ जोगकसाउक्कोसो बहुसो निच्चमवि आउबंधं च। जोगजहण्णेणुवरिल्लठिइनिसेगं बहुं किच्चा" इत्येवंरूपेण बादरत्रसेषु तत्कालं बादरत्रसकायस्थितिकालं पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणं परिभ्रम्य यावतो वारान् सप्तमी नरकपृथिवीं गन्तुं योग्यो भवति तावतो वारान् गत्वा अन्तिमे सप्तमपृथिवीनारकभवे वर्तमानः। इह दीर्घजीवित्वं योगकषायोत्कटता च लभ्यत इति यावत्तंभवसप्तमनरकपृथ्वीगमनग्रहणं। तथा सप्तमपृथ्वीनारकभवे सर्वलघुपर्याप्तः सर्वेभ्योऽप्यन्येभ्यो नारकेभ्यः शीघ्रं पर्याप्तभावमुपगतः। इहापर्याप्तापेक्षया पर्याप्तस्य योगोऽसंख्येयगुणो भवति। तथा च सति तस्यातीवप्रभूतकर्मपुद्गलोपादानसंभवः। तेन चेह प्रयो-

नमिति सर्वलघुपर्याप्त इत्युक्तं । बहुशश्चानेकवारं च तस्मिन् भवे वर्तमानो योगकषायाधिक उत्कृष्टानि योगस्थानानि उत्कृष्टांश्च काषायिकान् परिणामविशेषान् गच्छन् ॥ ७६ ॥

जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणे । तिचरिमदुचरिमसमए पूरित्तु कसायउक्कस्सं ॥ ७७ ॥

जोगुक्कोसं चरिमदुचरिमे समए य चरिमसमयम्मि । संपुण्णगुणियकम्मो पगयं तेणेह सामित्ते ॥७८॥

जोग त्ति–योगयवमध्यस्योपरि अष्टसामायिकानां योगस्थानानामुपरीत्यर्थः । अन्तर्मुहूर्तं कालं यावत् स्थित्वा जीवितावसानेऽन्तर्मुहूर्ते आयुषः शेषे । एतदुक्तं भवति–अन्तर्मुहूर्तावशेषे आयुषि योगयवमध्यस्योपरि असंख्येयगुणवृद्ध्याऽन्तर्मुहूर्तं कालं यावत् प्रवर्धमानो भूत्वा । ततः किमित्याह–'तिचरिमेत्यादि' त्रयश्चरमा यस्मात्स त्रिचरमः यत आरभ्यान्तिमः समयस्तृतीयो भवति स त्रिचरम इत्यर्थः । तस्मिन् भवस्य त्रिचरमे द्विचरमे च समये वर्तमान उत्कृष्टं काषायिकं संक्लेशस्थानं पूरयित्वा चरमे द्विचरमे च समये योगस्थानमपि चोत्कृष्टं पूरयित्वा । इहोत्कृष्टो योग उत्कृष्टश्च संक्लेशो युगपदेकमेव समयं यावत् प्राप्यते, नाधिकमिति विषमसमयतया उत्कृष्टयोगोत्कृष्टकषायस्थानग्रहणं । त्रिचरमे द्विचरमे च समये उत्कृष्टसंक्लेशग्रहणं प्रभूतोद्वर्तना स्वल्पा (प) वर्तनाभावा(वना)र्थं, द्विचरमे चरमे च समये उत्कृष्टयोगग्रहणं परिपूर्णप्रदेशोपचयसंभवार्थं । स इत्थंभूतो नारकभवस्य चरमसमये वर्तमानः संपूर्णगुणितकर्मांशो भवति, तेन च संपूर्णगुणितकर्मांशेन इहोत्कृष्टप्रदेशसंक्रमस्वामित्वे प्रकृतमधिकारः ॥ ७७–७८ ॥

तदेवमुक्तो गुणितकर्मांशः । संप्रति स्वामित्वमभिधीयते—

तत्तो उव्वट्टित्ता आवलिगासमयतप्रवत्थस्स । आवरणविग्घचोद्दसगोरालियसत्त उक्कोसो ॥ ७९ ॥

तत्तो त्ति–स गुणितकर्मांशस्ततः सप्तमपृथ्वीरूपान्नरकादुद्वृत्य पर्याप्तपञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नस्ततस्तत्रभवस्य तस्मिन् पर्याप्तसंज्ञिपञ्चेन्द्रियभवे तिष्ठतः प्रथमावलिकाया उपरितने चरमे समये ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकौदारिकसप्तकलक्षणानामेकविंशतिप्रकृतीनामुत्कृष्टप्रदेशसंक्रमो भवति । एतासां हि कर्मप्रकृतीनां नारकभवचरमसमये उत्कृष्टयोगवशात् प्रभूतं कर्मदलिकमात्तं । तच्च बन्धावलिकायामतीतायां संक्रमयति, नान्यथा । अन्यत्र चैतावत् प्रभूतं कर्मदलिकं न प्राप्यत इति आवलिगासमयतप्रत्थस्सेत्युपात्तं ॥ ७९ ॥

कम्मचउक्के असुभाण बज्झमाणीण सुहुमरागंते । संछोभणंमि नियगे चउवीसाए नियट्टिस्स ॥ ८० ॥

कम्मचउक्के त्ति–कर्मचतुष्के दर्शनावरणवेदनीयनामगोत्रलक्षणे या अशुभाः सूक्ष्मसंपरायावस्थायामबध्यमानाः प्रकृतयो निद्राद्विकासातवेदनीयप्रथमवर्जसंस्थानप्रथमवर्जसंहननाशुभवर्णादिनवकोपघाताप्रशस्तविहायोगत्यपर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रलक्षणा द्वात्रिंशत्प्रकृतयस्तासां गुणितकर्मांशस्य क्षपकस्य सूक्ष्मसंपरायस्यान्ते चरमसमये उत्कृष्टः प्रदेशसंक्रमो भवति । तथाऽनिवृत्तिबादरस्य गुणितकर्मांशस्य क्षपकस्य मध्यमकषायाष्टकस्त्यानर्द्धित्रिकतिर्यग्द्विकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मसाधारणनोकषायषट्करूपाणां चतुर्विंशतिप्रकृतीनां आत्मीय आत्मीये चरमसंछोभे चरमसंक्रमे उत्कृष्टप्रदेशसंक्रमो भवति ॥ ८० ॥

तत्तो अणंतरागयसमयाउक्कस्स सायबंधद्धं । बंधिय असायबंधावलिगंतसमयम्मि सायस्स ॥ ८१ ॥

तत्तो त्ति–ततो नरकभवादनन्तरभवे समागतः प्रथमसमयादारभ्य सातवेदनीयमुत्कृष्टां बन्धाद्धां उत्कृष्टं बन्धकालं यावदित्यर्थः । बद्ध्वा असातवेदनीयं बद्धुमारभते । ततोऽसातवेदनीयस्य बन्धावलिकान्तसमये सातवेदनीयं सकलमपि बन्धावलिकातीतं भवतीति कृत्वा तस्मिन् समयेऽसातवेदनीये बध्यमाने सातं यथाप्रवृत्तसंक्रमे संक्रमयतः सातस्योत्कृष्ट-प्रदेशसंक्रमो भवति ॥ ८१ ॥

संछोभणाए दोण्हं मोहाणं वेयगस्स खणसेसे । उप्पाइय सम्मत्तं मिच्छत्तगए तमतमाए ॥ ८२ ॥

संछोभणाए त्ति–क्षपकस्य द्वयोर्मोहनीययोर्मिथ्यात्वसम्यग्मिथ्यात्वरूपयोरात्मीयात्मीयचरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति । तथा क्षणशेषेऽन्तर्मुहूर्तावशेषे आयुषि तमस्तमाभिधानायां सप्तमपृथिव्यां वर्तमान औपशमिकं सम्यक्त्वमुत्पाद्य दीर्घेण च गुणसंक्रमकालेन वेदकसम्यक्त्वपुञ्जं समापूर्य सम्यक्त्वात् प्रतिपतितो मिथ्यात्वं च प्रतिपद्य तत्प्रथमसमय एव वेदकसम्यक्त्वस्य मिथ्यात्वे उत्कृष्टं प्रदेशसंक्रमं करोति ॥ ८२ ॥

भिन्नमुहुत्ते सेसे तच्चरमावस्सगाणि किच्चेत्थ । संजोयणा विसंजोयगस्स संछोभणा एसिं ॥ ८३ ॥

भिन्नमुहुत्ते त्ति–स गुणितकर्मांशः सप्तमपृथिव्यां वर्तमानो भिन्नमुहूर्तावशेषे आयुषि तस्मिन् भवे यानि चरमावश्य-कानि–"जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणे । तिचरिमदुचरिमसमए पूरित्तु कसायउक्कस्सं" इत्यादिलक्षणानि

तानि कृत्वा । तस्याश्च सप्तमपृथिव्या उद्धृत्य सम्यक्त्वं चोत्पाद्य वेदकसम्यग्दृष्टिः सन् । संयोजनान् अनन्तानुबन्धिनो विसंयोजयति । विसंयोजना क्षपणा । तत एषामनन्तानुबन्धिनां चरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति ॥८३॥

ईसाणागयपुरिसस्स इत्थियाए य अठवासाए । मासपुहुत्तब्भहिए नपुंसगे सव्वसंकमणे ॥ ८४ ॥

ईसाणागय त्ति—ईशानदेवो गुणितकर्मांशः संक्लेशपरिणामेनैकेन्द्रियप्रायोग्यं बध्नन् नपुंसकवेदं भूयो भूयो बद्ध्वा तत ईशानाच्युतः सन् स्त्री वा पुरुषो वा जातः । ततो मासपृथक्त्वाभ्यधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु क्षपणायोद्यतते । तस्य नपुंसकवेदं क्षपयतश्चरमसंछोभे सर्वसंक्रमेण नपुंसकवेदस्योत्कृष्टः प्रदेशसंक्रमो भवति ॥ ८४ ॥

इत्थीए भोगभूमिसु जीविय वासाणसंखियाणि तओ । हस्सठिई देवत्ता सव्वलहुं सव्वसंछोभे ॥ ८५ ॥

इत्थीए त्ति—भोगभूमिषु भूयो भूयोऽसंख्येयवर्षाणि यावत् स्त्रीवेदं बद्ध्वा ततः पल्योपमासंख्येयभागे गते सति अकालमृत्युना मृत्वा ह्रस्वस्थितिं दशवर्षसहस्रप्रमाणां देवायुषो बद्ध्वा देवत्वेनोत्पन्नः । तत्रापि तमेव स्त्रीवेदमापूर्य स्वायुःपर्यन्ते मनुजेषु मध्येऽन्यतरवेदसहितो जातः । ततो लघु शीघ्रं क्षपणायोद्यतः । ततः 'इत्थीए त्ति' तस्य स्त्रीवेदस्य क्षपणसमये चरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति । इदमेव स्त्रीवेदस्योत्कृष्टमापूरणमुत्कृष्टश्च प्रदेशसंक्रमः केवलज्ञानेनोपलब्धो नान्यथेत्येषैव युक्तिरत्रानुसर्तव्या, न युक्त्यन्तराणि, युक्त्यन्तराणां चिरंतनग्रन्थेष्वदर्शनतो निर्मूलतयाऽन्यथापि कर्तुं शक्यत्वात् । एवमुत्तरत्रापि यथायोगं तथैव केवलज्ञानेनोपलम्भनादित्युत्तरमनुसरणीयम् ॥ ८५ ॥

वरिसवरित्थि पूरिय सम्मत्तमसंखवासियं लद्दियं । गंता मिच्छत्तमओ जहन्नदेवठिई नोच्चा ॥ ८६ ॥

वरिसवर त्ति–वर्षवरो नपुंसकवेदः तं ईशानदेवलोके प्रभूतकालमापूर्य भूयो भूयो बन्धेन दलिकान्तरसंक्रमणेन च स्वायुःक्षये ततश्च्युत्वा संख्येयवर्षायुष्केषु मध्ये समागत्य पुनरसंख्येयवर्षायुष्केषु मध्ये समुत्पन्नः । तत्रासंख्येयवर्षाणि यावत् स्त्रीवेदमापूर्य ततोऽसंख्येयवर्षाणि यावत् सम्यक्त्वं लब्ध्वा आस्वाद्य तद्धेतुकं च पुरुषवेदं तावन्ति वर्षाणि यावत् बध्नन् तत्र स्त्रीवेदनपुंसकवेदयोर्दलिकं निरन्तरं संक्रमयति । ततः पल्योपमासंख्येयभागमात्रं सर्वायुःप्रमाणं जीवित्वा पर्यन्ते च मिथ्यात्वमासाद्य ततो जघन्यस्थितिषु दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये समुत्पन्नः । तत्र समुत्पन्नः सन् अन्तर्मुहूर्तेनं कालेन सम्यक्त्वं प्रतिपद्यते ॥ ८६ ॥

आगंतु लहुं पुरिसं, संछुभमाणस्स पुरिसवेयस्स । तस्सेव सगे कोहस्स माणमायाणमवि कसिणो ॥ ८७ ॥

आगंतु त्ति–ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नस्ततो माससप्तकान्यधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु लघु शीघ्रं क्षपणायोद्यतते । केवलं बन्धव्यवच्छेदादर्वाक् आवलिकाद्विकेन कालेन यद्बद्धं पुरुषवेददलिकं तदतीव स्तोकमिति कृत्वा तत्परित्यज्य शेषस्य चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो वेदितव्यः । तथा तस्यैव पुरुषवेदोत्कृष्टप्रदेशसंक्रमस्वामिनः संज्वलनक्रोधस्य संसारं परिभ्रमता उपचितस्य क्षपणकाले प्रकृत्यन्तरदलिकाना गुणसंक्रमेण प्रचुरीकृतस्य स्वके आत्मीये चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो भवति । अत्रापि बन्धव्यवच्छेदादर्वाक् आवलिकाद्विकेन कालेन यद्बद्धं तन्मुक्त्वा शेषस्य चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो द्रष्टव्यः । एवं मानमाययोरपि वाच्यम् ॥ ८७ ॥

चउरुवसमित्तु खिप्पं लोभजसाणं ससंकमस्संते । सुभधुवबंधिगनामा णावलिगं गंतु बंधंता ॥ ८८ ॥

चउर त्ति–अनेकभवभ्रमणेन चतुरो वारान् यावन्मोहनीयमुपशमय्य चतुर्थोपशमनानन्तरं शीघ्रमेव क्षपकश्रेणिं प्रतिपन्नस्य तस्यैव गुणितकर्मांशस्य स्वसंक्रमस्यान्ते चरमसंछोभे इत्यर्थः । संज्वलनलोभयशःकीर्त्योरुत्कृष्टः प्रदेशसंक्रमो भवति । इहोपशमश्रेणिं प्रतिपन्नेन सता प्रकृत्यन्तरदलिकाना प्रभूतानां गुणसंक्रमेण तत्र प्रक्षेपात् द्वे अपि संज्वलनलोभयशःकीर्तिप्रकृती निरन्तरमापूर्येते, तत उपशमश्रेणिग्रहणं । आसंसारं च परिभ्रमता जन्तुना मोहनीयस्य चतुर एव वारान् यावदुपशमः क्रियते, न पञ्चममपि वारं, ततश्चतुरुपशमय्येत्युक्तं । तथा संज्वलनलोभस्य चरमसंछोभोऽन्तरकरणचरमसमये द्रष्टव्यः । न परतः, परतस्तस्य संक्रमाभावात् "अंतरकरणम्मि कए चरित्तमोहे णु(ऽ)पुव्विसंकमण" इतिवचनात् । यशःकीर्तिरपूर्वकरणगुणस्थानके त्रिंशत्प्रकृतिबन्धव्यवच्छेदसमयेऽवगन्तव्या, परतस्तस्याः संक्रमस्याभावात् । 'सुभेत्यादि' याः शुभध्रुवबन्धिन्यो नामप्रकृतयस्तेजसकार्मणशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुनिर्माणलक्षणा विंशतिसंख्याः तासां चतुष्कृत्वो मोहनीयोपशमानन्तरं बन्धान्तात् बन्धव्यवच्छेदादूर्ध्वमावलिकां गन्तुमावलिकायाः परतो यशःकीर्तौ प्रक्षिप्यमाणानामुत्कृष्टः प्रदेशसंक्रमो लभ्यते । इह गुणसंक्रमेण संक्रान्तं प्रकृत्यन्तरदलिकमावलिकायामतीतायां सत्यामन्यत्र संक्रमणयोग्यं भवति, नान्यथेत्यत उक्तं—"आवलियं गंतु बंधंता" इति ॥ ८८ ॥

निरुसमा य थिरसुभा, सम्मद्दिट्ठिस्स सुभधुवाओ वि । सुभसंघयणजुयाओ, बत्तीससयोदहिचियाओ ८९

निःश्वसमत्ति–स्निग्धलक्ष्णस्पर्शसमे स्थिरशुभनामनी द्रष्टव्ये । इदमुक्तं भवति—यथाऽनन्तरं शुभध्रुवबन्धिनामप्रकृतीनामन्तर्गतस्य स्निग्धस्पर्शस्योत्कृष्टप्रदेशसंक्रमभावना कृता, तथैतयोरपि स्थिरशुभनाम्नोरवगन्तव्या । एते च स्थिरशुभनामनी अध्रुवबन्धित्वात् पृथगुपात्ते । 'सम्मद्दिट्ठिस्सेत्यादि' सम्यग्दृष्टेर्याः शुभध्रुवबन्धिन्यः पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकसुभगसुस्वरादेयलक्षणा द्वादश प्रकृतयः शुभसंहननयुता वज्रर्षभनाराचसंहननसहिताः । वज्रर्षभनाराचं हि देवभवे नारकभवे वा वर्तमानाः सम्यग्दृष्टयो बध्नन्ति, न मनुजतिर्यग्भवे (तत्र) वर्तमानानां सम्यग्दृष्टीनां देवगतिप्रायोग्यबन्धसंभवेन संहननबन्धासंभवात् । ततो नैतत्सम्यग्दृष्टेः शुभध्रुवबन्धीति पृथगुपात्तं । तथा द्वात्रिंशदधिकसागरोपमशतचिताः । तथाहि—षट्षष्टिसागरोपमाणि यावत्सम्यक्त्वमनुपालयन् एता बध्नाति । ततोऽन्तर्मुहूर्तं कालं यावत् सम्यग्मिथ्यात्वमनुभूय पुनरपि सम्यक्त्वं प्रतिपद्यते । ततो भूयोऽपि सम्यक्त्वमनुभवन् षट्षष्टिसागरोपमाणि यावदेताः प्रकृतीर्बध्नातीति । तदेवं द्वात्रिंशदभ्यधिकं सागरोपमशतं यावत् सम्यग्दृष्टिर्ध्रुवा आपूर्य, वज्रर्षभनाराचसंहननं तु मनुष्यभवहीनं यथासंभवमुत्कृष्टं कालमापूर्य, ततः सम्यग्दृष्टेर्ध्रुवा अपूर्वकरणगुणस्थानके बन्धव्यवच्छेदानन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ संक्रमयतस्तासामुत्कृष्टः प्रदेशसंक्रमः, तदानीं प्रकृत्यन्तरदलिकानामप्यतिप्रभूतानां गुणसंक्रमेण लब्धानां संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् । वज्रर्षभनाराचसंहननस्य तु देवभवाच्च्युतः सन् सम्यग्दृष्टिर्देवगतिप्रायोग्यं बध्नन् आवलिकामात्रं कालमतिक्रम्योत्कृष्टं प्रदेशसंक्रमं करोति ॥ ८९ ॥

पूरित्तु पुवकोडीपुहुत्त संछोजगस्स निरयडुगं । देवगइनवगस्स य सगबंधंताविगं गंतुं ॥ ९० ॥

पूरित्तु त्ति–नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणं पूर्वकोटीपृथक्त्वं यावत्पूरयित्वा, नसनु पूर्वकोट्यायुष्केषु तिर्यग्भवेषु भूयो भूयो बद्धेत्यर्थः । ततोऽष्टमभवे मनुष्यो भूत्वा क्षपकश्रेणिं प्रतिपन्नोऽन्यत्र तन्नरकद्विकं संक्रमयन् चरमसंछोभे सर्वसंक्रमेण तस्योत्कृष्टं प्रदेशसंक्रमं करोति । तथा देवगतिनवकं देवगतिदेवानुपूर्वीवैक्रियनवकलक्षणं यदा पूर्वकोटिपृथक्त्वं यावदापूर्याष्टमभवे क्षपकश्रेणिं प्रतिपन्नः सन् स्वकबन्धान्तात् स्वबन्धव्यवच्छेदादनन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ प्रक्षिपति तदा तस्योत्कृष्टप्रदेशसंक्रमो भवति । तदानीं हि प्रकृत्यन्तरदलिकानामपि गुणसंक्रमेण लब्धानां संक्रमावलिकातिक्रान्तत्वेन संक्रमः प्राप्यत इति कृत्वा ॥ ९० ॥

सवचिरं सम्मत्तं, अणुपालिय पूरइत्तु मणुयडुगं । सत्तमखिइनिग्गइए, पढमे समए नरडुगस्स ॥९१॥

सवचिरं ति–सर्वचिरं सर्वोत्कृष्टं कालं अन्तर्मुहूर्तोनानि त्रयस्त्रिंशत्सागरोपमाणीत्यर्थः । सम्यक्त्वमनुपाल्य नारकः सप्तमक्षितौ वर्तमानः सम्यक्त्वप्रत्ययं तावन्तं कालं मनुजद्विकं मनुजगतिमनुजानुपूर्वीलक्षणमापूर्य नरकायुश्चरमेऽन्तर्मुहूर्ते मिथ्यात्वं गतः । तदास्तन्निमित्तं तिर्यग्द्विकं तस्य बध्नतो गुणितकर्मांशस्य सप्तमपृथिव्याः सकाशाद्विनिर्गतस्य प्रथमसमये एव मनुजद्विकं यथाप्रवृत्तसंक्रमेण तस्मिन् तिर्यग्द्विके बध्यमाने संक्रमयतस्तस्य मनुजद्विकस्योत्कृष्टः प्रदेशसंक्रमो भवति॥९१॥

थावरतज्ञाआया बुज्जोयाउं नपुंसगसमाउं । आहारगतिअयरं थिरसममुक्कस्स समकालं ॥ ९२ ॥

थावर त्ति—स्थावरनाम तथा तज्जातिः स्थावरजातिः एकेन्द्रियजातिरित्यर्थः। तथा आतपनाम, उद्योतनाम। एताश्च-तस्रः प्रकृतयो नपुंसकसमा, नपुंसकवेदस्येव आसामपि प्रकृतीनामुत्कृष्टः प्रदेशसंक्रमो भावनीय इत्यर्थः। तथा आहारकसप्तकं तीर्थंकरनाम च स्थिरसमं वक्तव्यं। केवलं तदुत्कृष्टस्वकबन्धकालं यावदापूरणीयमभिधातव्यं। इयमत्र भावना—आहारकसप्तकं तीर्थंकरनाम चोत्कृष्टं स्वबन्धकालं यावदापूर्य तत्राहारकसप्तकस्य स्वबन्धकाल उत्कृष्टो देशोना पूर्वकोटीं यावत्संयममनुपालयतो यावानप्रमत्तताकालस्तावान् सर्वो वेदितव्यः। तीर्थंकरनाम्नश्च स्वबन्धकाल उत्कृष्टो देशोनपूर्वकोटीद्वयाभ्यधिकानि त्रयस्त्रिंशत्सागरोपमाणि। तत एतावन्तं कालं यावदापूर्य क्षपकश्रेणिं प्रतिपन्नो यदा बन्धव्यवच्छेदादनन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ संक्रमयति, तदा तयोरुत्कृष्टः प्रदेशसंक्रमः॥ ९२॥

चउरुवसमित्तु मोहं मिच्छत्तगयस्स नीयबंधंतो। उच्चागोउक्कोसो तत्तो लहुसिग्झं होइ॥ ९३॥

चउ त्ति—इह मोहोपशमं कुर्वन् उच्चैर्गोत्रमेव बध्नाति, न नीचैर्गोत्रं। नीचैर्गोत्रसत्कानि च दलिकानि गुणसंक्रमेणोच्चैर्गोत्रे संक्रमयति। ततश्चतुष्कृत्वो मोहोपशमग्रहणमवश्यं कर्तव्यं। तत्र चतुरो वारान् मोहनीयमुपशमयन् उच्चैर्गोत्रं च बध्नन् तत्र नीचैर्गोत्रं गुणसंक्रमेण संक्रमयति। चतुष्कृत्वश्च मोहोपशमः किल भवद्वयेन भवति। ततस्तृतीये भवे मिथ्यात्वं गतः सन् नीचैर्गोत्रं बध्नाति, तच्च बध्नन् तत्रोच्चैर्गोत्रं संक्रमयति। ततः पुनरपि सम्यक्त्वमासाद्योच्चैर्गोत्रं बध्नन् तत्र नीचैर्गोत्रं संक्रमयति। एवं भूयो भूय उच्चैर्गोत्रं नीचैर्गोत्रं च बध्नतो नीचैर्गोत्रबन्धव्यवच्छेदानन्तरं शीघ्रमेव सिद्धिं गन्तुकामस्य नीचैर्गोत्रबन्धचरमसमये उच्चैर्गोत्रस्य गुणसंक्रमेण बन्धेन चोपचितीकृतस्योत्कृष्टः प्रदेशसंक्रमो भवति॥ ९३॥

तदेवमुक्तमुत्कृष्टप्रदेशसंक्रमस्वामित्वं । संप्रति जघन्यप्रदेशसंक्रमस्वामित्वमभिधानीयं । तच्च प्रायः क्षपितकर्मांशे प्राप्यत इति तस्यैव स्वरूपमाह—

पल्लासंखियभागेण कम्मठिइमच्छिउं निगोएसु । सुहुमेसभवियजोग्गं जहन्नयं कट्टु निग्गम्म ॥ ए४ ॥
जोग्गेससंखवारे सम्मत्तं लभिय देसविरयं च । अठक्खुत्तो विरई संजोयणहा य तइवारे ॥ एए ॥
चउरुवसमित्तु मोहं लहुं खवेंतो भवे खवियकम्मो । पाएण तहिं पगयं पडुच्च काइं वि सविसेसं ॥ए६॥

पल्ल त्ति–यो जीवः पल्योपमासंख्येयभागन्यूनां कर्मस्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणां यावत् पल्योपमासंख्येयभा-
गहीनं सप्ततिसागरोपमकोटीकोटीप्रमाणं कालं यावदित्यर्थः । सूक्ष्मनिगोदेषु सूक्ष्मानन्तकायिकेषु मध्ये उषित्वा । सूक्ष्मनिगोदा
हि स्वल्पायुषो भवन्ति, ततस्तेषां प्रभूतजन्ममरणभावेन वेदनार्तानां प्रभूतपुद्गलपरिसाट उपजायते । अपि च सूक्ष्मनिगोद-
जीवानां मन्दयोगता मन्दकषायत्वं च भवति । ततोऽभिनवकर्मपुद्गलोपादानमपि तेषां स्तोकतरमेव प्राप्यत इति सूक्ष्मनि-
गोद(जीवानां मन्दयोग)ग्रहणं "अभवियजोग्गं जहन्नयं कट्टु निग्गम्म त्ति" अभव्यप्रायोग्यं जघन्यं अभव्यप्रायोग्यजघन्य-
कल्पं प्रदेशसंचयं कृत्वा ततः सूक्ष्मनिगोदेभ्यो निर्गत्ययोग्येषु सम्यक्त्वदेशविरतिसर्वविरतियोग्येषु त्रसेषु मध्ये उत्पद्य पल्यो-
पमासंख्येयभागमध्ये संख्यातीतान् वारान् यावत् सम्यक्त्वं स्वल्पकालिकीं देशविरतिं च लब्ध्वा । कथं लब्धेति चेदु-
च्यते–सूक्ष्मनिगोदेभ्यो निर्गत्य बादरपृथ्वीकायेषु मध्ये समुत्पन्नस्ततोऽन्तर्मुहूर्तेन कालेन विनिर्गत्य मनुष्येषु पूर्वकोट्यायु-

ष्केषु मध्ये समुत्पन्नः। तत्रापि शीघ्रमेव माससप्तकानन्तरं योनिविनिर्गमनेन जातः। ततोऽष्टवार्षिकः सन् संयमं प्रतिपन्नः। ततो देशोनां पूर्वकोटीं यावत् संयममनुपाल्य स्तोकावशेषे जीविते सति मिथ्यात्वं प्रतिपन्नस्ततो मिथ्यात्वेनैव कालगतः सन् दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये देवत्वेनोपजातः। ततोऽन्तर्मुहूर्तमात्रे गते सति सम्यक्त्वं प्रतिपद्यते। ततो दशवर्षसहस्राणि जीवित्वा तावन्तं च कालं सम्यक्त्वमनुपाल्य पर्यवसानावसरे मिथ्यात्वेन कालगतः सन् बादरपृथिवीकायिकेषु मध्ये समुत्पन्नः। ततोऽन्तर्मुहूर्तेन ततोऽप्युद्धृत्य मनुष्येषु मध्ये समुत्पद्यते। ततः पुनरपि सम्यक्त्वं वा देशविरतिं वा सर्वविरतिं, वा प्रतिपद्यते। एवं देवमनुष्यभवेषु सम्यक्त्वादि गृह्णन् मुञ्चंश्च तावद्वक्तव्यो यावत्पल्योपमासंख्येयभागमध्ये संख्यातीतान् वारान् यावत् सम्यक्त्वलाभः स्वल्पकालिकश्च देशविरतिलाभो भवति। इह यदा यदा सम्यक्त्वादिप्रतिपत्तिस्तदा तदा बहुप्रदेशाः प्रकृतीरल्पप्रदेशाः करोति। ततो बहुशः सम्यक्त्वादिप्रतिपत्तिग्रहणं। एतेषु च सम्यक्त्वादियोग्येषु भवेषु मध्येऽष्टौ वारान् सर्वविरतिं प्रतिपद्यते तावत एव वारानष्टौ वारानित्यर्थः। विसंयोजनहा अनन्तानुबन्धिविघातको भूत्वा। तथा चतुरो वारान्मोहनीयमुपशमय्य ततोऽन्यस्मिन् भवे लघु शीघ्रं कर्माणि क्षपयन् क्षपितकर्मांश इत्यभिधीयते। एतेन च क्षपितकर्मांशेनेह जघन्यप्रदेशसंक्रमस्वामित्वे चिन्त्यमाने प्रायेण बाहुल्येन प्रकृतमधिकारः। काश्चित्पुनः प्रकृतीरधिकृत्य सविशेषं भणिष्यामि ॥ ९४–९५–९६ ॥

तत्र जघन्यप्रदेशसंक्रमस्वामित्वमाह—

आवरणसत्तगम्मि उ सहोहिणा तं विणोहिजुयलम्मि। निद्दादुगंतराइयहासचउक्के य बंधंते ॥९७॥

आवरण त्ति–अवधिना सह वर्तते यो जीवः तस्य अवधिज्ञानावरणवर्जितं ज्ञानावरणचतुष्टयं, अवधिदर्शनावरणर-हितं दर्शनावरणत्रयं, एतासां सप्तानां प्रकृतीनामात्मीयात्मीयबन्धव्यवच्छेदसमये यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति। अवधिज्ञानमुत्पादयन् प्रभूतान् कर्मपुद्गलान् परिशाटयति स। तत एतासां स्वस्वबन्धव्यवच्छेदसमये स्तोका एव पुद्गलाः प्राप्यन्ते। अत्रापि च जघन्यप्रदेशसंक्रमेणाधिकारः, ततोऽवधिना सह यो वर्तेत इत्युक्तं। तथा तमवधि विनाऽवधिज्ञानावधिदर्शनरहित इत्यर्थः। अवधियुगले अवधिज्ञानावरणावधिदर्शनावरणरूपे स्वस्वबन्धव्यवच्छेदसमये जघन्यः प्रदेशसंक्रमो भवति। अवधिज्ञानमवधिदर्शनं चोत्पादयतः प्रबलक्षयोपशमभावतोऽवधिज्ञानावरणावधिदर्शना-वरणयोरतीव रूक्षाः कर्मपुद्गला जायन्ते। ततो बन्धव्यवच्छेदकालेऽपि प्रभूताः परिशटन्ति। तथा च सति जघन्यः प्रदेशसंक्रमो न लभ्यत इति तं विनेत्युक्तं। 'निद्देत्यादि' निद्राद्विकं निद्राप्रचलारूपं, अन्तरायपञ्चकं, हास्यचतुष्कं हास्यरतिभयजुगुप्सालक्षणं, एतासामेकादशप्रकृतीनां स्वबन्धान्तसमये यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति। निद्राद्विकहास्यचतुष्टययोर्बन्धव्यवच्छेदानन्तरं गुणसंक्रमेण संक्रमो जायते। ततः प्रभूतं दलिकं लभ्यते। अन्तरायप-ञ्चकस्य बन्धव्यवच्छेदानन्तरं संक्रम एव न भवति, पतद्ग्रहाप्राप्तेः, ततो बंधांतसमयग्रहणं ॥ ए३ ॥

सायस्स णुवसमित्ता असायबंधाण चरिमबंधंते। खवणाए लोभस्स वि अपुव्वकरणालिगाअंते ॥ए४॥

सायस्स त्ति–अनुपशमय्य मोहनीयोपशममकृत्वा, उपशमश्रेणिमकृत्वेत्यर्थः। असातबन्धानां मध्ये यश्चरमोऽसातब-न्धस्तस्यान्तिमे समये वर्तमानस्य क्षपणायोद्यतस्य सातस्य जघन्यः प्रदेशसंक्रमो भवति। परतो हि सातस्य पतद्ग्रहता

भवति, न संक्रमः । 'खवणाए' इत्यादि, मोहनीयोपशममकृत्वा क्षपणायोद्यतस्यापूर्वकरणाद्धायाः प्रथमावलिकाया अन्तसमये संज्वलनलोभस्य जघन्यः प्रदेशसंक्रमः । परतो गुणसंक्रमे लब्धस्यातिप्रभूतस्य दलिकस्य संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् जघन्यप्रदेशसंक्रमाभावः ॥ ९८ ॥

अयरछावट्ठिदुगं गालिय थीवेयथीणगिद्धितिगे । सगखवणहापवत्तस्संते एमेव मिच्छत्ते ॥ ९९ ॥

अयर त्ति–सागरोपमाणां द्वे षट्षष्टी यावत्सम्यक्त्वमनुपालयन् स्त्रीवेदस्त्यानर्द्धित्रिकलक्षणाश्चतस्रः प्रकृतीर्गालयित्वा तासां संबन्धि प्रभूतं कर्मदलिकं परिशाट्य किञ्चिच्छेषाणां सतीनां तासां क्षपणाय समभ्युद्यतस्य यथाप्रवृत्तकरणान्तिमसमये विध्यातसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति । परतोऽपूर्वकरणे गुणसंक्रमेण प्रभूतकर्मदलिकसंक्रमसंभवात् जघन्यप्रदेशसंक्रमो न लभ्यत इति यथाप्रवृत्तकरणान्तसमयग्रहणं । 'एमेव मिच्छत्त इति' एवमेव पूर्वोक्तेनैव प्रकारेण मिथ्यात्वस्य जघन्यः प्रदेशसंक्रमोऽवगन्तव्यः । तद्यथा–द्वे षट्षष्टी सागरोपमाणां यावत्सम्यक्त्वमनुपाल्य तावन्तं कालं मिथ्यात्वं गालयित्वा किञ्चिच्छेषस्य मिथ्यात्वस्य क्षपणाय समुद्यतस्य स्वकीययथाप्रवृत्तकरणान्तसमये वर्तमानस्य विध्यातसंक्रमेण मिथ्यात्वस्य जघन्यः प्रदेशसंक्रमो भवति, परतो गुणसंक्रमः प्रवर्तते, तेन स न प्राप्यते ॥ ९९ ॥

हस्सगुणसंकमद्धाए पूरयित्ता समीससम्मत्तं । चिरसंमत्ता मिच्छत्तगयस्सुव्वलणथोगो सिं ॥ १०० ॥

हस्स त्ति–सम्यक्त्वमुत्पाद्य ह्रस्वया गुणसंक्रमाद्धया स्तोककालेन गुणसंक्रमेणेत्यर्थः । समिश्रं सम्यक्त्वं सम्यक्त्वसम्यग्मिथ्यात्वे इत्यर्थः । मिथ्यात्वदलेन पूरयित्वा आपूर्य चिरेण प्रभूतेन कालेन सम्यक्त्वान्मिथ्यात्वं गतस्य द्वे षट्षष्टी

सागरोपमाणां यावत्सम्यक्त्वमनुपाल्य मिथ्यात्वं गतस्येत्यर्थः । पल्योपमासंख्येयभागमात्रेण कालेन ते सम्यक्त्वसम्य-ग्मिथ्यात्वे उद्वलयतः स्तोके उद्वलनसंक्रमे तयोर्जघन्यः प्रदेशसंक्रमो द्विचरमखंडस्य चरमसमये सम्यक्त्वसम्यग्मिथ्या-त्वयोर्यद्दलिकं परस्थाने मिथ्यात्वप्रकृतिरूपे प्रक्षिप्यते स तयोर्जघन्यः प्रदेशसंक्रम इत्यर्थः ॥ १०० ॥

संजोयणाण चतुरुवसमित्तु संजोजइत्तु अप्पद्धं । अयरच्छावट्ठिदुगं पालिय सकइप्पवत्तंते ॥ १०१ ॥

संजोयणाण त्ति–चतुरो वारान् मोहनीयमुपशमय्य, चतुष्कृत्वो मोहनीयोपशमनेन किं प्रयोजनमिति चेदुच्यते–प्र-भूतपुद्गलपरिसाटः । तथाहि–चारित्रमोहनीयप्रकृतीनामुपशमं कुर्वन् स्थितिघातरसघातगुणश्रेणिगुणसंक्रमैः प्रभूतान् पुद्गलान् परिसाटयतीति । ततश्चतुष्कृत्वो मोहनीयोपशमं कृत्वा मिथ्यात्वं गच्छति । मिथ्यात्वं गतश्च सन् अल्पाद्धां अल्पं कालं यावत् संयोजनान् संयोज्यानन्तानुबन्धिनो बद्ध्वा, तदानीं च चारित्रमोहनीयदलिकं स्वल्पमेव विद्यते, चतुष्कृत्वो मोहोपशमकाले तस्य स्थितिघातादिभिर्घातितत्वात् । ततोऽनन्तानुबन्धिनो बध्नन् तेषु यथाप्रवृत्तसंक्रमेण स्तोकमेव चारित्रमोहनीयदलिकं संक्रमयति । ततोऽन्तर्मुहूर्ते गते सति पुनरपि सम्यक्त्वं प्रतिपद्यते । तच्च द्वे षट्षष्टी सागरोपमाणां यावदनुपाल्यानन्तानुबन्धिनां क्षपणाय समुद्यतते । तस्य स्वकयथाप्रवृत्तकरणान्तसमये तेषामनन्तानुब-न्धिनां विध्यातसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति । परतोऽपूर्वकरणे गुणसंक्रमः प्रवर्तते इति स न प्राप्यते ॥ १०१ ॥

अट्ठकसायासाए य असुभधुवबंधि अत्थिरतिगे य । सव्वलहुं खवणाए अहापवत्तस्स चरिमम्मि ॥१०२॥

अट्ठ त्ति–अप्रत्याख्यानप्रत्याख्यानावरणरूपा अष्टौ कषायाः, असातवेदनीयं, अशुभध्रुवबन्धिन्यः कुवर्णादिनवकोप-

घातरूपाः, अस्थिरनिकं अस्थिराशुभायशःकीर्तिसंज्ञं, एतासां द्वाविंशतिप्रकृतीनां कषायाष्टकरहिताना । 'सयलछुं ति' सर्वेभ्योऽन्येभ्यः शीघ्रमेव क्षपणायोद्यतस्य मासपृथक्त्वाभ्यधिकेषु अष्टसु वर्षेष्वतिक्रान्तेषु क्षपणायोद्यतस्येत्यर्थः । अष्टौ कषायान् प्रति देशोनां पूर्वकोटीं यावत् संयममनुपाल्य । पञ्चसंग्रहे पुनः सर्वा अप्येताः प्रकृतीरधिकृत्य देशोनां पूर्वकोटीं यावत् संयममनुपाल्येत्युक्तं । क्षपकश्रेणिं प्रतिपन्नस्य यथाप्रवृत्तकरणचरमसमये कषायाष्टकस्य विध्यातसंक्रमेण शेषाणां यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति ॥ १०२ ॥

पुरिसे संजलणतिगे य घोलमाणेण चरमबद्धस्स । सगअंतिमे असाएण समा अरई य सोगो य ॥१०३॥

पुरिसे त्ति–पुरिसे इत्यादौ षष्ठ्यर्थे सप्तमी । पुरुषवेदस्य संज्वलनत्रिकस्य च क्रोधमानमायारूपस्य क्षपणाय समुद्यतेन क्षपणश्रेणिं प्रतिपन्नेन स्वस्वबन्धचरमसमये । 'घोलमाणेणं ति' जघन्ययोगिना यद्बद्धं दलिकं तस्य चरमसंछोभे जघन्यः प्रदेशसंक्रमो भवति । तथाहि–आसां चतसृणामपि प्रकृतीनां बन्धव्यवच्छेदसमये समयोनावलिकाद्विकबद्धं मुक्त्वाऽन्यत् प्रदेशसत्कर्म न विद्यते । तदपि च प्रतिसमयं संक्रमेण क्षयमुपगच्छति तावत् यावच्चरमसमयबद्धस्यासंख्येयो भागः शेषो भवति । ततस्तं सर्वसंक्रमेण संक्रमयतो जघन्यः प्रदेशसंक्रमः । 'असाएण समा अरई य सोगो य त्ति' अरतिशोकावसातसमौ असातवेदनीयस्येवारतिशोकयोर्जघन्यः प्रदेशसंक्रमो भावनीय इत्यर्थः ॥ १०३ ॥

वेउव्विकारसगं उव्वलियं बंधिऊण अप्पद्धं । जिट्ठठिई निरयाउं उव्वट्टित्ता अबंधित्तु ॥ १०४ ॥
थावरगयस्स चिरउव्वलणे एयस्स एव उच्चस्स । मणुयदुगस्स य तेउसु वाउसु वा सुहुमबद्धाणं ॥१०५॥

वेउव्वि त्ति–देवद्विकनरकद्विकवैक्रियसप्तकलक्षणं वैक्रियैकादशकं एकेन्द्रियभवे वर्तमानेनोद्वलितं पुनरपि पञ्चेन्द्रियत्वमुपागतेन सता। अद्धाद्धमद्धकालं अन्तर्मुहूर्तकालं यावद्बिलत्रैः। बद्धा, ततो ज्येष्ठस्थितिकमुत्कृष्टस्थितिस्त्रयस्त्रिंशत्सागरोपमस्थितिक इत्यर्थः। सप्तमनरकपृथिव्यां नारको जातः। ततस्तावन्तं कालं यावत् यथायोगं तद्वैक्रियैकादशकमनुभूय ततो नरकादुद्धृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः। तत्र च तद्वैक्रियैकादशकमबद्ध्वा स्थावरेष्वेकेन्द्रियेषु मध्ये समुत्पन्नः। तस्य चिरोद्वलनया पल्योपमासंख्येयभागमात्रेण कालेनोद्वलनया तदुद्वलयतो यत् द्विचरमखण्डस्य चरमसमये प्रकृत्यन्तरे दलिकं संक्रामति, स तस्य वैक्रियैकादशकस्य जघन्यः प्रदेशसंक्रमः। 'एवमेवेत्यादि' एतस्यैवानन्तरोक्तस्य जीवस्य पूर्वोक्तेन विधिना तेजोवायुषु मध्ये समागतस्य सूक्ष्मैकेन्द्रियभवे वर्तमानेन यदुच्चैर्गोत्रं मनुजद्विकं च मनुजगतिमनुजानुपूर्वीलक्षणं। ते चिरोद्वलनयोद्वलयतो द्विचरमखण्डस्य चरमसमये परप्रकृतौ यद्दलिकं संक्रामति स तयोर्जघन्यः प्रदेशसंक्रमः। इयमत्र भावना–मनुजद्विकमुच्चैर्गोत्रं च प्रथमतस्तेजोवायुभवे वर्तमानेनोद्वलितं, पुनरपि सूक्ष्मैकेन्द्रियभवमुपागतेनान्तर्मुहूर्तं यावद्बद्धं, ततः पञ्चेन्द्रियभवं गत्वा सप्तमनरकपृथिव्यामुत्कृष्टस्थितिको नारको जातः। तत उद्धृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः। एतावन्तं च कालमबद्ध्वा प्रदेशसंक्रमेण चानुभूय तेजोवायुषु मध्ये समागतः। तस्य मनुजद्विकोच्चैर्गोत्रे चिरोद्वलनयोद्वलयतो द्विचरमखण्डस्य चरमसमये परप्रकृतौ यद्दलं संक्रामति स तयोर्जघन्यः प्रदेशसंक्रमः॥ १०४–१०५॥

हस्सं कालं बंधिय विरओ आहारसत्तगं गंतुं। अविरइ महुवलंतस्स जा थोव उव्वलणा ॥ १०६ ॥

हृस्सं ति-हृस्वं कालं स्तोकं कालं यावत् विरतोऽप्रमत्तसंयतः सन् आहारकसप्तकं बद्ध्वा कर्मोदयपरिणतिवशात् पुनरप्यविरतिं गतः। ततोऽन्तर्मुहूर्तात्परतो महोद्वलनया चिरोद्वलनया पल्योपमासंख्येयभागप्रमाणेन कालेनोद्वलनयोद्वलयतः सतो या स्तोकोद्वलना द्विचरमखंडस्य चरमसमये यत्कर्मदलिकं परप्रकृतिषु प्रक्षिप्यते, सा स्तोकोद्वलना, सा आहारकस्य जघन्यः प्रदेशसंक्रमः ॥ १०६ ॥

तेवट्ठिसयं उदहीण स चउपल्लाहियं अबंधित्ता। अंते अहप्पवत्तकरणस्स उज्जोवतिरियदुगे ॥१०७॥

तेवट्ठिसयं ति-त्रिषष्ट्यधिकमुदधिशतं सागरोपमाणां शतं चतुष्पल्योपमाधिकं च यावत् स क्षपितकर्मांशः सर्वजघन्यतिर्यग्द्विकोद्योतसत्कर्मा उद्योततिर्यग्द्विकं अबद्ध्वा यथाप्रवृत्तकरणस्यान्ते चरमसमये उद्योततिर्यग्द्विकयोर्जघन्यं प्रदेशसंक्रमं करोति। कथं त्रिषष्ट्यधिकं सागरोपमाणां शतं चतुःपल्याधिकं च यावदबद्ध्वेति चेदुच्यते-स क्षपितकर्मांशस्त्रिपल्योपमायुष्केषु मनुजेषु मध्ये समुत्पन्नस्तत्र देवद्विकमेव बध्नाति, न तिर्यग्द्विकं, नाप्युद्योतं। तत्र चान्तर्मुहूर्ते शेषे सत्यायुषि सम्यक्त्वमवाप्य ततोऽप्रतिपतितसम्यक्त्व एव पल्योपमस्थितिको देवो जातः। ततोऽप्यप्रतिपतितसम्यक्त्वो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः। ततस्तेनैवाप्रतिपतितेन सम्यक्त्वेन सहित एकत्रिंशत्सागरोपमस्थितिको ग्रैवेयकेषु मध्ये देवो जातः। तत्र चोत्पत्त्यनन्तरमन्तर्मुहूर्तादूर्ध्वं मिथ्यात्वं गतः। ततोऽन्तर्मुहूर्तावशेषे आयुषि पुनरपि सम्यक्त्वं लभते। ततो द्वे षट्षष्टी सागरोपमाणां यावन्मनुष्यानुत्तरसुरादिषु सम्यक्त्वमनुपाल्य तस्याः सम्यक्त्वाद्धाया अन्तर्मुहूर्ते

शेषे शीघ्रमेव क्षपणाय समुद्यतः । ततोऽनेन विधिना त्रिषष्ट्यधिकं सागरोपमाणां शतं चतुष्पल्याधिकं च यावत्तिर्यग्द्विक-मुद्योतं च बन्धरहितं नयतीति ॥ १०७ ॥

इगविगलिंदियजोग्गा अठ पज्जत्तगेण सह तेसिं । तिरियगइसमं नवरं पंचासीउदहिसयं तु ॥१०८॥

इग त्ति–एकेन्द्रियविकलेन्द्रिययोग्या अष्टौ याः प्रकृतय एकद्वित्रिचतुरिन्द्रियजातिस्थावरातपसूक्ष्मसाधारणलक्षणाः । तासामपर्याप्तकसहितानां नवानां प्रकृतीनां तिर्यग्गतिसमं वक्तव्यं । नवरमत्र पञ्चाशीत्यधिकं सागरोपमशतं चतुष्पल्याधिकं यावदबन्धेति वक्तव्यं । कथमेतावन्तं कालं यावदबन्ध इति चेदुच्यते–इह क्षपितकर्मांशो द्वाविंशतिसागरोपमस्थितिकः षष्ठपृथिव्यां नारको जातः । तत्राप्यन्तर्मुहूर्तावशेषे आयुषि सम्यक्त्वं प्राप्तवान् । ततोऽप्रतिपतितसम्यक्त्व एव मनुष्यो जातः । ततस्तेनाप्रतिपतितेन सम्यक्त्वेन देशविरतिमनुपाल्य चतुःपल्योपमस्थितिकः सौधर्मदेवलोके देवो जातः । ततस्तेनापतितेन सम्यक्त्वेन सह देवभवाच्च्युत्वा मनुष्यो जातः । तस्मिंश्च मनुष्यभवे संयममनुपाल्य ग्रैवेयके-ष्वेकत्रिंशत्सागरोपमस्थितिको देवो जातः । तत्र चोत्पत्त्यनन्तरमन्तर्मुहूर्तादूर्ध्वं मिथ्यात्वं गतः । ततोऽन्तर्मुहूर्तावशेषे आयुषि च्युतोऽपि सम्यक्त्वं प्रतिपद्यते । ततो द्वे षट्षष्टी सागरोपमाणां यावत् सम्यक्त्वमनुपाल्य तस्याः सम्यक्त्वाद्धाया अन्तर्मुहूर्ते शेषे क्षपणाय समुद्यतते । तदेवं पञ्चाशीत्यधिकं सागरोपमशतं चतुःपल्याधिकं यावत्पूर्वोक्तानां नवप्रकृतीनां बन्धाभावः ॥ १०८ ॥

छत्तीसाए सुभाणं सेढिमणारुहिय सेसगविहीहिं । कट्टु जहन्नं खवणं अपुव्वकरणालिया अंते ॥१०९॥

छत्तीसाए त्ति–श्रेणिमनारुह्योपशमश्रेणिमकृत्वा शेषैर्विधिभिः क्षपितकर्मांशसत्कैः षट्त्रिंशत्संख्यानां शुभप्रकृतीनां पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननतैजससप्तकप्रशस्तविहायोगतिशुक्ललोहितहारिद्रसुरभिगन्धकषाया-म्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुपराघातोच्छ्वासत्रसादिदशकनिर्माणलक्षणानां जघन्यं प्रदेशाग्रं कृत्वा क्षपणायोद्यतस्य क्षपितकर्मांशस्यापूर्वकरणसत्कायाः प्रथमावलिकाया अन्ते चरमसमये तासां जघन्यः प्रदेशसंक्रमो भवति । तत ऊर्ध्वं तु गुणसंक्रमेण लब्धस्यातिप्रभूतस्य दलिकस्य संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् स न प्राप्यते । पञ्चसंग्रहे तु वज्रर्षभनाराचवर्जितानां शेषाणां पञ्चत्रिंशत्प्रकृतीनामेवापूर्वकरणप्रथमावलिकान्ते जघन्यः प्रदेशसंक्रम उक्तः । वज्रर्षभ-नाराचसंहननस्य तु स्वबन्धव्यवच्छेदसमये इति ॥ १०९ ॥

सम्मद्दिट्ठिअजोग्गाण सोलसण्हं पि असुभपगईणं । थीवेएण सरिसगं नवरं पढमं तिपल्लेसु ॥११०॥

सम्मद्दिट्ठि त्ति–सम्यग्दृष्टेरयोग्यानां षोडशानामशुभप्रकृतीनां प्रथमवर्जसंस्थानप्रथमवर्जसंहननाप्रशस्तविहायोगतिदु-र्भगदुःस्वरानादेयनपुंसकवेदनीचैर्गोत्रलक्षणाना स्त्रीवेदेन सदृशं वक्तव्यं । यथा प्राक् स्त्रीवेदस्य जघन्यप्रदेशसंक्रमभा-वना कृता तथात्रापि कर्तव्या । नवरमेतासा जघन्यप्रदेशसंक्रमस्वामी प्रथमं त्रिपल्योपमायुष्केषु मनुष्येषु मध्ये समुत्पन्नोवक्तव्य । अन्तर्मुहूर्तावशेषे चायुषि प्राप्तसम्यक्त्वः । शेषं तथैव वक्तव्यम् ॥ ११० ॥

नरतिरियाण तिपल्लस्संते ओरालियस्स पाउग्गा । तित्थयरस्स य बंधा जहन्नओ आलिगं गंतु ॥१११॥

नर त्ति–नरतिरश्चां त्रिपल्योपमस्यान्ते औदारिकस्य प्रायोग्याः प्रकृतयो जघन्यप्रदेशसंक्रमयोग्याः । इयमत्र भावना–

यो जीवः सकलान्यजीवापेक्षया सर्वजघन्यौदारिकसत्कर्मा सन् त्रिपल्योपमायुष्केषु तिर्यग्मनुष्येषु मध्ये समुत्पन्नः, तस्यौदारिकसप्तकमनुभवतो विध्यातसंक्रमेण परप्रकृतौ संक्रमयतश्च स्वायुषश्चरमसमये तस्यौदारिकसप्तकस्य जघन्यः प्रदेशसंक्रमो भवति । औदारिकस्य प्रायोग्या इत्यौदारिकसप्तक । 'तित्थयरस्सेत्यादि' तीर्थकरनामकर्मणो बन्धं कुर्वता प्रथमसमये बद्धं दलिकं तत् बन्धावलिकातीतं सत् यदा परप्रकृतिषु यथाप्रवृत्तसंक्रमेण संक्रमयति तदा तीर्थकरनाम्नो जघन्यः प्रदेशसंक्रमो भवति । तदेवमुक्तः प्रदेशसंक्रमः । तदुक्तौ च समर्थितं संक्रमकरणम् ॥ १११ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायां संक्रमकरणम् ॥

तदेवमुक्तं संक्रमकरणं । संप्रत्युद्देशक्रमेणोद्वर्तनापवर्तने वक्तुमवसरप्राप्ते । ते च द्वे अपि स्थित्यनुभागविषये । तत्र प्रथमतः स्थितेरुद्वर्तनापवर्तने वक्तव्ये । स्थितौ सत्यामनुभागसंभवात् । तत्राप्युद्देशक्रमप्रामाण्यानुसरणात् प्रथमतः स्थितेरुद्वर्तनामेवाह—

उव्वट्टणा ठिईए उदयावलियाएँ बाहिरठिईणं । होइ अबाहा अइच्छावणाउ जा वालिया हस्सा ॥१॥

उव्वट्टण त्ति–स्थितेरुद्वर्तना उदयावलिकाया बाह्यानां स्थितीनामवगन्तव्या । उदयावलिका तु सकलकरणायोग्येति कृत्वा सा प्रतिषिध्यते । अपि च बध्यमानप्रकृतेर्यावती अबाधा तया तुल्या वा हीना वा पूर्वबद्धप्रकृतीनां या स्थितिः सा नोद्वर्त्यते, सा उत्पाट्य तत ऊर्ध्वं बध्यमानप्रकृतेरबाधाया उपरि न निक्षिप्यत इत्यर्थः, अबाधाकालान्तःप्रविष्टत्वात् । या पुनरबाधाकालादुपरितनी सा उद्वर्त्यत एव । तदेवमबाधान्तःप्रविष्टाः सर्वा अपि स्थितय उद्वर्तनामधिकृत्यातिक्रमणीया भवन्ति परित्याज्या भवन्तीत्यर्थः । अतिक्रमणीयस्थितिप्रमाणनिरूपणार्थमेवाह—'होइ इत्यादि' भवति अबाधा अतीत्थापना उल्लङ्घनीया । एषोत्कर्षतोऽतीत्थापना । सा च हीना हीनतरा तावदवगन्तव्या यावत् ह्रस्वा जघन्याऽतीत्थापना आवलिका आवलिकामात्रा भवति । इयमत्र भावना–अबाधान्तर्गतं कर्मदलिकमुद्वर्तनायोग्यं न भवति, किं त्वबाधायाः परत एव । तथा च सति यैवोत्कृष्टाऽबाधा सैवोत्कृष्टाऽतीत्थापना, समयोना उत्कृष्टाऽबाधा समयोनोत्कृष्टाऽतीत्थापना, द्विसमयोनोत्कृष्टाऽबाधा द्विसमयोनोत्कृष्टाऽतीत्थापना । एवं समयसमयहान्याऽतीत्थापना तावद्वाच्या यावज्जघन्याऽबाधाऽन्तर्मुहूर्तप्रमाणा । ततोऽपि जघन्यतराऽतीत्थापना आवलिकामात्रं भवति । तच्चोदयावलिकालक्ष-

णमवसेयं । तथाहि—उदयावलिकान्तर्गताः स्थितयो नोद्वर्त्यन्ते "उवट्टणा ठिईए उदयावलियाए बाहिरठिईणं" इतिवचनात् । ननु यदा तदा वा बन्धे सत्युद्वर्तना प्रवर्तिष्यते "आबाधा उक्कड्ढिउं" इतिवचनात्, तत उदयावलिकागताः स्थितयोऽबाधान्तर्गतत्वेन नोद्वर्तिष्यन्ते, किमुदयावलिकाग्रहणेन ? तदयुक्तं, अभिप्रायापरिज्ञानात् । अबाधान्तर्गताः स्थितयो नोद्वर्त्यन्त इति किमुक्तं भवति ?अबाधान्तर्गताः स्थितयः स्वस्थानादुत्पाट्याबाधाया उपरि न निक्षिप्यन्ते । अबाधाया मध्ये पुनस्तासां वक्ष्यमाणक्रमेणोद्वर्तनानिक्षेपौ प्रवर्तमानौ न विरुध्येते । तत उदयावलिकान्तर्गता अप्युद्वर्तनीयाः प्राप्नुवन्तीति प्रतिषिध्यन्ते ॥ १ ॥

संप्रति निक्षेपप्ररूपणार्थमाह—

आवलियअसंखभागाइ जाव कम्मठिइ त्ति निक्खेवो । समउत्तरालियाए साबाहाए भवे ऊणे ॥२॥

आवलिय त्ति–इह निक्षेपो द्विधा–जघन्य उत्कृष्टश्च । तत्रावलिकाया असंख्येयभागमात्रासु स्थितिषु यः कर्मदलिकनिक्षेपः स जघन्यः । तथाहि–सर्वोत्कृष्टात् स्थित्यग्रादध आवलिकामावलिकाया असंख्येयं च भागमधोऽवतीर्य ततोऽधस्तनी या स्थितिस्तस्या दलिकमतीत्थापनावलिकामात्रमतिक्रम्योपरितनीष्वेनावलिकाया असंख्येयभागभाविनीषु स्थितिषु निक्षिप्यते, नावलिकाया मध्येऽपि, तथास्वाभाव्यात् । ततोऽसौ जघन्यो दलिकनिक्षेपः । एवं च सति आवलिकाया असंख्येयतमेन भागेनाधिकास्वावलिकामात्रासु स्थितिषु उद्वर्तनं न भवतीति सिद्धं । तथा च सत्युत्कृष्टस्थितिबन्धे उद्वर्तनायोग्याः स्थितयो बन्धावलिकामबाधामुपरितनीमावलिकामसंख्येयभागाधिकां मुक्त्वा शेषा एव द्रष्टव्याः ।

तथाहि—बन्धावलिकान्तर्गतं सकलकरणायोग्यमिति कृत्वा बन्धावलिकान्तर्गताः स्थितयो नोद्वर्तनायोग्याः । तथाऽबाधान्तर्गता अपि नोद्वर्तनायोग्याः, तासामतीत्थापनात्वेन प्राक् प्रतिपादितत्वात् । असंख्येयभागाधिकावलिकामात्रभाविन्यश्चोपरितन्यः स्थितयः प्रागुक्तयुक्तेरेव नोद्वर्तनायोग्याः । इदानीं निक्षेपश्चिन्त्यते । तत्र यदावलिकामावलिकाया असंख्येयभागं चोपरिष्टादधोऽवतीर्य द्वितीयाऽधस्तनी स्थितिरुद्वर्त्यते, तदा समयाधिक आवलिकाया असंख्येयभागो निक्षेपविषयः । यदा तु तृतीया स्थितिरुद्वर्त्यते तदा द्विसमयाधिकः । एवं समयवृद्ध्या तावद्दलिकनिक्षेपो वर्धते यावदुत्कृष्टो भवति । स च कियान् भवतीति चेदुच्यते—'समयेत्यादि' समयाधिकावलिकयाऽबाधया च हीना सर्वा कर्मस्थितिः । तथाहि—अबाधोपरिस्थस्थितीनामुद्वर्तना भवति । तत्राप्यबाधाया उपरितने स्थितिस्थाने उद्वर्त्यमानेऽबाधाया उपरि दलिकनिक्षेपो भवति, नाबाधाया मध्येऽपि, उद्वर्त्यमानदलिकस्योद्वर्त्यमानस्थितेरूर्ध्वमेव निक्षेपात् । तत्राप्युद्वर्त्यमानस्थितेरुपरि आवलिकामात्राः स्थितीरतिक्रम्योपरितनीषु स्थितिषु सर्वासु दलिकनिक्षेपो भवति । अतोऽतीत्थापनावलिकामुद्वर्त्यमानां च समयमात्रां स्थितिमबाधां च वर्जयित्वा शेषा सर्वापि कर्मस्थितिरुत्कृष्टो दलिकनिक्षेपविषयः । उक्तं च पञ्चसंग्रहमूलटीकायां—समयोत्तरावलिकया साबाधया हीना यावदुत्कृष्टा कर्मस्थितिस्तावद्दलिकनिक्षेपो भवति । यतोऽबाधोपरिस्थस्थितीनामुद्वर्तना भवति सापि अतीत्थापनामुल्लंघ्योद्वर्त्यमानायामपि स्थितौ न दलिकनिक्षेपो भवति । अतः समयाधिकावलिकाबाधावर्जितासु शेषासु सर्वासु स्थितिषु दलिकनिक्षेपो भवतीति । तदेवमबाधाया उपरितनं समयमात्रमुद्वर्त्यमानं स्थितिस्थानमधिकृत्योत्कृष्टो दलिकनिक्षेपविषयः प्राप्यते । सर्वोपरितनं तु

स्थितिस्थानमुद्वर्त्यमानमपेक्ष्य जघन्यो दलिकनिक्षेपविषयः । उक्तं च—"आवाहोवरिठाणगदलं पडुच्चेह परमनिक्खेवो । चरिमुव्वट्टणगाणं, पडुच्च इह जायइ जहण्णो ॥ १ ॥" इति ॥ २ ॥

एषोऽव्याघाते दलिकनिक्षेपविधिरुक्तः, व्याघाते पुनरेवं—

निव्वाघाएणेवं वाघाए संतकम्महिगबंधो । आवलिअसंखभागादि होइ अइत्थावणा नवरं ॥ ३ ॥

निव्वाघाएण त्ति—एवं पूर्वोक्तेन प्रकारेण दलिकनिक्षेपो निर्व्याघातेन व्याघाताभावेन द्रष्टव्यः । व्याघाते पुनः प्राक्तनस्थितिसत्कर्मापेक्षयाऽभ्यधिकाभिनवकर्मबन्धरूपे आवलिकाऽसंख्येयभागादिकाऽतीत्थापना भवति । निक्षेपोऽप्यावलिकागतासंख्येयभागादिकः । इयमत्र भावना—प्राक्तनसत्कर्मस्थित्यपेक्षया समयादिनाऽभ्यधिको योऽभिनवकर्मबन्धः स व्याघात उच्यते । तस्मिन् सत्यतीत्थापना आवलिकासंख्येयभागादिका भवति । तथाहि—प्राक्तनसत्कर्मस्थितेः सकाशात् समयमात्रेणाभ्यधिकेऽभिनवकर्मबन्धे सति प्राक्तनसत्कर्मणोऽन्त्या वा द्विचरमा वा स्थितिर्नोद्वर्त्यते । एवं समयद्वयेन समयत्रयेण यावदावलिकाया असंख्येयतमेनापि भागेनाभ्यधिकेऽभिनवकर्मबन्धे द्रष्टव्यं । यदा पुनर्द्वाभ्यामावलिकाया असंख्येयतमाभ्यां भागाभ्यामभ्यधिकोऽभिनवकर्मबन्ध उपजायते तदा प्राक्तनसत्कर्मणोऽन्त्या स्थितिरुद्वर्त्यते । उद्वर्त्य चावलिकायाः प्रथममसंख्येयतमं भागमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते । एतावतीत्थापनानिक्षेपौ जघन्यौ । यदा पुनः समयाधिकाभ्यां द्वाभ्यामावलिकाया असंख्येयतमाभ्यां भागाभ्यामधिकोऽभिनवकर्मबन्धस्तदा आवलिकायाः प्रथममसंख्येयतमं भागं समयाधिकमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते । एवम-

न्निनवकर्मबन्धस्य समयादिवृध्द्यावतीत्थापना प्रवर्धते । सा च तावद्यावदावलिका परिपूर्णा जवति । निक्षेपस्तु सर्वत्रापि तावन्मात्र एव जवति । तत ऊर्ध्वं पुनरभिनवकर्मबन्धवृद्धौ निक्षेप एव केवलो वर्धते, नातीत्थापना । यावच्चाभिनवकर्मबन्ध' प्राक्तनस्थितिसत्कर्मणः सकाशात् द्वाभ्यामावलिकाया असंख्येयतमाभ्यां जागाभ्यामधिको न जवति तावत् प्राक्तनसत्कर्मणश्चरमस्थितेरध आवलिकामसंख्येयजागाधिकामतिक्रम्य ततोऽधस्तनीरेव स्थितीरुद्वर्तयति । तत्रापि यदा आवलिकामसंख्येयजागाधिकामतिक्रम्य ततोऽनन्तरामेवाधस्तनीं स्थितिमुद्वर्तयति, तदा आवलिकामतिक्रम्योपरितने आवलिकाया असंख्येयतमे जागे निक्षिपति । यदा तु द्वितीयामधस्तनीं स्थितिमुद्वर्तयति तदा समयाधिकेऽसंख्येयतमे जागे निक्षिपति । एवंप्रकारेण द्रष्टव्यं । संप्रत्यल्पबहुत्वमुच्यते—या जघन्याऽतीत्थापना यश्च जघन्यो निक्षेप, एतौ द्वावपि सर्वस्तोकौ परस्परं च तुल्यौ । यतो द्वावप्येतौ आवलिकासत्कासंख्येयतमजागमात्रौ, ताभ्याममंख्येयगुणोत्कृष्टाऽतीत्थापना, तस्या उत्कृष्टाबाधारूपत्वात् । ततोऽप्युत्कृष्टो निक्षेपोऽसंख्येयगुण', यतोऽसौ समयाधिकावलिकयाऽबाधया च हीना सर्वा कर्मस्थितिः । ततोऽपि सर्वा कर्मस्थितिर्विशेषाधिका ॥ ३ ॥

तदेवमुक्ता स्थित्युद्वर्तना, संप्रति स्थित्यपवर्तनामाह—

उवट्टंतो य ठिइं उदयावलिबाहिरा ठिइविसेसा । निक्खिवइ तइयजागे समयाहिए सेसमइवइय ॥४॥
वड्ढइ तत्तो अतित्थावणा उ जावालिगा हवइ पुन्ना । ता निक्खेवो समयाहिगालिग दुगूण कम्मठिई ५

उवट्टंतो त्ति–स्थितिमपवर्तयन् उदयावलिकाया बाह्यान स्थितिविशेषान् स्थितिभेदानपवर्तयति । के ते स्थितिविशेषा

इति चेदुच्यते-उदयावलिकाया उपरि समयमात्रा स्थितिः द्विसमयमात्रा एवं तावद्वाच्यं यावद्बन्धावलिकोदयावलिका-
हीना सर्वा कर्मस्थितिः। एते स्थितिविशेषाः। उदयावलिकाया गता च स्थितिः सकलकरणायोग्येति कृत्वा तां नाप-
वर्तयति। तत उक्तं उदयावलिकाबाह्यामिति। कुत्र निक्षिपतीति चेदत आह-निक्षिपति आवलिकायास्त्रिभागे तृतीये
भागे समयाधिके। शेषं समयोनमुपरितनं त्रिभागद्वयमतिक्रम्य। इयमत्र भावना—उदयावलिकाया उपरितनी या
स्थितिस्तस्या दलिकमपवर्तयन् उदयावलिकाया उपरितनौ द्वौ त्रिभागौ समयोनावतिक्रम्याधस्तने समयाधिके तृतीये
भागे निक्षिपति। एष जघन्यो निक्षेपः जघन्या चातीत्थापना। यदोदयावलिकाया उपरितनी द्वितीया स्थितिरपवर्त्यते
तदाऽतीत्थापना प्रागुक्तप्रमाणा समयाधिका भवति। निक्षेपस्तु तावन्मात्र एव। यदा तूदयावलिकाया उपरितनी
तृतीया स्थितिरपवर्त्यते तदाऽतीत्थापना प्रागुक्तप्रमाणा द्विसमयाधिका भवति, निक्षेपस्तु तावन्मात्र एव। एवमतीत्था-
पना प्रतिसमयं तावद्वृद्धिमुपनेतव्या यावदावलिका परिपूर्णा भवति। ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव
भवति, निक्षेपस्तु वर्धते, स च तावद्यावद्बन्धावलिकातीत्थापनावलिकारहिता अपवर्त्यमानस्थितिरहिता च सकलापि
कर्मस्थितिः। तथाहि—बन्धावलिकायामतीतायां सत्यां कर्मापवर्तयितुमारभते। तत्रापि च यदा सर्वोपरितनं स्थिति-
स्थानमपवर्तयति, तदावलिकामात्रमधोऽवतीर्याधस्तनेषु सर्वेष्वपि स्थितिस्थानेषु निक्षिपति। तस्मादुत्कृष्टो निक्षेपोऽपव-
र्त्यमानस्थितिसमयरहिता बन्धावलिकातीत्थापनावलिकारहिता च सर्वापि कर्मस्थितिः। उक्तं च—“समयाहिअइच्छ-
वणा बंधावलिया य मोत्तु निक्खेवो। कम्मट्ठिई बंधोदय आवलिया मुत्तु उक्कट्ठे ॥१॥” कर्मस्थितिं बन्धावलिकामु-

दयावलिकां च मुक्त्वा शेषां सर्वामपि अपवर्तयतीत्यर्थः । तदेवमुदयावलिकाया उपरितनं समयमात्रं स्थितिस्थानं प्रतीत्य प्रवर्तमानायामपवर्तनायां समयाधिकावलिकात्रिभागो निक्षेपः प्राप्यते । स च सर्वजघन्यः सर्वोपरितनं च स्थितिस्थानं प्रतीत्य प्रवर्तमानायामपवर्तनायां यथोक्तरूप उत्कृष्टो निक्षेपः । उक्तं च–" उदयावलिमुपरिल्लं ठाणं अहिगिच्च होइ अइहीणो । निक्खेवो सव्वोवरि ठिइठाणवसा भवे परमो ॥ १ ॥ " ॥ ४–५ ॥

एष निर्व्याघातेऽपवर्तनाविधिरुक्तः, संप्रति व्याघाते तमाह—

वाघाए समऊणं कंडगमुक्कस्सिया अइत्थवणा । डायठिई किंचूणा ठिइकंडुक्कस्सगपमाणं ॥ ६ ॥

वाघाए त्ति–अत्र व्याघातो नाम स्थितिघातः तस्मिन् सति, तं कुर्वत इत्यर्थः । समयोनं कंडकमात्रमुत्कृष्टाऽतीत्थापना । कथं समयोनमिति चेदुच्यते–उपरितनेन समयमात्रेण स्थितिस्थानेनापवर्त्यमानेन सहाधस्तात् कंडकमतिक्रम्यते । ततस्तेन विना कंडकं समयोनमेव भवति । कंडकमानमाह–' डायठिई ' इत्यादि, यस्याः स्थितेरारभ्य तस्या एव प्रकृतेरुत्कृष्टं स्थितिबन्धमाधत्ते । ततः प्रभृति सर्वापि स्थितिर्डायस्थितिरित्युच्यते । उक्तं च पञ्चसंग्रहमूलटीकायां–"यस्याः स्थितेरारभ्योत्कृष्टं स्थितिबन्धं विधत्ते निर्मापयति, तस्या आरभ्योपरितनानि सर्वाण्यपि स्थितिस्थानानि डायस्थितिसंज्ञानि भवन्ति " । सा डायस्थितिः किंचिदूना कंडकस्योत्कृष्टं प्रमाणं, पञ्चसंग्रहे पुनरेवं मूलटीकाकृता व्याख्या कृता- "सा डायस्थितिरुत्कर्षतः किंचिदूना किंचिदूनकर्मस्थितिप्रमाणा । तथाहि—अन्तःकोटीकोटीप्रमाणं स्थितिबन्धं कृत्वा पर्याप्तसंज्ञिपञ्चेन्द्रिय उत्कृष्टसंक्लेशवशादुत्कृष्टां स्थितिं विधत्ते इति ।सा डायस्थितिः किंचिदूनकर्मस्थितिप्रमाणा कंडकस्यो-

त्कृष्टं प्रमाणमिति"। एतच्चोत्कृष्टं कण्डकं समयमात्रेणापि न्यूनं कण्डकमुच्यते। एवं समयद्वयेन समयत्रयेण एवं तावन्न्यूनं वाच्यं यावत्तत्पल्योपमासंख्येयभागमात्रप्रमाणं भवति। तच्च जघन्यं कण्डकं। इदं च समयोनं जघन्या व्याघातेऽतीत्थापना। संप्रत्यल्पबहुत्वमुच्यते—तत्रापवर्तनायां जघन्यो निक्षेपः सर्वस्तोकः। तस्य समयाधिकावलिकात्रिभागमात्रत्वात्। ततोऽपि जघन्यातीत्थापना द्विगुणा त्रिसमयोना। कथं त्रिसमयोनं द्विगुणत्वमिति चेदुच्यते—व्याघातमन्तरेण जघन्याऽतीत्थापना आवलिकात्रिभागद्वयं समयोनं भवति। आवलिका चासत्कल्पनया नवसमयप्रमाणा कल्प्यते। ततस्त्रिभागद्वयं समयोनं पञ्चसमयप्रमाणमवगन्तव्यं। निक्षेपोऽपि जघन्यः समयाधिकावलिकात्रिभागरूपोऽसत्कल्पनया चतुःसमयप्रमाणो द्विगुणीकृतस्त्रिसमयोनः सन् एतावानेव भवतीति। ततोऽपि व्याघातं विनोत्कृष्टाऽतीत्थापना विशेषाधिका, तस्याः परिपूर्णावलिकामात्रत्वात्। ततो व्याघाते उत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, किञ्चिदूनकर्मस्थितिप्रमाणत्वात्तस्याः। ततोऽप्युत्कृष्टो निक्षेपो विशेषाधिकः, तस्य समयाधिकावलिकाद्विकोनसकलकर्मस्थितिप्रमाणत्वात्। ततः सर्वा कर्मस्थितिर्विशेषाधिका। संप्रत्युद्वर्तनापवर्तनयोः संयोगेनाल्पबहुत्वमुच्यते। तत्रोद्वर्तनाया व्याघाते जघन्यातीत्थापनानिक्षेपौ सर्वस्तोकौ, स्वस्थाने तु परस्परं तुल्यौ, आवलिकाऽसंख्येयभागमात्रत्वात्। ततोऽपवर्तनायां जघन्यो निक्षेपोऽसंख्येयगुणः, तस्य समयाधिकावलिकात्रिभागमात्रत्वात्। ततोऽप्यपवर्तनायामेव जघन्यातीत्थापना द्विगुणा त्रिसमयोना। अत्र भावना प्रागेव कृता। ततोऽप्यपवर्तनायामेव व्याघातं विनोत्कृष्टाऽतीत्थापना विशेषाधिका, तस्याः परिपूर्णावलिकाप्रमाणत्वात्। तत उद्वर्तनायामुत्कृष्टातीत्थापना संख्येयगुणा, तस्या उत्कृष्टाबाधारूपत्वात्।

॥११९॥

ततोऽपवर्तनायां व्याघाते उत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, तस्याः किंचिदूनडायस्थितिप्रमाणत्वात् । तत उद्वर्तनाया-मुत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽप्यपवर्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः। ततोऽपि सर्वा स्थितिर्विशेषाधिका ॥६॥

तदेवमुक्ते स्थित्युद्वर्तनापवर्तने, संप्रत्यनुभागोद्वर्तनापवर्तने वाच्ये । तत्र प्रथमतोऽनुभागोद्वर्तनामाह–

चरमं नोवट्टिज्जइ जावाणंताणि फड्डगाणि ततो । उस्सक्किय उक्कड्डइ एवं उव्वट्टणाईउ ॥ ७ ॥

चरमं ति–चरमं स्पर्धकं नोद्वर्त्यते, नापि द्विचरमं । एवं तावद्वाच्यं यावच्चरमात्स्पर्धकादधोऽनन्तानि स्पर्धकानि। इद-मत्र तात्पर्य–यो जघन्यो निक्षेप आवलिकाया असंख्येयभागः सर्वोपरितनो या च तस्याध आवलिकामात्रातीत्थापना तत्स्थितिस्थानगतानि स्पर्धकानि सर्वाण्यपि नोद्वर्त्यन्ते, किंतु तेभ्योऽवष्टक्याधस्तादवतीर्य यानि स्पर्धकानि समयमात्र-स्थितिगतानि तान्युद्वर्तयति । तानि चोद्वर्त्यावलिकामात्रस्थितिगतानि अनन्तानि स्पर्धकान्यतिक्रम्योपरितनेष्वेवाव-लिकासत्कासंख्येयभागमात्रगतेषु स्पर्धकेषु निक्षिपति । यदा पुनरधोऽवतीर्य द्वितीयसमयमात्रस्थितिगतानि स्पर्धकान्यु-द्वर्तयति तदावलिकामात्रस्थितिगतानि स्पर्धकान्यतिक्रम्योपरितनेषु समयाधिकावलिकासत्कासंख्येयभागमात्रगतेषु स्पर्ध-केषु निक्षिपति। एवं यथा यथाऽधोऽवतरति तथा तथा निक्षेपो वर्धते। अतीत्थापना पुनः सर्वत्रापि आवलिकामात्रस्थिति-गतान्येव स्पर्धकानि । कियान् पुनरुत्कृष्टो निक्षेपविषय इति चेदुच्यते–बन्धावलिकायामतीतायां समयाधिकावलिका-बाधागतानि स्पर्धकानि व्यतिरिच्य शेषाणि सर्वाण्यपि निक्षेपविषयः । तथाहि–अबाधागतानि स्पर्धकानि नोद्वर्त्यन्ते। उद्वर्त्यमानानि च समयमात्रस्थितिगतानि स्पर्धकानि न तत्रैव निक्षिपति । आवलिकामात्रगतानि त्वतीत्थापना । ततो

बन्धावलिकायामतीतायां समयाधिकावलिकागतानि अबाधागतानि च स्पर्धकानि व्यतिरिच्य शेषाणि सर्वाणि निक्षेप-
विषयः । संप्रत्यत्रैवाल्पबहुत्वमुच्यते—तत्र सर्वस्तोको जघन्यनिक्षेपस्तस्यावलिकागतासंख्येयभागगतस्पर्धकमानत्वात् ।
ततोऽतीत्थापनाऽनन्तगुणा, निक्षेपविषयस्पर्धकेभ्य आवलिकामात्रस्थितिगतानां स्पर्धकानामनन्तगुणत्वात् । एवं सर्वे-
त्राप्यनन्तगुणता स्पर्धकापेक्षया द्रष्टव्या । तत उत्कृष्टो निक्षेपोऽनन्तगुणः । ततोऽपि सर्वोऽनुभागो विशेषाधिकः ।
तदेवमुक्तानुभागोद्वर्तना । संप्रत्यनुभागापवर्तनामतिदेशेनाह—'एवं उव्वट्टणाऽऽइ' एवमुद्वर्तनाप्रकारेणापवर्तनाप्यनुभाग-
विषया वक्तव्या । केवलमादित आरभ्य । तद्यथा—प्रथमं स्पर्धकं नापवर्त्यते, नापि द्वितीयं, नापि तृतीयं । एवं ताव-
द्वाच्यं यावदुदयावलिकामात्रस्थितिगतानि स्पर्धकानि भवन्ति । तेभ्य उपरितनानि तु स्पर्धकान्यपवर्त्यन्ते । तत्र यदो-
दयावलिकात उपरिसमयमात्रस्थितिगतानि स्पर्धकान्यपवर्तयति, तदा समयोनावलिकात्रिभागद्वयगतानि स्पर्धकान्यति-
क्रम्याधस्तनेष्वावलिकासमयाधिकत्रिभागगतेषु स्पर्धकेषु निक्षिपति । यदा तूदयावलिकाया उपरि द्वितीयसमयमा-
त्रस्थितिगतानि स्पर्धकान्यपवर्तयति तदा प्रागुक्ताऽतीत्थापना समयोनावलिकात्रिभागद्वयप्रमाणा समयमात्रस्थितिगतैः
स्पर्धकैरधिकावगन्तव्या । निक्षेपस्तु तावन्मात्र एव । एवं समयसमयवृद्ध्याऽतीत्थापना तावद्वृद्धिमुपनेतव्या यावदाव-
लिका परिपूर्णा भवति । ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव, निक्षेपस्तु वर्धते । एवं निर्व्याघाते सति द्रष्टव्यं ।
व्याघाते पुनः अनुभागकण्डकं समयमात्रस्थितिगतस्पर्धकन्यूनमतीत्थापना द्रष्टव्या । कण्डकमानं समयमात्रन्यूनत्वं च
यथा प्राक् स्थित्यपवर्तनायामुक्तं, तथात्रापि द्रष्टव्यं । अत्राल्पबहुत्वमुच्यते—सर्वस्तोको जघन्यनिक्षेपः । ततो जघन्याती-

त्थापनाऽनन्तगुणा । ततो व्याघातेऽतीत्थापनाऽनन्तगुणा । तत उत्कृष्टमनुभागकंडकं विशेषाधिकं, तस्य समयगतैः स्पर्धकैरतीत्थापनातोऽधिकत्वात् । तत उत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽपि सर्वोऽनुभागो विशेषाधिकः ॥ ७ ॥

संप्रति द्वयोरप्युद्वर्तनापवर्तनयोरल्पबहुत्वं सूत्रकृत्प्रतिपादयति—

थोवं पएसगुणहाणिअंतरे दुसु जहन्ननिक्खेवो। कमसो अणंतगुणिउं दुसु वि अइत्थावणा तुल्ला ॥८॥

वाघाएणणुभागकंडगमेक्काएँ वग्गणाऊणं। उक्कोसो निक्खेवो ससंतबंधो य सविसेसो ॥ ९ ॥

थोवं ति–एकस्यां स्थितौ यानि स्पर्धकानि तानि क्रमशः स्थाप्यन्ते। तद्यथा—सर्वजघन्यं रसस्पर्धकमादौ । ततो विशेषाधिकरसं द्वितीयं । ततो विशेषाधिकरसं तृतीयं । एवं यावत्सर्वोत्कृष्टरसमन्ते । तत्रादिस्पर्धकादारभ्योत्तरोत्तरस्पर्धकानि प्रदेशापेक्षया विशेषहीनानि विशेषहीनानि, अन्तिमस्पर्धकादारभ्य पुनरधोऽधः क्रमेण प्रदेशापेक्षया विशेषाधिकानि विशेषाधिकानि । तेषां मध्ये एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा यत्स्पर्धकजातं तत् सर्वस्तोकं । अथवा स्नेहप्रत्ययस्पर्धकस्यानुभागद्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा यदनुभागपटलं तत्सर्वस्तोकं। ततः 'दुसु त्ति' द्वयोरप्युद्वर्तनापवर्तनयोर्जघन्यो निक्षेपोऽनन्तगुणः, स्वस्थाने तुल्यः । तत्र यद्यप्युद्वर्तनायामावलिकाऽसंख्येयभागगतानि स्पर्धकानि निक्षेपोऽपवर्तनायां समयाधिकावलिकात्रिभागगतानि स्पर्धकानि, तथाप्यादिमस्थितिषु स्पर्धकानि स्तोकान्येव प्राप्यन्ते, अन्तिमस्थितिषु प्रभूतानीति स्पर्धकसंख्यापेक्षया द्वयोरपि निक्षेपस्तुल्यः । एवमतीत्थापनायामुत्कृष्टनिक्षेपेऽपि च भावनीयं । क्रमश इति च सकलगाथापेक्षया योजनीयं । ततो द्वयोरप्यतीत्थापना व्याघातबाह्याऽनन्तगुणा,

स्वस्थाने तु परस्परं तुल्या । ततः 'वाघाएणेत्यादि' व्याघातेन यदुत्कृष्टमनुभागकण्डकमुत्कीर्यमाणं वर्तते तद्विषयोत्कृष्टस्थिति-गतस्पर्धकसंहतिरूपयोर्नन्तं एषोत्कृष्टाऽतीत्थापना साऽनन्तगुणा । तत उद्वर्तनापवर्तनयोरुत्कृष्टो निक्षेपो विशेषाधिकः, स्वस्थाने तु परस्परं तुल्यः । ततः 'स मंतनंधो य सनिमेसो त्ति' पूर्वस्मादुत्कृष्टस्थितिकर्मानुभागेन सहोत्कृष्टस्थित्यनुभागवन्धो विशेषाधिक इति ॥ ८-९ ॥

संप्रत्युद्वर्तनापवर्तनयोः कालनियमं विषयनियमं च प्रतिपादयति—

आवंधा उक्कड्ड सव्वहितोकड्डणा ठिइरसाणं । किट्टीवज्जे उभयं किट्टिसु ओवट्टणा नवरं (एक्का) ॥१०॥

आवंध त्ति–आ बंधात् बन्धं यावत्, उत्कर्षयति यावद्वन्धस्तावदुद्वर्तना भवति, परतो न भवतीत्यर्थः । तथा सर्वत्र बन्धकरणकालेऽबन्धकाले वाऽपकर्षणाऽपवर्तना स्थितिरसाना स्थित्यनुभागानां प्रवर्तते । एष कालनियमः । अथवा आवन्धादिति यावन्मात्रस्थितिबन्धस्तावन्मात्रस्य स्थितिसत्कर्मणः स्थित्युद्वर्तनानुभागोद्वर्तना चोपजायते । उपरितनस्य कर्मणः स्थित्यनुभागोद्वर्तना न भवति । अपकर्षणाऽपवर्तना पुनः सर्वत्र बन्धप्रमाणादर्वाक् परतो वा स्थित्यनुभागयोः प्रवर्तते । तथा किट्टीकृतवर्जे कर्मदलिके उभयमुद्वर्तनापवर्तनारूपं भवति । किट्टीकृते त्वपवर्तनैव केवला, नोद्वर्तनेति । एष विषयनियमः ॥ १० ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुद्वर्तनापवर्तने समाप्ते ॥

तदेवमुक्ते उद्वर्तनापवर्तने । संप्रत्युद्देशक्रमेणोदीरणा वक्तव्या । तत्र चैतेऽर्थाधिकाराः । तद्यथा–लक्षणं, भेदः, साद्यनादिप्ररूपणा, स्वामित्वं, उदीरणाप्रकृतिस्थानानि, तत्स्वामित्वं चेति । तत्र प्रथमतो लक्षणभेदयोः प्ररूपणार्थमाह—

जं करणेणोकड्ढिय उदए दिज्जइ उदीरणा एसा । पगइठिइअणुभागप्पएसमूलुत्तरविभागा(गो) ॥ १ ॥

जं ति–अत्र पूर्वार्धेन लक्षणमभिहितमुत्तरार्धेन तु भेदः । तत्र यत्परमाण्वात्मकं दलिकं करणेन योगसंज्ञकेन वीर्यविशेषेण कषायसहितेनासहितेन वा उदयावलिकाबहिर्वर्तिनीभ्यः स्थितिभ्योऽपकृष्योदये दीयते उदयावलिकायां प्रक्षिप्यते एषोदीरणा । उक्तं च–"उदयावलियबाहिरिल्लठिईहिंतो कसायसहिएणं असहिएण वा जोगसन्नेण करणेणं दलियमाकड्ढिय उदयावलियाए पवेसणं उदीरणत्ति" । सा च किंभूतेत्यत आह–प्रकृतिस्थित्यनुभागप्रदेशमूलोत्तरविभागा, प्रकृतिस्थित्यनुभागप्रदेशैर्मूलप्रकृतिभिरुत्तरप्रकृतिभिश्च कृत्वा विभागो भेदो यस्याः सा तथा । इदमुक्तं भवति–सोदीरणा चतुर्विधा, तद्यथा–प्रकृत्युदीरणा, स्थित्युदीरणा, अनुभागोदीरणा, प्रदेशोदीरणा च। एकैकापि द्विधा–मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयाऽष्टधा, उत्तरप्रकृतिविषया चाष्टपञ्चाशदधिकशतभेदा ॥ १ ॥

तदेवमुक्तौ लक्षणभेदौ । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा–मूलप्रकृतिविषया, उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषयामाह–

मूलपगईसु पंचण्ह तिहा दोण्हं चउविहा होइ । आउस्स साइ अधुवा दसुत्तरसउत्तरासिं पि ॥ २ ॥

मूलपगईसु त्ति-मूलप्रकृतिषु मध्ये पञ्चानां मूलप्रकृतीनां ज्ञानावरणदर्शनावरणनामगोत्रान्तरायरूपाणामुदीरणा त्रिधा त्रिप्रकारा। तद्यथा-अनादिर्ध्रुवाऽध्रुवा च। तथाहि-ज्ञानावरणदर्शनावरणान्तरायाणां यावत् क्षीणमोहगुणस्थानकस्य समयावलिकाशेषो न भवति तावत्सर्वजीवानामुदीरणाऽवश्यंभाविनी। नामगोत्रयोस्तु यावत्सयोगिचरमसमयस्तावत्। तत एषामनादिरुदीरणा, ध्रुवाऽभव्यानां, अध्रुवा भव्यानां। तथा द्वयोर्वेदनीयमोहनीययोरुदीरणा चतुर्विधा। तद्यथा-सादिरनादिर्ध्रुवाऽध्रुवा च। तत्र वेदनीयस्य प्रमत्तगुणस्थानकं यावदुदीरणा, न परतः। मोहनीयस्य सूक्ष्मसंपरायगुणस्थानकं यावत् न परतः। ततोऽप्रमत्तादिगुणस्थानकेभ्यः प्रतिपततो वेदनीयस्योपशान्तमोहगुणस्थानकाच्च प्रतिपततो मोहनीयस्योदीरणा सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवे पूर्ववत्। आयुषः पुनरुदीरणा सादिरध्रुवा च। तथाहि-आयुषः पर्यन्तावलिकायां नियमादुदीरणा न भवति ततोऽध्रुवा। पुनरपि परभवोत्पत्तिप्रथमसमये प्रवर्तते ततः सादिरिति। तदेवं कृता मूलप्रकृतिषु साद्यनादिप्ररूपणा। संप्रत्युत्तरप्रकृतिषु तां चिकीर्षुराह-'दसुत्तरसउत्तरासिं वि' सादिरध्रुवा चेत्यनुवर्तते। उत्तरासामपि उत्तरप्रकृतीनामपि दशोत्तरशतसंख्यानां पञ्चविधज्ञानावरणदर्शनावरणचतुष्टयमिथ्यात्वतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभगुरुलघुनिर्माणान्तरायपंचकरूपाष्टाचत्वारिंशद्वर्जानां, सर्वशेषप्रकृतीनामित्यर्थः। उदीरणा द्विधा, तद्यथा-सादिरध्रुवा च। सा च साद्यध्रुवताऽध्रुवोदयत्वादेव सिद्धा ॥ २ ॥

मिच्छत्तस्स चउद्धा तिहा य आवरणविग्घचउदसगे। थिरसुभ सेयर उवघायवज्ज धुवबंधिनामे य ॥ ३ ॥

मिच्छत्तस्स त्ति-मिथ्यात्वस्योदीरणा चतुर्धा, तद्यथा-सादिरनादिर्ध्रुवाऽध्रुवा च। तत्र सम्यक्त्वं प्रतिपद्यमानस्योदीरणा

मिथ्यात्वस्य न भवति, उदयाभावात् । सम्यक्त्वात्प्रतिपतितस्य मिथ्यात्वं गतस्य पुनरपि भवति । ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य त्वनादिः । अभव्यानां ध्रुवा । भव्यानामध्रुवा । तथा ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकरूपाणां चतुर्दशप्रकृतीनामुदीरणा त्रिप्रकारा । तद्यथा–अनादिर्ध्रुवाऽध्रुवा च । तथाहि–एतासां प्रकृतीनां ध्रुवोदयत्वादनादिरुदीरणा । अभव्यानां ध्रुवा । भव्यानां तु क्षीणमोहगुणस्थानके आवलिकाशेषे व्यवच्छेदभावादध्रुवा । तथा स्थिरशुभे सेतरे अस्थिराशुभसहिते तयोः, उपघातं वर्जयित्वा शेषनामध्रुवबन्धिनीनां च तैजससप्तकागुरुलघुवर्णादिविंशतिनिर्माणलक्षणानां सर्वसंख्यया त्रयस्त्रिंशत्संख्यानामुदीरणा त्रिधा, तद्यथा–अनादिर्ध्रुवाऽध्रुवा च । तत्रानादित्वं ध्रुवोदयत्वात् । ध्रुवाऽभव्यानां । अध्रुवा भव्यानां सयोगिकेवलिचरमसमये व्यवच्छेदभावात् । शेषाणां चाध्रुवोदयानां दशोत्तरशतसंख्यानामध्रुवोदयत्वादुदीरणा सादिः,अध्रुवा च प्रागेवोक्ता ॥ ३ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति मूलप्रकृत्युदीरणास्वामिनमाह—

घाईणं छउमत्था उदीरगा रागिणो य मोहस्स । तइयाऊण पमत्ता जोगंता उ त्ति दोण्हं च ॥ ४ ॥

घाईणं त्ति–घातिप्रकृतीनां ज्ञानावरणदर्शनावरणान्तरायरूपाणां सर्वेऽपि छद्मस्थाः क्षीणमोहपर्यवसाना उदीरकाः । मोहनीयस्य तु रागिणः सरागाः सूक्ष्मसंपरायपर्यवसाना उदीरकाः । तृतीयस्य वेदनीयस्यायुषश्च प्रमत्ताः प्रमत्तगुणस्थानकपर्यन्ताः सर्वेऽप्युदीरकाः । केवलमायुषः पर्यन्तावलिकायां नोदीरका भवन्ति । तथा द्वयोर्नामगोत्रयोर्योग्यन्ताः

सयोगिकेवलिपर्यवसानाः सर्वेऽप्युदीरकाः । इतिशब्दो निजकमो गाथापर्यन्ते योजनीयः । स च मूलप्रकृत्युदीरणापरिसमाप्तिद्योतको वेदितव्यः ॥ ४ ॥

तदेवं मूलप्रकृत्युदीरणास्वाम्युक्तः । साम्प्रतमुत्तरप्रकृत्युदीरणास्वामिनमाह—

विग्घावरणधुवाणं छउमत्था जोगिणो उ धुवगाणं । उवघायस्स तणुत्था तणुकिट्टीणं तणुगरागा ॥५॥

विग्घ त्ति-विग्घ त्ति अन्तरायं, ततोऽन्तरायपञ्चकज्ञानावरणपञ्चकदर्शनावरणचतुष्टयरूपाणां चतुर्दशानां ध्रुवोदयप्रकृतीनां सर्वे छद्मस्था उदीरकाः । तथा 'धुवगाणं ति' नामध्रुवोदयानां त्रयस्त्रिंशत्संख्यानां तैजसकार्मणवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणरूपाणां योगिनः सयोगिकेवलिपर्यन्ता उदीरकाः । उपघातनाम्नस्तु तनुस्थाः शरीरस्थाः शरीरपर्याप्त्या पर्याप्ता उदीरकाः । तनुकिट्टीनां सूक्ष्मकिट्टीनां अर्थात् लोभसत्कानां तनुकरागाः सूक्ष्मसंपराया यावच्चरमावलिका न भवति तावदुदीरकाः ॥ ५ ॥

तसबायरपज्जत्तग सेयर गइजाइदिट्ठिवेयाणं । आऊण य तन्नामा पत्तेगियरस्स उ तणुत्था ॥ ६ ॥

तस त्ति-त्रसबादरपर्याप्तानां सेतराणां सप्रतिपक्षाणां स्थावरसूक्ष्मापर्याप्तसहितानामित्यर्थः । तथा चतसृणां गतीनां, पञ्चानां च जातीनां, तिसृणां दृष्टीनां दर्शनानां मिथ्यादर्शनादीनां, त्रयाणां च वेदानां नपुंसकवेदादीनां, चतुर्णां चायुषां, सर्वसंख्यया पञ्चत्रिंशत्प्रकृतीनां यथास्वं तन्नामानस्तत्तत्प्रकृतिनामान उदीरकाः । तद्यथा—त्रसनाम्नस्त्रसाः, ते च शरी-

रेऽपान्तरालगतौ च वर्तमाना उदीरकाः । एवं सर्वेषामपि भावनीयं । तथा प्रत्येकनाम्न इतरस्य च साधारणनाम्नः तनुस्थाः शरीरस्थाः शरीरपर्याप्त्या पर्याप्ता यथाक्रमं प्रत्येकशरीरिणः साधारणशरीरिणश्च सर्वे उदीरकाः ॥ ६ ॥

आहारग नरतिरिया सरीरदुगवेयए पमोत्तूणं। उरालाए एवं तडुवंगाए तसजियाउं ॥ ७ ॥

आहारग त्ति–ये नरा मनुष्यास्तिर्यञ्चश्च आहारका ओजोलोमप्रक्षेपाहाराणामन्यतममाहारं गृह्णन्तस्ते औदारिकशरीरनाम्नः । उपलक्षणमेतदौदारिकबन्धनचतुष्टयस्यौदारिकसंघातस्य चोदीरकाः, किं सर्वेऽपि ? नेत्याह–शरीरद्विकवेदकान् प्रमुच्य, शरीरद्विकमाहारकवैक्रियलक्षणं तत्स्थान् परित्यज्य । ते हि नौदारिकशरीरनामोदये वर्तन्ते, तत्कथं तस्योदीरकाः स्युः ? । तथैवमुक्तेन प्रकारेण । 'तडुवंगाए त्ति' तदंगोपांगनाम्न औदारिकांगोपांगनाम्न उदीरका वेदितव्याः । केवलं ते त्रसकायिका एव, न स्थावराः, तेषां तदुदयाभावात् ॥ ७ ॥

वेउव्विगाए सुरनेरईया आहारगा नरो तिरिउ । सन्नी वायरपवणो य लद्धिपज्जत्तगो होज्जा ॥ ८ ॥

वेउव्विगाए त्ति–वैक्रियशरीरनाम्नः । उपलक्षणमेतद्वैक्रियबन्धनचतुष्टयस्य वैक्रियसंघातस्य च । सुरा नैरयिका वा । आहारका ओजोलोमाद्यन्यतममाहारं गृह्णन्तः । यश्च नरस्तिर्यग्वा संज्ञी वैक्रियलब्धिवा (मा) न् । यश्च वादरपवनो दुर्भगनामोदयी लब्धिपर्याप्तको वैक्रियशरीरलब्ध्या पर्याप्तः । ते सर्वेऽप्युदीरकाः ॥ ८ ॥

वेउव्विउवंगाए तणुतुल्ला पवणबायरं हिच्चा । आहारगाए विरउ विउव्वयंतो पमत्तो य ॥ ९ ॥

वेउव्वि त्ति–वैक्रियांगोपांगनाम्न उदीरकास्तनुतुल्या वैक्रियशरीरतुल्या वेदितव्याः । ये वैक्रियशरीरनाम्न उदीरकाः प्रागुपदिष्टास्त एव वैक्रियांगोपांगनाम्नोऽपि वेदितव्या इत्यर्थः । किं सर्वेऽपि ? नेत्याह–बादरपवनं बादरवायुकायिकं हित्वा परित्यज्य शेषा द्रष्टव्याः । 'आहारगाए इत्यादि' आहारकशरीरनाम्नो विरतः संयतस्तदाहारकशरीरं कुर्वन् प्रमत्तः प्रमादभावमुपगतः सन् उदीरको भवति ॥ ए ॥

छण्हं संठाणाणं संघयणाणं च सगलतिरियनरा । देहग पज्जत्ता उत्तमसंघयणिणो सेढी ॥ १० ॥

छण्हं ति–सकलाः पञ्चेन्द्रियास्तिर्यञ्चो मनुष्याश्च देहस्थाः शरीरनामोदये वर्तमाना लब्ध्या पर्याप्ताः षणां संस्थानानां षणां च संहननानामुदीरका भवन्ति । इहोदयप्राप्तानामेवोदीरणा प्रवर्तते, नान्येषां । ततो यदा यत्संस्थानं संहननं वोदयप्राप्तं भवति, तत्तदोदीर्यते, नान्यदेति द्रष्टव्यं । तथोत्तमसंहननिनो वज्रर्षभनाराचसंहननिनः श्रेणिः क्षपकश्रेणिं भवति, न शेषसंहननिनः, तेन क्षपकश्रेणिं प्रतिपन्ना वज्रर्षभनाराचसंहननमेवोदीरयन्ति, न शेषसंहननानि, उदयाभावादित्यवसेयं ॥ १० ॥

चउरंसस्स तणुत्था उत्तरतणु सगलभोगभूमिगया। देवा इयरे हुंमा तसतिरियनरा य सेवट्टा(छेवट्ठा)११॥

चउरंसस्स त्ति–चतुरस्रस्यैव समचतुरस्रसंस्थानस्यैव तनुस्थाः शरीरस्था उत्तरतनव आहारकोत्तरवैक्रियशरीरिणो मनुष्यास्तिर्यञ्चश्च सकलाः सकलेन्द्रियाः पञ्चेन्द्रिया इत्यर्थः । तथा भोगभूमिगता देवाश्चोदीरका भवन्ति । 'इयरे हुंड त्ति' इतरे उक्तशेषा एकेन्द्रियविकलेन्द्रियनैरयिका अपर्याप्तकाश्च पञ्चेन्द्रियतिर्यग्मनुष्याः । एते सर्वेऽपि शरीरस्था हुंड-

संस्थानस्योदीरका भवन्ति । 'तसतिरियनरा य सेवट्ट त्ति' अत्रेतरे इत्यनुवर्तते, इतरे उक्तशेषास्त्रसा द्वीन्द्रियादयः पञ्चेन्द्रियतिर्यङ्मनुष्याश्च सेवार्ताः सेवार्तसंहननोपेताः सेवार्तसंहननस्योदीरकाः ॥ ११ ॥

संघयणाणि न उत्तरतणूसु तन्नामगा भवंतरगा । अणुपुव्वीणं परघायस्स उ देहेण पज्जत्ता ॥ १२ ॥

संघयणाणि त्ति–उत्तरतनुषु वैक्रियाहारकशरीरेषु संहननानि न भवन्तीति षण्णां संहननानामेकतमदपि संहननं न भवति । तेनैकस्यापि संहननस्योदीरका न भवन्ति । तथानुपूर्वीणां नरकानुपूर्व्यादीनां चतसृणां तन्नामकास्तत्तदानुपूर्व्यनुयायिनारकादिनामानो भवान्तरगा भवापान्तरालगतौ वर्तमाना उदीरका वेदितव्याः । तद्यथा–नारकानुपूर्व्या नारको भवापान्तरालगतौ वर्तमान उदीरकः, तिर्यगानुपूर्व्यास्तिर्यगित्यादि । तथा पराघातनाम्नः शरीरपर्याप्त्या पर्याप्ताः सर्वेऽप्युदीरकाः ॥ १२ ॥

वायरपुढवी आयावस्स य वज्जित्तु सुहुमसुहुमतसे । उज्जोयस्स य तिरिए उत्तरदेहो य देवजई ॥१३॥

वायरपुढवि त्ति–आतपनाम्नो वादरपृथ्वीकायिक उदीरकः । चशब्दस्यानुक्तार्थसमुच्चायकत्वात् वादरपृथ्वीकायिकोऽपि पर्याप्तो द्रष्टव्यः । तथा सूक्ष्मान् सूक्ष्मैकेन्द्रियान् सूक्ष्मत्रसांश्च तेजोवायुकायिकान् वर्जयित्वा शेषास्तिर्यञ्चः पृथिव्यंबुवनस्पतयो विकलेन्द्रियाः पञ्चेन्द्रियाश्च लब्धिपर्याप्ता उद्योतनाम्नो यथासंभवमुदीरकाः । तथोत्तरदेहे उत्तरशरीरे यथासंभवं वैक्रिये आहारके च वर्तमानो देवो यतिश्चोद्योतनाम्न उदीरको भवति ॥ १३ ॥

सगलो य इट्ठखगई(इट्ठ) उत्तरतणुदेवभोगभूमिगया । इट्ठसराएँ तसो वि य इयरासि तसा सनेरइया १४॥

मगलो त्ति–सकलाः पञ्चेन्द्रियतिर्यग्मनुष्या वा शरीरपर्याप्त्या पर्याप्ताः प्रशस्तविहायोगत्युदये वर्तमानाः । तथोत्तरस्यां तनौ वैक्रियशरीररूपाया वर्तमानाः सर्वे तिर्यञ्चो मनुष्याश्च । तथा सर्वे देवाः सर्वे च भोगभूमिजाः । उद्योतगतेः प्रशस्तविहायोगतेरुदीरकाः । तत्रेष्टस्वरनाम्नः सुस्वरनाम्नश्च कोकिलादयः । अप्रशस्ता मानुषाश्च पञ्चेन्द्रियतिर्यञ्चो भाषापर्याप्त्या पर्याप्ता यथासंख्यमुदीरकाः । तथेतरयोरप्रशस्तविहायोगतिदुःस्वरनाम्नोस्त्रसा विकलेन्द्रियाः सनैरयिका नैरयिकसहिताः । तथा पञ्चेन्द्रियतिर्यग्मनुष्याः केचन यथासंख्यमुदीरका वेदितव्याः ॥ १४ ॥

उस्सासस्स सराण य पज्जत्ता आणपाणभासासु । सव्वणूणुस्सासो भासा वि य जा न रुज्झंति ॥ १५ ॥

उस्सासस्स त्ति–उच्छ्वासस्वरशब्दयोरानप्राणभाषाशब्दाभ्यां सह यथासंख्येन योजना । सा चैवं–उच्छ्वासनाम्न आनप्राणापानपर्याप्त्या पर्याप्ताः सर्वेऽप्युदीरकाः । 'सराण य त्ति' द्विवचनेऽपि बहुवचनं प्राकृतत्वात् । ततः स्वरयोः सुस्वरदुःस्वरयोः प्रागुक्ता उदीरकाः सर्वेऽपि भाषापर्याप्त्या पर्याप्ता द्रष्टव्याः । यद्यपि स्वरयोः प्रागेवोदीरका उक्तास्तथापि ते भाषापर्याप्त्या पर्याप्ता एवोदीरका वेदितव्या इति विशेषोपदेश (दर्श) नार्थं पुनरुपादानं । तथा सर्वज्ञानां केवलिनामुच्छ्वासभाषे यावन्नाद्यापि निरोधमुपगच्छतस्तावदुदीर्यंते, तन्निरोधानन्तरं तूदयाभावान्नोदीरणा भाति ॥ १५ ॥

देवो सुभगाएज्जाण गब्भवक्कंतिउ य कित्तीए । पज्जत्तो वज्जित्ता ससुहुमनेरइयसुहुमनसे ॥ १६ ॥

देवो त्ति–'देवो' इत्यादौ जातावेकवचनं । केचिद्देवाः केचित्तिर्यग्मनुष्या गर्भव्युत्क्रान्ताः सुभगादेयनाम्नोरुदीरकाः

ये तदुदये वर्तन्ते। तथा सूक्ष्मैकेन्द्रियसहितान् नैरयिकान् सूक्ष्मत्रसांश्च वर्जयित्वा शेषाः पर्याप्तकनामोदये वर्तमाना यशःकीर्ते (कीर्त्ते) रुदीरकाः ॥ १६ ॥

गोउत्तमस्स देवा नरा य वइणो चउण्हमियरासिं। तव्वइरित्ता तित्थगरस्स उ सव्वणुयाएँ भवे ॥ १७ ॥

गोउत्तमस्स त्ति–सर्वे देवा मनुष्या अपि च केचिदुच्चैःकुलसमुत्पन्नास्तथा व्रतिनो नीचैर्गोत्रिणोऽपि पञ्चमहाव्रतसमलंकृतगात्रयष्टय उच्चैर्गोत्रस्योदीरकाः। तथा इतरासां चतसृणां प्रकृतीनां दुर्भगानादेयायशःकीर्तिनीचैर्गोत्राणां तद्व्यतिरिक्ता उक्तव्यतिरिक्ता वेदितव्याः। तत्र दुर्भगानादेययोरेकेन्द्रियविकलेन्द्रियसंमूर्छिमतिर्यग्मनुष्यनैरयिकाः, अयशःकीर्तेश्च सर्वे सूक्ष्माः सर्वे च नैरयिकाः सर्वे च सूक्ष्मत्रसाः सर्वेऽप्यपर्याप्तकनामोदये वर्तमानाः। नीचैर्गोत्रस्य पुनः सर्वे नैरयिकाः सर्वे तिर्यञ्चो मनुष्या अपि विशिष्टकुलोत्पन्नान् व्रतिनश्च मुक्त्वा शेषाः सर्वेऽप्युदीरका द्रष्टव्याः। तथा तीर्थकरनाम्नः सर्वज्ञतायां सत्यां भवेदुदीरणा, नान्यदा, उदयाभावात् ॥ १७ ॥

इंदियपज्जत्तीए दुसमयपज्जत्तगाए पाउग्गा। निद्दापयलाणं खीणरागखवगे परिच्चज्ज ॥ १८ ॥

इंदिय त्ति–इन्द्रियपर्याप्त्या पर्याप्ताः सन्तो द्वितीयसमयादारभ्येन्द्रियपर्याप्त्यनन्तरसमयादारभ्येत्यर्थः। निद्राप्रचलयोरुदीरणाप्रायोग्या भवन्ति। किं सर्वेऽपि ? नेत्याह–क्षीणरागान् क्षपकांश्च परित्यज्य। उदीरणा हि उदये सति भवति, नान्यथा। न च क्षीणरागक्षपकयोर्निद्राप्रचलोदयः संभवति "निद्दादुगस्स उदओ खीणगखवगे परिच्चज्ज" इतिवचनप्रामाण्यात्। ततस्तान् वर्जयित्वा शेषा निद्राप्रचलयोरुदीरका वेदितव्याः ॥ १८ ॥

निद्दानिद्दाईण त्ति असंखवासा य मणुयतिरिया य । वेउव्वाहारतणू वज्जित्ता अप्पमत्ते य ॥ १९ ॥

निद्दत्ति–असंख्येयवर्षायुषो मनुष्यतिरश्चो वैक्रियशरीरिण आहारकशरीरिणोऽप्रमत्तसंयतांश्च मुक्त्वा शेषाः सर्वेऽपि निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धीनामुदीरका वेदितव्याः ॥ १९ ॥

वेयणियाण पमत्ता ते ते बंधंतगा कसायाणं । हासाइछक्कस्स य अपुव्वकरणस्स चरमंते ॥ २० ॥

वेयणियाणत्ति–वेदनीययोः सातासातरूपयोः प्रमत्ताप्रमत्तगुणस्थानकपर्यन्ताः सर्वेऽप्युदीरकाः । तथा ये ये जीवा येषां येषां कषायाणां बन्धकास्ते ते तेषां तेषां कषायाणामुदीरका वेदितव्याः । यतो यानेव कषायान् वेदयते तानेव बध्नाति 'जे वेयइ से बंधइ' इतिवचनात् । उदये च सत्युदीरणा । ततो गुरुमुक्तं 'ते ते बंधंतगा कसायाणं' इति । तत्र मिथ्यादृष्टिमासादना अनन्तानुबन्धिनामुदीरकाः तेषां तद्वेदकत्वात् । अप्रत्याख्यानानामविरतसम्यग्दृष्टिपर्यन्ताः, प्रत्याख्यानावरणानां देशविरतिपर्यन्ताः, संज्वलनक्रोधमानमायालोभानां स्वस्वबन्धव्यवच्छेदादर्वाक् उदीरकाः, हास्यादिषट्कस्यापूर्वगुणस्थानकान्ता उदीरकाः ॥ २० ॥

जावूणखणो पढमो सुहरइहासाणमेवमियराणं । देवा नेरइया वि य भवठिइं केइ नेरइया ॥२१॥

ज त्ति–यावत्प्रथमः क्षणः किंचिदूनो भवति प्रथममन्तर्मुहूर्तं यावदित्यर्थः । तावन्नियमाद्देवाः सुखरतिहास्यानामुदीरका वेदितव्याः । परतस्त्वनियमः । एवं किंचिदूनं प्रथमं क्षणं यावत् नैरयिका, इतरासामसातवेदनीयारतिशोकप्रकृ-

तीनां नियमादुदीरकाः । परतस्तु तीर्थंकरकेवलज्ञानलाभादौ विपर्यासोऽपि भवन्ति । केचित्पुनर्नैरयिकाः सकलामपि भवस्थितिं यावदसातवेदनीयारतिशोकानामुदीरका भवन्ति ॥ २१ ॥

एवमेकैकप्रकृत्युदीरणास्वामित्वमुक्तं, संप्रति प्रकृत्युदीरणास्थानान्याह—

पंचण्हं च चउण्हं बिइए एक्काइ जा दसण्हं तु । तिगहीणाइ मोहे मिच्छे सत्ताइ जाव दस ॥ २२ ॥

पंचण्हं ति–द्वितीयकर्मणि दर्शनावरणीयलक्षणे पञ्चानां चतसृणां वा प्रकृतीनां युगपदुदीरणा भवति । तत्र चतसृणां चक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां ध्रुवा छद्मस्थानामुदीरणा । एतासां मध्ये निद्रापञ्चकमध्यादन्यतमप्रकृतिप्रक्षेपे पञ्चानामुदीरणा । तथा मोहे मोहनीये एकादिका त्रिकहीना तावद्द्रष्टव्या यावद्दशानां । एतदुक्तं भवति—मोहनीये कर्मणि उदीरणामधिकृत्यैकादीनि त्रिकहीनानि दशपर्यन्तानि नव प्रकृतिस्थानानि भवन्ति । तद्यथा—एका द्वे चतस्रः पञ्च षट् सप्त अष्ट नव दश । संप्रत्येषामुदीरणास्थानानां स्वामिनमाह—'मिच्छे सत्ताइ जाव दस' मिथ्यादृष्टौ सप्तादीनि दशपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति, तद्यथा–सप्त, अष्टौ, नव, दश । तत्र मिथ्यात्वमप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमे त्रयः क्रोधादिकाः । यत एकस्मिन् क्रोधे उदीर्यमाणे सर्वक्रोधा उदीर्यन्ते । एवं मानमायालोभा अपि द्रष्टव्याः । न च युगपत् क्रोधमानमायालोभानामुदीरणा, युगपदुदयाभावात् । किंतु त्रयाणां क्रोधानां, त्रयाणां वा मानानां, यद्वा तिसृणां मायानां, अथवा त्रयाणां लोभानां युगपदुदीरणेत्यन्यतमे त्रयो गृह्यन्ते । तथा त्रयाणां वेदानामन्यतमो वेदः, तथा हास्यरतियुगलारतिशोकयुगलयोरन्यतरद्युगलं । एतासां सप्तप्र-

कृतीनां मिथ्यादृष्टौ उदीरणा ध्रुवा । अत्र च भंगाश्चतुर्विंशतिस्तथा—हास्यरतियुगले अरतिशोकयुगले च प्रत्येकमेकैको भंगः प्राप्यत इति द्वौ भंगौ । तौ च प्रत्येकं त्रिष्वपि वेदेषु प्राप्यत इति द्वौ त्रिभिर्गुणितौ जाताः षट् । ते च प्रत्येकं क्रोधादिषु चतुर्षु प्राप्यन्ते इति षट् चतुर्भिर्गुणिता जाता चतुर्विंशतिरिति । एतस्मिन्नेव सप्तके भये वा जुगुप्सायां वाऽनन्तानुबन्धिनि वा क्षिप्तेऽष्टानामुदीरणा । तत्र भयादौ प्रत्येकमेकैका भंगकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयोऽत्र द्रष्टव्याः । ननु च मिथ्यादृष्टेरवश्यमनन्तानुबन्धिनामुदयः संभवति, उदये च सत्यवश्यमुदीरणा तत्कथं मिथ्यादृष्टिरनन्तानुबन्ध्युदयरहितः प्राप्यते, येन तस्य सप्तानामष्टानां वाऽनन्तानुबन्धिरहितानामुदीरणा संभवेत् ? उच्यते—इह सम्यग्दृष्टिना सता केनचित्प्रथमतोऽनन्तानुबन्धिनो विसंयोजिताः । एतावतैव च स विश्रान्तो न मिथ्यात्वादिक्षयायोद्युक्तः, तथाविधसामग्र्यभावात् । ततः कालान्तरे मिथ्यात्वं गतः सन् मिथ्यात्वप्रत्ययतो भूयोऽप्यनन्तानुबन्धिनो बध्नाति, ततो बन्धावलिका यावन्नाद्याप्यतिक्रामति तावत्तेषामुदयो न भवति, उदयाभावाच्चोदीरणाया अप्यभावः । बन्धावलिकायां पुनरतीतायामुदयसंभवाद्भावत्वेनोदीरणा । ननु कथं बन्धसमयादारभ्यावलिकायामतीतायामुदयोऽपि संभवति? यतोऽबाधाकालक्षये सत्युदयः, अबाधाकालश्चानन्तानुबन्धिनां जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतश्चत्वारि वर्षसहस्राणि इति ? नैष दोषः, यतो बन्धसमयादारभ्य तेषां तावत्सत्ता भवति, सत्तायां च सत्यां पतद्ग्रहता, तस्यां च सत्यां शेषप्रकृतिदलिकसंक्रान्तिः, संक्रान्तस्य च संक्रमावलिकायामतीतायामुदयः, उदये च सत्युदीरणा । ततो बन्धसमयादनन्तरमावलिकायामतीतायामुदीरणाऽभिधीयमाना न विरुध्यत इति । तथा तस्मिन्नेव सप्तके भय-

जुगुप्सयोरथवा भयानन्तानुबन्धिनोर्यद्वा जुगुप्सानन्तानुबन्धिनोः प्रक्षिप्तयोर्नवानामुदीरणा । अत्रापि चैकैकस्मिन् विकल्पे प्रागुक्तक्रमेण भंगकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयोऽत्र द्रष्टव्याः । तथा तस्मिन्नेव सप्तके भय-जुगुप्सानन्तानुबन्धिषु प्रक्षिप्तेषु दशानामुदीरणा । अत्रैकैव भंगकानां चतुर्विंशतिः ॥ २२ ॥

तदेवं मिथ्यादृष्टेर्मोहनीयस्योदीरणास्थानान्युक्तानि, सांप्रतं सासादनसम्यग्दृष्ट्यादीनामाह—

सासणमीसे नव अविरए छाई परम्मि पंचाई । अठ विरए य चउराइ सत्त छच्चोवरिल्लंमि ॥ २३ ॥

सासणमीसे त्ति—सासादनसम्यग्दृष्टौ सम्यग्मिथ्यादृष्टौ च सप्तादीनि नवपर्यन्तानि त्रीणि त्रीण्युदीरणास्थानानि भवन्ति । तद्यथा—सप्त अष्टौ नव । तत्र सासादनसम्यग्दृष्टौ अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमे (माः) चत्वारः क्रोधादिकाः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलमिति सप्तानामुदीरणा ध्रुवा । अत्र प्रागुक्तक्रमेण भंगकानामेका चतुर्विंशतिः । तथाऽस्मिन्नेव सप्तके भये वा जुगुप्सायां वा क्षिप्तायामष्टानामुदीरणा । अत्र च द्वे चतुर्विंशती भंगकानां । भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदीरणा । अत्र चैका भंगकानां चतुर्विंशतिः । सम्यग्मिथ्यादृष्टावनन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादयः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, सम्यग्मिथ्यात्वं चेति सप्तानामुदीरणा ध्रुवा । अत्र प्रागुक्तक्रमेण भंगकानामेका चतुर्विंशतिः । तथाऽस्मिन्नेव सप्तके भयजुगुप्सयोरन्यतरस्मिन् प्रक्षिप्तेऽष्टानामुदीरणा । अत्र च द्वे चतुर्विंशती भंगकानां । भयजुगु-

१ अन्यतमस्यापि केषाञ्चिन्मतेन सर्वादित्वात् यत उक्तवानापिशलिः "अन्यतमस्मिन्स्थाने" इति । शब्दानुशासनाचार्या अपि तन्मते डतमन्तसाप्यन्यशब्दस्य सर्वादित्वम्

प्सयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदीरणा । अत्र चैका चतुर्विंशतिर्भङ्गकानां । तत्राऽविरतेऽविरतसम्यग्दृष्टौ षडादीनि नवपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति । तद्यथा—षट्, सप्त, अष्टौ, नव । तत्रौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽविरतस्यानन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादिकाः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलमिति षण्णामुदीरणा ध्रुवा । अत्र प्रागिव भङ्गकानामेका चतुर्विंशतिः । अस्मिन्नेव षट्के भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते सप्तानामुदीरणा । अत्र भङ्गकानां तिस्रश्चतुर्विंशतयः । तत्र तस्मिन्नेव षट्के भयजुगुप्सयोरथवा भयवेदकसम्यक्त्वयोर्वा जुगुप्सावेदकसम्यक्त्वयोर्युगपत् प्रक्षिप्तयोरष्टानामुदीरणा । अत्राप्येकस्मिन् विकल्पे भङ्गकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयः । भयजुगुप्सावेदकसम्यक्त्वेषु युगपत्प्रक्षिप्तेषु नवानामुदीरणा । अत्र चैका चतुर्विंशतिर्भङ्गकानां । 'परम्मि पंचाइ अट्ठ' इति अविरतसम्यग्दृष्टेः परस्मिन् देशविरते पञ्चादीनि अष्टपर्यन्तानि चत्वारि उदीरणास्थानानि । तद्यथा—पञ्च षट् सप्त अष्टौ । तत्र प्रत्याख्यानावरणसंज्वलनसंज्ञौ क्रोधादीनामन्यतमौ द्वौ क्रोधादिकौ, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, एतासां पञ्चानां प्रकृतीनां देशविरतस्योदीरणा ध्रुवा । एषा चौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽवगन्तव्या । अत्र च प्रागुक्तक्रमेण भङ्गकानामेका चतुर्विंशतिः । भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिंस्तु प्रक्षिप्ते षण्णामुदीरणा । अत्र भयादिभिस्त्रयो विकल्पाः । एकैकस्मिंश्च विकल्पे भङ्गकानां चतुर्विंशतिरिति तिस्रश्चतुर्विंशतयः । तथा तस्मिन्नेव पञ्चके भयजुगुप्सयोरथवा जुगुप्सावेदकसम्यक्त्वयोर्वा भयवेदकसम्यक्त्वयोर्युगपत्प्रक्षिप्तयोः सप्तानामुदीरणा । अत्रापि तिस्रश्चतुर्विंशतयो भङ्गकानां ।

भयजुगुप्सावेदकसम्यक्त्वेषु तु युगपत्प्रक्षिप्तेषु अष्टानामुदीरणा । अत्र चैका चतुर्विंशतिर्भंगकानां । संप्रति प्रमत्ताप्रमत्तयोर्भेदाभावाद्युगपदुदीरणास्थानान्याह—'विरए य चउराइ सत्त' त्ति विरते प्रमत्तेऽप्रमत्ते च चतुरादीनि सप्तपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति । तद्यथा—चत्वारि पञ्च षट् सप्त । तत्र संज्वलनक्रोधादीनामन्यतम एकः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, इत्येतासां चतसृणां प्रकृतीनां विरतस्य क्षायिकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेर्वा उदीरणा ध्रुवा । अत्रैका भंगकानां चतुर्विंशतिः । एतस्मिन्नेव चतुष्के भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते पञ्चानामुदीरणा । अत्र भंगकानां तिस्रश्चतुर्विंशतयः । तथा तस्मिन्नेव चतुष्के भयजुगुप्सयोरथवा भयवेदकसम्यक्त्वयोर्यद्वा जुगुप्सावेदकसम्यक्त्वयोर्युगपत्प्रक्षिप्तयोः षण्णामुदीरणा । अत्रापि तिस्रश्चतुर्विंशतयो भंगकानां । भयजुगुप्सावेदकसम्यक्त्वेषु च युगपत्प्रक्षिप्तेषु सप्तानामुदीरणा । अत्र चैका चतुर्विंशतिर्भंगकानां । संप्रत्यपूर्वकरणस्योदीरणास्थानान्याह—'लच्चोवरिम्मि' विरतादुपरितनेऽपूर्वकरणे चतुरादीनि षट्पर्यन्तानि त्रीण्युदीरणास्थानानि भवन्ति । तद्यथा—चतस्रः पञ्च षट् । तत्र चतुर्णां संज्वलनक्रोधादीनामेकतमः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, इत्येतासां चतसृणां प्रकृतीनामपूर्वकरणे उदीरणा ध्रुवा । अत्रैका भंगकानां चतुर्विंशतिः । अस्मिन्नेव चतुष्के भये वा जुगुप्सायां वा क्षिप्तायां पञ्चानामुदीरणा । अत्र द्वे चतुर्विंशती भंगकानां । भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोः षण्णामुदीरणा । अत्र चैका चतुर्विंशतिर्भंगकानां । एताश्चापूर्वकरणसत्काश्चतुर्विंशतयः परमार्थतः प्रमत्ताप्रमत्तचतुर्विंशतिकातोऽभिन्नस्वरूपा इति न पृथगग्रे गणयिष्यन्ते ॥ २३ ॥

संप्रत्यनिवृत्तिबादरस्योदीरणास्थानान्याह—

अनियट्टिम्मि दुगेगं लोभो तणुरागेगो (ग ग्ग) चउवीसा। एक्कग छक्केक्कारस दस सत्त चउक्क एक्काओ ॥२४॥

अनियट्टिम्मि त्ति–अनिवृत्तिबादरे द्वे उदीरणास्थाने। तद्यथा–द्वे प्रकृती, एका च। तत्र चतुर्णां संज्वलनक्रोधादीना-मेकतमः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः। अत्र त्रिभिर्वेदैश्चतुर्भिः संज्वलनैर्द्वादश भंगाः। वेदेषु च क्षीणेषु उपशान्तेषु वा संज्वलनक्रोधादीनामेकतमं क्रोधादिकमुदीरयति। तत्र च चत्वारो भंगाः। 'लोभो तणुरागेगो' (ग ग्ग) तनुरागे तनुरागस्य सूक्ष्मसंपरायस्य सूक्ष्मलोभकिट्टीर्वेदयमानस्य लोभे एकैको मोहनीयस्य उदीरणायोग्यो भवति। संप्रति चतुरादिषु दशपर्यन्तेषु उदीरणास्थानेषु विरतान्तानां यावत्यश्चतुर्विंशतयो भवन्ति तावतीर्निरूपयति–'चउवीसे-त्यादि' दशोदीरणायामेका चतुर्विंशतिः, नवोदीरणायां षट्, अष्टोदीरणायामेकादश, सप्तोदीरणायां दश, षडुदीर-णायां सप्त, पञ्चकोदीरणायां चतस्रः, चतुरुदीरणायामेकेति। एताश्चतुर्विंशतयः प्रागेव भाविताः। केवलं संकलनमान-मिहैवं स्वधिया परिभावनीयम् ॥ २४ ॥

तदेवमुक्तानि मोहनीयस्योदीरणास्थानानि, संप्रति नामकर्मण उदीरणास्थानानि प्रतिपिपादयिषुराह–

एगबियालापन्नाइ सत्तपन्नांत गुणिसु नामस्स। नव सत्त तिण्णि अट्ठ य छ पंच य अप्पमत्ते दो ॥२५॥

एक्कं पंचसु एक्कम्मि अट्ठ ठाणक्कमेण भंगा वि। एक्कग तीसेक्कारस इगवीस सयाइ तिसए य ॥२६॥

इगवीसा उच्च सया उहअहिया नवसया य एगहिया। अउणुत्तराणि चउदस सयाणि गुणनउइ पंचसया॥

एगेत्यादि—नामकर्मण उदीरणास्थानानि दश, तद्यथा—एकचत्वारिंशत्, द्विचत्वारिंशत्, पञ्चाशत्, एकपञ्चाशत्, द्विपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, षट्पञ्चाशत्, सप्तपञ्चाशच्चेति। तत्र तैजससप्तकं वर्णादिविंशतिरगुरुलघु स्थिरास्थिरे शुभाशुभे निर्माणमित्येतासां त्रयस्त्रिंशत्प्रकृतीनामुदीरणा ध्रुवा। तत्र मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तिरूपेऽष्टके प्रक्षिप्ते सति एकचत्वारिंशद्भवति। एतासां चैकचत्वारिंशत्प्रकृतीनां केवलिसमुद्घातगतः कार्मणकाययोगे वर्तमानः केवली उदीरको भवति। एषैव चैकचत्वारिंशत्तीर्थकरनामसहिता द्विचत्वारिंशद्भवति। तस्याश्च तीर्थकरः केवलिसमुद्घातगतः कार्मणकाययोगे वर्तमान उदीरकः। तस्यामेवैकचत्वारिंशति औदारिकसप्तकं षण्णां संस्थानानामेकतमत् संस्थानं वज्रर्षभनाराचसंहननमुपघातं प्रत्येकमित्येकादशके प्रक्षिप्ते सति द्विपञ्चाशद्भवति। अत्र षड्भिः संस्थानैः षड्भङ्गाः, ते च वक्ष्यमाणसामान्यमनुष्यभङ्गग्रहणेन गृहीता द्रष्टव्याः, एवमुत्तरत्रापि। एतस्याश्च द्विपञ्चाशतः सयोगिकेवली समुद्घातगत औदारिकमिश्रकाययोगे वर्तमान उदीरकः। एषैव च द्विपञ्चाशत्तीर्थकरनामसहिता त्रिपञ्चाशत्। केवलमिह संस्थानं समचतुरस्रमेव वक्तव्यं। अस्या अप्युदीरकः सयोगिकेवली तीर्थकर औदारिकमिश्रकाययोगे वर्तमानो वेदितव्यः। तथा सैव द्विपञ्चाशत् पराघातनामोच्छ्वासनाम प्रशस्ताप्रशस्तविहायोगत्योरन्यतरा विहायोगतिः सुस्वरदुःस्वरयोरन्यतरस्वरनामेति चतुष्टयप्रक्षेपात् षट्पञ्चाशद्भवति। एनां च सयोगिकेवली औदारिककाययोगे वर्तमान उदीरयति। पराघातोच्छ्वासप्रशस्तविहायोगतिसुस्वरप्रक्षेपात्त्रिपञ्चाशतः सप्तपञ्चाशद्भवति। एतस्याश्च तीर्थकरः

सयोगिकेवली औदारिककाययोगे वर्तमान उदीरकः । सप्तपञ्चाशदेव वाग्योगनिरोधे षट्पञ्चाशद्भवति । उच्छ्वासेऽपि च निरुद्धे पञ्चपञ्चाशत् । अतीर्थंकरकेवलिनः प्रागुक्ताः षट्पञ्चाशद्वाग्योगे निरुद्धे पञ्चपञ्चाशद्भवति । उच्छ्वासेऽपि च निरुद्धे चतुःपञ्चाशत् । अत्र द्विपञ्चाशच्चतुःपञ्चाशद्वर्जेषु शेषेषु षट्सु प्रत्येकमेकको विशेषतः प्राप्यत इति सर्वसंख्यया केवलिनां षड् भङ्गाः । तत्रैकचत्वारिंशत्यतीर्थकृत एकः । शेषेषु तु पञ्चसु तीर्थकृतः । तदेवमुक्तानि केवलिनामुदीरणास्थानानि । संप्रत्येकेन्द्रियाणामभिधीयते—एकेन्द्रियाणामुदीरणास्थानानि पञ्च, तद्यथा—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ स्थावरनामैकेन्द्रियजातिर्बादरसूक्ष्मयोरेकतरत् पर्याप्तापर्याप्तयोरेकतरत् दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरदित्येता नव प्रकृतयः प्रागुक्ताभिर्ध्रुवोदीरणाभिस्त्रयस्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशद्भवति । अत्र च भङ्गाः पञ्च, तद्यथा—बादरसूक्ष्माभ्यां प्रत्येकं पर्याप्तापर्याप्ताभ्यामयशःकीर्त्या सह चत्वारः, बादरपर्याप्तयशःकीर्तिनिश्रेकः । सूक्ष्मापर्याप्ताभ्यां सह यशःकीर्तेरुदयो न भवति, तदभावाच्च नोदीरणेति कृत्वा तदाश्रिता विकल्पा न भवन्ति । एषा द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्य वेदितव्या । ततः शरीरस्थस्यौदारिकशरीरौदारिकसंघातौदारिकबन्धनचतुष्टयहुंडसंस्थानोपघातप्रत्येकसाधारणान्यतररूपं नवकं प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, ततः पञ्चाशद्भवति । अत्र च भङ्गा दश, तद्यथा—बादरपर्याप्तस्य प्रत्येकसाधारणाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च चत्वारो भङ्गाः, अपर्याप्तबादरस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वौ, सूक्ष्मस्य च पर्याप्तापर्याप्तप्रत्येकसाधारणैरयशःकीर्त्या सह चत्वार इति दश । बादरवायुकायिकस्य वैक्रियं कुर्वतः औदा-

रिकपङ्कस्थाने वैक्रियपङ्कमवगन्तव्यं । ततश्च तस्यापि पञ्चाशदेवोदीरणायोग्या भवति । केवलमिह बादरपर्याप्तप्रत्येकायशःकीर्तिभिरेक एव भंगः । तैजस्कायिकवायुकायिकयोर्हि साधारणयशःकीर्त्योरुदयो न भवति, तदभावाच्च नाप्युदीरणा, ततस्तदाश्रिता भंगा न प्राप्यन्ते । तदेवं सर्वसंख्यया पञ्चाशत्येकादश भंगाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते एकपञ्चाशद्भवति । अत्र च भंगाः षट्, तद्यथा–बादरस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, सूक्ष्मस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वौ । बादरवायुकायिकस्य च वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते प्रागुक्ता पञ्चाशत् एकपञ्चाशद्भवति । अत्र च प्राग्वदेक एव भंगः । सर्वसंख्यया चैकपञ्चाशति सप्त भंगाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते द्विपञ्चाशद्भवति । अत्रापि भंगाः प्राग्वत् षट् । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते आतपोद्योतयोरन्यतरस्मिन् उदिते द्विपञ्चाशद्भवति । अत्रापि भंगाः षट्, तद्यथा–बादरस्योद्योतेन सहितस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, आतपसहितस्य प्रत्येकयशःकीर्त्ययशःकीर्तिपदैर्द्वौ भंगौ । बादरवायुकायिकस्य च वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते प्रागुक्ता एकपञ्चाशत् द्विपञ्चाशद्भवति । तत्र च प्राग्वदेक एव भंगः । तैजस्कायिकवायुकायिकयोर्हि आतपोद्योतयशःकीर्तीनामुदयाभावादुदीरणा न भवति, ततस्तदाश्रिता भंगा अत्र न प्राप्यन्ते । सर्वसंख्यया द्विपञ्चाशति भंगास्त्रयोदश । तथा प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां द्विपञ्चाशति आतपोद्योतयोरन्यतरस्मिन् क्षिप्ते त्रिपञ्चाशद्भवति । अत्र भंगाः षट् ये प्रागातपोद्योतान्यतरसहिताया द्विपंचाशत्यभिहिताः । सर्वसंख्यया चैकेन्द्रियाणां भंगा द्विचत्वारिंशत् । द्वीन्द्रियाणामुदीर-

णस्थानानि षट्, तद्यथा—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ द्वीन्द्रियजातिस्त्रसनाम बादरनाम पर्याप्तापर्याप्तयोरेकतरत् दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्ताभिस्त्रयस्त्रिंशत्संख्याकाभिर्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति। एषा च द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्यावसेया। अत्र च भंगास्त्रयः, तद्यथा—अपर्याप्तकनामोदये वर्तमानस्यायशःकीर्त्या सहैको भंगः, पर्याप्तकनामोदये वर्तमानस्य यशःकीर्त्ययशःकीर्तिभ्यां द्वाविति। ततः शरीरस्थस्यौदारिकसप्तकं हुण्डसंस्थानं सेवार्तसंहननं उपघातनाम प्रत्येकनामेत्येकादशकं प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, ततो जाता द्विपञ्चाशत्। अत्र च भंगास्त्रयः, ते च प्रागिव द्रष्टव्याः। ततः शरीरपर्याप्त्या पर्याप्तस्य विहायोगतिपराघातयोः प्रक्षिप्तयोश्चतुःपञ्चाशद्भवति। अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भंगौ। ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति। अत्रापि प्रागिव द्वौ भंगौ। अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति। अत्रापि प्रागिव द्वौ भंगौ। सर्वेऽपि पञ्चपञ्चाशति चत्वारो भंगाः। ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां पञ्चपञ्चाशति सुस्वरदुःस्वरयोरेकतरस्मिन् प्रक्षिप्ते षट्पञ्चाशद्भवति। अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भंगाः। अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशद्भवति। अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भंगौ। सर्वे षट्पञ्चाशति षड् भंगाः। ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहिताया षट्पञ्चाशति उद्योतनाम्नि प्रक्षिप्ते सप्तपञ्चाशद्भवति। अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भंगाः। सर्वे द्वीन्द्रियाणां भंगा द्वाविंशतिः।

एवं त्रीन्द्रियाणां चतुरिन्द्रियाणां च प्रत्येकमुदीरणास्थानानि भावनीयानि। नवरं द्वीन्द्रियजातिस्थाने त्रीन्द्रियाणां त्रीन्द्रियजातिश्चतुरिन्द्रियाणां चतुरिन्द्रियजातिरभिधातव्या । प्रत्येकं च भंगा द्वाविंशतिर्द्वाविंशतिरवसेयाः। सर्वसंख्यया विकलेन्द्रियाणां भंगाः षट्षष्टिः । तिर्यक्पञ्चेन्द्रियाणां वैक्रियलब्धिरहितानामुदीरणास्थानानि षट् । तद्यथा—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ पञ्चेन्द्रियजातिस्त्रसनाम बादरनाम पर्याप्तापर्याप्तयोरेकतरत् सुभगादेययुगलदुर्भगानादेययुगलयोरेकतरत् युगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्ताभिस्त्रयस्त्रिंशत्संख्याकाभिर्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति । एषा च द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्य वेदितव्या । अत्र च भंगाः पञ्च । तत्र पर्याप्तकनामोदये वर्तमानस्य सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिभिश्चत्वारो भंगाः, अपर्याप्तकनामोदये वर्तमानस्य तु दुर्भगानादेयायशःकीर्तिभिरेक एव भंगः । इह सुभगादेये दुर्भगानादेये वा युगपदुदयमायातः । तत उदीरणापि युगपदेवेति पञ्चैव भंगाः । अपरे पुनराहुः—सुभगादेययोर्दुर्भगानादेययोर्वा नैकान्तेन युगपदुदयभावनियमः, अन्यथापि दर्शनात् । ततः पर्याप्तकनामोदये वर्तमानस्य सुभगदुर्भगादेयानादेययशःकीर्त्ययशःकीर्तिभिरष्टौ भंगाः, अपर्याप्तकनामोदये वर्तमानस्य तु दुर्भगानादेयायशःकीर्तिभिरेक इति सर्वसंख्यया द्विचत्वारिंशति नव । ततः शरीरस्थस्यौदारिकसप्तकं षण्णां संस्थानानामेकतमत् संस्थानं षण्णां संहननानामेकतमत्संहननं उपघातं प्रत्येकनामेत्येकादशकं प्रक्षिप्यते तिर्यगानुपूर्वी चापनीयते, ततो द्विपञ्चाशद्भवति । अत्र भंगानां पञ्चचत्वारिंशं शतं, तद्य-

या—पर्याप्तकस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगादेयदुर्भगानादेययुगलाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च भङ्गानां चतुश्चत्वारिंशं शतं, अपर्याप्तस्य च हुंडसंस्थानसेवार्तसंहननदुर्भगानादेयायशःकीर्तिभिरेक इति । ये पुनः सुभगादेययोर्दुर्भगानादेययोर्वा केवलयोरप्युदयमिच्छन्ति तन्मतेन द्विपञ्चाशति भङ्गाना द्वे शते एकोननवत्यधिके वेदितव्ये । तत्र पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च भङ्गा द्वे शते अष्टाशीत्यधिके, अपर्याप्तकस्य तु प्रागुक्तस्वरूप एक इति । तस्यामेव द्विपञ्चाशति शरीरपर्याप्त्या पर्याप्तस्य पराघाते प्रशस्ताप्रशस्तान्यतरविहायोगतौ च प्रक्षिप्तायां चतुःपञ्चाशद्भवति । अत्र पर्याप्तानां प्राक् चतुश्चत्वारिंशं शतं भङ्गकानामुक्तं, तदेव विहायोगतिद्विकगुणितमवगन्तव्यं । तथा च सत्यत्र भङ्गानां द्वे शते अष्टाशीत्यधिके भवतः । मतान्तरेण पुनः पञ्च शतानि षट्सप्तत्यधिकानि । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव भङ्गानां द्वे शते अष्टाशीत्यधिके, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि भङ्गानां द्वे शते अष्टाशीत्यधिके, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेन भङ्गकानां पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण तु द्विपञ्चाशदधिकानि एकादश शतानि । ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरदुःस्वरयोरन्यतरस्मिन् क्षिप्ते षट्पञ्चाशद्भवति । तत्र स्वमतचिन्तायां ये उच्छ्वासेन द्वे शते अष्टाशीत्यधिके भङ्गकानां प्राक् लब्धे ते इह स्वरद्विकेन गुण्यते, ततो लब्धानि पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण पुनरिह द्विपञ्चाशदधिकान्येकादश शतानि भङ्गकाना भवन्ति । अथवा

प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशद्भवति । अत्र च स्वमतचिन्तायां प्रागिव द्वे शते अष्टाशीत्यधिके भङ्गकानां, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । सर्वसंख्यया स्वमतेन षट्पञ्चाशति भङ्गा अष्टौ शतानि चतुःषष्ट्यधिकानि, मतान्तरेण सप्तदश शतान्यष्टाविंशत्यधिकानि । ततः स्वरसहिताया षट्पञ्चाशति उद्योतनाम्नि प्रक्षिप्ते सप्तपञ्चाशद्भवति । अत्र ये प्राक् स्वरसहितायां षट्पञ्चाशति भङ्गा अभिहिताः स्वमतेन पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण द्विपञ्चाशदधिकान्येकादश शतानि, त एवात्रापि द्रष्टव्याः । तथा तेषामेव तिर्यक्पञ्चेन्द्रियाणां वैक्रियं कुर्वतामुदीरणास्थानानि पञ्च भवन्ति । तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र वैक्रियसप्तकं समचतुरस्रसंस्थानं उपघातं प्रत्येकमिति प्रकृतिदशकं प्रागुक्तायां तिर्यक्पञ्चेन्द्रियप्रायोग्यायां द्विचत्वारिंशति प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिपर्याप्तपदैश्चत्वारो भङ्गाः, मतान्तरेण पुनः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च पर्याप्तकेन सहाष्टौ भङ्गाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां त्रिपञ्चाशद्भवति । अत्रापि प्रागिव चत्वारो भङ्गाः, मतान्तरेण पुनरष्टौ । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासनाम्नि प्रक्षिप्ते चतुःपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन भङ्गाश्चत्वारो मतान्तरेण पुनरष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया चतुःपञ्चाशति स्वमतेनाष्टौ भङ्गाः, मतान्तरेण षोडश । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति स्वरे प्रक्षिप्ते

पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेण पुनरष्टौ । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनु-
दिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया स्वमतेन पञ्च-
पञ्चाशति भङ्गा अष्टौ, मतान्तरेण षोडश । ततः स्वरसहितायां पञ्चपञ्चाशति उदीर्णे क्षिप्ते षट्पञ्चाशद्भवति । अत्रापि
भङ्गाः स्वमतेन चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया वैक्रियं कुर्वतां तिर्यक्पञ्चेन्द्रियाणां भङ्गा अष्टाविंशतिः, मतान्त-
रेण षट्पञ्चाशत् । सामान्येन सर्वतिर्यक्पञ्चेन्द्रियाणां स्वमतेन भङ्गाश्चतुर्विंशतिशतानि द्व्यशीत्यधिकानि मतान्तरेण
एकोनपञ्चाशच्छतानि द्विषष्ट्यधिकानि । संप्रति मनुष्याणामुदीरणास्थानानि प्रतिपाद्यन्ते—तत्र केवलिनां प्रागेवोक्तानि ।
अन्येषां तु पञ्च, तद्यथा—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि सर्वाण्यपि
यथा प्राक् तिर्यक्पञ्चेन्द्रियाणामुक्तानि तथैवात्रापि वक्तव्यानि, नवरं तिर्यग्गतितिर्यगानुपूर्व्योः स्थाने मनुष्यगतिमनुष्या-
नुपूर्व्यौ वक्तव्ये । पञ्चपञ्चाशत् षट्पञ्चाशच्चोद्योतरहिता वक्तव्या । वैक्रियाहारकसंयतान्मुक्त्वा शेषमनुष्याणामुद्योतो-
दयाभावात् । भङ्गा अपि सर्वत्राप्युद्योतरहितास्तथैव स्वमतपरमतापेक्षया वक्तव्यास्तद्यथा—स्वमतेन द्विचत्वारिंशति पञ्च,
द्विपञ्चाशति पञ्चचत्वारिंशं शतं, चतुःपञ्चाशति द्वे शते अष्टाशीत्यधिके, पञ्चपञ्चाशत्यपि द्वे शते अष्टाशीत्यधिके, षट्-
पञ्चाशति पञ्च शतानि षट्सप्तत्यधिकानि । परमतेन तु यथाक्रमं ९ । २८९ । ५७६ । ५७६ । ११५२ । वैक्रियमपि कुर्वतां
मनुष्याणामुदीरणास्थानानि पञ्च भवन्ति, तद्यथा—एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्चपञ्चाशत्, षट्पञ्चा-
शच्चेति । तत्रैकपञ्चाशत्त्रिपञ्चाशच्च यथा प्राग्वैक्रियतिर्यक्पञ्चेन्द्रियाणामुक्ता तथात्रापि द्रष्टव्या । चतुःपञ्चाशत्युद्योत-

सहितायां प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । उत्तरवैक्रियं कुर्वतां संयतानामुद्योतनामोदयमागच्छति, नान्येषां, ततस्तेन सह चतुःपञ्चाशति प्रशस्त एवैको भङ्गो भवति, संयतानां दुर्भगानादेयायशःकीर्त्युदयाभावात् । सर्वसंख्यया चतुःपञ्चाशति स्वमतेन पञ्च भङ्गाः मतान्तरेण नव । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । अथवा संयतानां स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव एक एव भङ्गः । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेन पञ्च भङ्गा मतान्तरेण नव । पञ्चपञ्चाशति सुस्वरसहितायामुद्योते क्षिप्ते षट्पञ्चाशद्भवति । तस्यां चैक एव प्रशस्तो भंगः । सर्वसंख्यया वैक्रियमनुष्याणां स्वमतेनैकोनविंशतिर्भङ्गाः मतान्तरेण पञ्चत्रिंशत् । संप्रत्याहारकं कुर्वतामुदीरणास्थानान्युच्यन्ते—आहारकसंयतानामुदीरणास्थानानि पञ्च, तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्राहारकसप्तकं समचतुरस्रसंस्थानमुपघातं प्रत्येकमिति प्रकृतिदशकं प्रागुक्तायां मनुष्यगतिप्रायोग्यायां द्विचत्वारिंशति प्रक्षिप्यते, मनुष्यानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । केवलमिह सर्वाण्यपि पदानि प्रशस्तान्येवेति कृत्वा एक एव भंगः । शरीरपर्याप्त्या पर्याप्तस्य प्रशस्तविहायोगतिपराघातयोः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्राप्येक एव भङ्गः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्राप्येक एव भंगः । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशद्भवति । अत्रापि प्रागिवैक एव भंगः । सर्वसंख्यया चतुःपञ्चाशति द्वौ भङ्गौ । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्राग्वदेक एव भङ्गः ।

अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्राप्येक एव भंगः । सर्वसंख्यया पञ्चपञ्चाशति द्वौ भंगौ । ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहिताया पञ्चपञ्चाशत्युद्योते क्षिप्ते षट्पञ्चाशद्भवति । अत्राप्येक एव भंगः । आहारकशरीरिणः सर्वसंख्यया सप्त भंगाः । तदेवं मनुष्याणां सामान्यवैक्रियशरीर्याहारकशरीरिकेवलिनां भंगाः सर्वसंख्यया त्रयोदश शतानि चतुस्त्रिंशदधिकानि भवन्ति । परमतेन तु षड्विंशतिशतानि पञ्चाशदधिकानि । देवानामुदीरणास्थानानि षट्, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र देवगतिदेवानुपूर्व्यौ पञ्चेन्द्रियजातिस्त्रसनाम बादरनाम पर्याप्तनाम सुभगादेययुगलदुर्भगानादेययुगलयोरेकतरद्युगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयो ध्रुवोदीरणाभिस्त्रयस्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशद्भवति । अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिभिश्चत्वारो भङ्गाः, मतान्तरेण पुनः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां चाष्टौ भङ्गाः । ततः शरीरस्थस्य वैक्रियसप्तकं समचतुरस्रसंस्थानं उपघातं प्रत्येकमित्येता दश प्रकृतयः प्रक्षिप्यन्ते, देवानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघातप्रशस्तविहायोगत्योः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । देवानामप्रशस्तविहायोगतेरुदयाभावात्तदाश्रिता भङ्गा न प्राप्यन्ते । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्रापि स्वमतेन चत्वारो भङ्गाः, मतान्तरेणाष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशद्भवति ।

अत्रापि प्रागिव स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया चतुःपञ्चाशति स्वमतेनाष्टौ भङ्गा मतान्तरेण षोडश । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन प्रागिव चत्वारो भंगा मतान्तरेणाष्टौ । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेनाष्टौ भङ्गा मतान्तरेण तु षोडश । ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरसहितायां पञ्चपञ्चाशति उद्योते क्षिप्ते षट्पञ्चाशद्भवति । अत्रापि स्वमतेन त एव चत्वारो भङ्गा मतान्तरेणाष्टौ । सर्वसंख्यया देवानां स्वमतेन द्वात्रिंशद्भंगा मतान्तरेण चतुःषष्टिः । नैरयिकाणामुदीरणास्थानानि पञ्च, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशच्चेति । तत्र नरकगतिनरकानुपूर्व्यौ पञ्चेन्द्रियजातिस्त्रसबादरपर्याप्तदुर्भगानादेयायशःकीर्तय इत्येता नव प्रकृतयो ध्रुवोदीरणाभिस्त्रयस्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशद्भवति । अत्र च सर्वाण्यपि पदानि अप्रशस्तान्येवेति कृत्वा एक एव भङ्गः । ततः शरीरस्थस्य वैक्रियसप्तकं हुंडसंस्थानं उपघातं प्रत्येकमिति दश प्रकृतयः प्रक्षिप्यन्ते, नरकानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाताप्रशस्तविहायोगत्योः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततो भाषापर्याप्त्या पर्याप्तस्य दुःस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्राप्येक एव भंगः । सर्वसंख्यया नैरयिकाणां पञ्च भङ्गाः । तदेवमुक्तानि नामकर्मण उदीरणास्थानानि । सम्प्रत्येतान्येव गुणस्थानकेषु दर्शयति—'गुणिसु त्ति' नाम्नो नाम-

कर्मणो गुणेषु गुणस्थानेषु मिथ्यादृष्टिप्रभृतिषु सयोगिकेवलिपर्यन्तेषु यथासंख्यं नवादिसंख्यान्युदीरणास्थानानि भवन्ति। तत्र मिथ्यादृष्टेर्नवोदीरणास्थानानि, तद्यथा—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। अमूनि च सर्वाण्यपि मिथ्यादृष्टीनेकेन्द्रियादीनधिकृत्य स्वयं परिभावनीयानि। सासादनसम्यग्दृष्टेरुदीरणास्थानानि सप्त, तद्यथा—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। तत्र द्विचत्वारिंशत् बादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानां सासादनसम्यग्दृष्टीनामपान्तरालगतौ वर्तमानानामवसेया। तथा एकेन्द्रियाणां शरीरस्थानां पञ्चाशत्। देवानां शरीरस्थानामेकपञ्चाशत्। विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां शरीरस्थानां द्विपञ्चाशत्। देवनैरयिकाणां पर्याप्तानां सासादनसम्यक्त्वे वर्तमानानां पञ्चपञ्चाशत्। तिर्यक्पञ्चेन्द्रियमनुष्यदेवानां पर्याप्तानां षट्पञ्चाशत्। तिर्यक्पञ्चेन्द्रियाणामुद्योतवेदकानां पर्याप्तानां सप्तपञ्चाशत्। सम्यग्मिथ्यादृष्टेस्त्रीण्युदीरणास्थानानि, तद्यथा—पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। तत्र देवनैरयिकाणां पञ्चपञ्चाशत्। तिर्यग्मनुष्यदेवानां षट्पञ्चाशत्। तिर्यक्पञ्चेन्द्रियाणामुद्योतकानां सप्तपञ्चाशत्। अविरतसम्यग्दृष्टेरष्टावुदीरणास्थानानि, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। तत्र नैरयिकदेवतिर्यक्पञ्चेन्द्रियमनुष्याणां द्विचत्वारिंशत्। देवनैरयिकाणामेकपञ्चाशत्। तिर्यक्पञ्चेन्द्रियमनुष्याणां द्विपञ्चाशत्। देवनैरयिकतिर्यग्मनुष्याणां त्रिपञ्चाशत्। देवनैरयिकतिर्यक्पञ्चेन्द्रियवैक्रियतिर्यग्मनुष्याणां चतुःपञ्चाशत्। एतेषामेव पञ्चपञ्चाशदपि। देवतिर्यक्पञ्चेन्द्रियमनुष्याणां षट्पञ्चाशत्।

तिर्यक्पञ्चेन्द्रियाणामुद्योतवेदकानां सप्तपञ्चाशत्। देशविरतस्योदीरणास्थानानि षट्, तद्यथा—एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्चपञ्चाशत्, षट्पञ्चाशत्, सप्तपञ्चाशच्चेति। तत्रैकपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत्पञ्चपञ्चाशच्च तिर्यङ्मनुष्याणां वैक्रियशरीरवर्तमानानामवसेया। तिर्यङ्मनुष्याणामेव स्वभावस्थानां वैक्रियशरीरिणां च षट्पञ्चाशत्। तेषामेव तिर्यक्पञ्चेन्द्रियाणामुद्योतसहितानां सप्तपञ्चाशत्। प्रमत्तसंयतानामुदीरणास्थानानि पञ्च, तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्र पञ्चाप्येतानि वैक्रियशरीरिणामाहारकशरीरिणां वा द्रष्टव्यानि। षट्पञ्चाशत्पुनरौदारिकस्थानामप्यवगन्तव्या। अप्रमत्तसंयतानां द्वे उदीरणास्थाने, तद्यथा—पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्र षट्पञ्चाशदौदारिकशरीरस्थानां। इह केषांचित् वैक्रियशरीरस्थानामाहारकशरीरस्थानां वा संयतानां सर्वपर्याप्त्या पर्याप्तानां कियत्कालमप्रमत्तभावोऽपि लभ्यत इति तेषां द्वे अप्युक्तरूपे उदीरणास्थाने। 'एक्कं पञ्चसु त्ति' पञ्चसु गुणस्थानकेषु अपूर्वकरणनिवृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहरूपेषु एकमुदीरणास्थानं भवति—षट्पञ्चाशत्, सा चौदारिकशरीरस्थानामिति। 'एक्कम्मि अट्ठ त्ति' एकस्मिन् सयोगिकेवलिगुणस्थानकेऽष्टावुदीरणास्थानानि, तद्यथा—एकचत्वारिंशत् द्विचत्वारिंशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। एतानि च प्रागेव सप्रपञ्चं भावितानीति नेह भूयो भाव्यन्ते। तदेवं चिन्तितानि गुणस्थानकेषूदीरणास्थानानि। संप्रति कस्मिन्नुदीरणास्थाने कति भङ्गाः प्राप्यन्त इति चिन्तायां तन्निरूपणार्थमाह—'गाणेत्यादि' स्थानक्रमेणैकचत्वारिंशदादिषुदीरणास्थाने क्रमेण भङ्गा अपि च वक्ष्यमाणसंख्यया ज्ञातव्याः, तद्यथा—एकचत्वारिंशत्येको भङ्गः, स चातीर्थकरकेव-

ङ्गिनः। द्विचत्वारिंशति त्रिंशद्भङ्गाः, तत्र नैरयिकानधिकृत्यैकः, एकेन्द्रियानधिकृत्य पञ्च द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं त्रिकं प्राप्यत इति नव, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च, मनुष्यानप्यधिकृत्य पञ्च, तीर्थंकरमधिकृत्यैकः, देवानधिकृत्य चत्वारः। ये पुनः सुभगादेययोर्दुर्भगानादेययोश्च केवट (ला) केवलयोरप्युदयमिच्छन्ति, तन्मतेन द्विचत्वारिंशति द्विचत्वारिंशद्भङ्गाः, यतस्तन्मतेन तिर्यक्पञ्चेन्द्रियानधिकृत्य नव, मनुष्यानधिकृत्य नव, देवानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते, शेषं तथैव। पञ्चाशत्येकादश भङ्गाः, ते चैकेन्द्रियानेवाधिकृत्य प्राप्यन्ते, अन्यत्र पञ्चाशतोऽप्राप्यमाणत्वात्। एकपञ्चाशत्येकविंशतिर्भङ्गाः, तत्र नैरयिकानधिकृत्यैकः। पञ्चेन्द्रियानधिकृत्य सप्त, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य चत्वारः, वैक्रियमनुष्यानप्यधिकृत्य चत्वारः, आहारकशरीरिणः संयतानधिकृत्यैकः, देवानाश्रित्य चत्वारः इत्येकविंशतिः। मतान्तरेण पुनर्वैक्रियतिर्यग्मनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इत्येकपञ्चाशति तदपेक्षया त्रयस्त्रिंशद्भङ्गाः। 'सत्तार तिसए य त्ति' सप्तादश सप्तादशाधिका त्रिशती भङ्गानां द्विपञ्चाशत्यवगन्तव्याः, तत्रैकेन्द्रियानाश्रित्य त्रयोदश, द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं प्राप्यत इति नव, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्चचत्वारिंशं शतं, मनुष्यानप्यधिकृत्य पञ्चचत्वारिंशं शतमिति। अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियान्मनुष्यांश्चाधिकृत्य प्रत्येकं द्वे द्वे शते भङ्गानामेकोननवत्यधिके प्राप्येते इति तदपेक्षया द्विपञ्चाशति भङ्गानां षट् शतानि प्राप्यन्ते। त्रिपञ्चाशति भङ्गानामेकविंशतिः, तद्यथा—नैरयिकानधिकृत्यैकः, एकेन्द्रियानधिकृत्य षट्, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य चत्वारः, वैक्रियमनुष्यानप्यधिकृत्य चत्वारः, आहारकशरीरिणोऽधिकृत्य पुनरेकः तीर्थंकर-

मप्याश्रित्यैकः, देवानप्यधिकृत्य चत्वारः । अत्रापि मतान्तरेण वैक्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानधिकृत्य प्रत्येकमष्टा-वष्टौ भङ्गाः प्राप्यन्ते इति तदपेक्षया त्रिपञ्चाशति त्रयस्त्रिंशद्भङ्गाः । चतुःपञ्चाशति भङ्गानां षट् शतानि षडुत्तराणि, तद्यथा—नैरयिकानधिकृत्यैकः द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं द्वौ द्वौ प्राप्येते इति षट्, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ, स्वभावस्थान्मनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियमनुष्यानधिकृत्य चत्वारः, संयतान् वैक्रियशरीरिणोऽधिकृत्योद्योतेन सहैकः, आहारकशरीरिणः संयतानधिकृत्य द्वौ, देवानधिकृत्याष्टाविति । अत्रापि मतान्तरेण प्राकृततिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश, मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य षोडश भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया चतुःपञ्चाशति त्र्यधिकानि द्वादश शतानि । पञ्चपञ्चाशति भङ्गानां नव शतानि एकाधिकानि, तद्यथा—नैरयिकानधिकृत्यैकः, द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारः प्राप्यन्ते इति द्वादश, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिणोऽधिकृत्याष्टौ, मनुष्यान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियशरीरिणोऽधिकृत्य चत्वारः, वैक्रियसंयतानधिकृत्योद्योतेन सहैकः आहारकशरीरिणोऽधिकृत्य द्वौ, तीर्थकरमधिकृत्यैकः, देवानधिकृत्याष्टाविति । मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकान्येकादशशतानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश, मनुष्यान् स्वभावस्थानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य

पोम्य भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया पञ्चपञ्चाशति षडशीत्यधिकानि सप्तदश शतानि । षट्पञ्चाशति भङ्गा-नामेकोनसप्तत्यधिकानि चतुर्दश शतानि. तद्यथा–द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं षड् षड् प्राप्यन्ते उद्य-प्रदता, निर्वृत्तपञ्चेन्द्रियान् स्वस्थानस्थानधिकृत्याष्टौ शतानि चतुःषष्ट्यधिकानि, वैक्रियशरीरिणोऽधिकृत्य चत्वारः, मनु-ष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिणः संयतानधिकृत्योद्योतेन सहैकः, आहारकशरीरिणः संय-तानधिकृत्यैकः तीर्थंकरमाश्रित्यैकः देवानाश्रित्य चत्वारः । अत्र मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य सप्तदशशता-न्यष्टाशीत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ, मनुष्यानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि, देवानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया षट्पञ्चाशति एकोनत्रिंशच्छतानि सप्तदशाधिकानि भङ्गानां भवन्ति । सप्तपञ्चाशति भङ्गानां पञ्चशती एकोननवत्यधिका, तद्यथा–द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारश्चत्वारः प्राप्यन्त इति द्वादश, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, तीर्थंकरमाश्रित्यैक इति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि भङ्गानां प्राप्यन्ते, शेषं तथैवेति तदपेक्षया सप्तपञ्चाशति पञ्चषष्ट्यधिकानि एकादश शतानि भङ्गानां भवन्ति ॥ २५–२६–२७ ॥

संप्रति गतीराश्रित्य स्थानसंख्यां करोति—

पंच नव नवग छक्काणि गइसु ठाणाणि सेसकम्माणं । एगेगमेव नेयं साहिन्तेगेगपगईउ ॥ २८ ॥

पंच त्ति–तिर्यग्गतौ नामस्थानानि पञ्च, तद्यथा–द्विचत्वारिंशत्, एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्च-

पञ्चाशच्चेति । तिर्यग्गतावेकचत्वारिंशद्वर्जानि शेषाणि नवोदीरणास्थानानि । मनुष्यगतावपि सयोगिकेवल्यादीनधिकृत्य पञ्चाशद्वर्जानि शेषाणि नवोदीरणास्थानानि । देवगतौ षडुदीरणास्थानानि, तद्यथा-द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि च सर्वाण्यपि प्राक् सप्रपञ्चं भावितानीति नेह भूयो भाव्यन्ते। तदेवमुक्तानि नामकर्मणः सप्रपञ्चमुदीरणास्थानानि । सांप्रतं शेषकर्मणामुदीरणास्थानप्रतिपादनार्थमाह-'सेसेत्यादि' शेषकर्मणां ज्ञानावरणवेदनीयायुर्गोत्रान्तरायलक्षणानामुदीरणास्थानमेकैकमवगन्तव्यं, तद्यथा—ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकमेकैकमुदीरणास्थानं । वेदनीयायुर्गोत्राणां तु वेद्यमानैकप्रकृत्यात्मकं । न ह्यमीषां द्वित्र्यादिकाः प्रकृतयो युगपदुदीर्यन्ते, युगपदुदयाभावात् । एतच्च ज्ञानावरणादीनामेकैकमुदीरणास्थानं प्रागुक्तैकैकप्रकृत्युदीरणायाः स्वामित्वं साधयित्वा निश्चित्य गुणस्थानकेषु नारकादिगतिषु स्वयमेव ज्ञेयं ज्ञातव्यं ॥ २८ ॥

तदेवमुक्ता प्रकृत्युदीरणा, साम्प्रतं स्थित्युदीरणाभिधानावसरस्तत्र चेमेऽर्थाधिकारास्तद्यथा—लक्षणं, भेदः, साद्यनादिप्ररूपणा, अद्धाच्छेदः स्वामित्वं चेति । तत्र लक्षणभेदयोः प्रतिपादनार्थमाह—

संपत्तिए य उदए पओगओ दिस्सए उईरणा सा । सेचीका ठिइहिं ता जाहिं तो तत्तिगा एसा ॥२९॥

संपत्तिए त्ति-इह द्विविध उदयः संप्राप्त्युदयोऽसंप्राप्त्युदयश्च । तत्र यत्कर्मदलिकं कालप्राप्तं सत् अनुभूयते स संप्राप्त्युदयः । तथाहि—कालक्रमेण कर्मदलिकस्योदयहेतुद्रव्यक्षेत्रादिसामग्रीसंप्राप्तौ सत्यामुदयः संप्राप्त्युदयः । यत्पुनरकालप्राप्तं कर्मदलिकमुदीरणाप्रयोगेण वीर्यविशेषसंज्ञितेन समाकृष्य कालप्राप्तेन दलिकेन सहानुभूयते सोऽसंप्राप्त्युदयः । एवंच

[illegible]दीरणा । तथा चाह—या स्थितिरकालप्राप्तापि सती प्रयोगत उदीरणाप्रयोगेण संप्राप्तुदये पूर्वोक्तस्वरूपे प्रक्षिप्ता सती [illegible] सा स्थित्युदीरणा । एष लक्षणनिर्देशः । अधुना भेद उच्यते—'मेत्तीकत्यादि' इह यासां स्थितीनां [illegible] ताः पूर्वपुरुषारिजापया मेत्तीका उच्यन्ते । ताश्च द्विधा—उदीरणायाः प्रायोग्या अप्रायो-ग्याश्च । [illegible] प्रायोग्याः [illegible] अप्रायोग्या इति चेदुच्यते—बन्धावलिकागता संक्रमावलिकागता उदयावलिकागताश्चाप्रा-योग्याः "संकमबंधुदयुव्वट्टणालिगाईणं करणाइं" इति वचनप्रामाण्यात् । शेषाश्च सर्वा अपि प्रायः प्रायोग्याः । ततोऽयं [illegible] यासां प्रकृतीनामुत्कृष्टो बन्धः संभवति, तासामुत्कर्षत आवलिकाद्विकहीना सर्वाप्युत्कृष्टा स्थितिरुदीरणाप्रायोग्या । [illegible] उदयोत्कृष्टबन्धकानां प्रकृतीनां बन्धावलिकायामतीतायामुदयावलिकाबहिर्वर्तिनीः स्थितीः सर्वा अप्युदीरयति । [illegible] तु सर्वासामप्युदीरणाप्रायोग्याः । आवलिकाद्विकहीनायाश्चोत्कृष्टस्थितेर्यावन्तः समयास्तावन्त उदीरणायाः भेदाः । तथाहि—उदयावलिकाया उपरिवर्तिनी समयमात्रा स्थितिः कस्याप्युदीरणाप्रायोग्या, अन्य ताव-[illegible] तिष्ठति । एवं कस्यापि द्विसमयमात्रा, कस्यापि त्रिसमयमात्रा, एवं तावद्वाच्यं यावदावलिकाद्विकहीना [illegible] सर्वोत्कृष्टा स्थितिरिति । अक्षरयोजना त्वियं—मेत्तीकाः स्थितिस्य उदीरणाप्रायोग्यास्तो यकान्यो यावन्तः [illegible] उत्कृष्टस्थितिसमयप्रमाणास्तावन्त उक्ताः । उदीरणाप्रयोगेण समाकृष्य स्थितिं समयेऽनुदये दीयते, [illegible] नाम स्थित्युदीरणा ॥ ३५ ॥

तदेवं कृता भेदप्ररूपणा । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा–मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयसाद्यनादिप्ररूपणार्थमाह—

मूलठिई अजहन्ना मोहस्स चउविहा तिहा सेसा। वेयणियाऊण दुहा सेसविगप्पा उ सव्वासिं ॥३०॥

मूलठिइ त्ति–मूलस्थितिशब्दाभ्यां प्राकृतत्वात् प्रत्येकं षष्ठीविभक्तिलोपः । ततोऽयमर्थः–मूलप्रकृतीनां मध्ये मोहस्य मोहनीयस्य स्थितेरुदीरणाऽजघन्या चतुर्विधा चतुःप्रकारा । तद्यथा–सादिरनादिर्ध्रुवाऽध्रुवा च । तथा मोहनीयस्य जघन्या स्थित्युदीरणा सूक्ष्मसंपरायस्य क्षपकस्य स्वगुणस्थानकसमयाधिकावलिकाशेषे वर्तमानस्य भवति । ततोऽन्यत्र सर्वत्राप्यजघन्या, सा चोपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, ध्रुवाऽभव्यानां, अध्रुवा भव्यानां । शेषा ज्ञानावरणदर्शनावरणनामगोत्रान्तरायाणां स्थित्युदीरणाऽजघन्या त्रिधा त्रिप्रकारा, तद्यथा–अनादिर्ध्रुवाऽध्रुवा च । तथाहि–ज्ञानावरणदर्शनावरणान्तरायाणां जघन्या स्थित्युदीरणा क्षीणकषायस्य स्वगुणस्थानसमयाधिकावलिकाशेषे वर्तमानस्य भवति, शेषकालं त्वजघन्या । सा चानादिः, सदैव भावात्। ध्रुवाध्रुवे पूर्ववत् । नामगोत्रयोस्तु जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या । सा चानादिः । ध्रुवाध्रुवे पूर्ववत् । वेदनीयायुषोरजघन्या स्थित्युदीरणा द्विधा, तद्यथा–सादिरध्रुवा च । तथाहि–वेदनीयस्य जघन्या स्थित्युदीरणा एकेन्द्रियस्य सर्वस्तोकस्थितिसत्कर्मणो लभ्यते । ततः तस्यैव समयान्तरे प्रवर्धमानसत्कर्मणोऽजघन्या । ततः पुनरपि जघन्येति जघन्याऽजघन्या च सादिरध्रुवा च । आयुषः पर्य-

स्तावलिकायां न भवति, पल्योत्पत्तिप्रथमसमये च भवति, ततः सादिरध्रुवा च । तथा सर्वासां प्रकृतीनां शेषविकल्पा अनुत्कृष्टोत्कृष्टजघन्यलक्षणा द्विधा द्विप्रकाराः, तद्यथा–सादयोऽध्रुवाश्च । तथाहि–सर्वेषामपि कर्मणामायुर्वर्जानामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य कियत्कालं प्राप्यते, ततः समयान्तरे तस्याप्यनुत्कृष्टा, ततः पुनरपि समयान्तरे उत्कृष्टा, संक्लेशविशुद्ध्योः प्रायः प्रतिसमयमन्यथाऽन्यथाभावात्, ततो द्वे अपि साद्यध्रुवे । जघन्या च द्विधा प्रागेव भाविता । आयुषां तु विकल्पत्रयेऽपि युक्तिः प्रागुक्तैव प्रायोऽवसेया ॥ ३० ॥

तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतिविषयां तां चिकीर्षुराह—

मिच्छत्तस्स चउद्धा अजहन्ना धुवउदीरणाण तिहा । सेस विगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥३१॥

मिच्छत्तस्स त्ति–मिथ्यात्वस्याजघन्या स्थित्युदीरणा चतुर्विधा, तद्यथा–सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र मिथ्यादृष्टेः सम्यक्त्वमुत्पादयतो मिथ्यात्वस्य प्रथमस्थितौ समयाधिकावलिकाशेषायां जघन्या स्थित्युदीरणा सादिरध्रुवा च । सम्यक्त्वाच्च प्रतिपतितोऽजघन्या । सा च सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे अभव्यभव्यापेक्षया । तथा ध्रुवोदीरणानां पञ्चविधज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणपञ्चविधान्तरायतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणरूपाणामजघन्या स्थित्युदीरणा त्रिधा । तद्यथा–अनादिर्ध्रुवाऽध्रुवा च । तथाहि–ज्ञानावरणपञ्चकान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां चतुर्दशप्रकृतीनां क्षीणकषायस्य स्वगुणस्थानकसमयाधिकावलिकाशेषे वर्तमानस्य जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च । शेषा सर्वाप्यजघन्या । सा चानादिः, सदैव भावात् ।

ध्रुवाध्रुवे पूर्ववत् । तैजससप्तकादीनां च त्रयस्त्रिंशत्संख्याकानां नामप्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या, सा चानादिः । ध्रुवाध्रुवे पूर्ववत् । एतासामेव मिथ्यात्वादिप्रकृतीनामष्टाचत्वारिंशत्संख्याकानां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विप्रकाराः, तद्यथा—सादयोऽध्रुवाश्च । तथाहि—एतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य कियत्कालं लभ्यते । ततः समयान्तरे तस्याप्यनुत्कृष्टा । ततो द्वे अपि साद्यध्रुवे । जघन्या च प्रागेव भाविता । 'सवविगप्पा य सेसाणं ति' शेषाणां शेषप्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा द्विविधाः, तद्यथा—सादयोऽध्रुवाश्च । साद्यध्रुवत्वं चाध्रुवोदयत्वाद्भावनीयमिति ॥ ३१ ॥

कृता साद्यनादिप्ररूपणा । संप्रत्यद्धाच्छेदस्य स्वामित्वस्य च प्रतिपादनार्थमाह—

अद्धाछेओ सामित्तं पि य ठिइसंकमे जहा नवरं(रि)। तव्वेइसु निरयगईए वा वि तिसु हिट्ठिमखिईसु॥३२॥

अद्धाछेदो त्ति—अद्धाछेदः स्वामित्वं च यथा स्थितिसंक्रमेऽभिहितं तथैवात्राप्यवगन्तव्यं । नवरमयं विशेषः—संक्रमकरणे तदवेदिष्वपि स्थितिसंक्रम उक्तः, उदयाभावेऽपि संक्रमस्य भावात् । उदीरणा पुनरियं तद्वेदिष्वेव वेदितव्या, उदयाभावे उदीरणाया अभावात् । इदमपि संक्षिप्तमुक्तमिति किंचिद्विशेषतो भाव्यते—तत्र येषां कर्मणामुदये सति बन्धोत्कृष्टा स्थितिस्तेषां ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयनैजससप्तकवर्णादिविंशतिनिर्माणास्थिरासुभागुरुलघुमिथ्यात्वषोडशकषायत्रसबादरपर्याप्तप्रत्येकदुःस्वरदुर्भगानादेयायशःकीर्तिवैक्रियसप्तकपञ्चेन्द्रियजातिहुंडोपघातपराघातो-

उत्पात्तीर्थकरसहितनिर्मितबन्धानां प्रकृतीनिबन्धानां बन्धावलिकामतीताबाधाशुद्धावलिकान उपरितनी
न्याऽपि स्थितिरुदीरणाप्रायोग्या, कथं तानि कर्माणि वेद्यमानानां वेदितव्या. उदये सत्येवोदीरणाया भावात् । बन्धा-
वलिकाबाधिता च सर्वा स्थितिर्यत्स्थितिः । उत्कृष्टस्थितिबन्धोत्पत्तेरूर्ध्वं तच्छेषा यत्स्थितिरुदीरणास्वामिनः । येषां तु कर्मणां
मनुष्यगत्यानुपूर्वीतीर्थकराहारकद्विकादीनां संक्रमतो निष्पन्नमसंहननपञ्चकादीनां बन्धाना-
मुत्कृष्टा संक्रमोत्कृष्टा स्थितिः, तेषामावलिकाद्विकहीना सर्वा स्थितिरुदीरणाप्रायोग्या,
कथं तानि कर्माणि वेद्यमानानां वेदितव्या । अत्र बन्धावलिकासंक्रमावलिकाद्विकरहिता च सर्वा स्थितिर्यत्स्थितिः । उत्का-
वलिकाद्विकहीनोत्कृष्टः, तच्छेषा यत्स्थितिरुदीरणास्वामिनः । एतदुक्तं भवति यावान् यावानुदीरणाया प्रयोगः काल-
स्तावान् तावानाध्रुवः, तच्छेषा यत्स्थितिरुदीरणास्वामिनो वेदितव्याः । तथा सप्ततिसागरोपमकोटीकोटीप्रमाणा मिथ्या-
त्वस्य स्थितिर्मिथ्यादृष्टिना सता कृता, ततोऽन्तर्मुहूर्तं कालं यावत्स्थित्वा सम्यक्त्वं प्रतिपद्यते । ततः सम्यक्त्वे
सम्यग्मिथ्यात्वे चान्तर्मुहूर्तोनां मिथ्यात्वस्थितिं संक्रमयति । संक्रमावलिकायां चातीतायामुदीरणा योग्या,
तत्र संक्रमावलिकास्थितेरपि चान्तर्मुहूर्तोनेन । ततः सम्यक्त्वमनुभवतः सम्यक्त्वस्यान्तर्मुहूर्तोना सप्ततिसागरोपमको-
टीकोटीप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या । ततः कश्चित् सम्यक्त्वेऽन्तर्मुहूर्तं स्थित्वा सम्यग्मिथ्यात्वं प्रतिपद्यते ।
ततः सम्यग्मिथ्यात्वमनुभवतः सम्यग्मिथ्यात्वस्यान्तर्मुहूर्तद्विकोना सप्ततिसागरोपमकोटीकोटीप्रमाणोत्कृष्टा स्थितिरुदी-
रणायोग्या भवति । तथा सर्वत्र तत्त्वमवसेयं तथा सर्वोत्कृष्टसंक्रमोत्कृष्टस्थितिकं यच्च तत्संक्रमोत्कृष्टस्थितिबन्ध-

प्रकृत्यभिन्नप्रकृत्यन्तरदलिकं च तत्र संक्रमितं ततस्तत्सर्वोत्कृष्टान्तःसागरोपमकोटीकोटीस्थितिकं जातं । बन्धानन्तरं चान्तर्मुहूर्तमतिक्रम्याहारकशरीरमारभते । तच्चारभमाणो लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादभाग्भवति । ततस्तस्य प्रमत्तस्य सत आहारकशरीरमुत्पादयत आहारकसप्तकस्यान्तर्मुहूर्तोनोत्कृष्टा स्थितिरुदीरणायोग्या । अत्र प्रमत्तस्य सत आहारकशरीरारंभकत्वादुत्कृष्टस्थित्युदीरणास्वामी प्रमत्तसंयत एव वेदितव्यः । शेषप्रकृतीनां सूत्रकृदेव विशेषमाचष्टे-'निरयेत्यादि' नरकगतेः, अपिशब्दान्नरकानुपूर्व्याश्च तिर्यक्पञ्चेन्द्रियो मनुष्यो वोत्कृष्टां स्थितिं बद्ध्वा उत्कृष्टस्थितिबन्धानन्तरं चान्तर्मुहूर्ते व्यतिक्रान्ते सति तिसृष्वधस्तनपृथिवीषु मध्येऽन्यतरस्यां पृथिव्यां समुत्पन्नः, तस्य प्रथमसमये नरकगतेरन्तर्मुहूर्तहीना सर्वाऽपि स्थितिर्विंशतिसागरोपमकोटीकोटीप्रमाणा उदीरणायोग्या भवति । नरकानुपूर्व्याश्चापान्तरालगतौ समयत्रयं यावदुत्कृष्टा स्थितिरुदीरणायोग्या । अधस्तनपृथिवीत्रयग्रहणे किं प्रयोजनमिति चेदुच्यते-इह नरकगत्यादीनामुत्कृष्टां स्थितिं बध्नन्नवश्यं कृष्णलेश्यापरिणामोपेतो भवति । कृष्णलेश्यापरिणामोपेतश्च कालं कृत्वा नरकेषूत्पद्यमानो जघन्यकृष्णलेश्यापरिणामः पञ्चमपृथिव्यामुत्पद्यते । मध्यमकृष्णलेश्यापरिणामः षष्ठपृथिव्यां । उत्कृष्टकृष्णलेश्यापरिणामः सप्तमपृथिव्यामित्यधस्तनपृथिवीत्रयग्रहणं ॥ ३२ ॥

देवगतिदेवमणुयाणुपुव्वी आयाव विगलसुहुमतिगे। अंतोमुहुत्त भग्गा तावयगूणं तदुक्कस्सं ॥ ३३ ॥

देवगति त्ति-देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीणामातपस्य विकलत्रिकस्य द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिरूपस्य सूक्ष्मत्रिकस्य च सूक्ष्मसाधारणापर्याप्तकलक्षणस्य स्वस्वोदये वर्तमाना अन्तर्मुहूर्तं भग्ना उत्कृष्टस्थितिबन्धाध्यवसायादनन्तरम-

न्तर्मुहूर्तं कालं यावत् परिभ्रष्टाः सन्तस्तासामन्तर्मुहूर्तोनां तदुत्कृष्टां देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति । उप-
[illegible] भावना—इह कश्चित्तथाविधपरिणामविशेषवशात्ततो नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटीकोटीप्रमाणां बद्ध्वा
ततः शुभपरिणामविशेषवशात्ततो देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटीकोटीप्रमाणां बद्धुमारभते । ततस्तस्यां देवग-
तिस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकादीनामावलिकात उपरितनीं सर्वामपि नरकगतिस्थितिं संक्रम-
यति । ततो देवगतेरपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जाता । देवगतिं च बध्नन् जघ-
न्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति । तदनन्तरं च कालं कृत्वाऽनन्तरसमये देवो जातः । ततस्तस्य देवत्वमनुभवतो
देवगतेरन्तर्मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उत्कृष्टा स्थितिरुदीरणायोग्या भवति । ननु कथमुक्तानुसारेणा-
वलिकाद्विकान्तर्मुहूर्तोनेति प्राप्नोति कथमुच्यतेऽन्तर्मुहूर्तोनेति ? नैष दोषः, यत आवलिकाद्वयेऽपि तदन्तर्मुहूर्तमेव
[illegible]मिति । एवं देवानुपूर्व्या अपि वाच्यं । तथा कश्चिन्नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरो-
पमकोटीकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषतो मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपमकोटीकोटीप्र-
माणां बद्धुमारभते । ततस्तस्यां मनुष्यानुपूर्वीस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकादीनामावलिकात उप-
रितनीं सर्वामपि नरकानुपूर्वीस्थितिं संक्रमयति । ततो मनुष्यानुपूर्व्या अपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थिति-
रावलिकामात्रहीना जाता । मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति, तथाऽन्तर्मुहूर्तमावलिको-
नां विंशतिसागरोपमकोटीकोटीं [illegible] । तदनन्तरं च कालं कृत्वा मनुष्यानुपूर्वीमनुभवतस्तस्या उत्कृष्टां स्थितिमुदी-

मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उदीरणायोग्या । ननु मनुष्यगतेरपि पञ्चदशसागरोपमकोटीकोट्यो बन्धे-
नोत्कृष्टा स्थितिः प्राप्यते, तथा मनुष्यानुपूर्व्या अपि, न त्वेकस्या अपि विंशतिः । तत उभे अपि संक्रमोत्कृष्टे संक्रमो-
त्कृष्टत्वाविशेषे च कथं मनुष्यगतेरिव मनुष्यानुपूर्व्या अपि आवलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्या न भवति ?
तदयुक्तं, मनुष्यानुपूर्व्या अनुदयसंक्रमोत्कृष्टत्वात् । तदुक्तं—"मणुयाणुपुव्विमीसग आहारग देवजुयल विगलाणि । सुहु-
मातितिगं तित्थं अणुदयसंकमणउक्कोसा ॥ १ ॥" अनुदयसंक्रमोत्कृष्टाना न जघन्यतोऽप्यन्तर्मुहूर्तोनाया एवोत्कृष्ट-
स्थितेरुदीरणायोग्यत्वात् । मनुष्यगतिस्तूदयसंक्रमोत्कृष्टा । तदुक्तं—"मणुयगइ सायं सम्मं थिर हासाइछ वेयसुभखगई ।
रिसहचउरंसगाई पणुच्चउदसंकमुक्कोसा ॥ १ ॥" ततस्तस्या आवलिकात्रिकहीनैवोत्कृष्टा स्थितिरुदीरणायोग्या भव-
तीति । एवमातपादीनामप्यन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भावनीया । नन्वनुदयसंक्रमोत्कृष्टस्थितीनां प्रकृ-
तीनामन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भवतु, आतपनाम तु बन्धोत्कृष्टं, ततस्तस्य बन्धोदयावलिकाद्विकर-
हितैवोत्कृष्टा स्थितिरुदीरणाप्रायोग्या प्राप्नोति, कथमुच्यतेऽन्तर्मुहूर्तोनेति ? उच्यते—इह देव एवोत्कृष्टे संक्लेशे वर्तमान
एकेन्द्रियप्रायोग्याणामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति, नान्यः । स च तां बद्ध्वा तत्रैव देवभवेऽन्त-
र्मुहूर्तं कालं यावदवतिष्ठते । ततः कालं कृत्वा बादरपृथ्वीकायिकेषु मध्ये समुत्पद्यते । समुत्पन्नः सन् शरीरपर्याप्त्या
पर्याप्त आतपनामोदये वर्तमानस्तदुदीरयति । तत एवं सति तस्यान्तर्मुहूर्तोनैवोत्कृष्टा स्थितिरुदीरणायोग्या भवति ।
आतपग्रहणं चोपलक्षणं । तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकतैजसकार्मणसंहनननिद्रापञ्चक-

[illegible] निर्विकलत्रिकानामनुदये [illegible]ष्टानामन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या वेदितव्या। तत्र स्थाव-
रैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकानां [illegible] कृता। शेषाणां क्रियते—तत्र नारकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहनना-
नामुत्कृष्टां स्थितिं बद्ध्वा ततो [illegible]परिणामः सन् [illegible] अन्तर्मुहूर्तं स्थित्वा तिर्यक्षु उत्कृष्टामुदीरणां करोति। निद्रा-
[illegible] उत्कृष्टां स्थितिमुत्कृष्टेन संक्लेशेन बद्ध्वा ततोऽन्तर्मुहूर्ते गते सति निद्रोदये उत्कृष्टामुदीरणां करोति॥३३॥

तित्थयरस्स य पल्लासंखिज्जाइमे जहन्नगे इत्तो। थावरजहन्नसंतेण समं अहिगं (हीं) गं व बंधंतो॥३४॥
गंतूण[illegible] [illegible]नरयदुगंताणं। निद्दा य पंचगस्स य आयावुज्जोयनामस्स ॥ ३५ ॥

तित्थयरस्सेत्यादि—तीर्थकरनाम्नः स्थितिं [illegible] पल्योपमासंख्येयभागमात्रां शेषीकृत्य।
ततोऽन्तर्मुहूर्ते [illegible] सन् तामुदीरयति। उदीरयतश्च प्रथमसमये उत्कृष्टोदीरणा। [illegible]
[illegible] तीर्थकरनाम्न उदीरणायोग्या प्राप्यते नाधिकेति। तदेवमुत्कृष्टस्थित्युदीरणास्वामित्वम्। संप्रति जघ-
न्यस्थित्युदीरणास्वामित्वमाह—'इत्तो' इत ऊर्ध्वं जघन्यस्थित्युदीरणायां स्वामित्वमभिधीयते। प्रतिज्ञातमेव
निर्वाहयति—'थावरेत्यादि' स्थावरस्य ततो [illegible] सत्कर्म स्थितिसत्कर्म तेन समं [illegible] वा [illegible]
[illegible] [illegible] ततः [illegible] गत्वा [illegible]
[illegible] जघन्यां स्थित्युदीरणां करोति। [illegible]-

द्योतवर्जानामेकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्तु प्रतिपक्षाभावात् अन्यत्र जघन्यतरा स्थितिर्न प्राप्यते । तत एकेन्द्रिय एव यथोक्तस्वरूप आसां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी ॥ ३४–३५ ॥

एगिंदियजोग्गाणं इयरा बंधित्तु आलिगं गंतुं । एगिंदियागए तट्ठिईए जाईणमवि एवं ॥ ३६ ॥

एगिंदिय त्ति–एकेन्द्रियाणामेवोदीरणां प्रति या योग्याः प्रकृतयस्ता एकेन्द्रिययोग्या एकेन्द्रियजातिस्थावरसूक्ष्मसाधारणनामानस्तासामेकेन्द्रियो जघन्यस्थितिसत्कर्मा । इतरा एकेन्द्रियजात्यादिप्रतिपक्षभूता द्वीन्द्रियजात्यादिकाः प्रकृतीर्बद्ध्वा । तद्यथा–एकेन्द्रियजातेर्द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातीः, स्थावरसूक्ष्मसाधारणानां त्रसबादरप्रत्येकनामानि, तत एकेन्द्रियजात्यादीर्बध्नाति । ततो बन्धावलिका गत्वाऽतिक्रम्य बन्धावलिकायाश्चरमसमये एकेन्द्रियजात्यादीनां जघन्या स्थित्युदीरणां करोति । इयमत्र भावना–एकेन्द्रियः सर्वजघन्यस्थितिसत्कर्मा द्वीन्द्रियादिजातीः सर्वा अपि परिपाट्या बध्नाति । ततस्तद्बन्धानन्तरमेकेन्द्रियजातिं बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धायास्तस्या एकेन्द्रियजातेर्जघन्यां स्थित्युदीरणां करोति । इह बन्धावलिकाया अनन्तरसमये बन्धावलिकाप्रथमसमयबद्धा अपि ल(न)ता उदीरणामायान्ति, ततो जघन्या स्थित्युदीरणा न प्राप्यते इति कृत्वा बन्धावलिकायाश्चरमसमये इत्युक्तं । यावता कालेन प्रतिपक्षभूताः प्रकृतीर्बध्नाति तावता कालेन न्यूना एकेन्द्रियजातेः स्थितिर्भवति, ततः स्तोकतरा प्राप्यते इति प्रतिपक्षभूतप्रकृतिबन्धोपादानं । एवं स्थावरसूक्ष्मसाधारणानामपि भावना कर्तव्या । केवलमेतेषां प्रतिपक्षभूताः प्रकृतयः त्रसबादरप्रत्येकनामानो वेदितव्याः । 'एगिंदियेत्यादि' जातीनामपि द्वीन्द्रियादिजातीनामपि एवं पूर्वोक्तेन प्रकारेण

एकेन्द्रियादागतोऽल्पस्थितिकः । एकेन्द्रियप्रायोग्यजघन्यस्थितिको जघन्यां स्थित्युदीरणां करोति । इयमत्र भावना-एके-
न्द्रियो जघन्यस्थितिकर्मा एकेन्द्रियेभ्य उद्धृत्य द्वीन्द्रियेषु मध्ये समुत्पन्नः । पूर्वबद्धां द्वीन्द्रियजातिमनुभवितुमा-
रब्धः । अनुभवन्नवश्यं बध्नाति द्वीन्द्रियजातिं दीर्घाद्धं यावत् ततः । तदनन्तरं त्रीन्द्रियजातिं चतुरिन्द्रियजातिं
एकेन्द्रियजातिं च क्रमेण बध्नाति । एवं च बध्नाति अन्तर्मुहूर्तानि व्यतिक्रान्तानि । ततो द्वीन्द्रियजातिं बध्नात-
ि । ततो बन्धावलिकायामतिक्रान्तायां तस्या द्वीन्द्रियजातेरेकेन्द्रियभवोपार्जितस्थितिसत्कर्माधिकाया अन्तर्मुहूर्तचतुष्टया-
भ्यधिकायाः जघन्यां स्थित्युदीरणां करोति । बन्धावलिकान्तरगतमपर्याप्तं न तावत् प्रागेव । एवं त्रीन्द्रि-
यचतुरिन्द्रियजात्योरपि भावना कार्या ॥ ३६ ॥

वेयगिया नोकसायासमत्तसंघयणपंचनीयाण । तिरियदुग अयस दूभगणाइज्जाणं च संनिगए ॥ ३७ ॥

वेयगिय त्ति—वेदत्रयनोकषायषट्कास्थिरैकतिर्यग्गतितिर्यगानुपूर्व्याः ... क्रमेण संज्ञिपञ्चेन्द्रियगतां जघन्या स्थित्युदीरणा । भावना त्वियं—एकेन्द्रियो जघन्य-
स्थितिकर्मा एकेन्द्रियेभ्य उद्धृत्य पर्याप्तसंज्ञिपञ्चेन्द्रियेषु मध्ये समुत्पन्नः, तत्र स्वबन्धकालादन्य न ... सन्
दीर्घं ... अन्तर्मुहूर्तं यावद्बध्नाति । ततः पुनरपि तामेव बध्नाति । ततो बन्धावलिकायामतिक्रान्ता-
यां ... जघन्यां स्थित्युदीरणां करोति । एवमन्यासामपि द्रष्टव्यं । ... सातवेदनीयं असातवेदनीयमिति । तयोस्तु भावना ... कार्या । अन-

मासमपर्याप्तकं नाम एकेन्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियभवादुद्धृत्यापर्याप्तसंज्ञिपञ्चेन्द्रियमध्ये समुत्पन्न उत्पत्तिप्रथमसमयादारभ्य च पर्याप्तकनाम बृहत्तरमन्तर्मुहूर्तं कालं यावद्बध्नाति । ततः पुनरपि अपर्याप्तकनाम बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धस्यापर्याप्तकनाम्नो जघन्यां स्थित्युदीरणा करोति । संहननपञ्चकस्य तु मध्ये वेद्यमानं संहननं मुक्त्वा शेषसंहननाना प्रत्येकं बन्धकालोऽतिदीर्घो वक्तव्यः । ततो वेद्यमानसंहननस्य बन्धे बन्धावलिकाचरमसमये जघन्या स्थित्युदीरणा । नीचैर्गोत्रमसातवद्वेदितव्यं । तथा तैजस्कायिको वायुकायिको वा बादरः सर्वजघन्यस्थितिसत्कर्मा पर्याप्तसंज्ञितिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नः । ततो बृहत्तरमन्तर्मुहूर्तं कालं यावन्मनुजगतिं बध्नाति । तद्बन्धानन्तरं च तिर्यग्गतिं बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये तस्यास्तिर्यग्गतेर्जघन्या स्थित्युदीरणां करोति। एवं तिर्यगानुपूर्व्या अपि वक्तव्यं । नवरमपान्तरालगतौ तृतीयसमये जघन्या स्थित्युदीरणा वाच्या । अयशःकीर्तिदुर्भगानादेयानां चासातस्येव भावना कार्या । केवलमिह प्रतिपक्षप्रकृतीनां यशःकीर्तिसुभगादेयाना बन्धो वाच्यः ॥ ३७ ॥

असणागयस्स चिरठिइ अंते सुरनरयगइउवंगाणं । अणुपुव्वी तिसमइगे नराण एगिंदियागयगे ॥३८॥

असणागयस्स त्ति–अमनस्कादसंज्ञिपञ्चेन्द्रियादुद्धृत्य देवेषु नारकेषु वा मध्ये समागतस्य सुरगतिनिरयगतिवैक्रियांगोपांगनाम्नां स्वस्वायुर्दीर्घस्थित्यन्ते जघन्या स्थित्युदीरणा । एतदुक्तं भवति—असंज्ञिपञ्चेन्द्रियः सर्वजघन्यां सुरगत्यादिस्थिति बद्ध्वा बन्धानन्तरं च दीर्घकालं तत्रैव स्थित्वा देवेषु नारकेषु वा मध्ये पल्योपमासंख्येयभागमात्रायुःस्थितिकः समुत्पन्नः, ततस्तस्य देवस्य नारकस्य वा स्वस्वायुषश्चिरस्थित्यन्ते चरमसमये वर्तमानस्य यथायोगं देवगतिनरकगतिवै-

[illegible]संक्लेशस्य जघन्या स्थित्युदीरणा । तथा च पर्याप्तसंज्ञिपञ्चेन्द्रियो देवस्य नारकस्य वा जघन्यस्थित्यन्तरालगतौ वर्त-
मानो यथायोग्यं देवानुपूर्व्या नारकानुपूर्व्याश्च तृतीयसमये जघन्यां स्थित्युदीरणां करोति । 'मणुय पणिंदियाणगो त्ति'
[illegible] एकेन्द्रियगत्यागत्य मनुष्येषु मध्ये उत्पद्यमानोऽपान्तरालगतौ वर्त-
मानो मनुष्यानुपूर्व्यास्तृतीयसमये जघन्यस्थित्युदीरणास्वामी भवति ॥ ३८ ॥

समयाहिगावलिगाए पढमठिईए उ सेसवेलाए । मिच्छत्ते वेएसु य संजलणासु वि य सम्मत्ते ॥ ३९ ॥

[illegible] प्रथमा स्थितिरित्युच्यते, उपरितनी तु द्वितीयेति । तत्र प्रथमस्थितेः
[illegible] जघन्यस्थित्युदीरणा भवति ।
[illegible] जघन्या स्थित्युदीरणा द्रष्टव्या ॥ ३९ ॥

पज्जत्तसन्निय[illegible] एगिंदियागए मिच्छत्ते । वेसत्तनागवेउव्वियाणं पवणस्स तस्संते ॥ ४० ॥

[illegible] एकेन्द्रियगत्यागत्य
[illegible]
[illegible] जघन्या स्थित्युदीरणा । एकेन्द्रिय[illegible]
[illegible] न भवति । [illegible]
[illegible] भवति, [illegible]

वैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य तत् द्विसप्तभागं वैक्रियं, ततो विशेषणसमासः । प्राकृतत्वात्स्त्रीत्वनिर्देशः । इहापि च 'पल्लासंखियभागेण' इत्यनुवर्तते, ततश्च तस्य द्विसप्तभागवैक्रियषट्कस्य पल्योपमासंख्येयभागहीनस्य । पवनस्य बादरवायुकायिकस्य तस्य वैक्रियस्य पर्यन्तसमये जघन्या स्थित्युदीरणा । एतदुक्तं भवति—बादरवायुकायिकः पल्योपमासंख्येयभागहीनसागरोपमद्विसप्तभागप्रमाणवैक्रियषट्कजघन्यस्थितिसत्कर्म बहुशो वैक्रियमारभ्य चरमे वैक्रियारंभे चरमसमये वर्तमानो जघन्यां स्थित्युदीरणां करोति । अनन्तरसमये च वैक्रियषट्कमेकेन्द्रियसत्कजघन्यसत्कर्मापेक्षया स्तोकतरमिति कृत्वा उदीरणायोग्यं न भवति, किं तूद्वलनायोग्यं ॥ ४० ॥

चउरुवसमेत्तु पेज्जं पच्छा मिच्छं खवेत्तु तेत्तीसा । उक्कोससंजमद्धा अंते सुतणूउवंगाणं ॥४१ ॥

चउ त्ति—संसारपरिभ्रमणेन चतुरो वारान् प्रेम मोहनीयमुपशमय्य ततो मिथ्यात्वं, उपलक्षणमेतत्सम्यक्त्वं सम्यग्मिथ्यात्वं च क्षपितं, क्षपयित्वा च त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः । ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः । ततो वर्षाष्टकानन्तरं संयमं प्रतिपन्नोऽप्रमत्तभावे चाहारकसप्तकं बद्धवान् । ततो देशोना पूर्वकोटिं यावत्संयमं परिपालितवान् । ततो देशोनपूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा । 'सुतणु त्ति' आहारकशरीरं । 'उवंग त्ति' आहारकांगोपांगं । बहुवचनादाहारकबन्धचतुष्टयाहारकसङ्घातपरिग्रहः । तेषां जघन्यां स्थित्युदीरणां करोति । इह मोहोपशमं कुर्वन् शेषनामकर्मप्रकृतीनां घातादिभिः प्रभूतं स्थितिसत्कर्म घातयति । देवभवे चापवर्तनाकरणेनापवर्तयति ।

[illegible] मोक्षेण स्थितिसत्कर्म संक्रमयतीति [illegible] मोहादिसत्कं । [illegible]
[illegible] देशोनपूर्वकोटिप्रमाणेन कालेन [illegible], ततो देशोनपूर्वकोटिप्रमाणं ॥ ४१ ॥

उवसंतखीणमोहे [illegible] समयाहिगावलिगठिईए । सेसाणुदीरणंते भिन्नमुहुत्तो ठिईकालो ॥ ४२ ॥

[illegible] उपशान्तक्षीणमोह [illegible] जघन्या स्थित्युदीरणा । शेषाणां च प्रकृतीनां [illegible] प्रकृतीनां पूर्वोक्तानां च [illegible] प्रकृतीनां [illegible] जघन्या स्थित्युदीरणा । तस्याश्च जघन्यायाः कालो भिन्नमुहूर्त्ता- [illegible] जघन्या स्थित्युदीरणा ॥ ४२ ॥

[illegible] स्थित्युदीरणा । [illegible] । तत्र चैतेऽर्थाधिकाराः, तद्यथा—संज्ञा शुभाशुभप्ररूपणा [illegible] चेति । तत्र [illegible]—

अणुभागुदीरणाए सन्ना य सुभासुभा विवागो य । अणुभागबंधभणिया नाणत्तं पच्चया चेमे ॥ ४३ ॥

[illegible] संज्ञा शुभाशुभा विपाकश्च यथा [illegible] । तत्र संज्ञा द्विधा—स्थानसंज्ञा घातिसंज्ञा च । स्थानसंज्ञा चतुर्विधा—[illegible]

स्त्रिस्थानकश्चतुःस्थानकश्च । घातिसंज्ञा त्रिप्रकारा, तद्यथा—सर्वघाती देशघाती अघाती च। तथा शुभकर्मणामनुभागः क्षीरखंडोपमः । अशुभकर्मणां त्वशुभो घोषातकीनिंबरसोपमः । एषा च स्थानसंज्ञा घातिसंज्ञा शुभाशुभप्ररूपणा च प्रागनुभागसंक्रमाभिधानावसरे सप्रपञ्चं कृतेति न भूयो वितायते । विपाकश्चतुर्विधः, तद्यथा—पुद्गलविपाकः क्षेत्रविपाकः भवविपाको जीवविपाकश्च । तत्र पुद्गलानधिकृत्य यस्य रसस्य विपाकोदयः स पुद्गलविपाकः । स च संस्थानषट्कसंहननषट्कातपशरीरपञ्चकाङ्गोपाङ्गत्रयोद्योतनिर्माणस्थिरास्थिरवर्णादिचतुष्कागुरुलघुशुभाशुभपराघातोपघातप्रत्येकसाधारणनाम्नां षट्त्रिंशत्प्रकृतीनामवगन्तव्यः । तथाहि—संस्थाननामादीनि औदारिकादिपुद्गलानेवाधिकृत्य स्वविपाकमुपदर्शयन्ति, तत आसां रसः पुद्गलविपाक एव । नन्वनया युक्त्या रत्यरत्योरपि रसः पुद्गलविपाक एव प्राप्नोति । तथाहि—कंटकादिस्पर्शादरतेर्विपाकोदयो भवति, स्रक्चन्दनादिसंस्पर्शात्तु रतेः, ततः कथं स नोक्तः ? उच्यते—रत्यरतिविपाकस्य पुद्गलव्यभिचारात् । तथाहि—कंटकादिसंस्पर्शव्यतिरेकेऽपि प्रियाप्रियस्मरणादिना कदाचिद्रत्यरत्योर्विपाकोदयो दृश्यते, ततोऽनयोरनुभागो जीवविपाक एव युक्तः, न पुद्गलविपाकः । एवं क्रोधादिविपाकोऽपि भावनीयः । उक्तं च—"अरइरईणं उदओ किन्न भवे पोग्गलानि संपप्पा । अप्पुट्ठेहि वि किन्नो ? एवं कोहाइयाणं पि ॥ १ ॥" अस्याश्चाक्षरगमनिका—अरतिरत्योरुदयो विपाकोदयः पुद्गलान् प्राप्य किं न भवति ? भवत्येवेति भावः । ततः कथं तयो रसः पुद्गलविपाको नोच्यते ? । अत्राचार्यः काक्वा प्रत्युत्तरमाह—'अप्पुट्ठेहि वि किन्नो' अत्र सप्तम्यर्थे तृतीया । ततोऽयमर्थः—अस्पृष्टेष्वपि पुद्गलेषु किं तयो रत्यरत्योर्विपाकोदयो न भवति ? भवत्येवेति भावः । ततः पुद्गलव्यभिचारान्न तयो रसः पुद्गलवि-

[illegible] भवति, किं तु जीवविपाक एव । एवं गोत्रादीनामपि वाच्यं । तथा क्षेत्रमधिकृत्य यस्य कर्मणः विपाकोदयः स क्षेत्रविपाकः, स तु चानुपूर्वीनामचतुष्टयः । तथा भवमधिकृत्य यस्य कर्मणः विपाकोदयः स भवो नर-[illegible] । स च [illegible] । ननु क्षेत्रेण गतीनामपि भवमधिकृत्य विपाकोदयो भवति, ततः कथं नाम भवो [illegible] नाभिहितं ? । उच्यते, [illegible] । तथाहि—आयूंषि स्वस्वभवमन्तरेण परभवे संक्रमेणाप्युदयो न भवति । अतः तेषां [illegible] भवविपाकानुपपत्तेः । गतीनां पुनः परभवेऽपि संक्रमेणोदयो भवति । अतः [illegible] । उक्तं च—"आउव्व भवविवागा गई न आउस्स परभवे जम्हा । नो [illegible] गईण पुण संकमेणत्थि ॥ १ ॥" इति । शेषाणां [illegible] प्रकृतीनां जीवविपाको यतः [illegible] जीवविपाकाः । 'नाणत्तमित्यादि' नानात्वं विशेषः । [illegible] अनुभाग-[illegible] । [illegible] विशेषाभिधानं । तथा [illegible] बन्धमधिकृत्य एव मिथ्यात्वादयः प्रत्यया उक्ता, [illegible] ॥ ४३ ॥

[illegible]—

मीसं कुणति [illegible] य । सम्मत्तमंतरायं च [illegible] अनन्त य ॥ ४४ ॥

[illegible] ज्ञानावरणं [illegible], [illegible]

तव्यं । एतच्च तत्र सर्वथा नोक्तं, किं त्विहैव । यतस्तत्रानुभागबन्धमाश्रित्य शुभाशुभप्ररूपणा कृता । न च सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धः संभवति, तत एतद्वर्जा एव तत्राशुभप्रकृतयो निर्दिष्टाः । उदीरणा त्वेतयोरपि भवति । तत इह विशेषेणैतयोरुपादानं । तथाऽन्तरायं पञ्चप्रकारमुत्कृष्टामनुभागोदीरणामधिकृत्य द्विस्थानके, एकस्थानके च घातिसंज्ञामधिकृत्य देशघाति वेदितव्यं । बन्धं प्रतीत्य पुनश्चतुःप्रकारेपि रसे । तद्यथा–चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च । अचक्षुर्दर्शनं घातिसंज्ञामधिकृत्य देशघाति ॥ ४४ ॥

ठाणेसु चउसु अपुमं दुठाणे कक्कडं च गुरुकं च । अणुपुव्वीउ तीसं नरतिरिएगंतजोग्गा य ॥ ४५ ॥

ठाणेसु त्ति–नपुंसकवेदो बन्धं प्रतीत्य त्रिप्रकारे रसे । तद्यथा–चतुःस्थानके त्रिस्थानके द्विस्थानके च । अत्र तूत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानके । अनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके एकस्थानके च । ननु बन्धाभावे कथमुदीरणायामेकस्थानको रसो नपुंसकवेदस्य प्राप्यते ? उच्यते–क्षपणकाले रसघातं कुर्वतस्तस्यैकस्थानकस्यापि रससंभवात् । तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामधिकृत्य द्विस्थानके । तथा चतस्र आनुपूर्व्यो याश्च नरतिरश्चामुदयं प्रत्येकान्तयोग्यास्त्रिंशत्प्रकृतयः, तद्यथा–मनुष्यायुस्तिर्यगायुस्तिर्यग्गतिर्मनुष्यगतिरेकेन्द्रियजातिर्द्वीन्द्रियजातिस्त्रीन्द्रियजातिश्चतुरिन्द्रियजातिरौदारिकसप्तकमाद्यन्तवर्जसंस्थानचतुष्टयं संहननपञ्चकमातपं स्थावरं सूक्ष्ममपर्याप्तं साधारणं चेति ता अपि बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामुत्कृष्टामनुत्कृष्टां वाऽधिकृत्य द्विस्थानके रसे वेदितव्याः ॥ ४५ ॥

सेसा पगडाणं दुट्ठाणं ता चउक्कं चरमं च । जम्ह त्ति एगमवि असरं तु तस्सेगठाणाणि ॥ ४६ ॥

[illegible] स्त्रीवेदपुरुषवेदं [illegible] सम्यक्त्वादीनाम् कृत्वाधिकृत्य द्विस्थानके, अनुत्कृष्टं त्वधिकृत्य द्विस्थानके एक-स्थानके [illegible] । [illegible] च । [illegible] पुनः स्त्रीवेदानु स्थानके त्रिस्थानके द्विस्थानके वा । [illegible] च चतुःस्थानकेऽपि, तद्यथा—चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च । [illegible] पुनरपि चक्षुर्दर्शनावरणोपादानं ? उच्यते—स्थाननियमार्थं । पूर्वं [illegible] चक्षुर्दर्शनावरणयोः [illegible] स्थाननियमः । [illegible] तत्र [illegible] पुनस्त्रिको मतिश्रुतावधिदर्शनावरणप्रकृतीनामनुभागोदीरणायामेकस्थानको रसः प्राप्यते । [illegible] च चतुःस्थानकोऽपि रसः, तद्यथा—चतुःस्थानकस्त्रिस्थानको द्विस्थानक एक-स्थानकश्च ॥ ४६ ॥

[illegible] सेसम्मं मीसम्मत्तनमवि य पावेन्तु । ठाणाभिवद्धीणा संतुकस्सा उदीरणया ॥ ४७ ॥

[illegible] सम्यक्त्वस्य [illegible] द्रष्टव्यं । [illegible] यथा [illegible] अनुभागोदीरणा चतुः-स्थानकस्य त्रिस्थानकस्य द्विस्थानकस्य च [illegible] तावत्, तथा [illegible] अपि [illegible] । [illegible] चतुःस्थानकोऽपि रसो जायते । [illegible] तु [illegible], तद्यथा—चतुःस्थानकस्त्रिस्थानको द्विस्थान-कश्च । [illegible] [illegible] [illegible]

द्वादश कषायाः षड् नोकषायाः नरकायुर्देवायुर्नरकगतिर्देवगतिः पञ्चेन्द्रियजातिस्तैजससप्तकं वैक्रियसप्तकमाहारकसप्तकं समचतुरस्रसंस्थानं हुंडसंस्थानं वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षमृदुलघुशीतोष्णरूपं स्पर्शषट्कं अगुरुलघूपघातं पराघातमुच्छ्वासोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्त्ययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्रनीचैर्गोत्राणि चैतेषां चैकोत्तरशतसंख्यानां शेषकर्मणामुत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानको रसः । अनुत्कृष्टां त्वधिकृत्य चतुःस्थानकस्त्रिस्थानको द्विस्थानकश्च । तथा मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणानामुत्कृष्टामनुभागोदीरणामधिकृत्य रसः सर्वघाती । अनुत्कृष्टां त्वधिकृत्य सर्वघाती देशघाती वा । केवलज्ञानावरणकेवलदर्शनावरणनिद्रापञ्चकमिथ्यात्वद्वादशकषायाणामुत्कृष्टामनुत्कृष्टां वानुभागोदीरणामधिकृत्य रसः सर्वघाती । सातासातवेदनीयायुश्चतुष्टयसकलनामप्रकृतिगोत्रद्विकानामुत्कृष्टामनुत्कृष्टां वोदीरणामधिकृत्य रसः सर्वघातिप्रतिभागः । तथा चतुर्णां संज्वलनानां नवानां नोकषायाणामुत्कृष्टामनुभागोदीरणामधिकृत्य रसः सर्वघाती । अनुत्कृष्टां त्वधिकृत्य सर्वघाती देशघाती वा प्रतिपत्तव्यः । इदानीमशुभप्रकृतिविषये विशेषमाह—'मीसगेत्यादि' अपि च सम्यग्मिथ्यात्वं सम्यक्त्वं चानुभागोदीरणामधिकृत्य पापेषु पापकर्मसु मध्येऽवगन्तव्यं, घातिस्वभावतया तयो रसस्याशुभत्वात् । शेषप्रकृतयस्तु यथा शतकग्रन्थेऽनुभागबन्धे शुभा अशुभाश्चोक्तास्तथाऽत्राप्यवगन्तव्याः । अथ कीदृशेऽनुभागसत्कर्मणि वर्तमान उत्कृष्टामनुभागोदीरणां करोति ? उच्यते—'ठाणेत्यादि' अनुभागसत्कर्मणः षट्स्थानपतितहीनादपि उत्कृष्टानुभागोदीरणा प्रवर्तते । एतदुक्तं भवति—यत्सर्वोत्कृष्टमनु-

[illegible] ॥ ५७ ॥

[illegible]—

विरियंतराय केवलदंसणमोहणीयणाणवरणाणं । असमत्तपज्जाएसु सव्वदव्वेसु उ विवागो ॥ ५८ ॥

विरियंतराय इत्यादि— [illegible] ॥ ५८ ॥

गुरुलहुगाणंतपएसिएसु चक्खुस्स रूविदव्वेसु । ओहिस्स गहणधारणजोग्गे सेसंतरायाणं ॥ ५९ ॥

गुरुलहुगा इत्यादि— [illegible] विपाको न सर्वेषु । यत-

त्येव हि विषये चक्षुर्दर्शनादीनि व्याप्रियन्ते तावत्येव विषये चक्षुर्दर्शनावरणादीन्यपि । तत उक्तरूपो विषयनियमो न विरुध्येत । शेषप्रकृतीनां तु यथा प्राक् विपाकोऽभिहितः पुद्गलविपाकादिस्तथैवावगन्तव्यः ॥ ४९ ॥

संप्रति प्रत्ययप्ररूपणा कर्तव्या । प्रत्ययोऽपि द्विधा–परिणामप्रत्ययो भवप्रत्ययश्च । तत्र परिणामप्रत्ययमधिकृत्याह—

वेउव्वियतेयगकम्मवन्नरसगंधनिद्धलुक्खाउं । सीउण्हथिरसुभेयरअगुरुलघुगो य नरतिरिए ॥ ५० ॥

वेउव्विय त्ति–वैक्रियसप्तकं तैजसकार्मणग्रहणात्तैजससप्तकं गृहीतं । तथा वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्ष-शीतोष्णस्थिरास्थिरशुभाशुभागुरुलघूनि चानुभागोदीरणामधिकृत्य तिर्यङ्मनुष्याणां परिणामप्रत्ययानि । वैक्रियसप्तकं हि तिर्यङ्मनुष्याणां गुणविशेषसमुत्थलब्धिप्रत्ययं । ततस्तदुदीरणापि तेषां गुणपरिणामप्रत्यया । तैजससप्तकादयस्तु तिर्यङ्मनुष्यैरन्यथान्यथा परिणमय्योदीर्यन्ते, ततस्तासामपि प्रकृतीनामनुभागोदीरणा तिर्यङ्मनुष्याणां परिणामप्रत्ययाः ॥ ५० ॥

चउरंसमउयलहुगापरघाउज्जोयइट्ठखगइस्सरा । पत्तेगतणू उत्तरतणुसु दोसु वि य तणु तइया ॥ ५१ ॥

चउरंस त्ति–समचतुरस्रसंस्थानमृदुलघुपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनामानोऽष्टौ प्रकृतय उत्तरतन्वो-र्वैक्रियाहारकलक्षणयोरनुभागोदीरणामधिकृत्य परिणामप्रत्यया वेदितव्याः । यत उत्तरवैक्रिये आहारके वा शरीरे सति समचतुरस्रादीनामनुभागोदीरणा प्रवर्तमाना उत्तरवैक्रियादिशरीरपरिणामापेक्षा । तत एषापि परिणामप्रत्यया वेदि-तव्या । तथा तृतीया तनुराहारकशरीरं । आहारकशरीरग्रहणाच्चाहारकसप्तकं गृहीतं द्रष्टव्यं । ततोऽनुभागोदीरणा-

[illegible] परिणामप्रत्ययं वेदितव्यं । आहारकसप्तकं हि मनुष्याणां गुणपरिणामप्रत्ययं भवति । ततस्तदनुभागोदीरणापि गुणपरिणामप्रत्ययैवेति ॥ ५१ ॥

देसविरयविरयाणं सुभगाएज्जजसकित्तिउच्चाणं । पुव्वाणुपुव्विगाए असंखभागो थियाईणं ॥ ५२ ॥

देसविरय त्ति- देशविरतानां विरतानां च सुभगादेयनाशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा परिणामकृता । तथाहि- [illegible] यो देशविरतिं सर्वविरतिं वा प्रतिपद्यते, तस्यापि देशविरत्यादिगुण- [illegible] प्रकृतीनामुत्कृष्टानुभागोदीरणा भवति इति । तथा स्त्रीवेदादीनां [illegible] नोकषायाणां पूर्वानु- [illegible] देशविरतानां सर्वविरतानां च प्रत्येकमुदीरणायोग्यो गुणपरिणामप्रत्ययो वेदितव्यः । इदमुक्तं [illegible] देशविरतादीनामुदीरणायोग्यो गुणप्रत्ययो [illegible] नोदीरणायामिति ॥ ५२ ॥

तिप्पभिइं पाईणि य परिणाम (प)च्चयाणि सेसाओ । नरपञ्चइया पुव्वा वि य पुव्वुत्तसेसाणं ॥ ५३ ॥

[illegible]

सातवेदनीयायुश्चतुष्टयगतिचतुष्टयजातिपञ्चकौदारिकसप्तकसंहननषट्कप्रथमवर्जसंस्थानपञ्चककर्कशगुरुस्पर्शानुपूर्वीचतुष्टयोपघातातपोच्छ्वासाप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तसाधारणदुर्भगदुःस्वरानादेयायशःकीर्तिनिर्माणनीचैर्गोत्ररूपाः षट्पञ्चाशत्संख्या अनुभागोदीरणामधिकृत्य भवप्रत्यया वेदितव्याः । एतासामनुभागोदीरणा भवप्रत्ययतो भवतीत्यर्थः । 'पुव्वुत्तेत्यादि' पूर्वोक्ता अपि प्रकृतयः पूर्वोक्तशेषाणां प्रागुक्ततिर्यङ्मनुष्यव्यतिरिक्तानां भवप्रत्ययाऽनुभागोदीरणा वेदितव्या । तथाहि–देवनारकैर्व्रतरहितैश्च तिर्यङ्मनुष्यैर्नवानां नोकषायाणां पश्चानुपूर्व्या उत्कृष्टानुभागस्पर्धकादारभ्येत्यर्थः । असंख्येया अनुभागा भवप्रत्ययादेवोदीर्यन्ते । तथा वैक्रियसप्तकतैजससप्तकवर्णपञ्चकगन्धद्विकरसपञ्चकस्निग्धरूक्षशीतोष्णस्पर्शस्थिरास्थिरशुभाशुभालघुगुरुप्रकृतीनां देवा नैरयिकाश्च भवप्रत्ययादनुभागोदीरणां कुर्वन्ति । तथा समचतुरस्रसंस्थानस्य भवधारणीये शरीरे वर्तमाना भवप्रत्ययादनुभागोदीरणा देवाः कुर्वन्ति । मृदुलघुस्पर्शपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनाम्नामुत्तरवैक्रियशरीरिणं मुक्त्वा शेषाणां भवप्रत्ययादनुभागोदीरणा प्रवर्तते । सुभगादेययशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा गुणहीनस्य भवप्रत्ययादवसेया । गुणवतां तु गुणप्रत्यया । तथा सर्वेषां घातिकर्मणामनुभागोदीरणा भवप्रत्ययादेव देवनारकाणां ॥ ५३ ॥

तदेवं कृता प्रत्ययप्ररूपणा । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा–मूलप्रकृतिविषया, उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषयां तां कुर्वन्नाह—

घाईणं अजघन्ना दोण्हमणुक्कोसियाउ तिविहाउ । वेयणिएणुक्कोसा अजहन्ना मोहणीए उ ॥ ५४ ॥

साइअणाई धुव अधुवा य तस्सेसिगा य दुविगप्पा । आउस्स साइ अधुवा सवविगप्पा उ विन्नेया ॥५५॥

[illegible] घातिकर्मणामप्यनाऽनुभागोदीरणा [illegible] चतुर्विधा । तद्यथा-अनादिर्ध्रुवाऽ-ध्रुवा च । तथाहि—[illegible] जघन्यानुभागोदीरणा । सा च सादिरध्रुवा च । [illegible] । सा चानादिः [illegible] । ध्रुवाध्रुवे अभव्यभव्यापेक्षया । तथा [illegible] अनुभागोदीरणा [illegible] । तद्यथा-अनादिर्ध्रुवाऽध्रुवा च । तथाहि—अनयोरुत्कृष्टानुभागोदीरणा [illegible] । सा च सादिरध्रुवा च । [illegible] । सा चानादिः, ध्रुवोदीरणत्वात् । ध्रुवाध्रुवे पूर्ववत् । तथा [illegible] अनुत्कृष्टानुभागोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवा अध्रुवा च । तथाहि—उपशम[illegible] [illegible] प्रथमसमये [illegible], सोत्कृष्टा । सा च सादि-रध्रुवा च । [illegible] । सा [illegible] न [illegible], ततः प्रतिपाते च [illegible] । [illegible] । [illegible] । ध्रुवाध्रुवे पूर्ववत् । तथा मोहनीयस्य जघन्यानुभागोदीरणा [illegible] । सा च सादिः । [illegible] । [illegible] । [illegible] न [illegible] । ततः प्रतिपाते च [illegible] । [illegible] । [illegible] । [illegible] ध्रुवाध्रुवे पूर्ववत् । [illegible] त्रिविधा [illegible] । [illegible] ।

ततो द्वे अपि साद्यध्रुवे । जघन्या च प्रागेव जाविता । तथा नामगोत्रवेदनीयानां जघन्याऽजघन्या चानुज्ञागोदीरणा मिथ्यादृष्टौ पर्यायेण लभ्यते । ततो द्वे अपि साद्यध्रुवे । उत्कृष्टा च प्रागेव जाविता । आयुषां तु सर्वेऽपि विकल्पाः साद्यध्रुवाः । सा च साद्यध्रुवताऽध्रुवोदीरणत्वादवसेया ॥ ५४–५५ ॥

तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतिविषयां तां चिकीर्षुराह—

मउलहुगाणुक्कोसा चउविहा तिण्हमवि य अजहन्ना । णाइगधुवा य अधुवा वीसाए होयणुक्कोसा ॥ ५६ ॥
तेवीसाएँ अजहन्ना विय एयासि सेसगविगप्पा । सव्वविगप्पा सेसाण वावि अधुवा य साईय ॥ ५७ ॥

मउ त्ति–मृदुलघुस्पर्शयोरनुत्कृष्टाऽनुज्ञागोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तथाहि—अनयोरुत्कृष्टानुज्ञागोदीरणा आहारकशरीरस्थस्य संयतस्य जवति । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यनुत्कृष्टा । सापि चाहारकशरीरमुपसंहरतः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । तथा त्रयाणां मिथ्यात्वगुरुकर्कशानामजघन्यानुज्ञागोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र सम्यक्त्वं संयमं च युगपत्प्रतिपत्तुकामस्य जन्तोर्मिथ्यात्वस्य जघन्यानुज्ञागोदीरणा । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या । सा च सम्यक्त्वात्प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । कर्कशगुरुस्पर्शयोर्जघन्यानुज्ञागोदीरणा केवलिसमुद्घातान्निवर्तमानस्य षष्ठसमये जवति । सा च सादिरध्रुवा च, समयमात्रत्वात् । ततोऽन्या सर्वाप्यजघन्या ।

प्रकृतिः

नादि [illegible] गिरिशिर [illegible] समयस्तके [illegible] नादिः । ध्रुवाध्रुवे प्रतीते । तथा तैजसस्प्तकशुभवर्णादि-
[illegible] प्रकृतीनामनुत्कृष्टानुभागोदीरणा त्रिधा । तद्यथा—अनादि-
[illegible] । तथाहि—एतासामुत्कृष्टानुभागोदीरणा सयोगिकेवलिचरमसमये । ततोऽन्या सर्वाप्यनुत्कृष्टा । सा
[illegible] ध्रुवोदीरणात् । ध्रुवाध्रुवे प्रतीते । तथा [illegible] दर्शनावरणप्रकृतीनामुत्कृ-
[illegible] प्रकृतीनामनुत्कृष्टानुभागोदीरणा त्रिधा । तद्यथा—
अनादि [illegible] । तथाहि—एतासां [illegible] अनुभागोदीरणा । सा च शाश्वती च । ततो-
[illegible] सा चानादि, ध्रुवोदीरणात् । ध्रुवाध्रुवे प्रतीते । 'एतासीत्यादि' एतासां पूर्वोक्तानां प्रकृतीनां
[illegible] चतुर्दशीनां [illegible] मिथ्यात्वमुक्तकर्मनयोरेकेन्द्रियाणीनां चोत्कृ-
[illegible] जानीत । तथाहि—चतुर्दशीनां [illegible] चानुभागोदीरणा मिथ्यादृष्टी
[illegible] इत्यते । ततो द्वेऽपि सादाध्रुवे । अनुत्कृष्टा च प्रागेव भाविता । तथा [illegible] मिथ्यात्वयोरेकेन्द्रियाणीनामनु-
[illegible] चानुभागोदीरणा मिथ्यादृष्टी पर्याप्ते सत्ये, प्रत्युपदर्शितात् । ततो द्वेऽपि सादाध्रुवे । तथा च
[illegible] । [illegible] प्रकृतीनां [illegible] सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्य-
[illegible] । ता च सादाध्रुवा [illegible] ॥ ५८–५९ ॥

॥ २५१ ॥

कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधातव्यं । तच्च द्विधा—उत्कृष्टोदीरणाविषयं जघन्योदीरणाविषयं च । तत्र प्रथमत उत्कृष्टोदीरणाविषयं स्वामित्वमाह—

दाणाइ अचक्खूणं जेट्ठा आयम्मि हीणलद्धिस्स । सुहुमस्स चक्खुणो पुण तेइंदिय सव्वपज्जत्ते ॥ ५८ ॥

दाणाइ त्ति—सूक्ष्मस्य सूक्ष्मैकेन्द्रियस्य हीनलब्धिकस्य सर्वस्तोकदानाद्यनचक्षुर्दर्शनादिज्ञानलब्धियुक्तस्यादौ प्रथमसमये वर्तमानस्य पञ्चविधान्तरायाचक्षुर्दर्शनावरणरूपाणां षण्णां प्रकृतीनामुत्कृष्टानुभागोदीरणा भवति । तथा त्रीन्द्रियस्य सर्वाभिः पर्याप्तिभिः पर्याप्तस्य पर्याप्तिचरमसमये चक्षुर्दर्शनावरणस्योत्कृष्टानुभागोदीरणा ॥ ५८ ॥

निद्दाइपंचगस्स य मज्झिमपरिणामसंकिलिट्ठस्स । अपुमाइ असायाणं निरए जेट्ठा ठिइसमत्ते ॥ ५९ ॥

निद्दाइ त्ति—मध्यमपरिणामस्य तत्प्रायोग्यसंक्लिष्टस्य सर्वाभिः पर्याप्तिभिः पर्याप्तस्य निद्रापञ्चकस्योत्कृष्टानुभागोदीरणा अत्यन्तविशुद्धस्यातिसंक्लिष्टस्य वा निद्रापञ्चकोदय एव न भवतीति कृत्वा मध्यमपरिणामग्रहणं । तथा पुमादीनां नपुंसकवेदादीनां नपुंसकवेदारतिशोकभयजुगुप्सानामसातस्य चोत्कृष्टानुभागोदीरणास्वामी नैरयिको ज्येष्ठस्थितिक उत्कृष्टस्थितिकः समस्तः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वसंक्लिष्टो वेदितव्यः ॥ ५९ ॥

पंचिंदियतसबायरपज्जत्तगसाइसुस्सरगईणं । वेउव्वुस्सासाणं देवो जेट्ठठिइसमत्तो ॥ ६० ॥

पंचिंदिय त्ति—देवो ज्येष्ठस्थितिक उत्कृष्टस्थितिकस्त्रयस्त्रिंशत्सागरोपमस्थितिकः समस्तः सर्वाभिः पर्याप्तिभिः पर्याप्तः

[illegible] पनःशषप्रकृतीनामुत्कृष्टानु-
भागोदीरणास्वामी ॥ ८० ॥

[illegible] सहस्सारगस्स पज्जत्तदेवस्स ॥ ८१ ॥

[illegible] ॥ ८१ ॥

[illegible] निरयउक्कस्ससमत्ते असमत्ताए नरस्संते ॥ ८२ ॥

[illegible] मनुष्यप्रायोग्यम् ॥ ८२ ॥

[illegible] । पंचिंदिओ तिरिक्खो अट्ठमवासट्ठवासाओ ॥ ८३ ॥

[illegible] ॥ ८३ ॥

मणुउरालियवज्जरिसहाण मणुउ तिपल्लपज्जत्तो । नियगठिई उक्कोसो पज्जत्तो आउगाणं पि ॥ ६४ ॥

मणु त्ति–मनुष्यः पल्योपमत्रयायुःस्थितिकः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्धो मनुष्यगत्यौदारिकसप्तकवज्रर्षभनाराचसंहननरूपाणां नवानां प्रकृतीनामुत्कृष्टानुभागोदीरणास्वामी । तथा सर्वोत्कृष्टस्वस्वस्थितौ वर्तमानः सर्वाभिः पर्याप्तिभिः पर्याप्तस्त्रयाणामायुषां सर्वविशुद्धो नारकायुषस्तु सर्वसंक्लिष्ट उत्कृष्टानुभागोदीरको भवति ॥ ६४ ॥

हस्सठिइ पज्जत्ता तन्नामा विगलजाइसुहुमाणं । थावरनिगोयएगिंदियाणमवि बायरो नवरिं ॥ ६५ ॥

हस्सठिइ त्ति–ह्रस्वस्थितिकाः पर्याप्तकास्तन्नामानो द्वीन्द्रियादिजातिसूक्ष्मकर्मानुसारिनामानो विकलेन्द्रियजातीनां सूक्ष्मनाम्नश्चोत्कृष्टानुभागोदीरणास्वामिनः । एतदुक्तं भवति—द्वित्रिचतुरिन्द्रियाः सूक्ष्माश्च सर्वजघन्यस्थितौ वर्तमानाः सर्वपर्याप्तिभिः पर्याप्ताः सर्वसंक्लिष्टा यथासंख्यं द्वित्रिचतुरिन्द्रियजातिनाम्नां सूक्ष्मनाम्नश्चोत्कृष्टानुभागोदीरणास्वामिनः । ह्रस्वस्थितौ वर्तमानाः सर्वसंक्लिष्टा भवन्तीति कृत्वा तदुपादानं । तथा स्थावरसाधारणैकेन्द्रियजातिनाम्नां जघन्यस्थितौ वर्तमानो बादरैकेन्द्रियः सर्वपर्याप्तिभिः पर्याप्तः सर्वसंक्लिष्टः, स्थावरनाम्नः स्थावरः, साधारणनाम्नः साधारणः, एकेन्द्रियजातेर्द्वावपि उत्कृष्टानुभागोदीरणास्वामिनौ भवतः । बादरस्य महान् संक्लेशो भवतीति कृत्वा तदुपादानं ॥ ६५ ॥

आहारतणू पज्जत्तगो य चउरंसमउयलहुगाणं । पत्तेयखगइपरघायाहारतणूण य विसुद्धो ॥ ६६ ॥

आहारतणु त्ति–समचतुरस्रसंस्थानमृदुलघुस्पर्शप्रत्येकप्रशस्तविहायोगतिपराघाताहारकसप्तकरूपाणां त्रयोदशप्रकृतीनामाहारकशरीरी संयतः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध उत्कृष्टानुभागोदीरणास्वामी ॥ ६६ ॥

उत्तरवेउव्विजई उज्जोयस्सायवस्स खरपुढवी । नियगगईणं भणिया तइए समए णुपुव्वीणं ॥ ६७ ॥

उत्तर त्ति—उत्तरवैक्रिये वर्तमानो यतिः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध उद्योतनाम्न उत्कृष्टानुभागोदीरणा-स्वामी । तथा खरपृथ्वीकायिको बादरपृथ्वीकायिक उत्कृष्टायां स्थितौ वर्तमानः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध आतप-नाम्न उत्कृष्टानुभागोदीरणास्वामी । तथा मनुष्यदेवानुपूर्व्योस्तिर्यग्नरकतिर्यगानुपूर्व्योः संक्लिष्टा निजकगतीनां तृतीये समये वर्तमाना उत्कृष्टानुभागोदीरकत्वं [illegible] ॥ ६७ ॥

जोगंते सेसाणं सुभाण मियराणि चउसु वि गईसु । पज्जत्तुक्कडमिच्छस्सोहीणमणोहिलद्धिस्स ॥ ६८ ॥

जोगंते त्ति—योगिनः सयोगिकेवलिनोऽन्त्ये समये वर्तमानस्य शेषाणामुक्तव्यतिरिक्तानां शुभप्रकृतीनां तैज-[illegible] तीर्थंकरनाम्नां पञ्चत्रिंशत्प्रकृती-[illegible] उत्कृष्टानुभागोदीरणा भवति । इतरासां चाशुभप्रकृतीनां मतिज्ञानावरणादीनां [illegible] पर्याप्त [illegible] मतिज्ञानावरण श्रुतज्ञाना-[illegible] प्रकृतीनां [illegible] [illegible] उत्कृष्टानुभागोदीरणा भवति । [illegible] उत्कृष्टानुभागोदीरणा भवति । [illegible] ॥ ६८ ॥

तदेवमुक्तमुत्कृष्टानुभागोदीरणास्वामित्वं । संप्रति जघन्यानुभागोदीरणास्वामित्वं प्रतिपादयन्नाह—

सुयकेवलिणो मइसुयअचक्खुचक्खूणुदीरणा मंदा । विपुलपरमोहिगाणं मणणाणोहीदुगस्सावि ॥ ६९ ॥

सुयकेवलिणु त्ति–मतिश्रुतज्ञानावरणाचक्षुश्चक्षुर्दर्शनावरणानां श्रुतकेवलिनश्चतुर्दशपूर्वधरस्य क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मन्दा जघन्यानुभागोदीरणा वर्तते । तथा क्षीणकषायस्य विपुलमतिमनःपर्यायज्ञानस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मनःपर्यायज्ञानावरणस्य जघन्यानुभागोदीरणा । परमावधियुक्तस्य क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्यावधिज्ञानावरणावधिदर्शनावरणयोर्जघन्यानुभागोदीरणा ॥ ६९ ॥

खवणाए विग्घकेवलसंजलणाण य सनोकसायाणं । सयसयउदीरणंते निद्दापयलाणमुवसंते ॥ ७० ॥

खवणाए त्ति–क्षपणायोत्थितस्य पञ्चविधान्तरायकेवलज्ञानावरणकेवलदर्शनावरणसंज्वलनचतुष्टयनवनोकषायलक्षणानां विंशतिप्रकृतीनां स्वस्वोदीरणापर्यवसाने जघन्यानुभागोदीरणा । तत्र पञ्चविधान्तरायकेवलज्ञानावरणकेवलदर्शनावरणाना क्षीणकषायस्य, चतुर्णां तु संज्वलनानां त्रयाणां च वेदानां अनिवृत्तिबादरस्य स्वस्वोदीरणापर्यवसाने । षण्णां नोकषायाणामपूर्वकरणगुणस्थानकचरमसमये जघन्यानुभागोदीरणा । तथा निद्राप्रचलयोरुपशान्तमोहे जघन्यानुभागोदीरणा लभ्यते, तस्य सर्वविशुद्धत्वात् ॥ ७० ॥

निद्दानिद्दाईणं पमत्तविरए विसुज्झमाणम्मि । वेयगसम्मत्तस्स उ सगखवणोदीरणाचरमे ॥ ७१ ॥

निद्रानिद्रादीनां त्रि—निद्रानिद्रा[illegible]नां प्रचलाप्रचलास्त्यानर्द्धीनां प्रचलाप्रचलाया [illegible] [illegible] जघन्यानुभागोदीरणा प्रवर्तते । तथा [illegible] मिथ्यात्वमिश्रयोः [illegible] [illegible] [illegible] [illegible] [illegible] तासां स्थिती [illegible] [illegible] जघन्यानुभागोदीरणा भवति । सा च [illegible] वेदितव्या ॥ ७१ ॥

सेकाले सम्मत्तं ससंजमं गिण्हओ य तेवट्ठं । सम्मत्तमेव मीसे आउग जहन्नगठिईसु ॥ ७२ ॥

से कि—[illegible] [illegible] [illegible] सत्यां सम्यक्त्वं [illegible] प्रतीपद्यते तस्य [illegible] मिथ्यात्वान- [illegible] प्रकृतीनां जघन्यानुभागोदीरणा । [illegible] संयमम्—[illegible] [illegible] [illegible] प्रतीपद्यते, तस्य मिथ्यादृष्टेर्मिथ्यात्वानन्तानुबन्धिनां जघन्यानुभागोदीरणा । तथा [illegible] [illegible] [illegible] जघन्यानुभागोदीरणा । [illegible] [illegible] प्रतीपद्यते, तस्य [illegible] जघन्यानुभागोदीरणा । मिथ्यात्व[illegible] [illegible] [illegible] [illegible] जघन्यानुभागोदीरणा[illegible] । तथा [illegible] मीसे' इति [illegible] [illegible] सम्यक्त्वं प्रतिपद्यते, तस्य [illegible] जघन्यानुभागो- दीरणा । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] जघन्यानुभागोदीरणा भवति । तत्र [illegible]-

णामायुषां संक्लेशादेव जघन्यस्थितिबन्धो भवतीति कृत्वा जघन्यानुभागोऽपि तत्रैव लभ्यते । तथा नरकायुषो विशुद्धि-वशाज्जघन्यः स्थितिबन्धः, ततो जघन्यानुभागोऽपि नरकायुषस्तत्रैव लभ्यते । तथा च सति त्रयाणामायुषामतिसंक्लिष्टो जघन्यानुभागोदीरकः, नरकायुषस्त्वतिविशुद्ध इति ॥ ७२ ॥

पोग्गलविवागियाणं भवाइसमये विसेसमवि चासिं। आइतणूणं दोण्हं सुहुमो वाऊ य अप्पाऊ ॥ ७३ ॥

पोग्गल त्ति–पुद्गलविपाकिन्यः प्रकृतयः, तासां सर्वासामपि भवादिसमये भवप्रथमसमये जघन्यानुभागोदीरणा । एतच्च सामान्येनोक्तं, ततोऽमुकस्यामुक उदीरक इत्येवंरूपं विशेषमपि चासां प्रकृतीनां वक्ष्यामि । प्रतिज्ञातमेव निर्वा-हयति—'आइ इत्यादि' आद्योर्द्वयोस्तन्वोः शरीरयोरौदारिकवैक्रियरूपयोर्यथासंख्यं सूक्ष्मो वायुकायिकश्चाऽल्पायुर्जघन्या-नुभागोदीरकः । इह शरीरग्रहणेन बन्धनसंघाता अपि गृहीता द्रष्टव्याः । तत एतदुक्तं भवति—औदारिकशरीरौदा-रिकसंघातौदारिकबन्धनचतुष्टयरूपस्यौदारिकषट्कस्याप्यपर्याप्तसूक्ष्मैकेन्द्रियो वायुकायिको वैक्रियषट्कस्य च पर्याप्तो बादरो वायुकायिकोऽल्पायुर्जघन्यानुभागोदीरको भवति ॥ ७३ ॥

बेइंदिय अप्पाउग निरय चिरठिइ असण्णिणो वा वि। अंगोवंगाणाहारगाए जइणो (अ)प्पकालम्मि ।७४।

बेइंदिय त्ति–द्वयोरङ्गोपाङ्गयोरौदारिकाङ्गोपाङ्गवैक्रियाङ्गोपाङ्गनाम्नोर्यथासंख्यमल्पायुर्द्वीन्द्रियस्तथाऽसंज्ञी सन् यो जातो नारकश्चिरस्थितिकः स च जघन्यानुभागोदीरको भवति । इयमत्र भावना—द्वीन्द्रियोऽल्पायुरौदारिकाङ्गोपाङ्गनाम्न उदयप्रथमसमये जघन्यमनुभागमुदीरयति । तथाऽसंज्ञिपञ्चेन्द्रियः पूर्वोत्पादितवैक्रियो वैक्रियाङ्गोपाङ्गं स्तोककालं बद्ध्वा

[illegible] निर्विनिको [illegible] [illegible] [illegible]कांगोपांगनाम उदयप्रथमसमये वर्तमानस्य जघन्यानुभागो-दीरणा । तथा [illegible] [illegible] [illegible] निर्देशः । शरीरपर्याप्त्या च [illegible] अपि गृह्यन्ते । तत [illegible] [illegible] [illegible] [illegible] [illegible] काले प्रथमसमय इत्यर्थः । जघन्यानुभागोदीरणा ॥ ७४ ॥

[illegible] चउरंसुसभ [illegible] [illegible] [illegible] । संघयणाण य मणुओ हुंडुवघायाणमवि सुहुमो ॥ ७५ ॥

[illegible] [illegible] [illegible] प्रथमसमयस्य आहारकः समचतुरस्रसंस्थानवज्रर्षभनाराचसं-[illegible] [illegible] [illegible]दीरयति । [illegible] संग्रहार्थं । तथा [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । शेषं इति, [illegible] [illegible] [illegible] [illegible] [illegible] ततोऽयमर्थः—शेषाणां संहननानां [illegible] [illegible] [illegible]दीरयति । तथा शेषाणां संहननानां [illegible] [illegible] [illegible] पूर्वोक्तानुमेनुष्य [illegible] [illegible] [illegible] [illegible] जघन्यानुभागोदीरकः । [illegible] [illegible] [illegible] [illegible] । तिर्यक्पञ्चेन्द्रियाणां [illegible] [illegible] [illegible] इति मनुष्यग्रहणं । तथा सूक्ष्मैकेन्द्रियः [illegible] आहारकः प्रथमसमये हुंडोप-[illegible] [illegible] [illegible]नुभागोदीरकः ॥ ७५ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] [illegible] सीमा [illegible] ॥ ७६ ॥

[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] जघन्यानुभागोदीरणा [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] जघन्यानुभागोदीरणा । [illegible] [illegible]-

ससत्सकमृदुलघुवर्जशुभवर्णाद्येकादशकागुरुलघुस्थिरशुभनिर्माणरूपाणां विंशतिप्रकृतीनां संक्लिष्टोऽपान्तरालगतौ वर्तमानोऽनाहारको मिथ्यादृष्टिर्जघन्यानुभागोदीरणास्वामी वेदितव्यः ॥ ७६ ॥

पत्तेगमुरालसमं इयरं हुंडेण तस्स परघाउं । अप्पाउस्स य आयावुज्जोयाणमवि तज्जोगो ॥ ७७ ॥

पत्तेग त्ति-प्रत्येकनाम औदारिकेण समं वक्तव्यं औदारिकस्येव प्रत्येकनाम्नोऽपि सूक्ष्मैकेन्द्रियः प्रथमसमये वर्तमानो जघन्यानुभागोदीरको वेदितव्य इत्यर्थः । तथा हुंडेन समानमितरत् साधारणनाम वक्तव्यं । यथा सूक्ष्मैकेन्द्रियस्याहारकस्य प्रथमसमये हुंडनाम्नो जघन्यानुभागोदीरणा प्रागभिहिता, तथा साधारणनाम्नोऽपि वक्तव्येत्यर्थः । तथा तस्य सूक्ष्मैकेन्द्रियस्य शीघ्रपर्याप्तस्याल्पायुषोऽतिसंक्लिष्टस्य पर्याप्तिचरमसमये वर्तमानस्य पराघातनाम्नो जघन्यानुभागोदीरणा । तथा आतपोद्योतनाम्नोस्तद्योग्यः पृथ्वीकायिकः शरीरपर्याप्त्या पर्याप्तः प्रथमसमये वर्तमानः संक्लिष्टो जघन्यानुभागोदीरकः ॥ ७७ ॥

जा नाउज्जियकरणं तिब्वगरस्स नवगस्स जोगंते । कक्खडगुरूणमंते नियत्तमाणस्स केवलिणो ॥ ७८ ॥

ज त्ति-आयोजिकाकरणं नाम केवलिसमुद्घातादर्वाग् भवति । तत्राङ् मर्यादायां। आ मर्यादया केवलिदृष्टया योजनं व्यापारणं आयोजनं । तच्चातिशुभयोगानामवसेयं । आयोजनमायोजिका तस्याः करणं आयोजिकाकरणं । केचिदावर्जितकरणमाहुः, तत्रायं शब्दार्थः—आवर्जितो नाम अभिमुखीकृतः । तथा च लोके वक्तारः—आवर्जितोऽयं मया, संमुखीकृत इत्यर्थः । ततश्च तथाभव्यत्वेनावर्जितस्य मोक्षगमनं प्रत्यभिमुखीकृतस्य करणं शुभयोगव्यापारणं आवर्जि-

[illegible] पृथिव्यां । 'सेसतिगम्मि दुविहो त्ति' एतासां सप्तानामपि मूलप्रकृतीनां शेषा उत्कृष्टानिरिक्ता त्रिकरूपा जघन्या- [illegible] द्विविधा विकल्पाः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—एतासां सप्तानामनिर्दिष्टं (इत्थियामे) [illegible] सर्वसंक्लेशेन वर्तमानस्य प्रदेशोदीरणा । सा च सादिरध्रुवा च । [illegible] मिथ्यादृष्टेरप्यनन्तरा । [illegible] सापि सादिरध्रुवा च । [illegible] आयुषः सर्वेऽपि विकल्पा जघन्योत्कृष्टानुत्कृष्टा विविधाः, तद्यथा— सादयोऽध्रुवाश्च । सा च [illegible] ॥ ८० ॥

सम्प्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

मिच्छत्तस्स चउद्धा सगयालाए तिहा अणुक्कोसा । सेसविगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥ ८१ ॥

[illegible] अनुत्कृष्टा प्रदेशोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवा च । तथाहि—[illegible] [illegible] प्रतिपद्यमानो [illegible] मिथ्यादृष्टिर्मिथ्यात्वस्योत्कृष्टां प्रदेशोदीरणां । सा च सादिरध्रुवा च, [illegible] । ततोऽन्या सर्वाऽप्यनुत्कृष्टा । सापि च [illegible] प्रतिपततो [illegible] सादिः । तत्स्थानमप्राप्तस्य पुनर- नादिः । ध्रुवाऽध्रुवे पूर्ववत् । तथा सप्तचत्वारिंशतः प्रकृतीनामनुत्कृष्टा प्रदेशोदीरणा त्रिधा । तद्यथा—अनादिर्ध्रुवाऽध्रुवा च । तथाहि—[illegible] प्रकृतीनां क्षीणकषायस्य गुणितकर्मां- [illegible] उत्कृष्टा प्रदेशोदीरणा । सा च सादिरध्रुवा च । ततोऽन्या सर्वाऽप्यनुत्कृष्टा सा चानादि- [illegible] । ध्रुवाऽध्रुवे पूर्ववत् । तथा [illegible] [illegible] सर्वविक-

तसंख्याकानां प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिनश्च चरमसमये उत्कृष्टा प्रदेशोदीरणा । सा च सादिरध्रुवा च ।
ततोऽन्या सर्वाऽप्यनुत्कृष्टा । सा चानादिः, ध्रुवोदीरणत्वात् । आसां ध्रुवाध्रुवे पूर्ववत् । 'सेसविगप्पा दुविह त्ति' उक्त-
शेषा विकल्पा जघन्याजघन्योत्कृष्टरूपा द्विविधाः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—सर्वासामप्युक्तप्रकृतीनामति-
संक्लिष्टपरिणामे मिथ्यादृष्टौ जघन्या प्रदेशोदीरणा लभ्यते । अतिसंक्लिष्टपरिणामप्रत्ययगमने चाजघन्या । ततो द्वे अपि
साद्यध्रुवे । उत्कृष्टा च प्रागेव भाविता । शेषाणां चोक्तव्यतिरिक्तानां प्रकृतीनां दशोत्तरशतसंख्याना सर्वेऽपि विकल्पा
जघन्याजघन्योत्कृष्टानुत्कृष्टा द्विविधाः । तद्यथा—सादयोऽध्रुवाश्च । साद्यध्रुवता चाध्रुवोदीरणत्वादवसेया ॥ ८१ ॥
कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधातव्यं । तच्च द्विधा—उत्कृष्टप्रदेशोदीरणास्वामित्वं जघन्यप्रदेशोदी-
रणास्वामित्वं च । तत्र प्रथमत उत्कृष्टोदीरणास्वामित्वमाह—

अणुभागुदीरणाए जहन्नसामी पएसजेट्ठाए । घाईणं अन्नयरो ओहीण विणोहिलंभेण ॥ ८२ ॥

अणुभाग त्ति—घातिकर्मणां सर्वेषामपि अनुभागोदीरणायां यो यो जघन्यानुभागोदीरणास्वामी प्राक् प्रतिपादितः
स स एवोत्कृष्टप्रदेशोदीरणास्वामी गुणितकर्मांशो वेदितव्यः । नवरमन्यतर इति श्रुतकेवली इतरो वा । अवधिज्ञाना-
वरणावधिदर्शनावरणयोरवधिलब्धिहीन उत्कृष्टप्रदेशोदीरकोऽवसेयः । अतीवेदमतिसंक्षिप्तमुक्तमिति विशेषतो निगद्य-
ते—अवधिज्ञानावरणवर्जानां चतुर्णां ज्ञानावरणानां चक्षुरचक्षुःकेवलदर्शनावरणानां क्षीणकषायस्य श्रुतकेवलिन इत-
रस्य वा गुणितकर्मांशस्य समयाधिकावलिकाशेषायां स्थितावुत्कृष्टा प्रदेशोदीरणा । अवधिज्ञानावरणावधिदर्शनावरणयोः

[illegible] शिवाकृत्या प्रदेशोदीरणा । [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ७२ ॥

[illegible] विरहे । [illegible] अप्पमत्तस्स ॥७३॥

[illegible] ॥ ७२ ॥

[illegible] ॥ ७४ ॥

[illegible] । तथा

नैरयिकस्त्रयस्त्रिंशत्सागरोपमायुःस्थितिको गुरुदुःखोदये वर्तमानो नरकायुष उत्कृष्टप्रदेशोदीरकः । प्रभूतं हि दुःखमनुभवन् प्रभूतान् पुद्गलान् परिसादयतीति तदुपादान। इतरायुषोस्तिर्यग्मनुष्यायुषोर्यथासंख्यं तिर्यग्मनुष्यौ अष्टवर्षायुषौ अष्टमे वर्षे वर्तमानौ गुरुदुःखोदययुक्तौ उत्कृष्टप्रदेशोदीरकौ भवतः ॥ ७४ ॥

एगंत तिरियजोग्गा नियगविसिट्ठेसु तह अपज्जत्ता। संमुच्छिममणुयंते तिरियगई देसविरयस्स ॥ ७५ ॥

एगंत त्ति–एकान्तेन तिरश्चामेवोदयं प्रति या योग्याः प्रकृतयस्तासामेकेन्द्रियजातिद्वीन्द्रियजातित्रीन्द्रियजातिचतुरिन्द्रियजात्यातपस्थावरसूक्ष्मसाधारणनाम्नामष्टानां निजकविशिष्टेषु निजनिजप्रकृतिविशिष्टेषु। यथा एकेन्द्रियजातिस्थावरनाम्नोर्बादरपृथ्वीकायिके सर्वविशुद्धे, आतपनाम्नः खरबादरपृथ्वीकायिके, सूक्ष्मस्य पर्याप्तसूक्ष्मे, साधारणविकलेन्द्रियजातिनाम्नां तन्नामसु पर्याप्तेषु सर्वविशुद्धेषु उत्कृष्टा प्रदेशोदीरणा भवति, तथाऽपर्याप्तनाम्नः संमूर्छिमो मनुष्योऽपर्याप्तश्चरमसमये वर्तमान उत्कृष्टप्रदेशोदीरकः। तथा तिर्यग्गतेरुत्कृष्टा प्रदेशोदीरणा देशविरतस्य, तस्य सर्वविशुद्धत्वात् ॥७५॥

अणुपुव्विगइदुगाणं सम्मद्दिट्ठी उ दूभगाईणं। नीयस्स य से काले गहिहिइ विरय त्ति सो चेव ॥ ७६ ॥

अणुपुव्वि त्ति–चतसृणामानुपूर्वीणां तस्यां तस्यां गतौ वर्तमानस्तृतीये समये सर्वविशुद्धः सम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः। केवलं नरकतिर्यगानुपूर्व्योः क्षायिकसम्यग्दृष्टिर्वक्तव्यः। देवनारकगत्योरपि स एव क्षायिकसम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः। तथा योऽनन्तरसमये संयमं प्रतिपत्स्यते स एवाविरतसम्यग्दृष्टिर्दुर्भगादीनां दुर्भगदुःस्वरानादेयायशःकीर्तिनां नीचैर्गोत्रस्य चोत्कृष्टप्रदेशोदीरकः ॥ ७६ ॥

ओगेन्दुदीरणागं जोगंते सरकुगागुपाणूगं । नियगंते केवलिणो सव्वविसुद्धीऍ सव्वासिं ॥ ८७ ॥

[illegible] योगी सयोगिकेवली चरमसमये शरीरको यामां ना [illegible]

[illegible] ॥

[illegible] । संप्रति [illegible]—

[illegible] । नेयो जहन्नसामी अणुनागुनो य तित्थयरे ॥ ८८ ॥

[illegible]

वरणवर्जानां त्रयाणां दर्शनावरणीयानां, सातासातवेदनीययोः, मिथ्यात्वस्य, षोडशानां कषायाणां, नवानां नोकषायाणां, सवसंख्यया पञ्चत्रिंशत्संख्यानां प्रकृतीनां मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टो निद्रापञ्चकस्य तत्प्रायोग्यसंक्लेश-युक्तो जघन्यप्रदेशोदीरणास्वामी । तथा योऽनन्तरसमये मिथ्यात्वं यास्यति, सोऽतिसंक्लिष्टः सम्यक्त्वसम्यग्मिथ्यात्वयो-र्जघन्यप्रदेशोदीरणास्वामी भवति । तथा गतिचतुष्टयपञ्चेन्द्रियजात्यौदारिकसप्तकवैक्रियसप्तकतैजससप्तकसंस्थानषट्कसं-हननषट्कवर्णादिविंशतिपराघातोपघातागुरुलघूच्छ्वासोद्योतविहायोगतिद्विकत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभग-दुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्त्ययशःकीर्तिनिर्माणोच्चैर्गोत्रनीचैर्गोत्रपञ्चविधान्तरायरूपाणामेकोननवतिसंख्यानां प्र-कृतीनां संज्ञी पर्याप्तः सर्वोत्कृष्टसंक्लेशयुक्तो जघन्यप्रदेशोदीरणास्वामी । आहारकसप्तकस्य चाहारकशरीरी तत्प्रायो-ग्यसंक्लेशयुक्तः, आनुपूर्वीणामपि तत्प्रायोग्यसंक्लेशयुक्तः, आतपस्य खरबादरपृथ्वीकायिकः सर्वसंक्लिष्टः, एकेन्द्रियजाति-स्थावरसाधारणनाम्नामेकेन्द्रियः सर्वोत्कृष्टसंक्लेशयुक्तः, सूक्ष्मनाम्नः सूक्ष्मैकेन्द्रियः सर्वसंक्लिष्टो जघन्यप्रदेशोदीरणास्वामी । अपर्याप्तकनाम्नः पुनरपर्याप्तमनुष्यः सर्वसंक्लिष्टश्चरमसमये वर्तमानो जघन्यप्रदेशोदीरको भवति । तथा द्वित्रिचतुरिन्द्रि-यजातीनां यथाक्रमं द्वित्रिचतुरिन्द्रियाः सर्वसंक्लिष्टा जघन्यप्रदेशोदीरणास्वामिनः । 'अणुभागुत्तो य तित्थयरे त्ति' तीर्थकरनाम्नो य एव जघन्यानुभागोदीरणास्वामी प्राक् प्रतिपादितः, स एव जघन्यप्रदेशोदीरणास्वामी अपि वेदि-तव्यः । तीर्थकरकेवली यावदायोजिकाकरणमारभते तावत्तीर्थकरनाम्नो जघन्यप्रदेशोदीरको वेदितव्य इत्यर्थः ॥ ८८ ॥

उदीरणं उदिजुए अइसुहवेईयआउगाणं तु । पढमस्स जहणठिई सेसाणुक्कोसगठिईउ ॥ ८९ ॥

[illegible] ॥ ८५ ॥

॥ इति [illegible] प्रकरणं समाप्तम् ॥

तदेवमभिहिता सप्रपञ्चमुदीरणा । संप्रति उपशमनाप्रतिपादनावसरः । तत्र चैतेऽधिकाराः, तद्यथा—प्रथमसम्यक्त्वोत्पादप्ररूपणा, देशविरतिलाभप्ररूपणा, सर्वविरतिलाभप्ररूपणा, अनन्तानुबन्धिविसंयोजना, दर्शनमोहनीयक्षपणा, दर्शनमोहनीयोपशमना, चारित्रमोहनीयोपशमना, देशोपशमना पुनः सप्रभेदेति । तत्रेदमुपशमनाकरणं सप्रभेदं सर्वात्मना व्याख्यातुमशक्यं । ततो यत्रांशे व्याख्यातुमात्मनोऽशक्तिस्तत्रांशे तद्वेदितॄणामाचार्यो नमस्कारं चिकीर्षुराह—

करणकया अकरणा वि य दुविहा उवसामण त्थ बिइयाए। अकरणअणुइन्नाए अणुओगधरे पणिवयामि १

करणकय त्ति–इह द्विविधा उपशमना करणकृताऽकरणकृता च । तत्र करणं क्रिया यथाप्रवृत्तापूर्वानिवृत्तिकरणसाध्यः क्रियाविशेषः, तेन कृता करणकृता । तद्विपरीताऽकरणकृता । या संसारिणां जीवानां गिरिनदीपाषाणवृत्ततादिसंभववद्यथाप्रवृत्तादिकरणक्रियाविशेषमन्तरेणापि वेदनानुभवनादिभिः कारणैरुपशमनोपजायते, साऽकरणकृतेत्यर्थः । इदं च करणकृताकरणकृतत्वरूपं द्वैविध्यं देशोपशमनाया एव द्रष्टव्यं, न सर्वोपशमनायाः, तस्याः करणेभ्य एव भावात् । उक्तं च पञ्चसंग्रहमूलटीकायां—"देशोपशमना करणकृता करणरहिता च। सर्वोपशमना तु करणकृतैवेति"। अस्याश्चाकरणकृतोपशमनाया नामधेयद्वयं, तद्यथा—अकरणोपशमना, अनुदीर्णोपशमना च । तस्याश्च संप्रत्यनुयोगो व्यवच्छिन्नः, तत आचार्यः स्वयं तस्या अनुयोगमजानानस्तद्वेदितॄणां विशिष्टमतिप्रभाकलितचतुर्दशपूर्ववेदिना नमस्कारमाह—'बिइयाए' इत्यादि, द्वितीयाया अकरणकृताया उपशमनाया अकरणानुदीर्णरूपनामधेयद्वययुक्ताया अनुयोगधरान् व्याख्याकुशलान् प्रणिपतामि तेषु प्रणिपातं करोमि ॥ १ ॥

[illegible] करणोपशमनाधिकारः । नापि च [illegible] । [illegible]—

सव्वस्स य देसस्स य करणुवसमणा दुसन्नि एक्किक्का । सव्वस्स गुणपसत्था देसस्स वि तासि विवरीया ॥२॥

सव्वस्स त्ति—सा करणकृतोपशमना द्विविधा—सर्वविषये देशस्य च, सर्वोपशमना देशोपशमना चेत्यर्थः । एकैकस्या अपि द्वे द्वे नामनी । तद्यथा—सर्वोपशमनाया गुणोपशमना प्रशस्तोपशमना चेति, तथा देशस्य देशोपशमनाया [illegible] [illegible] नामधेये । तद्यथा—अगुणोपशमना अप्रशस्तोपशमना च ॥ २ ॥

सव्वुवसमणा मोहस्सेव उ तस्सुवसमणक्किया जोग्गो । पंचिंदिओ उ सन्नी पज्जत्तो लद्धितिगजुत्तो ॥ ३ ॥
पुव्वं पि विसुज्झंतो गंठियसत्ताणइक्कमिय सोहिं । अन्नयरे सागारे जोगे य विसुद्धलेसासु ॥ ४ ॥
ठिइसत्तकम्म अंतोकोडीकोडी करेत्तु सत्तण्हं । दुट्ठाणं चउट्ठाणं असुभसुभाणं च अणुभागं ॥ ५ ॥
बंधंतो धुवपगडी भवपाउग्गा सुभा अणाऊ य । जोगवसा य पएसं उक्कोसं मज्झिम जहण्णं ॥ ६ ॥
ठिइबंधद्धापूरे नवबंधं पल्लसंखभागूणं । असुभसुभाणणुभागं अणंतगुणहाणिवुड्ढीहिं ॥ ७ ॥
करणं अहापवत्तं अपुव्वकरणमनियट्टिकरणं च । अंतोमुहुत्तियाइं उवसंतद्धं च लहइ कमा ॥ ८ ॥

सव्वुवसमणा मोहस्सेव त्ति—सर्वोपशमना मोहनीयस्यैव । शेषाणां तु कर्मणां देशोपशमना, तत्र [illegible] मोहनी-यस्य [illegible] [illegible] संज्ञी पर्याप्तिभिः पर्याप्तः । [illegible] पञ्चेन्द्रियत्वं-

ज्ञित्वपर्याप्तत्वरूपाभिस्तिसृभिर्लब्धिभिर्युक्तः । अथवा उपशमलब्ध्युपदेशश्रवणलब्धिकरणत्रयहेतुप्रकृष्टयोगलब्धिरूप-लब्धित्रिकयुक्तः । करणकालात्पूर्वमपि अन्तर्मुहूर्तकालं यावत् प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या विशुद्ध्यमानोऽवदायमानचित्तसंततिः ग्रन्थिकसत्त्वानामभव्यसिद्धिकानां या विशोधिस्तामतिक्रम्य वर्तमानः ततोऽनन्तगुणविशुद्ध इत्यर्थः । तथाऽन्यतरस्मिन्मतिश्रुताज्ञानविभंगज्ञानानामन्यतमस्मिन् साकारे साकारोपयोगे (योगे) चान्यतमस्मिन्मनोयोगे वाग्योगे काययोगे वा वर्तमानः, तिसृणां विशुद्धानां लेश्यानामन्यतमस्यां लेश्यायां वर्तमानो, जघन्येन तेजोलेश्यायां, मध्यमपरिणामेन पद्मलेश्यायां, उत्कृष्टपरिणामेन शुक्ललेश्यायां । तथायुर्वर्जानां सप्तानां कर्मणां स्थितिमन्तःसागरोपमकोटीकोटीप्रमाणां कृत्वा, अशुभानां कर्मणामनुभागं चतुःस्थानकं सन्तं द्विस्थानकं करोति । शुभानां च कर्मणां द्विस्थानकं सन्तं चतुःस्थानकं करोति । तथा ध्रुवप्रकृतीः पञ्चविधज्ञानावरणनवविधदर्शनावरणमिथ्यात्वषोडशकषायभयजुगुप्सातैजसकार्मणवर्णगन्धरसस्पर्शागुरुलघूपघातनिर्माणपञ्चविधान्तरायरूपाः सप्तचत्वारिंशत्संख्या बध्नन् परावर्तमानाः स्वस्वभवप्रायोग्याः प्रकृतीः शुभा एव बध्नाति । ता अप्यायुर्वर्जाः । अतीव विशुद्धपरिणामो हि नायुर्बन्धमारभते इति कृत्वा तद्वर्जनं । भवप्रायोग्य इतिवचनाच्चैतदवगन्तव्यं–यदुत तिर्यङ् मनुष्यो वा प्रथमसम्यक्त्वमुत्पादयन् देवगतिप्रायोग्याः शुभाः प्रकृतीर्देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसादिदशकसातवेदनीयोच्चैर्गोत्ररूपा एकविंशतिसंख्या बध्नाति । देवो नैरयिको वा प्रथमसम्यक्त्वमुत्पादयन् मनुजगतिप्रायोग्या मनुजगतिमनुजानुपूर्वीपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानप्रथमसंहननौदारिकशरीरौदारि

[illegible] नीचैर्गोत्रस्य चाशितनिर्मन्या भवन्ति । केवलं यदि [illegible] निर्माणतिर्यग्गानुपूर्वीनीचैर्गोत्राणि वक्तव्यानि । शेषं तथैव । [illegible] स्थिति [illegible] सागरोपमकोटीकोटीप्रमाणमेव नाधिकं । योगस्थानादि प्रदेशाग्र- [illegible] भवति । [illegible] योगे जघन्यो जघन्यं प्रदेशाग्रं भवति, मध्यमे मध्यमं, उत्कृष्टे [illegible] । स्थिति [illegible] स्थितिस्थं प्राक्तनस्थितिस्थानापेक्षया पल्योपमासंख्येयभागन्यूनं करोति । [illegible] स्थितिस्थं प्राक्तनस्थितिस्थानापेक्षया पल्योपमासंख्येयभागन्यूनं करोति । एवमनन्तरं [illegible] पल्योपमासंख्येयभागन्यूनं करोति । अशुभानां च प्रकृतीनां बध्यमानानामनुभागं द्विस्थान [illegible] भवति । [illegible] स्थानकं भवति । तदपि प्रतिसमयमनन्तगुणवृद्धं । एवमर्मा [illegible] करोति । ततोऽपूर्वकरणं । ततोऽपि अनिवृत्तिकरणं । [illegible] । एतानि च त्रीण्यपि करणानि प्रत्येकमन्तर्मु- [illegible] । ततोऽनेन क्रमेण यथाप्रवृत्तकरणादीनां [illegible] । नापि [illegible] [illegible] ॥

[illegible]—

[illegible] परिणामठाणाणं दोन्नु वि लोगा असंखिज्जा ॥८॥

अणुसमयं त्ति–अनुसमयं समये समयेऽध्यवसानानामनन्तगुणनया विशुद्ध्या प्रतिसमयमनन्तगुणवृद्ध्याऽध्यवसानानां विशुद्ध्येत्यर्थः । प्रवर्धमानो यावत् करणसमाप्तिर्भवति तावन्निरन्तरं वर्धते । कियन्ति पुनरध्यवसानानि करणेषु प्रत्येकं भवन्तीति चेदुच्यते—'परिणामेत्यादि' द्वयोरपि यथाप्रवृत्तापूर्वकरणयोः परिणामस्थानानामनुसमयं लोका असंख्येया भवन्ति। एतदुक्तं भवति—यथाप्रवृत्तकरणेऽपूर्वकरणे च प्रतिसमयमसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि अध्यवसायस्थानानि भवन्ति। तथाहि—यथाप्रवृत्तकरणे प्रथमसमये विशोधिस्थानानि नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणानि । द्वितीयसमये विशेषाधिकानि । ततोऽपि तृतीयसमये विशेषाधिकानि । एवं तावद्वाच्यं यावच्चरमसमयः । एवमपूर्वकरणेऽपि द्रष्टव्यम् । अमूनि चाध्यवसायस्थानानि यथाप्रवृत्तापूर्वकरणयोः संबन्धीनि स्थाप्यमानानि विषमचतुरस्रक्षेत्रमास्तृणन्ति । तयोरुपरि चानिवृत्तकरणाध्यवसायस्थानानि मुक्तावलीसंस्थानानि भवन्ति । उपर्युपरिमुखानि चामून्यनुचिन्त्यमानानि प्रतिसमयमनन्तगुणवृद्ध्या प्रवर्धमानान्यवगन्तव्यानि, तिर्यक्षट्स्थानपतितानि। स्थापना चेयम्॥ए

मंदविसोही पढमस्स संखभागाहि पढमसमयम्मि । उक्कस्सं उप्पिमहो एक्केक्कं दोण्ह जीवाणं ॥१०॥
आचरमाउ सेसुक्कोसं पुव्वप्पवत्तमिइनामं । विइयस्स विइयसमए जहण्णमवि अणंतरुक्कस्सा ॥ ११ ॥

मंदविसोहीत्यादि–इह कल्पनया द्वौ पुरुषौ युगपत्करणप्रतिपन्नौ विवक्ष्येते । तत्रैकः सर्वजघन्यया श्रेण्या प्रतिपन्नः, अपरस्तु सर्वोत्कृष्टया विशोधिश्रेण्या । तत्र प्रथमस्य जीवस्य प्रथमसमये मन्दा सर्वजघन्या विशोधिः सर्वस्तोका । ततो द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या विशोधिरनन्तगुणा । एवं तावद्वाच्यं यावद्य-

[illegible] जघन्यो नान्यो गतो नास्ति । ततः प्रथमसमये द्वितीयस्य तीव्रोत्कृष्टं विशोधिस्थानमनन्तगुणं वक्तव्यं ।
[illegible] ततो [illegible] विशोधिरनन्तगुणा । ततोऽपि द्वितीये समये उत्कृष्टा विशो-
धिरनन्तगुणा । तत उपरि [illegible] विशोधिरनन्तगुणा । [illegible] विशोधिस्थानमनन्तगुणतया [illegible]-
[illegible] । [illegible] विशोधिः । तत्र [illegible] यान्यनुक्तानि स्थानानि उत्कृष्टानि विशोधि-
स्थानानि तानि [illegible] निरन्तरमनन्तगुणानि वक्तव्यानि । तदेवं समाप्तं यथाप्रवृत्तकरणं । अस्य च यथाप्रवृत्तकरणस्य
[illegible] द्वितीयं नाम, [illegible] पूर्वं करणं प्रवृत्तं [illegible] । अस्मिंश्च यथाप्रवृत्तकरणे स्थितिघातो रस-
घातो [illegible] न भवति, [illegible] विशोधिस्थानमनन्तगुणा । यानि चाप्रशस्तानि कर्माणि [illegible] यानि तेषा-
[illegible] । [illegible] च पूर्णे पूर्णे [illegible] स्थितिबन्धं
[illegible] । [illegible]–'[illegible]' द्वितीयस्य [illegible] यो
[illegible] विशोधिस्थानमनन्तगुणा [illegible] उत्कृष्टात् विशोधिस्थानात् अनन्तगुणं
[illegible] यथाप्रवृत्तकरणे [illegible] प्रथमतो [illegible] जघन्यानि विशोधिस्थानान्यनन्तगुणतया [illegible]-
[illegible] । [illegible] जघन्या विशोधिः [illegible] । तानि च यथाप्रवृत्तकरणवदत्रापि
[illegible] विशोधिरनन्तगुणा । ततः प्रथमसमये [illegible] विशोधिरनन्तगुणा । ततोऽपि द्वितीयसमये जघन्या
विशोधिरनन्तगुणा । ततोऽपि [illegible] द्वितीयसमये उत्कृष्टा विशोधिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या

विशोधिरनन्तगुणा । ततोऽपि तस्मिन्नेव तृतीयसमये उत्कृष्टा विशोधिरनन्तगुणा । एवं प्रतिसमयं तावद्वाच्यं यावच्चरमसमये उत्कृष्टा विशोधिरिति ॥ १०–११ ॥

निव्वयणमवि ततो से ठिइरसघायठिइबंधगद्धा उ। गुणसेढी वि य समगं पढमे समये पवत्तंति ॥ १२ ॥

निव्वयणं ति–ततः 'से' तस्यापूर्वकरणस्य निर्वचनं निश्चयमन्वर्थानुयायि वचनमभिधानं वक्तव्यं । तद्यथा–अपूर्वाणि अपूर्वाणि करणानि स्थितिघातरसघातगुणश्रेणिस्थितिबन्धादीनां निवर्तनानि यस्मिन् तत् अपूर्वकरणं । तथाहि–अपूर्वकरणे प्रविशन् प्रथमसमय एव स्थितिघातं रसघातं गुणश्रेणिं स्थितिबन्धं चान्यं युगपदारभते । तथा चाह–'ठिइरसेत्यादि' स्थितिघाते रसघातः स्थितिबन्धाद्धा गुणश्रेणिरपि च । एते चत्वारः पदार्थाः समकं युगपत् प्रथमे समये प्रवर्तन्ते ॥ १२ ॥

तत्र स्थितिघातप्रतिपादनार्थमाह—

उयहिपुहत्तुक्कस्सं इयरं पल्लस्स संखतमभागो । ठिइकंडगमणुभागाणणंतभागा मुहुत्तंतं ॥ १३ ॥

अणुभागकंडगाणं बहुहिं सहस्सेहिं पूरए एक्कं । ठिइकंडगं सहस्सेहिं तेसिं बीयं सहस्सेहिं ॥ १४ ॥

उयहि त्ति–स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षत उदधिपृथक्त्वं उदधिपृथक्त्वप्रमाणं प्रभूतसागरोपमशतप्रमाणमित्यर्थः । जघन्येन पुनः पल्योपमसंख्येयभागमात्रं स्थितिकण्डकमुत्किरति । उत्कीर्य च याः स्थितीरधो न खंडयिष्यति तत्र तद्दलिकं प्रक्षिपति । अन्तर्मुहूर्तेन च कालेन तत् स्थितिकण्डकमुत्कीर्यते । ततः पुनरप्यधस्तात् पल्योपमसंख्येयभागमात्रं

[illegible] सर्वेष्वपि [illegible] । प्रत्युत्कृष्टमेव च [illegible] । [illegible] प्रकृतानि स्थिति- [illegible] । यदा च सति यत् [illegible] प्रथमसमये स्थितिसत्कर्मासीत्, तदनन्तर [illegible]
[illegible] संप्रति [illegible]— [illegible] प्रकृतीनां [illegible]
[illegible] कालेनाशेषानपि विनाशयति । ततः पुनरपि तस्य प्राक्तु-
[illegible] प्रत्युत्कृष्टेन कालेन विनाशयति । [illegible]
[illegible] त्रिभिः [illegible] । तेषां च [illegible] परिसमाप्यते । संप्रति
[illegible] पल्योपमासंख्येयभागहीनः स्थितिबन्ध आरभ्यते ।
[illegible], [illegible] च [illegible] ॥ ७२–७३ ॥

अधुना गुणश्रेणिनिक्षेपमाह—

गुणसेढी निक्खेवो समये समये असंखगुणणाए । अद्धादुगाइरित्तो सेसे सेसे य निक्खेवो ॥ ७४ ॥

[illegible]
[illegible] । [illegible]
[illegible] । [illegible]
[illegible] । [illegible]

द्धाद्विकातिरिक्तः अपूर्वकरणानिवृत्तिकरणकालाभ्यामभ्यधिकः। एष प्रथमसमयगृहीतदलिकनिक्षेपविधिः। एवं द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपविधिर्द्रष्टव्यः। अन्यच्च गुणश्रेणिरचनाय प्रथमसमये दलिकं यद्गृह्यते तत्स्तोकं। द्वितीयसमयेऽसंख्येयगुणं। ततोऽपि तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वाच्यं यावद्गुणश्रेणिकरणचरमसमयः। तथाऽपूर्वकरणसमयेषु अनिवृत्तिकरणसमयेषु चानुभवतः क्रमशः क्षीयमाणेषु सत्सु गुणश्रेणिदलिकनिक्षेपः शेषे शेषे भवति, उपरि च न वर्धते ॥१५॥

संप्रत्यनिवृत्तिकरणस्वरूपमाह—

अनियट्टिम्मि वि एवं तुल्ले काले समा तओ नामं। संखिज्जइमे सेसे भिन्नमुहुत्तं अहो मुच्चा ॥ १६ ॥
किंचूणमुहुत्तसमं ठिइबंधद्धाएँ अंतरं किच्चा। आवलिदुगेक्कसेसे आगाल उदीरणा समिया ॥ १७ ॥

अनियट्टिम्मि त्ति–यथाऽपूर्वकरणप्रथमसमयादारभ्य स्थितिघातादयो युगपत्प्रवर्तमाना उक्ता एवमनिवृत्तिकरणेऽपि वक्तव्याः। 'तुल्ले काले समा तओ नामं ति' तुल्ये समाने काले यतः समा सर्वेषामपि तत्प्रविष्टानां विशोधिर्भवति, न विषमा, ततो नाम सान्वयं निर्वचनीयं अनिवृत्तिकरणमिति। एतदुक्तं भवति–अनिवृत्तिकरणस्य प्रथमसमये ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते तेषां सर्वेषामपि समा एकरूपा विशोधिः। द्वितीयसमयेऽपि च ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते, तेषामपि सर्वेषां परस्परं समा विशोधिः। नवरं प्रथमसमयभाविविशोध्यपेक्षयाऽनन्तगुणा। एवं तावद्वक्तव्यं यावदनिवृत्तिकरणचरमसमयः। तत एवमस्मिन् करणे प्रविष्टानां तुल्यकालानामसुमतां परस्परमध्यवसानानां या निवृत्तिर्व्यावृत्तिः सा न विद्यत इत्यनिवृत्तिकरणमिति नाम। अस्मिंश्चानिवृत्तिकरणे यावन्तः समयास्तावन्ति अध्यवसायस्थानानि पूर्व-

[illegible] नि । 'अंतरि' इत्यादि' अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिंश्च भागे [illegible] तिष्ठति अन्तर्मुहूर्तमात्रमधो मुक्त्वा मिथ्यात्वस्यान्तरकरणं करोति । अन्तरकरणकरणकालश्चान्तर्मुहूर्त- [illegible] ततः । तथाहि—अन्तरकरणकरणप्रथमसमये एवान्यं स्थिति- [illegible] । [illegible] न युगपदेव परिसमापयति । अन्तरकरणं च क्रियमाणे गुणश्रेणेः संख्ये- [illegible] उत्कीर्यमाणं च दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति । अन्तर- [illegible] । उपरितनी तु द्वितीया । प्रथमस्थितौ च [illegible] उदीरणाप्रयोगेण [illegible] पतति सा उदीरणा । वस्तुतः द्वितीयस्थितेः सकाशादुदीरणा- [illegible] । [illegible] प्रथमां स्थितिमनुभवन् [illegible] तिष्ठति । तस्मिंश्च स्थितिं [illegible] न [illegible] । [illegible] न जाति । आवलिकायां च शेषी- [illegible] । ततः [illegible] नामावलिकामनुभवति । [illegible] मिथ्यात्वस्य [illegible] । [illegible] ॥ १८–१९ ॥

तथा चाह—

मिच्छत्तुदए खीणे लहए सम्मत्तमोवसमियं सो । लंभेण जस्स लब्भइ आयहियमलद्धपुव्वं जं ॥ २० ॥

मिच्छत्तुदए त्ति–मिथ्यात्वस्योदये क्षीणे सति स जीव उक्तेन प्रकारेणौपशमिकं सम्यक्त्वं लभते । यस्य सम्यक्त्वस्य लाभेन यदात्महितमलब्धपूर्वमर्हदादितत्त्वप्रतिपत्त्यादि तल्लभते । तथाहि—सम्यक्त्वलाभे सति जात्यन्धस्य पुंसश्चक्षुर्लाभे ए (इ) व जन्तोर्यथावस्थितवस्तुतत्त्वावलोको भवति । महाव्याध्यभिभूतस्य व्याध्यपगमे इव महांश्च प्रमोदः । तदुक्तं–"जात्यंधस्य यथा पुंसश्चक्षुर्लाभे शुभोदये । सद्दर्शनं तथैवास्य सम्यक्त्वे सति जायते ॥ १ ॥ आनन्दो जायतेऽत्यन्तं तात्त्विकोऽस्य महात्मनः । सद्व्याध्यपगमे यद्वद्व्याधितस्य सदौषधात् ॥ २ ॥" इति ॥ १८ ॥

तं कालं बीयठिइं तिहाणुभागेण देसघाइ त्थ । सम्मत्तं सम्मिस्सं मिच्छत्तं सव्वघाईओ ॥ १९ ॥

तं त्ति–'तं कालं' तस्मिन् काले यतोऽनन्तरसमये औपशमिकसम्यग्दृष्टिर्भविष्यति, तस्मिन् प्रथमस्थितौ चरमसमये इत्यर्थः । मिथ्यादृष्टिः सन् द्वितीयं द्वितीयस्थितिगतं दलिकमनुभागेनानुभागभेदेन त्रिधा करोति । तद्यथा–शुद्धमर्धविशुद्धमविशुद्धं च । तत्र शुद्धं सम्यक्त्वं, तच्च देशघाति, देशघातिरसोपेतत्वात् । अर्धविशुद्धं सम्यग्मिथ्यात्वं, तच्च सर्वघाति, सर्वघातिरसोपेतत्वात् । अशुद्धं मिथ्यात्वं, तदपि सर्वघाति । तथा चाह–सन्मिश्रं मिश्रसहितं मिथ्यात्वं सर्वघाति ॥ १९ ॥

पढमे समए थोवो सम्मत्ते मीसए असंखगुणो । अणुसमयमवि य कमसो भिन्नमुहुत्ता हि विज्झाओ ॥ २० ॥

पढमे त्ति–औपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वदलिकं गुणसंक्रमेण सम्यक्त्वसम्यग्मिथ्यात्वयोः संक्रमयति । तच्चैवं–प्रथमसमये स्तोको दलिकनिक्षेपः सम्यक्त्वे । ततो मिश्रेऽसंख्येयगुणः । ततोऽपि द्वितीये समये सम्य-

[illegible] । [illegible] प्रतिसमयं क्रमशः [illegible] प्रवर्तते ॥ २० ॥

निद्दुगनाई गुणसेढी [illegible] । पढमठिइए [illegible] ॥ २१ ॥

[illegible] गुणश्रेणिरपि प्रवर्तते । [illegible] प्रथमस्थितौ [illegible] न जाति, [illegible] । [illegible] । [illegible] । [illegible] ॥ २१ ॥

[illegible]—

[illegible] ॥ २२ ॥

[illegible] । [illegible] । [illegible] । [illegible]

कतरस्य दलिकस्योदयो भवति। किंविशिष्टस्येत्याह—अध्यवसायानुरूपस्य। एतदुक्तं भवति—यदि तदानीं शुभः परिणामस्तर्हि सम्यक्त्वदलिकस्योदयः। मध्यमश्चेत्परिणामस्तर्हि सम्यग्मिथ्यात्वदलिकस्य। जघन्यश्चेत्ततो मिथ्यात्वदलिकस्येति ॥२२॥

सम्मत्तपढमलंभो सव्वोवसमा तहा विगिठो य। छलिगसेसाएँ परं आसाणं कोइ गछेज्जा ॥ २३ ॥

सम्मत्त त्ति–एष औपशमिकसम्यक्त्वप्रथमलाभो मिथ्यात्वस्य सर्वोपशमाद्भवति, नान्यथा। तथा प्रथमस्थित्यपेक्षया विप्रकर्षश्च बृहत्तरान्तर्मुहूर्तकालप्रमाणश्च। एष सम्यक्त्वप्रथमलाभः। अस्मिंश्च सम्यक्त्वे लभ्यमाने सति कश्चित्सम्यक्त्वेन समं देशविरतिं सर्वविरतिं वा प्रतिपद्यते। उक्तं च शतकबृहच्चूर्णौ—"उवसमसम्मद्दिठ्ठी अंतरकरणठ्ठिओ कोई देसविरयं पि लभेइ, कोई पमत्तापमत्तभावं पि, सासायणो पुण न किं पि लहेइ त्ति" एतत्सम्यक्त्वाद्धायां च जघन्यतः समयशेषायां परं उत्कर्षतः षडावलिकाशेषायां कश्चित् आसादनं सासादनत्वं याति। स च नियमात्तदनन्तरं मिथ्यात्वमेव प्रतिपद्यते ॥ २३ ॥

संप्रति सम्यग्दृष्टेः स्वरूपमाह—

सम्मद्दिठी जीवो उवइठं पवयणं तु सद्दहइ। सद्दहइ असब्भावं अजाणमाणो गुरुनियोगा ॥ २४ ॥

सम्मद्दिठि त्ति–सम्यग्दृष्टिर्जीवो गुरुनिरुपदिष्टं प्रवचनं नियमात् यथावत् श्रद्धत्ते। एवं तुरेवकारार्थो भिन्नक्रमश्च। यः पुनः सम्यग्दृष्टिरपि असद्भावमसद्भूतं प्रवचनं श्रद्दधाति सोऽवश्यमजानन् स्वयं सम्यक्परिज्ञानविकलः सन्। यद्वा गुरोस्तथाविधसम्यक्परिज्ञानविकलस्य मिथ्यादृष्टेर्वा जमालिप्रख्यस्य नियोगादाज्ञापारतंत्र्यात्, नान्यथा ॥ २४ ॥

मिथ्यादृष्टेः [illegible]—

मिच्छद्दिट्ठी नियमा उवइट्ठं पवयणं न सद्दहइ । सद्दहइ असब्भावं उवइट्ठं वा अणुवइट्ठं ॥ २५ ॥

[illegible] मिथ्यादृष्टिर्जीवो गुरुनिरूपितं प्रवचनं नियमात् न श्रद्धत्ते न सम्यक्त्वेनात्मनि परिणमयति, [illegible] मिथ्यात्वमित्यर्थः । श्रद्धत्ते, न सम्यग्यथावस्थितमिति ॥ २५ ॥

सम्मामिच्छद्दिट्ठी सागारे वा तहा अणागारे । अह वंजणोग्गहम्मि य सागारे होइ नायव्वो ॥ २६ ॥

[illegible] सम्यग्मिथ्यादृष्टिर्योगे [illegible] साकारोपयोगे वा भवति, अनाकारोपयोगे वा ? । यदि [illegible] भवति, नाभिमते । यस्मात्संशयज्ञानिमध्यो जिन- [illegible] सम्यग्मिथ्यादृष्टि [illegible] । [illegible] भवति [illegible] ॥ २६ ॥

[illegible]—

[illegible] चरित्तमोहुदयआओ [illegible] । [illegible] देसजई वा विरतो व [illegible] ॥ २७ ॥

[illegible] चारित्रमोहनीयोदयात् [illegible] । [illegible] देशविरतो [illegible] वा [illegible] । [illegible] ॥ २७ ॥

एतेषां चाविरतादीनां त्रयाणामपीदं लक्षणं—

अन्नाणाणुब्भुवगमजयणाहजओ अवज्जविरईए । एगव्वयाइ चरिमो अणुमइमित्तो त्ति देसजई ॥ ४७ ॥
अणुमइविरओ य जई दोण्ह वि करणाणि दोण्हि न उ तइयं । पव्वा गुणसेढी सिं तावइया आलिगा ज्जिपं ४८

अन्नाणेत्यादि—तत्र यो व्रतानि न जानाति, न चाभ्युपगच्छति, न तत्पालनाय यतते, सोऽज्ञानानभ्युपगमायतनाभिरविरतः । अत्र च त्रिभिः पदैरष्टौ भङ्गाः तत्राद्येषु सप्तसु भङ्गेषु नियमादविरतोऽयतो व्रतानि घुणाक्षरन्यायेन पालि-

१ नो जाणइ नो आदरइ नो पालइ जिणधम्मु । तिपएहिं अड भगा, सेगा [illegible] नेगा ॥१॥ सम्म न याण (गम्मगजाणे) [illegible] अगीयत्थ सेविपाईया । पच्चुत्तरसुर सविरगपक्खिणो अहमेगु जई ॥२॥ पढमा मिच्छादिट्ठी चउरो समारगमणभेड त्ति । दुयगा सम्मदिट्ठी, अविहा निव्वाणगमजम्मा ॥ ३॥ [illegible]

१ न जाणइ, न आदरइ न पालइ, सर्वलोक

२ न जाणइ, न आदरइ पालइ, तपस्वी

३ न जाणइ, आदरइ न पालइ पार्श्वस्थ,

४ न जाणइ, आदरइ पालइ, अगीतार्थ

५ जाणइ, न आदरइ न पालइ, श्रेणिकादिक

६ जाणइ, न आदरइ पालइ, अनुत्तरदेव

७ जाणइ, आदरइ न पालइ, जैनिमसाधिक

८ जाणइ, आदरइ, पालइ, महाव्रतधारी

[illegible] न [illegible], किंतु [illegible] । [illegible], [illegible]

[illegible] इति [illegible] निरवद्यत्वम् । [illegible] नु [illegible]

[illegible] । न [illegible], [illegible]. [illegible]

[illegible] । [illegible] नु पापं [illegible] । अनुमतिरिति त्रिधा—प्रतिसं-

[illegible], [illegible] । तत्र [illegible] पापं [illegible]

[illegible], [illegible] प्रतिसं[illegible] । यदा तु [illegible] पापं [illegible], [illegible], न च प्रतिषेधति, तदा

[illegible] । यदा पुनः [illegible] नानि, [illegible]

[illegible] । तत्र [illegible], न [illegible], [illegible]

[illegible], न [illegible] । [illegible] ? [illegible]

[illegible] प्रतिषे[illegible] । न तु [illegible]

[illegible] तस्य, प्रतिषेध[illegible], [illegible]

[illegible], [illegible] । [illegible]

[illegible] । [illegible] न [illegible]

[illegible] । [illegible] इति ।

ततो देशविरतिं सर्वविरतिं वा प्रतिपद्यते। अथ देशविरतस्तर्हि सर्वविरतिमेव। 'पञ्चेत्यादि' द्वयोः करणयोर्गतयोः सतोः पश्चा-द्देशविरतिं सर्वविरतिं वा प्रतिपन्नः सन् उदयावलिकाया उपरि गुणश्रेणिमारचयति। तां च तावतीमन्तर्मुहूर्तप्रमाणां प्रति-समयं दलिकरचनामधिकृत्यासंख्येयगुणवृद्ध्यामारचयति। तथा देशविरतः सर्वविरतो वा स्वप्रतिपत्त्यनन्तरमन्तर्मुहूर्तं कालं यावदवश्यं प्रवर्धमानपरिणामो भवति। तत ऊर्ध्वं त्वनियमः। कोऽपि हि प्रवर्धमानपरिणाम एव भवति। कोऽपि स्वभावस्थः। कोऽपि हीनपरिणामः। तत्र स्वभावस्थे हीनपरिणामे वा देशविरते सर्वविरते वा स्थितिघातरसघातौ न भवतः ॥२८—२९॥

परिणामपच्चया उ णाभोगगया गया अकरणा उ।गुणसेढी सिं निच्चं परिणामा हाणिवुड्ढिजुया ॥३०॥

परिणाम त्ति—परिणामप्रत्ययात् परिणामह्रासात् कारणादित्यर्थः। अनाभोगगता आभोगरहिता ये देशविरतिपरि-णामात् सर्वविरतिपरिणामाद्वा गताः परिभ्रष्टास्ते अकरणाः करणरहिता एव भूयोऽपि तां पूर्वप्रतिपन्नां देशविरतिं सर्व-विरतिं वा प्रतिपद्यन्ते। एतदुक्तं भवति—ये आभोगमन्तरेण कथञ्चित् परिणामह्रासतो देशविरता अविरतिं गताः, सर्वविरताश्च देशविरतिमविरतिं वा गताः, ते परिणामवशेन भूयोऽपि तामेव पूर्वप्रतिपन्नां देशविरतिं सर्वविरतिं वा प्रतिपद्यमाना अकृतकरणा एव प्रतिपद्यन्ते। ये पुनराभोगतो देशविरतेः सर्वविरतेर्वा प्रतिपतिताः, आभोगेनैव च मिथ्यात्वं गताः, ते पुनरपि जघन्यतोऽन्तर्मुहूर्तेन कालेन उत्कर्षतः प्रभूतेन कालेन देशविरतिं सर्वविरतिं वा प्रतिपत्तु-कामा उक्तप्रकारेण करणपुरःसरमेव प्रतिपद्यन्ते। तथा यावद्देशविरतिं सर्वविरतिं वा प्रतिपालयति तावद्गुणश्रेणिमपि समये समये करोति। नवरं प्रवर्धमानपरिणामस्तत्तत्परिणामानुसारेण कदाचिदसंख्येयभागाधिकां कदाचित्संख्येयभा-

[illegible] गुणसंक्रमेण [illegible] करोति । दीपनानन्तरमिदमन्तर्मुहूर्तकालं दीपनानां, अवस्थितप-
रिणामत्वं नाम [illegible] । एवं शेषं अनिवृत्तिकरणम् उपशमाद्धा । कालतः पुनः सर्वदापि तावन्तीति । अथवा कषायो-
[illegible] एव अनन्तानुबन्धिनां [illegible] इति ॥ ३० ॥

[illegible] अनन्तानुबन्धिनां विसंयोजना [illegible] । अथ चारित्रमोहनीयोपशमना-
धिकारे किमर्थमनन्तानुबन्धिनां विसंयोजनाऽभिधीयते ? उच्यते—यत् चारित्रमोहनीयमुपशमयितुमारभते सोऽवश्य-
मनन्तानुबन्धिनो विसंयोजयति । तेन तद्विसंयोजना नियमाद् वक्तव्या । तत्रानन्तानुबन्धिनः श्रेणिमप्रतिपद्यमाना
अपि [illegible] विसंयोजयन्ति । तथा चाह—

चउगइया पज्जत्ता तिन्नि वि संजोयणा विजोयंति । करणेहिं तीहिं सहिया नंतरकरणं उवसमो वा ॥३१॥

चतुर्गतिकाः [illegible] पर्याप्तिभिः पर्याप्ताः त्रयोऽपि अविरतदेशविरतसर्व-
विरताः । [illegible], देशविरतास्तिर्यञ्चो मनुष्या वा, सर्वविरता मनुष्या एव, संयोजनान् अन-
न्तानुबन्धिनो विसंयोजयन्ति विनाशयन्ति । [illegible] यथाप्रवृत्त—करणैः सहिताः । करणानि प्रागिव
[illegible] न [illegible] उपशमो वा । [illegible] अनन्तानुबन्धिनां न [illegible] गाथाक्षरार्थः । भावना
[illegible] त्रीणि करणानि आरभन्ते । [illegible] न [illegible]
[illegible] अनन्तानुबन्धिनां गुणसंक्रमोऽपि [illegible] । तद्यथा—अपूर्व-

करणस्य प्रथमसमयेऽनन्तानुबन्धिनां दलिकं शेषकषायरूपपरप्रकृतौ स्तोकं संक्रमयति । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणमित्येवं वक्तव्यं । एष गुणसंक्रमः। अनिवृत्तिकरणे च प्रविष्टः सन् प्रागुक्तस्वरूपेणोद्वलनासंक्रमेण निरवशेषान् विनाशयति । किंत्वधस्तादावलिकामात्रं मुञ्चति । तदपि च स्तिबुकसंक्रमेण वेद्यमानासु प्रकृतिषु संक्रमयति । ततोऽन्तर्मुहूर्तात्परतोऽनिवृत्तिकरणपर्यवसाने शेषकर्मणां स्थितिघातरसघातगुणश्रेणयो न भवन्ति, किंतु स्वभावस्थ एव भवति ॥ २१ ॥

तदेवमुक्ताऽनन्तानुबन्धिनां विसंयोजना । ये त्वाचार्या अनन्तानुबन्धिनामप्युपशमनां मन्यन्ते तन्मतेनोपशमनाविधिः षडशीतिवृत्तेरवसेयः । संप्रति दर्शनमोहनीयक्षपणाविधिमाह—

दंसणमोहे वि तहा कयकरणद्धाएँ पच्छिमे होइ । जिणकालगो मणुस्सो पट्ठवगो अट्ठवासुप्पिं ॥२२॥

दंसणमोहे वि त्ति—इह दर्शनमोहनीयक्षपणायाः प्रस्थापक आरंभको मनुष्यो जिनकालको जिनकालसंभवी । जिनकालश्च ऋषभजिनविचरणकालप्रभृतिको जंबूस्वामिकेवलोत्पत्तिलाभपर्यवसानो वेदितव्यः। तथा वर्षाष्टकस्योपरि वर्तमानो वज्रर्षभनाराचसंहननश्च भवति । दर्शनमोहेऽपि च क्षपणा तथैव वक्तव्या, यथा प्रागनन्तानुबन्धिनामुक्ता । तत्र यद्यप्येवं सामान्येनोक्तं तथापि किञ्चिद्विशेषतोऽभिधीयते—इह दर्शनमोहनीयक्षपणार्थमभ्युद्यतस्त्रीणि करणान्यारभते । तद्यथा—यथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं च । एतानि च त्रीण्यपि करणानि प्रागिव वक्तव्यानि । नवरमपूर्वकरणस्य प्रथमसमये एवानुदितयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोर्दलिकं गुणसंक्रमेण सम्यक्त्वे प्रक्षिपति । उद्वलनासंक्रममपि

तयोरेवमारजते । तद्यथा–प्रथमस्थितिखंमं वृहत्तरमुद्धलयति । ततो द्वितीयं विशेषहीनं । ततोऽपि तृतीयं विशेषहीनं । एवं तावद्वक्तव्यं यावदपूर्वकरणचरमसमयः । अपूर्वकरणप्रथमसमये च यत् स्थितिसत्कर्मासीत्, तत्तस्यैव चरमसमये संख्येयगुणहीनं जातं । ततोऽनिवृत्तिकरणे प्रविशति । अत्रापि स्थितिघातादीन् सर्वानपि तथैव करोति । अनिवृत्तिकरणप्रथमसमये च दर्शनत्रिकस्यापि देशोपशमनानिधत्तिनिकाचना व्यवच्छिद्यन्ते । दर्शनमोहनीयत्रिकस्य च स्थितिसत्कर्म अनिवृत्तिकरणप्रथमसमयादारज्य स्थितिघातादिजिर्घात्यमानं स्थितिखंमसहस्रेषु गतेष्वसंज्ञिपञ्चेन्द्रियस्थितिसत्कर्मसमानं जवति । ततः स्थितिखंमसहस्रपृथक्त्वे गते सति चतुरिन्द्रियस्थितिसत्कर्मसमानं जवति । ततोऽपि तावन्मात्रेषु खंमेषु गतेषु त्रीन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंमेषु गतेषु द्वीन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंमेषु गतेष्वेकेन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंडेषु गतेषु पल्योपममात्रप्रमाणं जवति । एतच्चूर्णिकारमतेनोक्तं । पञ्चसंग्रहकारमतेन तु पल्योपमसंख्येयजागमात्रं । तडुक्तं पञ्चसंग्रहे—“ठितिखंमसहस्साइं एक्केक्के अंतरम्मि गच्छन्ति । पलिउवमसंखंसे दंसणसंते तउ जाए ॥१॥(संखेज्जम) संखेज्जा जागा खंमेईत्यादि” । ‘एकैकस्मिन्नन्तरे इति असंज्ञिपञ्चेन्द्रियचतुरिन्द्रियादिसमानस्थितिसत्कर्मजावनानामपान्तराले इति । तत एकं संख्येयतमं जागं मुक्त्वा शेषं सर्वमपि त्रयाणां दर्शनमोहनीयानां विनाशयति । ततस्तस्यापि प्राग्मुक्तसंख्येयजागस्यैकं संख्येयजागं मुक्त्वा शेषान् संख्येयान् जागान् विनाशयति । एवं स्थितिघाताः सहस्रशो व्रजन्ति । तदनन्तरं च मिथ्यात्वस्यासंख्येयान् जागान् खंडयति । सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु संख्येयान् जागान् खंमयति । तत एवं स्थितिखंमेषु प्रजूतेषु गतेषु सत्सु मिथ्या-

त्वस्य दलिकमावलिकामात्रं जातं । सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु पल्योपमासंख्येयभागमात्रं । अमूनि च स्थितिखंडानि खंड्यमानानि मिथ्यात्वसत्कानि सम्यक्त्वसम्यग्मिथ्यात्वयोः प्रक्षिपति । सम्यग्मिथ्यात्वसत्कानि सम्यक्त्वे, सम्यक्त्वसत्कानि त्वधस्तात् स्वस्थाने इति । तदपि च मिथ्यात्वदलिकमावलिकामात्रं स्तिबुकसंक्रमेण सम्यक्त्वे प्रक्षिपति । तदनन्तरं सम्यक्त्वसम्यग्मिथ्यात्वयोरसंख्येयान् भागान् खंडयति, एकोऽवशिष्यते । ततस्तस्याप्यसंख्येयान् भागान् खंडयति, एकं मुञ्चति । एवं कतिपयेषु स्थितिखंडेषु गतेषु सम्यग्मिथ्यात्वमावलिकामात्रं जातं । तदानीं च सम्यक्त्वस्य स्थितिसत्कर्म अष्टवर्षप्रमाणं भवति । तस्मिन्नेव च काले सकलप्रत्यूहापगमतो निश्चयनयमतेन दर्शनमोहनीयक्षपक उच्यते । अत ऊर्ध्वं सम्यक्त्वस्य स्थितिखंडमन्तर्मुहूर्तप्रमाणमुत्किरति । तद्दलिकं तूदयसमयादारभ्य प्रक्षिपति । केवलमुदयसमये सर्वस्तोकं । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वक्तव्यं यावद्गुणश्रेणीशिरः । तत ऊर्ध्वं तु विशेषहीन विशेषहीनं तावद्यावच्चरमा स्थितिः । एवमान्तर्मौहूर्तिकान्यनेकानि खंडान्युत्किरति निक्षिपति च तावद्यावद्द्विचरमं स्थितिखंडं । द्विचरमात्तु खंडाच्चरमखंडं संख्येयगुणं । तदपि च गुणश्रेण्याः संख्येयतमो भागः । अन्याश्च तदुपरि संख्येयगुणाः स्थितयः । उत्कीर्य च तद्दलिकमुदयसमयादारभ्यासंख्येयगुणतया प्रक्षिपति । तद्यथा—उदयसमये स्तोकं । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वाच्यं यावद्गुणश्रेणिशिरः । अत ऊर्ध्वमुत्कीर्यमाणमेव चरमस्थितिखंडं । ततो न तत्र प्रक्षिपति । चरमे च स्थितिखंडे उत्कीर्णे सत्यसौ क्षपकः कृतकरण इत्युच्यते । तथा चाह—'कयकरणद्धाए पच्छिमे होइ त्ति' पश्चिमे चरमखंडे उत्कीर्णे कृतकर-

णाद्धायां वर्तते कृतकरणो जवतीत्यर्थः । अस्यां कृतकरणाद्धायां वर्तमानः कश्चित्कालमपि कृत्वा चतसृणा गतीनामन्य-
तमस्यां गतावुत्पद्यते । लेश्यायामपि च, पूर्वं शुक्ललेश्यायामासीत्, संप्रति त्वन्यतमस्या गच्छति । तदेवं प्रस्थापको मनुष्यो
निष्ठापकस्तु चतसृष्वपि गतिषु जवति । उक्तं च–"पट्ठवगो य मणुस्सो निट्ठवगो चउसु वि गईसु" । अथोच्येत क्षीण-
सप्तको गत्यन्तरं संक्रामन् कतितमे जवे मोक्षमुपयाति ? उच्यते—तृतीये चतुर्थे वा जवे । तथाहि–यदि देवगतिं नरक-
गतिं वा संक्रामति ततो देवजवान्तरितो नरकजवान्तरितो वा तृतीयजवे मोक्षमुपयाति । अथ तिर्यक्षु मनुष्येषु वा
समुत्पद्यते, तर्हि सोऽवश्यमसंख्येयवर्षायुष्केषु मध्ये समुत्पद्यते, न संख्येयवर्षायुष्केषु । ततस्तज्जवानन्तरं देवजवे, तस्माच्च
देवजवाच्च्युत्वा मनुष्यजवं, ततो मोक्षं यातीति चतुर्थे जवे मोक्षगमनं । उक्तं च–"तइयचउत्थे तम्मि व जवम्मि सिज्झं-
ति दंसणे खीणे । जं देवनिरइ असंखाउचरमदेहेसु ते होंति ॥ १ ॥ तथा क्षीणसप्तकः पूर्वबद्धायुष्कोऽपि यदि तदानीं
कालं न करोति, तर्हि कश्चिद्वैमानिकेष्वेव, बद्धायुष्कः चारित्रमोहनीयस्योपशमनार्थमभ्युद्यतते । अथाबद्धायुष्कस्ततः
सप्तकक्षयानन्तरं क्षपकश्रेणिमेव प्रतिपद्यते ॥ ३२ ॥

उपशमश्रेणिं प्रतिपत्तुकामस्यैव प्रकारान्तरमाह—

अहवा दंसणमोहं पुव्वं उवसामइत्तु सामन्ने । पढमठिइमावलियं करेइ दोण्हं अणुदियाणं ॥ ३३ ॥

अहव त्ति–अथवेति प्रकारान्तरे । इह यदि वेदकसम्यग्दृष्टिः सन् उपशमश्रेणिं प्रतिपद्यते । ततो नियमाद्दर्शनमो-
हनीयत्रितयं पूर्वमुपशमयति । तच्च श्रामण्ये स्थितः सन्नुपशमयति । तथा चाह—श्रामण्ये संयमे स्थितः सन् दर्शनमो-

हनीयत्रितयमुपशमय्य, उपशमनाविधिः सकलोऽपि प्रागिव करणत्रयानुगो वेदितव्यः । नवरमन्तरकरणं कुर्वन्ननुदितयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोः प्रथमां स्थितिमावलिकामात्रां करोति । सम्यक्त्वस्य चान्तर्मुहूर्तप्रमाणां । उत्कीर्यमाणं च दलिकमन्तरकरणसत्कं त्रयाणामपि सम्यक्त्वस्य प्रथमस्थितौ प्रक्षिपति। शेषं तथैव वक्तव्यं ॥ ३३ ॥

दर्शनत्रितयमुपशमय्य किं करोतीत्यत आह—

अद्धापरिवित्तीउ पमत्त इयरे सहस्ससो किच्चा। करणाणि तिन्नि कुणए तइयविसेसे इमे सुणसु ॥३४॥

अद्ध त्ति—अद्धापरिवृत्तीः संक्लेशविशोधिवशात् प्रमत्तभावे इतरस्मिंश्चाप्रमत्तभावे कालपरावृत्तीः सहस्रशः कृत्वा चारित्रमोहनीयोपशमनाय त्रीणि करणानि यथाप्रवृत्तादीनि करोति । तानि च प्रागिव वक्तव्यानि । केवलं तृतीयेऽनिवृत्तिकरणे इमान् वक्ष्यमाणान् विशेषान् शृणुत ॥ ३४ ॥

तानेवाह—

अंतोकोडाकोडी संतं अनियट्टिणो य उदहीणं । बंधो अंतोकोडी पुव्वकमा हाणि अप्पबहू ॥ ३५ ॥

अंतो त्ति—अनिवृत्तिकरणस्य प्रथमसमये आयुर्वर्जानां सप्तानां कर्मणां स्थितिसत्कर्म अन्तःसागरोपमकोटीकोटीप्रमाणं । बन्धः पुनरन्तःसागरोपमकोटीकोटीप्रमाणः । सोऽपि च पूर्वक्रमेण हानिं गच्छति । तद्यथा—स्थितिबन्धे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसंख्येयभागहीनं करोति । तस्मिन्नपि पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसंख्येयभागहीनं करोतीत्यादि । अल्पबहुत्वमपि पूर्वक्रमेणैव वेदितव्यं । तद्यथा—सर्वस्तोके नामगोत्रे, स्वस्थाने तु परस्परं तुल्ये । ततो

ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणि विशेषाधिकानि, स्वस्थाने तु परस्परं तुल्यानि । ततोऽपि चारित्रमोहनीयं विशेषाधिकं । एतच्चाल्पबहुत्वं सर्वकालमपि द्रष्टव्यं, यावदेतत्स्थानमिति ॥ ३५ ॥

ठिइकंडगमुक्कस्सं पि तस्स पल्लस्स संखतमज्ञागो । ठिइबंधबहुसहस्से सेक्केक्कं जं ज्ञणिस्सामो ॥३६॥

ठिइ त्ति–उत्कृष्टमपि स्थितिकण्डकं हन्यमानं तस्य चारित्रमोहनीयोपशमकस्यानिवृत्तिकरणे प्रविष्टस्य पल्योपमसंख्येयतमो ज्ञागः । जघन्यमपि तस्यैतावदेव । केवलं तल्लघुतरं द्रष्टव्यं । एतदुक्तं ज्ञवति–अनिवृत्तिकरणे प्रविष्टस्य स्थितिघात उत्कर्षतोऽपि पल्योपमसंख्येयतमज्ञागप्रमाण एव प्रवर्तते, नाधिकः । अनिवृत्तिकरणप्रथमसमये च तस्याप्रशस्तोपशमनाकरणनिधत्तिकरणनिकाचनाकरणानि व्यवच्छेदमायान्ति । स्थितिघातेषु सहस्रशो गतेषु सत्सु बध्यमानप्रकृतीनां बन्धः सागरोपमसहस्रपृथक्त्वप्रमाणो ज्ञवति । ततोऽनिवृत्तिकरणाद्धायाः संख्येयेषु ज्ञागेषु गतेषु सत्सु असंज्ञिपञ्चेन्द्रियबन्धतुल्यः स्थितिबन्धो ज्ञवति । तदनन्तरं स्थितिखण्डपृथक्त्वे गते सति चतुरिन्द्रियबन्धसमानः स्थितिबन्धः । ततो ज्ञूयोऽपि स्थितिखण्डपृथक्त्वे गते सति त्रीन्द्रियबन्धतुल्यः स्थितिबन्धः । तत एवमेव द्वीन्द्रियतुल्यः । ततोऽप्येवमेवैकेन्द्रियबन्धतुल्यः । इत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेषु सत्सु आयुर्वर्जानां सप्तानां कर्मणामेकैकं यद्भवति वक्तव्यं तद्भणिष्यामि ३६

तदेवाह—

पल्लदिवड्ढबिपल्लाणि जाव पल्लस्स संखगुणहाणी । मोहस्स जाव पल्लं संखेज्जइज्ञागहाऽमोहा ॥ ३७ ॥

तो नवरमसंखगुणा एक्कपहारेण तीसगाणमहो । मोहे वीसग हेट्ठा य तीसगाणुप्पि तइयं च ॥३८॥

तो तीसगाणमुप्पिं च वीसगाइं असंखगुणणाए। तईयं च वीसगाहि य विसेसमहियं कमेणेति ॥३ए॥

पल्लेत्यादि—पल्योपमसार्धपल्योपमद्विपल्योपमानि यावत् पूर्वक्रमेणैव हानिरल्पबहुत्वं च। इयमत्र भावना—एकेन्द्रियबन्धतु-
ल्यात् बन्धादनन्तरं स्थितिखंडसहस्रेषु गतेषु नामगोत्रयोः स्थितिबन्धः पल्योपममात्रः।ज्ञानावरणदर्शनावरणान्तरायवेदनी-
यानां सार्धपल्योपमप्रमाणः। मोहनीयस्य द्विपल्योपममानः । अमुं च पल्योपमसार्धपल्योपमादिकं स्थितिबन्धं यावत्
प्राक्तनः स्थितिबन्धः सर्वोऽपि पूर्वस्मात् पूर्वस्मात् पल्योपमस्य संख्येयतमेन भागेन हीनो हीनतरो वेदितव्यः। स्थितिसत्क-
र्मणोऽपि चाल्पबहुत्वं तथैव। 'पल्लस्स संखगुणहाणि त्ति' पल्यस्य पल्योपमस्याधः स्थितिबन्धः संख्येयगुणहान्या भवति-
एतदुक्तं भवति—यस्य कर्मणो यदा पल्योपमप्रमाणः स्थितिबन्धस्तस्य तदा तत्कालादारभ्यान्योऽन्यः स्थितिबन्धः संख्ये-
यगुणहीनो भवति। ततश्चेदानीं नामगोत्रयोः पल्योपमप्रमाणात् स्थितिबन्धात् अन्यं स्थितिबन्धं संख्येयगुणहीनं
करोति। शेषाणां तु कर्मणां पल्योपमसंख्येयभागहीनं। एवं कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु ज्ञानावरणदर्शनावर-
णवेदनीयान्तरायाणां पल्योपममात्रः स्थितिबन्धः मोहनीयस्य च सार्धपल्योपममात्रः । ततो ज्ञानावरणादीनामन्यः
स्थितिबन्धः संख्येयगुणहीनः, मोहनीयस्य तु संख्येयभागहीनः । तत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेषु मोहनीयस्य
स्थितिबन्धः पल्योपमप्रमाणो भवति। ततो मोहनीयस्यान्यः स्थितिबन्धः संख्येयगुणहीनः प्रवर्तते । तदानीं च शेष-
कर्मणां स्थितिबन्धः पल्योपमसंख्येयभागप्रमाणः । अत्राल्पबहुत्वं चिन्त्यते—नामगोत्रयोः स्थितिसत्कर्म सर्वस्तोकं ।
ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां संख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं। ततोऽपि मोहनीयस्य संख्येयगुणं।

'मोहस्स जाव पल्लं संखिज्जज्ञागह त्ति' यावन्मोहस्य मोहनीयस्य पल्योपममात्रः स्थितिबन्धो न भवति, तावत्प्राक्तनः सर्वोऽपि मोहनीयस्य स्थितिबन्धः पल्योपमसंख्येयतमेन भागेन हीनो हीनतरो वेदितव्यः । पल्योपममात्रे स्थितिबन्धे सत्यन्यं स्थितिबन्धं संख्येयगुणहीनं करोति । एतच्च प्रागेवोक्तं । अस्माच्च संख्येयगुणहीनात् मोहनीयस्य स्थितिबन्धात् प्रभूतेषु स्थितिबन्धेषु गतेषु सत्सु मोहनीयस्यापि स्थितिबन्धः पल्योपमस्य संख्येयभागमात्रो भवति । तदानीं च यद्भवति तदाह—'अमोहा तो नवरमसंखिज्जगुण त्ति' 'अमोह त्ति' मोहनीयवर्जयोर्नामगोत्रयोर्ग्रहणं । सर्वेषां कर्मणां पल्योपमसंख्येयभागमात्रे स्थितिबन्धे सति अमोहयोर्नामगोत्रयोरसंख्येयगुणहीनमन्यं स्थितिबन्धमारभते । शेषाणां तु संख्येयगुणहीनं । अत्र स्थितिसत्कर्मापेक्षयाऽल्पबहुत्वं चिन्त्यते—सर्वस्तोकं नामगोत्रयोः सत्कर्म । ततो ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततोऽपि मोहनीयस्य संख्येयगुणं । ततः स्थितिघातसहस्रेषु गतेषु सत्सु ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां स्थितिबन्धोऽसंख्येयगुणहीनो भवति । तदानीं च स्थितिसत्कर्मापेक्षयाऽल्पबहुत्वं चिन्त्यते—सर्वस्तोकं नामगोत्रयोः सत्कर्म । ज्ञानावरणीयादीनां चतुर्णामसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततो मोहनीयस्यासंख्येयगुणं । ततः स्थितिघातसहस्रेषु गतेषु सत्सु 'एक्कपहारेण तीसगाणमहो मोहे त्ति' एकप्रहारेणैकहेलयैव त्रिंशत्कानां त्रिंशत्सागरोपमकोटीकोटीस्थितिकानां ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामधस्तात् मोहनीयस्य स्थितिरसंख्येयगुणहीना भवति । नैवात्रान्यो विकल्पः कश्चित्करणीयः । इयमत्र भावना—पूर्वं मोहनीयस्य सत्कर्म ज्ञानावरणीयादीनामुपरिष्टादसंख्येयगुणमासीत्, संप्रति पुनरेकहेलयैव तेषामधस्तादसंख्येयगुणहीनं जातमिति । अत्राल्पब-

हुत्वमुच्यते–सर्वस्तोकं नामगोत्रयोः सत्कर्म । ततो मोहनीयस्यासंख्येयगुणं । ततोऽपि ज्ञानावरणीयादीनां चतुर्णामसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु 'वीसग हेट्ठा य' मोहनीयस्य स्थितिबन्ध एकहेलयैव विंशतिकयोर्विंशतिसागरोपमकोटीकोटीस्थितिकयोर्नामगोत्रयोरधस्तादसंख्येयगुणहीनो जातः । अत्र स्थितिबन्धमाश्रित्याल्पबहुत्वं चिन्त्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो नामगोत्रयोरसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततो ज्ञानावरणीयादीना चतुर्णामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततः कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु 'तीसगाणुप्पि तइयं च' तृतीयं वेदनीयं स्थितिसत्कर्माधिकृत्य त्रिंशत्सागरोपमकोटीकोटिस्थितिकानां ज्ञानावरणदर्शनावरणान्तरायाणामुपरि जातं । एतदुक्तं भवति–मोहनीयनामगोत्राणि स्थितिसत्कर्माधिकृत्य प्राक् त्रिंशत्कानामधस्ताज्जातानि, संप्रति पुनस्त्रिंशत्कानामपि मध्ये ज्ञानावरणदर्शनावरणान्तरायाणि वेदनीयस्याधस्ताज्जातानि । वेदनीयं तु सर्वोपरि जातं । तदनन्तरं च तस्य वेदनीयस्यान्यः स्थितिबन्धः सर्वेभ्योऽप्यसंख्येयगुणो जायते । स्थितिबन्धमेवाश्रित्याल्पबहुत्वमुच्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो नामगोत्रयोरसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततोऽपि ज्ञानावरणदर्शनावरणान्तरायाणामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः, ततोऽपि वेदनीयस्यासंख्येयगुणः । ततोऽनेनैव विधिना स्थितिबन्धसहस्रेषु गतेषु सत्सु ॥ ततस्त्रिंशत्कानां त्रिंशत्सागरोपमकोटीकोटीस्थितिकाना ज्ञानावरणदर्शनावरणान्तरायाणा स्थितिबन्धमधिकृत्योपरिविंशतिके नामगोत्रे जाते । अत्राल्पबहुत्वं–सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो ज्ञानावरणदर्शनावरणान्तरायाणामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः ।

ततोऽपि वेदनीयस्य विशेषाधिकः । 'असंखगुणणा ए त्ति' यत्र मोहनीयं ज्ञानावरणादिभ्योऽसंख्येयगुणहीनं जातं, ततःप्रभृति सर्वत्राप्यसंख्येयगुणहीनमेव क्रमेणेति आगच्छति । तथा तृतीयं च वेदनीयं विंशतिकाभ्यां विंशतिसागरोपमकोटीकोटीप्रमाणस्थितिकाभ्यां नामगोत्राभ्यां विशेषाधिकं संजातं सत् सर्वत्रापि विशेषाधिकमेव क्रमेणेति अनुवर्तते ॥ ३७ ॥ ३८ ॥ ३९ ॥

अहुदीरणा असंखेज्जसमयबद्धाण देसघाइ त्थ । दाणंतराय मणपज्जावं च तो ओहिदुगलाभो ॥ ४० ॥
सुयभोगाचक्खूओ चक्खू य ततो मई सपरिभोगा । विरियं च असेढिगया बंधंति उ सव्वघाईणि ॥४१॥

अहेत्यादि–अथशब्दोऽधिकारान्तरसूचकः । यस्मिन् काले सर्वकर्मणां पल्योपमासंख्येयभागमात्रः स्थितिबन्धस्तस्मिन् कालेऽसंख्येयसमयबद्धानामेव कर्मणामुदीरणा प्रवर्तते । कथमेतदवसीयत इति चेदुच्यते–इह यदा पल्योपमस्य संख्येयभागमात्रं स्थितिबन्धं करोति, तदा वध्यमानप्रकृतिस्थित्यपेक्षया याः पूर्वबद्धाः समयादिहीनाः स्थितयस्ता एवोदीरणामुपगच्छन्ति, नान्याः । ताश्च चिरकालबद्धा एव क्षीणशेषाः संभवन्तीत्यसंख्येयसमयबद्धानां तदानीमुदीरणा । 'देसघाइ त्थ' इत्यादि ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु अत्र अस्मिन् प्रस्तावे दानान्तरायं (मनःपर्यवज्ञानावरणं च देशघाति दानान्तराय) मनःपर्यायज्ञानावरणयोरनुभागबन्धं देशघातिनं करोतीत्यर्थः । ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु अवधिज्ञानावरणावधिदर्शनावरणलाभान्तरायाणामनुभागं देशघातिनं बध्नाति । ततोऽपि संख्येयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु श्रुतज्ञानावरणाचक्षुर्दर्शनावरणभोगान्तरायाणामनुभागं देशघातिनं बध्नाति । ततः संख्येयेषु स्थिति-

बन्धसहस्रेषु गतेषु सत्सु चक्षुर्दर्शनावरणीयस्यानुभागं देशघातिनं बध्नाति । ततोऽपि संख्येयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु मतेर्मतिज्ञानावरणीयस्य सपरिभोगान्तरायस्यानुभागं देशघातिनं बध्नाति । ततः पुनरपि स्थितिबन्धसहस्रेषु गतेषु सत्सु वीर्यान्तरायानुभागं देशघातिनं बध्नाति । 'असेढिगया' इत्यादि अश्रेणिगताः क्षपकश्रेणिरहिता उपशमश्रेणिरहिता वा बन्धकाः पूर्वोक्तान्यपि कर्माणि सर्वघातीनि बध्नन्ति, पूर्वोक्तप्रकृतीनामनुभागं सर्वघातिनं बध्नन्तीत्यर्थः ॥४०-४१॥

संजमघाईणंतरमेत्थ उ पढमठिइ य अन्नयरो । संजलणावेयाणं वेइज्जंतीण कालसमा ॥ ४२ ॥

संजमघाईणं ति–वीर्यान्तरायदेशघात्यनुभागबन्धानन्तरं संख्येयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु संयमघातिनां कर्मणामनन्तानुबन्धिवर्जानां द्वादशानां कषायाणां नवानां च नोकषायाणां सर्वसंख्यया एकविंशतिप्रकृतीनामन्तरकरणं करोति । तत्र च चतुर्णां संज्वलनानामन्यतमस्य वेद्यमानस्य संज्वलनस्य त्रयाणां च वेदानामन्यतमस्य वेदस्य वेद्यमानस्य प्रथमा स्थितिः स्वोदयकालप्रमाणा । अन्येषां चैकादशकषायाणां अष्टानां च नोकषायाणां प्रथमस्थितिरावलिकामात्रा । स्वोदयकालप्रमाणं च चतुर्णां संज्वलनानां त्रयाणां च वेदानामिदं—स्त्रीवेदनपुंसकवेदयोरुदयकालः सर्वस्तोकः, स्वस्थाने तु परस्परं तुल्यः । ततः पुरुषवेदस्य संख्येयगुणः । ततोऽपि संज्वलनक्रोधस्य विशेषाधिकः । ततोऽपि संज्वलनमानस्य विशेषाधिकः । ततोऽपि संज्वलनमायाया विशेषाधिकः । ततोऽपि संज्वलनलोभस्य विशेषाधिकः । उक्तं च—

"थीअपुमोदयकाला संखेज्जगुणा उ पुरिसवेदस्स । तस्स वि विसेसअहिओ कोहे तत्तो वि जहकमसो ॥ १ ॥" तत्र संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणक्रोधोपशमो न भवति, तावत्संज्वलनक्रोधस्यो-

दयः । संज्वलनमानेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमानोपशमो न भवति, तावत्संज्वलनमानस्योदयः । मायया चोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमायोपशमो न भवति, तावत्संज्वलनमायाया उदयः । संज्वलनलोभेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणलोभोपशमो न भवति, तावद्बादरसंज्वलनलोभस्योदयः । ततः परं सूक्ष्मसंपरायाद्धा । तदेवमन्तरकरणमुपरितनभागापेक्षया समस्थितिकं, अधोभागापेक्षया चोक्तनीत्या विषमस्थितिकमिति । यावता च कालेन स्थितिखंडं घातयति, यद्वाऽन्यं स्थितिबन्धं करोति, तावता कालेनान्तरकरणमपि करोति, त्रीण्यपि युगपदारभते युगपदेव च निष्ठां नयति । तच्चान्तरं प्रथमस्थितेः संख्येयगुणं । अन्तरकरणसत्कदलिकप्रक्षेपविधिश्चायं—येषां कर्मणां तदानीं बन्ध उदयश्च विद्यते तेषामन्तरकरणसत्कं दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति । यथा पुरुषवेदोदयारूढः पुरुषवेदस्य । येषां तु कर्मणामुदय एव केवलो—न बन्धस्तेषामन्तरकरणसत्कं दलिकं प्रथमस्थितावेव प्रक्षिपति, न द्वितीयस्थितावपि, यथा स्त्रीवेदोदयारूढः स्त्रीवेदस्य । येषां पुनरुदयो न विद्यते, किं तु केवलो बन्धः, तेषामन्तरकरणसत्कं दलिकं द्वितीयस्थितावेव प्रक्षिपति, न प्रथमस्थितौ, यथा संज्वलनक्रोधोदयारूढः शेषसंज्वलनानां । येषां पुनर्न बन्धो नाप्युदयः तेषामन्तरकरणसत्कं दलिकं परप्रकृतिषु प्रक्षिपति, यथा द्वितीयतृतीयकषायाणां । 'अन्नयरे' इति आर्षत्वात् पुंस्त्वनिर्देश एकवचनं च । ततोऽयमर्थः—संज्वलनवेदानामन्यतरयोर्वेद्यमानयोः प्रकृत्योः प्रथमा स्थितिः कालसमा उदयकालसमा ॥ ४२ ॥

उसमयकयंतरे आवलिगाण ठप्हं उदीरणाभिनवे । मोहे एक्कठाणे वंधुदया संखवासाणि ॥ ४३ ॥

संखगुणहाणिबंधो एत्तो सेसाण संखगुणहाणी । पढमसमए नपुंसं असंखगुणणाएँ जावंतो ॥ ४४ ॥

दुसमयेत्यादि—'दुसमयकयंतरे' इति अन्तरकरणे कृते सति द्वितीये समये इमे सप्ताधिकारा युगपत्प्रवर्तन्ते, तद्यथा—पुरुषवेदसंज्वलनानामानुपूर्व्येव संक्रमः, संज्वलनलोभस्य च संक्रमाभावः । तथाऽन्तरकरणे कृते सति अनन्तरादिषु समयेषु याः प्रकृतयो मोहनीयसत्का अमोहनीयसत्का वा बध्यन्ते तासां षण्णामावलिकानां मध्ये उदीरणा न भवति किं तु षट्स्वावलिकास्वतिक्रान्तासु । तथा मोहे मोहनीये रसबन्ध एकस्थानकः । तथा मोहनीयस्य संख्येयवार्षिकः स्थितिबन्धः संख्येयवार्षिकश्च उदीरणोदयः । संख्येयवार्षिकात् स्थितिबन्धात् परतोऽन्योऽन्यः स्थितिबन्धः सर्वोऽपि पूर्वस्मात् पूर्वस्मात् संख्येयगुणहीनो भावी, शेषाणां तु कर्मणामसंख्येयगुणहीनः । तथा 'पढमसमए नपुंसं त्ति' अन्तरकरणे कृते सति द्वितीये समये नपुंसकवेदं प्रोपशमयति उपशमयितुमारभते असंख्येयगुणतया, तं च तावद्यावदन्तश्चरमसमयः । तथाहि—नपुंसकवेदस्य प्रथमसमये स्तोकं प्रदेशाग्रमुपशमयति । ततो द्वितीयसमयेऽसंख्येयगुणं । तृतीयसमयेऽसंख्येयगुणं । एवं प्रतिसमयमसंख्येयगुणं तावद्वक्तव्यं यावच्चरमसमयः, परप्रकृतिषु च प्रतिसमयमुपशमितदलिकापेक्षयाऽसंख्येयगुणं तावत्संक्रमयति यावद्द्विचरमसमयः । चरमसमये पुनरुपशम्यमानं दलिकं परप्रकृतिषु संक्रम्यमाणदलिकापेक्षयाऽसंख्येयगुणं द्रष्टव्यं । नपुसकवेदोपशमनारंभप्रथमसमयादारभ्य च सर्वकर्मणामुदीरणा दलिकापेक्षया स्तोका, उदयस्त्वसंख्येयगुणः । नपुंसकवेदे चोपशान्ते स्त्रीवेदं पूर्वोक्तेनैव विधिनोपशमयितुमारभते ॥ ४३-४४ ॥

एविठी संखतमे गयम्मि घाईण संखवासाणि । संखगुणहाणि एत्तो देसावरणाणुदगराई ॥ ४५ ॥

एविडि त्ति–एवं पूर्वोक्तेन प्रकारेण स्त्रीवेदस्योपशम्यमानस्योपशमनाद्धायाः संख्येयतमे जागे गते सति घातिकर्मणां ज्ञानावरणदर्शनावरणान्तरायाणां संख्येयानि वर्षाणि संख्येयवर्षप्रमाणः स्थितिवन्धो जवति । ञ्तश्च संख्येयवर्षप्रमाणात् स्थितिवन्धात् अन्योऽन्यः स्थितिवन्धो घातिकर्मणां पूर्वस्मात् पूर्वस्मात् संख्येयगुणहीनो जवति । अस्मादेव च संख्येयवर्षप्रमाणात् स्थितिवन्धादारज्य देशघातिना केवलज्ञानावरणकेवलदर्शनावरणवर्जाना ज्ञानावरणदर्शनावरणाना उदकराजिं उदकराजिसमानं रसं वध्नाति एकस्थानकं रसं वध्नातीत्यर्थः । तत एवं स्थितिवन्धसहस्रेषु गतेषु सत्सु स्त्रीवेद उपशान्तो जवति ॥ ४५ ॥

ता सत्तएहं एवं संखतमे संखवासितो दोएहं । विइयो पुण ठिइवंधो सव्वेसिं संखवासाणि ॥ ४६ ॥

तो त्ति–स्त्रीवेदे उपशान्ते ततः शेषान् सप्त नोकषायान् उपशमयितुमारजते । तेषां चैवं पूर्वोक्तेन प्रकारेणोपशम्यमानानामुपशमनाद्धायाः संख्येयतमे जागे गते सति द्वयोर्नामगोत्रयोः संख्येयवार्षिकः स्थितिवन्धो जवति । वेदनीयस्य पुनरसंख्येयवार्षिक एव । तस्मिंश्च स्थितिवन्धे पूर्णे सति अन्यो द्वितीयस्थितिवन्धो वेदनीयस्यापि संख्येयवार्षिको जवति। तथा च सति सर्वेषामपि कर्मणा ततः प्रजृति संख्येयवार्षिक एव स्थितिवन्धः। पूर्वस्माच्च पूर्वस्माच्चान्योऽन्यः स्थितिवन्धः प्रवर्तमानः संख्येयगुणहीनः प्रवर्तते। ततः स्थितिवन्धसहस्रेषु गतेषु सत्सु सप्तापि नोकषाया उपशान्ता जवन्ति ॥४६॥ नवरं

छसुवसमिज्जमाणे सेक्का उदयठिई पुरिससेसा । समऊणावलिगडुगे वद्धा वि य तावदद्धाए ॥ ४७ ॥

छसु त्ति–षट्सु नोकषायेषु उपशम्यमानेषु यस्मिन् समये षट् नोकषाया उपशान्तास्तस्मिन् समये पुरुषवेदस्य प्रथम-

स्थितौ शेषा एकैवोदयस्थितिः समयमात्रावतिष्ठते। तदानीं च पुरुषवेदस्य स्थितिबन्धः षोडश वर्षाणि भवति। संज्वलनानां पुनः संख्येयानि वर्षसहस्राणि। तथा पुरुषवेदस्य प्रथमस्थितौ द्व्यावलिकाशेषायां प्रागुक्तस्वरूप आगालो व्यवच्छिद्यते, उदीरणा तु भवति। तस्मादेव च समयादारभ्य षण्णां नोकषायाणां सत्कं दलिकं पुरुषवेदे न संक्रमयति, किंतु संज्वलनेषु। यदा च प्रागुक्ता पुरुषवेदस्य सत्का एकाप्युदयस्थितिरतिक्रान्ता तदाऽसाववेदको भवति। अवेदकाद्धायाश्च प्रथमसमये समयद्वयोनावलिकाद्विकेन कालेन यद्बद्धं तदेव केवलमनुपशान्तं तिष्ठति। शेषं पुनः सकलमपि नपुंसकवेदोक्तप्रकारेणोपशान्तं। तदपि च समयोनावलिकाद्विकमात्रबद्धं तावदद्धया तावता कालेन समयद्वयोनावलिकाद्विकप्रमाणेन कालेनेत्यर्थः। उपशमयति। तदुपशमनाविधिश्चायम्—प्रथमसमये स्तोकमुपशमयति। द्वितीयसमयेऽसंख्येयगुणं। तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वाच्यं यावत्समयोनावलिकाद्विकचरमसमयः। परप्रकृतिषु च प्रतिसमयं समयोनावलिकाद्विककालं यावद्यथाप्रवृत्तसंक्रमेण संक्रमयति। परं प्रथमसमये प्रभूतं। द्वितीयसमये विशेषहीनं। तृतीयसमये विशेषहीनं। एवं तावद्यावच्चरमसमयः। ततः पुरुषवेद उपशान्तः। तदानीं च संज्वलनानां द्वात्रिंशद्वर्षप्रमाणोऽन्तर्मुहूर्तोनः स्थितिबन्धो भवति। शेषाणां च ज्ञानावरणदर्शनावरणान्तरायाणां संख्येयानि वर्षसहस्राणि ॥४१॥

तिविहमवेओ कोहं कमेण सेसे वि तिविह तिविहे वि। पुरिससमा संजलणा पढमठिई आलिगा अहिगा

तिविहमवेओ त्ति—यस्मिन् समये पुरुषवेदस्यावेदको जातस्तस्मादेव समयादारभ्याप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधान् युगपदुपशमयितुमारभते। उपशमना च कुर्वतः प्रथमस्थितिबन्धे पूर्णे सत्यन्यः स्थितिबन्धः संज्वलनाना

संख्येयभागहीनो भवति, शेषाणां च संख्येयगुणहीनः । शेषं स्थितिघातादि तथैव । संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां अप्रत्याख्यानप्रत्याख्यानावरणक्रोधदलिकं न संज्वलनक्रोधे प्रक्षिपति, किंतु संज्वलनमानादौ । द्व्यावलिकाशेषायां त्वागालो न भवति, किंतूदीरणैव । साप्युदीरणा तावत्प्रवर्तते यावदावलिका शेषा भवति । उदीरणावलिकायाश्च चरमसमये संज्वलनानां स्थितिबन्धश्चत्वारो मासाः । शेषकर्मणां तु संख्येयानि वर्षसहस्राणि । संज्वलनक्रोधस्य च बन्धोदयोदीरणाव्यवच्छेदः । अप्रत्याख्यानप्रत्याख्यानावरणौ च क्रोधावुपशान्तौ । तदानीमेकामावलिकां समयोनावलिकाद्विकबद्धं च दलिकं मुक्त्वा शेषमन्यत्सर्वं संज्वलनक्रोधस्योपशान्तं, सापि चैका प्रथमस्थितिसत्का चरमावलिका स्तिबुकसंक्रमेण माने प्रक्षिप्यते । समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति संक्रमयति च । अनेनैव क्रमेण शेषानपि कषायान् त्रिविधान् त्रिप्रकारान् मानमायालोभरूपान् । पुनः कथंभूतानित्याह—त्रिविधान् प्रत्येकं त्रिप्रकारान् । तथाहि—अप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनभेदात् त्रिविधो मानः । एवं मायालोभावपि, तान् उपशमयति । तत्र संज्वलनोपशमना पुरुषवेदसमाऽवसेया । अप्रत्याख्यानप्रत्याख्यानावरणमानादीनां चोपशमना षड्नोकषायसमा । नवरं 'पढमठिई आलिगा अहिग त्ति' संज्वलनानां प्रथमस्थितौ पुरुषवेदापेक्षया एका आवलिकाधिका । तथाहि—षट्सु नोकषायेषूपशान्तेषु पुरुषवेदस्य प्रथमा स्थितिरेका समयमात्रा स्थितिरनुपशान्ता आसीत् । अप्रत्याख्यानप्रत्याख्यानावरणमानादिषु पुनरुपशान्तेषु संज्वलनमानादीनामनुपशान्ता प्रथमस्थितेरेकावलिकेति । इदं चातिसंक्षिप्तमुक्तमिति विशेषतो भाव्यते—यदा संज्वलनक्रोधस्य बन्धोदयोदीरणा व्यवच्छिन्नाः । तदैव संज्वलनमानस्य

द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च। तत्रोदयसमये स्तोकं प्रक्षिपति। द्वितीयस्थितावसंख्येयगुणं। तृतीयस्थितावसंख्येयगुणं। एवं तावद्यावत्प्रथमस्थितेश्चरमसमयः। प्रथमस्थितिप्रथमसमये एव संज्वलनमानस्य स्थितिबन्धश्चत्वारो मासाः। शेषाणां तु ज्ञानावरणीयादीनां संख्येयानि वर्षसहस्राणि। तदानीमेव च त्रीनपि मानान् युगपदुपशमयितुमारभते। संज्वलनमानस्य च प्रथमस्थितौ समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमानदलिकं न संज्वलनमाने प्रक्षिपति, किंतु संज्वलनमायादौ। आवलिकाद्विकशेषायां त्वागालो व्यवच्छिद्यते। तत उदीरणैव केवला प्रवर्तते। सापि तावद्यावदावलिकाचरमसमयः। तत एका प्रथमस्थितेरावलिका शेषीभूता तिष्ठति। तस्मिंश्च समये संज्वलनानां द्वौ मासौ स्थितिबन्धः। शेषकर्मणां तु संख्येयानि वर्षाणि। तदानीं च संज्वलनमानस्य बन्धोदयोदीरणा व्यवच्छिन्नाः। अप्रत्याख्यानप्रत्याख्यानावरणमानौ चोपशान्तौ। संज्वलनमानस्यापि च प्रथमस्थितेरेकामावलिकां समयोनावलिकाद्विकबद्धाश्च लता मुक्त्वा शेषमन्यत्सर्वमुपशान्तं। तदानीमेव संज्वलनमायाद्वितीयस्थितेर्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च। पूर्वोक्तां च संज्वलनमानस्य प्रथमस्थितिसत्कामेकामावलिकां स्तिबुकसंक्रमेणास्यां संज्वलनमायायां प्रक्षिपति। समयोनावलिकाद्विकबद्धाश्च लताः पुरुषवेदक्रमेणोपशमयति संक्रमयति च। संज्वलनमायोदयप्रथमसमये च मायालोभयोर्द्वौ मासौ स्थितिबन्धः। शेषकर्मणां संख्येयानि वर्षाणि। तत्समयादेव चारभ्य तिस्रोऽपि माया युगपदुपशमयितुमारभते। ततः संज्वलनमायायाः प्रथमस्थितावावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमायादलिकं संज्वलनमायायां न प्रक्षिपति, किंतु संज्वलनलोभे। आवलिकाद्विकशेषायां त्वागालो

व्यवच्छिद्यते । तत उदीरणैव केवला प्रवर्तते । सापि तावद्यावदावलिकाचरमसमयः । तस्मिंश्च समये संज्वलनमायालोभयोः स्थितिबन्ध एको मासः । शेपकर्मणां तु संख्येयानि वर्षाणि । ततोऽनन्तरसमये संज्वलनमायायां बन्धोदयोदीरणा व्यवच्छिन्नाः । अप्रत्याख्यानप्रत्याख्यानावरणमाये चोपशान्ते । संज्वलनमायायाश्च प्रथमस्थितिसत्कामेकामावलिकां समयोनावलिकाद्विकबद्धाश्च लता मुक्त्वा शेपमन्यत् सर्वमुपशान्तं । तदानीमेव च संज्वलनलोभस्य द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थिति करोति वेदयते च । पूर्वोक्तां च मायायाः प्रथमस्थितिसत्कामेकामावलिकां स्तिवुकसंक्रमेण सज्वलनलोभे सक्रमयति । समयोनावलिकाद्विकबद्धाश्च लताः पुरुपवेदक्रमेणोपशमयति संक्रमयति च ॥ ४८ ॥

संज्वलनलोभस्य प्रथमस्थितेः प्रमाणनिरूपणार्थमाह—

लोभस्स वेतिभागा बिइय तिभागोड किट्टकरणद्धा । एगफड्डुगवग्गणअणंतभागो उ ता हेट्ठा ॥४९॥

लोभस्स त्ति–संज्वलनलोभस्य प्रथमस्थितेस्त्रयो भागाः । तत्र प्रथमतो द्वौ त्रिभागौ प्रथमस्थितिं करोति द्वयोस्त्रिभागयोर्द्वितीयस्थितेः समाकृष्य दलिकं निक्षिपतीत्यर्थः । तत्र प्रथमस्त्रिभागोऽश्वकर्णकरणाद्धासंज्ञः, द्वितीयः किट्टिकरणाद्धासंज्ञः । संज्वलनलोभोदयप्रथमसमय एव च त्रीनपि लोभान् अप्रत्याख्यानादीन् युगपदुपशमयितुमारभते । उपशमनाविधिः प्राग्वत् । तत्राश्वकर्णकरणाद्धासंज्ञे प्रथमे त्रिभागे वर्तमानः पूर्वस्पर्धकेभ्यः प्रतिसमयं दलिकं गृहीत्वा तस्यात्यन्तहीनरसतामापाद्यापूर्वाणि स्पर्धकानि करोति । आसंसारं हि परिभ्रमता न कदाचनापि बन्धमाश्रित्यैदृशानि स्पर्धकानि कृतानि, किंतु संप्रत्येव विशुद्धिप्रकर्षवशात् करोतीत्यपूर्वाण्युच्यन्ते । तत एवमपूर्वस्पर्धकानि कुर्वतः संख्येयेपु

स्थितिबन्धेषु गतेषु सत्सु अश्वकर्णकरणाद्धा व्यतिक्रामति । ततः किट्टिकरणाद्धायां प्रविशति । तदानीं च सञ्ज्वलनलोभस्य स्थितिबन्धो दिनपृथक्त्वप्रमाणः । शेषकर्मणां तु वर्षपृथक्त्वमानः । किट्टिकरणाद्धाया च पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्च दलिकं गृहीत्वा प्रतिसमयमनन्ताः किट्टीः करोति । किट्टयो नाम पूर्वस्पर्धकापूर्वस्पर्धकेभ्यो वर्गणा गृहीत्वा तासामनन्तगुणहीनरसतामापाद्य बृहदन्तरालतया यद्व्यवस्थापन । यथा यासामेवासत्कल्पनयाऽनुभागभागानां शतमेकोत्तर द्व्युत्तरं चासीत् । तासामेवानुभागभागाना पञ्चकं पञ्चदशकं पञ्चविंशतिरिति । संप्रति एतासामेव किट्टीनां विशेषप्ररूपणार्थमाह—'एगफड्डगेत्यादि' ताः किट्टीः एकस्मिन् अनुभागस्पर्धके या अनन्तवर्गणास्तासामनन्ततमे भागे यावत्यो वर्गणास्तावत्प्रमाणाः प्रथमसमये करोति । ताश्चानन्ताः । ननु ताः किं सर्वजघन्यानुभागस्पर्धकानुभागेन सदृशाः करोति, उत ततोऽपि हीनाः? उच्यते—ततोऽपि हीनाः, तथा चाह—'हेट्ठा' यत्सर्वजघन्यमनुभागस्पर्धकं तस्याधस्तात् करोति ततोऽप्यनन्तगुणहीनरसाः करोतीत्यर्थः ॥ ४९ ॥

अणुसमयं सेढीए असंखगुणहाणि जा अपुव्वाओ । तव्विवरीयं दलियं जहन्नगाई विसेसूणं ॥ ५० ॥

अणुसमयं ति—या अपूर्वाः प्रतिसमयं नवा नवाः किट्टीः करोति ताः प्रतिसमयं गणनातोऽसंख्येयगुणहानेः श्रेण्या द्रष्टव्याः । नवतरं च प्रतिसमयं यथोत्तरमनन्तगुणहीनरसत्वादवसेयं । इयमत्र भावना—प्रथमसमये प्रभूताः किट्टीः करोति । द्वितीयसमयेऽसंख्येयगुणहीनाः । ततोऽपि तृतीयसमयेऽसंख्येयगुणहीनाः । एवं तावद्वाच्यं यावत् किट्टीकरणाद्धायाश्चरमसमयः । 'तव्विवरीयं दलियं ति' दलिकं तद्विपरीतं किट्टिसंख्याविपरीतमवगन्तव्यं । तद्यथा—प्रथमसमये

सकलकिट्टिगतं दलिकं सर्वस्तोकं । ततो द्वितीयसमये सकलकिट्टिगतं दलिकमसंख्येयगुणं । ततोऽपि तृतीयसमये समस्तकिट्टिगतं दलिकमसंख्येयगुणं । एवं तावद्वाच्यं यावत् किट्टिकरणाद्धायाश्चरमसमयः । तथा प्रथमसमयकृतासु किट्टिषु सामान्येनानुभागः सर्वप्रभूतः । ततो द्वितीयसमयकृतासु किट्टिष्वनन्तगुणः । ततोऽपि तृतीयसमयकृतासु अनन्तगुणः । एवं तावद्वाच्यं यावत् किट्टिकरणाद्धाचरमसमयः । संप्रति प्रथमसमये कृतानां किट्टीनां परस्परं प्रदेशप्रमाणनिरूपणार्थमाह—'जहन्नगाई विसेसूणं ति' जघन्या किट्टिमादिं कृत्वा परतः क्रमेण प्रतिकिट्टि विशेपोनं विशेपोनं प्रदेशाग्रमभिधानीयं । इयमत्र भावना—प्रथमसमयकृतासु किट्टिषु मध्ये या सर्वमन्दानुभागा किट्टी तस्याः प्रदेशाग्रं सर्वप्रभूतं । ततोऽनन्तरेणानन्तगुणेनानुभागेनाधिकायां द्वितीयकिट्टौ प्रदेशाग्रं विशेपहीनं । ततोऽप्यनन्तरेणानुभागेनाधिकायां तृतीयकिट्टौ विशेपहीनं । एवमनन्तरानन्तरानुभागाधिकासु किट्टिषु विशेपहीनं विशेपहीनं तावद्वक्तव्यं यावत्प्रथमसमयकृतानां किट्टीनां मध्ये सर्वोत्कृष्टा किट्टिरिति । एवं सर्वेष्वपि समयेषु प्रत्येकं भावनीयम् ॥ ५० ॥

अणुभागो णंतगुणो चाउम्मासाइ संखभागूणो । मोहे दिवसपुहुत्तं किट्टीकरणाइसमयम्मि ॥ ५१ ॥

अणुभागो त्ति–प्रथमसमयकृताना किट्टीनामनुभागो यथोत्तरमनन्तगुणो वाच्यः । तद्यथा—प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टी सा सर्वस्तोकानुभागा । ततो द्वितीयाऽनन्तगुणानुभागा । ततोऽपि तृतीयाऽनन्तगुणानुभागा । एवं तावद्वाच्यं यावत्प्रथमसमयकृतानां किट्टीना मध्ये सर्वोत्कृष्टानुभागा किट्टिरिति । एवं द्वितीयादिष्वपि समयेषु किट्टीनां प्ररूपणा कर्तव्या । संप्रत्यासामेव किट्टीनां परस्परमल्पबहुत्वमुच्यते–प्रथमसमयकृतानां

किट्टीनां मध्ये या सर्वबहुप्रदेशा किट्टी सा स्तोकप्रदेशा । ततो द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वाल्पप्रदेशा किट्टी साऽसंख्येयगुणप्रदेशा । ततोऽपि तृतीयसमयकृतानां किट्टीनां मध्ये या सर्वाल्पप्रदेशा साऽसंख्येयगुणप्रदेशा । एवं तावद्वक्तव्यं यावच्चरमसमयः । तथा प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टी सा सर्वप्रभूतानुभागा । ततो द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वोत्कृष्टानुभागा किट्टी साऽनन्तगुणहीना । ततोऽपि तृतीयसमयकृताना किट्टीना मध्ये सर्वोत्कृष्टानुभागाऽनन्तगुणहीना । एवं तावद्वक्तव्यं यावच्चरमसमयः । 'चाउम्मासेत्यादि मोहे मोहनीये संज्वलनानां चातुर्मासिकात् स्थितिबन्धादारभ्यान्योऽन्यः स्थितिबन्धः संख्येयेन भागेनोन ऊनतरस्तावद्वक्तव्यो यावत् किट्टिकरणाद्धायाः प्रथमसमये दिवसपृथक्त्वप्रमाणः स्थितिबन्धो भवति । स च प्रायस्तथैवोक्तः ॥५१॥

भिन्नमुहुत्तो संखिज्जेसु य घाइणि दिणपुहुत्तं ता । वाससहस्सपुहुत्तं अंतोदिवसस्स अंते सिं ॥५२॥

वाससहस्सपुहुत्ता विवस्स अंतो अघाइकम्माणं । लोभस्स अणुवसंतं किट्टीउ जं च पुवुत्तं ॥ ५३ ॥

भिन्नमुहुत्तो त्ति–अत्रेति षष्ठीसप्तम्योरर्थं प्रत्यभेदात् अस्या इति द्रष्टव्यं । ततश्चास्याः किट्टिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु संज्वलनलोभस्य स्थितिबन्धो भिन्नमुहूर्तोऽन्तर्मुहूर्तप्रमाणो भवति । त्रयाणा च घातिकर्मणां दिनपृथक्त्वं दिनपृथक्त्वमानः, नामगोत्रवेदनीयानां वर्षसहस्रपृथक्त्वं प्रभूतवर्षसहस्रप्रमाणः । पृथक्त्वशब्दोऽत्र बहुत्ववाची । तथा किट्टिकरणाद्धाया अन्ते चरमसमये संज्वलनलोभस्य स्थितिबन्धोऽन्तर्मुहूर्तप्रमाणः । केवलमिदमन्तर्मुहूर्तं स्तोकतरमवसेयं । तथा 'सिं ति' तेषां घातिकर्मणामन्तर्दिवसस्याहोरात्रस्य स्थितिबन्धः । अघातिनां पुनर्नामगोत्रवेदनीयानां

वर्षसहस्रपृथक्त्वात् वर्षसहस्रपृथक्त्वप्रमाणात् स्थितिबन्धात् अन्यो हीनो हीनतरः स्थितिबन्धो भवन् तस्मिन् किट्टिकरणाद्धाचरमसमये-द्विवर्षस्य द्वयोर्वर्षयोरन्तर्मध्ये भवति। तथा किट्टिकरणाद्धायां समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणलोभदलिकं संज्वलनलोभे न सङ्क्रमयति। किंतु स्वस्थान एव स्थितमुपशमं नीयते। द्व्यावलिकाशेषायां पुनः किट्टिकरणाद्धायां बादरसंज्वलनलोभस्यागालो न भवति, किं तूदीरणैव। सापि तावद्यावदावलिका। तस्याश्च उदीरणावलिकायाश्चरमसमये यत् किट्टीकृतं द्वितीयस्थितिगतं, यच्च पूर्वोक्तं समयोनावलिकाद्विकबद्धमित्यर्थः, या चैकावलिका किट्टिकरणाद्धायाः शेषीभूता, एतत्सर्वं लोभस्य संज्वलनलोभस्यानुपशान्तं वर्तते, शेषं पुनरुपशान्तं। तथा तस्मिन्नेव समये द्वावप्यप्रत्याख्यानप्रत्याख्यानावरणलोभावुपशान्तौ। संज्वलनलोभबन्धव्यवच्छेदो बादरसंज्वलनलोभोदयोदीरणाव्यवच्छेदश्च। एष एव चानिवृत्तिबादरसंपरायगुणस्थानकचरमसमयः ॥ ५२–५३ ॥

सेसद्ध तणुरागो तावईया किट्टिउ य पढमठिई। वज्जिय असंखभागं हेट्ठुवरिमुदीरई सेसा ॥ ५४ ॥

सेसद्ध त्ति–शेषाद्ध शेषकालं तृतीये विभागे इत्यर्थः। सूक्ष्मरागः सूक्ष्मसंपरायो भवति। ताश्च प्राकृताः किट्टीर्द्वितीयस्थितेः सकाशात् कियतीः समाकृष्य प्रथमस्थितिं तावती सूक्ष्मसंपरायाद्धातुल्यां करोति। किट्टिकरणाद्धायाश्चान्तिममावलिकामात्रं स्तिबुकसंक्रमेण संक्रमयति। तथा प्रथमान्तिमसमयकृताः किट्टीर्वर्जयित्वा शेषाः किट्टयः सूक्ष्मसंपरायाद्धायाः प्रथमसमये उदयमागच्छन्ति। 'वज्जियेत्यादि' चरमसमयकृतानां किट्टीनां अधस्तादसंख्येयं भागं प्रथमसमयकृतानां चोपरितनमसंख्येयतम भागं वर्जयित्वा शेषाः किट्टीरुदीरयति ॥ ५४ ॥

गिण्हंतो य मुयंतो असंखन्नागं तु चरमसमयम्मि। उवसामेइ य विईय ठिइं पि पुव्वं व सव्वद्धं ॥ ५५ ॥

गिण्हंतो य त्ति–द्वितीये समये उदयप्राप्तानां किट्टीनामसंख्येयं न्नागं मुञ्चति उपशान्तत्वादुदये न ददातीत्यर्थः। अपूर्वं चासंख्येयन्नागमनुन्नवनार्थमुदीरणाकरणेन गृह्णाति। एवं ग्रहणमोक्षौ कुर्वन् तावज्ज्ञातव्यो यावत्सूक्ष्मसंपरायाद्धायाश्चरमसमयः। द्वितीयस्थितिगतमपि दलिकं सूक्ष्मसंपरायाद्धाप्रथमसमयादारन्य सर्वाद्धं सकलामपि सूक्ष्मसंपरायाद्धां यावत् पूर्ववदुपशमयति। समयोनावलिकाद्विकबद्धमपि दलिकमुपशमयति। सूक्ष्मसंपरायाद्धायाश्च चरमसमये ज्ञानावरणदर्शनावरणान्तरायाणामान्तर्मौहूर्तिकः स्थितिबन्धः, नामगोत्रयोश्च षोडशमुहूर्तप्रमाणः, वेदनीयस्य च चतुर्विंशतिमुहूर्तमानः। तस्मिन्नेव चरमसमये सकलमपि मोहनीयमुपशान्त। ततोऽनन्तरसमये उपशान्तमोहगुणस्थानकमवाप्नोति ॥५५॥

उवसंतद्धा भिन्नमुहुत्तो तीसे य संखतमतुल्ला। गुणसेढी सव्वद्धं तुल्ला य पएसकालेहिं ॥ ५६ ॥

उवसंतद्ध त्ति–भिन्नमुहूर्तोऽन्तर्मुहूर्तं उपशान्ताद्धा उपशान्तमोहगुणस्थानकाद्धा। तत्र च गुणश्रेणिमारचयति। तस्या उपशान्ताद्धाया यः संख्येयतमो न्नागस्तावत्प्रमाणा। ताश्च गुणश्रेणीः सर्वा अपि सर्वाद्धां सकलामपि उपशान्ताद्धां यावत् प्रदेशापेक्षया कालापेक्षया च तुल्याः करोति, अवस्थितपरिणामत्वात् ॥ ५६ ॥

उवसंता य अकरणा संकमणोवट्टणा य दिट्ठितिगे। पच्छाणुपुव्विगाए परिवडइ पमत्तविरतो त्ति ॥५७॥

उवसंत त्ति–उपशान्ता मोहनीयप्रकृतयोऽकरणाः करणरहिता न्नवन्ति संक्रमणोद्वर्तनापवर्तनोदीरणानिधत्तिनिका-

चनाकरणानामयोग्या भवन्तीत्यर्थः । दृष्टित्रिके दर्शनमोहनीयत्रिके पुनरुपशान्तेऽपि संक्रमणापवर्तने भवतः । तत्र संक्रमो मिथ्यात्वसम्यग्मिथ्यात्वयोः सम्यक्त्वे, अपवर्तना पुनस्त्रयाणामपि । एवं क्रोधेन श्रेणिं प्रतिपन्नस्य द्रष्टव्यं । यदा तु मानेन श्रेणिं प्रतिपद्यते तदा मानं वेदयन्नेव प्रथमतो नपुंसकवेदोक्तक्रमेण क्रोधत्रिकमुपशमयति । ततः क्रोधोक्तप्रकारेण मानत्रिकं, शेषं तथैव । यदा तु मायया श्रेणिं प्रतिपद्यते तदा मायां वेदयन्नेव प्रथमतो नपुंसकवेदोक्तप्रकारेण क्रोधत्रिकं, ततो मानत्रिकं । ततः क्रोधोक्तप्रकारेण मायात्रिकं, शेषं तथैव । यदा तु लोभेन श्रेणिं प्रतिपद्यते तदा लोभं वेदयन्नेव प्रथमतः क्रोधत्रिकं नपुंसकवेदोक्तक्रमेणोपशमयति । ततो मानत्रिकं, ततो मायात्रिकं, तत उक्तप्रकारेण लोभत्रिकमिति । संप्रति प्रतिपात उच्यते—सोऽपि द्विधा भवक्षयेण अद्धाक्षयेण च । तत्र भवक्षयो म्रियमाणस्य, अद्धाक्षय उपशान्ताद्धाया व्यवच्छेदः । तत्र यो भवक्षयेण प्रतिपतति तस्य प्रथमसमये एव सर्वाण्यपि करणानि प्रवर्तन्ते । प्रथमसमये च यानि कर्माण्युदीर्यन्ते तान्युदयावलिकायां प्रवेशयति । यानि च नोदीरणामागच्छन्ति तेषां दलिकानि उदयावलिकाया बहिस्ताद्गोपुच्छाकारसंस्थितानि विरचयति । यः पुनरुपशान्तमोहगुणस्थानकाद्धापरिक्षयेण प्रतिपतति स येनैव क्रमेण स्थितिघातादीन् कुर्वन्नारूढस्तेनैव क्रमेण पश्चानुपूर्व्या स्थितिघातादीन् कुर्वन् प्रतिपतति । स च तावत्प्रतिपतति यावत्प्रमत्तसंयतगुणस्थानकं ॥ ५७ ॥

उंकड्डित्ता विइठिइहिं उदयादिसुं खिवइ दवं । सेढीएँ विसेसूणं आवलिउप्पिं असंखगुणं ॥ ५८ ॥

उंकड्डित्त त्ति—उपशान्तमोहगुणस्थानकात् प्रतिपतन् क्रमेण संज्वलनलोभादीनि कर्माण्यनुभवति । तद्यथा—प्रथमतः

संज्वलनलोन्नं, ततो यत्र मायोदयव्यवच्छेदस्तत आरज्य माया। ततो यत्र मानोदयव्यवच्छेदस्ततोऽर्वाक् मानं । ततो यत्र क्रोधोदयव्यवच्छेदस्तत आरज्य क्रोधं। इत्थं च क्रमेणोदयसमयप्राप्तानामनुज्ञवनार्थं तेषां द्वितीयस्थितेः सकाशाद्दलिकमपकृष्य समाकृष्य प्रथमस्थितिं करोति। उदयादिषु चोदयसमयप्रज्ञृतिषु च स्थितिषु श्रेण्या विशेषोनं विशेषोनं प्रक्षिपति। तद्यथा—उदयसमये प्रज्ञूतं। ततो द्वितीयसमये विशेषहीनं। ततोऽपि तृतीयसमये विशेषहीनं। एवं तावद्वाच्यं यावदुदयावलिकायाश्चरमसमयः। तत उदयावलिकाया उपरि असंख्येयगुणं। तद्यथा—उदयावलिकाया उपरि प्रथमसमये प्राक्तनानन्तरसमयदलिकनिक्षेपापेक्षयाऽसंख्येयगुणं। ततोऽपि द्वितीयसमयेऽसंख्येयगुणं। ततोऽपि तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वक्तव्यं यावद्गुणश्रेणीशिरः। ततः परतः पुनरपि प्रागुक्तक्रमेण विशेषहीनो दलिकनिक्षेपः ॥५८॥

वेइज्जंतीणेवं इयरासिं आलिगाए वाहिरउ। न हि संकमोणुपुव्विं णावलिगोदीरणाउप्पिं ॥ ५९ ॥

वेइज्जंतीणेवं ति-एष पूर्वोक्तो दलिकनिक्षेपस्तत्कालवेद्यमानप्रकृतीनामवसेयः। इतरासां त्ववेद्यमानानामावलिकाया उपर्येव दलिकनिक्षेपः। सोऽप्यसंख्येयगुणतया तावद्यावद्गुणश्रेणीशिरः। ततः परतः पुनरपि प्रागुक्तक्रमेण विशेषहीनो विशेषहीनः। 'न हीत्यादि' हिशब्दोऽवधारणे। ततोऽयमर्थः—आनुपूर्व्यैव संक्रमो न ज्ञवति, किं त्वनानुपूर्व्याऽपि ज्ञवति। तथा बन्धानन्तरं पश्चामावलिकानामुपरि उदीरणा ज्ञवतीति प्राक् यदुक्तं तन्न ज्ञवति, किं तु बन्धावलिकामात्रातिक्रमेऽपि उदीरणा ज्ञवतीति ॥ ५९ ॥

वेइज्जमाणसंजलणद्धाए अहिगा उ मोहगुणसेढी। तुल्ला य जयारूढो अतो य सेसेहि से तुल्ला ॥६०॥

वेइज्जमाण त्ति–मोहनीयस्य मोहनीयप्रकृतीनां गुणश्रेणिः कालमाश्रित्य वेद्यमानसंज्वलनकालादभ्यधिका प्रतिपतता सता प्रारभ्यते, समारोहकालगुणश्रेण्यपेक्षया तु तुल्या । तथा 'जयं ति' प्राकृतत्वात् स्त्रीत्वनिर्देशः, येन संज्वलनेनोपशमश्रेणिं प्रतिपन्नस्तमुदयेन प्राप्तः सन् ततः प्रभृति तस्य गुणश्रेणिं शेपकर्मसत्कगुणश्रेणिभिः सह तुल्यामारभते । यथा कश्चित्संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्ततः श्रेणेः प्रतिपतन् यदा संज्वलनक्रोधमुदयेन प्राप्तस्ततः प्रभृति तस्य गुणश्रेणिः शेपकर्मभिः समाना भवति । एवं मानमाययोरपि वाच्यं । संज्वलनलोभेन पुनरुपशमश्रेणिं प्रतिपन्नस्य प्रतिपातकाले प्रथमसमयादेवारभ्य संज्वलनलोभस्य गुणश्रेणि शेपकर्मगुणश्रेणिभिः सह तुल्या प्रवर्तते । शेपकर्मणां पुनरुपशमश्रेणिमारोहतो यत् यत्र बन्धनसंक्रमादि वृत्तं तत्तथैव प्रतिपततोऽपि क्रमेण पश्चानुपूर्व्या अन्यूनातिरिक्तं वेदितव्यं॥६०॥

खवगुवसामगपडिवयमाणडुगुणो तहिं तहिं बंधो।अणुभागो णंतगुणो असुभाण सुभाण विवरीअ ॥६१॥

खवगुवसामग त्ति–क्षपकस्य क्षपकश्रेणिमारोहतो यस्मिन् स्थाने यावान् स्थितिबन्धस्तस्मिन्नेव स्थाने उपशमश्रेणिमारोहतस्तावान् स्थितिबन्धो द्विगुणो भवति । ततोऽपि तस्मिन्नेव स्थाने उपशमश्रेणीतः प्रतिपततो द्विगुणो भवतीति । क्षपकसत्कस्थितिबन्धापेक्षया चतुर्गुणो भवतीत्यर्थः । तथा क्षपकस्य यस्मिन् स्थानेऽशुभप्रकृतीनामनुभागो यावान् भवति, तदपेक्षया तस्मिन्नेव स्थाने तासामेवाशुभप्रकृतीनामुपशमकस्यानुभागोऽनन्तगुणः । ततोऽपि तस्मिन्नेव स्थाने तासामेवाशुभप्रकृतीनामुपशमश्रेणीतः प्रतिपततोऽनन्तगुणः । 'सुभाण विवरीअ त्ति' शुभप्रकृतीनां पुनरनुभागो विपरीतो वाच्यः । स चैवं—उपशमश्रेणीतः प्रतिपततो यस्मिन् स्थाने शुभप्रकृतीनां यावान् अनुभागो भवति, तदपेक्षया तस्मिन् स्थाने

तासामेव शुभप्रकृतीनामुपशमकस्यानुभागोऽनन्तगुणः । ततोऽपि तस्मिन्नेव स्थाने तासामेव शुभप्रकृतीनां क्षपकस्यानन्तगुणः । शेषं यथाऽऽरोहतस्तथा प्रतिपततोऽपि वेदितव्यं, यावत्प्रमत्तसंयतगुणस्थानं ॥ ६१ ॥

किच्चा पमत्ततदियरठाणे परिवत्ति बहुसहस्साणि। हिट्ठिल्लाणंतरदुगं आसाणं वा वि गच्छिज्जा ॥ ६२ ॥

किच्च त्ति–प्रमत्ताप्रमत्तसंयतगुणस्थानकयोः प्रभूतानि सहस्राणि यावत् परिवृत्तीः कृत्वा कश्चिदधस्तनमनन्तरं गुणस्थानकद्विकं याति । कोऽपि देशविरतोऽपि भवति । कोऽपि अविरतसम्यग्दृष्टिरपि भवतीत्यर्थः । येषां मतेनानन्तानुबन्धिनामुपशमना भवति तेषां मतेन कश्चित्सासादनभावमपि गच्छति ॥ ६२ ॥

उवसमसम्मत्तद्धा अंतो आउक्खया धुवं देवो । तिसु आउगेसु बद्धेसु जेण सेढिं न आरुहइ॥६३॥

उवसम त्ति–औपशमिकसम्यक्त्वाद्धायां वर्तमानो यदि कश्चिदायुःक्षयात्कालं करोति तर्ह्यवश्यं देवो भवति । अपि च सास्वादनभावमपि गतः सन् कालं करोति, तथापि स देव एव भवति । यत आह–येन कारणेन देवायुर्वर्जितेषु शेषेषु त्रिष्वायुःषु मध्येऽन्यतमस्मिन्नायुषि बद्धे श्रेणिमुपशमश्रेणिं नारोहति। ततः श्रेणिस्थितः श्रेणीतः कालं कृत्वा देव एव भवति ६३

उग्घाडियाणि करणाणि उदयठिइमाइगं इयरतुल्लं । एगभवे दुक्खुत्तो चरित्तमोहं उवसमेइ ॥ ६४ ॥

उग्घाडियाणि त्ति–करणानि बन्धनसंक्रमणादीनि उपशमश्रेणिमारोहतो यत्र यत्र स्थाने यानि यानि व्यवच्छिन्नस्थानानि उपशमश्रेणीतः प्रतिपततः सतस्तत्तत्स्थानं प्राप्तस्य तानि तानि उद्घाटितानि भवन्ति तानि तानि तत्र प्रवर्तन्त-

इत्यर्थः । तथोदयस्थित्यादिकं उदयस्थितिबन्धादिकं, इतरतुल्यं उपशमश्रेण्यारोहणाभ्युदयस्थित्यादितुल्यं, उपशमश्रेणिमारोहतो यत्र यत्र यद्यत् उदयस्थित्यादिकं व्यवच्छिन्नं प्रतिपातेऽपि तत्र तत्र तत्तत् उदयस्थित्यादिकं प्रवर्तत इत्यर्थः । तथैकस्मिन् भवे द्वौ वारौ चारित्रमोहमुपशमयति उपशमश्रेणिं प्रतिपद्यते इत्यर्थः । न तु तृतीयमपि वारं ॥ ६४ ॥

एवं पुरुषवेदोदयेनोपशमश्रेणि प्रतिपन्नस्य विधिरुक्तः, संप्रति स्त्रीवेदेन प्रतिपन्नस्योच्यते—

उदयं वज्जी इत्थी इत्थिं समयइ अवेयगा सत्त । तह वरिसवरो वरिसवरिं इत्थिं समगं कमारद्धे ॥६५॥

उदयं ति–इह स्त्री उपशमश्रेणिं प्रतिपन्ना सती प्रथमतो नपुंसकवेदमुपशमयति, पश्चात् स्त्रीवेदं । तं च तावदुपशमयति यावत्स्वोदयस्य द्विचरमसमयः । तस्मिंश्च समये एकां चरमसमयमात्रामुदयस्थितिं वर्जयित्वा शेषं सकलमपि स्त्रीवेदस्य सत्कं दलिकमुपशमित । ततश्चरमसमये व्यतिक्रान्ते अवेदका सती पुरुषवेदहास्यादिकाः सप्त प्रकृतीर्युगपदुपशमयितुमारभते । शेषं पुरुषवेदेनेव श्रेणिं प्रतिपन्नस्य वेदितव्यं । संप्रति नपुंसकवेदेनोपशमश्रेणिं प्रतिपन्नस्य विधिमाह—'तहेत्यादि' वर्षवरो नपुंसक उपशमश्रेणिं प्रतिपन्नः सन् । तथेति एकामुदयस्थितिं मुक्त्वेत्यर्थः । समकं युगपत नपुंसकवेदस्त्रीवेदावुपशमयति । 'कमारद्धे' इति क्रमेणारब्धे सति । तत्रायं संप्रदायः—स्त्रीवेदेन पुरुषवेदेन वा उपशमश्रेणिं प्रतिपद्यमानो यस्मिन् स्थाने नपुंसकवेदमुपशमयति तद्दूरं यावन्नपुंसकवेदेनापि श्रेणिं प्रतिपन्नः सन् नपुंसकवेदमेव केवलमुपशमयति । तत ऊर्ध्वं पुनर्नपुंसकवेदं स्त्रीवेदं च युगपदुपशमयितुं लग्नः । स च तावद्गतो यावन्नपुंसकवेदाद्धाया द्विचरमसमयः । तस्मिंश्च समये स्त्रीवेद उपशान्तः । नपुंसकवेदस्य च एका समयमात्रोदयस्थितिर्वर्तते ।

शेषं सर्वमुपशान्तं । तस्यामप्युदयस्थितावतिक्रान्तायामवेदको जवति । ततः पुरुषवेदादिकाः सप्त प्रकृतीर्युगपदुपशमयितुं यतते । शेषं तथैव ॥ ६५ ॥

तदेवमुक्ता सर्वोपशमना, संप्रति देशोपशमनामजिधातुकाम आह—

पगइठिई अणुजागप्पएसमूलुत्तराहि पविजत्ता । देसकरणोवसमणा तीए समियस्स अठपयं ॥ ६६ ॥

पगइ त्ति-देशतः करणाज्यां यथाप्रवृत्तापूर्वकरणसंज्ञाज्यां कृत्वा प्रकृत्यादीनामुपशमना देशकरणोपशमना । इदमुक्तं जवति—यथाप्रवृत्तकरणापूर्वकरणाज्यां यत् प्रकृत्यादिकं देशतः उपशमयति, न सर्वात्मना सा देशकरणोपशमना। सा च चतुर्विधा, तद्यथा—प्रकृतिदेशोपशमना, स्थितिदेशोपशमना, अनुजागदेशोपशमना, प्रदेशदेशोपशमना चेति। पुनरप्येकैका द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तथा च देशकरणोपशमनया शमितस्य उपशमं नीतस्य। इदमर्थपदमिदं तात्पर्यं ॥ ६६ ॥

तदेवाह—

उवट्टणउवट्टणसंकमणाइं च तिन्नि करणाइं । पगईतयासमईउ पहू नियट्टिंमि वट्टंतो ॥ ६७ ॥

उवट्टणउ त्ति-देशोपशमनया उपशमितस्य कर्मण उद्वर्तनापवर्तनासंक्रमरूपाणि त्रीणि करणानि प्रवर्तन्ते, नान्यानि करणानि उदीरणाप्रजृतीनि । एष देशोपशमनाया विशेषः । तथा मूलप्रकृतिमुत्तरप्रकृतिं वा तया देशोपशमनया उपशमयितुं प्रजुः समर्थो निवृत्तिकरणेऽपूर्वकरणे वर्तमानः । इह निवृत्तिग्रहणं पर्यवसानार्थं वेदितव्यं । तत इदमुक्तं

भवति—सर्वेऽप्येकद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियतिर्यङ्नारकदेवा मनुष्याश्च यथासंभवमपूर्वकरणपर्यवसानाः सर्वकर्मणां देशोपशमनास्वामिनोऽवसेयाः ॥ ६७ ॥

एतदेव भावयति—

दंसणमोहाणंताणुबंधिणं सगनियट्टिउ णुप्पिं । जा उवसमे चउद्धा मूलुत्तरणाइसंताउ ॥ ६८ ॥

दंसण त्ति—दर्शनमोहनीयानन्तानुबन्धिनां स्वकीयात् स्वकीयात् अपूर्वकरणात् परतो देशोपशमना न भवति । तत्र दर्शनत्रिकस्य क्षपका अविरता देशविरता विरता वा, उपशमकास्तु विरताः स्वापूर्वकरणान्तसमयं यावद्देशोपशमनां कुर्वन्ति । अनन्तानुबन्धिनां पुनर्विसंयोजने चातुर्गतिका अपि स्वापूर्वकरणान्तिमसमयं यावद्देशोपशमकाः, न परतः । शेषाणां पुनश्चारित्रमोहनीयप्रकृतीनामुपशमनायां क्षपणायां वा यावदपूर्वकरणगुणस्थानकचरमसमयस्तावद्देशोपशमना। शेषाणां सर्वोपशमना न भवति, किं तु देशोपशमनैव । सापि चापूर्वकरणस्थानकं यावदवगन्तव्या । तथा या मूलप्रकृतय उत्तरप्रकृतयो वाऽनादिसत्ताकास्ता उपशमे देशोपशमनामधिकृत्य चतुर्विधाः, तद्यथा—साद्योऽनादयो ध्रुवा अध्रुवाश्च । तत्र मूलप्रकृतयोऽष्टावपि चतुर्विधाः । तथाहि—अपूर्वकरणगुणस्थानकात् परतो गत्वा प्रतिपततां सा देशोपशमना प्रवर्तमाना सादिः । तत्स्थानमप्राप्तानां पुनरनादिः । ध्रुवा अभव्यानां । भव्यानां त्वध्रुवा । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीनां सा क्रियते—तत्र वैक्रियसप्तकाहारकसप्तकमनुष्यद्विकदेवद्विकनरकद्विकसम्यक्त्वसम्यग्मिथ्यात्वोच्चैर्गोत्ररूपोद्वलनयोग्यत्रयोविंशतितीर्थकरायुश्चतुष्टयवर्जितं शेषं त्रिंशदुत्तरं प्रकृतिशतं ध्रुवस-

त्कर्म, तस्य देशोपशमना चतुर्विधा, तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च। तथाहि—मिथ्यात्वानन्तानुबन्धिनां स्वस्वापूर्वकरणात्परतो देशोपशमना न भवति। शेषकर्मणां त्वपूर्वकरणगुणस्थानकात्परतो न भवति। ततः परतः स्थानात् प्रच्यवमानाना प्रवर्तमाना सादिः। तत्स्थानमप्राप्तानां पुनरनादिः। ध्रुवाध्रुवे पूर्ववत्। शेषाणां तूद्वलनयोग्यत्रयोविंशत्यादीनामष्टाविंशतिप्रकृतीनामध्रुवसत्कर्मत्वादेव देशोपशमना सादिरध्रुवा च विज्ञेया॥ ६८॥

संप्रति देशोपशमनामधिकृत्य प्रकृतिस्थानप्ररूपणार्थमाह—

चउरादिजुया वीसा एक्कवीसा य मोहठाणाणि। संकमनियट्टिपाउग्गाइं सजसाइँ नामस्स॥ ६९॥

चउरादिजुय त्ति-मोहनीयस्य देशोपशमनामधिकृत्य षट् प्रकृतिस्थानानि। तद्यथा—चतुरादियुता विंशतिरेकविंशतिश्च चतुर्विंशतिः, पञ्चविंशतिः, षड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिः, एकविंशतिश्चेत्यर्थः। शेषाणि पुनरनिवृत्तिबादरे प्राप्यन्ते इति कृत्वा न संभवन्ति। तत्राष्टाविंशतिस्थानं मिथ्यादृष्टिसास्वादनसम्यग्मिथ्यादृष्टिवेदकसम्यग्दृष्टीनां प्राप्यते। सप्तविंशतिस्थानं उद्वलितसम्यक्त्वस्य मिथ्यादृष्टेः सम्यग्मिथ्यादृष्टेर्वा। षड्विंशतिस्थानं उद्वलितसम्यक्त्वसम्यग्मिथ्यात्वस्यानादिमिथ्यादृष्टेर्वा। पञ्चविंशतिस्थानं षड्विंशतिसत्कर्मणो मिथ्यादृष्टेः सम्यक्त्वमुत्पादयतोऽपूर्वकरणात्परतो वेदितव्य, तस्य मिथ्यात्वदेशोपशमनाया अभावात्। तथाऽनन्तानुबन्धिनामुद्वलनेऽपूर्वकरणात्परतो वर्तमानस्य चतुर्विंशतिस्थानं, चतुर्विंशतिसत्कर्मणो वा चतुर्विंशतिस्थानं। क्षपितसप्तकस्य एकविंशतिस्थानं। संप्रति नामकर्मणः प्रकृतिस्थानान्याह—'संकमेत्यादि' प्रकृतिस्थानसंक्रमे नाम्नो यानि यशःकीर्त्या सह स्थानान्युक्तानि तान्येव निवृत्ति-

प्रायोग्यानि अपूर्वकरणप्रायोग्यानि भवन्ति देशोपशमनायोग्यानि भवन्तीत्यर्थः । तानि चेमानि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिश्चेति । तत्रादिमानि चत्वारि यावदपूर्वकरणगुणस्थानकचरमसमयस्तावद्वेदितव्यानि, न परतः । शेषाणि च त्रीणि त्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि एकेन्द्रियादीनां भवन्ति । श्रेणिं प्रतिपद्यमानानां तु न संभवंति । शेषाणि तु स्थानानि अपूर्वकरणगुणस्थानकात्परतो लभ्यन्ते, नार्वागिति देशोपशमनायोग्यानि । ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामेकैकं प्रकृतिस्थानं देशोपशमनायोग्यं । तत्र ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकं, दर्शनावरणस्य नवप्रकृत्यात्मकं, वेदनीयस्य द्विप्रकृत्यात्मकं । आयुर्गोत्रयोर्द्वे द्वे स्थाने एका द्वे च प्रकृती ॥८९॥

उक्ता प्रकृतिदेशोपशमना, संप्रति स्थितिदेशोपशमनामाह—

ठिइसंकम व ठिइउवसमणा णवरि जहन्निया कज्जा । अभवसिद्धि जहन्ना उव्वलगनियट्टिगे वियरा ॥९०॥

ठिइसंकम व त्ति—स्थितिसंक्रमवत् स्थितिदेशोपशमना द्रष्टव्या । नवरमिह जघन्या जघन्यस्थितिदेशोपशमनायोग्या कार्या, अभवसिद्धिकप्रायोग्या जघन्या स्थितिः । एतदुक्तं भवति—स्थितिदेशोपशमना द्विविधा—मूलप्रकृतीनामुत्तरप्रकृतीनां च । एकैकापि द्विधा—जघन्योत्कृष्टा च । तत्र मूलप्रकृतीनामुत्तरप्रकृतीनां वा उत्कृष्टस्थितिदेशोपशमनास्वामी यः प्रागुत्कृष्टस्थितिसंक्रमस्वामी प्रतिपादितः स एव वेदितव्यः । जघन्यस्थितिदेशोपशमनास्वाम्यपि जघन्यस्थितिसंक्रमस्वाम्येव प्रतिपत्तव्यः । केवलं जघन्यस्थितिदेशोपशमनास्वामी अभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमान एकेन्द्रियो द्रष्टव्यः, तस्यैव प्रायः सर्वकर्मणामतिजघन्यायाः स्थितेः प्राप्यमाणत्वात् । याश्चेतराः प्रकृतयोऽभवसिद्धिक-

प्रायोग्यजघन्यस्थितयो न भवन्ति तासामुद्वलकेऽपूर्वकरणे वा जघन्यस्थितिदेशोपशमना वेदितव्या । तत्रोद्वलके उद्वलनप्रायोग्यानां प्रकृतीनामन्तिमे स्थितिखंडे पल्योपमासंख्येयभागमात्रे वर्तमानस्तत्राप्याहारकसप्तकसम्यक्त्वसम्यग्मिथ्यात्वानामेकेन्द्रियोऽनेकेन्द्रियो वा, शेषप्रकृतीना तूद्वलनयोग्यानां वैक्रियसप्तकदेवद्विकनरकद्विकमनुष्यद्विकोच्चैर्गोत्ररूपाणामेकेन्द्रिय एव, अन्यासां त्वपूर्वकरणचरमसमये वर्तमानो जघन्यां देशोपशमनां करोति ॥ ७० ॥

अणुभागसंकमसमा अणुभागुवसामणा नियट्टिम्मि । संकमपएसतुल्ला पएसुवसामणा चेव ॥ ७१ ॥

अणुभाग त्ति–अनुभागसंक्रमसमा अनुभागदेशोपशमना वक्तव्या । नवरं निवृत्तावपूर्वकरणे चरमसमयं यावत् । इयमत्र भावना—य एवोत्कृष्टानुभागसंक्रमस्वामी प्राक् प्रतिपादितः, स एवोत्कृष्टानुभागदेशोपशमनाया अपि स्वामी । तत्राशुभप्रकृतीनां मिथ्यादृष्टिः, शुभप्रकृतीनां तु सम्यग्दृष्टिः । नवरं सातवेदनीययशःकीर्त्युच्चैर्गोत्राणामुत्कृष्टानुभागसंक्रमस्वामिनोऽपूर्वकरणस्थानकात्परतोऽपि भवन्ति । उत्कृष्टानुभागदेशोपशमनायाः पुनरुत्कर्षतोऽप्यपूर्वकरणगुणस्थानकपर्यवसाना एव वेदितव्याः । जघन्यानुभागदेशोपशमना तीर्थकरवर्जानां सर्वासामपि प्रकृतीनामेकेन्द्रिये अभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमाने द्रष्टव्या । तीर्थकरनाम्नस्तु जघन्यानुभागसंक्रमवत् । प्रदेशदेशोपशमना चात्र प्रदेशसंक्रमतुल्या वेदितव्या । एतदुक्तं भवति—उत्कृष्टप्रदेशदेशोपशमना उत्कृष्टप्रदेशसंक्रमतुल्या । नवरं येषां कर्मणामपूर्वकरणात्परतोऽपि उत्कृष्टः प्रदेशसंक्रमः प्राप्यते, तेषामप्यपूर्वकरणगुणस्थानकचरमसमयमेव यावत् उत्कृष्टप्रदेशोपशमना वाच्या । जघन्या पुनः प्रदेशदेशोपशमना जघन्यप्रदेशसंक्रमतुल्यैवेति ॥ ७१ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुपशमनाकरणं समाप्तम् ॥

तदेवमुक्तमुपशमनाकरणं, संप्रति निधत्तिनिकाचनाकरणे प्रतिपिपादयिषुराह—

देसोवसमणतुल्ला होइ निहत्ती निकाइया नवरं। संकमणं पि निहत्तीएँ नत्थि सेसाण वियरस्स ॥ ७२ ॥

देसोवसमण त्ति—निधत्तिर्निकाचना च देशोपशमनातुल्या। इदमुक्तं भवति—ये देशोपशमनाया भेदा ये च स्वामिनस्तेऽन्यूनातिरिक्ता निधत्तिनिकाचनयोरपि वेदितव्याः। नवरं अर्थपदं निधत्तिनिकाचनयोः। इदं संक्रमणमपि परप्रकृतिसंक्रमणमपि। अपिशब्दादुदीरणादीन्यपि निधत्तौ सत्यां न भवन्ति, उद्वर्तनापवर्तने पुनर्भवत एव। इतरस्यां निकाचनायां शेषे अपि उद्वर्तनापवर्तने अपि न भवतः। सकलकरणायोग्यं निकाचितमित्यर्थः ॥ ७२ ॥

इह यत्र गुणश्रेणिस्तत्र प्रायो देशोपशमनानिधत्तिनिकाचनायथाप्रवृत्तसंक्रमा अपि संभवन्ति, ततस्तत्राल्पबहुत्वमाह—

गुणसेढिपएसग्गं थोवं पत्तेगसो असंखगुणं। उवसामणाइ तीसु वि संकमणेऽहप्पवत्ते य ॥ ७३ ॥

गुणसेढि त्ति—गुणश्रेणीप्रदेशाग्रं स्तोकं। ततः प्रत्येकशः प्रत्येकं प्रत्येकं उपशमनादिषु त्रिषु यथाप्रवृत्ते च संक्रमणेऽसंख्येयगुणं वक्तव्यं। इयमत्र भावना—यस्य तस्य वा कर्मणो गुणश्रेणीप्रदेशाग्रं सर्वस्तोकं। ततो देशोपशमनायामसंख्येयगुणं। ततो निधत्तमसंख्येयगुणं। ततोऽपि निकाचितमसंख्येयगुणं। ततोऽपि यथाप्रवृत्तसंक्रमेण संक्रान्तमसंख्येयगुणं ७३॥

संप्रत्यष्टानामपि करणानां येऽध्यवसायास्तेषां परिमाणनिरूपणार्थमाह—

थोवा कसायउदया ठिइबंधोदीरणा य संकमणा। उवसामणाइसु अज्झवसाया कमसो असंखगुणा ॥७४॥

थोवत्ति—स्थितिबन्धे, उपलक्षणमेतत्, अनुभागबन्धे वा ये कषायोदीरणास्ते सर्वस्तोकाः । प्रकृतिप्रदेशबन्धौ च योगाद्भवत इति ताविह न गृह्येते, अनुभागबन्धश्चोपलक्षणव्याख्यानाद्गृहीतः । ततश्च स्थितिबन्धे कषायोदयाः स्तोका इति । किमुक्तं भवति ? बन्धनकरणाध्यवसायाः सर्वस्तोकाः । तेभ्य उदीरणाध्यवसाया असंख्येयगुणाः । ततोऽपि संक्रमाध्यवसाया असंख्येयगुणाः । संक्रमग्रहणेन चात्रोद्वर्तनापवर्तने अपि गृहीते द्रष्टव्ये, संक्रमभेदत्वात्तयोः । तत उपशमनाध्यवसाया असंख्येयगुणाः । ततोऽपि निधत्त्यध्यवसाया असंख्येयगुणाः । ततोऽपि निकाचनाध्यवसाया असंख्येयगुणाः ॥ ७४ ॥ ३०७ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायां करणाष्टकम् ॥

तदेवमुक्तानि करणानि, संप्रत्युद्देशक्रमप्राप्तमुदयमभिधित्सुराह—

उदओ उदीरणाए तुल्लो मोत्तूण एक्कचत्तालं । आवरणविग्घसंजलणलोभवेए य दिट्ठिदुगं ॥ १ ॥
आलिगमहिगं वेएंति आउगाणं पि अप्पमत्ता वि। वेयणियाण य दुसमय तणुपज्जत्ता य निद्दाओ॥ २ ॥
मणुयगइजाइतसबायरं च पज्जत्तसुभगमाएज्जं। जसकित्तिमुच्चगोयं चाजोगी(गा)केइ तित्थयरं॥ ३ ॥

उदओ इत्यादि—उदय उदीरणातुल्यः । किमुक्तं भवति ? ये उदीरणायाः प्रकृत्यादयो भेदाः प्रागुक्ताः, या च साद्यनादिप्ररूपणा, यच्च स्वामित्वं, एतत्सर्वमन्यूनातिरिक्तमुदयेऽपि द्रष्टव्यं, उदयोदीरणयोः सहभावित्वात् । तथाहि—यत्रोदयस्तत्रोदीरणा, यत्रोदीरणा तत्रोदयः । किं सर्वत्राप्येवमिति चेदत आह—मुक्त्वा एकचत्वारिंशत्प्रकृतीः । तासामुदीरणामन्तरेणापि कियत्कालमुदयस्य प्राप्यमाणत्वात् । तथाहि—ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकसंज्वलनलोभवेदत्रयसम्यक्त्वसम्यग्मिथ्यात्वरूपा विंशतिप्रकृतीः स्वस्वोदयपर्यवसाने आवलिकामात्रं कालमधिकं वेदयंति उदीरणामन्तरेणापि केवलेनोदयेनावलिकामात्रं कालमनुभवन्तीत्यर्थः । तच्चावलिकामात्रं त्रयाणां वेदानां मिथ्यात्वस्य चान्तरकरणस्य प्रथमस्थितौ आवलिकाशेषायां, शेषाणां तु कर्मणां स्वस्वसत्तापर्यवसाने, तथा चतुर्णामप्यायुषां स्वस्वपर्यवसाने आवलिकामात्रं कालमुदय एव भवति, नोदीरणा । मनुष्यायुर्वेदनीययोर्वाऽप्रमत्ता अप्रमत्तसंयतप्रभृतय उदीरणामन्तरेण केवलेनैवोदयेन वेदयन्ते । तथा तनुपर्याप्ताः शरीरपर्याप्त्या पर्याप्ताः सन्तो द्वितीयसमयादारभ्य शरीरपर्या-

स्यनन्तरसमयादारभ्येन्द्रियपर्याप्तिचरमसमयं यावदुदीरणामन्तरेणापि केवलेनैवोदयेन निद्राः पञ्चापि वेदयन्ते। तथा मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्युच्चैर्गोत्ररूपा नव प्रकृतीरयोगिकेवलिन उदीरणामन्तरेण स्वं कालं यावत् केवलेनैवोदयेन वेदयन्ते। केचित्तीर्थकरमपि ये तीर्थकृतः ॥ १-२-३ ॥

तदेवमुक्तः प्रकृत्युदयः, संप्रति स्थित्युदयमाह—

ठिइउदओ वि ठिइक्खयपओगसा ठिइउदीरणा अहिगो। उदयठिईउ हस्सो छत्तीसा एग उदयठिई ॥ ४ ॥

ठिइउदउ त्ति—इह द्विविध उदयः स्थितिक्षयेण प्रयोगेण च। तत्र स्थितिरबाधाकालरूपा तस्याः क्षयेण द्रव्यक्षेत्रकालभवभावरूपाणामुदयहेतूनां संप्राप्तौ सत्यां यः स्वभावत उदयः प्रवर्तते स स्थितिक्षयेणोदयः। यः पुनस्तस्मिन्नुदये प्रवर्तमाने सति उदीरणाकरणरूपेण प्रयोगेण दलिकमाकृष्यानुभवति स प्रयोगोदयः। तथा चाह—स्थित्युदयोऽपि स्थितिक्षयात् प्रयोगतश्च भवति। स च द्विधा उत्कृष्टो जघन्यश्च। तत्रोत्कृष्टः स्थित्युदीरणात उदयस्थित्याऽभ्यधिकः। तथाहि—उत्कृष्टायां स्थितौ बध्यमानायामबाधाकालेऽपि प्राग्बद्धं दलिकमस्तीति कृत्वा बन्धावलिकायामतीतायामनन्तरस्थितौ विपाकोदयेन वर्तमान उदयावलिकात उपरितनीः सर्वा अपि स्थितीरुदीरयति। उदीर्य च वेदयते। ततो बन्धावलिकोदयावलिकाहीनायाः शेषायाः सर्वस्या अपि स्थितेरुदयोदीरणे तुल्ये। वेद्यमानायां च स्थितावुदीरणा न प्रवर्तते, किंतूदय एव केवलः, ततो वेद्यमानया समयमात्रस्थित्याऽभ्यधिकः स्थित्युदीरणात उत्कृष्टस्थित्युदयः बन्धावलिकोदयावलिकाहीनश्च उत्कृष्टः स्थित्युदयः उदयोत्कृष्टबन्धानां वेदितव्यः। शेषाणां तु यथायोग्यं। तत्राप्युक्तनीत्या

उदयस्थित्याभ्यधिकोऽवगन्तव्यः । तथा ह्रस्वो जघन्यः स्थित्युदयः । षट्त्रिंशत्प्रकृतीनामेका समयमात्रा उदयस्थितिः । एतदुक्तं भवति—षट्त्रिंशत्प्रकृतीनां जघन्यः स्थित्युदयः समयमात्रैकस्थित्युदयप्रमाणो वेदितव्यः, समयमात्रा चैका स्थितिः चरमसमयस्थितिरवसेया । षट्त्रिंशत्प्रकृतयश्च प्रागुक्ता एवैकचत्वारिंशत्प्रकृतयो निद्रापञ्चकव्यतिरिक्ता वेदितव्याः । निद्रापञ्चकस्य ह्युदीरणाया अभावेऽपि शरीरपर्याप्त्यनन्तरं केवलोदयकालेऽपवर्तते । तत एका स्थितिर्न प्राप्यते इति तद्वर्जनं । शेषं जघन्योदीरणातुल्यं निरवशेषमवगन्तव्यं ॥ ४ ॥

तदेवमुक्तः स्थित्युदयः, संप्रत्यनुभागोदयमाह—

अणुभागुदउ वि जहण्ण नवरि आवरणविग्घवेयाणं । संजलणलोभसम्मत्ताण य गंतूणमावलिगं ॥ ५ ॥

अणुभाग त्ति—यथाऽनुभागोदीरणा प्राक् सप्रपञ्चमभिहिता, तथाऽनुभागोदयोऽपि वक्तव्यः । नवरं ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयवेदत्रयसंज्वलनलोभसम्यक्त्वानामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वाऽतिक्रम्य तस्या आवलिकायाश्चरमसमये जघन्यानुभागोदयो वाच्यः ॥ ५ ॥

तदेवमुक्तोऽनुभागोदयः । संप्रति प्रदेशोदयाभिधानावसरः । तत्र चेमौ अर्थाधिकारौ, तद्यथा—साद्यनादिप्ररूपणा स्वामित्वं च । साद्यनादिप्ररूपणा द्विविधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयसाद्यनादिप्ररूपणार्थमाह—

अजहण्णाणुक्कोसा चउ तिहा छण्ह चउविहा मोहे । आउस्स साइअधुवा सेसविगप्पा य सव्वेसिं ॥ ६ ॥

अजहण्ण त्ति—मोहनीयायुर्वर्जानां षण्णां कर्मणामजघन्यः प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—कश्चित् क्षपितकर्मांशो देवलोके देवो जातः। स च तत्र संक्लिष्टो भूत्वा उत्कृष्टां स्थितिं बध्नन् उत्कृष्टं प्रदेशाग्रमुद्वर्तयति। ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पन्नः, तस्य प्रथमसमये प्रागुक्तानां षण्णां कर्मणां जघन्यः प्रदेशोदयः, स चैकसामयिक इति कृत्वा सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यजघन्यः। सोऽपि तस्य द्वितीयसमये भवन् सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, ध्रुवाध्रुवौ पूर्ववत्। तथा तेषामेव षण्णां कर्मणामनुत्कृष्टः प्रदेशोदयस्त्रिधा त्रिप्रकारः, तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च। तथाहि—अमीषां षण्णां कर्मणामुत्कृष्टः प्रदेशोदयः प्रागुक्तस्वरूपस्य गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्य प्राप्यते। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चानादिः, सदैव भावात्। ध्रुवाध्रुवौ पूर्ववत्। तथा मोहे मोहनीयेऽजघन्योऽनुत्कृष्टश्च प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—क्षपितकर्मांशस्यान्तरकरणे कृतेऽन्तरकरणपर्यन्तभाविगोपुच्छाकारसंस्थितावलिकामात्रदलिकान्तसमये मोहनीयस्य जघन्यः प्रदेशोदयः। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः। सोऽपि ततो द्वितीयसमये भवन् सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवौ पूर्ववत्। तथा गुणितकर्मांशस्य सूक्ष्मसंपरायगुणस्थानकान्तसमये उत्कृष्टः प्रदेशोदयः। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः। स चोपशमश्रेणीतः प्रतिपतितो भवन् सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवौ पूर्ववत्। तथा आयुषश्चत्वारोऽपि भेदा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाः साद्यध्रुवाः, चतुर्णामपि भेदानां यथायोगं नियतकालं भावात्।

तथा सर्वेषां कर्मणां प्रागुक्तानां षण्णां मोहनीयस्य उक्तशेषौ विकल्पौ उत्कृष्टजघन्यरूपौ साद्यध्रुवौ, तौ च प्रागेव भावितौ ॥ ६ ॥

कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीनां तां चिकीर्षुराह—

अजहन्नाणुक्कोसो सगयालाए चउव्विहो चउहा। मिच्छत्ते सेसासिं दुविहा सव्वे य सेसाणं ॥ ७ ॥

अजहन्न त्ति—तैजससप्तकवर्णादिविंशतिस्थिरास्थिरनिर्माणागुरुलघुशुभाशुभज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाणां सप्तचत्वारिंशत्प्रकृतीनामजघन्यः प्रदेशोदयश्चतुर्विधः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—कश्चित् क्षपितकर्मांशो देव उत्कृष्टे संक्लेशे वर्तमान उत्कृष्टां स्थितिं बध्नन् उत्कृष्टं प्रदेशाग्रमुद्वर्तयति । ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पद्यते, तस्य प्रथमसमये प्रागुक्तानां सप्तचत्वारिंशत्प्रकृतीनां जघन्यः प्रदेशोदयः । नवरमवधिज्ञानावरणावधिदर्शनावरणयोर्बन्धावलिकाचरमसमये देवस्य जघन्यः प्रदेशोदयो वेदितव्यः । स चैकसामायिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स च द्वितीयसमये भवन् सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् । तथाऽमूषामेव सप्तचत्वारिंशत्प्रकृतीनामनुत्कृष्टः प्रदेशोदयस्त्रिप्रकारस्तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च । तथाहि—गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयः । स चैकसामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चानादिः, सदैव भावात् । ध्रुवाध्रुवौ पूर्ववत् । तथा मिथ्यात्वे मिथ्यात्वस्याजघन्योऽनुत्कृष्टश्च प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—क्षपितकर्मांशस्य प्रथमसम्यक्त्व-

मुत्पादयतः कृतान्तरकरणस्यौपशमिकसम्यक्त्वात्प्रच्युत्य मिथ्यात्वं गतस्यान्तरकरणपर्यन्तनाग्निगोपुच्छाकारसंस्थिताद्वि-
कामात्तदलिकान्तसमये वर्तमानस्य जघन्यः प्रदेशोदयः । स चैककासामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्य-
जघन्यः । सोऽपि द्वितीयसमये भवन् सादिः । वेदकसम्यक्त्वात्प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः ।
ध्रुवाध्रुवौ पूर्ववत् । तथा कश्चिद्गुणितकर्मांशो यदा देशविरतिगुणश्रेण्यां वर्तमानः सर्वविरतिं प्रतिपद्यते । ततस्त्रिमित्तां
गुणश्रेणिं करोति । कृत्वा च तावद्गतो यावत् द्वयोरपि गुणश्रेण्योर्मस्तकं । तदानीं च कश्चिन्मिथ्यात्वं गच्छति । ततस्तस्य
मिथ्यात्वस्योत्कृष्टः प्रदेशोदयः स चैककासामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । सोऽपि ततो
द्वितीयसमये भवन् सादिः । वेदकसम्यक्त्वात्प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् ।
एतासां च सप्तचत्वारिंशत्प्रकृतीनां मिथ्यात्वस्य चोक्तशेषौ विकल्पौ जघन्योत्कृष्टरूपौ द्विधा द्विप्रकारौ । तद्यथा—सादी
अध्रुवौ च । तौ च भावितावेव । शेषाणामध्रुवोदयानां प्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा जघन्याजघन्यो-
त्कृष्टानुत्कृष्टरूपा द्विधा ज्ञातव्याः, तद्यथा—सादयोऽध्रुवाश्च । सा च साद्यध्रुवताऽध्रुवोदयत्वादवसेया ॥ ७ ॥
कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधानीयं । तच्च द्विधा—उत्कृष्टप्रदेशोदयस्वामित्वं जघन्यप्रदेशोदय-
स्वामित्वं च । तत्रोत्कृष्टप्रदेशोदयस्वामित्वप्रतिपादनार्थं संभवन्तीर्गुणश्रेणीः सर्वा अपि प्ररूपयति—

सम्मत्तुप्पासावयविरए संजोयणा विणासे य । दंसणमोहक्खवगे कसाय उवसामगुवसंते ॥ ८ ॥
खवगे य खीणमोहे जिणे य दुविहे असंखगुणसेढी । उदओ तव्विवरीओ कालो संखेज्जगुणसेढी ॥ ९ ॥

सम्मत्तुप्पेत्यादि—इहैकादश गुणश्रेणयः । तद्यथा—सम्यक्त्वोत्पादे प्रथमा । द्वितीया श्रावके देशविरते । तृतीया विरते सर्वविरते प्रमत्तेऽप्रमत्ते च । चतुर्थी संयोजनानामनन्तानुबन्धिनां विसंयोजने । पञ्चमी दर्शनमोहनीयत्रितयक्षपणे । षष्ठी चारित्रमोहनीयोपशमके । सप्तमी उपशान्तमोहनीये । अष्टमी मोहनीयक्षपके । नवमी क्षीणमोहे । दशमी सयोगिकेवलिनि । अयोगिकेवलिनि त्वेकादशीति । 'असंखगुणसेढी उदउ त्ति' सर्वस्तोकं सम्यक्त्वोत्पादगुणश्रेण्यां दलिकं । ततोऽपि देशविरतिगुणश्रेण्यामसंख्येयगुणं । ततोऽपि सर्वविरतिगुणश्रेण्यामसंख्येयगुणं । एवं तावद्वाच्यं यावदयोगिकेवलिगुणश्रेण्यां दलिकमसंख्येयगुणं । तस्मात् प्रदेशोदयमप्याश्रित्य एता गुणश्रेणयो यथाक्रममसंख्येयगुणा वक्तव्याः । 'तव्विवरीओ कालो संखिज्जगुणसेढि त्ति' सर्वास्वप्येतासु गुणश्रेणिषु कालस्तद्विपरीत उदयविपरीतः संख्येयगुणश्रेण्या । तद्यथा—अयोगिकेवलिगुणश्रेणिकालः सर्वस्तोकः । सयोगिकेवलिगुणश्रेणिकालः संख्येयगुणः । ततोऽपि क्षीणमोहगुणश्रेणिकालः संख्येयगुणः । एवं तावद्वाच्यं यावत्सम्यक्त्वोत्पादगुणश्रेणिकालः संख्येयगुणः । स्थापना । एषा सम्यक्त्वोत्पादगुणश्रेणिः । पुनर्यथोत्तरमसंख्येयगुणदलिकाः । कालतश्च संख्येयगुणाः । उपरिष्टाच्च पृथक्त्वेन यथोत्तरं विशाला विशालतराः । अथोच्येत—कथं दलिकं यथोत्तरमसंख्येयगुणं प्राप्यते ? उच्यते—सम्यक्त्वं ह्युत्पादयन् मिथ्यादृष्टिर्भवति, ततस्तस्य स्तोकं गुणश्रेणिदलिकं । सम्यक्त्वोत्पत्तौ सत्यां पुनः प्राक्तनगुणश्रेण्यपेक्षयाऽसंख्येयगुणदलिका गुणश्रेणिः, विशुद्धत्वात् । ततो देशविरतस्य गुणश्रेणिरसंख्येयगुणदलिका, सम्यग्दृष्ट्यपेक्षया देशविरतस्यातिविशुद्धत्वात् । ततोऽपि सर्वविरतस्य गुणश्रेणिरसंख्येयगुणदलिका, देशविरतात्सर्वविरतस्य विशुद्धतरत्वात् । ततोऽपि संयत-

स्यानन्तानुबन्धिनां विसंयोजने गुणश्रेणिरसंख्येयगुणदलिका, तस्यातिविशुद्धतरत्वात् । एवमुत्तरोत्तरविशुद्धिप्रकर्षवशाद्यथोत्तरमसंख्येयगुणदलिका जावनीया ॥ ८-९ ॥

संप्रति का गुणश्रेणिः कस्यां गतौ प्राप्यत इत्येतन्निरूपणार्थमाह—

तिन्नि वि पढमिल्लाओ मिच्छत्तगए वि होज्ज अन्नजवे । पगयं तु गुणियकम्मे गुणसेढीसीसगाणुदये ॥ १० ॥

तिन्नि त्ति—आद्यास्तिस्रो गुणश्रेणयः सम्यक्त्वोत्पाददेशविरतिसर्वविरतिनिमित्ता कटित्येव मिथ्यात्वं गतस्य अप्रशस्तेन च मरणेन कटित्येव मृतस्य अन्यजवे नारकादिरूपपरजवे किञ्चित्कालमुदयमाश्रित्य प्राप्यन्ते । शेषास्तु गुणश्रेणयः परजवे नारकादिरूपे न प्राप्यन्ते । नारकादिजवो हि अप्रशस्तमरणेन प्राप्यते । न च शेषासु गुणश्रेणिषु मतीष्वप्रशस्तमरणसंजवः, किंतु क्षीणास्वेव तथा चोक्तं—"कत्ति गुणाओ पडिए मिच्छत्तगयम्मि आइमा तिन्नि । लब्भंति न सेसाओ, जं कीणासु असुजमरणं ॥ १ ॥" तथा प्रकृतमत्र उत्कृष्टप्रदेशोदयस्वामित्वे गुणितकर्मांशेन गुणश्रेणीशिरसामुदये वर्तमानेन ॥ १० ॥

आवरणविग्घमोहाण जिणोदइयाण वावि नियगंते । लहुखवणाए ओही णणोहिलद्धिस्स उक्कस्सो ॥११॥

आवरण त्ति—आवरणं पञ्चप्रकारं ज्ञानावरणं, चतुःप्रकारं दर्शनावरणं, 'विग्घ त्ति' पञ्चप्रकारमन्तरायं, एतासां चतुर्दशप्रकृतीनां । लघुक्षपणया शीघ्रक्षपणार्थं । अन्युद्यतस्य । द्विविधा हि क्षपणा—लघुक्षपणा, चिरक्षपणा च । तत्र योऽष्टवार्षिक एव सप्तमासाभ्यधिकः संयमं प्रतिपन्नः, तत्प्रतिपत्त्यनन्तरं चान्तर्मुहूर्तेन क्षपकश्रेणिमारजते, तस्य या

क्षपणा सा लघुक्षपणा । यस्तु प्रभूतेन कालेन संयमं प्रतिपद्यते । संयमप्रतिपत्तेरप्यूर्ध्वं प्रभूतेन कालेन क्षपकश्रेणिमारभते, तस्य या क्षपणा सा चिरक्षपणा । तया च प्रभूताः पुद्गलाः परिसटन्ति, स्तोका एव च शेषीभवन्ति । ततो न तथा उत्कृष्टः प्रदेशोदयो लभ्यते । तत उक्तं लघुक्षपणयाऽभ्युत्थितस्येति । तस्य गुणितकर्मांशस्य क्षीणमोहगुणस्थानकचरमसमये गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयो भवति । नवरं 'ओहीणमोहिलद्धिस त्ति' अवध्योरवधिज्ञानावरणावधिदर्शनावरणयोरनवधिलब्धिकस्यावधिलब्धिरहितस्य क्षपणायोत्थितस्योत्कृष्टः प्रदेशोदयो वाच्यः । अवधिज्ञानं ह्युत्पादयतो बहवः पुद्गलाः परिसटन्ति क्षीयन्ते । ततो नावधियुक्तस्योत्कृष्टप्रदेशोदयलाभ इत्यनवधिलब्धियुक्तस्येत्युक्तं । तथा मोहानां मोहनीयप्रकृतीनां सम्यक्त्वसंज्वलनचतुष्टयवेदत्रयाख्यानामष्टानां गुणितकर्मांशस्य क्षपकस्य स्वस्वोदयचरमसमये उत्कृष्टः प्रदेशोदयः । तथा जिने केवलिनि उदयो यासां ता जिनोदयिकास्तासां मध्ये औदारिकसप्तकतैजससप्तकसंस्थानषट्कप्रथमसंहननवर्णादिविंशतिपराघातोपघातागुरुलघुविहायोगतिद्विकप्रत्येकस्थिरास्थिरशुभाशुभनिर्माणरूपाणां द्विपञ्चाशत्प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिगुणस्थानकचरमसमये उत्कृष्टः प्रदेशोदयः । सुस्वरदुःस्वरयोः स्वरनिरोधकाले, उच्छ्वासनाम्नः पुनरुच्छ्वासनिरोधकाले । तथाऽन्यतरवेदनीयमनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थंकरोच्चैर्गोत्राणां द्वादशप्रकृतीनां गुणितकर्मांशस्यायोगिकेवलिनश्चरमसमये उत्कृष्टः प्रदेशोदयः ॥ ११ ॥

उवसंतपढमगुणसेढीए निद्दादुगस्स तस्सेव । पावइ सीसगमुदयंति जाय देवस्स सुरनवगे ॥ १२ ॥

उवसंत त्ति—उपशान्तकषायस्यात्मीयप्रथमगुणश्रेणीशिरसि वर्तमानस्य गुणितकर्मांशस्य निद्राद्विकस्य निद्राप्रचलयो-
रुत्कृष्टः प्रदेशोदयः । तथा तस्यैवोपशान्तकषायस्यात्मीयप्रथमगुणश्रेणीशीर्षकोदयमनन्तरसमये प्राप्स्यतीति तस्मिन्
पाश्चात्ये समये जाते देवस्य, ततः स्वप्रथमगुणश्रेणीशिरसि वर्तमानस्य सुरनवकस्य वैक्रियसप्तकदेवद्विकरूपस्योत्कृष्टः
प्रदेशोदयः ॥ १२ ॥

मिच्छत्तमीसणंताणुबंधिअसमत्तथीणगिद्धीणं । तिरिउदएगंताण य बिइया तइया य गुणसेढी ॥ १३ ॥

मिच्छत्त त्ति—इह केनचिद्देशविरतेन सता देशविरतिप्रत्यया गुणश्रेणिः कृता । ततः स संयमं प्रतिपन्नः । ततः संयम-
प्रत्यया गुणश्रेणिः कृता । ततो यस्मिन् काले द्वयोरपि गुणश्रेण्योः शिरसी एकत्र मिलिते, तस्मिन् काले वर्तमानो
गुणितकर्मांशः कश्चिन्मिथ्यात्वं प्रतिपद्यते तस्य तदा मिथ्यात्वानन्तानुबन्धिनामुत्कृष्टः प्रदेशोदयः । यदि पुनः सम्य-
ग्मिथ्यात्वं प्रतिपन्नस्तर्हि सम्यग्मिथ्यात्वस्य, स्त्यानर्द्धित्रिकस्य पुनर्मिथ्यात्वं गतस्यागतस्य वा उत्कृष्टः प्रदेशोदयो
वाच्यः । यतः स्त्यानर्द्धित्रिकस्य प्रमत्तसंयतेऽप्युदयः प्राप्यते । तथा तिर्यक्ष्वेव उदय एकान्तेन यासां तास्तिर्यगुदयै-
कान्ताः एकद्वित्रिचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणनामानस्तासां । अपर्याप्तनाम्नश्च तिर्यक्त्वप्राप्तौ सत्यां देशविरति-
सर्वविरतिगुणश्रेणीशिरसोरेकत्र योगे वर्तमानस्य मिथ्यादृष्टेः स्वस्योदये वर्तमानस्योत्कृष्टः प्रदेशोदयः ॥ १३ ॥

अंतरकरणं होहि त्ति जाय देवस्स तं मुहुत्तंतो । अट्ठण्ह कसायाणं छण्हं पि य नोकसायाणं ॥ १४ ॥

अंतरकरणं ति—इह कश्चित् उपशमश्रेणिं प्रतिपन्नोऽनन्तरसमयेऽन्तरकरणं भविष्यतीति 'तं ति' तस्मिन् पाश्चात्ये

समये कालं कृत्वा देवो जातः, तस्य देवस्योत्पत्त्यनन्तरमन्तर्मुहूर्तात्परतो गुणश्रेणीशिरसि वर्तमानस्याप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टके वेदत्रिकवर्जषट्नोकषायाणामुत्कृष्टः प्रदेशोदयः ॥ १४ ॥

हस्सठिइं बंधित्ता अद्धाजोगाइठिइनिसेगाणं । उक्कस्सपए पढमोदयम्मि सुरनारगाऊणं ॥ १५॥

हस्सठिइ त्ति—अद्धा बन्धकालः, योगो मनोवाकायनिमित्तं वीर्यं, आदिस्थितिः प्रथमा स्थितिः तस्यां दलिकनिक्षेपः आदिस्थितिदलिकनिक्षेपः, एतेषामुत्कृष्टे पदे सति । किमुक्तं भवति ? उत्कृष्टेन बन्धकालेन उत्कृष्टे योगे वर्तमानो ह्रस्वां जघन्यां स्थितिं बद्ध्वा, प्रथमस्थितौ च दलिकनिक्षेपमुत्कृष्टं कृत्वा मृतः सन् देवो नारको वा जातः, तस्य प्रथमोदये प्रथमस्थित्युदये वर्तमानस्य देवस्य देवायुषो नारकस्य नारकायुष उत्कृष्टप्रदेशोदयः ॥ १५ ॥

अद्धाजोगुक्कोसो बंधित्ता भोगभूमिगेसु लहुं । सव्वप्पजीवियं वज्जइत्तु उव्वट्टिया दोण्हं ॥ १६ ॥

अद्ध त्ति—उत्कृष्टे बन्धकाले उत्कृष्टे च योगे वर्तमानो भोगभूमिगेषु तिर्यक्षु मनुष्येषु वा विषये कश्चित्तिर्यगायुः कश्चिन्मनुष्यायुः उत्कृष्टं त्रिपल्योपमस्थितिकं बद्ध्वा, लघु शीघ्रं च मृत्वा त्रिपल्योपमायुष्केष्वेकस्तिर्यक्ष्वपरो मनुष्येषु मध्ये समुत्पन्नः, तत्र च सर्वाल्पजीवितमन्तर्मुहूर्तप्रमाणं वर्जयित्वाऽन्तर्मुहूर्तमेकं धृत्वेत्यर्थः । शेषमशेषमपि (तौ द्वावपि) स्वस्वायुरपवर्तनाकरणेनापवर्तयतः । ततोऽपवर्तनानन्तरं प्रथमसमये तयोस्तिर्यङ्मनुष्ययोर्यथासंख्यं तिर्यङ्मनुष्यायुषोरुत्कृष्टः प्रदेशोदयः ॥ १६ ॥

॥ १९२ ॥

दूभगणाएज्जाजस गइदुगअणुपुव्वितिगसनीयाणं। दंसणमोहक्खवणे देसविरइ विरइगुणसेढी ॥ १७ ॥

दूभग त्ति—इहाविरतसम्यग्दृष्टिर्दर्शनमोहनीयत्रितयं क्षपयितुमभ्युद्यतो गुणश्रेणिं करोति । ततः स एव देशविरतिं प्रतिपन्नस्तन्निमित्तां गुणश्रेणिं करोति । ततः स एव सर्वविरतिं प्रतिपन्नस्ततः सर्वविरतिनिमित्तां गुणश्रेणिं करोति । ततः करणपरिसमाप्तौ सत्यां संक्लिष्टो भूत्वा पुनरप्यविरतो जातः, तस्य तिसृणामपि गुणश्रेणीनां शिरस्सु वर्तमानस्य तस्मिन्नेव भवे स्थितस्य दुर्भगानादेयायशःकीर्तिनीचैर्गोत्राणामुत्कृष्टः प्रदेशोदयः । अथ नरकेषु बद्धायुष्कत्वान्नारको जातस्तर्हि तस्य पूर्वोक्तानां नरकद्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ तिर्यक्षूत्पन्नस्तर्हि तस्य पूर्वोक्तानां तिर्यग्द्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ मनुष्यो जातस्तर्हि मनुष्यानुपूर्वीसहितानामिति ॥ १७ ॥

संघयणपंचगस्स य बिइयादीतिन्नि होंति गुणसेढी। आहारगउज्जोयाणुत्तरतणु अप्पमत्तस्स ॥ १८ ॥

संघयण त्ति—इह कश्चिन्मनुष्यो देशविरतिं प्रतिपन्नः, ततः स देशविरतिप्रत्यया गुणश्रेणिं करोति । ततः स एव विशुद्धिप्रकर्षवशतः सर्वविरति प्रतिपन्नः, ततः सर्वविरतिप्रत्ययां गुणश्रेणिं करोति । ततः स एव तत्राविधविशुद्धिवशादनन्तानुबन्धिनां विसंयोजनायोत्थितः, ततस्तन्निमित्ता गुणश्रेणिं करोति । एवं द्वितीयादयस्तिस्रो गुणश्रेणयो भवन्ति । ताश्च कृत्वा तासां शिरस्सु वर्तमानस्य प्रथमसंहननवर्जानां पञ्चानां संहनानानां यथायोग्यमुदयप्राप्तानामुत्कृष्टः प्रदेशोदयः। तयोत्तरतनौ उत्तरशरीरे आहारके वर्तमानस्याप्रमत्तभावं गतस्य संयतस्य प्रथमगुणश्रेणीशिरसि वर्तमानस्याहारकससकोद्योतयोरुत्कृष्टः प्रदेशोदयः ॥ १८ ॥

बेइंदिय थावरगो कम्मं काऊण तस्ससं खिप्पं । आयावस्स उ तवेइ पढमसमयम्मि वट्टंतो ॥ १९ ॥

बेइंदिय त्ति—गुणितकर्मांशः पञ्चेन्द्रियः सम्यग्दृष्टिर्जातः, ततः सम्यक्त्वनिमित्तां गुणश्रेणिं कृतवान् । ततस्तस्या गुणश्रेणीतः प्रतिपतितो मिथ्यात्वं गतः । गत्वा च द्वीन्द्रियमध्ये समुत्पन्नः । तत्र च द्वीन्द्रियप्रायोग्यां स्थितिं मुक्त्वा शेषां सर्वामप्यपवर्तयति । ततस्ततोऽपि मृत्वा एकेन्द्रियो जातः । तत्रैकेन्द्रियसमां स्थितिं करोति । शीघ्रमेव च शरीरपर्याप्त्या पर्याप्तः, तस्य तद्वेदिन आतपवेदिनः खरबादरपृथ्वीकायिकस्य शरीरपर्याप्त्यनन्तरं प्रथमसमये आतपनाम्न उत्कृष्टः प्रदेशोदयः एकेन्द्रियो द्वीन्द्रियस्थितिं झटित्येव स्वयोग्या करोति न त्रीन्द्रियादिस्थितिमिति द्वीन्द्रियग्रहणं ॥ १९ ॥

तदेवमुक्त उत्कृष्टप्रदेशोदयस्वामी, संप्रति जघन्यप्रदेशोदयस्वाम्यभिधीयते—

पगयं तु खवियकम्मे जहन्नसामी जहन्नदेवठिइ । भिन्नमुहुत्ते सेसे मिच्छत्तगतो अतिकिलिठो ॥ २० ॥

कालगएगिंदियगो पढमे समये व मइसुयावरणे । केवलदुगमणपज्जवचक्खुअचक्खूण आवरणा ॥ २१ ॥

पगयं ति—जघन्यस्वामीति भावप्रधानोऽयं निर्देशः, प्राकृतत्वाच्च ततः परस्याः सप्तम्या लुक् । ततोऽयमर्थः—जघन्यप्रदेशोदयस्वामित्वे । प्रकृतमधिकारः क्षपितकर्मांशेन । सूत्रे चात्र सप्तमी तृतीयार्थे वेदितव्या । तत्र कश्चित्क्षपितकर्मांशो देवो जघन्यस्थितिर्दशवर्षसहस्रायुरुत्पत्त्यनन्तरमन्तर्मुहूर्ते गते सति सम्यक्त्वं प्रतिपद्यते । तच्च सम्यक्त्वं दशवर्षसहस्राणि देशोनानि यावत् परिपाल्यान्तर्मुहूर्तावशेषे जीविते मिथ्यात्वं गतः । स चातिसंक्लिष्टपरिणामो वक्ष्यमाणकर्मणामु-

त्कृष्टां स्थितिं बद्धुमारभते । प्रभूतं च दलिकं तदानीमुद्वर्तयति तावद्यावदन्तर्मुहूर्तं । ततः संक्लिष्टपरिणाम एव कालं
कृत्वा एकेन्द्रियो जातः । तस्य प्रथमसमये मतिज्ञानावरणश्रुतज्ञानावरणकेवलज्ञानावरणकेवलदर्शनावरणमनःपर्यवज्ञा-
नावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां जघन्यः प्रदेशोदयो भवति । इह हि प्रायेण सर्वं दलिकमुद्वर्तितमिति
कृत्वा प्रथमसमये स्तोकं प्राप्यते । अन्यच्चोत्कृष्टसंक्लेशयुक्तस्य प्रदेशोदीरणा स्तोका भवति । यतस्तस्यानुभागोदीरणा
बह्वी प्रवर्तते । यत्र चानुभागोदीरणा बह्वी प्रवर्तते तत्र स्तोका प्रदेशोदीरणा, ततो मिच्छत्तगतो अतिकिलिट्ठो
इत्याद्युक्तं ॥ २०–२१ ॥

उहीणसंजमाउ देवत्तगए गयस्स मिच्छत्तं । उक्कोसठिइबंधे विकड्ढणा आलिगं गंतुं ॥ २२ ॥

उहीण त्ति—क्षपितकर्मांशः संयमं प्रतिपन्नः समुत्पन्नावधिज्ञानदर्शनोऽप्रतिपतितावधिज्ञानदर्शन एव देवो जातः, तत्र
चान्तर्मुहूर्ते गते मिथ्यात्वं प्रतिपन्नः । ततो मिथ्यात्वप्रत्ययेनोत्कृष्टां स्थितिं बद्धुमारभते, प्रभूतं च दलिकं विकर्षयति
उद्वर्तयतीत्यर्थः । तत आवलिकां गत्वाऽतिक्रम्य बन्धावलिकायामतीतायामित्यर्थः । अवध्योरवधिज्ञानावरणावधिदर्श-
नावरणयोर्जघन्यः प्रदेशोदयः ॥ २२ ॥

वेयणियंतरसोगारउच्च उहि व निद्दपयला य । उक्कस्स ठिइबंधा पडिभग्गपवेइया नवरं ॥ २३ ॥

वेयणियंतर त्ति—द्वयोर्वेदनीययोः सातासातयोः पञ्चानामन्तरायाणां शोकारत्युच्चैर्गोत्राणां च जघन्यः प्रदेशोद-
योऽवधिज्ञानावरणस्येव वेदितव्यः । निद्राप्रचलयोरपि तथैव । केवलमुत्कृष्टस्थितिबन्धात् प्रतिभग्नस्य प्रतिपतितस्य

निद्राप्रचलयोरनुभवितुं छद्मस्थ चेति द्रष्टव्यं । उत्कृष्टस्थितिबन्धो हि अतिशयेन संक्लिष्टस्य भवति । न चातिसंक्लेशे वर्तमानस्य निद्रोदयसंभवः, तत उक्तं उत्कृष्टस्थितिबन्धात्प्रतिभग्नस्येति ॥ २३ ॥

वरिसवरतिरियथावरनीयं पि य मइसमं नवरि तिन्नि। निद्दानिद्दा इंदियपज्जत्ती पढमसमयम्मि ॥२४॥

वरिसवर त्ति—वर्षवरो नपुंसकवेदः, ततो नपुंसकवेदतिर्यग्गतिस्थावरनीचैर्गोत्राणां जघन्यः प्रदेशोदयो मतिज्ञानावरणस्येवावसेयः । निद्रानिद्रादयोऽपि तिस्रः प्रकृतयो जघन्यप्रदेशोदयविषये मतिज्ञानावरणवद्भावनीयाः । नवरमिन्द्रियपर्याप्त्या पर्याप्तस्य प्रथमसमये इति द्रष्टव्यं। ततोऽनन्तरसमये उदीरणायाः संभवेन जघन्यप्रदेशोदयासंभवात् ॥ २४ ॥

दंसणमोहे तिविहे उदीरणुदए उ आलिगं गंतुं । सत्तरसण्ह वि एवं उवसमइत्ता गए देवे ॥ २५ ॥

दंसणमोहे त्ति—क्षपितकर्मांशस्य औपशमिकसम्यग्दृष्टेरौपशमिकसम्यक्त्वात् प्रच्यवमानस्य अन्तरकरणे स्थितेन द्वितीयस्थितेः सकाशात् सम्यक्त्वादीनां दलिकानि समाकृष्य यान्यन्तरकरणे चरमे आवलिकामात्रभागे गोपुच्छाकारसंस्थानेन रचितानि, तद्यथा–प्रथमसमये प्रभूतं । द्वितीयसमये विशेषहीनं। तृतीयसमये विशेषहीनं । एवं यावच्चरमसमये विशेषहीनं । तेषामुदय उदीरणोदय उच्यते । तस्मिन् उदीरणोदये आवलिकामात्रं गत्वा आवलिकायाश्चरमसमये सम्यक्त्वमिश्रमिथ्यात्वानां स्वस्वोदययुक्तस्य जघन्यप्रदेशोदयः । तथाऽनन्तानुबन्धिवर्जद्वादशकषायपुरुषवेदहास्यरतिभयजुगुप्सारूपाः सप्तदश प्रकृतीरुपशमय्य देवलोकं गतस्य एवमेवेति उदीरणोदयचरमसमये तासां सप्तदशप्रकृतीनां जघन्यः प्रदेशोदयः । आसां हि सप्तदशानामपि प्रकृतीनामन्तरकरणं कृत्वा देवलोकं गतः सन् प्रथमसमये एव द्वितीयस्थितेः

यस्थितेः सकाशाद्दलिकमाकृष्योदयसमयादारभ्य गोपुच्छाकारेण विरचयति । तद्यथा—उदयसमये प्रभूतं । द्वितीयसमये विशेषहीनं । तृतीयसमये विशेषहीनं । एवं यावदावलिकाचरमसमयः । तत आवलिकाचरमसमये जघन्यः प्रदेशोदयो लभ्यते ॥ २५ ॥

चउरुवसमित्तु पच्छा संजोइय दीहकालसम्मत्ता । मिच्छत्तगए आवलिगाए संजोयणाणं तु ॥ २६ ॥

चउरुवसमित्तु त्ति—चतुरो वारान् मोहनीयमुपशमय्य पश्चादन्तर्मुहूर्ते गते सति मिथ्यात्वं गतः । ततोऽपि मिथ्यात्वप्रत्ययेन संयोजनान् अनन्तानुबन्धिनो बध्नाति । ततः सम्यक्त्वं गतः । तच्च दीर्घकालं द्वात्रिंशं सागरोपमाणां शतं यावत् अनुपालयन् सम्यक्त्वप्रभावतः प्रभूतान् पुद्गलान् अनन्तानुबन्धिनां संबन्धिनः प्रदेशसंक्रमतः परिसाटयति । ततः पुनरपि मिथ्यात्वं गतः मिथ्यात्वप्रत्ययेन च भूयोऽप्यनन्तानुबन्धिनो बध्नाति । तस्यावलिकाया बन्धावलिकायाश्चरमसमये पूर्वबद्धानामनन्तानुबन्धिनां जघन्यः प्रदेशोदयः । आवलिकाया अनन्तरसमये हि प्रथमसमयबद्धस्य दलिकस्योदयो भवति । ततो जघन्यः प्रदेशोदयो न लभ्यते इति कृत्वा आवलिकायाश्चरमसमये इत्युक्तं । संसारे चैकजीवस्य चतुःकृत्व एव मोहनीयस्योपशमो भवति, न पञ्चकृत्व इति चतुःकृत्वोग्रहणं । मोहोपशमनेन किं प्रयोजनमिति चेदुच्यते—इह मोहोपशमं कुर्वन्नप्रत्याख्यानादिकषायाणां दलिकमन्यत्र गुणसंक्रमेण प्रभूतं संक्रमयति । ततः क्षीणशेषाणां तेषां अनन्तानुबन्धिषु बन्धकाले स्तोकमेव संक्राम(क्रमय)ति, ततो मोहोपशमग्रहणं ॥ २६ ॥

इत्थीए संजमभवे सव्वनिरुद्धम्मि गंतु मिच्छत्तं । देवीए लहुमिच्छी जेट्ठठिइ आलिगं गंतुं ॥ २७ ॥

इत्थीए त्ति—संयमेनोपलक्षितो भवः संयमभवस्तस्मिन् । सर्वनिरुद्धेऽन्तर्मुहूर्तावशेषे । स्त्रिया मिथ्यात्वं गतायाः, ततोऽनन्तरभवे देवीभूतायाः शीघ्रमेव च पर्याप्ताया उत्कृष्टस्थितिबन्धानन्तरमावलिकां गत्वा आवलिकायाश्चरमसमये स्त्रीवेदस्य जघन्यः प्रदेशोदयः । इयमत्र भावना—क्षपितकर्मांशा काचित् स्त्री देशोनां पूर्वकोटिं यावत्संयममनुपाल्यान्तर्मुहूर्ते आयुषोऽवशेषे मिथ्यात्वं गत्वा अनन्तरभवे देवी समुत्पन्ना, शीघ्रमेव च पर्याप्ता । तत उत्कृष्टे संक्लेशे वर्तमाना स्त्रीवेदस्योत्कृष्टां स्थितिं बध्नाति, पूर्वबद्धां चोद्वर्तयति । तत उत्कृष्टबन्धारंभात् परत आवलिकायाश्चरमसमये तस्याः स्त्रीवेदस्य जघन्यः प्रदेशोदयो भवति ॥ २७ ॥

अप्पद्धाजोगचियाणाऊणुक्कस्सगठिईणंते । उवरिं थोवनिसेगे चिरतिव्वासायवेईणं ॥ २८ ॥

अप्पद्ध त्ति—अल्पया बन्धाद्धया अल्पेन च योगेन चितानां बद्धानां चतुर्णामप्यायुषां ज्येष्ठस्थितीनामुत्कृष्टस्थितीनामन्तेऽन्तिमे उपरि सर्वोपरितने समये सर्वस्तोकदलिकनिक्षेपे चिरकालं तीव्रासातवेदनाभिभूतानां क्षपितकर्मांशानां तत्तदायुर्वेदिनां जघन्यः प्रदेशोदयः । तीव्रासातवेदनया ह्यभिभूतानां बहवः पुद्गलाः परिसटन्तीति कृत्वा तीव्रासातवेदिग्रहणं ॥ २८ ॥

संजोयणा विजोजिय देवभवजहन्नगे अइनिरुद्धे । बंधिय उक्कस्सठिई गंतूणेगिंदिया सन्नी ॥ २९ ॥
सव्वलहुं नरयगए निरयगई तम्मि सव्वपज्जत्ते । अणुपुव्वीउ य गइतुल्ला नेया भवादिम्मि ॥ ३० ॥

संजोयणेत्यादि—संयोजनान् अनन्तानुबन्धिनो विसंयोज्य, तद्विसंयोजने हि शेषाणामपि कर्मणां भूयांसः पुद्गलाः परिसटन्ति इति तदुपादानं। ततो जघन्यं देवत्वं प्राप्तः, तत्र चातिनिरुद्धे पश्चिमेऽन्तर्मुहूर्ते प्रतिपन्नमिथ्यात्व एकेन्द्रियप्रायोग्यां प्रकृतीनामुत्कृष्टां स्थितिं बद्ध्वा सर्वसंक्लिष्ट एकेन्द्रियेषूत्पन्नस्तत्र चान्तर्मुहूर्तं स्थित्वाऽसंज्ञिषु मध्ये समायातः। देवो हि मृत्वा नासंज्ञिषु मध्ये गच्छतीति कृत्वा एकेन्द्रियग्रहणं। ततोऽसंज्ञिजन्मानन्तरं शीघ्रं मृत्वा नारको जातः, सर्वपर्याप्तिभिश्च शीघ्रं पर्याप्तः। तस्मिन् सर्वपर्याप्तिपर्याप्ते नारके नरकगतेर्जघन्यः प्रदेशोदयः। पर्याप्तस्य हि प्रभूताः प्रकृतयो विपाकोदयमायान्ति, उदयगताश्च स्तिबुकसंक्रमेण न संक्रामन्ति, तेन प्रकृत्यन्तरदलिकसंक्रमाभावात् जघन्यः प्रदेशोदयः प्राप्यत इति सर्वपर्याप्त इत्युक्तं। आनुपूर्व्यश्चतस्रोऽपि गतितुल्याः स्वस्वगतितुल्या ज्ञेया ज्ञातव्याः। केवलं ताः स्वस्वभवप्रथमसमये वेदितव्याः। तृतीये हि समयेऽन्या अपि बन्धावलिकातीताः कर्मलता उदयमागच्छन्ति, ततो भवप्रथमसमयग्रहणम् ॥ २९–३० ॥

देवगई ओहिसमा नवरिं उज्जोयवेयगो ताहे। आहार जाइ अइचिरसंजममणुपालिऊणंते ॥ ३१ ॥

देवगइ त्ति—देवगतिरवधिसमा अवधिज्ञानावरणसमा अवधिज्ञानावरणस्येव देवगतेरपि जघन्यः प्रदेशोदयो ज्ञातव्य इत्यर्थः। नवरं यदा उद्योतवेदको भवति 'ताहे' तदा देवगतेर्जघन्यः प्रदेशोदयो द्रष्टव्यः। किं कारणमिति चेदुच्यते—यावदुद्योतस्योदयो न भवति तावद्देवगतौ स्तिबुकसंक्रमेण तं संक्रमयति। ततो जघन्यः प्रदेशोदयो न लभ्यते। तत उदयमाप्तस्य पुनरुद्योतस्य स्तिबुकसंक्रमो न भवति, तत उद्योतवेदकग्रहणं। उद्योतवेदकत्वं च पर्याप्तस्य भवति,

नापर्याप्तस्येति पर्याप्तावस्थायां देवगतेर्जघन्यः प्रदेशोदयः । तथा यश्चिरकालं देशोनपूर्वकोटिरूपं यावत्संयममनुपाल्या-न्तिमे काले आहारकशरीरी जातः, उद्योतं च वेदयते, तस्याहारकसप्तकस्य जघन्यः प्रदेशोदयः । चिरकालसंयमपरि-पालने हि भूयांसः कर्मपुद्गलाः परिसटिता भवन्तीति कृत्वा चिरकालसंयमग्रहणं । उद्योतग्रहणे च कारणं प्रागुक्तमे-वानुसर्तव्यं ॥ ३१ ॥

सेसाणं चक्खुसमं तंमि व अन्नंमि व भवे अचिरा । तज्जोगा बहुगीउ पवेययं तस्स ता ताउ ॥ ३२ ॥

सेसाणं ति—उक्तशेषाणां प्रकृतीनां चक्षुःसमं चक्षुर्दर्शनावरणसमं वक्तव्यं तावद्यावदेकेन्द्रियो जातः, ततो येषां कर्मणां तस्मिन्नेव एकेन्द्रियभवे उदयो विद्यते तेषां तत्रैव जघन्यः प्रदेशोदयो वाच्यः । येषां तु कर्मणां मनुजगतिद्वीन्द्रि-यादिजातिचतुष्टयाद्यसंस्थानपञ्चकौदारिकांगोपांगवैक्रियांगोपांगसंहननपट्कविहायोगतिद्विकत्रससुभगसुस्वरदुःस्वरादेयरू-पाणां न तत्रोदयसंभवः तेषामेकेन्द्रियभवादुद्धृत्य तत्तदुदययोग्येषु भवेषूत्पन्नस्य तास्तास्तद्भवयोग्या बह्वीः प्रकृतीर्वेदय-मानस्य, तत्तद्भवयोग्यबहुप्रकृतिवेदनं च पर्याप्तस्योपपद्यते । ततः सर्वाभिः पर्याप्तिभिः पर्याप्तस्य जघन्यः प्रदेशोदयः पर्याप्तस्य बह्व्यः प्रकृतय उदयमागच्छन्ति, उदयप्राप्तानां च प्रकृतीनां स्तिबुकसंक्रमो न भवति। तथा च सति विवक्षित-प्रकृतीनां जघन्यः प्रदेशोदयो लभ्यते इति पर्याप्तस्येति विवृतं । तीर्थकरनाम्नस्तु क्षपितकर्मांशस्योदयप्रथमसमये जघन्यः प्रदेशोदयो ज्ञेयः, परतो गुणश्रेणिदलिकं प्रभूतमवाप्यते इति स न भवति ॥ ३२ ॥ ४१९ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुदयः समाप्तः ॥

तदेवमुक्त उदयः, संप्रति सत्ताभिधानावसरः। तत्र चेमेऽर्थाधिकाराः। तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति। तत्र भेदनिरूपणार्थमाह—

मूलुत्तरपगइगयं चउविहं संतकम्ममवि नेयं। धुवमद्भुवणाईयं अट्ठण्हं मूलपगईणं ॥ १ ॥

मूलुत्तर त्ति—सत्कर्म द्विधा—मूलप्रकृतिगतं उत्तरप्रकृतिगतं च। तत्र मूलप्रकृतिगतमष्टप्रकारं, तद्यथा—ज्ञानावरणीयं दर्शनावरणीयमित्यादि। उत्तरप्रकृतिगतमष्टपञ्चाशदधिकशतप्रकारं, तद्यथा—मतिज्ञानावरणीयमित्यादि। पुनरेकैकं चतुर्विधं, तद्यथा—प्रकृतिसत्कर्म, स्थितिसत्कर्म, अनुभागसत्कर्म, प्रदेशसत्कर्म च। तदेवमुक्तो भेदः, संप्रति साद्यनादिप्ररूपणार्थमाह—'धुवेत्यादि' अष्टानां मूलप्रकृतीनां सत्कर्म त्रिधा, तद्यथा—ध्रुवमध्रुवमनादि च। तत्रानादित्वं सदैव भावात्। ध्रुवाध्रुवताऽभव्यभव्यापेक्षया ॥ १ ॥

संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

दिट्ठिदुगाउगनरगति तणुचोद्दसगं च तित्थगरमुच्चं। दुविहं पढमकसाया होंति चउद्धा तिहा सेसा ॥२॥

दिट्ठिदुग त्ति—दृष्टिद्विकं सम्यक्त्वसम्यङ्मिथ्यात्वरूपं, आयूंषि चत्वारि, 'नरगइ त्ति' मनुष्यद्विकं देवद्विकं नरकद्विकं च, तनुचतुर्दशकं वैक्रियसप्तकाहारकसप्तकरूपं, तथा तीर्थकरनामोच्चैर्गोत्रं च, एतासामष्टाविंशतिप्रकृतीनां सत्कर्म द्विविधं द्विप्रकारं, तद्यथा—सादि अध्रुवं च। साद्यध्रुवता चाध्रुवसत्कर्मत्वादवसेया। तथा प्रथमकषाया अनन्तानुबन्धिनः

सत्कर्मापेक्षया चतुर्विधाः, तद्यथा—सादयोऽनादयो ध्रुवा अध्रुवाश्च । तथाहि—ते सम्यग्दृष्टिना प्रथममुद्वलिताः, ततो मिथ्यात्वं गतेन यदा भूयोऽपि मिथ्यात्वप्रत्ययेन बध्यन्ते, तदा सादयः । तत्स्थानमप्राप्तस्य पुनरनादयः । ध्रुवाध्रुवता पूर्ववत् । तथा शेषाः षड्विंशतिशतसंख्याः प्रकृतयः सत्कर्मापेक्षया त्रिधा त्रिप्रकाराः, तद्यथा—अनादयो ध्रुवा अध्रुवाश्च । तत्रानादित्वं ध्रुवसत्कर्मत्वात् । ध्रुवाध्रुवता पूर्ववत् ॥ २ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वं वक्तव्यं । तच्च द्विधा—एकैकप्रकृतिगतं प्रकृतिस्थानगतं च । तत्रैकैकप्रकृतिगतं स्वामित्वमभिधित्सुराह—

छउमत्थंता चउदस दुचरमसमयंमि अत्थि दो निद्दा । बद्धाणि ताव आऊणि वेइयाइं ति जा कसिणं ॥३॥

छउमत्थंत त्ति—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाश्चतुर्दश प्रकृतयः छद्मस्थान्ताः क्षीणकषायवीतरागछद्मस्थगुणस्थानकं यावत्सत्यो भवन्तीत्यर्थः । परतस्तासामभावः । एवमुत्तरत्राप्युक्तगुणस्थानकात्परतोऽभावो वेदितव्यः । तथा द्वे निद्रे क्षीणकषायवीतरागछद्मस्थगुणस्थानकद्विचरमसमयं यावत्सत्यौ स्तः । आयूंषि चत्वार्यपि बद्धानि तावत्सन्ति यावत्कृत्स्नं निरवशेषं वेदितानि न भवन्ति ॥ ३ ॥

तिसु मिच्छत्तं नियमा अट्ठसु ठाणेसु होइ भइयव्वं । आसाणे सम्मत्तं नियमा सम्मं दससु भज्जं ॥ ४ ॥

तिसु त्ति—त्रिषु गुणस्थानकेषु मिथ्यादृष्टिसासादनसम्यग्मिथ्यादृष्टिलक्षणेषु नियमादवश्यंतया मिथ्यात्वं सत् विद्यमानं । शेषेषु पुनरष्टसु गुणस्थानकेषु उपशान्तमोहगुणस्थानकपर्यवसानेषु भाज्यं । तथाहि—अविरतसम्यग्दृष्ट्यादिना

क्षपिते न भवति, उपशान्ते तु भवति । क्षीणमोहादिषु पुनस्तस्यावश्यमभावः । तथा आसादने सासादने सम्यक्त्वं नियमादस्ति । दशसु पुनर्गुणस्थानकेषु मिथ्यादृष्ट्याद्युपशान्तमोहगुणस्थानकपर्यवसानेषु भाज्यं, कदाचिद्भवति कदाचिन्न भवतीत्यर्थः । तथाहि–मिथ्यादृष्टावभव्ये न भवति, भव्येऽपि कदाचिद्भवति कदाचिन्न । तथा सम्यङ्मिथ्यादृष्टित्वं कियत्कालं सम्यक्त्वे उद्वलितेऽपि भवति, ततस्तत्रापि तद्भाज्यं । अविरतादिषु पुनः क्षपकेषु न भवति, उपशमकेषु तु भवति, अतस्तत्रापि तद्भाज्यं ॥ ४ ॥

बिइयतइएसु मिस्सं नियमा ठाणनवगम्मि भयणिज्जं । संजोयणा उ नियमा दुसु पंचसु होइ भइयव्वं ॥ ५ ॥

बिइय त्ति–द्वितीये तृतीये च गुणस्थानके मिश्रं सम्यङ्मिथ्यात्वं नियमादस्ति । यतः सासादनो नियमादष्टाविंशतिसत्कर्मैव भवति, सम्यङ्मिथ्यादृष्टिश्च सम्यङ्मिथ्यात्वं विना न भवति, ततः सासादने सम्यङ्मिथ्यादृष्टौ च सम्यङ्मिथ्यात्वमवश्यमस्ति । स्थाननवके गुणस्थानकनवके मिथ्यादृष्ट्यविरतसम्यग्दृष्ट्यादौ उपशान्तगुणस्थानकान्ते भजनीयं, कदाचिद्भवति कदाचिन्न भवति । भावना च प्रागुक्तप्रकारेण स्वयमेव कर्तव्या, सुगमत्वात् । तथा संयोजना अनन्तानुबन्धिनो द्वयोर्मिथ्यादृष्टिसासादनयोर्नियमाद्भवन्ति । यत एताववश्यमनन्तानुबन्धिनो बध्नाति । पञ्चसु पुनर्गुणस्थानकेषु सम्यङ्मिथ्यादृष्ट्यादिष्वप्रमत्तसंयतपर्यन्तेषु भजनीयाः । यदि उद्वलितास्ततो न सन्ति, इतरथा तु सन्तीत्यर्थः ॥ ५ ॥

खवगानियट्टिअद्धा संखिज्जा होंति अट्ठ वि कसाया । निरयतिरियतेरसगं निद्दानिद्दातिगेणुवरिं ॥ ६ ॥

खवग त्ति–क्षपकस्य अनिवृत्तिबादरसंपरायाद्धाया यावत् संख्येया भागास्तावत् अष्टावपि अप्रत्याख्यानप्रत्याख्या-

नसंज्ञाः कषायाः सन्ति । परतो न विद्यन्ते, क्षीणत्वात्। उपशमश्रेणिमधिकृत्य पुनरुपशान्तमोहगुणस्थानकं यावत् सन्तो वेदितव्याः। निरयतिर्यगेकान्तप्रायोग्यं यन्नामत्रयोदशकं नरकद्विकतिर्यग्द्विकैकद्वित्रिचतुरिन्द्रियजातिस्थावरातपोद्योतसूक्ष्मसाधारणरूपं निद्रानिद्रात्रिकेण सह संयुक्तं कषायाष्टकक्षयादुपरि स्थितिखंडेषु सहस्रेषु गतेषु सत्सु युगपत्क्षयमेति। ततो यावन्न क्षयं याति तावत् सत्, क्षये च सति असत्। उपशमश्रेण्यां पुनरेताः षोडशापि प्रकृतय उपशान्तमोहगुणस्थानकं यावत् सत्यो वेदितव्याः॥ ६॥

अपुमित्थीए समं वा हासछक्कं च पुरिससंजलणा। पत्तेगं तस्स कमा तणुरागंतो त्ति लोभो य ॥ ७॥

अपुमित्थीए त्ति—पूर्वोक्तप्रकृतिषोडशकक्षयादनन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु नपुंसकवेदः क्षीयते, यावच्च न क्षीयते तावत् सन्। ततः पुनरपि स्थितिखंडेषु संख्येयेषु गतेषु सत्सु स्त्रीवेदः क्षीयते, सोऽपि यावत्क्षयं न याति तावत्सन्। एवं स्त्रीवेदेन पुरुषवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं। नपुंसकवेदेन प्रतिपन्नस्य तु स्त्रीवेदनपुंसकवेदौ युगपत्क्षयमुपगच्छतः, यावच्च न क्षयमुपगच्छतस्तावत्सन्तौ। उपशमश्रेणिमधिकृत्य पुनरुपशान्तमोहगुणस्थानकं यावत्सन्तौ। ततः स्त्रीवेदक्षयानन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु हास्यादिषट्कं युगपत्क्षयमुपयाति, ततः समयोनावलिकाद्विकातिक्रमे पुरुषवेदः। एवं पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं। स्त्रीवेदेन नपुंसकवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य पुनः पुरुषवेदो हास्यादिषट्कं च युगपत्क्षीयते। ततः पुरुषवेदक्षयानन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु संज्वलनक्रोधः क्षयमुपयाति। ततः पुनरपि संख्येयेषु स्थितिखंडेषु गतेषु सत्सु संज्वलनमानः। ततोऽपि संख्येयेषु स्थिति-

खंरूपेषु गतेषु संज्वलनमाया । यावच्च हास्यादिप्रकृतयः क्षयं नोपयान्ति तावत्सत्यः । 'तणुरागंतो त्ति लोन्नो य' लोन्नः संज्वलनलोन्नो यावत्तनुरागान्तः सूक्ष्मसंपरायगुणस्थानकान्तः तावत् सन् वेदितव्यः, परतोऽसन् । उपशमश्रेणिमधिकृत्य पुनर्हास्यादिप्रकृतयः सर्वा अपि उपशान्तमोहगुणस्थानकं यावत् सत्योऽवसेयाः ॥ ७ ॥

मणुयगइजाइतसबायरं च पज्जत्तसुन्नगआएज्जं । जसकित्ती तित्थयरं वेयणिउच्चं च मणुयाणं ॥ ८ ॥

न्नवचरिमस्ससमयम्मि उ तम्मग्गिल्लसमयम्मि सेसाउ । आहारगतित्थयरा न्नज्जा डुसु नत्थि तित्थयरं ॥ए॥

मणुयगईत्यादि—मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुन्नगादेययशःकीर्तितीर्थकरान्यतरवेदनीयोच्चैर्गोत्रमनुष्यायूरूपा द्वादश प्रकृतयो न्नवचरमसमये सन्ति, अयोगिकेवलिचरमसमयं यावत् विद्यन्ते, परतोऽसत्य इत्यर्थः । शेषाः पुनरुक्तव्यतिरिक्ताः सर्वा अपि त्र्यशीतिसंख्याः । 'तम्मग्गिल्लसमयम्मि त्ति' न्नवचरमसमयपाश्चात्यसमयेऽयोगिकेवलिद्विचरमसमये इत्यर्थः । सत्यो न्नवन्ति, चरमसमये त्वसत्यः । आहारकतीर्थकरनामनी सर्वेष्वपि गुणस्थानकेषु न्नाज्ये । द्वयोः पुनर्गुणस्थानकयोः सासादनसम्यग्मिथ्यादृष्टिरूपयोस्तीर्थकरनाम नियमान्न विद्यते, तीर्थकरनामसत्कर्मणः स्वन्नावत एवोक्तरूपे गुणस्थानकद्विके गमनासंन्नवात् ॥ ८–ए ॥

तदेवमुक्तमेकैकप्रकृतिसत्कर्म, संप्रति प्रकृतिस्थानसत्कर्मप्ररूपणार्थमाह—

पढमचरिमाणमेगं उन्नवचत्तारि वीयगे तिन्नि । वेयणियाउयगोएसु दोन्नि एगो त्ति दो होंति ॥१०॥

पढम त्ति–प्रथमचरमयोर्ज्ञानावरणान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं। तच्च क्षीणकषायचरमसमयं यावत् सत्, परतोऽसत्। तथा द्वितीये दर्शनावरणीये त्रीणि प्रकृतिस्थानानि, तद्यथा—षट् नव चतस्रः। तत्र सकलदर्शनावरणीयप्रकृतिसमुदायो नव। ताश्च नव प्रकृतय उपशमश्रेणिमधिकृत्य उपशान्तमोहगुणस्थानकं यावत् सत्यः। क्षपकश्रेणिमधिकृत्य पुनरनिवृत्तिबादरसंपरायाद्धाया यावत् संख्येयभागास्तावत्सत्यः, परतः स्त्यानर्द्धित्रिकक्षये षट् भवन्ति। ताश्च तावत्सत्यो यावत् क्षीणकषायस्य द्विचरमसमयः। तस्मिन् द्विचरमसमये निद्राप्रचले व्यवच्छिद्येते। ततश्चरमसमये चतस्र एव सत्यः। ता अपि तत्र व्यवच्छिद्यन्ते। तथा वेदनीयायुर्गोत्राणां द्वे प्रकृतिस्थाने, तद्यथा—द्वे एका च। तत्र वेदनीयस्य यावदेकं न क्षीणं तावत् द्वे सत्यौ। एकस्मिंस्तु क्षीणे एका। गोत्रस्य यावदेकं न क्षीणं उद्वलितं तावत् द्वे सत्यौ। नीचैर्गोत्रे क्षपिते उच्चैर्गोत्रे वा उद्वलिते पुनरेका सती। आयुषस्तु यावद्बद्धमायुर्नोदेति तावत् द्वे प्रकृती सत्यौ। उदिते तु तस्मिन् प्राक्तनं क्षीणमिति एका प्रकृतिः॥ १०॥

संप्रति मोहनीयस्य प्रकृतिसत्कर्मस्थानप्रतिपादनार्थमाह—

एगाइ जाव पंचगमेक्कारस बार तेरसिगवीसा। बिय तिय चउरो छ सत्त अट्ठवीसा य मोहस्स॥ ११॥

एगाइ त्ति–मोहनीयस्य पञ्चदश प्रकृतिसत्कर्मस्थानानि। तद्यथा–एका, द्वे, तिस्रः, चतस्रः पञ्च, एकादश, द्वादश, त्रयोदश, एकविंशतिः, द्वाविंशतिः, त्रयोविंशतिः, चतुर्विंशतिः, षड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिश्चेति। एतानि सुखावबोधार्थं गाथाक्रमवैपरीत्येन भाव्यन्ते—तत्र मोहनीयस्य सर्वप्रकृतिसमुदायोऽष्टाविंशतिः। सम्यक्त्वे उद्वलिते सप्त-

विंशतिः । ततोऽपि सम्यङ्मिथ्यात्वे उद्वलिते षड्विंशतिः । अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिः । अष्टाविंशतिरनन्तानुबन्धिचतुष्टये क्षीणे चतुर्विंशतिः । ततो मिथ्यात्वे क्षीणे त्रयोविंशतिः । ततः सम्यङ्मिथ्यात्वे क्षीणे द्वाविंशतिः । ततः सम्यक्त्वे क्षीणे एकविंशतिः । ततोऽष्टसु कषायेषु क्षीणेषु त्रयोदश । ततो नपुंसकवेदे क्षीणे द्वादश । ततः स्त्रीवेदे क्षीणे एकादश । ततः षट्सु नोकषायेषु क्षीणेषु पञ्च । ततः पुरुषवेदे क्षीणे चतस्रः । ततः संज्वलनक्रोधे क्षीणे तिस्रः । ततः संज्वलनमाने क्षीणे द्वे । संज्वलनमायायां च क्षीणायामेका ॥ ११ ॥

संप्रत्येतानि प्रकृतिसत्कर्मस्थानानि गुणस्थानकेषु विचिन्तयन्नाह—

तिन्नेग तिगं पणगं पणगं पणगं च पणगमह दोन्नि । दस तिन्नि दोन्नि मिछाइगेसु जावोवसंतो त्ति ॥१२॥

तिन्नेग त्ति–यावदुपशान्तमोहगुणस्थानकं तावन्मिथ्यादृष्ट्यादिषु गुणस्थानकेषु यथासंख्यं त्र्यादीनि प्रकृतिसत्कर्मस्थानानि भवन्ति । तत्र मिथ्यादृष्टिगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि । तद्यथा–अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिश्च । एतानि प्रागेव भावितानि । सासादनसम्यग्दृष्टिगुणस्थानके एकं प्रकृतिसत्कर्मस्थानं अष्टाविंशतिरूपं । सम्यङ्मिथ्यादृष्टिगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि, तद्यथा—अष्टाविंशतिः सप्तविंशतिश्चतुर्विंशतिश्च । इह योऽष्टाविंशतिसत्कर्मा सन् सम्यङ्मिथ्यात्वं गतस्तमाश्रित्याष्टाविंशतिः । येन पुनर्मिथ्यादृष्टिना सता पूर्वं सम्यक्त्वमुद्वलितं ततः सप्तविंशतिसत्कर्मणा सता सम्यङ्मिथ्यात्वमनुभवितुमारब्धं तं प्रति सप्तविंशतिः । चतुर्विंशतिसत्कर्मणां सम्यङ्मिथ्यादृष्टिं प्रतीत्य पुनश्चतुर्विंशतिः प्राप्यते । तथाऽविरतसम्यग्दृष्टिगुणस्थानके पञ्च प्रकृतिसत्कर्मस्थानानि, तद्यथा–अष्टा-

विंशतिः चतुर्विंशतिः त्रयोविंशतिः द्वाविंशतिः एकविंशतिश्च । तत्राष्टाविंशतिरौपशमिकसम्यग्दृष्टेः क्षायोपशमिकसम्यग्दृष्टेर्वा । अष्टाविंशतिसत्कर्मणोऽनन्तानुबन्धिक्षये वेदकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेर्वा चतुर्विंशतिः । वेदकसम्यग्दृष्टेर्मिथ्यात्वे क्षपिते त्रयोविंशतिः । तस्यैव सम्यङ्मिथ्यात्वे क्षपिते द्वाविंशतिः । क्षायिकसम्यग्दृष्टेरेकविंशतिः । तथा देशविरतिगुणस्थानके पञ्च प्रकृतिसत्कर्मस्थानानि, तानि च पूर्वोक्तान्येव । तान्येव प्रमत्तसंयतगुणस्थानके । तान्येव चाप्रमत्तसंयतगुणस्थानके । 'अह दोन्नि त्ति' अथानन्तरं अपूर्वकरणगुणस्थानके द्वे प्रकृतिस्थाने, तद्यथा—चतुर्विंशतिरेकविंशतिश्च । तत्रोपशमश्रेणिं प्रतिपन्नस्य चतुर्विंशतिः, क्षायिकसम्यग्दृष्टिमधिकृत्य द्वयोरपि श्रेण्योरेकविंशतिः । तथाऽनिवृत्तिबादरसंपरायगुणस्थानके दश प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिः एकविंशतिः त्रयोदश द्वादश एकादश पञ्च चतस्रः तिस्रः द्वे एका च । तत्र चतुर्विंशतिरुपशमश्रेणिमधिकृत्य, एकविंशतिः क्षायिकसम्यग्दृष्टेर्द्वयोरपि श्रेण्योः शेषाणि पुनः क्षपकश्रेण्यां, तानि च प्रागेव भावितानि । सूक्ष्मसंपरायगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिः एकविंशतिः एका च । तत्र चतुर्विंशतिरौपशमिकसम्यग्दृष्टेः, एकविंशतिश्च क्षायिकसम्यग्दृष्टेः, एते च द्वे अपि प्रकृतिसत्कर्मस्थाने उपशमश्रेण्यां, एका च क्षपकश्रेण्या । तथा द्वे प्रकृतिसत्कर्मस्थाने उपशान्तमोहगुणस्थानके, तद्यथा—चतुर्विंशतिरेकविंशतिश्च । एते च द्वे अपि प्रागिव भावनीये ॥ १२ ॥

संप्रति मतान्तरमाह—

संखीणदिट्ठिमोहे केई पणवीसइं पि इच्छंति । संजोयणाण पच्छा नासं तेसिं उवसमं च ॥ १३ ॥

संखीण त्ति–केचिदाचार्याः पञ्चविंशतिलक्षणमपि प्रकृतिसत्कर्मस्थानमिच्छन्ति । ते हि प्रथमतो दृष्टिमोहे दर्शनमोहनीयत्रितये संक्षीणे क्षयमुपगते सति पश्चादनन्तानुबन्धिनां नाशमिच्छन्ति । ततस्तन्मतेन दर्शनमोहनीयत्रितयक्षये सति पञ्चविंशतिरूपमपि प्रकृतिसत्कर्मस्थानं प्राप्यते । यद्येवं तर्हि तन्मतमिह कस्मान्नाभ्युपगम्यते ? उच्यते—आर्षेण विरोधात् । यदाह चूर्णिकृत्—"तं आरिसे न मिलइ तेण न इच्छिज्जइ त्ति" । तथा त एवाचार्यास्तेषामनन्तानुबन्धिनामुपशमं चेच्छन्ति, नान्ये परमार्थवेदिनः । अत एव च प्रागनन्तानुबन्धिनामुपशमनाऽस्माभिर्नोपदर्शिता ॥ १३ ॥

संप्रति नामकर्मणः प्रकृतिसत्कर्मस्थानानि प्रतिपिपादयिषुराह—

तिदुगसयं छप्पंचगतिगनउई नउई गुणनउई य । चउतिगदुगाहिगासी नव अट्ठ य नामठाणाइं ॥१४॥

तिदुगसयं ति–नामकर्मणो द्वादश प्रकृतिसत्कर्मस्थानानि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः त्रिनवतिः नवतिः एकोननवतिः चतुरशीतिः त्र्यशीतिः द्व्यशीतिः नव अष्टौ चेति । तत्र सर्वनामकर्मप्रकृतिसमुदायस्त्र्युत्तरशतं । तदेव तीर्थकररहितं द्व्युत्तरशतं । त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः । सैव तीर्थकररहिता पञ्चनवतिः । पञ्चनवतिरेव देवद्विकरहिता नरकद्विकरहिता वा त्रिनवतिः । तथा त्र्युत्तरशतमेव नामत्रयोदशकरहितं नवतिः । सैव तीर्थकररहिता एकोननवतिः । तथा त्रिनवतिर्नरकद्विकवैक्रियसप्तकरहिता देवद्विकवैक्रियसप्तकरहिता वा चतुरशीतिः । षण्णवतिस्त्रयोदशरहिता त्र्यशीतिः । पञ्चनवतिस्त्रयोदशरहिता द्व्यशीतिः, अथवा चतुरशीतिर्मनुजद्विकरहिता द्व्यशीतिः । मनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकररूपा नव । ता एव तीर्थकररहिता अष्टौ ॥१४॥

एतान्येव प्रकृतिसत्कर्मस्थानानि गुणस्थानकेषु चिन्तयन्नाह—

एगे छ द्दोसु दुगं पंचसु चत्तारि अट्ठगं दोसु । कमसो तीसु चउक्कं छत्तु अजोगम्मि ठाणाणि ॥१५॥

एगे त्ति–एकस्मिन्मिथ्यादृष्टिलक्षणे गुणस्थानके षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा—द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः त्रिनवतिः चतुरशीतिः द्व्यशीतिः । ननु षण्णवतिस्तीर्थकरनामसहिता जवति ततः सा कथं मिथ्यादृष्टौ प्राप्यते ? उच्यते—इह कश्चित् नरकेषु बद्धायुष्कः पश्चात्सम्यक्त्वं प्राप्य, तन्निमित्तं तीर्थकरनामकर्म बद्ध्वा नरकाभिमुखः सन् सम्यक्त्वं त्यक्त्वा मिथ्यादृष्टिर्जातः, ततो नरके उत्पन्नः सन् अन्तर्मुहूर्तानन्तरं पुनरपि सम्यक्त्वं प्रतिपद्यते, ततोऽन्तर्मुहूर्तं कालं यावत् षण्णवतिर्मिथ्यादृष्टौ प्राप्यते, आहारकसप्तकतीर्थकरनामसत्कर्मा च मिथ्यात्वं न प्रतिपद्यते । उक्तं च–"उजए संति न मिच्छो" इति । ततस्त्र्युत्तरशतं मिथ्यादृष्टौ न प्राप्यते । तथा द्वयोः सासादनसम्यङ्मिथ्यादृष्टिगुणस्थानकयोर्द्वे द्वे प्रकृतिसत्कर्मस्थाने, तद्यथा–द्व्युत्तरशतं पञ्चनवतिश्च । तथा पञ्चसु अविरतसम्यग्दृष्टिगुणस्थानकप्रभृतिषु अपूर्वकरणगुणस्थानकान्तेषु चत्वारि चत्वारि प्रकृतिसत्कर्मस्थानानि । तद्यथा–त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः । शेषाणि क्षपकश्रेण्यामेकेन्द्रियादौ च संजवन्तीति कृत्वा इह न प्राप्यन्ते । तथा द्वयोरनिवृत्तिबादरसूक्ष्मसंपरायलक्षणयोर्गुणस्थानकयोरष्टकं अष्टौ प्रकृतिसत्कर्मस्थानानि । तद्यथा–त्र्युत्तरशतं द्व्युत्तरशत षण्णवतिः पञ्चनवतिः नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिश्च । तत्रानिवृत्तिबादरस्यादिमानि चत्वारि उपशमश्रेण्यां क्षपकश्रेण्यां वा यावन्न त्रयोदशकं क्षीयते । शेषाणि पुनः क्षपकश्रेण्यामेव । सूक्ष्मसंपरायस्यादिमानि चत्वारि उपशमश्रेण्या, शेषाणि तु क्षपक-

श्रेण्यां । तथा त्रिषु उपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणेषु गुणस्थानकेषु चत्वारि चत्वारि प्रकृतिसत्कर्मस्थानानि भवन्ति । तत्रोपशान्तमोहे इमानि चत्वारि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः । क्षीणमोहसयोगिकेवलिनोः पुनरमूनि, तद्यथा—नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिश्च । 'छ तु अजोगम्मि ठाणाणि त्ति' अयोगिकेवलिनि षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा—नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिः नव अष्टौ चेति । एतेषामादिमानि चत्वारि अयोगिकेवलिद्विचरमसमयं यावत्, चरमसमये तु तीर्थकरातीर्थकरौ प्रतीत्य द्वे अन्तिमे प्रकृतिसत्कर्मस्थाने १५

तदेवमुक्तं प्रकृतिसत्कर्म । संप्रति स्थितिसत्कर्म वक्तव्यं । तत्र त्रयोऽर्थाधिकाराः, तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति । तत्र भेदः प्रागिव । साद्यनादिप्ररूपणा च द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषया साद्यनादिप्ररूपणां चिकीर्षुराह—

मूलठिई अजहन्नं तिहा चउद्धा य पढमगकसाया । तित्थयरुव्वलणायुगवज्जाणि तिहा दुहाणुत्तं ॥ १६ ॥

मूलठिइ त्ति—मूलप्रकृतिस्थितिसत्कर्म अजघन्यं त्रिधा त्रिप्रकारं । तद्यथा—अनादि ध्रुवमध्रुवं च । तथाहि—मूलप्रकृतीनां जघन्यं स्थितिसत्कर्म स्वस्वक्षयपर्यवसाने समयमात्रैकस्थित्यवशेषे भवति, तच्च सादि अध्रुवं च । ततोऽन्यत्सर्वमजघन्यं, तच्चानादि, सदैव भावात् । ध्रुवाध्रुवता पूर्ववत् । उत्कृष्टमनुत्कृष्टं च साद्यध्रुवं द्वयोरपि पर्यायेणानेकशो भवनात् । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीनां क्रियते 'चउद्धा य' इत्यादि अत्र षष्ठ्यर्थे प्रथमा, ततोऽयमर्थः—प्रथमकषायाणामनन्तानुबन्धिनामजघन्यं स्थितिसत्कर्म चतुर्धा चतुःप्रकारं, तद्यथा—सादि अनादि ध्रुव-

मध्रुवं च। तथाहि–एषां जघन्यं स्थितिसत्कर्म स्वक्षयोपान्त्यसमये स्वरूपापेक्षया समयमात्रैकस्थितिरूपं, अन्यथा तु द्विसमयमानं, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तदपि चोद्वलितानां भूयो बन्धे सादि, तत्स्थानमप्राप्तानां पुनरनादि, ध्रुवाध्रुवता पूर्ववत्। तथा तीर्थकरनामोद्वलनयोग्यत्रयोविंशत्यायुश्चतुष्टयवर्जितानां शेषाणां षड्विंशत्यधिकशतसंख्यानां प्रकृतीनामजघन्यं स्थितिसत्कर्म त्रिधा, तद्यथा–अनादि ध्रुवमध्रुवं च। तथाहि–एतासां जघन्यं स्थितिसत्कर्म स्वस्वक्षयपर्यवसाने उदयवतीनां समयमात्रैकस्थितिरूपं, अनुदयवतीनां स्वरूपतः समयमात्रैकस्थितिकं। अन्यथा तु द्विसमयमात्रं। तच्च साद्यध्रुवं। ततोऽन्यत्सर्वमजघन्यं। तच्चानादि, सदैव भावात्। ध्रुवाध्रुवता पूर्ववत्। 'दुहाणुत्तं त्ति' अनुक्तं उक्तप्रकृतीनामुत्कृष्टानुत्कृष्टजघन्यरूपं तीर्थकरनामोद्वलनयोग्यदेवद्विकनरकद्विकमनुजद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रसम्यक्त्वसम्यङ्मिथ्यात्वरूपत्रयोविंशतिआयुश्चतुष्टयानां जघन्याजघन्योत्कृष्टानुत्कृष्टरूपं विकल्पचतुष्टयं द्विधा द्विप्रकारं, तद्यथा–सादि अध्रुवं च। तथाहि–उक्तप्रकृतीनामुत्कृष्टमनुत्कृष्टं च स्थितिसत्कर्म पर्यायेणानेकशो भवति। ततो द्वितयमपीदं साद्यध्रुवं। जघन्यं च प्रागेव भावितं। तीर्थकरनामादीनां चाध्रुवसत्कर्मत्वाच्चत्वारोऽपि विकल्पाः साद्यध्रुवा अवसेयाः। मूलप्रकृतीनां चानुक्तं जघन्यमुत्कृष्टमनुत्कृष्टं च द्विप्रकारं, प्रागेव चोक्तं ॥ १६ ॥

तदेवं कृता साद्यनादिप्ररूपणा। संप्रति स्वामित्वं वक्तव्यं। तच्च द्विधा–उत्कृष्टस्थितिसत्कर्मस्वामित्वं जघन्यस्थितिसत्कर्मस्वामित्वं च। तत्र प्रथमत उत्कृष्टस्थितिसत्कर्मस्वामित्वमाह–

जेट्ठठिई बंधसमं जेट्ठं बंधोदया उ जासि सह। अणुदयबंधपराणं समऊणा जट्ठिई जेट्ठं ॥ १७ ॥

जेहठिइ त्ति—यासां प्रकृतीनां सह युगपत् बन्धोदयौ भवतः। कासां युगपत् बन्धोदयौ भवत इति चेदुच्यते—ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयासातवेदनीयमिथ्यात्वषोडशकषायपञ्चेन्द्रियजातितैजससप्तकहुंडसंस्थानवर्णादिविंशत्यगुरुलघुपराघातोच्छ्वासाप्रशस्तविहायोगत्युद्योतत्रसबादरपर्याप्तप्रत्येकास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनिर्माणनीचैर्गोत्रपञ्चविधान्तरायाणां तिर्यङ्मनुष्यानधिकृत्य वैक्रियसप्तकस्य सर्वसंख्यया षडशीतिप्रकृतीना। तासा ज्येष्ठमुत्कृष्टं स्थितिसत्कर्म ज्येष्ठस्थितिबन्धसमं उत्कृष्टस्थितिबन्धप्रमाणं भवति। तासां हि उत्कृष्टस्थितिबन्धारंभेऽबाधाकालेऽपि प्राग्बद्धं दलिकं प्राप्यते। न च तासां प्रथमस्थितिरन्यत्र स्तिबुकसंक्रमेण संक्रामति, उदयवतीत्वात्। ततस्तासामुत्कृष्टस्थितिबन्धप्रमाणमुत्कृष्टं स्थितिसत्कर्म प्राप्यते। अनुदयबन्धपराणां समयोना ज्येष्ठा स्थितिर्ज्येष्ठमुत्कृष्टं स्थितिसत्कर्म। तत्रानुदये उदयाभावे पर उत्कृष्टः स्थितिबन्धो यासां ता अनुदयबन्धपराः निद्रापञ्चकनरकद्विकतिर्यग्द्विकौदारिकसप्तकैकेन्द्रियजातिसेवार्तसंहननातपस्थावररूपा विंशतिसंख्यास्तासां समयोना उत्कृष्टा स्थितिरुत्कृष्टं स्थितिसत्कर्म। तथाहि—एतासामुत्कृष्टस्थितिबन्धारंभे यद्यप्यबाधाकालेऽपि प्राग्बद्धं दलिकमस्ति तथापि प्रथमस्थितिं तासामुदयवतीषु मध्ये स्तिबुकसंक्रमेण संक्रमयति। तेन तया प्रथमस्थित्या समयमात्रया ऊना उत्कृष्टा स्थितिरुत्कृष्टं स्थितिसत्कर्म। अथोच्येत—कथं निद्रादीनामनुदये सति बन्धेनोत्कृष्टा स्थितिः प्राप्यते ? उच्यते—उत्कृष्टो हि स्थितिबन्ध उत्कृष्टे संक्लेशे भवति। न चोत्कृष्टे संक्लेशे वर्तमानस्य निद्रापञ्चकोदयसंभवः। नरकद्विकस्य तिर्यञ्चो मनुष्या वा उत्कृष्टस्थि-

तिबन्धकाः । न च तेषां नरकद्विकोदयः संभवतीति । शेषकर्मणां तु देवा नारका वा यथायोगमुत्कृष्टस्थितिबन्धकाः । न च तेषु तेषामुदयो घटते ॥ १७ ॥

संकमओ दीहाणं सहालिगाए उ आगमो संतो । समऊणमणुदयाणं उभयासिं जट्ठिई तुल्ला ॥ १८ ॥

संकमओ त्ति–यासां प्रकृतीनां संक्रमत उत्कृष्टं स्थितिसत्कर्म प्राप्यते, न बन्धतः, उदयोऽपि च विद्यते तासां संक्रमतो दीर्घाणां संक्रमवशलब्धोत्कृष्टस्थितिकानां य आगमः संक्रमेण आवलिकाद्विकहीनोत्कृष्टस्थितिसमागमः स आवलिकया उदयावलिकया सह उत्कृष्टं स्थितिसत्कर्म। एतदुक्तं भवति–सातं वेदयमानः कश्चिदसातमुत्कृष्टस्थितिकं बध्नाति । तच्च बद्ध्वा सातं बद्धुं लग्नः। असातवेदनीयं च बन्धावलिकातीतं सत् आवलिकात उपरितनं सकलमपि आवलिकाद्विकहीनं त्रिंशत्सागरोपमकोटीकोटीप्रमाणं स्थितिसत्कर्म तस्मिन् सातवेदनीये वेद्यमाने बध्यमाने च उदयावलिकाया उपरिष्टात् संक्रमयति। ततस्तया उदयावलिकया सहितः संक्रमेणावलिकाद्विकहीनोत्कृष्टस्थितिसमागमः सातवेदनीयस्योत्कृष्टं स्थितिसत्कर्म । एवं नवनोकषायमनुजगतिप्रथमसंहननपञ्चकप्रथमसंस्थानपञ्चकप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्राणामष्टाविंशतिप्रकृतीनामावलिकाद्विकहीनः स्वस्वसजातीयोत्कृष्टस्थितिसमागमः उदयावलिकया सहित उत्कृष्टं स्थितिसत्कर्म भावनीयं । सम्यक्त्वस्य पुनरन्तर्मुहूर्तोन उत्कृष्टस्थितिसमागम उदयावलिकया सहित उत्कृष्टं स्थितिसत्कर्म । तथाहि–मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वा तत्रैव च मिथ्यात्वेऽन्तर्मुहूर्तं स्थित्वा ततः सम्यक्त्वं प्रतिपद्यते । तस्मिंश्च प्रतिपन्ने सति मिथ्यात्वस्योत्कृष्टां स्थितिं–आवलिकात उपरितनी स्थितिं–तथापि संख्यया ऽन्तर्मुहूर्तोनसप्तति-

सागरोपमकोटीकोटीप्रमाणां सकलामपि सम्यक्त्वे उदयावलिकात उपरि संक्रमयति । ततोऽन्तर्मुहूर्तोन एवोत्कृष्टस्थितिसमागम उदयावलिकया सहितः सम्यक्त्वस्योत्कृष्टं स्थितिसत्कर्म । यासां पुनः प्रकृतीनां संक्रमत उत्कृष्टा स्थितिः प्राप्यते, न च संक्रमकाले उदयोऽस्ति, तासा संक्रमकालेऽनुदयानां तावदेव पूर्वोक्तं स्थितिसत्कर्म समयोनमवगन्तव्यं, आवलिकाद्विकहीनोत्कृष्टस्थितिसमागम आवलिकया सहितः समयोनस्तासामुत्कृष्टं स्थितिसत्कर्मेत्यर्थः । तथाहि–कश्चिन्मनुष्य उत्कृष्टसंक्लेशवशादुत्कृष्टां नरकगतिस्थितिं बद्ध्वा परिणामपरावर्तनेन देवगतिं बद्धुमारब्धवान् । तस्यां च देवगतौ वध्यमानायामावलिकाया उपरि नरकस्थितिं वन्धावलिकातीतां उदयावलिकाया उपरितनीं सकलामपि विंशतिसागरोपमकोटीकोटीप्रमाणां संक्रमयति । प्रथमा च स्थितिः समयमात्रा देवगतेः सत्का मनुजगतौ वेद्यमानायां स्तिवुकसंक्रमेण संक्रामति । ततस्तया समयमात्रया स्थित्या ऊन आवलिकयाऽभ्यधिक आवलिकाद्विकहीनोत्कृष्टस्थितिसमागमो देवगतेरुत्कृष्टं स्थितिसत्कर्म । एवं द्वित्रिचतुरिन्द्रियजात्याहारकसप्तकमनुजानुपूर्वीदेवानुपूर्वीसूक्ष्मापर्याप्तसाधारणतीर्थकराख्यानामपि षोडशप्रकृतीनां यथोक्तमानमुत्कृष्टं स्थितिसत्कर्म भावनीयं । सम्यङ्मिथ्यात्वस्य पुनरन्तर्मुहूर्तोन उत्कृष्टस्थितिसमागम आवलिकयाऽभ्यधिकसमयोन उत्कृष्टं स्थितिसत्कर्म वाच्यं । तच्च सम्यक्त्वोक्तभावनानुसारेण भावनीयं । 'उदयासिं जट्ठिई तुल्ल त्ति' उदयीणामुदयवतीनामनुदयवतीनां च प्रकृतीनां संक्रमोत्कृष्टस्थितीनां संक्रमकाले यत्स्थितिः सर्वा स्थितिस्तुल्या । यतोऽनुदयवतीनामपि तदानीं प्रथमस्थितिः स्तिवुकसंक्रमेणोदयवतीषु संक्रम्यमाणापि दलिकरहिता विद्यते एव । न हि कालः संक्रमयितुं शक्यते, किं तु तत्स्थं दलिकमेव । ततः प्रथमस्थितिगतदलिकसं-

क्रान्तावपि दलिकरहिता प्रथमा स्थितिः तदानीं विद्यत एवेति कृत्वा उभयीषामपि यत्स्थितिः तुल्या । यश्च यासां प्रकृतीनां उत्कृष्टां स्थितिं बध्नाति, यश्च यासूत्कृष्टां स्थितिं संक्रमयति, स तासामुत्कृष्टस्थितिसत्कर्मस्वामी ॥ १८ ॥

तदेवमुक्तमुत्कृष्टस्थितिसत्कर्मस्वामित्वं, संप्रति जघन्यस्थितिसत्कर्मस्वामित्वमाह–

संजलणतिगे सत्तसु य नोकसाएसु संकमजहन्नो। सेसाण ठिई एगा दुसमयकाला अणुदयाणं ॥१९॥

संजलणतिगे त्ति–संज्वलनत्रिकस्य क्रोधमानमायारूपस्य सप्तानां च नोकषायाणां पुरुषवेदहास्यादिषट्करूपाणां जघन्यस्थितिसत्कर्म जघन्यस्थितिसंक्रमो वेदितव्यः । एता हि प्रकृतयो बन्धे उदये च व्यवच्छिन्ने सति अन्यत्र संक्रमेण क्षयं नीयन्ते, तेन कारणेन एतासां य एव चरमसंक्रमः स एव जघन्यं स्थितिसत्कर्म । उक्तं च–"हासाइपुरिसकोहादि तिन्नि संजलण जेण बंधुदये । वोच्छिन्ने संकमइ तेण इहं संकमो चरिमो ॥ १ ॥" जघन्यं स्थितिसत्कर्मेति संबन्धः । शेषाणां पुनरुदयवतीनां ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयवेदकसम्यक्त्वसंज्वलनलोभायुश्चतुष्टयनपुंसकवेदस्त्रीवेदसातासातवेदनीयोच्चैर्गोत्रमनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकरान्तरायपञ्चकरूपाणां प्रकृतीनां चतुस्त्रिंशत्संख्याना स्वस्वक्षयपर्यवसानसमये या एका समयमात्रा स्थितिः सा जघन्यं स्थितिसत्कर्म । अनुदयवतीनां पुनः प्रकृतीनां स्वस्वक्षयोपान्त्यसमये या स्वरूपापेक्षया समयमात्रा स्थितिरन्यथा तु द्विसमयमात्रकाला, सा जघन्यं स्थितिसत्कर्म । अनुदयवतीनां हि चरमसमये स्तिबुकसंक्रमेणोदयवतीषु प्रकृतिषु मध्ये प्रक्षिपति । तत्स्वरूपेण चानुभवति । तेन चरमसमये तासां दलिकं स्वरूपेण न प्राप्यते, किं तु पररूपेण । अत उक्तं 'उपान्त्यसमये स्वरूपापेक्षया समयमात्रा

अन्यथा तु द्विसमयमात्रकालेति। संप्रति सामान्येन सर्वकर्मणां जघन्यस्थितिसत्कर्मस्वामी प्रतिपाद्यते—तत्रानुबन्धिनां दर्शनमोहनीयत्रिकस्य चाविरतादिरप्रमत्तपर्यन्तो यथासंभवं जघन्यस्थितिसत्कर्मस्वामी। नारकतिर्यग्देवायुषां नारकतिर्यग्देवाः स्वस्वभवचरमसमये वर्तमानाः। कषायाष्टकस्त्यानर्द्धित्रिकनामत्रयोदशकनवनोकषायसंज्वलनत्रिकरूपाणां षट्त्रिंशत्प्रकृतीनामनिवृत्तिबादरसंपरायः। संज्वलनलोभस्य सूक्ष्मसंपरायः। ज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकाना क्षीणकषायः, शेषाणां पञ्चनवतिसंख्यानामयोगिकेवली जघन्यस्थितिसत्कर्मस्वामी ॥ १९ ॥

तदेवमुक्तं जघन्यस्थितिसत्कर्मस्वामित्वं। संप्रति स्थितिभेदप्ररूपणार्थमाह—

ठिइसंतट्ठाणाइं नियगुक्कस्सा हि थावरजहन्नं। नेरंतरेण हेट्ठा खवणाइसु संतराइं पि ॥ २० ॥

ठिइसंतट्ठाणाइं त्ति—सर्वेषां कर्मणां स्वकीयात् स्वकीयात् उत्कृष्टात् स्थितिस्थानात् समयमात्रादारभ्याधस्तात्तावदवतरीतव्यं यावत् स्थावरजघन्यं एकेन्द्रियप्रायोग्यं जघन्यं स्थितिसत्कर्म। एतावता स्थितिकण्डके यावन्तः समयास्तावन्ति स्थितिस्थानानि नानाजीवापेक्षया निरन्तरेण नैरन्तर्येण लभ्यन्ते। तद्यथा—उत्कृष्टा स्थितिरेकं स्थितिस्थानं। समयोना उत्कृष्टा स्थितिर्द्वितीयं स्थितिस्थानं। द्विसमयोना उत्कृष्टा स्थितिस्तृतीयं स्थितिस्थानं। एवं तावद्वाच्यं यावदेकेन्द्रियप्रायोग्यं जघन्यं स्थितिसत्कर्म। एकेन्द्रियप्रायोग्याच्च जघन्यस्थितिसत्कर्मणोऽधस्तात् क्षपणादिषु क्षपणे उद्वलने च सान्तराणि स्थितिस्थानानि लभ्यन्ते। अपिशब्दान्निरन्तराणि च। कथमिति चेदुच्यते—एकेन्द्रियप्रायोग्यजघन्यस्थितिसत्कर्मण उपरितनाग्रिमभागात्पल्योपमासंख्येयभागमात्रं स्थितिखण्डं खण्डयितुमारभते। खण्डनारम्भप्रथमसमयादारभ्य च

समये समयेऽधस्तादुदयवतीनामनुभावेनानुदयवतीनां स्तिबुकसंक्रमेण समयमात्रा समयमात्रा स्थितिः क्षीयते । ततः प्रतिसमयं स्थितिविशेषा लभ्यन्ते । तद्यथा—तत्स्थावरप्रायोग्यं जघन्यं स्थितिसत्कर्म प्रथमसमयेऽतिक्रान्ते समयहीनं द्वितीये समयेऽतिक्रान्ते द्विसमयहीनं । तृतीये समयेऽतिक्रान्ते त्रिसमयहीनमित्यादि । अन्तर्मुहूर्तेन च कालेन तत् स्थितिखण्डं खण्डयति । तत एतावती स्थितिर्युगपदेव त्रुटितेति कृत्वाऽन्तर्मुहूर्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि लभ्यन्ते । ततः पुनरपि द्वितीयं पल्योपमासंख्येयभागमात्रमन्तर्मुहूर्तमात्रेण खण्डयति । तत्रापि प्रतिसमयमधः समयमात्रसमयमात्रस्थितिक्षयापेक्षया निरन्तराणि स्थितिस्थानानि पूर्वप्रकारेण लभ्यन्ते । द्वितीये च स्थितिखण्डे खण्डिते सति पुनरपि पल्योपमासंख्येयभागमात्रा स्थितिर्युगपदेव त्रुटितेति न भूयोऽप्यन्तर्मुहूर्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि लभ्यन्ते । एवं तावद्वाच्यं यावदावलिका शेषा भवति । सापि चावलिका उदयवतीनामनुभवेनानुदयवतीनां स्तिबुकसंक्रमेण समये समये क्षयमुपयाति तावद्यावदेका स्थितिः । ततोऽमूनि आवलिकामात्रसमयप्रमाणानि स्थितिस्थानानि निरन्तराणि लभ्यन्ते ॥२०॥

तदेवं स्थितिस्थानभेदोपदर्शनमपि कृतं । संप्रत्यनुभागसत्कर्मप्ररूपणार्थमाह—

संकमसममणुभागे नवरि जहन्नं तु देसघाईणं । छन्नोकसायवज्जाण एगठाणंमि देसहरं ॥ २१ ॥
मणनाणे दुठाणं देसहरं सामि गोयसम्मत्ते । आवरणविग्घसोलसग किट्टिवेएसु य सगंते ॥ २२ ॥

संकमसममित्यादि—अनुभागसंक्रमेण तुल्यमनुभागसत्कर्म वक्तव्यं । एतदुक्तं भवति—यथानुभागसंक्रमे स्थानप्रत्ययविपाकशुभाशुभत्वसाद्यनादित्वस्वामित्वानि प्राक् प्रतिपादितानि तथैवात्राप्यनुभागसत्कर्मणि वक्तव्यानि । नवरमयं

विशेषो यदुत देशघातिनीनां हास्यादिपट्कवर्जितानां मतिश्रुतावधिज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टय-
वेदत्रिकान्तरायपञ्चकरूपाणामष्टादशप्रकृतीनां जघन्यानुभागसत्कर्मस्थानमधिकृत्य एकस्थानीयं, घातिसंज्ञामधिकृत्य देश-
हरं देशघाति वेदितव्यं । मनःपर्यायज्ञानावरणे पुनर्जघन्यमनुभागसत्कर्मस्थानमधिकृत्य द्विस्थानं, घातिसंज्ञामधिकृत्य
देशघाति । इहोत्कृष्टानुभागसत्कर्मस्वामिन उत्कृष्टानुभागसंक्रमस्वामिन एव वेदितव्याः । जघन्यानुभागसत्कर्मस्वामिनः
पुनराह—'सामि गोयेत्यादि' । सम्यक्त्वज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकरूपप्रकृतिषोडशककिट्टिरूपसंज्वलन-
लोभवेदत्रयाणां स्वस्वान्तिमसमये वर्तमाना जघन्यानुभागसत्कर्मस्वामिनो वेदितव्याः ॥ २१-२२ ॥

अत्रैव विशेषमाह—

मइसुय चक्खुअचक्खूण सुयसमत्तस्स जेट्ठलद्धिस्स। परमोहिस्सोहिदुगं मणनाणं विउलनाणस्स ॥२३॥

मइसुय त्ति—मतिज्ञानावरणश्रुतज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां श्रुतसमाप्तस्य सकलश्रुतपारगामिन-
श्चतुर्दशपूर्वधरस्येत्यर्थः । ज्येष्ठलब्धिकस्य उत्कृष्टायां श्रुतार्थलब्धौ वर्तमानस्य जघन्यमनुभागसत्कर्म । इदमत्र तात्पर्यम्—
मतिज्ञानावरणादीना चतसृणा प्रकृतीनामुत्कृष्टश्रुतार्थसंपन्नश्चतुर्दशपूर्वधरो जघन्यानुभागसत्कर्मस्वामी वेदितव्यः । तथा
परमावधिज्ञानेनावधिद्विकमवधिज्ञानावरणावधिदर्शनावरणरूपं जघन्यानुभागसत्कर्म भवति । एतदुक्तं भवति—अवधि-
ज्ञानावरणावधिदर्शनावरणयोर्जघन्यानुभागसत्कर्मस्वामी परमावधियुक्तो वेदितव्यः । तथा मनोज्ञानं मनःपर्यायज्ञाना-
वरणं जघन्यानुभागसत्कर्म विपुलमनःपर्यायज्ञानिनोऽवगन्तव्यं । स्वामित्वभावनाऽवधिज्ञानावरणवत् । लब्धिसहितस्य

हि प्रचूतोऽनुजागः प्रलयमुपयातीति परमोहिस्सेत्याद्युक्तं। शेषाणां तु प्रकृतीनां य एव जघन्यानुजागसंक्रमस्वामिनस्त एव जघन्यानुजागसत्कर्मणोऽपि द्रष्टव्याः ॥ २३ ॥

इदानीमनुजागसत्कर्मस्थानजेदप्ररूपणार्थमाह—

बंधहयहयहउप्पत्तिगाणि कमसो असंखगुणियाणि। उदयोदीरणवज्जाणि होंति अणुजागठाणाणि २४

बंध त्ति—इहानुजागस्थानानि त्रिधा, तद्यथा—बन्धोत्पत्तिकानि हतोत्पत्तिकानि हतहतोत्पत्तिकानि च। तत्र बन्धाडुत्पत्तिर्येषां तानि बन्धोत्पत्तिकानि। तानि चासंख्येयलोकाकाशप्रदेशप्रमाणानि, तद्धेतूनामसंख्येयलोकाकाशप्रदेशप्रमाणत्वात्। तथा उद्वर्तनापवर्तनाकरणवशतो वृद्धिहानिज्यामन्यथाऽन्यथा यान्यनुजागस्थानानि वैचित्र्यजाञ्जि जवन्ति, तानि हतोत्पत्तिकान्युच्यन्ते। हतात् घातात् पूर्वावस्थाविनाशरूपाडुत्पत्तिर्येषां तानि हतोत्पत्तिकानि तानि च पूर्वेज्योऽसंख्येयगुणानि, एकैकस्मिन् बन्धोत्पत्तिके स्थाने नानाजीवापेक्षया उद्वर्तनापवर्तनाज्यामसंख्येयजेदकरणात्। यानि पुनः स्थितिघातेन रसघातेन चान्यथाऽन्यथाजवनादनुजागस्थानानि जायन्ते। तानि च हतहतोत्पत्तिकान्युच्यन्ते। हते उद्वर्तनापवर्तनाज्यां घाते सति जूयोऽपि हतात् स्थितिघातेन रसघातेन वा घाताडुत्पत्तिर्येषां तानि हतहतोत्पत्तिकानि। तानि चोद्वर्तनापवर्तनाजन्येज्योऽसंख्येयगुणानि। संप्रत्यक्षरयोजना क्रियते—यानि उदयत उदीरणातश्च प्रतिसमयं क्षयसंजवात् अन्यथाऽन्यथानुजागस्थानानि जायन्ते, तानि वर्जयित्वा शेषाणि बन्धोत्पत्तिकादीनि अनुजागस्थानानि क्रमशोऽसंख्येयगुणानि वक्तव्यानि उदयोदीरणाजन्यानि कस्माद्वर्ज्यन्त इति चेडुच्यते—यस्माडुदयोदीरणयोः प्रवर्तमानयोर्नियमात् बन्धोद्वर्तनापव-

तेनास्थितिघातरसघातजन्यानामन्यतमान्यवश्यं संभवन्ति, तत उदयोदीरणाजन्यानि तत्रैवान्तः प्रविशन्तीति न पृथक् क्रियन्ते ॥ २४ ॥

तदेवमुक्तमनुभागसत्कर्म । संप्रति प्रदेशसत्कर्म वक्तव्यं, तत्र चैतेऽर्थाधिकाराः, तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति । तत्र भेदः प्राग्वत् । संप्रति साद्यनादिप्ररूपणा कर्तव्या, सा च द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयां तां चिकीर्षुराह—

सत्तण्हं अजहण्णं तिविहं सेसा दुहा पएसम्मि । मूलपगईसु आउसु साई अधुवा य सव्वे वि ॥ २५ ॥

सत्तण्हंति—आयुर्वर्जानां सप्तानां मूलप्रकृतीनामजघन्यं प्रदेशसत्कर्म त्रिविधं त्रिप्रकारं, तद्यथा—अनादि ध्रुवमध्रुवं च । तत्र क्षपितकर्मांशस्य आयुर्वर्जानां सप्तानां कर्मणां स्वस्वक्षयावसरे चरमस्थितौ वर्तमानस्य जघन्यं प्रदेशसत्कर्म । तच्च साद्यध्रुवं । ततोऽन्यत्सर्वमजघन्यं, तच्चानादि, सदैव सद्भावात् । ध्रुवाध्रुवताऽभव्यभव्यापेक्षया । 'सेसा दुह त्ति' शेषा विकल्पा उत्कृष्टानुत्कृष्टजघन्यरूपा द्विधा द्विप्रकाराः, तद्यथा—सादयोऽध्रुवाश्च । तत्रोत्कृष्टप्रदेशसत्कर्म गुणितकर्मांशस्य मिथ्यादृष्टेः सप्तमपृथिव्यां वर्तमानस्य प्राप्यते । शेषकालं तु तस्याप्यनुत्कृष्टं । ततो द्वे अपि साद्यध्रुवे । जघन्यं तु भावितमेव । तथा आयुषः सर्वेऽपि विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाः सादयोऽध्रुवाश्च, अध्रुवसत्कर्मत्वात् २५

संप्रत्युत्तरप्रकृतीरधिकृत्य साद्यनादिप्ररूपणां चिकीर्षुराह—

बायालाणुक्कस्सं चउवीससया जहन्न चउतिविहं । होइह छण्ह चउध्धा अजहन्नमभासियं दुविहं ॥२६॥

वायाल त्ति—सातवेदनीयसंज्वलनचतुष्टयपुरुषवेदपञ्चेन्द्रियजातितैजससप्तकप्रथमसंस्थानप्रथमसंहननशुभवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तिनिर्माणरूपाणां द्विचत्वारिंशत्प्रकृतीनामनुत्कृष्टं प्रदेशसत्कर्म चतुर्विधं । तद्यथा—साद्यनादि ध्रुवमध्रुवं च । तद्यथा—वज्रर्षभनाराचवर्जानां शेषाणामेकचत्वारिंशत्प्रकृतीनां क्षपकश्रेण्यां स्वस्वबन्धान्तसमये गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्म भवति, तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं । ततोऽन्यत्सर्वमनुत्कृष्टं । तदपि च द्वितीये समये भवत्सादि । तत्स्थानमप्राप्तस्य पुनरनादि, ध्रुवाध्रुवे पूर्ववत् । वज्रर्षभनाराचसंहननस्य तु सप्तमपृथिव्यां सम्यग्दृष्टेर्नारकस्य मिथ्यात्वं गन्तुकामस्योत्कृष्टं प्रदेशसत्कर्म तच्च साद्यध्रुवं, ततोऽन्यदनुत्कृष्टं, तदपि च द्वितीये समये भवत् सादि । तत्स्थानमप्राप्तस्य पुनरनादि । ध्रुवाध्रुवे पूर्ववत् । अनन्तानुबन्धियशःकीर्तिसंज्वलनलोभवर्जितानां चतुर्विंशत्यधिकशतसंख्यानां ध्रुवसत्कर्मप्रकृतीनामजघन्यं प्रदेशसत्कर्म त्रिविधं । तद्यथा—अनादि ध्रुवमध्रुवं च । तथाहि—एतासां क्षपितकर्मांशस्य स्वस्वक्षयचरमसमये जघन्यं प्रदेशसत्कर्म, तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं च । ततोऽन्यदजघन्यं, तच्चानादि, सदैव सद्भावात् । ध्रुवाध्रुवता पूर्ववत् । 'चउतिविहंति' यथासंख्येन योजनीयं, द्विचत्वारिंशत्प्रकृतीनामनुत्कृष्टं चतुर्विधं, ध्रुवसत्कर्मणां चाजघन्यं त्रिविधमिति । तथाऽनन्तानुबन्धिचतुष्टयसंज्वलनलोभयशःकीर्तिरूपाणां षण्णां प्रकृतीनामजघन्यं प्रदेशसत्कर्म चतुर्विधं । तद्यथा—साद्यनादि ध्रुवमध्रुवं च । तथाहि—अनन्तानुबन्धिनामुद्वलके क्षपितकर्मांशे यदा शेषीभूता एका स्थितिर्भ-

वति तदा जघन्यं प्रदेशसत्कर्म । तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं च । ततोऽन्यत्सर्वमजघन्यं । तच्चोद्वलितानां मिथ्यात्वप्रत्ययेन भूयोऽपि बध्यमानानां सादि । तत्स्थानमप्राप्तस्य पुनरनादि । ध्रुवाध्रुवे पूर्ववत् । यशःकीर्तिसंज्वलनलोभयोः पुनः क्षपितकर्मांशस्य क्षपणायोद्यतस्य यथाप्रवृत्तिकरणस्यान्तिमसमये जघन्यं प्रदेशसत्कर्म । तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं च । ततोऽन्यत्सर्वमजघन्यं । तदपि चानिवृत्तिकरणप्रथमसमये गुणसंक्रमेण प्रभूतस्य दलिकस्य प्राप्यमाणत्वात् अजघन्यं भवत् सादि, तत्स्थानमप्राप्तस्य पुनरनादि । ध्रुवाध्रुवता पूर्ववत् । ' अभासियं उ विहं ति ' अभाषितं अनुक्तं सर्वासां प्रकृतीनां द्विविधं द्विप्रकारमवगन्तव्यं । तद्यथा— साद्यध्रुवं च । तत्र द्विचत्वारिंशत्प्रकृतीनामभाषितं जघन्यमजघन्यमुत्कृष्टं च । तत्रोत्कृष्टं द्विप्रकारं भावितमेव । जघन्याजघन्यता च वक्ष्यमाणं स्वामित्वमवलोक्य स्वयमेव भावनीया । ध्रुवसत्कर्मणां च चतुर्विंशतिशतसंख्यानामभाषितमुत्कृष्टमनुत्कृष्टं जघन्यं च । तत्र जघन्यं भावितमेव । उत्कृष्टानुत्कृष्टे मिथ्यादृष्टौ गुणितकर्मांशे प्राप्येते । ततो द्वे अपि साद्यध्रुवे । एवमनन्तानुबन्धिसंज्वलनलोभयशःकीर्तीनामपि उत्कृष्टानुत्कृष्टे भावनीये । जघन्यं तु भावितमेव । शेषाणां चाध्रुवसत्कर्मणां चत्वारोऽपि विकल्पाः साद्यध्रुवा अध्रुवसत्कर्मत्वादवसेयाः ॥ २६ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वं वक्तव्यं । तच्च द्विधा—उत्कृष्टप्रदेशसत्कर्मस्वामित्वं जघन्यप्रदेशसत्कर्मस्वामित्वं च । तत्रोत्कृष्टप्रदेशसत्कर्मस्वामित्वमाह—

संपुन्नगुणियकम्मो पएसउक्कस्ससंतसामी उ । तस्सेव उ उप्पिविणिग्गयस्स कासिंचि वन्नेहिं ॥ २७ ॥

संपुन्न त्ति— उत्कृष्टप्रदेशसत्कर्मस्वामी संपूर्णगुणितकर्मांशः सप्तमपृथिव्यां नारकश्चरमसमये वर्तमानः प्रायः सर्वासामपि प्रकृतीनामवगन्तव्यः। कासांचित्पुनः प्रकृतीनां तस्यैव संपूर्णगुणितकर्मांशस्य सप्तमपृथिव्या विनिर्गतस्योपरिष्टात् विशेषोऽस्ति। ततस्तमहं वर्णयामि वर्णयिष्यामि। वर्तमानसामीप्ये वर्तमानवद्वेति (श्रीम-२-४-७४) भविष्यति वर्तमाना ॥ २७ ॥

प्रतिज्ञातमेवाह—

मिच्छत्ते मीसम्मि य संपक्खित्तम्मि मीससुद्धाणं। वरिसवरस्स उ ईसाणगस्स चरमम्मि समयम्मि ॥२८॥

मिच्छत्ते त्ति— स प्रागभिहितस्वरूपो गुणितकर्मांशः सप्तमपृथिव्या उध्धृत्य तिर्यक्षूत्पन्नः, तत्राप्यन्तर्मुहूर्त्तं स्थित्वा मनुष्येषु मध्ये समुत्पन्नः, तत्र सम्यक्त्वं प्राप्य सप्तकक्षपणाय शीघ्रमभ्युद्यतः। ततो यस्मिन् समये मिथ्यात्वं सम्यङ्मिथ्यात्वे सर्वसंक्रमेण प्रक्षिपति, तस्मिन्समये सम्यङ्मिथ्यात्वस्योत्कृष्टं प्रदेशसत्कर्म। तदपि च सम्यङ्मिथ्यात्वं यस्मिन् समये सर्वसंक्रमेण सम्यक्त्वे प्रक्षिपति, तस्मिन् समये सम्यक्त्वस्योत्कृष्टं प्रदेशसत्कर्म। अक्षरयोजना त्वियम्— मिथ्यात्वे मिश्रे च यथासंख्यं मिश्रे सम्यक्त्वे च प्रक्षिप्ते सति तयोर्मिश्रशुद्धयोः मिश्रसम्यक्त्वयोरुत्कृष्टं प्रदेशसत्कर्म भवति। तथा स एव गुणितकर्मांशो नारकस्तिर्यग्भूत्वा कश्चिदीशानदेवो जातः। सोऽपि च तत्रातिसंक्लिष्टो भूत्वा भूयो भूयो नपुंसकवेदं बध्नाति। तदानीं च तस्य स्वभवान्तसमये वर्तमानस्य वर्षवरस्य नपुंसकवेदस्योत्कृष्टं प्रदेशसत्कर्म ॥२८॥

ईसाणे पूरित्ता नपुंसगं तो असंखवासासु। पल्लासंखियभागेण पूरिए इत्थिवेयस्स ॥ २९ ॥

ईसाणे त्ति— ईशानदेवलोके उक्तप्रकारेण नपुंसकवेदमापूर्य नपुंसकवेदस्योत्कृष्टं प्रदेशसंचयं कृत्वा ततः संख्येयवर्षायुष्केषु मध्ये समुत्पद्य पुनरसंख्येयवर्षायुष्केषु मध्ये समुत्पन्नः । तत्र च तेन संक्लिष्टेन भूत्वा पल्योपमासंख्येयभागमात्रेण कालेन पूरिते स्त्रीवेदे बन्धेन नपुंसकवेददलिकसंक्रमेण च प्रभूतमापूरिते स्त्रीवेदे सति तदानीं तस्य स्त्रीवेदस्योत्कृष्टं प्रदेशसत्कर्म भवति ॥ २९ ॥

पुरिसस्स पुरिससंकमपएसउक्कस्स सामिगस्सेव । इत्थी जं पुण समयं संपक्खित्ता हवइ ताहे ॥३०॥

पुरिसस्स त्ति—पुरुषस्य पुरुषवेदस्योत्कृष्टं प्रदेशसत्कर्म उत्कृष्टपुरुषवेदसंक्रमस्वामिन एव वेदितव्यं । एतदुक्तं भवति—य एवोत्कृष्टपुरुषवेदसंक्रमस्वामी स एवोत्कृष्टपुरुषवेदप्रदेशसत्कर्मस्वाम्यपि वेदितव्यः । नवरं यं समयं यस्मिन् समये स्त्रीवेदं पुरुषवेदे संप्रक्षेप्ता भवति संक्रमयति "ताहे" तदानीं पुरुषवेदस्योत्कृष्टप्रदेशसत्कर्मस्वामी ॥ ३० ॥

तस्सेव उ संजलणा पुरिसाइकमेण सव्वसंछोभे । चउरुवसमित्तु खिप्पं रागंते सायउच्चजसा ॥३१॥

तस्सेव त्ति—य एव पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी तस्यैव संज्वलनाश्चत्वारः क्रोधादयः क्रमेण पुरुषवेदादिसत्कदलिकसर्वसंछोभे उत्कृष्टप्रदेशसत्कर्मणो भवन्ति । इयमत्र भावना— य एव पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी यदा पुरुषवेदं सर्वसंक्रमेण संज्वलनक्रोधे संक्रमयति तदा संज्वलनक्रोधोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनक्रोधं सर्वसंक्रमेण माने संक्रमयति तदा संज्वलनमानोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव संज्वलनमानं सर्वसंक्रमेण संज्वलनमायायां संक्रमयति तदा संज्वलनमायोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनमायां सर्वसंक्रमेण संज्वलनलोभे संक्रमयति

तदा संज्वलनलोजोत्कृष्टप्रदेशसत्कर्मस्वामी । तथा चतुरो वारान् मोहनीयमुपशमय्य गुणितकर्मांशः शीघ्रं क्षपणायोत्थितस्तस्य सूक्ष्मसंपरायगुणस्थानकचरमसमये वर्तमानस्य सातवेदनीयोच्चैर्गोत्रयशःकीर्तीनामुत्कृष्टं प्रदेशसत्कर्म । यस्मादेतासु प्रकृतिषु श्रेण्यामारूढः सन् गुणसंक्रमेण प्रजूतान्यशुजप्रकृतिदलिकानि संक्रमयति । ततः सूक्ष्मसंपरायचरमसमये एतासामुत्कृष्टं प्रदेशसत्कर्म प्राप्यते । उक्तं च— " चउरुवसामिय मोहं जसुच्चसायाण सुहुमखवगंते । जं असुजपगइदलियाण संकमो होइ एयासु ॥ ३१ ॥

देवनिरियाउगाणं जोगुक्कस्सेहिं जेठगद्धाए । बद्धाणि ताव जावं पढमे समए उदिन्नाणि ॥ ३२ ॥

देवनिरियाउगाणं ति—देवनारकायुषोरुत्कृष्टैर्योगैरुत्कृष्टया च बन्धाद्धया द्वयोः सतोस्तावदुत्कृष्टं प्रदेशसत्कर्म प्राप्यते, यावत्प्रथमे समये उदीर्णे उदयप्राप्ते जवतः । किमुक्तं जवति—बन्धादारज्योदयप्रथमसमयं यावद्देवनारकायुषोरुक्तप्रकारेण द्वयोरुत्कृष्टं प्रदेशसत्कर्म जवति ॥ ३२ ॥

सेसाउगाणि नियगेसु चेव आगम्म पुव्वकोमीए । सायबहुलस्स अचिरा बंधंते जाव नोवट्टे ॥ ३३ ॥

सेसाउगाणि त्ति—शेषायुषी तिर्यङ्मनुष्यायुषी। 'पुव्वकोमीए त्ति' पूर्वकोट्योपलक्षिते पूर्वकोटिप्रमाणे।उत्कृष्टया बन्धाद्धया उत्कृष्टैर्योगैर्बद्ध्वे । बध्ध्वा च निजकेषु जवेषु निजनिजजवे समागत्य । सातबहुलः सन् ते आयुषी यथायोगमनुजवति। सुखितस्य हि न जूयास आयुःपुद्गलाः परिसटन्तीति कृत्वा सातग्रहणं कृतं।ततोऽचिरात् बन्धान्ते इति उत्पत्तिसमयादूर्ध्वमन्तर्मुहूर्तमात्रमेव स्थित्वा मर्तुकामो जातः सन् उत्कृष्टया बन्धाद्धया उत्कृष्टैश्च योगैरन्यत् पारजविकं समानजातीयं

मनुष्यो मनुष्यायुः तिर्यङ्ङ् च तिर्यगायुर्बध्नाति। ततो बन्धान्तसमये यावन्नाद्याप्यपवर्तयति तावत्तस्य सातबहुलस्य मनुष्यस्य सतो मनुष्यायुषः तिरश्चः (च) सतस्तिर्यगायुष उत्कृष्टं प्रदेशसत्कर्म भवति । यतस्तस्य तदानीं स्वभवायुः किञ्चिदूनं परभवायुश्च समानजातीयं परिपूर्णदलिकमस्तीति कृत्वा, बन्धान्तरं चायुर्बध्यमानं द्वितीये समयेऽपवर्तयिष्यति, तत उक्तं बन्धान्ते इति ॥ ३३ ॥

पूरित्तु पुव्वकोडीपुहुत्त नारगदुगस्स बंधंते । एवं पल्लतिगंते वेउव्विय सेसनवगम्मि ॥ ३४ ॥

पूरित्तु त्ति— पूर्वकोटिपृथक्त्वं पूर्वकोटिसप्तकं यावत् संक्लिष्टाध्यवसायवशेन नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणं भूयो भूय आपूर्य बन्धेन निचितं कृत्वा नरकाभिमुखो बन्धान्तसमये नरकद्विकस्योत्कृष्टप्रदेशसत्कर्मस्वामी । तथा एवमनेनैव प्रकारेण पूर्वकोटिपृथक्त्वं यावत् भोगभूमिषु मध्ये पल्योपमत्रयं च यावद्विशुद्धाध्यवसायवशेन वैक्रियैकादशकात् नरकद्विकेऽपनीते शेषं यद्वैक्रियनवकं देवद्विकं वैक्रियसप्तकं चेत्यर्थः । तत् बन्धेनापूर्य देवत्वाभिमुखस्तासां देवद्विकवैक्रियसप्तकरूपाणां नवप्रकृतीनामुत्कृष्टप्रदेशसत्कर्मस्वामी ॥ ३४ ॥

तमतमगो सव्वलहुं सम्मत्तं लंभिय सव्वचिरमद्धं । पूरित्ता मणुयदुगं सवज्जरिसहं सबंधंते ॥ ३५ ॥

तमतमगो त्ति—तमस्तमगः सप्तमपृथ्वीनारकः । सर्वलघु अतिक्षिप्रं जन्मानन्तरमन्तर्मुहूर्ते गते सतीत्यर्थः । सम्यक्त्वं लब्ध्वा । ' सव्वचिरमद्धं ति ' अतिदीर्घं कालं यावत् सम्यक्त्वमनुपालयन् । मनुष्यद्विकं वज्रर्षभनाराचसंहननं च बन्धे-

नापूर्य । यतोऽनन्तरसमये मिथ्यात्वं यास्यति तस्मिन् समये बन्धाद्धाचरमभूते तयोर्मनुष्यद्विकवज्रर्षभनाराच संहननयो-रुत्कृष्टं प्रदेशसत्कर्म भवति ॥ ३५ ॥

सम्मद्दिट्ठिधुवाणं बत्तीसुदहीसयं चउक्खुत्तो । उवसामइत्तु मोहं खवेंतगे नियगबंधंते ॥ ३६ ॥

सम्मद्दिट्ठि त्ति— याः प्रकृतयः सम्यग्दृष्टीनां बन्धमाश्रित्य ध्रुवाः पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वास-प्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकसुस्वरसुभगादेयरूपा द्वादश तासां द्वात्रिंशदधिकसागरोपमाणां शतं यावद्बन्धे-नोपचितानां चतुःकृत्वश्चतुरो वारान् मोहनीयं चोपशमय्य । मोहनीयं हि उपशमयन् प्रभूतानि दलिकानि गुणसंक्र-मेण संक्रमयतीति कृत्वा चतुःकृत्वो मोहोपशमग्रहणं । ततः क्षपणायोद्यतस्य निजबन्धव्यवच्छेदकाले उत्कृष्टं प्रदेशसत्कर्म भवति ॥ ३६ ॥

धुवबंधीण सुभाणं सुभथिराणं च नवरि सिग्घयरं। तित्थगराहारगतणू तेत्तीसुदही विरचिया य ॥३७॥

धुवबंधीण त्ति— याः शुभध्रुवबन्धिन्यः प्रकृतयस्तैजससप्तकशुभवर्णाद्येकादशकागुरुलघुनिर्माणरूपा विंशतिप्रकृतयः तासां शुभस्थिरयोश्च पूर्वोक्तेन प्रकारेणोत्कृष्टं प्रदेशसत्कर्म भावनीयं । नवरं चतुःकृत्वो मोहनीयोपशमनानन्तरं शीघ्र-तरं क्षपणायोद्यतस्येति वक्तव्यं।शेषं तथैव।तथा तीर्थकरनाम्नो गुणितकर्मांशेन देशोनपूर्वकोटिद्विकाधिकानि त्रयस्त्रिंशत्सा-गरोपमाणि यावद्बन्धेन पूरितस्य स्वबन्धान्तसमये उत्कृष्टं प्रदेशसत्कर्म । आहारकतनोराहारकसप्तकस्य तु विरचितस्य देशोनपूर्वकोटिं यावत् भूयो भूयो बन्धेनोपचितस्य स्वबन्धव्यवच्छेदसमये उत्कृष्टं प्रदेशसत्कर्म ॥ ३७ ॥

तुल्ला नपुंसवेएणेगिंदिए य थावरायवुज्जोवा। विगलसुहुमत्तियाविय नरतिरियचिरज्जिया होंति ॥३८॥

तुल्ल त्ति—नपुंसकवेदेन तुल्या एकेन्द्रियजातिस्थावरातपोद्योता वेदितव्याः। यथा नपुंसकवेदस्य ईशानदेवभवचरमसमये उत्कृष्टं प्रदेशसत्कर्मोक्तं तथा एतेषामपि द्रष्टव्यमित्यर्थः। विकलत्रिकं द्वित्रिचतुरिन्द्रियजातिरूपं, सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणरूपं यदा पूर्वकोटिपृथक्त्वं यावत् तिर्यङ्मनुष्यभवैरर्जितं भवति तदा स्वबन्धान्तसमये तेषां तिर्यङ्मनुष्याणां तत् विकलत्रिकादिकमुत्कृष्टप्रदेशसत्कर्म भवति ॥ ३८ ॥

तदेवमुक्तमुत्कृष्टप्रदेशसत्कर्मस्वामित्वं। संप्रति जघन्यप्रदेशसत्कर्मस्वामित्वमाह—

खवियंसयम्मि पगयं जहन्नगे नियगसंतकम्मंते। खणसंजोइयसंजोयणाण चिरसम्मकालंते ॥३९॥

खविय त्ति—जघन्ये जघन्यप्रदेशसत्कर्मस्वामित्वे। प्रकृतमधिकारः। क्षपितकर्मांशेन। सूत्रे चात्र सप्तमी तृतीयार्थे वेदितव्या। 'नियगसंतकम्मंते त्ति' स्वस्वसत्ताचरमसमये। एवं तावत्सर्वकर्मणां सामान्येनोक्तं। संप्रति पुनर्येषां कर्मणा विशेषोऽस्ति तानि पृथगेवाह—'खणेत्यादि' इह क्षपितकर्मांशेन सम्यग्दृष्टिना सता अनन्तानुबन्धिन उद्वलिताः। ततः पुनरपि मिथ्यात्वं गतेनान्तर्मुहूर्तं कालं यावदनन्तानुबन्धिनो बद्धाः। ततो भूयोऽपि सम्यक्त्वं प्रतिपन्नः। तच्च सम्यक्त्वं द्वे षट्षष्टी सागरोपमाणां यावत् अनुपाल्य क्षपणार्थमभ्युद्यतस्तस्यानन्तानुबन्धिनं क्षपयतो यदा एका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयावस्थाना शेषीभवति तदा तेषां जघन्यं प्रदेशसत्कर्म ॥ ३९ ॥

उवसमाणीण उवलणा एगठिई दुसामइगा। दिट्ठिदुगे बत्तीसे उदहिसए पालिए पच्छा ॥ ४० ॥

उव्वलमाणीण त्ति—उद्वल्यमानानां त्रयोविंशतिप्रकृतीनामुद्वलनकाले या एका स्थितिः स्वरूपापेक्षया समयमात्राव-स्थाना, अन्यथा तु द्विसमयमात्रावस्थाना, सा तासां जघन्यं प्रदेशसत्कर्म । एतच्च सामान्येनोक्तं । अत्रैव विशेषमाह—'दिवड्ढगेत्यादि' द्वात्रिंशदधिकं सागरोपमाणां शतं यावत् सम्यक्त्वमनुपाल्य पश्चान्मिथ्यात्वं गतो मन्दोद्वलनया च पल्योपमासंख्येयभागमात्रप्रमाणया सम्यक्त्वमिश्रे उद्वलयितुमारभते स्म । उद्वलयंश्च तद्दलिकं मिथ्यात्वे संक्रमयति । सर्वसंक्रमेण चावलिकाया उपरितनं सकलमपि दलिकं संक्रमितं । आवलिकागतं च दलिकं स्तिबुकसंक्रमेण संक्रमयति । संक्रमयतश्च यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयमात्रावस्थाना, तदा तयोः सम्यक्त्व-मिश्रयोर्जघन्यं प्रदेशसत्कर्म ॥ ४० ॥

अंतिमलोभजसाणं मोहं अणुवसमइत्तु खीणाणं(सेसाणं)। नेयं अहापवत्तकरणस्स चरमम्मि समयम्मि

अंतिम त्ति—अन्तिमलोभः संज्वलनलोभः । ततः संज्वलनलोभयशःकीर्त्योश्चतुरो वारान् मोहनीयमनुपशमय्य मोहस्योपशममकृत्वा उपशमश्रेणिमकृत्वेत्यर्थः । शेषाभिः क्षपितकर्मांशक्रियाभिः क्षीणयोर्यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म ज्ञेयं । मोहनीयोपशमे हि क्रियमाणे गुणसंक्रमेण प्रभूतं दलिकमवाप्यते, न च तेन प्रयोजनमिति कृत्वा मोहनीयोपशमनप्रतिषेधः ॥ ४१ ॥

वेउव्विक्कारसगं खणबंध गते उ नरय जिट्ठठिइं । उव्वट्टित्तु अबंधिय एगेंदिगए चिरुव्वलणे ॥ ४२ ॥

वेउव्विक्कारसगंति—नरकद्विकदेवद्विकवैक्रियसप्तकरूपं वैक्रियैकादशकं पूर्वं क्षपितकर्मांशेनोद्वलितं । ततो भूयोऽप्यन्त-

मुहूर्तं कालं यावद्बद्धं। ततो ज्येष्ठस्थितौ नरकेऽप्रतिष्ठानाभिधाने नरके जातः। तत्र च सता तेन तत् वैक्रियैकादशकं त्रयस्त्रिंशत्सागरोपमाणि यावत् विपाकतः संक्रमतश्च यथायोगमनुभूतं। ततो नरकादुद्धृत्य तिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नः। तत्र च वैक्रियैकादशकस्य भूयोऽपि बन्धो न कृतः, तथाविधाध्यवसायाभावात्। तत एकेन्द्रियो जातः। स च तद्वैक्रियैकादशकं चिरोद्वलनया उद्वलयितुं लग्नः। चिरोद्वलनया चोद्वलयतः सतो यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयमात्रावस्थाना शेषीभवति तदा तस्य वैक्रियैकादशकस्य जघन्यं प्रदेशसत्कर्म ॥ ४२ ॥

मणुयदुगुच्चागोए सुहुमखणबद्धगेसु सुहुमतसे। तित्थयराहारतणू अप्पद्धा वंधिया सुचिरं ॥ ४३ ॥

मणुय त्ति—मनुष्यद्विकमुच्चैर्गोत्रं च पूर्वं सूक्ष्मत्रसेन क्षपितकर्मांशेनोद्वलितं। ततः 'सुहुमखणबद्धगेसु त्ति' सूक्ष्मेण सूक्ष्मैकेन्द्रियेण पृथिव्यादिना सता क्षणमन्तर्मुहूर्तकालं यावत् भूयोऽपि बद्धं। ततः सूक्ष्मत्रसेषु तेजोवायुषु मध्ये समुत्पन्नः। तत्र च चिरोद्वलनया उद्वलयितुं लग्नः। उद्वलयतश्च यदा तेषामेका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा तयोर्मनुष्यद्विकोच्चैर्गोत्रयोः सूक्ष्मक्षणबद्धयोर्जघन्यं प्रदेशसत्कर्म। तथा तीर्थकरनाम 'अप्पद्धा वंधिय त्ति' अल्पं कालं चतुरशीतिवर्षसहस्राणि सातिरेकाणि यावद्बद्ध्वा केवली जातः। ततः 'सुचिरं ति' प्रभूतं कालं देशोनपूर्वकोटिरूपं यावत् केवलिपर्यायं परिपाल्यायोगिकेवलिनः सतः क्षपितकर्मांशस्य चरमसमये वर्तमानस्य तीर्थकरनाम्नो जघन्यं प्रदेशसत्कर्म। अन्ये तु ब्रुवते—तीर्थकरनाम्नः क्षपितकर्मांशेन तत्प्रायोग्यजघन्ययोगिना प्रथमसमये या लता बद्धा सा जघन्यं प्रदेशसत्कर्म। 'आहारतणु त्ति' आहारकतनूपलक्षितमाहारकसप्तकं। 'अप्पद्धा वंधिय त्ति' अल्पकालं

वङ्का मिथ्यात्वं गतः, ततः 'सुचिर त्ति' चिरोद्वलनया उद्वलयतः सतो यदा एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा तस्य जघन्यं प्रदेशसत्कर्म ॥ ४३ ॥

तदेवमुक्तं जघन्यप्रदेशसत्कर्मस्वामित्वं । संप्रति प्रदेशसत्कर्मस्थानप्ररूपणार्थं स्पर्धकप्ररूपणामाह—

चरमावलियपविट्ठा गुणसेढी जासिमत्थि न य उदओ। आवलिगासमयसमा तासिं खलु फड्डगाइं तु ॥४४॥

चरमावलिय त्ति—चरमा सर्वान्तिमा या क्षपणकाले आवलिका तां प्रविष्टा गुणश्रेणिर्यासां प्रकृतीनां अस्ति, न च उदयः तासां स्त्यानर्द्धित्रिकमिथ्यात्वाद्यद्वादशकषायनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जजातिचतुष्टयातपोद्योतस्थावरसूक्ष्मसाधारणरूपाणामेकोनत्रिंशत्संख्यानामावलिकायां यावन्तः समयास्तावन्ति स्पर्धकानि भवन्ति। खलुशब्दो वाक्यालंकारे । तुरेवकारार्थः । आवलिकासमयसमान्येवेत्यर्थः । इयमत्र भावना—अभव्यप्रायोग्यजघन्यप्रदेशसत्कर्मयुक्तः त्रसेषु मध्ये समुत्पन्नः। तत्र च सर्वविरतिं देशविरतिं चानेकशो लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य भूयोऽप्येकेन्द्रियेषु मध्ये समुत्पन्नः। तत्र च पल्योपमासंख्येयभागमात्रं कालं यावत् स्थित्वा मनुष्येषु मध्ये समुत्पन्नः। तत्र च क्षपणायामभ्युद्यतः। तस्य चरमे स्थितिखंडकेऽपगते सति चरमावलिकायां स्तिबुकसंक्रमेण क्षीयमाणायां यदा एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा सर्वमजघन्यं यत् प्रदेशसत्कर्म तत् प्रथमं प्रदेशसत्कर्मस्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति अन्यत् द्वितीयं प्रदेशसत्कर्मस्थानं भवति । ततो द्वयोः परमाण्वोः प्रक्षिप्तयोरन्यत्तृतीयं प्रदेशसत्कर्मस्थानं। त्रिषु परमाणुषु प्रक्षिप्तेषु अन्यत्। एवमेकैकपरमाणुप्रक्षेपेण प्रदेशसत्कर्मस्थानानि नानाजीवापेक्ष-

याऽनन्तानि तावद्वाच्यानि यावत्तस्मिन्नेव चरमे स्थितिविशेषे गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति । अत ऊर्ध्वमन्यत्प्रदेशसत्कर्मस्थानं न प्राप्यते । तत इदमेकं स्पर्धकं । इदं तु चरमस्थितिमधिकृत्य । एवं द्वयोश्चरमस्थित्योर्द्वितीयं स्पर्धकं वक्तव्यं । तिसृषु च स्थितिषु तृतीयं । एवं तावद्वाच्यं यावत्समयोनावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति । तथा चरमस्थितिघातस्य चरमं प्रक्षेपमादिं कृत्वा पश्चानुपूर्व्या प्रदेशसत्कर्मस्थानानि यथोत्तरं वृद्धानि तावद्वक्तव्यानि यावदात्मीयमात्मीयमुत्कृष्टं प्रदेशसत्कर्म । तत एतावदेतदपि सकलस्थितिगतं यथासंभवमेकं स्पर्धकं विवक्ष्यते । तत एतेन स्पर्धकेन सहावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति ॥ ४४ ॥

संजलणतिगे चेवं अहिगाणि य आलिगाए समएहिं । दुसमयहीणेहिं गुणाणि जोगठाणाणि कसिणाणि

संजलणतिगे त्ति—संज्वलनत्रिके क्रोधमानमायारूपे । एवं पूर्वोक्तेन प्रकारेण स्पर्धकानि वाच्यानि । इयमत्र भावना—क्रोधादीनां प्रथमस्थितिर्यावदावलिकाशेषा न भवति तावत् स्थितिघाते रसघातबन्धोदयोदीरणाः प्रवर्तन्ते । आवलिकाशेषायां तु प्रथमस्थितौ व्यवच्छिद्यन्ते । ततोऽनन्तरसमये समयोनावलिकागतं समयद्वयोनावलिकाद्विकबद्धं च सक्तदस्ति, अन्यत् सर्वं क्षीणं । तत्र समयोनावलिकागतस्य दलिकस्य स्पर्धकभावना यथा प्राक् कृता तथात्रापि कर्तव्या । यच्च समयद्वयोनावलिकाद्विकबद्धं दलिकमस्ति तस्यान्यथा स्पर्धकभावना क्रियते, पूर्वप्रकारेणात्र स्पर्धकस्वरूपस्याप्राप्यमाणत्वात् । अथोच्येत कथं स्थितिघातरसघातबन्धोदयोदीरणाव्यवच्छेदानन्तरसमये समयद्वयोनावलिकाद्विकबद्धमेव दलिकमस्ति न शेषमिति ज्ञायते ? उच्यते—इह चरमसमयक्रोधादिवेदकेन यद्बद्धं दलिकं तद्बन्धावलिकातीतं आवलि-

कामात्रेण कालेन निरवशेषं संक्रमयति । तथा च सत्यावलिकाचरमसमये स्वरूपापेक्षयाऽकर्मी भवति । द्विचरमसमय-
वेदकेन यद्बद्धं तदपि च बन्धावलिकायामतीतायामन्येनावलिकामात्रेण कालेन संक्रमयति । आवलिकायाश्चरमसमये
अकर्मी भवति । एवं यत्कर्म यस्मिन् समये बद्धं तत्तस्मात्समयादारभ्य द्वितीयावलिकाचरमसमयेऽकर्मी भवति ।
तथा च सति बन्धाद्यभावप्रथमसमये समयद्वयोनावलिकाद्विकबद्धमेव सत्प्राप्यते, न शेषं । तथाहि—तत्त्वतोऽ-
संख्यातसमयात्मिकाप्यावलिका किलासत्कल्पनया चतुःसमयात्मिका कल्प्यते । ततो बन्धादिव्यवच्छेदचरमस-
मयादर्वाक् अष्टमे समये यद्बद्धं तद्बन्धावलिकायां चतुःसमयात्मिकायामतीतायां अन्यया चतुःसमयात्मिकया
आवलिकया अन्यत्र संक्रम्यमाणं चरमसमये बन्धादिव्यवच्छेदसमयरूपे सर्वथा स्वरूपेण न प्राप्यते, अन्यत्र
सर्वात्मना संक्रमितत्वात् । सप्तमे समये यद्बद्धं तच्चतुःसमयात्मिकायामावलिकायामतिक्रान्तायामन्यया चतुःसम-
यात्मिकया अन्यत्र संक्रम्यमाणं बन्धादिव्यवच्छेदानन्तरसमये स्वरूपेण न प्राप्यते, सर्वात्मनाऽन्यत्र संक्रमितत्वात् ।
शेषषष्ठादिसमयबद्धं तु प्राप्यते । ततो बन्धादौ व्यवच्छिन्ने सति अनन्तरसमये समयद्वयोनावलिकाद्विकबद्धमेव सत्
प्राप्यते नान्यदिति । तत्र बन्धादिव्यवच्छेदसमये जघन्ययोगिना सता यद्बद्धं तस्य बन्धावलिकायामतीतायामन्यया
आवलिकयाऽन्यत्र संक्रम्यमाणस्य चरमसमये यत् संक्रमयिष्यति न तावत्संक्रमयति तत् संज्वलनक्रोधस्य
जघन्यं प्रदेशसत्कर्मस्थानं । एवं द्वितीययोगस्थानवर्तिना बन्धादिव्यवच्छेदसमये यद्बद्धं तस्यापि दलिकं चरमसमये
द्वितीयं प्रदेशसत्कर्मस्थानं । एवं तावद्वाच्यं यावदुत्कृष्टयोगस्थानवर्तिना सता बन्धादिव्यवच्छेदसमये यद्बद्धं तस्य

दलिकं चरमसमये सर्वोत्कृष्टमन्तिमं प्रदेशसत्कर्मस्थानं । एवं जघन्यं योगस्थानमादिं कृत्वा यावन्ति योगस्थानानि भवन्ति तावन्ति प्रदेशसत्कर्मस्थानान्यपि चरमसमये प्राप्यन्ते, इदमेकं स्पर्धकं । एवं बन्धादिव्यवच्छेदद्विचरमसमये जघन्ययोगादिना यद्बध्यते तत्रापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भावनीयानि । केवलं स्थितिद्वयभावीनि तानि प्रतिपत्तव्यानि, बन्धादिव्यवच्छेदचरमसमये बद्धस्यापि दलिकस्य तदानीं द्विसमयस्थितिकस्य प्राप्यमाणत्वात् । इदं द्वितीयं स्पर्धकं । एवं बन्धादिव्यवच्छेदत्रिचरमसमये जघन्ययोगादिना यद्बध्यते तत्रापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भवन्ति । नवरं स्थितित्रयभावीनि तानि भावनीयानि, तदानीं बन्धादिव्यवच्छेदचरमसमयबद्धसत्कस्यापि दलिकस्य त्रिसमयस्थितिकस्य प्राप्यमाणत्वात् । इदं तृतीयं स्पर्धकं । एवं समयद्वयोनावलिकाद्विके यावन्तः समयास्तावन्ति स्पर्धकानि भवन्ति । तत आह—'अहिगाणि य आवलिगाए' इत्यादि । योगस्थानानि कृत्स्नानि समस्तानि समुदायैकरूपतया विवक्षितानि सकलयोगस्थानसमुदाय इत्यर्थः । आवलिकागतैः समयैः समयद्वयहीनैर्गुण्यन्ते । गुणिते सति यावन्तः सकलयोगस्थानसमुदायास्तावन्ति प्रथमस्थितौ व्यवच्छिन्नायामधिकानि स्पर्धकानि भवन्ति । तथाहि—बन्धादिव्यवच्छेदानन्तरसमये समयद्वयोनावलिकाद्विकसमयप्रमाणानि स्पर्धकानि प्राप्यन्ते । एतच्चानन्तरमेव भावितं । बन्धादिव्यवच्छेदादूर्ध्वं च प्रथमस्थितिरावलिकामात्रा तिष्ठति । ततस्तस्यामावलिकामात्रायां प्रथमस्थितौ संक्रमेण व्यवच्छिद्यमानायां परत आवलिकासमयप्रमाणानि स्पर्धकानि अन्यत्र संक्रमेण

व्यवच्छिद्यन्ते। अत एव च तानि पृथक् न गुण्यन्ते। ततस्तेषु व्यवच्छिन्नेषु प्रथमस्थितौ च व्यवच्छिन्नायां शेषाणि समयद्व्योनावलिकासमयप्रमाणान्येवाधिकानि प्राप्यन्ते, नान्यानीति ॥ ४५ ॥

वेएसु फड्डगदुगं अहिगा पुरिसस्स बे उ आवलिया। दुसमयहीणा गुणिया जोगट्ठाणेहिं कसिणेहिं॥४६॥

वेएसु त्ति—वेदेषु स्त्रीवेदपुरुषवेदनपुंसकवेदेषु प्रत्येकं द्वे द्वे स्पर्धके भवतः। कथमिति चेदुच्यते—कश्चिज्जन्तुरभवसिद्धिकप्रायोग्यजघन्यप्रदेशसत्कर्मा त्रसेषु मध्ये समुत्पन्नः। तत्र देशविरतिं सर्वविरतिं च बहुशो लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य द्वात्रिंशदधिकं च सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्याप्रतिपतितसम्यक्त्वो नपुंसकवेदेन क्षपकश्रेणिमारूढः। ततो नपुंसकवेदस्य प्रथमस्थितौ द्विचरमसमये वर्तमाने उपरितनस्थितिखण्डमन्यत्र संक्रमितं। तथा सति उपरितनी स्थितिः सर्वात्मना निर्लेपीकृता। ततः प्रथमस्थितौ चरमसमये सर्वजघन्यं यत् प्रदेशसत्कर्म तत् प्रथमं प्रदेशसत्कर्मस्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। परमाणुद्वयप्रक्षेपे च तृतीयं। एवं नानाजीवापेक्षया एकैकपरमाणुवृद्ध्या प्रदेशसत्कर्मस्थानानि अनन्तानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं। इदमेकं स्पर्धकं। ततो द्वितीयस्थितौ चरमखण्डे संक्रम्यमाणे चरमसमये पूर्वोक्तप्रकारेण सर्वजघन्यं यत् प्रदेशसत्कर्मस्थानं तत् आदिं कृत्वा नानाजीवापेक्षया यथासंभवमुत्तरोत्तरवृद्ध्या निरन्तरप्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं। तानि द्वितीयं स्पर्धकं। अथवा यावत्प्रथमा स्थितिर्द्वितीया च स्थितिर्विद्यते तावदेकं स्पर्धकं। द्वितीयस्थितौ च क्षीणायां प्रथमस्थितौ शेषीभूतायां समयमात्रायां द्वितीयं स्पर्धकमिति।

एवं प्रकारद्वयेन स्त्रीवेदस्यापि स्पर्धकद्वयं भावनीयं । पुरुषवेदस्य पुनः स्पर्धकद्वयमेवं भावनीयं—उदयचरमसमये जघन्यं प्रदेशसत्कर्म आदि कृत्वा नानाजीवापेक्षया एकैकपरमाणुवृद्ध्या निरन्तरं प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावत्क्षुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एतानि सर्वाण्यनन्तानि । एतान्येकं स्पर्धकं । उदयचरमसमये च द्वितीयस्थितौ चरमखंडे संक्रम्यमाणे सर्वजघन्यं प्रदेशसत्कर्मस्थानमादि कृत्वा प्रागिव द्वितीयं स्पर्धकं वाच्यं । किं च 'अहिगा पुरिसस्स त्ति' पुरुषवेदस्याधिकान्यपि स्पर्धकानि भवन्ति । कियन्ति भवन्तीति चेदुच्यते—'वे उ आवलिया' इत्यादि, अत्र द्वे आवलिके इत्यत्र तृतीयार्थे प्रथमा, 'जोगठाणेहिं कसिणेहि' इत्यत्र तु तृतीया प्रथमार्थे । ततोऽयमर्थः—कृत्स्नानि योगस्थानानि सकलयोगस्थानसमुदाय इत्यर्थः । द्वाभ्यामावलिकाभ्यां द्विसमयहीनाभ्यां आवलिकाद्विकसमयैर्द्विरूपहीनैरित्यर्थः । गुण्यन्ते, गुणिते च सति यावन्तः सकलयोगस्थानसमुदायास्तावन्ति स्पर्धकान्यधिकानि भवन्ति, समयद्वयहीनावलिकाद्विकसमयप्रमाणानि अधिकानि भवन्तीत्यर्थः । तथाहि—पुरुषवेदस्य बन्धोदयादिव्यवच्छेदे सति समयद्वयोनावलिकाद्विकबद्धं पुरुषवेदस्य दलिकं विद्यते । ततोऽवेदकस्य सतः संज्वलनत्रिकोक्तप्रकारेण योगस्थानापेक्षया समयद्वयहीनावलिकाद्विकसमयप्रमाणानि स्पर्धकानि वाच्यानि ॥ ४६ ॥

संप्रत्युक्ताना वक्ष्यमाणानां च स्पर्धकाना सामान्यरूपं लक्षणमाह—

सव्वजहन्नाढत्तं खंधुत्तरओ निरंतरं उप्पिं । एगं उव्वलमाणी लोभजसा नोकसायाणं ॥ ४७ ॥

सव्वजहन्न त्ति—सर्वजघन्यात् प्रदेशसत्कर्मस्थानादारभ्यमेकैकेन कर्मस्कन्धेनोत्तरतः पूर्वस्मात्पूर्वस्मादुत्तरोत्तरेण निरन्तरं

प्रदेशसत्कर्मस्थानजातं तावज्ज्ञेयं यावत् 'उप्पिं' उपरितनं सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। इयमत्र भावना—सर्वजघन्यप्रदेशसत्कर्मस्थानादारभ्य योगस्थानापेक्षया एकैकेन कर्मस्कन्धेन वृद्धानि प्रदेशसत्कर्मस्थानानि निरन्तराणि तावन्नेतव्यानि यावदुत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। एकैककर्मस्कन्धेनोत्तरत इति चोक्तं योगस्थानवशलब्धस्पर्धकापेक्षया, अन्यथा "चरमावलिय पविट्ठेत्यादौ" यानि स्पर्धकान्युक्तानि तेष्वेकैकेन प्रदेशेनैवोत्तरोत्तरा वृद्धिः प्राप्यते इति। तदेवमुक्तं सामान्येन लक्षणं स्पर्धकानां। संप्रत्युद्वल्यमानप्रकृतीनां स्पर्धकप्ररूपणार्थमाह—'एगं उव्वलमाणी' एकं स्पर्धकं उद्वल्यमानप्रकृतीनां त्रयोविंशतिसंख्यानां। तत्र सम्यक्त्वस्य भावना क्रियते—अभव्यप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये समुत्पन्नस्तत्र सम्यक्त्वं देशविरतिं चानेकवारान् लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य द्वात्रिंशदधिकं च सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्य मिथ्यात्वं गतः, ततश्चिरोद्वलनया सम्यक्त्वमुद्वलयतो यदा चरमखंडं संक्रान्तं एका च शेषा उदयावलिका तिष्ठति, तामपि स्तिबुकसंक्रमेण मिथ्यात्वे संक्रमयति। संक्रमयतश्च या एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभूता यदावतिष्ठते तदा सम्यक्त्वस्य सा जघन्यं प्रदेशसत्कर्मस्थानं। ततो नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या प्रदेशसत्कर्मस्थानानि तावन्नेतव्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। इदमेकं स्पर्धकं। एवं सम्यग्मिथ्यात्वस्यापि। एवमेव च शेषाणामप्युद्वलनयोग्यानां वैक्रियैकादशकाहारकसप्तकोच्चैर्गोत्रमनुष्यद्विकरूपाणां प्रकृतीनां। नवरं तासां द्वात्रिंशदधिकसागरोपमशतप्रमाणः सम्यक्त्वकालो मूलत एव न वक्तव्यः। 'लोभजसेत्यादि' संज्वलनलोभयशःकीर्त्योरपि एकं स्पर्धकं। तथाहि—स एवाभवसिद्धिकप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये

समुत्पन्नः । तत्र च चतुःकृत्वो मोहोपशममन्तरेण शेषाभिः क्षपितकर्मांशक्रियाभिः कर्मदलिकं प्रभूतं क्षपयित्वा चिरकालं च संयममनुपाल्य क्षपणायोत्थितः । तस्य यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म । ततस्तस्मादारभ्य नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एवमेकं संज्वलनलोभयशःकीर्त्योः स्पर्धकं। षण्णामपि च नोकषायाणां प्रत्येकमेकैकं स्पर्धकं। तदपि चैवं—स एवाभवसिद्धिकप्रायोग्यजघन्यप्रदेशसत्कर्मा त्रसेषु मध्ये समुत्पन्नः । तत्र सम्यक्त्वं देशविरतिं चानेकशो लब्ध्वा चतुरश्च वारान्मोहनीयमुपशमय्य स्त्रीवेदनपुंसकवेदौ च भूयो भूयो बन्धेन हास्यादिदलिकसंक्रमेण च प्रभूतमापूर्य मनुष्यो जातस्तत्र चिरकालं संयममनुपाल्य क्षपणायोत्थितः । तस्य चरमखंडचरमसमये यद्विद्यमानं प्रत्येकं षण्णां नोकषायाणां प्रदेशसत्कर्म तत्सर्वं जघन्यं । ततस्तस्मादारभ्य नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि अनन्तानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्म । एवमेकं षण्णां नोकषायाणां प्रत्येकं स्पर्धकं ॥ ४७ ॥

संप्रति मोहनीयवर्जानां घातिकर्मणां स्पर्धकनिरूपणार्थमाह—

ठिइखंडगविच्छेया खीणकसायस्स सेसकालसमा । एगहिया घाईणं निद्दापयलाण हिच्चेकं ॥ ४८ ॥

ठिइखंडग त्ति—क्षीणकषायस्य स्थितिखंडव्यवच्छेदात् स्थितिघातव्यवच्छेदात् परतो यः शेषकालस्तिष्ठति तत्समानि शेषकालसमयसमानि स्पर्धकानि एकाधिकानि घातिकर्मणां भवन्ति । निद्राप्रचलयोस्तु हित्वा परित्यज्य एकं चरमं स्थितिगतं स्पर्धकं, शेषाणि वाच्यानि, निद्राप्रचलयोर्हि उदयाभावात् स्वस्वरूपेण चरमसमये दलिकं न प्राप्यते, किं-

तु परप्रकृतिरूपेण, तेन तयोरेकं स्पर्धकं चरमस्थितिगतं परित्यज्यते। स्पर्धकानां चेयं भावना—क्षीणकषायाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिंश्च संख्येयतमेऽन्तर्मुहूर्तप्रमाणे भागेऽवतिष्ठमाने ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकानां स्थितिसत्कर्म सर्वापवर्तनयाऽपवर्त्य क्षीणकषायाद्धासमं करोति। निद्राप्रचलयोस्त्वेकसमयहीनं। अत्र च कारणं प्रागेवोक्तं। तदानीं च स्थितिघातादयो निवृत्ताः। यदपि च क्षीणकषायाद्धासमं स्थितिसत्कर्म कृतं, तदपि च क्रमेण यथासंभवमुदयोदीरणाभ्यां क्षयमुपगच्छत्तावद्वक्तव्यं यावदेका स्थितिः शेषीभवति। तस्यां च क्षपितकर्मांशस्य सर्वजघन्यं यत्प्रदेशसत्कर्म तत्प्रथमं स्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। एवमेकैकपरमाणुवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्य सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं। इदमेकं स्पर्धकं। द्वयोश्च स्थित्योः शेषीभूतयोरुक्तप्रकारेण द्वितीयं स्पर्धकं। तिसृषु स्थितिषु शेषीभूतासु तृतीयं स्पर्धकं। एवं क्षीणकषायाद्धासमीकृते सत्कर्मणि यावन्तः स्थितिविशेषास्तावन्ति स्पर्धकानि वाच्यानि। चरमस्य च स्थितिघातस्य चरमं प्रक्षेपमादौ कृत्वा पश्चानुपूर्व्या प्रदेशसत्कर्मस्थानानि यथोत्तरं वृद्धानि तावद्वक्तव्यानि यावदात्मीयमात्मीयं सर्वोत्कृष्टं प्रदेशसत्कर्म तावदेतदपि सकलनिजनिजस्थितिगतं यथासंभवमेकैकं स्पर्धकं द्रष्टव्यं। ततस्तेनाधिकानि स्थितिघातव्यवच्छेदात् परतः क्षीणकषायाद्धासमयसमानि स्पर्धकानि भवन्ति। निद्राप्रचलयोस्तु द्विचरमस्थितिमधिकृत्य स्पर्धकानि वाच्यानि, चरमसमये तद्दलिकस्याप्राप्यमाणत्वात्। तत एकेन हीनानि तस्य स्पर्धकानि द्रष्टव्यानि ॥ ४८ ॥

सेलेसिसंतिगाणं उदयवईणं तु तेण कालेणं। तुल्ला णेगहियाइं सेसाणं एगऊणाइं ॥ ४९ ॥

सेलेसि त्ति—शैलेशी अयोग्यवस्था तस्यां सत्ता यासां प्रकृतीनां ताः शैलेशीसत्ताकाः। ताश्च द्विधा, तद्यथा—उदयवत्योऽनुदयवत्यश्च। तत्रोदयवत्यो मनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रससुभगादेयपर्याप्तबादरयशःकीर्तितीर्थकरोच्चैर्गोत्रसातासातान्यतरवेदनीयरूपा द्वादश। तासां प्रकृतीनां तेनायोगिकालेन तुल्यानि स्पर्धकानि एकैकेनाधिकानि भवन्ति, अयोगिकाले यावन्तः समयास्तावन्ति स्पर्धकानि एकेनाधिकानि भवन्तीत्यर्थः। कथमिति चेदुच्यते—अयोगिकेवलिनश्चरमसमये क्षपितकर्मांशमधिकृत्य यत्सर्वजघन्यं प्रदेशसत्कर्मस्थानं तत् प्रथमं स्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। एवं नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या तावत्प्रदेशसत्कर्मस्थानानि द्रष्टव्यानि यावद्गुणितकर्मांशस्य सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं इदमेकं स्पर्धकं। तत एवमेव द्वयोः स्थित्योः शेषीभूतयोर्द्वितीयं स्पर्धकं, तिसृषु स्थितिषु तृतीयं। एवं निरन्तरं तावदवगन्तव्यं यावदयोगिप्रथमसमयः। तथा सयोगिकेवलिचरमसमये चरमस्थितिखंडसत्कं चरमप्रक्षेपमादिं कृत्वा यावदात्मीयमात्मीयं सर्वोत्कृष्टं प्रदेशसत्कर्म तावदेतदपि सकलस्वस्वस्थितिगतमेकैकं स्पर्धकं द्रष्टव्यं। ततोऽयोगिकेवलिगुणस्थानके यावन्तः समयास्तावन्ति स्पर्धकानि एकाधिकानि उदयवतीनां प्रकृतीनां प्रत्येकं भवन्ति। शेषाणां त्वनुदयवतीनां प्रकृतीनां त्र्यशीतिसंख्यानां तावन्ति स्पर्धकान्येकेन हीनानि भवन्ति। यतस्ता अयोगिकेवलिचरमसमये उदयवतीषु मध्ये स्तिबुकसंक्रमेण संक्रम्यन्ते। ततस्तासां चरमसमयगतं स्पर्धकं न प्राप्यत इति तेन हीनानि तासां स्पर्धकानि भवन्ति। इह यद्यपि मनुष्यगत्यादीनां 'एगं उदयलमाणी' इत्यनेन

ग्रन्थेन प्रागेव स्पर्धकप्ररूपणा कृता तथापि इहापि तासां स्पर्धकानि प्राप्यन्त इति भूय उपादानं। एवं करणेष्वपि बन्धनादिषु यथासंभवं स्पर्धकानि वाच्यानि ॥ ४९ ॥

तथा चाह—

संभवतो ठाणाइं कम्मपएसेहिँ होंति नेयाइं। करणेसु य उदयम्मि य अणुमाणेणेवमेएणं ॥ ५० ॥

संभवतो त्ति—संभवतः संभवमाश्रित्य स्थानानि प्रदेशसत्कर्मस्थानानि। करणेषु बन्धनादिषु उदये च। कर्मप्रदेशेभ्यः कर्मप्रदेशानधिकृत्य। ज्ञेयानि ज्ञातव्यानि। कथमित्याह—एवमुपदर्शितेन। एतेन प्रागुक्तेन अनुमानेन प्रकारेण ज्ञातव्यानि। तथाहि—बन्धनकरणे जघन्यं योगस्थानमादिं कृत्वा यावदुत्कृष्टयोगस्थानं एतावन्ति प्रदेशसत्कर्मस्थानानि बन्धमाश्रित्य प्राप्यन्ते, तावन्ति चैकं स्पर्धकं। एवं संक्रमणादिष्वपि प्रत्येकं यथायोगं भावनीयम् ॥ ५० ॥

करणोदयसंताणं पगइट्ठाणेसु सेसगतिगे य। भूयक्कारप्पयरो अवट्ठिओ तह अवत्तव्वो ॥ ५१ ॥

करणोदयसंताणं ति—अष्टानां करणानां उदयसत्तयोश्च प्रकृतिस्थानेषु 'सेसगतिगे य त्ति' शेषके च त्रिके स्थित्यनुभागप्रदेशरूपे प्रत्येकं चत्वारो विकल्पा ज्ञातव्याः। तद्यथा—भूयस्कारः, अल्पतरः, अवस्थितः, अवक्तव्यश्च ॥ ५१ ॥

एतेषां चतुर्णां लक्षणमिदम्—

एगादहिगे पढमो एगाईऊणगम्मि बिइओ उ। तत्तियमेत्तो तइओ पढमे समये अवत्तव्वो ॥ ५२ ॥

एगादहिगे त्ति – इह बन्धमाश्रित्य भावना क्रियते। बन्धो द्विधा–मूलप्रकृतीनामुत्तरप्रकृतीनां च। तत्र मूलप्रकृतीनां बन्धः कदाचित् अष्टानां, कदाचित्सप्तानां, कदाचित् षण्णां, कदाचिदेकस्याः। तत्र यदा स्तोकाः प्रकृतीराबध्नन् परिणामविशेषतो भूयसीः प्रकृतीर्बध्नाति, यथा सप्त बद्ध्वा अष्टौ बध्नाति, यद्वा षड् एका च बद्ध्वा सप्त, तदा स बन्धो भूयस्कारः। तथा चाह–'एगादहिगे पढमो' एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिरधिके बन्धे प्रथमः प्रकारो भवति, भूयस्कारो बन्धो भवतीत्यर्थः। यदा तु प्रभूताः प्रकृतीर्बध्नन् परिणामविशेषतः स्तोका बद्धुमारभते, यथाऽष्टौ बद्ध्वा सप्त बध्नाति, सप्त वा बद्ध्वा षड्, षड्वा बद्ध्वा एकां, तदानी स बन्धोऽल्पतरः। तथा चाह–'एगाईऊणगम्मि बिइओ उ' एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिरूने बन्धे द्वितीयः प्रकारः अल्पतर इत्यर्थः। तथा स एव भूयस्कारोऽल्पतरो वा द्वितीयादिषु समयेषु तावन्मात्रतया प्रवर्तमानोऽवस्थित इति व्यपदेशं लभते। तथा चाह 'तत्तियमेत्तो तईओ' तावन्मात्रस्तृतीयोऽवस्थित इत्यर्थः। एते त्रयोऽपि प्रकारा मूलप्रकृतीनां संभवन्ति। चतुर्थस्तु न संभवति। न हि मूलप्रकृतीनां सर्वासा बन्धव्यवच्छेदे सति भूयोऽपि बन्धः संभवति येन चतुर्थो बन्धः स्यात्। तत उत्तरप्रकृतीरधिकृत्य स वेदितव्यः। यथा मोहनीयस्य तद्गतसर्वोत्तरप्रकृतिबन्धव्यवच्छेदे सति उपशान्तमोहगुणस्थानकात् प्रतिपाते भूयोऽपि बन्धारंभप्रथमसमये, स हि तदानी न भूयस्कारो वक्तुं शक्यते, नाप्यल्पतरः, नाप्यवस्थितः, तल्लक्षणायोगात्, ततोऽसाववक्तव्य इत्युच्यते, भूयस्कारादिनाम्ना वक्तुमशक्यत्वात्। एवमुत्तरप्रकृतीरधिकृत्य ज्ञानावरणीयादीनां वेदनीयवर्जानामवक्तव्यो भावनीयः। वेदनीयस्य त्ववक्तव्यो न संभवति, तस्य हि सर्वथा बन्धव्यवच्छेदः सयोगिकेवलिचरमसमये। न च ततः प्रतिपातो येन भूयो बन्धः प्रवर्तमानः प्रथमसमयेऽव-

क्तव्यः स्यात् । तदेवं मूलप्रकृतीरधिकृत्यावक्तव्यवर्जाः शेषास्त्रयः प्रकाराः, उत्तरप्रकृतीस्त्वधिकृत्य चत्वारोऽपि प्रकाराः संभवन्ति । यथा च बन्धे चत्वारोऽपि प्रकारा भाविता एवं संक्रमे उद्वर्तनायामपवर्तनायामुदीरणायामुपशमनायामुदये सत्तायां च प्रकृतिस्थानेषु स्थित्यनुभागप्रदेशस्थानेषु च यथायोगं स्वयमेव भावनीयाः ॥ ५२ ॥

करणोदयसंताणं सामित्तोघेहिं सेसगं नेयं । गइयाइमग्गणासुं संभवउ सुट्ठु आगमिय ॥ ५३ ॥

करणोदयसंताणं ति–अष्टानां करणानामुदयसत्तयोश्च यदुक्तं प्रत्येकं सप्रपञ्चं स्वरूपं तत् ओघस्वामित्वमुच्यते। 'सामित्तोघेहिं ति' द्वितीयार्थे तृतीया, व्यक्त्यपेक्षया च बहुवचनं । ततश्च तानि ओघस्वामित्वानि यथोक्तकरणाष्टकोदयसत्तास्वरूपरूपाणि सुष्ठु आगम्य परिज्ञाव्य शेषकमपि ज्ञातव्यं क्व ज्ञातव्यमित्याह–गत्यादिषु चतुर्दशसु मार्गणास्थानेषु । कथमित्याह—संभवतो यथा संभवति यथा घटते तथैव, नान्यथा ॥ ५३ ॥

वंधोदीरणसंकमसंतुदयाणं जहन्नगाईहिं । संवेहो पगइ ठिई अणुभागपएसउ नेउ ॥ ५४ ॥

वंधोदीरण त्ति—बन्धोदीरणासंक्रमसत्तोदयरूपाणां पञ्चानां पदार्थानां प्रकृतिस्थित्यनुभागप्रदेशतः प्रकृतिस्थित्यनुभागप्रदेशानधिकृत्य जघन्याजघन्योत्कृष्टानुत्कृष्टैः संवन्धः परस्परमेककालमागमाविरोधेन मीलनं । यथा ज्ञानावरणीयस्य जघन्ये स्थितिबन्धे जघन्योऽनुभागबन्धः, जघन्यः प्रदेशबन्धः, अजघन्याः स्थित्युदीरणासंक्रमसत्तोदया इत्यादिरूपं, तत्पूर्वापरौ सुष्ठु परिज्ञाव्य ज्ञातव्यम् ॥ ५४ ॥

तदेवमुक्ता सत्ता, तदभिधानाच्च यत्प्राक् प्रतिज्ञातं 'कम्मछगस्स करणट्ठगुदयसंताणि वोच्छामि' इति तत्समर्थितं ।

संप्रति प्रकरणपरिज्ञाननिबन्धनां विशिष्टफलसंप्राप्तिमाह—

करणोदयसंतविऊ तन्निज्जरकरणसंजमुज्जोगा । कम्मट्ठगुदयनिट्ठाजणियमणिट्ठं सुहमुवेंति ॥ ५५ ॥

करणोदय त्ति—करणानामुक्तस्वरूपाणामुदयसत्तयोश्च सम्यक् परिज्ञानयुक्ताः । 'तन्निज्जरकरणसंजमुज्जोग त्ति' तासां करणोदयसत्तानां या निर्जरा तस्याः करणं निर्वर्तनं तदर्थं संयमं प्रति उद्योग उद्यमो येषां ते तन्निर्जराकरणसंयमोद्योगाः । ते इत्थंभूताः सन्तः किमित्याह—कर्माष्टकोदय (सत्ता) निष्ठाजनितं कर्माष्टकस्याष्टानां कर्मणामुदयनिष्ठया, उदयग्रहणं बन्धसत्ताद्युपलक्षणं, ततोऽयमर्थः–बन्धोदयसत्ताक्षयेण जनितमुत्पादितं यत् 'मणिट्ठं ति' मनस इष्टं । अथवा 'अणिट्ठं ति' न विद्यते निष्ठा पर्यवसानं यस्य तदनिष्ठं अपर्यवसानं सुखं । उभयत्रापि मोक्षसुखं । तत् उपयन्ति प्राप्नुवन्ति । तस्मादवश्यमिह प्रकरणे प्रेक्षावद्भिर्निरन्तरमभ्यासः करणीयः, कृत्वा च यथाशक्ति संयमाध्वनि प्रवर्तितव्यं । प्रवृत्तेन च सता संक्लिष्टाध्यवसायरूपकुपथपरिहारे यत्न आस्थेय इति ॥ ५५ ॥

संप्रत्याचार्य आत्मन औद्धत्यं परिहरन्नन्येषां बहुश्रुतानां प्रकरणार्थपरिभावनाविषये प्रार्थनां च कुर्वन् प्रेक्षावतां प्रकरणविषये उपादेयबुद्धिपरिग्रहार्थं प्रकरणस्य परंपरया सर्वविन्मूलतां ख्यापयति—

इय कम्मप्पगडीओ जहासुयं नीयमप्पमइणा वि । सोहियणाभोगकयं कहंतु वरदिट्ठिवायन्नू ॥ ५६ ॥

इय त्ति—अल्पमतिनापि अल्पबुद्धिनापि सता । इत्येवमुक्तेन प्रकारेण गुरुचरणकमलपर्युपासनां कुर्वता गुरुपादमूले यथा मया श्रुतं तथा कर्मप्रकृतेः कर्मप्रकृतिनामकात्प्राभृतात् । दृष्टिवादे हि चतुर्दश पूर्वाणि । तत्र च द्विती-

येऽग्रायणीयाभिधानेऽनेकवस्तु समन्विते पूर्वे पञ्चमं वस्तु विंशतिप्राभृतपरिमाणं । तत्र कर्मप्रकृत्याख्यं चतुर्थं प्राभृतं चतुर्विंशत्यनुयोगद्वारमयं । तस्मादिदं प्रकरणं नीतं आकृष्टमित्यर्थः । अस्मिंश्च प्रकरणे यत्किमपि स्खलितमनाभोगकृतमनाभोगजनितं । छद्मस्थस्य हि कृतप्रयत्नस्याप्यावरणसामर्थ्यतोऽनाभोगः संभवति । ततोऽनाभोगजनितं यत्किमपि स्खलितं तत् शोधयित्वाऽपनीय । ये वरा उत्कलितबुद्ध्यतिशयसंपन्ना दृष्टिवादज्ञा द्वादशकांगविदस्ते । ममोपरि महतीमनुग्रहबुद्धिमास्थाय । तत्रान्यत् पदमागमानुसारि प्रक्षिप्य कथयन्तु यथेदमत्र पदं समीचीनं नेदमिति, न पुनरुपेक्षारूपोऽप्रसादस्तैः कर्तव्यः । अत्र 'इय कम्मपयडीओ' इत्यादिना ग्रन्थेन प्रकरणस्य सर्वविन्मूलता ख्यापिता द्रष्टव्या । दृष्टिवादो हि भगवता साक्षादर्थतोऽभिहितः । सूत्रतस्तु सुधर्मस्वामिना । दृष्टिवादान्तर्गतं च कर्मप्रकृतिप्राभृतं । तस्माच्चेदं प्रकरणमुद्धृतमिति परंपरया सर्वविन्मूलम् ॥ ५६ ॥ ४७४ ॥

इह शास्त्रस्यादौ मध्येऽवसाने च मंगलमवश्यमभिधातव्यं । आदिमंगलाभिधाने हि शास्त्रमविघ्नेन परिसमाप्तिमियर्ति, मध्यमंगलाभिधानतश्च शिष्यप्रशिष्यादिपरंपरागमनेन स्थैर्यमाधत्ते, पर्यन्तमंगलाभिधानप्रभावतः पुनः शिष्यप्रशिष्यादिभिरवधार्यमाणं तेषां चेतसि सुप्रतिष्ठितं भवति । तत्रादिमंगलं 'सिद्धं सिद्धत्थसुयं' इत्याद्युक्तं । मध्यमंगलं तु 'अकरण अणुइन्नाए अणुयोगधरे पणिवयामि' इति । संप्रति पुनः पर्यवसानमंगलमाह—

जस्स वरसासणावयवफरिसपविकसियविमलमइकिरणा । विमलंति कम्ममइले सो मे सरणं महावीरो ॥ २२९ ॥

जस्स त्ति—यस्य भगवतो महावीरस्य वरमनुत्तरं यच्छासनं तदवयवसंस्पर्शात् ये प्रकर्षेण विकसिता उद्बोधं गता

विमला अपगतमिथ्याज्ञानत्वरूपमला मतिकिरणा मतिरश्मयः ते कर्ममलिनान् कर्मतमोमलीमसान् अमुमतो विमलयन्ति विमलीकुर्वन्ति । स भगवान् महावीरो वर्धमानस्वामी मे मम संसारभयभीतस्य शरणं परित्राणहेतुः, नान्य इति ॥ ५७ ॥ ४७५ ॥

कर्मप्रपञ्चं जगतोऽनुबन्धक्लेशावहं वीक्ष्य कृपापरीतः । क्षयाय तस्योपदिदेश रत्नत्रयं स जीयाज्जिनवर्धमानः ॥ १ ॥

निरस्तकुमतध्वान्तं सत्पदार्थप्रकाशकम् । नित्योदयं नमस्कुर्मो जैनसिद्धान्तभास्करम् ॥ २ ॥

पूर्वान्तर्गतकर्मप्रकृतिप्राभृतसमुद्धृता येन । कर्मप्रकृतिरियमतः श्रुतकेवलिगम्यभावार्था ॥ ३ ॥ युग्मम्

ततः क्व चैषा विषमार्थयुक्ता क्व चाल्पशास्त्रार्थकृतश्रमोऽहम् । तथापि सम्यग्गुरुसंप्रदायात् किञ्चित्स्फुटार्था विवृता मयैषा ॥ ४

कर्मप्रकृतिनिधानं बद्धं येन मादृशां योग्यम् । चक्रे परोपकृतये श्रीचूर्णिकृते नमस्तस्मै ॥ ५ ॥

एनामतिगम्भीरां कर्मप्रकृतिं विवृण्वता कुशलम् । यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ६ ॥

अर्हन्तो मंगलं मे स्युः सिद्धाश्च मम मंगलम् । मंगलं साधवः सम्यग् जैनो धर्मश्च मंगलम् ॥ ७ ॥

॥ इति श्रीमलयगिरिविरचिता कर्मप्रकृतिटीका ॥

Puplished by Sheth Naginbhai Gholabhai, Javeri Bazar, and Printed by R. Y. Shedge at the Nirnaya-Sagar Press, 23, Kolbhat Lane, Bombay

तदेवमेकैकप्रकृतीनां संक्रमस्य पतद्ग्रहत्वस्य च साद्यनादिप्ररूपणा कृता । संप्रति प्रकृतिस्थानेषु तां निर्दिदिक्षुरतिदेशमाह—

पगईठाणे वि तहा पडिग्गहो संकमो य बोधवो। पढमंतिमपगईणं पंचसु पंचएहु दो वि नवे ॥ ७ ॥

पगईठाणे त्ति—यथैकैकस्याः प्रकृतेः पतद्ग्रहत्वं संक्रमश्च साद्यादिरूप उक्तस्तथा प्रकृतिस्थानेष्वपि वेदितव्यः । द्वित्र्यादीनां च प्रकृतीनां समुदायः प्रकृतिस्थानं । तत्र प्रथमतो ज्ञानावरणीयस्य तत्समानवक्तव्यत्वादन्तरायस्य च संक्रमपतद्ग्रहत्वात् स्थानप्रतिपादनार्थमाह—'पढमंतिमेत्यादि' प्रथमप्रकृतेर्ज्ञानावरणीयस्य अन्तिमप्रकृतेरन्तरायस्य संबन्धिनीनां प्रत्येकं पञ्चानामपि प्रकृतीनां पञ्चस्वपि प्रकृतिषु द्वावपि संक्रमपतद्ग्रहभावौ भवतः । एतदुक्तं भवति—ज्ञानावरणीयान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं संक्रमे पतद्ग्रहभावे च भवतीति । तौ चेमौ संक्रमपतद्ग्रहभावौ साद्यादिरूपतया चतुष्प्रकारौ । तथाहि—उपशान्तमोहगुणस्थानके तयोरभावात्, ततः प्रतिपाते च पुनः सम्भवात् सादी, तत्स्थानमप्राप्तस्य पुनरनादी, ध्रुवाध्रुवता चाभव्यभव्यापेक्षया भावनीया ॥ ७ ॥

संप्रति दर्शनावरणीयस्य संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—

नवगछक्कचउक्के नवगं छक्कं च चउसु बिइयम्मि। अन्नयरस्सिं(स्से)अन्नयरा वि य वेयणीयगोएसु ॥ ८ ॥

नवग त्ति—द्वितीये दर्शनावरणीये नवकषट्कचतुष्केषु नवकं संक्रामति, षट्कं च चतसृषु प्रकृतिषु । तेनेह द्वे संक्रमस्थाने । तद्यथा—नवकं, षट्कं च । त्रीणि पतद्ग्रहस्थानानि, तद्यथा—नवकं षट्कं चतुष्कं च । तत्र नवकरूपे पतद्ग्रहे मिथ्या-

दृष्टयः सासादनाश्च नवविधदर्शनावरणीयबन्धका नवकमपि संक्रमयन्ति । अयं च नवकरूपः पतद्ग्रहः साद्यादिरूपतया चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—सम्यग्मिथ्यादृष्ट्यादिगुणस्थानेषु न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानकमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । तथा सम्यग्मिथ्यादृष्टिगुणस्थानकादारभ्यापूर्वकरणस्यासंख्येयतमं भागं यावन्नवविधदर्शनावरणीयसत्कर्माणः षड्विधदर्शनावरणीयबन्धकाः षट्के नवकं संक्रमयन्ति । अयं तु षट्करूपः पतद्ग्रहः साद्यध्रुवः, कादाचित्कत्वात् । तथाऽपूर्वकरणस्य संख्येयतमे भागे निद्रा प्रचलयोर्बन्धव्यवच्छेदे तत ऊर्ध्वं सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावदुपशमश्रेण्यां नवविधदर्शनावरणीयसत्कर्माणश्चतुर्विधदर्शनावरणीयबन्धकाश्चतुष्के नवकं संक्रमयन्ति । अयमपि च चतुष्करूपः पतद्ग्रहः साद्यध्रुवः, कदाचिद्भावात् । नवकरूपः संक्रमश्चतुःप्रकारः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि-सूक्ष्मसंपरायात्परत उपशान्तमोहे न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । क्षपकश्रेण्यां पुनरनिवृत्तिकरणाद्धायाः संख्येयतमे भागेऽवशिष्टे सति स्त्यानर्द्धित्रिकक्षयात् परतः सूक्ष्मसंपरायगुणस्थानकचरमसमयं यावत् षड्विधदर्शनावरणीयसत्कर्माणश्चक्षुरादिदर्शनावरणीयचतुष्टयं बध्नन्तस्तस्मिन् दर्शनावरणचतुष्के षट्कं संक्रमयन्ति । इमावपि संक्रमपतद्ग्रहौ साद्यध्रुवौ, कादाचित्कत्वात् । अतः परं तु न संक्रमो नापि पतद्ग्रहत्वमिति । संप्रति वेदनीयगोत्रयोः संक्रमपतद्ग्रहत्वस्थानप्रतिपादनार्थमाह—'अन्नयरस्से इत्यादि' वेदनीये गोत्रे चान्यतरस्यां प्रकृतौ बध्यमानायामन्यतराऽबध्यमाना प्रकृतिः संक्रामति । तेन या यत्र संक्रामति सा तस्याः पतद्ग्रहः । इतरा च संक्रमस्थानं । तत्र सातबन्धकाना

मिथ्यादृष्टिप्रकृतीना सूक्ष्मसंपरायपर्यन्तानां सातासातसत्कर्मणां सातवेदनीयं पतद्ग्रहः, असातं संक्रमस्थानं । असातव-न्धकानां पुनर्मिथ्यादृष्टिप्रकृतीनां प्रमत्तसंयतपर्यन्तानां सातासातसत्कर्मणां असातवेदनीयं पतद्ग्रहः, सातवेदनीयं तु संक्रमस्थानं । इमौ च सातासातरूपौ संक्रमपतद्ग्रहौ साद्यध्रुवौ भूयो भूयः परावृत्त्य(त्ति)भावात् । तथा मिथ्यादृष्टिप्रकृतीनां सूक्ष्मसंपरायपर्यन्तानामुच्चैर्गोत्रबन्धकानामुच्चनीचैर्गोत्र(बन्ध) सत्कर्मणामुच्चैर्गोत्रं पतद्ग्रहः, नीचैर्गोत्रं तु संक्रमस्थानं । नीचैर्गोत्रबन्धकानां तु मिथ्यादृष्टिसासादनानामुच्चनीचैर्गोत्रसत्कर्मणां नीचैर्गोत्रं पतद्ग्रहः, उच्चैर्गोत्रं तु संक्रम्यमाणं (मस्थानं)। इमावप्युच्चैर्गोत्रनीचैर्गोत्ररूपौ संक्रमपतद्ग्रहौ प्रागिव साद्यध्रुवौ भावनीयौ ॥ ९ ॥

संप्रति मोहनीयस्य संक्रमपतद्ग्रहत्वस्थानप्रतिपादनावसरस्तत्र प्रथमतः संक्रमसंक्रमस्थाननिर्देशं चिकीर्षुराह—

अठचउरहियवीसं सत्तरसं सोलसं च पन्नरसं । वज्जिय संकमठाणाइं होंति तेवीसइं मोहे ॥ १० ॥

अठ त्ति–अष्टाधिका चतुरधिका च विंशतिः अष्टाविंशतिश्चतुर्विंशतिश्चेत्यर्थः । तथा सप्तदश षोडश पञ्चदश चेत्य-मूनि स्थानानि वर्जयित्वा शेषाणि एकद्वित्रिचतुःपञ्चषट्सप्ताष्टनवदशैकादशद्वादशत्रयोदशचतुर्दशाष्टादशैकोनविंशति-विंशत्येकविंशतिद्वाविंशतित्रयोविंशतिपञ्चविंशतिषड्विंशतिसप्तविंशतिलक्षणानि त्रयोविंशतिसंख्यानि मोहनीये संक्रम-स्थानानि भवन्ति । तथाहि–अष्टाविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति मिथ्या-त्वव्यतिरिक्ताः शेषाः सप्तविंशतिः संक्रामन्ति । तत्र चारित्रमोहनीयं पञ्चविंशतिप्रकृत्यात्मकं परस्परं संक्रामति । सम्य-क्त्वसम्यग्मिथ्यात्वयोः मिथ्यात्वे । तथा सम्यक्त्वे उद्वलिते सति सप्तविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यग्मिथ्या-

त्वस्य पतद्ग्रह इति तद्व्यतिरिक्ताः शेषाः षड्विंशतिः संक्रामन्ति । सम्यग्मिथ्यात्वेऽप्युद्वलिते सति षड्विंशतिसत्कर्मणः पञ्च-
विंशतिः । अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणः पञ्चविंशतिः, मिथ्यात्वस्य संक्रमाभावात्, न हि तत् चारित्र-
मोहनीये संक्रामति, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं संक्रमाभावात् । अथौपशमिकसम्यग्दृष्टेरष्टाविंशतिस-
त्कर्मणः सम्यक्त्वलाभादावलिकाया ऊर्ध्वं वर्तमानस्य सम्यक्त्वे मिथ्यात्वसम्यग्मिथ्यात्वयोः संक्रमः । तेन तत् पतद्ग्रह
इति । तस्मिन्नपसारिते शेषा सप्तविंशतिः संक्रमे प्राप्यते । तस्यैव चौपशमिकसम्यग्दृष्टेरष्टाविंशतिसत्कर्मण आवलिकाया
अभ्यन्तरे वर्तमानस्य सम्यग्मिथ्यात्वं सम्यक्त्वे न संक्रामति। यतो मिथ्यात्वपुञ्जा एव सम्यक्त्वानुगति (त)विशोधिसञ्जा-
यतः सम्यग्मिथ्यात्वलक्षणं परिणामान्तरमापादिताः । अन्यप्रकृतिरूपतया परिणामान्तरापादनं च संक्रमः, संक्रमावलि-
कागतं च सकलकरणायोग्यमिति सम्यक्त्वलाभादावलिकाया अभ्यन्तरे वर्तमानेन सम्यग्मिथ्यात्वं सम्यक्त्वे न संक्रम्यते,
किं तु केवलं मिथ्यात्वमेव । ततः सम्यग्मिथ्यात्वेऽप्यपसारिते शेषा षड्विंशतिः संक्रामति । चतुर्विंशतिस्तु संक्रमे न प्राप्यते, यत-
श्चतुर्विंशतिसत्कर्मा सम्यग्दृष्टिर्मिथ्यात्वं गतः सन् यद्यप्यनन्तानुबन्धिनो भूयोऽपि बध्नाति, तथापि तान् सतोऽपि न संक्रमय-
ति, बन्धावलिकागतस्य सर्वकरणायोग्यत्वात् । मिथ्यात्वं च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसारिते शेषा त्रयो-
विंशतिरेव संक्रामति । अथवा चतुर्विंशतिसत्कर्मणः सम्यग्दृष्टेः सम्यक्त्वं मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसा-
रिते शेषा त्रयोविंशतिः संक्रामति । तस्यैव मिथ्यात्वे क्षपिते द्वाविंशतिः । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य
चारित्रमोहनीयस्यान्तरकरणे कृते सति लोभसंज्वलनस्यापि संक्रमो न भवति, "अन्तरकरणे कृते पुरुषवेदसंज्वलनचतुष्टययो-

रानुपूर्व्या संक्रमो भवतीतिवचनप्रामाण्यात् अनन्तानुबन्धिचतुष्टयस्य च विसंयोजितत्वादुपशान्तत्वाद्वा संक्रमाभावः । सम्यक्त्वं च मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति संज्वलनलोभानन्तानुबन्धिचतुष्टयसम्यक्त्ववर्जाः शेषा द्वाविंशतिः संक्रामति । तस्यैवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य नपुंसकवेदे उपशान्ते एकविंशतिः । द्वाविंशतिसत्कर्मणो वा सम्यक्त्वं न क्वापि संक्रामतीत्येकविंशतिः संक्रमे प्राप्यते । यद्वा क्षपकश्रेण्यां वर्तमानस्य क्षपकस्य यावदद्याप्यष्टौ कषाया न क्षयमुपयान्ति तावदेकविंशतिः संक्रमे प्राप्यते । औपशमिकसम्यग्दृष्टेः संबन्धिन्याः प्रागुक्ताया एकविंशतेः स्त्रीवेदे उपशान्ते सति शेषा विंशतिः संक्रामति । यद्वा क्षायिकसम्यग्दृष्टेरुपशमश्रेणिं प्रतिपन्नस्य चारित्रमोहनीयस्यान्तरकरणे कृते लोभसंज्वलनस्यापि प्रागुक्तयुक्तेः संक्रमो न भवतीति तस्मिन्नपसारिते विंशतिः संक्रमे प्राप्यते । ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः । स्त्रीवेदे उपशान्तेऽष्टादश । औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताया विंशतेः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दश संक्रामन्ति । ततः पुरुषवेदे उपशान्ते त्रयोदश । यद्वा क्षपकस्य क्षपकश्रेण्या वर्तमानस्य प्रागुक्ताया एकविंशतेरष्टसु कषायेषु क्षीणेषु शेषास्त्रयोदश संक्रामन्ति । तस्यैव क्षपकस्य चारित्रमोहनीयस्यान्तरकरणे कृते संज्वलनलोभस्य प्रागुक्तयुक्तेः संक्रमो न भवतीति तस्मिन्नपसारिते शेषा द्वादश संक्रामन्ति । अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्तान्योऽष्टादशभ्यः षट्सु नोकषायेषूपशान्तेषु सत्सु शेषा द्वादश संक्रामन्ति । ततः पुरुषवेदे उपशान्ते एकादश । क्षपकस्य वा प्रागुक्तान्यो द्वादशभ्यो नपुंसकवेदे क्षीणे शेषा एकादश संक्रामन्ति । अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां प्रागुक्तान्यस्त्रयोदशभ्योऽप्रत्याख्यान-

प्रत्याख्यानावरणक्रोधद्विके उपशान्ते शेषा एकादश संक्रमे प्राप्यन्ते। क्षपकश्रेण्यामेकादशभ्यः स्त्रीवेदे क्षीणे शेषा दश संक्रामन्ति। औपशमिकसम्यग्दृष्टेर्वोपशमश्रेण्या वर्तमानस्यैकादशभ्यः संज्वलनलोभे उपशान्ते शेषा दश संक्रामन्ति। क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्य एकादशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे क्रोधद्विके उपशान्ते शेषा नव संक्रामन्ति। तस्यैव संज्वलनक्रोधेऽप्युपशान्तेऽष्टौ। अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्यो दशभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विके उपशान्ते शेषा अष्टौ संक्रामन्ति। तस्यैव संज्वलनमाने उपशान्ते सप्त। क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य प्रागुक्ताभ्योऽष्टाभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विके उपशान्ते शेषाः षट् संक्रामन्ति। तस्यैव संज्वलनमाने उपशान्ते पञ्च। यद्वौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यः सप्तभ्यः प्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते शेषाः पञ्च संक्रामन्ति। तस्यैव संज्वलनमायायामुपशान्तायां चतस्रः। अथवा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्ताभ्यो दशभ्यः षट्सु नोकषायेषु क्षीणेषु शेषाश्चतस्रः प्रकृतयः संक्रामन्ति। तस्यैव पुरुषवेदे क्षीणे तिस्रः। अथवा क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यः पञ्चभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते शेषास्तिस्रः संक्रामन्ति। तस्यैव संज्वलनमायायामुपशान्तायां द्वे। अथवौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य प्रागुक्ताभ्यश्चतसृभ्यः प्रकृतिभ्योऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे लोभद्विके उपशान्ते शेषे द्वे प्रकृती संक्रामतः। अथवा क्षायिकसम्यग्दृष्टेः क्षपकस्य प्रागुक्ताभ्यस्तिसृभ्यः संज्वलनक्रोधे क्षीणे द्वे संक्रामतः। तस्यैव संज्वलनमाने क्षीणे एका।

तदेवं परित्राव्यमानेऽष्टाविंशतिचतुर्विंशतिसप्तदशषोडशपञ्चदशलक्षणानि संक्रमस्थानानि न प्राप्यन्ते इति प्रतिषिध्यन्ते। तेषु च प्रतिषिद्धेषु शेषाणि त्रयोविंशतिसंख्यानि संक्रमस्थानान्यवगन्तव्यानि । एतेषु संक्रमस्थानेषु मध्ये पञ्चविंशतिप्रकृत्यात्मकं संक्रमस्थानं साद्यादिरूपतया चतुःप्रकारं । तद्यथा—साद्यनादि ध्रुवमध्रुवं च । तत्राष्टाविंशतिसत्कर्मणः सम्यक्त्वसम्यग्मिथ्यात्वयोरुद्वलितयोर्भवत् सादि, अनादिमिथ्यादृष्टेरनादि, अध्रुवध्रुवता भव्याभव्यापेक्षया । शेषाणि तु संक्रमस्थानानि साद्यध्रुवाणि, कादाचित्कत्वात् ॥ १० ॥

कृता मोहनीये संक्रमासंक्रमस्थानप्ररूपणा । संप्रति पतद्ग्रहापतद्ग्रहस्थानप्ररूपणार्थमाह—

सोलस बारसगट्ठग वीसग तेवीसगाइगे छच्च । वज्जिय मोहस्स पडिग्गहा उ अट्ठारस हवन्ति ॥११॥

सोलस त्ति—षोडश द्वादशाष्टौ विंशतिस्त्रयोविंशत्यादयश्च षट् । तद्यथा—त्रयोविंशतिश्चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिरष्टाविंशतिश्च । एतानि स्थानानि वर्जयित्वा शेषाण्येकद्वित्रिचतुःपञ्चषट्सप्तनवदशैकादशत्रयोदशचतुर्दशपञ्चदशसप्तदशाष्टादशैकोनविंशत्येकविंशतिद्वाविंशतिलक्षणानि अष्टादश पतद्ग्रहस्थानानि भवन्ति । तत्र कस्मिन् पतद्ग्रहे काः प्रकृतयः संक्रामन्तीत्येतदुच्यते—तत्र मिथ्यादृष्टेरष्टाविंशतिसत्कर्मणो मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रह इति तस्मिन्नपसारिते शेषा सप्तविंशतिर्मिथ्यात्वषोडशकषायान्यतरवेदभयजुगुप्साहास्यरतियुगलारतिशोकयुगलान्यतरयुगललक्षणायां द्वाविंशतौ संक्रामति । तस्यैव सम्यक्त्वे उद्वलिते सप्तविंशतिसत्कर्मणो मिथ्यादृष्टेर्मिथ्यात्वं सम्यग्मिथ्यात्वस्य पतद्ग्रह इति तस्मिन्नपसारिते शेषा षड्विंशतिः प्रागुक्तायां द्वाविंशतौ संक्रामति । तस्यैव मिथ्यादृष्टेः

सम्यग्मिथ्यात्व उद्धलिते षड्विंशतिसत्कर्मणो मिथ्यात्वे न किमपि संक्रामतीति न तत्कस्यचित्पतद्ग्रह इति तस्मिन् प्रागुक्ताया द्वाविंशतेरपनीते शेषे एकविंशतिप्रकृतिसमुदायात्मके पतद्ग्रहे पञ्चविंशतिः संक्रामति । अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिसत्कर्मणो मिथ्यात्वं न क्वापि संक्रामति, नापि तत्रान्या प्रकृतिरित्याधाराधेयभावपरिभ्रष्टं मिथ्यात्वमपनीयते, ततः शेषा पञ्चविंशतिः प्रागुक्तायामेकविंशतौ संक्रामति । तथा चतुर्विंशतिसत्कर्मा मिथ्यात्वं गतः सन् यद्यपि मिथ्यात्वप्रत्ययतो भूयोऽप्यनन्तानुबन्धिनो बध्नाति, तथापि बन्धावलिकागतं सकलकरणायोग्यमिति कृत्वा सतोऽपि तान् न संक्रमयति । मिथ्यात्वं च सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहस्ततोऽनन्तानुबन्धिचतुष्टयमिथ्यात्ववर्जिताः शेषास्त्रयोविंशतिप्रकृतयः प्रागुक्तायां द्वाविंशतौ संक्रामन्ति । तदेवं मिथ्यादृष्टेर्द्वाविंशतिपतद्ग्रहे सप्तविंशतिषड्विंशतित्रयोविंशतिसंक्रमाः । एकविंशतिपतद्ग्रहो च पञ्चविंशतिसंक्रम उक्तः शेषः संक्रमः पतद्ग्रहो वा न संभवति । सासादनसम्यग्दृष्टेस्तु शुद्धदृष्टित्वाभावाद्दर्शनमोहनीयत्रयस्य संक्रमाभावः । ततोऽस्य सर्वदा एकविंशतिरूपे पतद्ग्रहे पञ्चविंशतिरेव संक्रामति । सम्यग्मिथ्यादृष्टेरपि शुद्धदृष्टित्वाभावाद्दर्शनत्रयस्य संक्रमाभाव इति अष्टाविंशतिसत्कर्मणः सप्तविंशतिसत्कर्मणो वा पञ्चविंशतिः । चतुर्विंशतिसत्कर्मणः पुनरेकविंशतिः द्वादशकषायपुरुषवेदभयजुगुप्साऽन्यतरयुगलरूपसप्तदशप्रकृतिसमुदायरूपे पतद्ग्रहे संक्रामति । तदेवमुक्तौ सासादनसम्यग्मिथ्यादृष्टी । संप्रत्यविरतदेशविरतप्रमत्ताप्रमत्तेषु संक्रमाणां तुल्यत्वात् युगपत्पतद्ग्रहा उच्यन्ते—तेषामविरतादीनामौपशमिकसम्यग्दृष्टीनां सम्यक्त्वलाभप्रथमसमयादारभ्य यावदावलिकामात्रं तावत् सम्यक्त्वसम्यग्मिथ्यात्वयोः पतद्ग्रहतैव भवति, न संक्रमः, इति शेषा षड्विंशतिरविरतानां द्वाद-

शकपायपुरुषवेदभयजुगुप्साऽन्यतरयुगलसम्यक्त्वसम्यग्मिथ्यात्वरूपे एकोनविंशतिपतद्ग्रहे, देशविरतानां प्रत्याख्याना-
वरणसंज्वलनकपायपुरुषवेदभयजुगुप्साऽन्यतरयुगलसम्यक्त्वसम्यग्मिथ्यात्वलक्षणे पञ्चदशपतद्ग्रहे, प्रमत्ताप्रमत्तानां
संज्वलनचतुष्टयपुरुषवेदसम्यक्त्वसम्यग्मिथ्यात्वभयजुगुप्साऽन्यतरयुगलरूपे एकादशपतद्ग्रहे संक्रामति । तेषामेवाविरत-
सम्यग्दृष्ट्यादीनामावलिकायाः परतः सम्यग्मिथ्यात्वं संक्रमे पतद्ग्रहे च लभ्यते इति सप्तविंशतिः प्रागुक्तेषु त्रिषु पतद्ग्र-
हेषु संक्रामति । तथा तेषामेवाविरतसम्यग्दृष्ट्यादीनामनन्तानुबन्धिषूद्वलितेषु चतुर्विंशतिसत्कर्मणां क्षायोपशमिकसम्य-
ग्दृष्टीनां सम्यक्त्वं पतद्ग्रह इति कृत्वा शेषा त्रयोविंशतिः प्रागुक्तेष्वेकोनविंशत्यादिषु त्रिषु पतद्ग्रहेषु संक्रामति । ततो
मिथ्यात्वे क्षपिते सति सम्यग्मिथ्यात्वं पतद्ग्रहभावे न लभ्यते, मिथ्यात्वं च संक्रमे न लभ्यते । ततः शेषा द्वाविंशतिर-
विरतदेशविरतसंयतानां यथासंख्यमष्टादशचतुर्दशदशरूपेषु पतद्ग्रहेषु संक्रामति । ततः सम्यग्मिथ्यात्वे क्षपिते सति सम्य-
ग्मिथ्यात्वस्य न संक्रमो नापि पतद्ग्रह इत्येकविंशतिरविरतादीनां यथासंख्यं सप्तदशत्रयोदशनवकरूपेषु पतद्ग्रहेषु संक्रा-
मति । संप्रत्यौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य संक्रममाश्रित्य पतद्ग्रहविधिरुच्यते—चतुर्विंशतिसत्कर्मणः सम्यक्त्वं
मिथ्यात्वसम्यग्मिथ्यात्वयोः पतद्ग्रह एवेति कृत्वा तस्मिन्नपसारिते शेषा त्रयोविंशतिः पुंवेदसंज्वलनचतुष्टयसम्यक्त्वसम्य-
ग्मिथ्यात्वरूपे सप्तकपतद्ग्रहे संक्रामति । तस्यैवोपशमश्रेण्यां वर्तमानस्यान्तरकरणे कृते संज्वलनलोभस्य संक्रमो न भव-
तीति तस्मिन्नपसारिते शेषा द्वाविंशतिः पूर्वोक्त एव सप्तकपतद्ग्रहे संक्रामति । तस्यैव नपुंसकवेदे उपशान्ते सप्तकपत-
द्ग्रहे एकविंशतिः । ततः स्त्रीवेदे उपशान्ते विंशतिः । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां “ छसु

आवलियासु पढमठिईसु सेसासुऽविय वेदो " इतिवचनात् पुरुषवेदः पतद्ग्रहो न भवति । ततः प्रागुक्तात् सप्तकात्पुरुषवेदेऽपनीते शेषे षट्करूपे पतद्ग्रहे प्रागुक्ता विंशतिः संक्रामति । ततः षट्सु नोकषायेषूपशान्तेषु शेषाश्चतुर्दशप्रकृतयः प्रागुक्त एव षट्करूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावत्संक्रामन्ति यावत्समयोनमावलिकाद्विकं । ततः पुरुषवेदे उपशान्ते शेषास्त्रयोदश षट्करूपे पतद्ग्रहे संक्रामन्ति । ताश्च तत्र तावद्यावदन्तर्मुहूर्तं । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनक्रोधोऽपि " तिसु आवलियासु समऊणियासु अपडिग्गहाउ संजलणा " इति वचनात् पतद्ग्रहो न भवतीति प्रागुक्तात् षट्कात्तस्मिन्नपसारिते शेषे पञ्चकरूपे पतद्ग्रहे ता एव त्रयोदश प्रकृतयः संक्रामन्ति । ततोऽप्रत्याख्यानप्रत्याख्यानावरणक्रोधद्विक उपशान्ते शेषा एकादश प्रागुक्त एव पञ्चकपतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनावलिकाद्विकं । ततः संज्वलनक्रोधे उपशान्ते शेषा दश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमानोऽपि पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपनीते शेषे चतुष्करूपे पतद्ग्रहे ता एव दश प्रकृतयः संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणरूपे मानद्विके उपशान्ते शेषा अष्टौ प्रकृतयश्चतुष्करूपे एव पतद्ग्रहे संक्रामन्ति । ततः संज्वलनमाने उपशान्ते सप्त । ताश्च सप्त चतुष्करूपे पतद्ग्रहेऽन्तर्मुहूर्तं कालं यावत्संक्रामन्ति । ततः संज्वलनमायायाः प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमायाऽपि पतद्ग्रहो न भवतीति चतुष्कात्तस्यामपगतायां शेषे त्रिकरूपे पतद्ग्रहे पूर्वोक्ताः सप्त संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उप-

शान्ते शेषाः पञ्च प्रकृतयस्त्रिकरूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनमायायामुपशान्तायां शेषाश्चतस्रः प्रकृतयः संक्रामन्ति । ताश्च तावद्यावदन्तर्मुहूर्तं । ततोऽनिवृत्तिबादरसंपरायचरमसमयेऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे लोभद्विके उपशान्ते शेषे द्वे प्रकृती संक्रामतः । ते च मिथ्यात्वसम्यग्मिथ्यात्वलक्षणे । न चैते संज्वलनलोभे संक्रामतः, दर्शनमोहनीयचारित्रमोहनीययोः परस्परं संक्रमाभावात् । ततस्तस्यापि पतद्ग्रहता न भवतीति द्वयोरेव ते द्वे संक्रामतः । तत्र मिथ्यात्वं सम्यक्त्वसम्यग्मिथ्यात्वयोः, सम्यग्मिथ्यात्वं सम्यक्त्वे । तदेवमौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुक्तः । संप्रति क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुच्यते—तत्रानन्तानुबन्धिचतुष्टयदर्शनत्रिकरूपे सप्तके क्षपिते सति एकविंशतिसत्कर्मा सन् क्षायिकसम्यग्दृष्टिरुपशमश्रेणिं प्रतिपद्यते । तस्य चान्तर्मुहूर्तं कालं यावत्पुरुषवेदसंज्वलनचतुष्टयरूपे पञ्चकपतद्ग्रहे एकविंशतिः संक्रामति । ततोऽन्तरकरणे कृते सति संज्वलनलोभस्य संक्रमो न भवतीति एकविंशतेस्तस्मिन्नपनीते शेषा विंशतिः पञ्चकपतद्ग्रहे संक्रामति । सा चान्तर्मुहूर्तं कालं यावत् । ततो नपुंसकवेदे उपशान्ते एकोनविंशतिः । सापि चान्तर्मुहूर्तं कालं यावत् । ततः स्त्रीवेदे उपशान्ते शेषा अष्टादश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे संक्रामन्ति । ताश्च तत्र तावत् यावदन्तर्मुहूर्तं । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदः पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपगते शेषे चतुष्करूपे पतद्ग्रहे ता एवाष्टादश प्रकृतयः संक्रामन्ति । ततः षट्सु नोकषायेषूपशान्तेषु शेषा द्वादश प्रकृतयश्चतुष्करूपे एव तस्मिन् पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः पुरुषवेद उपशान्ते एकादश । ताश्चतुष्करूपे पत-

द्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनक्रोधोऽपि पतद्ग्रहो न भवतीति चतुष्कात्तस्मिन्नपगते शेषे त्रिकरूपे पतद्ग्रहे ताः पूर्वोक्ता एकादश प्रकृतयः संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे क्रोधद्विके उपशान्ते शेषा नव प्रकृतयः पूर्वोक्त एव त्रिकरूपे पतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनक्रोधे उपशान्तेऽष्टौ संक्रामन्ति ताश्च त्रिकरूपे पतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमानस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमानोऽपि पतद्ग्रहो न भवतीति त्रिकात्तस्मिन्नपनीते शेषे द्विकरूपे पतद्ग्रहे पूर्वोक्ता अष्टौ प्रकृतयः संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मानद्विक उपशान्ते शेषाः षट् प्रकृतयो द्विकपतद्ग्रहे संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः संज्वलनमान उपशान्ते पञ्च संक्रामन्ति । ताश्च द्विकरूपे पतद्ग्रहे तावत्संक्रामन्ति यावदन्तर्मुहूर्तं । ततः संज्वलनमायायाः प्रथमस्थितौ समयोनावलिकात्रिकशेषायां संज्वलनमायापि पतद्ग्रहो न भवतीति द्विकात्तस्यामपगतायां शेषे संज्वलनलोभ एवैकस्मिंस्ताः पञ्च प्रकृतयः संक्रामन्तीति । ताश्च तावद्यावत् समयोनावलिकाद्विकं । ततोऽप्रत्याख्यानप्रत्याख्यानावरणलक्षणे मायाद्विके उपशान्ते शेषास्तिस्रः प्रकृतयः संज्वलनलोभे संक्रामन्ति । ताश्च तावद्यावत् समयोनमावलिकाद्विकं । ततः संज्वलनमायायामुपशान्तायां शेषे द्वे अप्रत्याख्यानप्रत्याख्यानावरणलोभलक्षणे प्रकृती संज्वलनलोभे संक्रामतः । ते चान्तर्मुहूर्तं कालं यावत् । ततोऽनिवृत्तिबादरसंपरायगुणस्थानकचरमसमये ते अप्युपशान्ते इति न किमपि क्वापि संक्रामति ।

तदेवं क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां संक्रमपतद्ग्रहविधिरुक्तः संप्रति क्षायिकसम्यग्दृष्टेः क्षपकश्रेण्यां संक्रमपतद्ग्रहविधिरभिधीयते—तत्र क्षायिकसम्यग्दृष्टिरेकविंशतिसत्कर्मा क्षपकश्रेणिं प्रतिपद्यते । तस्य चानिवृत्तिबादरसंपरायगुणस्थानं प्राप्तस्य पुरुषवेदसंज्वलनचतुष्टयरूपे पञ्चकपतद्ग्रहे प्रथमत एकविंशतिप्रकृतयः संक्रामन्ति । ततोऽष्टसु कषायेषु क्षीणेषु त्रयोदश । ताश्चान्तर्मुहूर्तं कालं यावत् । ततोऽन्तरकरणे कृते सति संज्वलनलोभस्य संक्रमो न भवतीति शेषा द्वादश प्रकृतयस्तस्मिन्नेव पञ्चकपतद्ग्रहे संक्रामन्ति । ताश्चान्तर्मुहूर्तं कालं यावत् । ततो नपुंसकवेदे क्षीणे एकादश । ता अपि अन्तर्मुहूर्तं कालं यावत् । ततः स्त्रीवेदे क्षीणे दश । ता अप्यन्तर्मुहूर्तं कालं यावत् तस्मिन्नेव पञ्चकरूपे पतद्ग्रहे संक्रामन्ति । ततः पुरुषवेदस्य प्रथमस्थितौ समयोनावलिकाद्विकशेषायां पुरुषवेदः पतद्ग्रहो न भवतीति पञ्चकात्तस्मिन्नपनीते शेषे चतुष्करूपे पतद्ग्रहे ता एव दश संक्रामन्ति । ताश्च तावद्यावत्समयोनमावलिकाद्विकं । ततः षट्सु नोकषायेषु क्षीणेषु शेषाश्चतस्रः प्रकृतयस्तस्मिन्नेव चतुष्करूपे पतद्ग्रहे संक्रामन्ति । ततः पुरुषवेदः क्षीणः । तत्समये च संज्वलनक्रोधस्यापि पतद्ग्रहता न भवतीति तस्मिन्नपगते शेषासु तिसृषु प्रकृतिषु तिस्रः प्रकृतयः संक्रामन्ति । ताश्चान्तर्मुहूर्तं कालं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनक्रोधः क्षीयते । तत्समये च संज्वलनमानस्यापि पतद्ग्रहता न भवतीति शेषयोर्द्वयोः प्रकृत्योर्द्वे प्रकृती संक्रामतः । ते चान्तर्मुहूर्तं कालं यावत् । ततः समयोनावलिकाद्विकेन कालेन संज्वलनमानोऽपि क्षीयते । तत्समयमेव च संज्वलनमायाया अपि पतद्ग्रहता न भवति । तत एकस्यामेव संज्वलनलोभलक्ष-

णायां प्रकृतौ संज्वलनमायालक्षणा एका प्रकृतिः संक्रामति। सा चान्तर्मुहूर्तं कालं यावत्। तत आवलिकाद्विकेन कालेन संज्वलनमायापि क्षीयते। तत ऊर्ध्वं न किमपि कापि संक्रामति ॥ ११ ॥

संप्रति यथोक्तरूपेषु पतद्ग्रहेषु प्रत्येकं संक्रमस्थानानि सकलयन्नाह—

छव्वीससत्तवीसाण संकमो होइ चउसु ठाणेसु। बावीसपन्नरसगे एक्कारस इगुणवीसाए ॥ १२ ॥

छव्वीस त्ति–चतुर्षु स्थानेषु पतद्ग्रहरूपेषु। तद्यथा–द्वाविंशतौ, पञ्चदशके, एकादशके, एकोनविंशतौ च षड्विंशति-सप्तविंशत्योः संक्रमो भवति। तत्र द्वाविंशतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतौ अविरतसम्यग्दृष्टेः ॥ १२ ॥

सत्तरसएकवीसासु संकमो होइ पन्नवीसाए। नियमा चउसु गईसु नियमा दिट्ठी कए तिविहे ॥१३॥

सत्तरस त्ति–सप्तदशकैकविंशत्योः पञ्चविंशतेः संक्रमो भवति। तत्र सप्तदशके मिश्रदृष्टेः एकविंशतौ मिथ्यादृष्टेः सासादनस्य च। अयं च पञ्चविंशतेः सप्तदशकैकविंशत्योः संक्रमो नियमाच्चतसृष्वपि गतिषु प्राप्यते। नियमाच्च सप्तदशके सासादनैकविंशतौ च पञ्चविंशतेः संक्रमः त्रिविधायां त्रिप्रकारायां दृष्टौ दर्शनमोहनीये कृतायां वेदितव्यः। मिथ्यादृष्टेस्त्वेकविंशतौ पञ्चविंशतिसंक्रमोऽनादिमिथ्यादृष्टेरपि भवति। 'कए' इति '(ति)विहे' इति च पुंस्त्वनिर्देशः प्राकृतत्वात् ॥ १३ ॥

बावीसपन्नरसगे सत्तगएक्कारसिगुणवीसासु। तेवीसाए नियमा पंच वि पंचिंदिएसु भवे ॥ १४ ॥

बावीस त्ति–त्रयोविंशतेः संक्रमो द्वाविंशतिपञ्चदशकसप्तकैकादशकैकोनविंशतिरूपेषु पञ्चसु पतद्ग्रहेषु भवति । तत्र द्वाविंशतौ मिथ्यादृष्टेः, पञ्चदशके देशविरतस्य, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य, एकादशके प्रमत्ताप्रमत्तयोः, एकोनविंशतौ अविरतसम्यग्दृष्टेः । एतानि च पञ्च पतद्ग्रहस्थानानि पञ्चेन्द्रियेष्वेव भवन्ति ॥ १४ ॥

चोद्दसगदसगसत्तगअट्ठारसगे य होइ बावीसा । नियमा मणुयगईए नियमा दिट्ठी कए दुविहे ॥१५॥

चोद्दस त्ति–द्वाविंशतिः संक्रमयोग्या भवति चतुर्दशके दशके सप्तकेऽष्टादशके च । तत्र चतुर्दशके देशविरतस्य, दशके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, अष्टादशकेऽविरतसम्यग्दृष्टेः । एषा च द्वाविंशतिर्नियमान्मनुजगतौ भवति, नान्यत्र । नियमाच्च दृष्टौ द्विविधायां कृतायां सम्यक्त्वसम्यग्मिथ्यात्वयोरेव सतोरित्यर्थः ॥ १५ ॥

तेरसगनवगसत्तगसत्तारसपणगएक्कवीसासु । एक्कावीसा संकमइ सुद्धसासाणमीसेसु ॥ १६ ॥

तेरस त्ति–त्रयोदशकनवकसप्तकसप्तदशकपञ्चकैकविंशतिरूपेषु षट्सु पतद्ग्रहेष्वेकविंशतिः संक्रामति । केषु जीवेष्वित्याह–शुद्धसासादनमिश्रेषु शुद्धेषु विशुद्धदृष्टिषु अविरतसम्यग्दृष्ट्यादिषु सासादनमिश्रेषु । तत्र त्रयोदशके देशविरतस्य, नवके प्रमत्ताप्रमत्तयोः, सप्तके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, सप्तदशकेऽविरतसम्यग्दृष्टेर्मिश्रदृष्टेश्च, पञ्चके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य क्षपकश्रेण्यां वा । एकविंशतौ सासादनस्य । इह यैराचार्यैश्चतुर्विंशतिसत्कर्मा सन्नुपशमश्रेणीतः प्रतिपतन् मिथ्यात्वाभिमुखः सासादन इष्यते, तन्मते सासादनस्यैकविंशतावेकविंशतिः संक्रमेऽभि-

हिता अन्यथा पुनरनन्तानुवन्ध्युदयसहितस्य सासादनस्यैकविंशतौ पञ्चविंशतिरेव संक्रमे प्राप्यते। साच प्रागेवोक्ता ॥१६॥

एत्तो अविसेसा संकमंति उवसामगे व खवगे वा। उवसामगेसु वीसा य सत्तगे छक्क पणगे य ॥ १७ ॥

एत्तोत्ति—इत ऊर्ध्वमविशेषाः सप्तदश संक्रमाः संक्रामन्ति, उपशमके क्षपके वा। तत्र विंशतिः संक्रमयोग्या सप्तके षट्के पञ्चके चौपशमिकेषु प्राप्यते। तत्रापि सप्तके षट्के चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। पञ्चके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां ॥ १७ ॥

पंचसु एगुणवीसा अट्ठारस पंचगे चउक्के य। चउदस छसु पगईसु तेरसगं छक्कपणगंमि ॥ १८ ॥

पंचसु त्ति–पञ्चके एकोनविंशतिः संक्रामति। सा च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्या वर्तमानस्य। तथा तस्यैवाष्टादश संक्रामन्ति पञ्चके चतुष्के च। तथा चतुर्दश षट्सु प्रकृतिषु। ताश्चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा त्रयोदशकं षट्के पञ्चके च। तत्र षट्के औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, पञ्चके क्षपकश्रेण्यां ॥ १८ ॥

पंच चउक्के वारस एक्कारस पंचगे तिगचउक्के। दसगं चउक्कपणगे नवगं च तिगंमि वोधव्वं ॥ १९ ॥

पंच त्ति–पञ्चके चतुष्के च द्वादश संक्रामन्ति। ताश्च पञ्चके क्षपकश्रेण्यां, चतुष्के क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथैकादश पञ्चके त्रिके चतुष्के च संक्रामन्ति। तत्र पञ्चके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां (वर्तमानस्य, क्षपकश्रेण्यां) त्रिके चतुष्के च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां च तथा दशकं चतुष्के पञ्चके च संक्रामति। तच्चौपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य क्षपकश्रेण्यां च। तथा नवकं त्रिके वोद्धव्यं। तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य ॥१९॥

अट्ठ दुगतिगचउक्के सत्त चउक्के तिगे य बोधव्वा। छक्कं दुगम्मि नियमा पंच तिगे एक्कगदुगे य॥२०॥

अट्ठ त्ति—अष्टौ द्विके त्रिके चतुष्के च संक्रामन्ति। तत्र द्विके त्रिके च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, चतुष्के औपशमिकसम्यग्दृष्टेः। तथा सप्त त्रिके चतुष्के च बोद्धव्याः। ताश्च त्रिके चतुष्के चौपशमिकसम्यग्दृष्टेरेवोपशमश्रेण्यां वर्तमानस्य वेदितव्याः। तथा षट् द्विके एव नियमात्संक्रामन्ति। तच्च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। तथा पञ्च त्रिके एकके द्विके च संक्रामन्ति। तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य। द्विके एकके च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां ॥ २० ॥

चत्तारि तिगचउक्के तिन्नि तिगे एक्कगे य बोधव्वा। दो दुसु एक्काए विय एक्का एक्काए बोधव्वा ॥२१॥

चत्तारि त्ति—चतस्रस्त्रिके चतुष्के च संक्रामन्ति। तत्र त्रिके औपशमिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्य, चतुष्के क्षपकश्रेण्यां। तथा तिस्रस्त्रिके एकके च बोद्धव्याः। तत्र त्रिके क्षपकश्रेण्यां, एकके क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां। तथा द्वे प्रकृती द्वयोरेकस्यां च संक्रामतः। तत्र द्वयोः क्षपकश्रेण्यामौपशमिकसम्यग्दृष्टेश्चोपशमश्रेण्यां। एकस्यां तु क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां। तथैकप्रकृतिरेकस्यां बोद्धव्या। सा च क्षपकश्रेण्यामेव। एतच्च पतद्ग्रहेषु संक्रमस्थानसंकलनं प्रागुक्तसप्रपंचपतद्ग्रहेषु संक्रमस्थानसंबन्धं पट्टकादौ प्रस्तार्य परिभावनीयम् ॥ २१ ॥

संप्रति पतद्ग्रहेषु संक्रमस्थानसंकलने मार्गणोपायानाह—

अणुपुव्विअणाणुपुव्वी झीणमझीणे य दिट्ठिमोहम्मि। उवसामगे य खवगे य संकमे मग्गणोवाया ॥ २२ ॥

संक्रमस्थानसंकलनचिन्तायामेते मार्गणोपायाः । तथाहि—किमिदं संक्रमस्थानमानुपूर्व्या अणुपुव्वि त्ति—पतद्ग्रहेषु संक्रमे उपपद्यतेऽनानुपूर्व्या वोभयत्र वा ? तथा क्षीणे दृष्टिमोहे आहोश्विदक्षीणे उभयत्र वा ?। तथोपशमके उतश्वित् क्षपके उभयत्र वेति ? ॥ २२ ॥

तदेवमुक्तो मोहनीयस्य प्रपञ्चतः संक्रमपतद्ग्रहविधिः । संप्रति नामकर्मणोऽभिधीयते । तत्र द्वादश नामकर्मणः संक्रमस्थानानि । तथा चाह—

तिदुगेगसयं छप्पणचउतिगनउई य इगुणनउईया। अठचउदुगेक्कसीई संकमा बारस य छट्ठे ॥२३॥

तिदुगेगसयंति—षष्ठे नामकर्मणि द्वादश संक्रमस्थानानि । तद्यथा—त्र्युत्तरशतं, द्व्युत्तरशतं, एकोत्तरशतं, षण्णवतिः, पञ्चनवतिः, चतुर्नवतिः, त्रिनवतिः, एकोननवतिः, अष्टाशीतिः, चतुरशीतिः द्व्यशीतिः, एकाशीतिश्चेति । तत्र नाम्नः सर्वसंख्यया त्र्युत्तरं प्रकृतिशतं । तद्यथा—गतिचतुष्टयं, जातिपञ्चकं, शरीरपञ्चकं, संघातपञ्चकं, बन्धनपञ्चदशकं, संस्थानषट्कं, संहननषट्कं, अंगोपांगत्रयं, वर्णपञ्चकं, गन्धद्विकं, रसपञ्चकं, स्पर्शाष्टकं, अगुरुलघु, आनुपूर्वीचतुष्टयं, पराघातोपघातोच्छ्वासातपोद्योतविहायोगतिद्विकत्रसस्थावरबादरसूक्ष्मसाधारणप्रत्येकपर्याप्तापर्याप्तस्थिरास्थिरशुभाशुभसुभगदुर्भगदुःस्वरसुस्वरादेयानादेयायशःकीर्तियशःकीर्तिनिर्माणतीर्थकराणि च । एतदेव च तीर्थंकरवर्जं द्व्युत्तरशतं । अथवा यशःकीर्तिरहितं द्व्युत्तरशतं । तीर्थंकरयशःकीर्तिरहितमेकोत्तरशतं । त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः । सैव तीर्थंकररहिता पञ्चनवतिः । अथवा यशःकीर्तिरहिता पञ्चनवतिः । यशःकीर्तितीर्थंकररहिता चतुर्नवतिः । तीर्थंकररहिता पञ्चनवतिरेव

देवगतिदेवानुपूर्व्योरुद्वलितयोस्त्रिनवतिः । अथवा नरकगतिनरकानुपूर्व्यारहिता त्रिनवतिः । अनुत्तरगतान्नरकगतिनरकापूर्वीतिर्यग्गतितिर्यगानुपूर्वीपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतलक्षणासु त्रयोदशसु प्रकृतिषु क्षीणासु यशःकीर्तौ चापनीतायामेकोननवतिर्भवति । सैव तीर्थकररहिताऽष्टाशीतिः । त्रिनवतेर्वैक्रियसप्तके उद्वलिते नरकगतिनरकानुपूर्व्योश्चोद्वलितयोः शेषा चतुरशीतिर्भवति । मनुजगतिमनुजानुपूर्व्योरुद्वलितयोर्द्व्यशीतिः । अथवा पञ्चनवतिः प्रागुक्तासु त्रयोदशसु प्रकृतिषु क्षीणासु यशःकीर्तौ चापनीतायां द्व्यशीतिः । सैव तीर्थकररहिता एकाशीतिः । एतानि नाम्नः संक्रमस्थानानि ॥ २३ ॥

संप्रति पतद्ग्रहस्थानप्रतिपादनार्थमाह—

तेवीसपंचवीसा छव्वीसा अट्ठवीसगुणतीसा । तीसेक्कतीसएगं पडिग्गहा अट्ठ नामस्स ॥ २४ ॥

तेवीस त्ति–त्रयोविंशतिः, पञ्चविंशतिः, षड्विंशतिः, अष्टाविंशतिः, एकोनत्रिंशत्, त्रिंशत्, एकत्रिंशत्, एका चेत्यष्टौ नाम्नः पतद्ग्रहस्थानानि भवन्तीति ॥ २४ ॥

संप्रति काः प्रकृतयः कुत्र संक्रामन्तीत्येतन्निरूपणार्थमाह—

एक्कगदुगसय पणचउनउई ता तेरसूणिया वावि । परभवियबंधवोछेय उवरि सेढीएँ एक्कस्स ॥ २५ ॥

एक्कग त्ति–पारभविकीनां परभववेद्यानां नामप्रकृतीनां देवगतिप्रायोग्यैकत्रिंशदादीनां बन्धव्यवच्छेदे सति उपरि द्वयोरपि श्रेण्योरुपशमक्षपकश्रेणिरूपयोरेकस्यां यशःकीर्तिलक्षणायां प्रकृतौ बध्यमानायामष्टौ संक्रमस्थानानि संक्रामन्ति ।

तद्यथा–एकोत्तरशतं, द्व्युत्तरशतं, पञ्चनवतिः, चतुर्नवतिः । 'ता इति' तान्येवानन्तरोदितानि चत्वारि संक्रमस्थानानि त्रयोदशन्यूनानि चत्वारि भवन्ति । तद्यथा–अष्टाशीतिः, एकोननवतिः, द्व्यशीतिः, एकाशीतिश्चेति । तत्र त्र्युत्तरशतसत्कर्मणो यशःकीर्तिर्बध्यमाना पतद्ग्रह इति तस्यामुत्सारितायां शेषं द्व्युत्तरशतं यशःकीर्तिपतद्ग्रहे संक्रामति । एवमेव द्व्युत्तरशतसत्कर्मण एकोत्तरं शतं । तथा षण्णवतिसत्कर्मणो यशःकीर्तिः पतद्ग्रह इति तस्यामुत्सारितायां शेषा पञ्चनवतिः तस्यां यशःकीर्तौ संक्रामति । एवमेव पञ्चनवतिसत्कर्मणश्चतुर्नवतिः । तथा त्र्युत्तरशतसत्कर्मणस्त्रयोदशसु पूर्वोक्तेषु नामकर्मसु क्षीणेषु सत्सु यशःकीर्तिः पतद्ग्रह इति तस्यामपगतायां शेषा एकोननवतिर्यशःकीर्तौ संक्रामति । द्व्युत्तरशतसत्कर्मणः पुनस्त्रयोदशसु क्षीणेष्वष्टाशीतिः संक्रामति । षण्णवतिसत्कर्मणस्तु नामत्रयोदशके क्षीणे द्व्यशीतिः । पञ्चनवतिसत्कर्मण एकाशीतिः ॥ २५ ॥

एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे चत्वारि संक्रमस्थानानि तथा चाह—

तिगदुगसयं छपंचगनउई य जइस्स एक्कतीसाए। एगंतसेढिजोगे वज्जिय तीसिगुणतीसासु ॥ २६ ॥

तिग त्ति–यतेरप्रमत्तस्यापूर्वकरणस्य च देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुरस्रसंस्थानवैक्रियांगोपांगदेवानुपूर्वीपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तितैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकराहारकद्विकलक्षणामेकत्रिंशतं बध्नतस्तस्यामेकत्रिंशति एकत्रिंशत्प्रकृतिसमुदायरूपे पतद्ग्रहे त्र्युत्तरं तं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिरिति चत्वारि संक्रमस्थानानि संक्रामन्ति । तत्र त्र्युत्तरशतं तीर्थकराहारकयोर्बन्धात्र-

लिकायामपगतायामेकत्रिंशत्प्रकृतिपतद्ग्रहे संक्रामति । तीर्थंकरनाम्नः पुनर्बन्धावलिकायामनपगतायां त्र्युत्तरशतं । आहा-
रकसप्तकस्य तु बन्धावलिकायामनपगतायां षण्णवतिः । तीर्थंकराहारकसप्तकयोः पुनर्बन्धावलिकायामनपगतायां पञ्चन-
वतिः । 'एगंतेत्यादि' एकान्तेन श्रेणियोग्यानि यानि संक्रमस्थानानि एकोत्तरशतचतुर्नवत्येकोननवत्यष्टाशीत्येकाशीतिरू-
पाणि । एतानि हि श्रेणावेव वर्तमानेन यशःकीर्तावेकस्यां बध्यमानायां संक्रम्यमाणानि प्राप्यन्ते, नान्यत्र । ततस्तानि
वर्जयित्वा शेषाणि त्र्युत्तरशतद्व्युत्तरशतषण्णवतिपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि त्रिंशत्पतद्ग्रहे एकोनत्रिंशत्प-
तद्ग्रहे च सप्त संक्रमस्थानानि भवन्ति । तत्र त्र्युत्तरशतसत्कर्मणो देवस्य सम्यग्दृष्टेस्तैजसकार्मणवर्णादिचतुष्कागुरुलघूप-
घातनिर्माणपञ्चेन्द्रियजात्यौदारिकशरीरौदारिकाङ्गोपाङ्गसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननमनुजगतिमनुजानुपूर्वीत्रस-
बादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्तिपराघातोच्छ्वासप्रशस्तविहायोगतितीर्थंकरल-
क्षणां मनुजगतिप्रायोग्यां तीर्थंकरनामसहितां त्रिंशतं बध्नतस्त्र्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति । त्र्युत्तरशतसत्क-
र्मणोऽप्रमत्तसंयतस्यापूर्वकरणस्य वा देवगतिपञ्चेन्द्रियजातिवैक्रियशरीरसमचतुरस्रसंस्थानवैक्रियाङ्गोपाङ्गदेवानुपूर्वीपराघा-
तोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तितैजसकार्मणवर्णादिचतुष्कागुरुलघूपघा-
तनिर्माणाहारकद्विकलक्षणां देवगतिप्रायोग्यां त्रिंशतं बध्नतो त्र्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति । अथवा त्र्युत्त-
रशतसत्कर्मणामेकेन्द्रियादीनामुद्योतसहितां द्वीन्द्रियादिप्रायोग्यां तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कतिर्य-
ग्गतितिर्यगानुपूर्वीद्वीन्द्रियाद्यन्यतमजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगदुःस्वरानादेययशःकी-

र्त्ययशःकीर्त्यन्यतरौदारिकशरीरौदारिकांगोपांगान्यतमसंस्थानान्यतमसंहनननामशस्तविहायोगतिपराघातोद्योतोच्छ्वासलक्षणां त्रिंशतं घ्नतां द्व्युत्तरशतं तस्मिन् त्रिंशत्पतद्ग्रहे संक्रामति। पण्णवतिसत्कर्मणां देवनारकाणां मनुजगतिप्रायोग्यां तीर्थकरनामसहितां प्रागुक्तां त्रिंशतं बध्नतां तस्मिन् त्रिंशत्पतद्ग्रहे षण्णवतिः संक्रामति । पञ्चनवतिसत्कर्मणामप्रमत्तापूर्वकरणसंयतानामाहारकद्विकसहितां प्रागुक्तां देवगतिप्रायोग्यां त्रिंशतं बध्नतामाहारकसप्तकस्य बन्धावलिकायामनपगतायां पञ्चनवतिस्त्रिंशत्पतद्ग्रहे संक्रामति । अथवा पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां द्वीन्द्रियादिप्रायोग्यामुद्योतसहितां प्रागुक्तां त्रिंशतं बध्नतां पञ्चनवतिस्त्रिंशत्पतद्ग्रहे संक्रामति । त्रिनवतिसत्कर्मणां चतुरशीतिसत्कर्मणां द्व्यशीतिसत्कर्मणां चैकेन्द्रियादीनां विकलेन्द्रियपञ्चेन्द्रियतिर्यग्गतिप्रायोग्यां प्रागुक्तामुच्छ्वाससहितां त्रिंशतं बध्नतां यथाक्रमं त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च त्रिंशत्पतद्ग्रहे संक्रामति । एकोनत्रिंशत्पतद्ग्रहेऽप्येतान्येव सप्त संक्रमस्थानानि । तत्र त्र्युत्तरशतसत्कर्मणामविरतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां देवगतिप्रायोग्यां तीर्थकरनामसहितां देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरसमचतुरस्रसंस्थानतैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणतीर्थकरलक्षणामेकोनत्रिंशतं बध्नतां त्र्युत्तरशतमेकोनत्रिंशत्पतद्ग्रहे संक्रामति । एतेषामेवाविरतादीनां त्रयाणां प्रागुक्तामेकोनत्रिंशतं बध्नतां तीर्थकरनाम्नो बन्धावलिकायामनपगतायां द्व्युत्तरशतं तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अथवैकेन्द्रियादीनां द्व्युत्तरशतसत्कर्मणा द्वीन्द्रियादिप्रायोग्यां प्रागुक्तामेव त्रिंशतमुद्योतरहितामेकोनत्रिंशतं बध्नतां द्व्युत्तरशतमेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अवि

रतसम्यग्दृष्टिदेशविरतप्रमत्तसंयतानां पञ्चनवतिसत्कर्मणां प्रागुक्ताया देवगतिप्रायोग्याया त्रिंशत आहारकद्विकेऽपनीते तीर्थंकरनाम्नि च तत्र प्रक्षिप्ते सति या संजातैकोनत्रिंशत् तां बध्नतां पञ्चनवतिस्तस्मिन्नेकोनत्रिंशत्पतद्ग्रहे संक्रामति । अथवा नैरयिकस्य तीर्थंकरनामसत्कर्मणो मिथ्यादृष्टेरपर्याप्तावस्थायां वर्तमानस्य मनुजगतिप्रायोग्यां मनुजगतिमनुजानुपूर्वीपञ्चेन्द्रियजातित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगदुर्भगान्यतरादेयानादेयान्यतरयशःकीर्त्ययशःकीर्त्यन्यतरसंस्थानषट्कान्यतमसंस्थानसंहननषट्कान्यतमसंहननवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणौदारिकशरीरौदारिकांगोपांगसुस्वरदुःस्वरान्यतरपराघातोच्छ्वासप्रशस्ताप्रशस्तान्यतरविहायोगतिलक्षणामेकोनत्रिंशतं बध्नतः पञ्चनवतिरेकोनत्रिंशति संक्रामति । अविरतसम्यग्दृष्टीनां देशविरतानां प्रमत्तसंयतानां च पञ्चनवतिसत्कर्मणां प्रागुक्तां तीर्थंकरनामसहितां देवगतिप्रायोग्यामेकोनत्रिंशतं बध्नतां तीर्थंकरनामकर्मणो बन्धावलिकायामनपगतायामेकोनत्रिंशति पञ्चनवतिः संक्रामति । यद्वा पञ्चनवतिसत्कर्मणामेकेन्द्रियादीनां द्वीन्द्रियादिप्रायोग्या प्रागुक्ता या त्रिंशत् सैवोद्योतरहितैकोनत्रिंशत् तां बध्नतां तस्यामेवैकोनत्रिंशति पञ्चनवतिः संक्रामति । त्रिनवतिचतुरशीतिद्व्यशीतयो यथा त्रिंशत्पतद्ग्रहेऽभिहितास्तथैवात्रापि भावनीयाः ॥ २६ ॥

अट्ठावीसाए वि ते बासीइतिसयवज्जिया पंच । ते च्चिय बासीइजुया सेसेसुं छन्नउई य वज्जा ॥२७॥

अट्ठावीसाए त्ति–अष्टाविंशतावपि तान्येव पूर्वोक्तानि द्व्यशीतित्र्युत्तरशतवर्जितानि शेषाणि द्व्युत्तरशतपञ्चनवतिपञ्चनवतित्रिनवतिचतुरशीतिरूपाणि पञ्च संक्रमस्थानानि संक्रामन्ति । तत्र मिथ्यादृष्टेर्नरकगतिप्रायोग्यां नरकगतिनर-

कानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगहुंडसंस्थानपराघातोच्छ्वासाप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगदुःस्वरानादेयायशःकीर्तिवर्णादिचतुष्कागुरुलघूपघाततैजसकार्मणनिर्माणलक्षणां, तथा मिथ्यादृष्टेः सम्यग्दृष्टेर्वा देवगतिप्रायोग्यां तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणदेवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियांगोपांगसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरसुभगसुस्वरादेययशःकीर्त्ययशःकीर्त्यन्यतरलक्षणामष्टाविंशतिं बध्नतो द्व्युत्तरशतसत्कर्मणो द्व्युत्तरशतमष्टाविंशतिपतद्ग्रहे संक्रामति । तथा मनुष्यस्य तीर्थंकरनामसत्कर्मणः पूर्वमेव नरके बद्धायुष्कस्य सतो नरकाभिमुखस्य सतो मिथ्यात्वं प्रपन्नस्य नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतः षण्णवतिसत्कर्मणोऽष्टाविंशतिपतद्ग्रहे षण्णवतिः संक्रामति । यथा द्व्युत्तरशतस्य भावना कृता तथा पञ्चनवतेरपि भावना कार्या । केवलं द्व्युत्तरशतस्थाने पञ्चनवतिरित्युच्चारणीयं । तथा मिथ्यादृष्टेस्त्रिनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो वैक्रियसप्तकदेवगतिदेवानुपूर्वीणां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति । अथवा पञ्चनवतिसत्कर्मणो देवगतिप्रायोग्यां पूर्वोक्तामेवाष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्व्योर्बन्धावलिकाया अभ्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति । त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकायाः परतो वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति । अथवा पञ्चनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्व्योर्बन्धावलिकाया अभ्यन्तरे वर्तमानस्य त्रिनवतिरष्टाविंशतौ संक्रामति ।

तथा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्देवगतिप्रायोग्यामष्टाविंशतिं बध्नतो देवगतिदेवानुपूर्वीवैक्रियसप्तकानां बन्धावलिकाया अभ्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ संक्रामति । अथवा त्रिनवतिसत्कर्मणो मिथ्यादृष्टेर्नरकगतिप्रायोग्यां पूर्वोक्तामष्टाविंशतिं बध्नतो नरकगतिनरकानुपूर्वीवैक्रियसप्तकानां बन्धावलिकाया अभ्यन्तरे वर्तमानस्य चतुरशीतिरष्टाविंशतौ संक्रामति । षड्विंशत्यादिपतद्ग्रहेषु संक्रमस्थानान्याह—'ते चियेत्यादि' शेषेषु षड्विंशतिपञ्चविंशतित्रयोविंशतिलक्षणेषु पतद्ग्रहेषु तान्येव पूर्वोक्तानि द्व्युत्तरशतादीनि पणवतिरहितानि द्व्यशीतियुतानि पञ्च संक्रमस्थानानि संक्रामन्ति। तद्यथा— द्व्युत्तरशतं पञ्चनवतिस्त्रिनवतिश्चतुरशीतिर्द्व्यशीतिश्च । तत्रैकेन्द्रियादीनां नरयिकवर्जितानां द्व्युत्तरशतसत्कर्मणां पञ्चनवतिसत्कर्मणां च तैजसकार्मणागुरुलघूपघातनिर्माणवर्णादिचतुष्कैकेन्द्रियजातिहुंडकसंस्थानौदारिकशरीरतिर्यग्गतितिर्यगानुपूर्वीस्थावर (बादर) पर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिपराघातोच्छ्वासातपोद्योतान्यतररूपामेकेन्द्रियप्रायोग्यां षड्विंशतिं बध्नतां द्व्युत्तरशतं पञ्चनवतिश्च तस्यामेव षड्विंशतौ संक्रामति । तथा तेषामेवैकेन्द्रियादीनां देववर्जानां त्रिनवतिसत्कर्मणां देवनारकवर्जानां चतुरशीतिसत्कर्मणां च तामेव पूर्वोक्तां षड्विंशतिं बध्नतां त्रिनवतिश्चतुरशीतिश्च तस्यामेव षड्विंशतौ संक्रामति । तथा तेषामेवैकेन्द्रियादीनां देवनारकमनुष्यवर्जानां द्व्यशीतिसत्कर्मणां तामेव पूर्वोक्तां षड्विंशतिं बध्नतां द्व्यशीतिस्तस्यामेव षड्विंशतौ संक्रामति। तथा पञ्चविंशतिपतद्ग्रहे तान्येव पञ्च संक्रमस्थानानि चिन्त्यन्ते—तत्रैकेन्द्रियपर्याप्तप्रायोग्यां पूर्वोक्तामेव षड्विंशतिमातपेनोद्योतेन वा रहितां पञ्चविंशतिं बध्नतामेकद्वित्रिचतुरिन्द्रियादीनां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिसत्कर्मणां यथासंख्यं तस्यामेव पञ्चविंशतौ द्व्युत्तरशतं

पञ्चनवतिः त्रिनवतिः चतुरशीतिः द्व्यशीतिश्च संक्रामति । अथवाऽपर्याप्तविकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुजप्रायोग्यां तैजसकार्मणवर्णादिचतुष्कागुरुलघूपघातनिर्माणद्वीन्द्रियाद्यन्यतमजातिहुंडसंस्थानसेवार्तसंहननौदारिकशरीरौदारिकाङ्गो-पांगतिर्यग्गतितिर्यगानुपूर्वीत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरान्यतरशुभाशुभान्यतरदुर्भगानादेयायशःकीर्तिलक्षणां पञ्चविं-शतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतादिसत्कर्मणां पञ्चविंशतौ द्व्युत्तरशतादीनि पंच संक्रमस्थानानि संक्रामन्ति । तथा पर्याप्तकैकेन्द्रियप्रायोग्यां वर्णादिचतुष्कागुरुलघूपघातनिर्माणतैजसकार्मणहुंडसंस्थानौदारिकशरीरैके-न्द्रियजातितिर्यग्गतितिर्यगानुपूर्वीबादरसूक्ष्मान्यतरस्थावरपर्याप्तप्रत्येकसाधारणान्यतरास्थिराशुभदुर्भगानादेयायशःकीर्ति-लक्षणां त्रयोविंशतिं बध्नतामेकद्वित्रिचतुःपञ्चेन्द्रियतिरश्चां द्व्युत्तरशतपञ्चनवतित्रिनवतिचतुरशीतिद्व्यशीतिसत्कर्मणां यथा-संख्यं द्व्युत्तरशतादीनि पञ्च संक्रमस्थानानि संक्रामन्ति ॥ २७ ॥

तदेवमुक्तः प्रकृतिसंक्रमः । संप्रति स्थितिसंक्रमाभिधानावसरः । तत्र चैतेऽर्थाधिकाराः । तद्यथा—भेदो विशेषलक्षणं उत्कृष्टस्थितिसंक्रमणप्रमाणं जघन्यस्थितिसंक्रमप्रमाणं साद्यादिप्ररूपणा स्वामित्वप्ररूपणा चेति । तत्र भेदविशेषलक्षणयोः प्रतिपादनार्थमाह—

ठिइसंकमो त्ति वुच्चइ मूलुत्तरपगईउ य जा हि ठिई। उव्वट्टिया उ ओवट्टिया व पगइं निया वऽन्नं ॥२८॥

ठिइ त्ति—इह 'मूलुत्तरपगईउ' इत्यत्र षष्ठ्यर्थे पञ्चमी । ततोऽयमर्थः—हि स्फुटं या स्थितिर्मूलप्रकृतीनामष्टसंख्यानामुत्तरप्रकृतीनां वाऽष्टपञ्चाशदधिकशतसंख्यानां संबन्धिनी उद्वर्तिता ह्रस्वीभूता सती दीर्घीकृता, अपवर्तिता वा दीर्घीभूता

सती ह्रस्वीकृता, अन्यां वा प्रकृतिं नीता पतद्ग्रहप्रकृतिस्थितिषु मध्ये नीत्वा निवेशिता स स्थितिसंक्रम उच्यते । एतदुक्तं भवति-द्विविधः स्थितिसंक्रमो मूलप्रकृतिस्थितिसंक्रम उत्तरप्रकृतिस्थितिसंक्रमश्च । तत्र मूल प्रकृतिस्थितिसंक्रमोऽष्टप्रकारः । तद्यथा-ज्ञानावरणीयस्य यावदन्तरायस्य । उत्तरप्रकृतिस्थितिसंक्रमोऽष्टपंचाशदधिकशतधा । तद्यथा-मतिज्ञानावरणीयस्य श्रुतज्ञानावरणीयस्य यावद्वीर्यान्तरायस्य । 'तदेवं मूलुत्तरपगईउ' इत्यनेन भेद उक्तः । 'उवट्टिया व' इत्यादिना तु विशेषलक्षणं त्रिप्रकारं । तत्र कर्मपरमाणूनां ह्रस्वस्थितिकालतामपहाय दीर्घकालतया व्यवस्थापनमुद्वर्तना । कर्मपरमाणूनामेव दीर्घस्थितिकालतामपहाय ह्रस्वस्थितिकालतया व्यवस्थापनमपवर्तना । यत्पुनः संक्रम्यमाणप्रकृतिस्थितीनां पतद्ग्रहप्रकृतौ नीत्वा निवेशनं तत्प्रकृत्यन्तरनयनं, स्थितीनां चान्यत्र निवेशनं स्थितियुक्तानां परमाणूनामवसेयं, स्थितेरन्यत्र नेतुमशक्यत्वात् । इदं च विशेषलक्षणं सामान्यलक्षणे सत्येवावगन्तव्यं, न सर्वथा तदपवादेन, तेन मूलप्रकृतीनां परस्परं संक्रमप्रतिषेधात्, तासामन्यप्रकृत्यन्तरनयनलक्षणः स्थितिसंक्रमो न भवति, किं तु भावेन उद्वर्तनापवर्तनालक्षणौ संक्रमौ । उत्तरप्रकृतीनां तु त्रयोऽपि संक्रमा द्रष्टव्याः ॥ २८ ॥

तदेवं भेदविशेषलक्षणे प्रतिपाद्य संप्रत्युत्कृष्टस्थितिसंक्रमपरिमाणप्रतिपादनार्थमाह—

तीसासत्तरि चत्तालीसावीसुदहिकोडिकोडीणं । जेट्ठो आलिगदुगहो सेसाण वि आलिगतिगूणो ॥२९॥

तीस त्ति-इह सर्वासां प्रकृतीनां बन्धमाश्रित्योत्कृष्टा स्थितिः प्रागेव बन्धनकरणे प्रतिपादिता । अत्र पुनः संक्रमे उत्कृष्टा स्थितिश्चिन्त्यमाना द्विधा प्राप्यते-बन्धोत्कृष्टा संक्रमोत्कृष्टा च । तत्र या बन्धादेव केवलादुत्कृष्टा स्थितिर्लभ्यते

सा बन्धोत्कृष्टा । या पुनर्बन्धेऽबन्धे वा सति संक्रमादुत्कृष्टा स्थितिर्भवति सा संक्रमोत्कृष्टा । तत्र यासामुत्तरप्रकृतीनां स्वस्वमूलप्रकृत्यपेक्षया स्थितेर्न्यूनता न भवति, किं तु तुल्यतैव, ता बन्धोत्कृष्टा ज्ञातव्याः । ताः सप्तनवतिसंख्याः । तद्यथा—ज्ञानावरणपञ्चकं, दर्शनावरणनवकं, अन्तरायपञ्चकं, आयुश्चतुष्टयं, असातवेदनीयं, नरकद्विकं, तिर्यग्द्विकं, एकेन्द्रियजाति, पञ्चेन्द्रियजातिः, तैजससप्तकं, औदारिकसप्तकं, वैक्रियसप्तकं, नीलतिक्तवर्जमशुभवर्णसप्तकं, अगुरुलघु, पराघातं, उपघातं, उच्छ्वासातपोद्योतानि, निर्माणं, षष्ठं संस्थानं, षष्ठं संहननं, अशुभविहायोगतिः, स्थावरं, त्रसचतुष्कं, अस्थिरषट्कं, नीचैर्गोत्रं, षोडश कषायाः, मिथ्यात्वं च । सर्वसंख्यया सप्तनवतिः । अत्र नरकतिर्यगायुषी यद्यपि स्वमूलप्रकृत्यपेक्षया तुल्यस्थितिके न भवतः, तथापि संक्रमोत्कृष्टत्वाभावात्ते बन्धोत्कृष्टे उक्ते । शेषास्त्वेकषष्टिप्रकृतयः संक्रमोत्कृष्टाः । ताश्चेमाः—सातवेदनीयं, सम्यक्त्वं, सम्यग्मिथ्यात्वं, नव नोकषायाः, आहारकसप्तकं, शुभवर्णाद्येकादशकं, नीलं, तिक्तं, देवद्विकं, मनुजद्विकं, द्वित्रिचतुरिन्द्रियजातयः, अन्त्यवर्जानि संस्थानानि, अन्त्यवर्जानि संहननानि, प्रशस्तविहायोगतिः, सूक्ष्मं, साधारणं, अपर्याप्तं, स्थिरशुभसुभगसुस्वरादेययशःकीर्तितीर्थकरोच्चैर्गोत्राणि च । तत्र बन्धोत्कृष्टानां मतिज्ञानावरणीयादिमिथ्यात्वषोडशकषायनरकद्विकादीनां यथाक्रमं त्रिंशत्सप्ततिचत्वारिंशद्विंशतिसागरोपमकोटीकोटीस्थितिकानां ज्येष्ठ उत्कृष्टः स्थितिसंक्रमः 'आ(व)लियदुगहू त्ति' आवलिकाद्विकहीनः । तथाहि—स्थितिर्बद्धा सती बन्धावलिकामतीताया सत्यां संक्रामति । तत्राप्युदयावलिका सकलकरणायोग्येति कृत्वोदयावलिकात उपरितनी । ततो बन्धोत्कृष्टानां मतिज्ञानावरणीयानामुत्कृष्टः स्थितिसंक्रमो बन्धावलिकाद्विकहीन एव प्राप्यते । इहोदयवतीनामनुदयवतीनां वा

प्रकृतीनामुदयसमयादारभ्यावलिकामात्रा स्थितिरुदयावलिकेति पूर्वग्रन्थेषु व्यवह्रियते । तथा यदपि- 'तीनामत्तरित्ता-लीसा' इत्यनेन ग्रन्थेनेह मिथ्यात्वस्य सप्ततिसागरोपमकोटीकोटीस्थितिरस्योत्कृष्टतः स्थितिसंक्रम आवलिकाद्विकहीन उक्तस्तथाऽप्यन्तर्मुहूर्तोनोऽवगन्तव्यः । यतो मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वा जघन्यतोऽप्यन्तर्मुहूर्तं कालं यावन्मिथ्यात्वे एवावतिष्ठते । ततः सम्यक्त्वं प्रतिपद्य मिथ्यात्वस्य स्थितिमन्तर्मुहूर्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च संक्रमयति । ततो-ऽन्तर्मुहूर्तोन एवास्योत्कृष्टः स्थितिसंक्रमः । वक्ष्यति च—'मिच्छत्तमुक्कोसो' इत्यादि । इह पुनर्यत् सप्तत्यादीत्युपादानं तदशेषाणामपि बन्धोत्कृष्टानां प्रकृतीनां व्याप्तिपुरःसरमविशेषेणावलिकाद्विकहीनोत्कृष्टस्थितिसंक्रमप्रदर्शनार्थं । 'सेसाणमा(व)लिगतिगूणो त्ति' शेषाणां संक्रमोत्कृष्टानामावलिकात्रिकहीन उत्कृष्टः स्थितिसंक्रमः । तथाहि—बन्धावलिकायामतीतायां सत्यामावलिकात उपरितनी स्थितिः सर्वाप्यन्यत्र प्रकृत्यन्तरे आवलिकाया उपरि संक्रामति । तत्र च संक्रान्ता सती आवलिकामात्रं कालं यावत्सकलकरणायोग्येति कृत्वा संक्रमावलिकायामतीतायां सत्यामुदयावलिकात उपरितनी स्थितिस्ततोऽप्यन्यत्र प्रकृत्यन्तरे संक्रामति । ततः संक्रमोत्कृष्टानामुत्कृष्टः स्थितिसंक्रम आवलिकात्रिकहीन एव । तद्यथा—नरकद्विकस्य विंशतिसागरोपमकोटीकोटीप्रमाणामुत्कृष्टां स्थितिं बद्ध्वा बन्धावलिकायामतीतायां सत्यामावलिकात उपरितनीं तां सर्वामपि स्थितिं मनुजद्विकं बध्नन् तत्र मनुजद्विके संक्रमयति, तत्र च संक्रान्ता सती आवलिकामात्रं कालं यावत्सकलकरणायोग्येति कृत्वा संक्रमावलिकायामतिक्रान्तायां सत्यामुदयावलिकात उपरितनीं तां सर्वामपि स्थितिं देवद्विकं बध्नन् तत्र संक्रमयति। एवमन्यासामपि संक्रमोत्कृष्टानामुत्कृष्टः स्थितिसंक्रम आवलिकात्रिकहीनो भावनीयः॥२०॥

तदेवं यासां प्रकृतीनां बन्धे सति संक्रमादुत्कृष्टा स्थितिर्भवति, तासामेव तत् उत्कृष्टस्थितिसंक्रमपरिमाणमुक्तं। संप्रति पुनर्यासां बन्धेन विना संक्रमादेव केवलादुत्कृष्टा स्थितिर्लभ्यते, तासामुत्कृष्टस्थितिसंक्रमपरिमाणनिरूपणार्थमाह—

मिच्छत्तस्सुक्कोसो भिन्नमुहुत्तूणगो उ सम्मत्ते। मिस्सेवंतोकोडाकोडी आहारतित्थयरे ॥ ३० ॥

मिच्छत्तस त्ति—मिथ्यात्वस्योत्कृष्टः स्थितिसंक्रमो भिन्नमुहूर्तोनोऽन्तमुहूर्तोनस्तथा सम्यक्त्वे सम्यक्त्वस्य मिश्रे मिश्रस्य चोत्कृष्टः स्थितिसंक्रमो भिन्नमुहूर्तोनः। तुशब्दस्याधिकार्थसंसूचनादावलिकाद्विकहीनश्च वेदितव्यः। इयमत्र भावना—दर्शनमोहनीयत्रितयसत्कर्मा मिथ्यादृष्टिरुत्कृष्टे संक्लेशे वर्तमानो मिथ्यात्वस्योत्कृष्टां स्थितिं बध्वा ततोऽन्तर्मुहूर्तमात्रानन्तरं मिथ्यात्वात् प्रतिपत्त्यविशुद्धिमासादयन् सम्यक्त्वं प्रतिपद्यते। ततो मिथ्यात्वस्योत्कृष्टां स्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणामन्तर्मुहूर्तोनां सम्यक्त्वे सम्यग्मिथ्यात्वे च संक्रमयति। सा च संक्रान्ता सती संक्रमावलिकायामतीतायामुदयावलिकात उपरितनी सम्यक्त्वस्थितिमपवर्तनाकरणेन स्वस्थाने संक्रमयति। सम्यग्मिथ्यात्वस्थितिमपि संक्रमावलिकायामतीतायामुदयावलिकात उपरितनी सम्यक्त्वे संक्रमयति अपवर्तयति च। तदेवं मिथ्यात्वस्यान्तर्मुहूर्तोनः सम्यक्त्वसम्यग्मिथ्यात्वयोस्त्वन्तर्मुहूर्तावलिकाद्विकहीन उत्कृष्टः स्थितिसंक्रमः। इह तीर्थंकरस्याहारकसप्तकस्य चोत्कृष्टः स्थितिबन्धोऽन्तःसागरोपमकोटीकोटीप्रमाणः सत्कर्माप्येतेषामन्तःसागरोपमकोटीकोटीप्रमाणमेव ततः संशयः किमेताः संक्रमोत्कृष्टा उत बन्धोत्कृष्टा इति तदपनोदार्थमाह—'अंतोकोडाकोडीत्यादि' आहारके आहारकसप्तके तीर्थंकरे च संक्रमतः 'स्थितिसत्कर्म अन्तःसागरोपमकोटीकोटी, अत एताः संक्रमोत्कृष्टाः। यद्यपि च बन्धेऽप्यन्तःसागरोपमकोटीकोटीप्रमाणं स्थितिस-

त्कर्मान्निर्दिष्टं, तथापि बन्धोत्कृष्टायाः स्थितेः सकाशात् संक्रमोत्कृष्टा स्थितिः संख्येयगुणा द्रष्टव्या । उक्तं च चूर्णौ—"बंधठिईओ संतकम्मठिई संखिज्जगुणा" । ननु नामकर्मणः उत्कृष्टा स्थितिर्विंशतिसागरोपमकोटीकोटीप्रमाणा तत आहारके तीर्थंकरे च सङ्क्रमादुत्कृष्टा स्थितिः प्राप्यमाणा बन्धावलिकोदयावलिकारहिता विंशतिसागरोपमकोटीकोटीप्रमाणेन लभ्यते, कथमुच्यते तीर्थंकराहारकयोः संक्रमतोऽप्युत्कृष्टा स्थितिरन्तःसागरोपमकोटीकोटीप्रमाणेति ? तदयुक्तमभिप्रायापरिज्ञानात् । तथाहि—तीर्थंकराहारकयोः प्रकृत्यन्तरस्य स्थितिः संक्रामति बन्धकाले नान्यदा, बन्धश्चानयोर्यथाक्रमं विशुद्धसम्यग्दृष्टेः संयतस्य च, विशुद्धसम्यग्दृष्टीनां संयतानां च स्थितिसत्कर्म सर्वेषामपि कर्मणामायुर्वर्जानामन्तःसागरोपमकोटीकोटीप्रमाणं नाधिकं । ततः संक्रमोऽप्येतावन्मात्र एव प्राप्यते नाधिक इत्यदोषः ॥ ३० ॥

संप्रति सर्वासां प्रकृतीनां बन्धोत्कृष्टानां संक्रमोत्कृष्टानां च संक्रमणकाले यावती स्थितिः प्राप्यते तावतीं निर्दिदिक्षुराह—

सव्वासिं जट्ठिइगो सावलिगो सो अहाउगाणं तु । बंधुक्कोसुक्कोसो साबाहठिईए जट्ठिइगो ॥ ३१ ॥

सव्वासि ति—सर्वासां प्रकृतीनां संक्रमो यत्स्थितिकः संक्रमणकाले या स्थितिर्विद्यते सा यत्स्थितिरित्युच्यते । सा यस्य संक्रमस्यास्ति स संक्रमो यत्स्थितिकः । या स्थितिर्विद्यते यस्यासौ यत्स्थितिक इति बहुव्रीहिसमाश्रयणात् । सावलिक आवलिकया सहितो द्रष्टव्यः । एतदुक्तं भवति—यः प्रागुक्तः संक्रमः स आवलिकया सहितः सन् यावान् भवति तावती संक्रमकाले स्थितिरित्यर्थः । ततो बन्धोत्कृष्टानामावलिकाहीना संक्रमोत्कृष्टानां त्वावलिकाद्विकहीना संक्रमकाले

सर्वा स्थितिर्वेदितव्या । तथाहि–संक्लेशादिकारणवशात उत्कृष्टां स्थितिं वध्वा वन्धावलिकायामतीतायामुदयावलिकात उपरितनीं स्थितिमन्यत्र प्रकृत्यन्तरे संक्रमयितुमारभते । ततो बन्धोत्कृष्टानामेकावलिकाहीना संक्रमकाले सर्वा स्थितिः प्राप्यते । संक्रमोत्कृष्टानां पुनर्वन्धावलिकानां संक्रमावलिकयोरतीतयोरुदयावलिकातः परतो वर्तमानां स्थितिमन्यत्र संक्रमयति । तेन संक्रमोत्कृष्टानामावलिकाद्विकहीना संक्रमकाले सर्वा स्थितिरवाप्यते । अथायुषामुत्कृष्टा स्थितिः किं वन्धोत्कृष्टा उत संक्रमोत्कृष्टा ? उच्यते–वन्धोत्कृष्टैव । तथा चाह–'अद्धाउगाणमित्यादि' आयुषामुत्कृष्टः स्थितिसंक्रमो वन्धोत्कृष्ट एव न संक्रमोत्कृष्टः । यतो नायुषा परस्परं संक्रमः "मोहदुगाउगमूलप्पगमीण न परोप्परंमि संकमणं" इति-वचनात् । 'सावाहठिई इत्यादि' आयुषां सावाधा अवाधासहिता या सर्वा स्थितिः सा यत्स्थितिरवगन्तव्या । केवलं "वंधुकोसाणं आवलिगूणा ठिई जट्ठिइ" इतिवचनात् वन्धावलिकोना द्रष्टव्या । तथाहि–आयुर्वन्धे प्रवर्तमान एव प्रथ-मसमये यद्बद्धं दलिकं तद्वन्धावलिकातीतं सदुद्वर्तयति । तत उद्वर्तनारूपसंक्रमे वन्धावलिकोना सावाधा यत्स्थितिः प्राप्यते । अथवाऽपवर्तनापि निर्व्याघातत्वाविन्यायुषो वन्धावलिकायामतीतायां सर्वदैव प्रवर्तते । ततस्तामधिकृत्य यथोक्ता यत्स्थितिरवसेया ॥ ३१ ॥

तदेवमुक्तमुत्कृष्टस्थितिसंक्रमपरिमाणं । संप्रति जघन्यस्थितिसंक्रमपरिमाणप्रतिपादनावसरः । जघन्यस्थितिसंक्रमश्च द्विधा–स्वप्रकृतौ परप्रकृतौ च । तत्र स्वप्रकृतौ जघन्यस्थितिसंक्रमप्रतिपादनार्थमाह—

आवरणविग्घदंसणचउक्कलोभंतवेयगाऊणं । एगा ठिई जहन्नो जट्ठिइ समयाहिगावलिगा ॥ ३२ ॥

आवरण त्ति-पञ्चानां ज्ञानावरणीयप्रकृतीनां 'विग्घत्ति' पञ्चानामन्तरायप्रकृतीनां, चतसृणां दर्शनावरणीयप्रकृतीनां चक्षुरचक्षुरवधिकेवलदर्शनावरणलक्षणानां, सञ्ज्वलनलोभस्य, वेदकसम्यक्त्वस्य, चतुर्णां चायुषां, सर्वसंख्यया त्रिंशत्प्रकृतीनां आत्मीयात्मीयसत्ताव्यवच्छेदसमये समयाधिकावलिकाशेषायां स्थितावुदयावलिका सर्वाऽप्यसंक्रमयोग्येति उदयावलिकात उपरितनी समयमात्रा स्थितिरपवर्तनासंक्रमेणाधस्तने उदयावलिकात्रिभागे समयाधिकं संक्रामति। तदा च तासां स्थितिपरिमाणं समयाधिकावलिका। तथा चाह–'जट्ठिइ' इत्यादि ॥ ३२ ॥

निद्दादुगस्स एक्का आवलिगदुगं असंखभागो य। जट्ठिइ हासछक्के संखिज्जाओ समाओ य ॥ ३३ ॥

निद्द त्ति–निद्राद्विकस्य निद्राप्रचलालक्षणस्य जघन्यः स्थितिसंक्रमः स्वसंक्रमान्ते स्वस्थितेरुपरितनी एका समयमात्रा स्थितिः, सा आवलिकाया अधस्तने त्रिभागे निक्षिप्यते। तदानीं च यत्स्थितिः सर्वा स्थितिः आवलिकाद्विकं तृतीयस्या आवलिकाया असंख्येयो भागः। अत्र वस्तुस्वभाव एव यन्निद्राद्विकस्यावलिकाऽसंख्येयभागाधिकावलिकाद्विकशेषायां स्थितावुपरितनी समयमात्रैका स्थितिः संक्रामति, न पुनर्मतिज्ञानावरणीयादीनामिव समयाधिकावलिकाशेषायामिति। सम्प्रति यासां परप्रकृतिषु संक्रमे जघन्यस्थितिसंक्रमस्ताः प्रतिपादयति–'हासछक्के' इत्यादि, सूत्रेणोपलक्षितं षट्कं हास्यषट्कं हास्यरत्यरतिभयशोकजुगुप्सालक्षणं, तस्य क्षपकेणापवर्तनाकरणेन संख्येयवर्षप्रमाणा स्थितिः कृता। ततः सा स्वनिर्लेपनावसरे संज्वलनक्रोधे प्रक्षिप्यमाणा जघन्यः स्थितिसंक्रमः ॥ ३३ ॥

सोलमुहुत्ता जट्ठिइ जहन्नबंधो उ पुरिससंजलने। जट्ठिइ सगऊणजुत्तो आवलीगदुगूणओ तत्तो ॥३४॥

सोणमुहुत्त त्ति—संक्रमणकाले सैव संख्येयवर्षप्रमाणा स्थितिः सोनमुहूर्ताऽन्तर्मुहूर्तेनाभ्यधिका यत्स्थितिः सर्वा स्थितिः। तथाहि—अन्तरकरणे वर्तमानस्ता संख्येयवर्षप्रमाणां स्थितिं संज्वलनक्रोधे संक्रमयति, अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, किंतु तत ऊर्ध्वं, ततोऽन्तरकरणकालेनाभ्यधिका संख्येयवर्षप्रमाणा स्थितिर्हास्यषट्कस्य जघन्यस्थितिसंक्रमकाले यत्स्थितिः। 'जहन्नबंधो' इत्यादि, पुरुषवेदस्य संज्वलनानां च यो जघन्यः स्थितिबन्धः प्रागुक्तः। तद्यथा—पुरुषवेदस्याष्टौ संवत्सराणि, संज्वलनक्रोधस्य मासद्वयं, संज्वलनमानस्य मासः, संज्वलनमायाया अर्धमासः, स एव जघन्यः स्थितिबन्धोऽबाधाकालोनस्तेषां जघन्यः स्थितिसंक्रमः। अबाधारहिता हि स्थितिरन्यत्र संक्रामति, तत्रैव कर्मदलिकसंभवात्, 'अबाधाकालोना कर्मस्थितिः कर्मनिषेकः' इति वचनात्, जघन्यस्थितिबन्धे चाऽबाधाऽन्तर्मुहूर्तप्रमाणा। न च जघन्यस्थितिसंक्रमणकालेऽबाधाकालमध्ये प्राग्बद्धं सत्कर्म प्राप्यते, तस्य तदानीं सर्वस्यापि क्षीणत्वात्। ततोऽन्तर्मुहूर्तहीन एवैतेषां पुरुषवेदादीनां स्वस्वो जघन्यस्थितिबन्धो जघन्यस्थितिसंक्रमः, तदानीं चैतेषां यत्स्थितिः सर्वा स्थितिः स्वकीयेनोनेनाबाधारूपान्तर्मुहूर्तलक्षणेन युक्तोऽबाधाकालसहित इत्यर्थः। जघन्यः स्थितिबन्धः। ततः पुनरप्यावलिकाद्विकेनोनो हीनः सन् द्रष्टव्यः। एतदुक्तं भवति—जघन्यस्थितिसंक्रमेऽबाधाकालः प्रक्षिप्यते। तत्प्रक्षेपानन्तरं चावलिकाद्विकं ततोऽपसार्यते। तदुत्सारणे च कृते यावती स्थितिर्भवति, एतावती जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः। आवलिकाद्विकं कस्मादुत्सार्यत इति चेदुच्यते—बन्धव्यवच्छेदानन्तरं बन्धावलिकायामतीतायां चरमसमयबद्धाः पुरुषवेदादिप्रकृतिलताः संक्रमयितुमारब्धाः। आवलिकामात्रेण च कालेन ताः संक्रम्यन्ते। संक्रमावलिकाचरमसमये च जघन्यः स्थिति-

संक्रमः प्राप्यते । ततो बन्धावलिकासंक्रमावलिकारहित एवाबाधारहितो जघन्यः स्थितिबन्धो जघन्यस्थितिसंक्रमकाले सर्वा स्थितिः ॥ ३४ ॥

संप्रति केवलिसत्कर्मणां जघन्यस्थितिसंक्रमप्ररूपणार्थमाह—

जोगंतियाण अंतोमुहुत्तिओ सेसयाण पल्लस्स। भागो असंखियतमो जहिंगो आलिगाइ सह ॥ ३५ ॥

जोगंतियाण त्ति—योगिनि सयोगिकेवलिनि संक्रममाश्रित्यान्तः पर्यन्तो यासां ता योगान्तिकाः नरकद्विकतिर्यग्द्विकएकेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मसाधारणातपोद्योतवर्जाः शेषा नाम्नो नवतिप्रकृतयः सातासातवेदनीयोच्चैर्गोत्रनीचैर्गोत्राणि एतासां सयोगिकेवलिचरमसमये सर्वापवर्तनयाऽऽन्तर्मुहूर्तिकी स्थितिर्भवति । सा चापवर्त्यमाना उदयावलिकारहिता जघन्यस्थितिसंक्रमः, उदयावलिकासकलकरणायोग्येति कृत्वा नापवर्त्यते, तया चावलिकया सहिताऽपवर्तनारूपजघन्यस्थितिसंक्रमकाले तासां यत्स्थितिः । नन्वासां प्रकृतीनामयोगिकेवलिनि समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यः स्थितिसंक्रमः कस्मान्नाभिधीयते, क्षीणकषाय इव मतिज्ञानावरणीयादीनामिति ? उच्यते—अयोगिकेवली भगवान् सकलसूक्ष्मबादरयोगप्रयोगरहितो मेरुरिव निष्प्रकंपो नैकमप्यष्टानां करणानां मध्ये करणं प्रवर्तयति, निष्क्रियत्वात् । केवलमुदयप्राप्तानि वेदयते । ततः सयोगिकेवलिन एवैतासां जघन्यः स्थितिसंक्रमः प्राप्यते । 'सेसियाणेत्यादि' उक्तशेषाणां प्रकृतीनां स्त्यानर्द्धित्रिकमिथ्यात्वसम्यग्मिथ्यात्वानन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणनपुंसकस्त्रीवेदनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयस्थावरसूक्ष्मातपोद्योतसाधारणलक्षणानां द्वात्रिंशत्प्रकृतीना-

मात्मीयात्मीयक्षपणकाले यश्चरमः संछोभः पल्योपमासंख्येयभागमात्रः स जघन्यः स्थितिसंक्रमः । यत्स्थितिकस्तु सर्वस्थितियुक्तस्तु स एवावलिकया सह युक्तो वेदितव्यः । अयमिह संप्रदायः—स्त्रीनपुंसकवेदवर्जानां प्रकृतीनामेकामधस्तादावलिकां मुक्त्वाशेषमुपरितनं पल्योपमासंख्येयभागमात्रं चरमखंडमन्यत्र संक्रमयति । ततस्तासा जघन्यस्थितिसंक्रमकाले यत्स्थितिः स एव जघन्यस्थितिसंक्रम आवलिकयाऽभ्यधिको वेदितव्यः । स्त्रीनपुंसकवेदयोस्त्वन्तर्मुहूर्तेनाभ्यधिको यतस्तयोश्चरमं स्थितिखंडमन्तरकरणे स्थितः सन् संक्रमयति । अन्तरकरणे च कर्मदलिकं न वि(वे)द्यते, किं तु तत ऊर्ध्वं, अन्तरकरणं चान्तर्मुहूर्तप्रमाणं । ततोऽन्तर्मुहूर्तयुक्तो जघन्यस्थितिसंक्रमस्तयोर्यत्स्थितिरवसेया । शेषाणां तु प्रकृतीनामन्तरकरणं न भवति, ततस्तासामावलिकायुक्त एव यत्स्थितिः ॥ ३५ ॥

तदेवमुक्तं जघन्यस्थितिसंक्रमपरिमाणं । संप्रति साद्यनादिप्ररूपणावसरः । सा च द्विधा—मूलप्रकृतीनामुत्तरप्रकृतीनां च । तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

मूलठिई अजहन्नो सत्तण्ह तिहा चउविहो मोहे। सेस विगप्पा तेसिं दुविगप्पा संकमे होंति ॥ ३६ ॥

मूलठिइ त्ति—इह जघन्यादन्यत्सर्वमजघन्यं यावदुत्कृष्टं । उत्कृष्टादन्यत्सर्वमपि यावज्जघन्यं तावदनुत्कृष्टं । तत्र मोहनीयवर्जाना सप्तानां कर्मणामजघन्यस्थितिसंक्रमस्त्रिधा । तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च । तथाहि—ज्ञानावरणदर्शनावरणान्तरायाणां क्षीणकषायस्य समयाधिकावलिकाशेषाया स्थितौ वर्तमानस्य जघन्यः स्थितिसंक्रमो भवति। नामगोत्रवेदनीयायुषां तु सयोगिकेवलिचरमसमयेऽन्तर्मुहूर्तप्रमाणे आवलिकारहितो जघन्यः स्थितिसंक्रमः। स च सादिरध्रुवश्च । तस्मादन्यः

सर्वोऽपि स्थितिसंक्रमोऽजघन्यः । स चानादिः, ध्रुवोऽभव्यानां भव्यानामध्रुवः, । 'चउविहो मोहेत्ति' मोहे मोहनीयेऽजघन्यः स्थितिसंक्रमश्चतुर्विधः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—मोहनीयस्य जघन्यः स्थितिसंक्रमः सूक्ष्मसंपरायस्य क्षपकस्य समयाधिकावलिकायां शेषायां स्थितौ, ततोऽसौ सादिरध्रुवश्च । तस्माच्च जघन्यादन्यः सर्वोऽप्यजघन्यः । स च क्षायिकसम्यग्दृष्टेरुपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया । शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणास्तेषां कर्मणां संक्रमविषये द्विविकल्पा भवन्ति । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—य एवोत्कृष्टां स्थितिं बध्नाति स एवोत्कृष्टं स्थितिसंक्रमं करोति, उत्कृष्टां च स्थितिं बध्नाति उत्कृष्टे संक्लेशे वर्तमानः । न चोत्कृष्टः संक्लेशः सर्वदैव लभ्यते, किं त्वन्तरान्तरा, शेषकालं त्वनुत्कृष्टः । तत एतौ द्वावपि साद्यध्रुवौ । जघन्यश्च साद्यध्रुवः प्रागेव भावितः ॥ ३६ ॥

संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

धुवसंतकम्मिगाणं तिहा चउद्धा चरित्तमोहाणं। अजहन्नो सेसेसु य दुहेतरासिं च सव्वत्थ ॥ ३७ ॥

धुव त्ति—ध्रुवं सत्कर्म यासां ता ध्रुवसत्कर्मिकास्त्रिंशदुत्तरशतसंख्याः । तथाहि—नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकतीर्थकरनामसम्यक्त्वसम्यग्मिथ्यात्वोच्चैर्गोत्रायुश्चतुष्टयलक्षणा अष्टाविंशतिसंख्या अध्रुवसत्कर्मिकाः प्रकृतयस्ता अष्टापञ्चाशदधिकात् शतादपनीयन्ते । ततः शेषं त्रिंशदुत्तरमेव शतं ध्रुवसत्कर्मिकाणां भवति । तस्मादपि चारित्रमोहनीयप्रकृतयः पञ्चविंशतिसंख्या अपनीयन्ते, तासां पृथग्वक्ष्यमाणत्वात् । ततः शेषस्य पञ्चोत्तरशतस्य स्वस्वक्षपण-

पर्यवसाने जघन्यः स्थितिसंक्रमो भवति । स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स चानादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया । चारित्रमोहनीयप्रकृतीनां पञ्चविंशतिसंख्यानामजघन्यः स्थितिसंक्रमश्चतुर्धा । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—उपशमश्रेण्यामुपशान्तौ सत्यां संक्रमाभावः, उपशमश्रेणितः प्रच्यवने च पुनरप्यजघन्यं स्थितिसंक्रममारभते, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, अध्रुवध्रुवौ भव्याभव्यापेक्षया । 'सेसेसु य दुहा' शेषेपूत्कृष्टानुत्कृष्टजघन्येषु द्विधा प्ररूपणा कर्तव्या । तद्यथा—सादिरध्रुवश्च । तत्रोत्कृष्टानुत्कृष्टयोर्यथा मूलप्रकृतिषु भावना कृता तथात्रापि कर्तव्या । जघन्यस्थितिसंक्रमः स्वस्वक्षयावसरे प्राप्यते, ततोऽसौ सादिरध्रुवश्च । 'इयरासिमित्यादि' इतरासामध्रुवसत्कर्मणां पूर्वोक्तानामष्टाविंशतिसंख्यानां सर्वत्रापि सर्वेष्वपि जघन्याजघन्योत्कृष्टानुत्कृष्टेषु द्विधा प्ररूपणा कर्तव्या । तद्यथा—सादिरध्रुवश्च । सा च साद्यध्रुवताऽध्रुवसत्कर्मत्वादेव परिभावनीया ॥ ३७ ॥

संप्रति क्रमप्राप्तं स्वामित्वमभिधानीयं । तच्च द्वेधा—उत्कृष्टस्थितिसंक्रमस्वामित्वं जघन्यस्थितिसंक्रमस्वामित्वं च । तत्रोत्कृष्टस्थितिसंक्रमस्वामित्वं प्रतिपिपादयिषुराह—

वन्धाउ उक्कोसो जासिं गंतूण आलिगं परउ । उक्कोससामिउ संकमाउ जासिं दुगं तासिं ॥ ३८ ॥

वंधाउ त्ति—यासां प्रकृतीनां वन्धात् वन्धनात् उत्कृष्टः स्थितिवन्धो भवति तासां ते एवोत्कृष्टस्थितिवन्धका देवनैरयिकतिर्यङ्मनुष्याः । 'गंतूण आलिगं परउ त्ति' वन्धावलिकां गत्वाऽतिक्रम्य परतः वन्धावलिकायामतीतायामित्यर्थः । उत्कृष्टस्वामिनः उत्कृष्टस्थितिसंक्रमस्वामिन उत्कृष्टां स्थितिं संक्रमयन्तीत्यर्थः । यासां पुनः प्रकृतीनामुत्कृष्टा स्थितिः

संकमेण प्राप्यते तासां द्विकं बन्धावलिकासंक्रमावलिकालक्षणं गत्वाऽतिक्रम्य परत उत्कृष्टस्वामिनः, बन्धावलिकासंक्र-मावलिकयोरतीतयोरुत्कृष्टस्थितिसंक्रमस्वामिनो भवन्तीत्यर्थः ॥ ३८ ॥

सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टस्थितिसंक्रमस्वामिनमाह—

तस्संतकम्मिगो बंधिऊण उक्कोसगं मुहुत्तंतो। सम्मत्तमीसगाणं आवलिया सुद्धदिट्ठी उ ॥ ३९ ॥

तस्संतकम्मिगो त्ति–तत्सत्कर्मा सम्यक्त्वसम्यग्मिथ्यात्वसत्कर्मा मिथ्यादृष्टिरुत्कृष्टां स्थितिं सप्ततिसागरोपमकोटीकोटी-प्रमाणां बध्वा ततोऽन्तर्मुहूर्तादनन्तरं मिथ्यात्वात् प्रतिपत्य सम्यक्त्वं प्रतिपद्यते। ततोऽसौ शुद्धदृष्टिः सम्यग्दृष्टिरन्त-र्मुहूर्तोनामुत्कृष्टां मिथ्यात्वस्थितिं सम्यक्त्वसम्यग्मिथ्यात्वयोः संक्रमयति। ततः संक्रमावलिकायामतीतायामुदयावलिकात उपरितनीं सम्यक्त्वस्थितिमपवर्तनाकरणेन स्वस्थाने संक्रमयति। सम्यग्मिथ्यात्वस्थितिमपि संक्रमावलिकायामतीताया-मुदयावलिकात उपरितनीं सम्यक्त्वे संक्रमयति, अपवर्तयति च। तत एवं तिसृणामपि दर्शनमोहनीयप्रकृतीनामुत्कृष्ट-स्थितिसंक्रमस्वामी सम्यग्दृष्टिरेवेति ॥ ३९ ॥

तदेवमुक्त उत्कृष्टस्थितिसंक्रमस्वामी, संप्रति जघन्यस्थितिसंक्रमस्वामिनमाह—

दंसणचउक्कविग्घावरणं समयाहिगालिगा छउमो। निद्दाणावलिगदुगे आवलियअसंखतमसेसे ॥ ४० ॥

दंसण त्ति–चक्षुरचक्षुरवधिकेवलदर्शनावरणीयानां 'विग्घ त्ति' पञ्चानामन्तरायप्रकृतीनां पञ्चानां च ज्ञानावरणीयप्रकृ-तीनां जघन्यस्थितिसंक्रमस्वामी 'छउमो त्ति' क्षीणकषायवीतरागच्छद्मस्थः स्वगुणस्थानकस्य समयाधिकावलिकाशेषे

वर्तमानः । तथा निद्रयोर्निद्राप्रचलयोः स एव क्षीणकषायवीतरागछद्मस्थो द्वयोरावलिकयोः शेषयोस्तृतीयस्याश्चावलिकाया असंख्येयतमे भागे शेषे वर्तमानो जघन्यस्थितिसंक्रमस्वामी भवति ॥ ४० ॥

वेदकसम्यक्त्वस्य जघन्यस्थितिसंक्रमस्वामिनमाह—

समयाहिगालिगाए सेसाए वेयगस्स कयकरणे । सक्खवगचरमखंडगसंछुभणादिट्ठिमोहाणं ॥ ४१ ॥

समय त्ति—दर्शनमोहनीयक्षपको मनुष्यो जघन्यतोऽपि वर्षाष्टकादुपरि वर्तमानो मिथ्यात्वसम्यग्मिथ्यात्वे क्षपयित्वा सम्यक्त्वं च सर्वापवर्तनयाऽपवर्त्य सम्यक्त्व वेदयमानस्ततः सम्यक्त्वे क्षपितशेषे सति कश्चिच्चतसृणां गतीनामन्यतमस्यां गतौ प्रयाति । ततश्चतुर्गतिकानामन्यतमः सम्यक्त्वस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानः 'कयकरणे त्ति' कृतकरणः क्षपणकरणेऽभ्युद्यतो जघन्यस्थितिसंक्रमस्वामी भवति । मिथ्यात्वसम्यग्मिथ्यात्वयोर्जघन्यस्थितिसंक्रमस्वामिनमाह—'सक्खवगेत्यादि' दृष्टिमोहयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोः क्षपणकाले यच्चरमखंडं संछुभणं सर्वापवर्तनेनापवर्त्य परस्थाने पल्योपमासंख्येयभागमात्रचरमखंडे प्रक्षेपणं तत्र वर्तमानो मनुष्योऽविरतसम्यग्दृष्टिर्देशविरतः प्रमत्तोऽप्रमत्तो वा जघन्यस्थितिसंक्रमस्वामी भवति ॥ ४१ ॥

समउत्तरालिगाए लोभे सेसाएँ सुहुमरागस्स । पढमकसायाण विसंजोयणसंछोभणाए उ ॥ ४२ ॥

समउत्तरेति—सूक्ष्मसंपरायस्य स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य लोभे लोभस्य जघन्यः स्थितिसंक्रमो भवति । इदमिह तात्पर्यम्—सूक्ष्मसंपरायः स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानो

लोजमत्कजघन्यस्थितिसंक्रमस्वामी जवति । अनन्तानुबन्धिनां जघन्यस्थितिसंक्रमस्वामिनमाह–'पढमेत्यादि' प्रथमकषायाणामनन्तानुबन्धिनां विसंयोजने विनाशने या चरमा पल्योपमासंख्येयजागमात्रा संजोजणा प्रक्षेपणं तत्र वर्तमानश्चतुर्गतिकानामन्यतमः सम्यग्दृष्टिर्जघन्यस्थितिसंक्रमस्वामी जवति ॥ ४२ ॥

चरिमसजोगे जा आत्थ तासि सो चेव सेसगाणं तु। खवगक्कमेण अनियट्टिबायरो वेयगो वेए॥ ४३॥

चरिमत्ति–या (स) योग्यन्तिकाः प्रकृतयश्चतुर्नवतिसंख्याः प्रागुक्तास्तासां स एव सयोगिकेवली चरमापवर्तने वर्तमानो जघन्यस्थितिसंक्रमस्वामी जवति । शेषप्रकृतीनां जघन्यस्थितिसंक्रमस्वामिनमाह–'सेसगाणमित्यादि' शेषाणां स्त्यानर्द्धित्रिकनामत्रयोदशकाष्टकषायनवनोकषायसंज्वलनक्रोधमानमायालक्षणानां पञ्चत्रिंशत्प्रकृतीनां क्षपणक्रमेण क्षपणपरिपाट्या चरमे पल्योपमासंख्येयजागादिमात्रे संजोजणे वर्तमानोऽनिवृत्तिबादरो जघन्यस्थितिसंक्रमस्वामी जवति । 'वेयगो वेदेत्ति' वेदको वेदे वेदस्य जघन्यस्थितिसंक्रमस्वामी । इयमत्र जावना–पुरुषवेदोदये वर्तमानः पुरुषवेदस्य, स्त्रीवेदोदये वर्तमानः स्त्रीवेदस्य, नपुंसकवेदोदये वर्तमानो नपुंसकवेदस्यानिवृत्तिबादरसंपरायश्चरमसंक्रमं कुर्वन् जघन्यस्थितिसंक्रमस्वामी वेदितव्यः । अन्येन हि वेदेन क्षपकश्रेणिमारूढस्यान्यस्य वेदस्य जघन्यस्थितिसंक्रमो न लन्यते । तथाहि–येन वेदेन क्षपकश्रेणिमारोहति तस्य वेदस्योदयोदीरणापवर्तनादिनिः स्थितेः (तिः) पुफलाश्च बहवः परिसटन्ति । ततो यद्यपि नपुंसकवेदेन क्षपकश्रेणिं प्रपन्नः स्त्रीवेदनपुंसकवेदौ युगपत्क्षपयति, तथापि नपुंसकवेदस्यैव जघन्यः स्थितिसंक्रमः प्राप्यते, न स्त्रीवेदस्य उदयोदीरणयोरजावात् । स्त्रीवेदेन च प्रतिपन्नो नपुंसकवेदक्षयानन्तरमन्तर्मुहूर्तेन कालेन स्त्रीवेदं

क्षपयति । एतावता च कालेनोदयोदीरणाभ्यां वह्ली स्थितिस्त्रुट्यति । यद्यपि च पुरुषवेदेनापि प्रतिपन्नस्यैतावान् कालो लभ्यते तथापि तस्य स्त्रीवेदसत्के उदयोदीरणे न भवत इति स्त्रीवेदप्रतिपन्नस्यैव स्त्रीवेदस्य जघन्यः स्थितिसंक्रमो, न शेषस्य । तथा पुरुषवेदेन क्षपकश्रेणिं प्रपन्नो हास्यादिषट्कक्षयानन्तरं पुरुषवेदं क्षपयति, अन्यथा तु हास्यादिषट्कसहितं । उदितस्य च वेदस्योदीरणापि प्रवर्तते इति वह्ली स्थितिस्त्रुट्यति । पुरुषवेदस्यापि पुरुषवेदारूढस्यैव जघन्यः स्थितिसंक्रमो न शेषस्य ॥ ४३ ॥

तदेवमुक्तः स्थितिसंक्रमः, संप्रत्यनुभागसंक्रमाभिधानावसरः, तत्र चैतेऽर्थाधिकारास्तद्यथा—भेदस्पर्धकप्ररूपणा, विशेषलक्षणप्ररूपणा, उत्कृष्टानुभागसंक्रमप्रमाणप्ररूपणा, जघन्यानुभागसंक्रमप्रमाणप्ररूपणा, साद्यनादिप्ररूपणा, स्वामित्वं चेति । तत्र भेदप्ररूपणार्थमाह—

मूलुत्तरपगइगतो अणुभागे संकमो जहा बंधे । फड्डगनिद्देसो सिं सव्वेयरघायऽघाईणं ॥ ४४ ॥

मूलुत्तरत्ति—अनुभागेऽनुभागविषये संक्रमो मूलोत्तरप्रकृतिगतः । किमुक्तं भवति ? द्विधाऽनुभागसंक्रमस्तद्यथा—मूलप्रकृत्यनुभागसंक्रम उत्तरप्रकृत्यनुभागसंक्रमश्च । ते च मूलोत्तरप्रकृतिभेदा यथा बन्धे बन्धशतकेऽभिहितास्तथात्रापि द्रष्टव्याः।कृता भेदप्ररूपणा, स्पर्धकप्ररूपणार्थमाह—'फड्डगेत्यादि' आसां सर्वघातिनीनां देशघातिनीनामघातिनीनां प्रकृतीनां स्पर्धकनिर्देशः स्पर्धकप्ररूपणा यथा शतके कृता तथात्रापि कर्तव्या । तथापि किंचिदुच्यते—तत्र च केवलज्ञानावरणकेवलदर्शनावरणाद्यद्वादशकषायनिद्रापंचकमिथ्यात्वलक्षणानां विंशतिप्रकृतीना रसस्पर्धकानि सर्वघातीनि, सर्वं स्वघात्यं

केवलज्ञानादिलक्षणं गुणं घातयंतीति सर्वघातीनि, तानि च ताम्रभाजनवत् निश्छिद्राणि घृतवत् स्निग्धानि द्राक्षावत्तनुप्रदेशोपचितानि स्फटिकाभ्रहारवच्चातीव निर्मलानि । उक्तं च-"जो घाएइ सविसयं सयलं सो होइ सव्वघाइरसो । सो निच्छिद्दो निद्धो तणुओ फलिहब्भहरविमलो ॥ १ ॥" मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टयनवनोकषायान्तरायपञ्चकलक्षणानां पञ्चविंशतिसंख्यानां देशघातिप्रकृतीनां देशघातीनि रसस्पर्धकानि भवन्ति । स्वस्य ज्ञानादेर्गुणस्य देशमेकदेशं मतिज्ञानादिलक्षणं घातयन्तीत्येवंशीलानि देशघातीनि । तानि चानेकप्रकारच्छिद्रशतसंकुलानि । तथाहि-कानिचिदनेकवृहच्छिद्रशतसंकुलानि वंशदलनिर्मापितकटवत् । कानिचिन्मध्यमानेकच्छिद्रशतसंकुलानि कंबलवत् । कानिचित्पुनरतीवसूक्ष्मानेकच्छिद्रशतसंकुलानि तथाविधवस्त्रवत् । तथा तानि स्तोकस्नेहानि विशिष्टनैर्मल्यरहितानि च भवन्ति । तथा चोक्तं-"देसविघाइत्तणओ इयरो कडकंबलंसुसंकासो । विविहबहुछिद्दभरिओ अप्पसिणेहो अविमलो य ॥ १ ॥" वेदनीयायुर्नामगोत्राणां संबन्धिन एकादशोत्तरप्रकृतिशतस्याघातिनो रसस्पर्धकान्यघातीनि वेदितव्यानि । केवलं वेद्यमानसर्वघातिरसस्पर्धकसंबन्धात्तान्यपि सर्वघातीनि भवन्ति । यथेह लोके स्वयमचौराणामपि चौरसंबन्धाच्चौरता । उक्तं च-"जाण न विसओ घाइत्तणम्मि ताणं पि सव्वघाइरसो । जायइ घाइसगासेण चोरया वेहऽचोराणं ॥ १ ॥" ॥ ४४ ॥

संप्रति दर्शनमोहनीयस्य स्पर्धकप्ररूपणार्थमाह—

सव्वेसु देसघाईसु सम्मत्तं तदुवरिं तु वा मिस्सं । दारुसमाणस्साणंतमोत्ति मिच्छत्तमुप्पिमओ ॥ ४५ ॥

सव्वेसु त्ति–इह दर्शनमोहनीयस्य सत्कर्म प्रतीत्य द्विविधानि रसस्पर्धकानि । तद्यथा–देशघातीनि सर्वघातीनि च । तत्र यानि देशघातीनि स्पर्धकानि एकस्थानकरसोपेतानि द्विस्थानकरसोपेतानि च । तेषु सर्वेष्वपि सम्यक्त्वं 'तदुवरिं तु वा मिस्सं' यत्र देशघातीनि स्पर्धकानि निष्ठितानि तत उपरि सम्यग्मिथ्यात्वस्य स्पर्धकानि भवन्ति । तानि च सर्वघातीनि द्विस्थानकरसोपेतानि च । तानि सम्यग्मिथ्यात्वस्य स्पर्धकानि तावद्द्रष्टव्यानि यावत् 'दारुसमाणस्साणतमोत्ति' दारुसमान इति द्विस्थानको रसस्तस्य संबन्धिनां स्पर्धकानामनन्ततमो भागो गतो भवति । ततो यत्र सम्यग्मिथ्यात्वस्य स्पर्धकानि निष्ठां यान्ति, ततः प्रभृति द्विस्थानकत्रिस्थानकचतुःस्थानकरसोपेतानि स्पर्धकानि सर्वाण्यपि मिथ्यात्वस्य द्रष्टव्यानि ॥ ४५ ॥

कृता स्पर्धकप्ररूपणा, संप्रति विशेषलक्षणप्ररूपणार्थमाह—

तत्थट्ठपयं उव्वट्टिया व ओवट्टिया व अविभागा । अणुभागसंकमो एस अन्नपगइं निया वावि ॥ ४६ ॥

तत्थ त्ति–तत्रानुभागसंक्रमेऽर्थपदं याथात्म्यनिर्धारणमिदं यदुत उद्वर्तिताः प्रभूतीकृता यद्वाऽपवर्तिता ह्रस्वीकृता अथवाऽन्यां प्रकृतिं नीता अन्यप्रकृतिस्वभावेन परिणमिताः अविभागा अनुभागाः । एष सर्वोऽप्यनुभागसंक्रमः । तत्र मूलप्रकृतीनामुद्वर्तनापवर्तनारूपौ द्वावेव संक्रमौ नान्यप्रकृतिनयनरूपः संक्रमः, तासां परस्परं संक्रमाभावात् । उत्तरप्रकृतीना तु त्रयोऽपि सक्रमाः ॥ ४६ ॥

तदेवमुक्तं विशेषलक्षणं, संप्रत्युत्कृष्टानुभागसंक्रमप्रमाणप्रतिपादनार्थमाह—

दुविहपमाणे जेठो सम्मत्तदेसघाइ दुठाणा । नरतिरियाऊआयवमिस्से विय सवघाइम्मि ॥ ४७ ॥

दुविह त्ति—द्विविधे प्रमाणे स्थानप्रमाणे घातित्वप्रमाणे च ज्येष्ठ उत्कृष्टोऽनुभागसंक्रमः सम्यक्त्वस्य देशघातिनि द्विस्थानके रसस्पर्धके संक्रम्यमाणे वेदितव्यः । एतदुक्तं भवति—सम्यक्त्वस्य घातित्वमाश्रित्य देशघातिस्थानमाश्रित्य सर्वोत्कृष्टद्विस्थानकरसोपेतं स्पर्धकपटलं यदा संक्रामति तदा तस्योत्कृष्टोऽनुभागसंक्रम इति । नरायुस्तिर्यगायुरातपसम्यग्मिथ्यात्वानां स्थानं प्रतीत्य सर्वोत्कृष्टद्विस्थानकरसोपेतघातित्वमाश्रित्य सर्वघातिनि रसस्पर्धके उत्कृष्टोऽनुभागसंक्रमः । अत्रापीयं भावना—नरतिर्यगायुरातपसम्यग्मिथ्यात्वानां सर्वोत्कृष्टद्विस्थानकरसोपेतं सर्वघातिरसस्पर्धकं यदा संक्रामति तदा स तेषामुत्कृष्टोऽनुभागसंक्रमः । अत्र नरतिर्यगायुरातपानां "इति चउठाणा उ सेसाउ" इतिवचनात् द्वित्रिचतुःस्थानकरससंभवेऽपि यत् द्विस्थानकरसस्पर्धकस्यैव संक्रमे उत्कृष्टोऽनुभागसंक्रम उक्तः, स एवं ज्ञापयति—एतेषां कर्मणां तथास्वाभाव्यादेव त्रिस्थानकचतुःस्थानकरसस्पर्धकानामुद्वर्तनापवर्तनाप्रकृत्यन्तरनयनरूपस्त्रिप्रकारोऽपि संक्रमो न भवतीति ॥ ४७ ॥

सेसासु चउठाणे मंदो संमत्तपुरिससंजलणे । एगठाणे सेसासु सवघाइंमि दुठाणे ॥ ४८ ॥

सेसासु त्ति—शेषाणामुक्तव्यतिरिक्तानां प्रकृतीनां स्थानमाश्रित्य सर्वोत्कृष्टश्चतुःस्थानको घातित्वमाश्रित्य सर्वघाती रसो यदा संक्रामति तदा स तासामुत्कृष्टोऽनुभागसंक्रमः । तदेवमुक्तमुत्कृष्टानुभागसंक्रमप्रमाणं । संप्रति जघन्यानुभागसंक्रम-

प्रमाणप्रतिपादनार्थमाह—'मंदो त्ति' सम्यक्त्वस्य पुरुषवेदस्य संज्वलनानां चैकस्थानके रसे संक्रामति मन्दो जघन्योऽनुभागसंक्रमो वेदितव्यः। एतदुक्तं भवति—सम्यक्त्वस्य सर्वविशुद्ध एकस्थानको रसो यदा संक्रामति तदा तस्य जघन्योऽनुभागसंक्रमः, पुरुषवेदसंज्वलनानां च क्षपणकाले यानि समयोनावलिकाद्विकबद्धानि स्पर्धकानि एकस्थानरसोपेतानि तानि यदा संक्रामन्ति तदा स तेषां जघन्योऽनुभागसंक्रमः। 'सेसासु इत्यादि' शेषासूक्तव्यतिरिक्तासु सर्वासु प्रकृतिषु सर्वघातिनि द्विस्थानकरसोपेते स्पर्धके संक्रम्यमाणे जघन्योऽनुभागसंक्रमो वेदितव्यः। इदमत्र तात्पर्य—सम्यक्त्वपुरुषवेदसंज्वलनचतुष्टयव्यतिरिक्तानां शेषप्रकृतीनां घातित्वमाश्रित्य सर्वघातीनि, स्थानमाश्रित्य द्विस्थानकरसोपेतानि मन्दानुभावानि यानि रसस्पर्धकानि तानि यदा संक्रामन्ति तदा स तासां जघन्योऽनुभागसंक्रमः। इह यद्यपि मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणान्तरायपञ्चकानामेकस्थानकोऽपि रसो बन्धे प्राप्यते तथापि क्षयकालेऽपि प्राग्बद्धो द्विस्थानकोऽपि रसः संक्रामति, नैकस्थानकः केवल इति जघन्यसंक्रमविषयतया नैतेषामेकस्थानकरस उक्तः ॥ ४८ ॥

तदेवमुक्तं जघन्यानुभागसंक्रमपरिमाणं। संप्रति साद्यनादिप्ररूपणा कर्तव्या। सा च द्विधा—मूलप्रकृतिसाद्यनादिप्ररूपणा उत्तरप्रकृतिसाद्यनादिप्ररूपणा च। तत्र मूलप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

अजहण्णो तिण्णि तिहा मोहस्स चउव्विहो अहाउस्स। एवमणुक्कोसो सेसिगाण तिविहो अणुक्कोसो ४९
सेसा मूलपगइसु दुविहा अह उत्तरासु अजहण्णो। सत्तरसण्ह चउद्धा तिविकप्पो सोलसण्हं तु ॥ ५० ॥

अजहण्णो त्ति–ज्ञानावरणदर्शनावरणान्तरायलक्षणानां त्रयाणां कर्मणामजघन्योऽनुभागसंक्रमश्चतुर्विधः। तद्यथा–अनादिरध्रुवो ध्रुवश्च तथाहि–क्षीणकषायस्यैतेषां कर्मणां समयाधिकावलिकाशेषायां स्थितौ जघन्यानुभागसंक्रमो भवति, स च सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यजघन्यः, स चानादिः। ध्रुवाध्रुवौ भव्याभव्यापेक्षया। मोहनीयस्याजघन्योऽनुभागसंक्रमश्चतुर्विधः। तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि–सूक्ष्मसंपरायस्य क्षपकस्य मोहनीयस्य समयाधिकावलिकाशेषायां स्थितौ जघन्योऽनुभागसंक्रमो भवति। स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः। स च क्षायिकसम्यग्दृष्टेरुपशमश्रेण्यां वर्तमानस्योपशान्तमोहगुणस्थानके न भवति। उपशान्तमोहगुणस्थानकाच्च प्रतिपततः सतः पुनरपि भवति, ततोऽसौ सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवौ पूर्ववत्। आयुषस्त्वनुत्कृष्टोऽनुभागसंक्रमश्चतुर्विधः। तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि–अप्रमत्तो देवायुष उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायाः परतः संक्रमयितुमारभते। तं च तावत्संक्रमयति यावदनुत्तरसुरभवे स्थितस्य त्रयस्त्रिंशत्सागरोपमाण्यतिक्रामन्ति। आवलिकामात्रा स्थितिरवतिष्ठते। ततोऽन्योऽनुभागसंक्रम आयुषः सर्वोऽप्यनुत्कृष्टः। स च सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवावभव्यभव्यापेक्षया। शेषाणां नामगोत्रवेदनीयानामनुत्कृष्टोऽनुभागसंक्रमस्त्रिविधस्त्रिप्रकारः। तद्यथा–अनादिरध्रुवो ध्रुवश्च। तथाहि–सूक्ष्मसंपरायेण क्षपकेण स्वगुणस्थानकस्य चरमसमये तेषां नामगोत्रवेदनीयानां सर्वोत्कृष्टोऽनुभागो बध्यते। बन्धावलिकायामतीतायां यावत्सयोगिचरमसमयस्तावत्संक्रामति। स च सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः। स चानादिः, आदेरभावात्। ध्रुवाध्रुवौ पूर्ववत्। उक्तशेषेषु विकल्पेषु द्विधा प्ररूपणा कर्तव्या। तद्यथा–सादिर-

ध्रुवश्च । तत्र चतुर्णां घातिकर्मणा उत्कृष्टानुत्कृष्टजघन्येषु जघन्यः सादिरध्रुवश्च भावित एव । उत्कृष्टः कदाचिन्मिथ्यादृष्टिर्भवति, अन्यदा तु तस्याप्यनुत्कृष्टः, अत एतौ साद्यध्रुवौ । शेषाणा चतुर्णामघातिकर्मणां जघन्याजघन्योत्कृष्टेषु मध्ये उत्कृष्टो भावित एव । जघन्यः सूक्ष्मस्यापर्याप्तस्यैकेन्द्रियस्य हतप्रभूतानुभागसत्कर्मणो लभ्यते, नान्यस्य । प्रभूतानुभागसत्कर्मघाताभावे तु तस्याप्यजघन्यः । तत एतावपि साद्यध्रुवौ । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह–'अट्ठेत्यादि' उत्तरासूत्तरप्रकृतिषु मध्ये सप्तदशानां कर्मणामनन्तानुबन्धिचतुष्टयसंज्वलनचतुष्टयनवनोकषायलक्षणानामजघन्योऽनुभागसंक्रमश्चतुर्धा । तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि–एतेषामनन्तानुबन्धिवर्जानां त्रयोदशकर्मणां स्वस्वक्षयपर्यवसानावसरे जघन्यस्थितिसंक्रमकाले जघन्योऽनुभागसंक्रमः प्राप्यते । अनन्तानुबन्धिनां पुनरुद्वलनासंक्रमेणोद्वल्य भूयोऽपि मिथ्यात्वप्रत्ययतो बद्धानां बन्धावलिकायामतीताया द्वितीयावलिकायाः प्रथमसमये जघन्योऽनुभागसंक्रमः । एतदन्यः पुनः सर्वोऽप्येतासां सप्तदशप्रकृतीनामजघन्यः । स चोपशमश्रेण्यामुपशान्तानामेतासां न भवति ततः प्रतिपाते च भवति, ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया । तथा पञ्चविधज्ञानावरणस्त्यानर्द्धित्रिकवर्जषड्दर्शनावरणपञ्चविघ्नान्तरायलक्षणानां षोडशकर्मणामजघन्योऽनुभागसंक्रमस्त्रिविकल्पस्त्रिप्रकारस्तद्यथा–अनादिरध्रुवो ध्रुवश्च । तथाहि–एतेषां षोडशकर्मणां जघन्यानुभागसंक्रमः क्षीणकषायस्य स्वगुणस्थानकस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य प्राप्यते । ततोऽन्यः सर्वोऽप्यजघन्यः, तस्य चादिर्न विद्यते इत्यनादिः । अध्रुवध्रुवौ भव्याभव्यापेक्षया ॥ ५० ॥

तिविहो छत्तीसाए णुक्कोसो ह नवगस्स य चउद्धा। एयासिं सेसा सेसगाण सवे य दुविगप्पा ॥५१॥

तिविहो त्ति–सातवेदनीयपञ्चेन्द्रियजातितैजसकार्मणसमचतुरस्रसंस्थानशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघूष्णशीत (स्निग्धोष्ण) लक्षणशुभवर्णाद्येकादशकागुरुलघूच्छ्वासपराघातप्रशस्तविहायोगतित्रसादिदशकनिर्माणलक्षणाना षट्त्रिंशत्प्रकृतीनामुत्कृष्टोऽनुभागसंक्रमस्त्रिविधस्त्रिप्रकारः। तद्यथा–अनादिर्ध्रुवोऽध्रुवश्च। तथाहि–आसां षट्त्रिंशत्प्रकृतीनां क्षपक आत्मीयात्मीयबन्धव्यवच्छेदकाले उत्कृष्टमनुभागं बध्नाति बद्ध्वा च बन्धावलिकायामतीतायां संक्रमयितुमारभते। तं च तावत्संक्रमयति यावत्सयोगिकेवलिचरमसमयः। ततः क्षपकसयोगिकेवलिवर्जस्य शेषस्यानुत्कृष्ट एवानुभाग एतासां संक्रामति। तस्य चादिर्न विद्यत इत्यनादिः ध्रुवाध्रुवौ अभव्यभव्यापेक्षया। 'अद्वेत्यादि' अथशब्दस्तथाविधार्थे। नवकस्य उद्योतवज्रर्षभनाराचसंहननौदारिकसप्तकलक्षणस्यानुत्कृष्टोऽनुभागसंक्रमश्चतुर्विधः। तद्यथा–सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि–एतेषामुद्योतवर्जानामष्टानां कर्मणां सम्यग्दृष्टिर्देवोऽत्यन्तविशुद्धपरिणाम उत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां संक्रमयति। उद्योतनाम्नः पुनः सप्तमनरकपृथिव्यां वर्तमानो नैरयिको मिथ्यादृष्टिः सम्यक्त्वं प्रतिपत्तुकाम उत्कृष्टमनुभागबन्धं करोति। ततो बन्धावलिकायामतीतायां संक्रमयति। तं च जघन्येनान्तर्मुहूर्तमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां यावत्। इह यद्यपि सप्तमनरकपृथिव्यां चरमेऽन्तर्मुहूर्तेऽवश्यं मिथ्यात्वं गच्छति तथाप्यग्रेतने भवेऽन्तर्मुहूर्तानन्तरं यः सम्यक्त्वं प्रतिपद्यते स इह गृह्यते। ततोऽपान्तराले स्तोको मिथ्यात्वकालो भवन्नपि चिरंतनग्रन्थेषु न विवक्षित इत्यस्माभिरपि द्वे षट्षष्टी सागरोपमाणां यावदित्युक्तं। तत उत्कृष्टात्प्रतिपतितस्यानुत्कृष्टः। स च सादिः।

तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ भव्याभव्यापेक्षया । 'एयासिमित्यादि' एतासां सप्तदशषोडशषट्त्रिंशन्नवकरूपाणां प्रकृतीनामुक्तशेषा विकल्पा उक्तसप्तदशादिव्यतिरिक्तानां च शेषप्रकृतीनामशीतिसंख्यानां सर्वेऽप्युत्कृष्टानुत्कृष्टजघन्याजघन्या द्विविकल्पा द्विप्रकारा ज्ञातव्याः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—सप्तदशानां षोडशानां चोत्कृष्टोऽनुभागसंक्रमो मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य प्राप्यते । शेषकालं तु तस्याप्यनुत्कृष्ट एव । अत एव तौ द्वावपि साद्यध्रुवौ । जघन्यो भावित एव । तथा षट्त्रिंशत्प्रकृतीनां नवकस्य च जघन्योऽनुभागसंक्रमः सूक्ष्मैकेन्द्रिये हतप्रभूतानुभागसत्कर्मणि प्राप्यते । प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्यस्तत एतौ साद्यध्रुवौ । उत्कृष्टो भावित एव । शेषाणां प्रकृतीनां संज्ञिनि पञ्चेन्द्रिये पर्याप्ते शुभानां वैक्रियसप्तकदेवद्विकोच्चैर्गोत्रातपतीर्थकराहारकसप्तकमनुजद्विकनरकायुर्वर्जशेषायुस्त्रयरूपाणां चतुर्विंशतिसंख्यानां विशुद्धावशुभानां च स्त्यानर्द्धित्रिकासातवेदनीयदर्शनमोहनीयत्रितयाप्रत्याख्यानप्रत्याख्यानावरणकषायनरकायुर्नरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयप्रथमवर्जसंस्थानप्रथमवर्जसंहननाशुभवर्णादिनवकाप्रशस्तविहायोगत्युपघातस्थावरदशकनीचैर्गोत्ररूपाणां षट्पञ्चाशत्संख्यानां संक्लेशे उत्कृष्टोऽनुभागबन्धो लभ्यते । शेषकालं त्वनुत्कृष्टः । एवं संक्रमोऽपि । तत एतौ साद्यध्रुवौ । जघन्योऽनुभागसंक्रमः पुनः सूक्ष्मैकेन्द्रिये हतप्रभूतानुभागसत्कर्मणि प्राप्यते । प्रभूतानुभागसत्कर्मघाताभावे तु तस्मिन्नप्यजघन्यः । तत एतावपि साद्यध्रुवौ ॥ ५१ ॥

कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वं वक्तव्यं । तत्र द्विधा–उत्कृष्टानुभागसंक्रमस्वामित्वं, जघन्यानुभागसंक्रमस्वामित्वं च । तत्रोत्कृष्टानुभागसंक्रमस्वामित्वमनिभित्सुस्तत्कालप्रमाणनियमनार्थमिदमाह—

उक्कोसगं पबंधिय आवलियमइच्छिऊण उक्कोसं। जाव न घाणइ तगं संकमइ य आ मुहुत्तंतो ॥५२॥

उक्कोसगं ति–मिथ्यादृष्टिरुत्कृष्टमनुभागं बद्ध्वा तत आवलिकामतिक्रम्य बन्धावलिकायाः परत इत्यर्थः । तमुत्कृष्टमनुभागं संक्रमयति तावद्यावन्न विनाशयति कियन्तं कालं यावत्पुनर्न विनाशयतीति चेदुच्यते–आमुहूर्तान्तः अन्तर्मुहूर्तं यावदित्यर्थः। परतो मिथ्यादृष्टिः शुभप्रकृतीनामनुभागं संक्लेशेन अशुभप्रकृतीनां तु विशुद्ध्याऽवश्यं विनाशयति॥५२॥

संप्रति स्वामी प्रतिपाद्यते—

असुभाणं अन्नयरो सुहुम अपज्जगाइ मिच्छो य । वज्जिय असंखवासाउए य मणुओववाए य ॥५३॥

असुभाणं ति–अशुभानां प्रकृतीनां पञ्चविधज्ञानावरणनवविधदर्शनावरणासातवेदनीयाष्टाविंशतिविधमोहनीयनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जशेषजातिचतुष्टयप्रथमवर्जसंस्थानप्रथमवर्जसंहनननीलकृष्णदुरभिगन्धतिक्तकटुरूक्षशीतकर्कशगुरूपघाताप्रशस्तविहायोगतिस्थावरसूक्ष्मसाधारणापर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रपञ्चविधान्तरायलक्षणानामष्टाशीतिसंख्यानामन्यतरः सूक्ष्मापर्याप्तादिः, आदिशब्दात् पर्याप्तसूक्ष्मपर्याप्तापर्याप्तबादरद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञितिर्यक्पञ्चेन्द्रियमनुष्यदेवनारकपरिग्रहः । तत एतेषामन्यतमो मिथ्यादृष्टिरुत्कृष्टमनुभागसंक्रमं करोति । केवलमसंख्येयवर्षायुषो मनुष्यतिरश्चो ये च देवाः स्वभवाच्युता मनुष्येषूत्पद्यन्ते तांश्च मनुष्योपपातान् आनतप्रमुखान्

देवान् वर्जयित्वा । एते हि मिथ्यादृष्टयोऽपि नाशुभप्रकृतीनामुक्तस्वरूपाणामुत्कृष्टमनुभागं बध्नन्ति, तीव्रसंक्लेशाभावात् । ततश्चोत्कृष्टानुभागसंक्रमाभाव इति तेषां वर्जनं ॥ ५३ ॥

सव्वत्थायावुज्जोयमणुयगइ पंचगाण आऊणं । समयाहिगालिगा सेसगत्ति सेसाण जोगंता ॥ ५४ ॥

सव्वत्थ त्ति–सर्वत्र सर्वेषु सूक्ष्मापर्याप्तादिषु नैरयिकपर्यवसानेषु असंख्येयवर्षायुस्तिर्यग्मनुष्येषु मनुष्योपपातेषु च देवेषु आनतादिषु मिथ्यादृष्टिषु सम्यग्दृष्टिषु वा। आतपस्योद्योतस्य मनुजगतिपञ्चकस्य मनुजगतिमनुजानुपूर्व्यौदारिकद्विकवज्रर्षभनाराचसंहननलक्षणस्य । अत्रौदारिकद्विकग्रहणादौदारिकसप्तकं गृह्यते, तथाविचक्षणात् । ततः सर्वसंख्यया द्वादशानां प्रकृतीनामुत्कृष्टोऽनुभागसंक्रमो वेदितव्यः । तथाहि–सम्यग्दृष्टिः शुभमनुभागं न विनाशयति, किंतु विशेषतो द्वे षट्षष्टी सागरोपमाणां यावत् परिपालयति । तत उत्कर्षत एतावन्तं कालं यावदुत्कृष्टमनुभागमविनाश्य पश्चात्सर्वत्र यथायोग्यमुत्पद्यते । ततो मिथ्यादृष्टिष्वप्यनन्तरोक्तप्रकृतीनामुत्कृष्टोऽनुभागसंक्रमोऽन्तर्मुहूर्तं कालं यावदवाप्यते । आतपोद्योतयोश्चोत्कृष्टोऽनुभागो मिथ्यादृष्टिनैव बध्यते । ततो न तत्र तयोरुत्कृष्टानुभागसंक्रमाभावः । मिथ्यात्वाच्च प्रतिपत्य सम्यक्त्वं गते सम्यग्दृष्टावपि प्राप्यते । न च सम्यग्दृष्टिः सन् तयोरुत्कृष्टमनुभागं विनाशयति, शुभप्रकृतित्वात् । ततो द्वे षट्षष्टी अपि सागरोपमाणां यावदुत्कर्षतस्तयोस्तत्र संक्रमो द्रष्टव्यः । तथा चतुर्णामायुषामुत्कृष्टमनुभागं बद्ध्वा बन्धावलिकायामतीतायां यावत्समयाधिकावलिका शेषा तावदुत्कृष्टानुभागसंक्रमः प्राप्यते । शेषाणां तु शुभप्रकृतीनां सातवेदनीयदेवद्विकपञ्चेन्द्रियजातिवैक्रियसप्तकाहारकसप्तकतैजससप्तकसमचतुरस्रसंस्थानशुक्ललोहितहारिद्रवर्णसुरभिगन्धकषायाम्लमधु-

रसमृदुलघुस्निग्धोष्णस्पर्शप्रशस्तविहायोगत्युच्छ्वासागुरुलघुपराघातत्रसादिदशनिर्माणतीर्थकरोच्चैर्गोत्रलक्षणानां चतुःपञ्चाशत्संख्यानामात्मीयात्मीयबन्धव्यवच्छेदसमये उत्कृष्टमनुभागं बद्धा बन्धावलिकायाः परतस्तमुत्कृष्टमनुभागं संक्रमयति यावत्सयोगिकेवलिचरमसमयः । तथा चैतासां प्रकृतीनामुत्कृष्टानुभागसंक्रमस्वामिनः क्षपकोऽपूर्वकरणादयः सयोगिकेवलिपर्यवसाना द्रष्टव्याः ॥ ५४ ॥

तदेवमुक्त उत्कृष्टानुभागसंक्रमस्वामी, संप्रति जघन्यानुभागसंक्रमस्वामिनं प्रतिपिपादयिषुर्जघन्यानुभागसंक्रमसंभवपरिज्ञानार्थमाह—

खवगस्संतरकरणे अकए घाईण सुहुमकम्मुवरिं। केवलिणो णंतगुणं असन्निउ सेसअणुभागं ॥ ५५ ॥

खवगस्स त्ति–यावदद्याप्यन्तरकरणं न विधीयते तावत्क्षपकस्य सर्वघातिनीनां देशघातिनीनां च प्रकृतीनां संबन्धी अनुभागः सूक्ष्मैकेन्द्रियसत्कादनुभागसत्कर्मणोऽनन्तगुणो भवति । अन्तरकरणे तु कृते सति सूक्ष्मैकेन्द्रियस्यापि सत्कादनुभागसत्कर्मणो हीनो भवति । तथा शेषाणामप्यघातिनीनामशुभप्रकृतीनामसातवेदनीयप्रथमवर्जसंस्थानप्रथमवर्जसंहननकृष्णनीलदुरभिगन्धतिक्तकटुगुरुकर्कशरूक्षशीतोपघाताप्रशस्तविहायोगतिदुर्भगदुःस्वरानादेयास्थिराशुभापर्याप्तायशःकीर्तिनीचैर्गोत्रलक्षणानां त्रिंशत्संख्यानां केवलिनोऽनुभागसत्कर्म असंज्ञिपञ्चेन्द्रियसत्कादनुभागसत्कर्मणोऽनन्तगुणं वेदितव्यं । तथा च सति सर्वघातिनीनां देशघातिनीनां च प्रकृतीनां जघन्यानुभागसंक्रमसंभवः क्षपकस्यान्तरकरणे कृते

सति वेदितव्यः । शेषाणां त्वशुभप्रकृतीनामुक्तरूपाणां जघन्यानुभागसंक्रमसंभवः, न सयोगिकेवलिनि, किंतु हतसमुत्पत्तिकर्मणः सूक्ष्मैकेन्द्रियादेः, तस्यैव वक्ष्यमाणत्वात् ॥ ५५ ॥

इह 'संकमई य आमुहुत्तंतो' इतिवचनात्सम्यग्दृष्टयो मिथ्यादृष्टयो वा किलान्तर्मुहूर्तात्परतः सर्वप्रकृतीनामनुभागघातं कुर्वन्तीति प्रसक्तं, तत्रापवादमाह—

सम्मद्दिट्ठी न हणइ सुभाणुभागे असम्मदिट्ठी वि । सम्मत्तमीसगाणं उक्कोसं वज्जिया खवणं ॥ ५६ ॥

सम्मद्दिट्ठि त्ति—इह याः शुभप्रकृतयः सातवेदनीयदेवद्विकमनुजद्विकपञ्चेन्द्रियजातिप्रथमसंस्थानप्रथमसंहननौदारिकवैक्रियसप्तकाहारकसप्तकतैजससप्तकशुभवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वासातपोद्योतप्रशस्तविहायोगतित्रसादिदशकनिर्माणतीर्थंकरोच्चैर्गोत्रलक्षणाः षट्षष्टिसंख्यास्तासां सर्वासामपि शुभमनुभागमुत्कर्षतो द्वे षट्षष्टी सागरोपमाणां यावत्सम्यग्दृष्टिर्न विनाशयति । असम्यग्दृष्टिर्मिथ्यादृष्टिः । अपिशब्दात्सम्यग्दृष्टिश्च सम्यग्मिथ्यात्वयोरुत्कृष्टमनुभागं न विनाशयति । क्षपणं क्षपणकालं वर्जयित्वा । एतदुक्तं भवति—क्षपणकाले सम्यग्दृष्टिरपि सम्यक्त्वसम्यग्मिथ्यात्वयोरुत्कृष्टमनुभागं विनाशयति, तेन क्षपणकालो वर्ज्यते । तथा चोक्तं पञ्चसंग्रहमूलटीकायां—"सम्यग्दृष्टयो मिथ्यादृष्टयश्च सम्यक्त्वसम्यग्मिथ्यात्वयोर्नोत्कृष्टमनुभागं विनाशयन्ति, अपि तु क्षपकः सम्यग्दृष्टिर्विनाशयति उभयोरपि दृष्ट्योरिति" । मिथ्यादृष्टिः पुनः सर्वासामपि शुभप्रकृतीनां संक्लेशेनाशुभप्रकृतीनां तु विशुद्ध्याऽन्तर्मुहूर्तात्परत उत्कृष्टमनुभागमवश्यं विनाशयति ॥ ५६ ॥

तदेवं जघन्यानुभागसंक्रमस्वामित्वप्रतिपादनाय भावना कृता । संप्रति जघन्यानुभागसंक्रमस्वामित्वमेवाह—

अंतरकरणा उवरिं जहन्नठिइसंकमो उ जस्स जहिं । घाईणं नियगचरमरसखंडे दिठिमोहदुगे ॥ ५७ ॥

अंतरकरण त्ति–अन्तरकरणादूर्ध्वं घातिकर्मप्रकृतीनां मध्ये यस्याः प्रकृतेर्यत्र गुणस्थानके जघन्यस्थितिसंक्रम उक्तः, तस्यास्तत्र जघन्यानुभागसंक्रमोऽपि वेदितव्यः । एतदुक्तं भवति–अन्तरकरणे कृते सति अनिवृत्तिबादरसंपरायः क्षपको नवनोकषायसंज्वलनचतुष्टयानां क्षपणक्रमेण जघन्यस्थितिसंक्रमणकाले जघन्यानुभागसंक्रमं करोति । ज्ञानावरणपञ्चकान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणनिद्राप्रचलारूपदर्शनावरणषट्कानां क्षीणकषायः समयाधिकावलिकाशेषायां स्थितौ वर्तमानो जघन्यानुभागसंक्रमं करोति । 'नियगेत्यादि' दर्शनमोहनीयद्विकस्य सम्यक्त्वसम्यग्मिथ्यात्वरूपस्य क्षपणकाले निजकचरमरसखंडे आत्मीयात्मीयचरमरसखंडसंक्रमणकाले जघन्यानुभागसंक्रमो भवति ॥ ५७ ॥

आऊण जहण्णठिइं बंधिय जावत्थि संकमो ताव । उव्वलणतित्थसंजोयणा य पढमालियं गंतु ॥ ५८ ॥

आऊण त्ति–चतुर्णामप्यायुषां जघन्यां स्थितिं बद्ध्वा, जघन्या हि स्थितिं बध्नन् जघन्यमनुभागं बध्नातीति जघन्यस्थितिग्रहणं । ततो जघन्यां स्थितिं बद्ध्वा बन्धावलिकायाः परतस्तावज्जघन्यानुभागं संक्रमयति यावत्समयाधिकावलिका शेषा भवति । ततो जघन्यां स्थितिं बद्ध्वा यावदस्ति संक्रमस्तावज्जघन्यानुभागसंक्रमः प्राप्यते । तथा नरकद्विकमनुजद्विकदेवद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रलक्षणानामेकविंशत्युद्वलनप्रकृतीनां तीर्थकरस्यानन्तानुबन्धिनां च जघन्यमनुभागं बद्ध्वा प्रथमावलिकां बन्धावलिकालक्षणां गत्वाऽतिक्रम्य, बन्धावलिकायाः परत इत्यर्थः । जघन्यमनुभागं संक्रम-

यति । कः संक्रमयतीति चेदुच्यते–वैक्रियसप्तकदेवद्विकनरकद्विकानामसंज्ञिपञ्चेन्द्रियो, मनुष्यद्विकोच्चैर्गोत्रयोः सूक्ष्मनिगोदः, आहारकसप्तकस्याप्रमत्तः, तीर्थंकरस्याविरतसम्यग्दृष्टिः, अनन्तानुबन्धिनां पश्चात्कृतसम्यक्त्वो मिथ्यादृष्टिः संक्रमयतीति ॥ ५८ ॥

सेसाण सुहुम हयसंतकम्मिगो तस्स हेठ्ठउ जाव । बंधइ तावं एगिंदिउ व णेगिंदिउ वावि ॥ ५९ ॥

सेसाण त्ति–उक्तशेषाणां शुभानामशुभानां वा प्रकृतीनां सप्तनवतिसंख्यानां यः सूक्ष्मैकेन्द्रियो वायुकायिकोऽग्निकायिको वा हतसत्कर्मा, हतं विनाशितं प्रभूतमनुभागसत्कर्म येन स हतसत्कर्मा, स तस्यात्मनःकस्यानुभागसत्कर्मणोऽधस्तात् ततः स्तोकतरमित्यर्थः । अनुभागं तावद्बध्नाति यावदेकेन्द्रियस्तस्मिन्नन्यस्मिन् वा एकेन्द्रियभवे वर्तमानोऽनेकेन्द्रियो वेति स एव हतसत्कर्मा एकेन्द्रियोऽन्यस्मिन् द्वीन्द्रियादिभवे वर्तमानो यावदन्यं बृहत्तरमनुभागं न बध्नाति, तावत्तमेव जघन्यमनुभागं संक्रमयति ॥ ५९ ॥

तदेवमुक्तोऽनुभागसंक्रमः । संप्रति प्रदेशसंक्रमाभिधानावसरः । तत्र चैतेऽर्थाधिकाराः, तद्यथा–सामान्यलक्षणं भेदैः साद्यनादिप्ररूपणा उत्कृष्टप्रदेशसंक्रमस्वामी जघन्यप्रदेशसंक्रमस्वामी च । तत्र सामान्यलक्षणप्रतिपादनार्थमाह–

जं दलियमन्नपगइं निज्जइ सो संकमो पएसस्स । उव्वलणो विज्झाउ अहापवत्तो गुणो सव्वो ॥ ६० ॥

जं ति–यत्संक्रमप्रायोग्यं दलिकं कर्मद्रव्यं अन्यप्रकृतिं नीयते अन्यप्रकृतिरूपतया परिणम्यते स प्रदेशसंक्रमः । उक्तं सामान्यलक्षणं । संप्रति भेदमाह–'उव्वलणो' इत्यादि । प्रदेशसंक्रमः पञ्चधा । तद्यथा–उद्वलनासंक्रमः, विध्यातसंक्रमः,

यथाप्रवृत्तसंक्रमः, गुणसंक्रमः, सर्वसंक्रमश्च । तत्र यथोद्देशं निर्देश इति न्यायात्प्रथमत उद्वलनासंक्रमस्य लक्षणमभिधीयते–इहानन्तानुबन्धिचतुष्टयसम्यक्त्वसम्यग्मिथ्यात्वदेवद्विकनरकद्विकवैक्रियचतुष्काहारकसप्तकमनुजद्विकोच्चैर्गोत्रलक्षणानां सप्तविंशतिप्रकृतीनां प्रथमतः पल्योपमासंख्येयभागमात्रं स्थितिखंडमन्तर्मुहूर्तेन कालेनोत्किरति । ततः पुनरपि द्वितीयं स्थितिखंडं पल्योपमासंख्येयभागमात्रमेव, केवलं प्रथमात् स्थितिखंडात् विशेषहीनमन्तर्मुहूर्तेन कालेनोत्किरति । ततोऽपि तृतीयं स्थितिखंडं पल्योपमासंख्येयभागमात्रं, द्वितीयात् स्थितिखंडात् विशेषहीनमन्तर्मुहूर्तेन कालेनोत्किरति । एवं पल्योपमासंख्येयभागमात्राणि स्थितिखंडानि पूर्वस्मात् पूर्वस्मात् स्थितिखंडाद्विशेषहीनानि तावद्वाच्यानि यावत् द्विचरमं स्थितिखंडं । सर्वाण्यपि च तानि प्रत्येकमन्तर्मुहूर्तेन कालेनोत्कीर्यन्ते । इह च द्विधा प्ररूपणा–अनन्तरोपनिधया परंपरोपनिधया च । तत्रानन्तरोपनिधया प्रथमस्थितिखंडस्य प्रभूता स्थितिः । ततो द्वितीयस्य विशेषहीना । ततोऽपि तृतीयस्य विशेषहीना । एवं यावद्विचरमं स्थितिखंडं । कृताऽनन्तरोपनिधया प्ररूपणा । संप्रति परंपरोपनिधया क्रियते–तत्र प्रथमस्थितिखंडापेक्षया कानिचित् स्थितिखंडानि स्थित्यपेक्षयाऽसंख्येयभागहीनानि, कानिचित्संख्येयभागहीनानि, कानिचित् संख्येयगुणहीनानि, कानिचिदसंख्येयगुणहीनानि । यदा तु प्रदेशपरिमाणं चिन्त्यते, तदा प्रथमस्थितिखंडात् द्वितीयं स्थितिखंडं दलिकापेक्षया विशेषाधिकं । ततोऽपि तृतीयं विशेषाधिकं, एवं तावद्वाच्यं यावत् द्विचरमं स्थितिखंडं । इयमनन्तरोपनिधा । परंपरोपनिधा पुनरियं–प्रथमात् स्थितिखंडाद्दलिकमपेक्ष्य किंचिदसंख्येयभागाधिकं, किंचित्संख्येयभागाधिकं, किंचित्संख्येयगुणाधिकं, किंचिदसंख्येयगुणाधिकं, स्थितिखंडानां चोत्करणविधिरयं–प्रथमसमये स्तोकं

दलिकमुत्किरति । द्वितीये समयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वाच्यं यावदन्तर्मुहूर्तस्य चरमसमयः । गुणकारश्चात्र पल्योपमासंख्येयभागखण्डो वेदितव्यः । एवं सर्वेष्वपि स्थितिखण्डेषु द्रष्टव्यं । दलिकं चोत्कीर्य क्व प्रक्षिप्यत इति चेदुच्यते—किंचित्स्वस्थाने किंचित्परस्थाने । तत्र कियत्प्रक्षिप्यत इति विशेषतो निरूप्यते—प्रथमे स्थितिखण्डे प्रथमसमये यत्कर्मदलिकमन्यप्रकृतिषु प्रक्षिपति तत् स्तोकं । यत् स्वस्थाने एवाधस्तात्प्रक्षिप्यते तत्तोऽसंख्येयगुणं । ततोऽपि द्वितीयसमये यत्स्वस्थाने प्रक्षिप्यते तदसंख्येयगुणं । परप्रकृतिषु पुनर्यत् प्रक्षिप्यते तत्प्रथमसमयपरस्थानप्रक्षिप्ताद्विशेषहीनं । तृतीयसमये यत्स्वस्थाने प्रक्षिप्यते तत् द्वितीयसमयस्वस्थानप्रक्षिप्तादसंख्येयगुणं । यत्पुनः परप्रकृतिषु प्रक्षिप्यते, तत् द्वितीयसमयपरस्थानप्रक्षिप्ताद्विशेषहीनं । एवं तावद्वाच्यं यावदन्तर्मुहूर्तचरमसमयः । एवं सर्वेष्वपि स्थितिखण्डेषु द्विचरमस्थितिखण्डपर्यवसानेषु वाच्यं । संप्रति चरमखण्डस्य विधिरुच्यते—चरमस्थितिखण्डं द्विचरमस्थितिखण्डापेक्षयाऽसंख्येयगुणं तदपि चरमस्थितिखण्डमन्तर्मुहूर्तेन कालेनोत्कीर्यते । तत्र च यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं सर्वं परस्थाने प्रक्षिपति । तद्यथा—प्रथमसमये स्तोकं, द्वितीये समयेऽसंख्येयगुणं, ततोऽपि तृतीयसमयेऽसंख्येयगुणं, एवं यावच्चरमसमयः । चरमसमये तु यत्परप्रकृतिषु प्रक्षिप्यते दलिकं स सर्वसंक्रम उच्यते । तत्र यावत्प्रमाणं द्विचरमस्थितिखण्डसत्कं, कर्मदलिकं चरमसमये परप्रकृतिषु संक्रमयति, तावत्प्रमाणं चरमस्थितिखण्डस्य कर्मदलिकं प्रतिसमयमपह्रियते तर्हि तच्चरमस्थितिखण्डमसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिर्निर्लेपीभवति । एषा कालतो मार्गणा । क्षेत्रतः पुनरियं—यावत्प्रमाणं द्विचरमस्थितिखण्डसत्कं कर्मदलिकं परप्रकृतिषु संक्रमयति, तावत्प्रमाणं कर्मदलिकं चरम-

स्थितिखंडस्य सत्कमेकत्रापह्रियते, अन्यत्र एक आकाशप्रदेशः । एवमपह्रियमाणं चरमस्थितिखंडमंगुलमानक्षेत्रगतप्रदेश-
राशेरसंख्येयतमेन भागेनापह्रियते । अंगुलस्यासंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावन्ति चरमस्थितिखंडे यथो-
क्तप्रमाणानि खंडानि भवन्तीत्यर्थः । यावत्प्रमाणं पुनर्द्विचरमस्थितिखंडस्य कर्मदलिकं स्वस्थाने संक्रमयति, तावत्प्रमाणं
चेच्चरमस्थितिखंडस्य कर्मदलिकं प्रतिसमयमपह्रियते तर्हि तच्चरमं स्थितिखंडं पल्योपमासंख्येयभागमात्रगतैः समयै-
र्निर्लेपीभवति ॥ ६० ॥

तदेवमुक्तमुद्वलनासंक्रमलक्षणं । संप्रत्येतदेव लक्षणं योजयन्नाहारकसप्तकस्योद्वलनासंक्रम कारकमाह—

आहारतणू भिन्नमुहुत्ता अविरइगओ पउवलए। जा अविरतो त्ति उवलइ पल्लभागे असंखतमे ॥ ६१ ॥

आहार त्ति–आहारकसप्तकसत्कर्माऽविरतिर्विरत्यभावं गतः सन् अन्तर्मुहूर्तात्परत आहारकतनूं । इहाहारकग्रहणे-
नाहारकसप्तकं गृहीतं द्रष्टव्यं । तत आहारकसप्तकं । 'पउवलए त्ति' प्रोद्वलयति । कियता पुनः कालेनोद्वलयतीति
चेदुच्यते–यावदविरतिस्तावदुद्वलयति । एतेनाविरतिप्रत्यया आहारकसप्तकस्योद्वलना प्रतिपादिता द्रष्टव्या । अविर-
तिश्चानन्तमपि कालं यावद्भवति, ततो नियममाह–'पल्लभागे असंखतमे' पल्योपमस्यासंख्येयतमेन भागेन सर्वमुद्व-
लयतीत्यर्थः ॥ ६१ ॥

अंतोमुहुत्तमद्धं पल्लासंखिज्जमित्तठिइखंडं । उक्किरइ पुणो वि तहा ऊणूणमसंखगुणहं जा ॥ ६२ ॥

अंतोमुहुत्तं ति–अन्तर्मुहूर्तप्रमाणामद्धां यावदन्तर्मुहूर्तेन कालेनेत्यर्थः । पल्योपमासंख्येयभागमात्रं स्थितिखंडमु-

त्किरति । एष विधिः प्रथमखंडस्य । ततः पुनरपि तथा तेनैव प्रकारेणान्तर्मुहूर्तेन कालेनान्यत् पल्योपमासंख्येयजा-गमात्रं खंडं पूर्वस्मादूनमूनतरमुत्किरति । एवं तावद्वाच्यं यावत् द्विचरमं स्थितिखंडं । तच्च प्रथमस्थितिखंडादसंख्याऽसंख्येयगुणहीनं ॥ ६२ ॥

तं दलियं सत्था(ठा)णे समए समए असंखगुणियाए । सेढीए परठाणे विसेसहाणीए संछुभइ ॥ ६३ ॥

तं ति–तदुत्कीर्यमाणं दलिकं समये समये स्वस्थाने असंख्येयगुणितया श्रेण्या संछुभते प्रक्षिपति। यत्पुनः परस्थाने परप्रकृतौ तद्विशेषहान्या । तद्यथा–प्रथमसमये यत् परप्रकृतौ प्रक्षिपति तत् स्तोकं । यत्पुनः स्वस्थाने स्वाधस्तात् प्रक्षिप्यते, तत्ततोऽसंख्येयगुणं । ततोऽपि द्वितीयसमये यत् स्वस्थाने प्रक्षिप्यते तदसंख्येयगुणं । परप्रकृतिषु पुनर्यत् प्रक्षिप्यते तत्प्रथमसमये परस्थानप्रक्षिप्ताद्विशेषहीनं । एवं तावत्प्रतिसमयं वाच्यं यावदन्तर्मुहूर्तस्य चरमसमयः । एष प्रथमस्थितिखंडस्योत्करणविधिः । एवमन्येषामपि द्रष्टव्यं ॥ ६३ ॥

जं दुचरमस्स चरिमे अन्नं संकमइ तेण सव्वं पि । अंगुलअसंखभागेण हीरए एस उव्वलणा ॥ ६४ ॥

जं ति–द्विचरमस्थितिखंडस्य चरमसमये यत् कर्मदलिकमन्यां प्रकृतिं संक्रमयति, तेन मानेन तावत्प्रमाणेन दलिकेनेत्यर्थः । यदि चरमं स्थितिखंडमपह्रियते । ततः कालतोऽसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते क्षेत्रतः पुनरंगुलमात्रक्षेत्रासंख्येयतमेन भागेन । एषा प्रागुक्ता द्विचरमस्थितिखंडं यावदाहारकसप्तकस्योद्वलना ॥ ६४ ॥

संप्रति चरमस्थितिखंडकस्य वक्तव्यतामाह—

चरमसंखिज्जगुणं अणुसमयमसंखगुणियसेढीए ।
देइ परत्थाणे ए(णेवं)वं संछुभती णि(एव)मवि कसिणो ॥ ६५ ॥

चरमं ति–द्विचरमस्थितिखंडाच्चरमं स्थितिखंडं स्थित्यपेक्षयाऽसंख्येयगुणं । तथा तस्य चरमखंडस्य यत्प्रदेशाग्रं तदुदयावलिकागतं मुक्त्वा शेषं परस्थाने परप्रकृतिषु । अनुसमयं प्रतिसमयं । असंख्येयगुणनया श्रेण्या प्रक्षिपति । तद्यथा–प्रथमसमये स्तोकं, द्वितीयसमयेऽसंख्येयगुणं, तृतीयसमयेऽसंख्येयगुणं, एवं यावच्चरमसमयः । एवममुना प्रकारेण परप्रकृतौ प्रक्षिप्यमाणानां प्रकृतीनां । अपिः संभावने । चरमसमये यः कृत्स्नसंक्रमो भवति स सर्वसंक्रमः । एतेन सर्वसंक्रमस्य लक्षणं प्रतिपादितं द्रष्टव्यं ॥ ६५ ॥

संप्रति वेदकसम्यक्त्वादीनामुद्वलनासंक्रमकारकानाह—

एवं मिच्छद्दिठिस्स वेयगं मीसगं ततो पच्छा । एगिंदियस्स सुरदुगमउ सवेउव्वि निरयदुगं ॥ ६६ ॥

एवं ति–अष्टाविंशतिसत्कर्मा मिथ्यादृष्टिः प्रथमत एवमुपदर्शितेन प्रकारेण सम्यक्त्वमुद्वलयति, ततः सम्यग्मिथ्यात्वं । तथा एकेन्द्रियाहारकसप्तकरहिता या नामकर्मणः पञ्चनवतिप्रकृतयस्तत्सत्कर्मा देवगतिदेवानुपूर्व्यौ पूर्वोक्तेन विधिना युगपदुद्वलयति ततोऽनन्तरं वैक्रियसप्तकं नरकद्विकं च युगपदुद्वलयति ॥ ६६ ॥

सुहुमतसेगो उत्तममउ य नरदुगमहानियट्टिम्मि । तणीनाए निगमे संजोयणविहिजुयले य ॥ ६७ ॥

सुहुम त्ति—सूक्ष्मनामसंज्ञकादिको [illegible] । [illegible] पूर्वोक्तेन [illegible] । [illegible] नरद्विकं मनुजगतिमनुजानुपूर्वीलक्षणं । तदेवं मिथ्यादृष्टेरुत्कृष्टेन प्रतिपादितं । [illegible] प्रतिपाद्य[illegible]—'अनिवृत्ति[illegible] यट्टिम्मि तणीनाए त्ति' [illegible] । [illegible] प्रकृतीनां [illegible] [illegible] कालेन [illegible] मिथ्यादृष्टेः, [illegible] कालेन [illegible] [illegible] । [illegible] प्रकृतीनामनुत्कृष्टा । [illegible] [illegible] [illegible] कालेनोत्कृष्टेति । 'निगमे' इत्यादि, [illegible] [illegible] । संयोजन[illegible] च । [illegible] सप्तमी, संयोजनानामनन्तानुबन्धिनां [illegible] [illegible] च मिथ्यात्व[illegible] पूर्वोक्तविधिना [illegible] कालेना[illegible] ॥ ६७ ॥

तदेवमुक्तस्तावत् [illegible] । सम्प्रति विध्यातसंक्रमस्य [illegible]—

जासि न बंधो गुणभवपच्चयओ तासि होइ विज्झाओ । अंगुलअसंखभागो ऽवहारो तेण संकमइ ॥ ६८ ॥

जासि त्ति—यासां प्रकृतीनां गुणप्रत्ययतो भवप्रत्ययतो वा बन्धो न भवति तासां विध्यातसंक्रमोऽवसेयः । [illegible] गुणप्रत्ययतो [illegible]

दनादिषु गुणप्रत्ययतो बन्धो न भवति । सासादनान्तानां पञ्चविंशतिप्रकृतीनां सम्यग्मिथ्यादृष्ट्यादिषु, अविरतसम्यग्दृष्ट्यन्तानां दशानां देशविरतादिषु, देशविरतान्तानां च चतसृणां प्रमत्तादिषु, प्रमत्तान्तानां षणामप्रमत्तादिषु, गुणप्रत्ययतो बन्धो न भवति । ततस्तासां तत्र तत्र विध्यातसंक्रमः प्रवर्तते । तथा वैक्रियसप्तकदेवद्विकनरकद्विकैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणपर्याप्तातपलक्षणानां विंशतिप्रकृतीनां नैरयिका मिथ्यात्वादिरूपे हेतौ विद्यमानेऽपि भवप्रत्ययतो बन्धका न भवन्ति । नरकद्विकदेवद्विकवैक्रियसप्तकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मापर्याप्तसाधारणानां सप्तदशप्रकृतीनां समस्ता अपि देवा भवप्रत्ययतो बन्धका नोपजायन्ते । एकेन्द्रियजात्यातपस्थावरनाम्नामपि तु सनत्कुमारादयः । संहननपञ्चकसमचतुरस्रवर्जसंस्थानपञ्चकनपुंसकवेदमनुजद्विकौदारिकसप्तकतिर्यगेकान्तयोग्यस्थावरादिप्रकृतिदशकदुर्भगादित्रिकनीचैर्गोत्राप्रशस्तविहायोगतिप्रकृतीनां त्वसंख्येयवर्षायुषः । एवं यस्य यस्य यत् यत् कर्म भवप्रत्ययतो गुणप्रत्ययतो वा न बन्धमायाति तत्तत्तस्य तस्य विध्यातसंक्रमयोग्यं वेदितव्यं । दलिकप्रमाणनिरूपणार्थमिदमाह—'अंगुलेत्यादि' यावत्प्रमाणं कर्मदलिकं प्रथमसमये विध्यातसंक्रमेण परप्रकृतिषु प्रक्षिप्यते, तेन मानेन शेषस्य दलिकस्यापहारे क्रियमाणेऽङ्गुलस्यासंख्येयतमेन भागेनापहारो भवति । इयमत्र भावना—यावत्प्रमाणं प्रथमसमये कर्मदलिकं विध्यातसंक्रमेण प्रकृत्यन्तरे प्रक्षिप्यते, तावत्प्रमाणैः खंडैः शेषं सर्वमपि तत्प्रकृतिगतं दलिकमपह्रियमाणमंगुलमात्रस्य क्षेत्रस्यासंख्येयतमे भागे यावन्त आकाशप्रदेशास्तावत्संख्याकैरपह्रियते । इदं क्षेत्रतो निरूपणं । कालतस्त्वसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपहारः । अयं च विध्यातसंक्रमः प्रायो यथाप्रवृत्तसंक्रमावसाने वेदितव्यः ॥ ६० ॥

इदानीं गुणसंक्रमस्य लक्षणमाह—

गुणसंकमो अबज्झंतिगाण असुभाणपुव्वकरणाई । बंधे अहापवत्तो परित्तिओ वा अबंधे वि ॥ ६९ ॥

गुणसंकमो त्ति—अपूर्वकरणादयोऽपूर्वकरणप्रभृतयोऽबध्यमानानामशुभप्रकृतीनां संबन्धि कर्मदलिकं प्रतिसमयमसंख्येयगुणतया बध्यमानासु प्रकृतिषु यत्प्रक्षिपन्ति स गुणसंक्रमः । गुणेन प्रतिसमयमसंख्येयलक्षणेन गुणकारेण संक्रमो गुणसंक्रमः । तथाहि—मिथ्यात्वातपनारकायुर्वर्जाना मिथ्यादृष्टियोग्याना त्रयोदशानामनन्तानुबन्धितिर्यगायुरुद्योतवर्जानां च सासादनयोग्यानामेकोनविंशतिप्रकृतीनां यतो मिथ्यात्वमनन्तानुबन्धिनश्चापूर्वकरणादौ अत एवाविरतसम्यग्दृष्ट्यादयः क्षपयन्ति । आतपोद्योते च शुभे, अशुभप्रकृतीनां च गुणसंक्रमः, आयुषां च परप्रकृतौ न संक्रमः, ततो मिथ्यात्वादिप्रकृतीनामिह वर्जनं । तथाऽप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टकास्थिराशुभायशःकीर्तिशोकारत्यसातवेदनीयानां सर्वसंख्यया षट्चत्वारिंशत्प्रकृतीनां अशुभानामबध्यमानानामपूर्वकरणादारभ्य गुणसंक्रमो भवति । निद्राद्विकोपघाताशुभवर्णादिनवकहास्यरतिभयजुगुप्सानां त्वपूर्वकरणे स्वस्वबन्धव्यवच्छेदादारभ्य गुणसंक्रमो वेदितव्यः । अपरोऽर्थः—अपूर्वकरणादयोऽपूर्वकरणसंज्ञकरणवर्तिप्रभृतयोऽशुभप्रकृतीनामबध्यमानानां दलिकमसंख्येयगुणतया श्रेण्या बध्यमानासु प्रकृतिषु यत्प्रक्षिपन्ति स गुणसंक्रमः । तेन क्षपणकालेऽनन्तानुबन्धिमिथ्यात्वसम्यग्मिथ्यात्वानामप्यपूर्वकरणादारभ्य गुणसंक्रमः प्रवर्तते । तदेवमुक्तं गुणसंक्रमस्य लक्षणं । संप्रति यथाप्रवृत्तसंक्रमस्य प्रतिपादयति—'बंधे' इत्यादि, ध्रुवबन्धिनीनां प्रकृतीनां बन्धे सति यथाप्रवृत्तसंक्रमः प्रवर्तते । 'परित्तिओ वा' इति, परित्ति अनेन परावर्तमाना• प्रकृतयउच्यन्ते । ता-

मामबन्धेऽपि आस्तां बन्धे इत्यपिशब्दार्थः । यथाप्रवृत्तसंक्रमो भवति । इयमत्र भावना—सर्वेषामपि संसारस्थानामसुमतां ध्रुवबन्धिनीनां बन्धे परावर्तमानप्रकृतीनां तु स्वस्वभवबन्धयोग्यानां बन्धेऽबन्धे वा यथाप्रवृत्त संक्रमो भवति ॥ ६९ ॥

सांप्रतमेतेषामुद्वलनासंक्रमविध्यातसंक्रमगुणसंक्रमयथाप्रवृत्तसंक्रमैरपहारकालस्याल्पबहुत्वमभिधीयते—

थोवोवहारकालो गुणसंकमणेण संखगुणणाए । सेसस्स अहापवत्ते विज्झाए उव्वलणनामे ॥ ७० ॥

थोवो त्ति–उद्वलनासंक्रमाभिधानावसरे यत्प्रागभिहितं चरमखंडं तन्नेयमिहोच्यते । तस्य शेषस्य यदि गुणसंक्रममानेनापहारः क्रियते, ततोऽन्तर्मुहूर्तमात्रेण कालेन सकलमपि तदपह्रियते । ततो गुणसंक्रमेणापहारकालः सर्वस्तोकः । ततो यथाप्रवृत्तसंक्रमेणापहारकालोऽसंख्येयगुणः । यतस्तदेव चरमखंडं यदि यथाप्रवृत्तसंक्रमेणापह्रियते तर्हि पल्योपमासंख्येयभागमात्रेण कालेनापह्रियते । ततो विध्यातसंक्रमेणापहारकालोऽसंख्येयगुणः । यतस्तदेव चरमखंडं यदि विध्यातसंक्रमेणापह्रियते ततोऽसंख्येयाभिरुत्सर्पिण्यवसर्पिणीभिरपह्रियते । ततोऽप्युद्वलनासंक्रमेणापहारकालोऽसंख्येयगुणः । तथाहि–तदेव चरमखंडं द्विचरमस्थितिखंडस्य चरमसमये परप्रकृतौ प्रक्षिप्यते तेन मानेन चेदपह्रियते, ततोऽतिप्रभूताभिरसंख्येयोत्सर्पिण्यवसर्पिणीभिरपह्रियते । ततः पाश्चात्यादयमुद्वलनासंक्रमेणापहारकालोऽसंख्येयगुणः ॥ ७० ॥

इह प्राग्यथाप्रवृत्तसंक्रमस्य कालो नोक्तः, उद्वलनासंक्रमेऽपि यद्विचरमं स्थितिखंडं तस्य चरमसमये स्वस्थाने यत्कर्मदलिकं प्रक्षिप्यते तेन मानेन शेषस्य चरमस्थितिखंडस्यापहारकालो नोक्तस्ततस्तन्निरूपणार्थमाह—

पल्लासंखियभागेणहापवत्तेण सेसगवहारो । उव्वलणेण वि थिबुगो अणुइन्नाए उ जं उदए ॥ ७१ ॥

पञ्च त्ति—उद्वलनासंक्रमे यच्चरमं स्थितिखण्डं तस्य यदि यथाप्रवृत्तसंक्रममानेनापहारः क्रियते, तर्हि पल्योपमासंख्येय-
भागमात्रेण कालेन निःशेषतोऽपहारो भवति । उद्वलनासंक्रमेणापि द्विचरमस्थितिखण्डकस्य चरमसमये यत्स्वस्थाने प्रक्षि-
प्यते दलिकं तेन मानेन चरमस्थितिखण्डस्यापहारकालः पल्योपमासंख्येयभागलक्षणो वेदितव्यः । तत एतौ द्वावपि
तुल्यौ । इहान्योऽपि पञ्चमः स्तिबुकसंक्रमोऽस्ति, परं नासौ संक्रमकरणे गण्यते, करणलक्षणाभावात् । करणं हि सलेश्यं
वीर्यमुच्यते । अयं च लेश्यातीतोऽपि भगवानयोगिकेवली द्विचरमसमये द्विसप्ततिप्रकृतीः स्तिबुकसंक्रमेण संक्रमयति ।
अपि च स्तिबुकसंक्रमेण संक्रान्तं दलिकं न सर्वथा परप्रकृतिरूपतया परिणमते । ततो नासौ संक्रमे गण्यते ।
परमेषोऽपि संक्रम इति संक्रमप्रस्तावात्तल्लक्षणनिरूपणार्थमाह—'थिबुगो' इत्यादि अनुदीर्णाया अनुदयप्राप्तायाः सत्कं यत्क-
र्मदलिकं सजातीयप्रकृतावुदयप्राप्तायां समानकालस्थितौ संक्रमयति संक्रमय्य चानुभवति, यथा मनुजगतावुदयप्राप्तायां
शेषं गतित्रयं एकेन्द्रियजातौ जातिचतुष्टयमित्यादि स स्तिबुकसंक्रमः । एष एव च प्रदेशानुभवः ॥ ७१ ॥

तदेवमुक्तं लक्षणं भेदश्च । संप्रति साद्यनादिप्ररूपणा कर्तव्या । तत्र मूलप्रकृतीनां परस्परं संक्रमो न भवति, तत
उत्तरप्रकृतीनामेव साद्यनादिप्ररूपणामाह—

धुवसंकम अजहन्नो णुक्कोसो तासि वा विवज्जित्तु । आवरणनवगविग्घं ओरालियसत्तगं चेव ॥ ७२ ॥
साइयमाइ चउद्धा सेसविगप्पा य सेसगाणं च । सव्वविगप्पा नेया साई अधुवा पएसम्मि ॥ ७३ ॥

ध्रुवसंक्रम त्ति—प्रागुक्तानां ध्रुवसत्कर्मणां षड्विंशत्युत्तरशतसंख्यानामजघन्यः प्रदेशसंक्रमश्चतुर्धा चतुष्प्रकारः । तद्यथा—

सादिरनादिध्रुवोऽध्रुवश्च । तत्र क्षपितकर्मांशो वक्ष्यमाणलक्षणः क्षपणार्थमभ्युद्यतो ध्रुवसत्कर्मप्रकृतीनां सर्वासामपि जघन्यं प्रदेशसंक्रमं करोति, स च सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स चोपशमश्रेण्यां बन्धव्यवच्छेदे सति सर्वासामपि प्रकृतीनां न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । अनुत्कृष्टोऽपि प्रदेशसंक्रमो ध्रुवसत्कर्मप्रकृतीनां चतुर्धा । किं सर्वासां? नेत्याह—आवरणनवकं ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयलक्षणं, तथाऽन्तरायपञ्चकमौदारिकसप्तकं च वर्जयित्वा शेषस्य पञ्चोत्तरप्रकृतिशतस्य । तथाहि—सर्वासामपि प्रकृतीनां गुणितकर्मांशे वक्ष्यमाणलक्षणे क्षपणार्थमभ्युद्यते उत्कृष्टः प्रदेशसंक्रमः प्राप्यते, नान्यत्र । ततोऽसौ सादिः । तस्मादन्यः सर्वोऽप्यनुत्कृष्टः, स चोपशमश्रेण्यां व्यवच्छिद्यते, ततः प्रतिपाते च भवति, ततोऽसौ सादिः-तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवावभव्यभव्यापेक्षया । 'सेसत्यादि' शेषविकल्पाः पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च ज्ञानावरणीयाद्येकविंशतिप्रकृतीनां जघन्योत्कृष्टानुत्कृष्टाः सादयोऽध्रुवाश्च । तत्र पञ्चोत्तरशतस्य जघन्य उत्कृष्टश्च साद्यध्रुवतया भावित एव ज्ञानावरणीयादीना चोत्कृष्टः प्रदेशसंक्रमो गुणितकर्मांशे मिथ्यादृष्टौ कदाचिल्लभ्यते, शेषकालं त्वनुत्कृष्टः । तत एतौ द्वावपि साद्यध्रुवौ । जघन्यस्तु साद्यध्रुवतया भावित एव । शेषप्रकृतीनां च सर्वेऽप्युत्कृष्टानुत्कृष्टजघन्याजघन्यविकल्पा अध्रुवसत्कर्मत्वात् मिथ्यात्वध्रुवसत्कर्मणोऽपि सदैव पतद्ग्रहामावेर्नीचैर्गोत्रसातासातवेदनीयाना तु परावर्तमानत्वात् सादयोऽध्रुवाश्चावगन्तव्याः ॥ ७२–७३ ॥

तदेवं कृता साद्यनादिप्ररूपणा । साम्प्रतमुत्कृष्टप्रदेशसंक्रमस्वामित्वमभिधातव्यं । तच्च गुणितकर्मांशे लभ्यत इति तन्निरूपणार्थमाह—

जो बायरतसकालेणूणं कम्मठिइं तु पुढवीए । बायर(रि) पज्जत्तापज्जत्तगदीहेयरद्धासु ॥ ७४ ॥

जोगकसाउक्कोसो बहुसो निच्चमवि आउबंधं व । जोगजवेणुवरिल्लठिइनिसेगं बहुं किच्चा ॥ ७५ ॥

जो बायर त्ति–इह द्विधा त्रसाः–सूक्ष्मा बादराश्च । तत्र बादरा द्वीन्द्रियादयः, सूक्ष्मास्तेजोवायुकायिकाः । तत्र सूक्ष्मत्रसव्यवच्छेदार्थं बादरग्रहणं । बादरत्रसानां द्वीन्द्रियादीनां यः कायस्थितिकालः पूर्वकोटीपृथक्त्वाभ्यधिकद्विसहस्र-सागरोपमप्रमाणः, तेनोना कर्मस्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणां यावत् पृथिव्या बादरे बादरपृथिवीकायभवेषु स्थिता । कथं स्थितवेत्यत आह–'पज्जत्तापज्जत्तगदीहेयरद्धासु त्ति' दीर्घेतराभ्यां पर्याप्तापर्याप्तकाद्धाभ्यां योजना-ततोऽयमर्थः–दीर्घाद्धं पर्याप्तभवेषु, इतराद्धं स्तोकाद्धमपर्याप्तभवेषु । प्रभूतेषु पर्याप्तभवेषु स्तोकेषु चापर्याप्तभवेषु स्थितवे-त्यर्थः । तत्रा बहुशोऽनेकवारं । योगकषायोत्कृष्ट उत्कृष्टेषु योगस्थानेषु उत्कृष्टेषु च काषायिकेषु संक्लेशपरिणामेषु वर्तित्वा । इह शेषैकेन्द्रियेभ्यो बादरपृथिवीकायस्य प्रभूतमायुस्तेनाऽत्र ग्रहणं तस्य प्रभूतकर्मपुद्गलोपादानं । बलवत्तया च तस्यातीव वेदनासहिष्णुत्वं । तेन तस्य प्रभूतकर्मपुद्गलपरिशाटो न भवतीति बादरपृथ्वीकायिकग्रहणं । अपर्याप्तभवग्रहणं च परि-पूर्णकायस्थितिपरिग्रहार्थं । तेषां चापर्याप्तकभवानां स्तोकानां पर्याप्तकभवानां च प्रभूतानां ग्रहणं प्रभूतकर्मपुद्गलपरिशा-टाभावप्राप्त्यर्थं, अन्यथा हि निरन्तरमुत्पद्यमानम्रियमाणेषु बहवः पुद्गलाः परिशटन्ति । न च तेन प्रयोजनं । उत्कृष्टेषु

च योगस्थानेषु वर्तमानः प्रभूतं कर्मदलिकमादत्ते, उत्कृष्टसंक्लेशपरिणामश्चोत्कृष्टां स्थितिं बध्नाति प्रभूतां चोद्वर्तयति स्तोकं चापवर्तयति, अतो योगकषायोत्कृष्टग्रहणं । 'निच्चमित्यादि' नित्यं सर्वकालं जं जं आयुर्बन्धकाले जघन्ये योगे वर्तमान आयुर्बन्धं कृत्वा । उत्कृष्टे हि आयुःप्रायोग्ये योगे वर्तमानः प्रभूतानायुःपुद्गलान् आदत्ते, तथास्वाभाव्यात् ज्ञानावरणीयस्य प्रभूतान् पुद्गलान् परिशाटयति । न च तेन प्रयोजनं, अतो जघन्ययोगग्रहणं । तथोपरितनीषु स्थितिषु निषेकं कर्मदलिकस्याल्पं बहु स्वभूमिकानुसारेणातिशयेन प्रभूतं कृत्वा । एवं बादरपृथ्वीकायिकेषु मध्ये पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयन्यूनाः सप्ततिसागरोपमकोटीकोटीः संसृत्य ततो विनिर्गच्छति । विनिर्गत्य च बादरत्रसकायेषु द्वीन्द्रियादिषु मध्ये समुत्पद्यते ॥ ७४–७७ ॥

बायरतसेसु तक्कालमेवमंते य सत्तमखिइए । सव्वलहुंपज्जत्तो जोगकसायाहिओ बहुसो ॥ ७८ ॥

बायर त्ति–एवं पूर्वोक्तेन विधिना–"पज्जत्तापज्जत्तगदीहेयरवासु ॥ जोगकसाउक्कोसो बहुसो निच्चमवि आउबंधं च । जोगजहण्णेणुवरिल्लठिइनिसेगं बहुं किच्चा" इत्येवंरूपेण बादरत्रसेषु तत्कालं बादरत्रसकायस्थितिकालं पूर्वकोटिपृथक्त्वाभ्यधिकसागरोपमसहस्रद्वयप्रमाणं परिभ्रम्य यावतो वारान् सप्तमीं नरकपृथिवीं गन्तुं योग्यो भवति तावतो वारान् गत्वा अन्तिमे सप्तमपृथ्वीनारकभवे वर्तमानः । इह दीर्घजीवित्वं योगकषायोत्कटता च लभ्यत इति यावत्संभवसप्तमनरकपृथ्वीगमनग्रहणं । तथा सप्तमपृथ्वीनारकभवे सर्वलघुपर्याप्तः सर्वेभ्योऽप्यन्येभ्यो नारकेभ्यः शीघ्रं पर्याप्तभावमुपगतः । इहापर्याप्तापेक्षया पर्याप्तस्य योगोऽसंख्येयगुणो भवति । तथा च सति तस्यातीवप्रभूतकर्मपुद्गलोपादानसंभवः । तेन चेह प्रयो-

जनमिति सर्वलघुपर्याप्त इत्युक्तं । बहुशश्चानेकवारं च तस्मिन् भवे वर्तमानो योगकषायाधिक उत्कृष्टानि योगस्थानानि उत्कृष्टांश्च कापायिकान् परिणामविशेषान् गच्छन् ॥ ७६ ॥

जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणो । तिचरिमदुचरिमसमए पूरित्तु कसायउक्कस्सं ॥ ७७ ॥

जोगुक्कोसं चरिमदुचरिमे समए य चरिमसमयम्मि । संपुण्णगुणियकम्मो पगयं तेणेह सामित्ते ॥७८॥

जोग त्ति–योगयवमध्यस्योपरि अष्टसामायिकानां योगस्थानानामुपरीत्यर्थः । अन्तर्मुहूर्तं कालं यावत् स्थित्वा जीवितावसानेऽन्तर्मुहूर्ते आयुषः शेषे । एतदुक्तं भवति–अन्तर्मुहूर्तावशेषे आयुषि योगयवमध्यस्योपरि असंख्येयगुणवृद्ध्याऽन्तर्मुहूर्तं कालं यावत् प्रवर्धमानो भूत्वा । ततः किमित्याह–'तिचरिमेत्यादि' त्रयश्चरमा यस्मात्स त्रिचरमः यत आरभ्यान्तिमः समयस्तृतीयो भवति स त्रिचरम इत्यर्थः । तस्मिन् भवस्य त्रिचरमे द्विचरमे च समये वर्तमान उत्कृष्टं कापायिकं संक्लेशस्थानं पूरयित्वा चरमे द्विचरमे च समये योगस्थानमपि चोत्कृष्टं पूरयित्वा । इहोत्कृष्टो योग उत्कृष्टश्च संक्लेशो युगपदेकमेव समयं यावत् प्राप्यते, नाधिकमिति विषमसमयतया उत्कृष्टयोगोत्कृष्टकषायस्थानग्रहणं । त्रिचरमे द्विचरमे च समये उत्कृष्टसंक्लेशग्रहणं प्रभूतोद्वर्तना स्वल्पा (प) वर्तनाभावा(वना)र्थं, द्विचरमे चरमे च समये उत्कृष्टयोगग्रहणं परिपूर्णप्रदेशोपचयसंभवार्थं । स इत्थंभूतो नारकभवस्य चरमसमये वर्तमानः संपूर्णगुणितकर्मांशो भवति, तेन च संपूर्णगुणितकर्मांशेन इहोत्कृष्टप्रदेशसंक्रमस्वामित्वे प्रकृतमधिकारः ॥ ७७–७८ ॥

तदेवमुक्तो गुणितकर्मांशः । संप्रति स्वामित्वमभिधीयते—

तत्तो उवट्टित्ता आवलिगासमयतब्भवत्थस्स । आवरणविग्घचोद्दसगोरालियसत्त उक्कोसो ॥ ७९ ॥

तत्तो त्ति—स गुणितकर्मांशस्ततः सप्तमपृथ्वीरूपान्नरकादुद्वृत्य पर्याप्तपञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नस्ततस्तद्भवस्य तस्मिन् पर्याप्तसंज्ञिपञ्चेन्द्रियभवे तिष्ठतः प्रथमावलिकाया उपरितने चरमे समये ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकौदारिकसप्तकलक्षणानामेकविंशतिप्रकृतीनामुत्कृष्टप्रदेशसंक्रमो भवति । एतासां हि कर्मप्रकृतीनां नारकभवचरमसमये उत्कृष्टयोगवशात् प्रभूतं कर्मदलिकमात्तं । तच्च बन्धावलिकायामतीतायां संक्रमयति, नान्यथा । अन्यत्र चैतावत् प्रभूतं कर्मदलिकं न प्राप्यत इति आवलिगासमयतब्भवत्थस्सेत्युपात्तं ॥ ७९ ॥

कम्मचउक्के असुभाण बज्झमाणीण सुहुमरागंते । संछोभणंमि नियगे चउवीसाए नियट्टिस्स ॥ ८० ॥

कम्मचउक्के त्ति—कर्मचतुष्के दर्शनावरणवेदनीयनामगोत्रलक्षणे या अशुभाः सूक्ष्मसंपरायावस्थायामबध्यमानाः प्रकृतयो निद्राद्विकासातवेदनीयप्रथमवर्जसंस्थानप्रथमवर्जसंहननाशुभवर्णादिनवकोपघाताप्रशस्तविहायोगत्यपर्याप्तास्थिराशुभदुर्भगदुःस्वरानादेयायशःकीर्तिनीचैर्गोत्रलक्षणा द्वात्रिंशत्प्रकृतयस्तासां गुणितकर्मांशस्य क्षपकस्य सूक्ष्मसंपरायस्यान्ते चरमसमये उत्कृष्टः प्रदेशसंक्रमो भवति । तथाऽनिवृत्तिबादरस्य गुणितकर्मांशस्य क्षपकस्य मध्यमकषायाष्टकस्त्यानर्द्धित्रिकतिर्यग्द्विकद्वित्रिचतुरिन्द्रियजातिसूक्ष्मसाधारणनोकषायषट्करूपाणां चतुर्विंशतिप्रकृतीनां आत्मीय आत्मीये चरमसंछोभे चरमसंक्रमे उत्कृष्टप्रदेशसंक्रमो भवति ॥ ८० ॥

तत्तो अणंतरागयसमयाडक्कस्स सायबंधद्धं । बंधिय असायबंधावलिगंतसमयम्मि सायस्स ॥ ८१ ॥

तत्तो त्ति–ततो नरकभवादनन्तरभवे समागतः प्रथमसमयादारभ्य सातवेदनीयमुत्कृष्टां बन्धाद्धां उत्कृष्टं बन्धकालं यावदित्यर्थः । बद्ध्वा असातवेदनीयं बद्धुमारभते । ततोऽसातवेदनीयस्य बन्धावलिकान्तसमये सातवेदनीयं सकलमपि बन्धावलिकातीतं भवतीति कृत्वा तस्मिन् समयेऽसातवेदनीये बध्यमाने सातं यथाप्रवृत्तसंक्रमे संक्रमयतः सातस्योत्कृष्ट-प्रदेशसंक्रमो भवति ॥ ८१ ॥

संछोभणाए दोण्हं मोहाणं वेयगस्स खणसेसे । उप्पाइय सम्मत्तं मिछत्तगए तमतमाए ॥ ८२ ॥

संछोभणाए त्ति–क्षपकस्य द्वयोर्मोहनीययोर्मिथ्यात्वसम्यग्मिथ्यात्वरूपयोरात्मीयात्मीयचरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति । तथा क्षणशेषेऽन्तर्मुहूर्तावशेषे आयुषि तमस्तमाभिधानायां सप्तमपृथिव्यां वर्तमान औपशमिकं सम्यक्त्वमुत्पाद्य दीर्घेण च गुणसंक्रमकालेन वेदकसम्यक्त्वपुञ्जं समापूर्य सम्यक्त्वात् प्रतिपतितो मिथ्यात्वं च प्रतिपद्य तत्प्रथमसमय एव वेदकसम्यक्त्वस्य मिथ्यात्वे उत्कृष्टं प्रदेशसंक्रमं करोति ॥ ८२ ॥

भिन्नमुहुत्ते सेसे तच्चरमावस्सगाणि किच्चेत्थ । संजोयणा विसंजोयगस्स संछोभणा एसिं ॥ ८३ ॥

भिन्नमुहुत्ते त्ति–स गुणितकर्मांशः सप्तमपृथिव्यां वर्तमानो भिन्नमुहूर्तावशेषे आयुषि तस्मिन् भवे यानि चरमावश्य-कानि–"जोगजवमज्झउवरिं मुहुत्तमच्छित्तु जीवियवसाणे । तिचरिमदुचरिमसमए पूरित्तु कसायउक्कस्सं" इत्यादिलक्षणानि

तानि कृत्वा । तस्याश्च सप्तमपृथिव्या उद्वृत्य सम्यक्त्वं चोत्पाद्य वेदकसम्यग्दृष्टिः सन् । संयोजनान् अनन्तानुबन्धिनो विसंयोजयति । विसंयोजना क्षपणा । तत एवमनन्तानुबन्धिनां चरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति ॥८३॥

ईसाणागयपुरिसस्स इत्थियाए व अट्ठवासाए । मासपुहुत्तब्भहिए नपुंसगे सव्वसंकमणे ॥ ८४ ॥

ईसाणागय त्ति–ईशानदेवो गुणितकर्मांशः संक्लेशपरिणामेनैकेन्द्रियप्रायोग्यं सन् नपुंसकवेदं भूयो भूयो बद्ध्वा तत ईशानाच्च्युतः सन् स्त्री वा पुरुषो वा जातः । ततो मासपृथक्त्वाभ्यधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु क्षपणायोद्यतते । तस्य नपुंसकवेदं क्षपयतश्चरमसंछोभे सर्वसंक्रमेण नपुंसकवेदस्योत्कृष्टः प्रदेशसंक्रमो भवति ॥ ८४ ॥

इत्थीए भोगभूमिसु जीविय वासाणसंखियाणि तओ । हस्सठिई देवत्ता सव्वलहुं सव्वसंछोभे ॥ ८५ ॥

इत्थीए त्ति–भोगभूमिषु भूयो भूयोऽसंख्येयवर्षाणि यावत् स्त्रीवेदं बद्ध्वा ततः पल्योपमासंख्येयभागे गते सति अकालमृत्युना मृत्वा ह्रस्वस्थितिं दशवर्षसहस्रप्रमाणां देवायुषो बद्ध्वा देवत्वेनोत्पन्नः । तत्रापि तमेव स्त्रीवेदमापूर्य स्वायुःपर्यन्ते मनुजेषु मध्येऽन्यतरवेदसहितो जातः । ततो लघु शीघ्रं क्षपणायोद्यतः । ततः 'इत्थीए त्ति' तस्य स्त्रीवेदस्य क्षपणसमये चरमसंछोभे सर्वसंक्रमेणोत्कृष्टः प्रदेशसंक्रमो भवति । इदमेव स्त्रीवेदस्योत्कृष्टमापूरणमुत्कृष्टश्च प्रदेशसंक्रमः केवलज्ञानेनोपलब्धो नान्यथेत्येषैव युक्तिरत्रानुसर्तव्या, न युक्त्यन्तराणि, युक्त्यन्तराणां चिरंतनग्रन्थेष्वदर्शनतो निर्मूलतयाऽन्यथापि कर्तुं शक्यत्वात् । एवमुत्तरत्रापि यथायोगं तथैव केवलज्ञानेनोपलब्धत्वादित्युत्तरमनुसरणीयम् ॥ ८५ ॥

वरिसवरित्थिं पूरिय सम्मत्तमसंखवासियं लहियं । गंता मिच्छत्तमओ जहन्नदेवट्ठिइं भोच्चा ॥ ७८ ॥

वरिसवर त्ति–वर्षवरो नपुंसकवेदः तं ईशानदेवलोके प्रभूतकालमापूर्य भूयो भूयो बन्धेन दलिकान्तरसंक्रमणेन च स्वायुःक्षये ततश्च्युत्वा संख्येयवर्षायुष्केषु मध्ये समागत्य पुनरसंख्येयवर्षायुष्केषु मध्ये समुत्पन्नः । तत्रासंख्येयवर्षाणि यावत् स्त्रीवेदमापूर्य ततोऽसंख्येयवर्षाणि यावत् सम्यक्त्वं लब्ध्वा आस्वाद्य तद्धेतुकं च पुरुषवेदं तावन्ति वर्षाणि यावत् बध्नन् तत्र स्त्रीवेदनपुंसकवेदयोर्दलिकं निरन्तरं संक्रमयति । ततः पल्योपमासंख्येयभागमात्रं सर्वायुःप्रमाणं जीवित्वा पर्यन्ते च मिथ्यात्वमासाद्य ततो जघन्यस्थितिषु दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये समुत्पन्नः । तत्र समुत्पन्नः सन् अन्तर्मुहूर्तेन कालेन सम्यक्त्वं प्रतिपद्यते ॥ ७८ ॥

आगंतु लहुं पुरिसं, संछुभमाणस्स पुरिसवेयस्स । तस्सेव सगे कोहस्स माणमायाणमवि कसिणो ॥ ७९ ॥

आगंतु त्ति–ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नस्ततो माससप्तकान्यधिकेष्वष्टसु वर्षेष्वतिक्रान्तेषु लघु शीघ्रं क्षपणायोद्यतते । केवलं बन्धव्यवच्छेदादर्वाक् आवलिकाद्विकेन कालेन यद्बद्धं पुरुषवेददलिकं तदतीव स्तोकमिति कृत्वा तत्परित्यज्य शेषस्य चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो वेदितव्यः । तथा तस्यैव पुरुषवेदोत्कृष्टप्रदेशसंक्रमस्वामिनः संज्वलनक्रोधस्य संसारं परिभ्रमता उपचितस्य क्षपणकाले प्रकृत्यन्तरदलिकाना गुणसंक्रमेण प्रचुरीकृतस्य स्वके आत्मीये चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो भवति । अत्रापि बन्धव्यवच्छेदादर्वाक् आवलिकाद्विकेन कालेन यद्बद्धं तन्मुक्त्वा शेषस्य चरमसंछोभे उत्कृष्टः प्रदेशसंक्रमो द्रष्टव्यः । एवं मानमाययोरपि वाच्यम् ॥ ७९ ॥

चउरुवसमित्तु खिप्पं लोभजसाणं ससंकमस्संते । सुभधुववंधिगनामा णावलिगं गंतु वंधंता ॥ ८८ ॥

चउर त्ति–अनेकभवभ्रमणेन चतुरो वारान् यावन्मोहनीयमुपशमय्य चतुर्थोपशमनानन्तरं शीघ्रमेव क्षपकश्रेणिं प्रतिपन्नस्य तस्यैव गुणितकर्मांशस्य स्वसंक्रमस्यान्ते चरमसंछोभे इत्यर्थः । संज्वलनलोभयशःकीर्त्योरुत्कृष्टः प्रदेशसंक्रमो भवति । इहोपशमश्रेणिं प्रतिपन्नेन सता प्रकृत्यन्तरदलिकाना प्रभूतानां गुणसंक्रमेण तत्र प्रक्षेपात् द्वे अपि संज्वलनलोभयशःकीर्तिप्रकृती निरन्तरमापूर्यते, तत उपशमश्रेणिग्रहणं । आसंसारं च परिभ्रमता जन्तुना मोहनीयस्य चतुर एव वारान् यावदुपशमः क्रियते, न पञ्चममपि वारं, ततश्चतुरुपशमय्येत्युक्तं । तथा संज्वलनलोभस्य चरमसंछोभोऽन्तरकरणचरमसमये द्रष्टव्यः । न परतः, परतस्तस्य संक्रमाभावात् "अंतरकरणम्मि कए चरित्तमोहे णु(णं)पुव्विसंकमण" इतिवचनात् । यशःकीर्तिरपूर्वकरणगुणस्थानके त्रिंशत्प्रकृतिबन्धव्यवच्छेदसमयेऽवगन्तव्या, परतस्तस्याः संक्रमस्याभावात् । 'सुभेत्यादि' याः शुभध्रुवबन्धिन्यो नामप्रकृतयस्तैजसकार्मणशुक्ललोहितहारिद्रसुरभिगन्धकषायाम्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुनिर्माणलक्षणा विंशतिसंख्याः तासां चतुष्कृत्वो मोहनीयोपशमानन्तरं बन्धान्तात् बन्धव्यवच्छेदादूर्ध्वमावलिकां गन्तुमावलिकायाः परतो यशःकीर्तौ प्रक्षिप्यमाणानामुत्कृष्टः प्रदेशसंक्रमो लभ्यते । इह गुणसंक्रमेण संक्रान्तं प्रकृत्यन्तरदलिकमावलिकायामतीतायां सत्यामन्यत्र संक्रमणयोग्यं भवति, नान्यथेत्यत उक्तं—"आवलियं गंतु वंधंता" इति ॥ ८८ ॥

निद्दसमा य थिरसुभा, सम्मद्दिट्ठिस्स सुभधुवाउ वि । सुभसंघयणजुयाउ, बत्तीससयोदहिचियाउ ८९

निद्धसमत्ति–स्निग्धलक्षणस्पर्शसमे स्थिरशुभनामनी द्रष्टव्ये । इदमुक्तं भवति—यथाऽनन्तरं शुभध्रुवबन्धिनामप्रकृतीनामन्तर्गतस्य स्निग्धस्पर्शस्योत्कृष्टप्रदेशसंक्रमभावना कृता, तथैतयोरपि स्थिरशुभनाम्नोरवगन्तव्या । एते च स्थिरशुभनामनी अध्रुवबन्धित्वात् पृथगुपात्ते । 'सम्मद्दिट्ठिस्सेत्यादि' सम्यग्दृष्टेर्याः शुभध्रुवबन्धिन्यः पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकसुभगसुस्वरादेयलक्षणा द्वादश प्रकृतयः शुभसंहननयुता वज्रर्षभनाराचसंहननसहिताः । वज्रर्षभनाराचं हि देवभवे नारकभवे वा वर्तमानाः सम्यग्दृष्टयो बध्नन्ति, न मनुजतिर्यग्भवे (तत्र) वर्तमानानां सम्यग्दृष्टीनां देवगतिप्रायोग्यबन्धसंभवेन संहननबन्धासंभवात् । ततो नैतत्सम्यग्दृष्टेः शुभध्रुवबन्धीति पृथगुपात्तं । तथा द्वात्रिंशदधिकसागरोपमशतचिताः । तथाहि—षट्षष्टिसागरोपमाणि यावत्सम्यक्त्वमनुपालयन् एता बध्नाति । ततोऽन्तर्मुहूर्तं कालं यावत् सम्यग्मिथ्यात्वमनुभूय पुनरपि सम्यक्त्वं प्रतिपद्यते । ततो भूयोऽपि सम्यक्त्वमनुभवन् षट्षष्टिसागरोपमाणि यावदेताः प्रकृतीर्बध्नातीति । तदेवं द्वात्रिंशदभ्यधिकं सागरोपमशतं यावत् सम्यग्दृष्टिर्भूत्वा आपूर्य, वज्रर्षभनाराचसंहननं तु मनुष्यभवहीनं यथासंभवमुत्कृष्टं कालमापूर्य, ततः सम्यग्दृष्टेर्भूत्वा अपूर्वकरणगुणस्थानके बन्धव्यवच्छेदानन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ संक्रमयतस्तासामुत्कृष्टः प्रदेशसंक्रमः, तदानीं प्रकृत्यन्तरदलिकानामप्यतिप्रभूतानां गुणसंक्रमेण लब्धाना संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् । वज्रर्षभनाराचसंहननस्य तु देवभवाच्च्युतः सन् सम्यग्दृष्टिर्देवगतिप्रायोग्यं बध्नन् आवलिकामात्रं कालमतिक्रम्योत्कृष्टं प्रदेशसंक्रमं करोति ॥ ७९ ॥

पूरित्तु पुवकोडीपुहुत्त संगजगस्स निरयडुगं । देवगइनवगस्स य सगवंधंताविगं गंतुं ॥ ए० ॥

पूरित्तु त्ति–नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणं पूर्वकोटीपृथक्त्वं यावत्पूरयित्वा, नसतु पूर्वकोट्यायुष्केषु तिर्यग्जवेषु जूयो जूयो बद्ध्वेत्यर्थः । ततोऽष्टमजवे मनुष्यो जूत्वा क्षपकश्रेणिं प्रतिपन्नोऽन्यत्र तन्नरकद्विकं संक्रमयन् चरमसंछोत्ते सर्वसंक्रमेण तस्योत्कृष्टं प्रदेशसंक्रमं करोति । तथा देवगतिनवकं देवगतिदेवानुपूर्वीवैक्रियनवकलक्षणं यदा पूर्वकोटिपृथक्त्वं यावदापूर्याष्टमजवे क्षपकश्रेणिं प्रतिपन्नः सन् स्वकबन्धान्तात् स्वबन्धव्यवच्छेदादनन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ प्रक्षिपति तदा तस्योत्कृष्टप्रदेशसंक्रमो जवति । तदानीं हि प्रकृत्यन्तरदलिकानामपि गुणसंक्रमेण लब्धानां संक्रमावलिकातिक्रान्तत्वेन संक्रमः प्राप्यत इति कृत्वा ॥ ए० ॥

सवचिरं सम्मत्तं, अणुपालिय पूरइत्तु मणुयडुगं । सत्तमखिइनिग्गइए, पढमे समए नरडुगस्स ॥ए१॥

सवचिरं ति–सर्वचिरं सर्वोत्कृष्टं कालं अन्तर्मुहूर्तोनानि त्रयस्त्रिंशत्सागरोपमाणीत्यर्थः । सम्यक्त्वमनुपाल्य नारकः सप्तमक्षितौ वर्तमानः सम्यक्त्वप्रत्ययं तावन्तं कालं मनुजद्विकं मनुजगतिमनुजानुपूर्वीलक्षणमापूर्य नक्त्वा चरमेऽन्तर्मुहूर्ते मिथ्यात्वं गतः । ततस्तन्निमित्तं तिर्यग्द्विकं तस्य बध्नतो गुणितकर्मांशस्य सप्तमपृथिव्याः सकाशाद्विनिर्गतस्य प्रथमसमये एव मनुजद्विकं यथाप्रवृत्तसंक्रमेण तस्मिन् तिर्यग्द्विके बध्यमाने संक्रमयतस्तस्य मनुजद्विकस्योत्कृष्टः प्रदेशसंक्रमो जवति॥ए१॥

थावरतज्ञायाया बुज्ञोयाउं नपुंसगसमाउं । आहारगतिज्यरं थिरसममुक्कस्स समकालं ॥ ए२ ॥

थावर त्ति—स्थावरनाम तथा तज्जातिः स्थावरजातिः एकेन्द्रियजातिरित्यर्थः। तथा आतपनाम, उद्योतनाम । एताश्च-तस्रः प्रकृतयो नपुंसकसमा, नपुंसकवेदस्येव आसामपि प्रकृतीनामुत्कृष्टः प्रदेशसंक्रमो भावनीय इत्यर्थः । तथा आहारकसप्तकं तीर्थंकरनाम च स्थिरसमं वक्तव्यं । केवलं तदुत्कृष्टस्वकबन्धकालं यावदापूरणीयमभिधातव्यं । इयमत्र भावना—आहारकसप्तकं तीर्थंकरनाम चोत्कृष्टं स्वबन्धकालं यावदापूर्य तत्राहारकसप्तकस्य स्वबन्धकाल उत्कृष्टो देशोना पूर्वकोटीं यावत्संयममनुपालयतो यावानप्रमत्तताकालस्तावान् सर्वो वेदितव्यः । तीर्थंकरनाम्नश्च स्वबन्धकाल उत्कृष्टो देशोनपूर्वकोटीद्वयाभ्यधिकानि त्रयस्त्रिंशत्सागरोपमाणि । तत एतावन्तं कालं यावदापूर्य क्षपकश्रेणिं प्रतिपन्नो यदा बन्धव्यवच्छेदादनन्तरमावलिकामात्रं कालमतिक्रम्य यशःकीर्तौ संक्रमयति, तदा तयोरुत्कृष्टः प्रदेशसंक्रमः ॥ ९२ ॥

चउरुवसमित्तु मोहं मिच्छत्तगयस्स नीयबंधंतो । उच्चागोउक्कोसो तत्तो लहुसिज्झउ होइ ॥ ९३ ॥

चउ त्ति—इह मोहोपशमं कुर्वन् उच्चैर्गोत्रमेव बध्नाति, न नीचैर्गोत्रं । नीचैर्गोत्रसत्कानि च दलिकानि गुणसंक्रमेणोच्चैर्गोत्रे संक्रमयति । ततश्चतुष्कृत्वो मोहोपशमग्रहणमवश्यं कर्तव्यं । तत्र चतुरो वारान् मोहनीयमुपशमयन् उच्चैर्गोत्रं च बध्नन् तत्र नीचैर्गोत्रं गुणसंक्रमेण संक्रमयति । चतुष्कृत्वश्च मोहोपशमः किल भवद्वयेन भवति । ततस्तृतीये भवे मिथ्यात्वं गतः सन् नीचैर्गोत्रं बध्नाति, तच्च बध्नन् तत्रोच्चैर्गोत्रं संक्रमयति । ततः पुनरपि सम्यक्त्वमासाद्योच्चैर्गोत्रं बध्नन् तत्र नीचैर्गोत्रं संक्रमयति । एवं भूयो भूय उच्चैर्गोत्रं नीचैर्गोत्रं च बध्नतो नीचैर्गोत्रबन्धव्यवच्छेदानन्तरं शीघ्रमेव सिद्धिं गन्तुकामस्य नीचैर्गोत्रबन्धचरमसमये उच्चैर्गोत्रस्य गुणसंक्रमेण बन्धेन चोपचितीकृतस्योत्कृष्टः प्रदेशसंक्रमो भवति ॥ ९३ ॥

तदेवमुक्तमुत्कृष्टप्रदेशसंक्रमस्वामित्वं । संप्रति जघन्यप्रदेशसंक्रमस्वामित्वमभिधानीयं । तच्च प्रायः क्षपितकर्मांशो प्राप्यत इति तस्यैव स्वरूपमाह—

पल्लासंखियभागेण कम्मठिइमच्छिउं निगोएसु । सुहुमेसऽभवियजोग्गं जहन्नयं कट्टु निग्गम्म ॥ ७४ ॥
जोग्गेससंखवारे सम्मत्तं लभिय देसविरयं च । अट्ठक्खुत्तो विरइं संजोयणहा य तइवारे ॥ ७५ ॥
चउरुवसमित्तु मोहं लहुं खवेंतो भवे खवियकम्मो । पाएण तहिं पगयं पडुच्च काइं वि सविसेसं ॥ ७६ ॥

पल्ल त्ति–यो जीवः पल्योपमासंख्येयभागन्यूनां कर्मस्थितिं सप्ततिसागरोपमकोटीकोटीप्रमाणां यावत् पल्योपमासंख्येयभा-
गहीनं सप्ततिसागरोपमकोटीकोटीप्रमाणं कालं यावदित्यर्थः। सूक्ष्मनिगोदेषु सूक्ष्मानन्तकायिकेषु मध्ये उषित्वा। सूक्ष्मनिगोदा
हि स्वल्पायुषो भवन्ति, ततस्तेषां प्रभूतजन्ममरणभावेन वेदनार्तानां प्रभूतपुद्गलपरिसाट उपजायते। अपि च सूक्ष्मनिगोद-
जीवानां मन्दयोगता मन्दकषायत्वं च भवति । ततोऽभिनवकर्मपुद्गलोपादानमपि तेषां स्तोकतरमेव प्राप्यत इति सूक्ष्मनि-
गोद(जीवानां मन्दयोग)ग्रहणं "अभवियजोग्गं जहन्नयं कट्टु निग्गम्म त्ति" अभव्यप्रायोग्यं जघन्यं अभव्यप्रायोग्यजघन्य-
कल्पं प्रदेशसंचयं कृत्वा ततः सूक्ष्मनिगोदेभ्यो निर्गत्य योग्येषु सम्यक्त्वदेशविरतिसर्वविरतियोग्येषु त्रसेषु मध्ये उत्पद्य पल्यो-
पमासंख्येयभागमध्ये संख्यातीतान् वारान् यावत् सम्यक्त्वं स्वल्पकालिकीं देशविरतिं च लब्ध्वा। कथं लब्धेति चेदु-
च्यते–सूक्ष्मनिगोदेभ्यो निर्गत्य बादरपृथ्वीकायेषु मध्ये समुत्पन्नस्ततोऽन्तर्मुहूर्तेन कालेन विनिर्गत्य मनुष्येषु पूर्वकोट्यायु-

ष्केषु मध्ये समुत्पन्नः। तत्रापि शीघ्रमेव माससप्तकानन्तरं योनिविनिर्गमनेन जातः। ततोऽष्टवार्षिकः सन् संयमं प्रतिपन्नः। ततो देशोनां पूर्वकोटीं यावत् संयममनुपाल्य स्तोकावशेषे जीविते सति मिथ्यात्वं प्रतिपन्नस्ततो मिथ्यात्वेनैव कालगतः सन् दशवर्षसहस्रप्रमाणस्थितिषु देवेषु मध्ये देवत्वेनोपजातः। ततोऽन्तर्मुहूर्तमात्रे गते सति सम्यक्त्वं प्रतिपद्यते। ततो दशवर्षसहस्राणि जीवित्वा तावन्तं च कालं सम्यक्त्वमनुपाल्य पर्यवसानावसरे मिथ्यात्वेन कालगतः सन् बादरपृथिवीकायिकेषु मध्ये समुत्पन्नः। ततोऽन्तर्मुहूर्तेन ततोऽप्युद्धृत्य मनुष्येषु मध्ये समुत्पद्यते। ततः पुनरपि सम्यक्त्वं वा देशविरतिं वा सर्वविरतिं, वा प्रतिपद्यते। एवं देवमनुष्यभवेषु सम्यक्त्वादि गृह्णन् मुञ्चंश्च तावद्वक्तव्यो यावत्पल्योपमासंख्येयभागमध्ये संख्यातीतान् वारान् यावत् सम्यक्त्वलाभः स्वल्पकालिकश्च देशविरतिलाभो भवति। इह यदा यदा सम्यक्त्वादिप्रतिपत्तिस्तदा तदा बहुप्रदेशाः प्रकृतीरल्पप्रदेशाः करोति। ततो बहुशः सम्यक्त्वादिप्रतिपत्तिग्रहणं। एतेषु च सम्यक्त्वादियोग्येषु भवेषु मध्येऽष्टौ वारान् सर्वविरतिं प्रतिपद्यते तावत एव वारानष्टौ वारानित्यर्थः। विसंयोजनहा अनन्तानुबन्धिविघातको भूत्वा। तथा चतुरो वारान्मोहनीयमुपशमय्य ततोऽन्यस्मिन् भवे लघु शीघ्रं कर्माणि क्षपयन् क्षपितकर्मांश इत्यभिधीयते। एतेन च क्षपितकर्मांशेनेह जघन्यप्रदेशसंक्रमस्वामित्वे चिन्त्यमाने प्रायेण बाहुल्येन प्रकृतमधिकारः। काश्चित्पुनः प्रकृतीरधिकृत्य सविशेषं भणिष्यामि ॥ ९४–९५–९६ ॥

तत्र जघन्यप्रदेशसंक्रमस्वामित्वमाह—

आवरणसत्तगम्मि उ सहोहिणा तं विणोहिजुयलम्मि। निद्दादुगंतराइयहासचउक्के य बंधंते ॥९७॥

आवरण त्ति—अवधिना सह वर्तते यो जीवः तस्य अवधिज्ञानावरणरहितं ज्ञानावरणचतुष्टयं, अवधिदर्शनावरणरहितं दर्शनावरणत्रयं, एतासां सप्तानां प्रकृतीनामात्मीयात्मीयबन्धव्यवच्छेदसमये यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति। अवधिज्ञानमुत्पादयन् प्रभूतान् कर्मपुद्गलान् परिशाटयति स। तत एतासां स्वस्वबन्धव्यवच्छेदसमये स्तोका एव पुद्गलाः प्राप्यन्ते। अत्रापि च जघन्यप्रदेशसंक्रमेणाधिकारः, ततोऽवधिना सह यो वर्तेत इत्युक्तं। तथा तमवधि विनाऽवधिज्ञानावधिदर्शनरहित इत्यर्थः। अवधियुगले अवधिज्ञानावरणावधिदर्शनावरणरूपे स्वस्वबन्धव्यवच्छेदसमये जघन्यः प्रदेशसंक्रमो भवति। अवधिज्ञानमवधिदर्शनं चोत्पादयतः प्रबलक्षयोपशमभावतोऽवधिज्ञानावरणावधिदर्शनावरणयोरतीव रूक्षाः कर्मपुद्गला जायन्ते। ततो बन्धव्यवच्छेदकालेऽपि प्रभूताः परिशटन्ति। तथा च सति जघन्यः प्रदेशसंक्रमो न लभ्यत इति तं विनेत्युक्तं। 'निद्देत्यादि' निद्राद्विकं निद्राप्रचलारूपं, अन्तरायपञ्चकं, हास्यचतुष्कं हास्यरतिभयजुगुप्सालक्षणं, एतासामेकादशप्रकृतीनां स्वबन्धान्तसमये यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति। निद्राद्विकहास्यचतुष्टययोर्बन्धव्यवच्छेदानन्तरं गुणसंक्रमेण संक्रमो जायते। ततः प्रभूतं दलिकं लभ्यते। अन्तरायपञ्चकस्य बन्धव्यवच्छेदानन्तरं संक्रम एव न भवति, पतद्ग्रहाप्राप्तेः, ततो बंधांतसमयग्रहणं ॥ ८७ ॥

सायस्स णुवसमित्ता असायबंधाण चरिमबंधंते। खवणाए लोभस्स वि अपुव्वकरणालिगाअंते ॥८८॥

सायस्स त्ति—अनुपशमय्य मोहनीयोपशममकृत्वा, उपशमश्रेणिमकृत्वेत्यर्थः। असातबन्धानां मध्ये यश्चरमोऽसातबन्धस्तस्यान्तिमे समये वर्तमानस्य क्षपणायोद्यतस्य सातस्य जघन्यः प्रदेशसंक्रमो भवति। परतो हि सातस्य पतद्ग्रहता

जवति, न संक्रमः । 'खवणाए' इत्यादि, मोहनीयोपशममकृत्वा क्षपणायोद्यतस्यापूर्वकरणाद्धायाः प्रथमावलिकाया अन्तसमये संज्वलनलोजस्य जघन्यः प्रदेशसंक्रमः । परतो गुणसंक्रमे लब्धस्यातिप्रजूतस्य दलिकस्य संक्रमावलिकातिक्रान्तत्वेन संक्रमसंजवात् जघन्यप्रदेशसंक्रमाजावः ॥ ए८ ॥

अयरठावठिइगं गालिय थीवेयथीणगिद्धितिगे । सगखवणहापवत्तस्संत एमेव मिछत्ते ॥ एए ॥

अयर त्ति–सागरोपमाणा द्वे षट्षष्टी यावत्सम्यक्त्वमनुपालयन् स्त्रीवेदस्त्यानर्द्धित्रिकलक्षणाश्चतस्रः प्रकृतीर्गालयित्वा तासां संबन्धि प्रजूतं कर्मदलिकं परिसाट्य किञ्चिच्छेषाणां सतीनां तासां क्षपणाय समन्युद्यतस्य यथाप्रवृत्तकरणान्तिमसमये विध्यातसंक्रमेण जघन्यः प्रदेशसंक्रमो जवति । परतोऽपूर्वकरणे गुणसंक्रमेण प्रजूतकर्मदलिकसंक्रमसंजवात् जघन्यप्रदेशसंक्रमो न लभ्यत इति यथाप्रवृत्तकरणान्तसमयग्रहणं । 'एमेव मिछत्त इति' एवमेव पूर्वोक्तेनैव प्रकारेण मिथ्यात्वस्य जघन्यः प्रदेशसंक्रमोऽवगन्तव्यः । तद्यथा–द्वे षट्षष्टी सागरोपमाणां यावत्सम्यक्त्वमनुपाल्य तावन्तं कालं मिथ्यात्वं गालयित्वा किञ्चिच्छेषस्य मिथ्यात्वस्य क्षपणाय समुद्यतस्य स्वकीययथाप्रवृत्तकरणान्तसमये वर्तमानस्य विध्यातसंक्रमेण मिथ्यात्वस्य जघन्यः प्रदेशसंक्रमो जवति, परतो गुणसंक्रमः प्रवर्तते, तेन स न प्राप्यते ॥ एए ॥

हस्सगुणसंकमद्धाए पूरयित्ता समीससम्मत्तं । चिरसंमत्ता मिछत्तगयस्सुवलणथोगो सिं ॥ १०० ॥

हस्स त्ति–सम्यक्त्वमुत्पाद्य ह्रस्वया गुणसंक्रमाद्धया स्तोककालेन गुणसंक्रमेणेत्यर्थः । समिश्रं सम्यक्त्वं सम्यक्त्वसम्यग्मिथ्यात्वे इत्यर्थः । मिथ्यात्वदलेन पूरयित्वा आपूर्य चिरेण प्रजूतेन कालेन सम्यक्त्वान्मिथ्यात्वं गतस्य द्वे षट्षष्टी

सागरोपमाणां यावत्सम्यक्त्वमनुपाल्य मिथ्यात्वं गतस्येत्यर्थः । पल्योपमासंख्येयभागमात्रेण कालेन ते सम्यक्त्वसम्य-ग्मिथ्यात्वे उद्वलयतः स्तोके उद्वलनसंक्रमे तयोर्जघन्यः प्रदेशसंक्रमो द्विचरमखंडस्य चरमसमये सम्यक्त्वसम्यग्मिथ्या-त्वयोर्यद्दलिकं परस्थाने मिथ्यात्वप्रकृतिरूपे प्रक्षिप्यते स तयोर्जघन्यः प्रदेशसंक्रम इत्यर्थः ॥ १०० ॥

संजोयणाण चतुरुवसमित्तु संजोजइत्तु अप्पद्धं । अयरच्छावट्ठिदुगं पालिय सकइप्पवत्तंते ॥ १०१ ॥

संजोयणाण त्ति–चतुरो वारान् मोहनीयमुपशमय्य, चतुष्कृत्वो मोहनीयोपशमनेन किं प्रयोजनमिति चेदुच्यते–प्र-भूतपुद्गलपरिसाटः । तथाहि–चारित्रमोहनीयप्रकृतीनामुपशमं कुर्वन् स्थितिघातरसघातगुणश्रेणिगुणसंक्रमैः प्रभूतान् पुद्गलान् परिसाटयतीति । ततश्चतुष्कृत्वो मोहनीयोपशमं कृत्वा मिथ्यात्वं गच्छति । मिथ्यात्वं गतश्च सन् अल्पाद्धां अल्पं कालं यावत् संयोजनान् संयोज्यानन्तानुबन्धिनो बद्ध्वा, तदानीं च चारित्रमोहनीयदलिकं स्वल्पमेव विद्यते, चतुष्कृत्वो मोहोपशमकाले तस्य स्थितिघातादिभिर्घातितत्वात् । ततोऽनन्तानुबन्धिनो बध्नन् तेषु यथाप्रवृत्तसंक्रमेण स्तोकमेव चारित्रमोहनीयदलिकं संक्रमयति । ततोऽन्तर्मुहूर्ते गते सति पुनरपि सम्यक्त्वं प्रतिपद्यते । तच्च द्वे षट्षष्टी सागरोपमाणां यावदनुपाल्यानन्तानुबन्धिनां क्षपणाय समुद्यतते । तस्य स्वकयथाप्रवृत्तकरणान्तसमये तेषामनन्तानुब-न्धिनां विध्यातसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति । परतोऽपूर्वकरणे गुणसंक्रमः प्रवर्तते इति स न प्राप्यते ॥ १०१ ॥

अट्ठकसायासाए य असुभधुवबंधि अच्छिरतिगे य । सव्वलहुं खवणाए अहापवत्तस्स चरिमम्मि ॥१०२॥

अट्ठ त्ति–अप्रत्याख्यानप्रत्याख्यानावरणरूपा अष्टौ कषायाः, असातवेदनीयं, अशुभध्रुवबन्धिन्यः कुवर्णादिनवकोप-

घातरूपाः, अस्थिरनिकं अस्थिराशुभायशःकीर्तिसंज्ञं, एतासां द्वाविंशतिप्रकृतीनां कषायाष्टकरहिताना । ' सयलहं ति ' सर्वेभ्योऽन्येभ्यः शीघ्रमेव क्षपणायोद्यतस्य मासपृथक्त्वाभ्यधिकेषु अष्टसु वर्षेष्वतिक्रान्तेषु क्षपणायोद्यतस्येत्यर्थः । अष्टौ कषायान् प्रति देशोनां पूर्वकोटीं यावत् संयममनुपाल्य । पञ्चसंग्रहे पुनः सर्वा अप्येताः प्रकृतीरधिकृत्य देशोनां पूर्वकोटीं यावत् संयममनुपालयेदित्युक्तं । क्षपकश्रेणिं प्रतिपन्नस्य यथाप्रवृत्तकरणचरमसमये कषायाष्टकस्य विध्यातसंक्रमेण शेषाणां यथाप्रवृत्तसंक्रमेण जघन्यः प्रदेशसंक्रमो भवति ॥ १०२ ॥

पुरिसे संजलणतिगे य घोलमाणेण चरमबद्धस्स । सगअंतिमे असाएण समा अरई य सोगो य ॥१०३॥

पुरिसे त्ति–पुरिसे इत्यादौ षष्ठ्यर्थे सप्तमी । पुरुषवेदस्य संज्वलनत्रिकस्य च क्रोधमानमायारूपस्य क्षपणाय समुद्यतेन क्षपणश्रेणिं प्रतिपन्नेन स्वस्वबन्धचरमसमये । ' घोलमाणेणं ति ' जघन्ययोगिना यद्बद्धं दलिकं तस्य चरमसंछोभे जघन्यः प्रदेशसंक्रमो भवति । तथाहि–आसां चतसृणामपि प्रकृतीनां बन्धव्यवच्छेदसमये समयोनावलिकाद्विकबद्धं मुक्त्वाऽन्यत् प्रदेशसत्कर्म न विद्यते । तदपि च प्रतिसमयं संक्रमेण क्षयमुपगच्छति तावत् यावच्चरमसमयबद्धस्यान्त्यसंछोभो भागः शेषो भवति । ततस्तं सर्वसंक्रमेण संक्रमयतो जघन्यः प्रदेशसंक्रमः । ' असाएण समा अरई य सोगो य त्ति ' अरतिशोकावसातसमौ असातवेदनीयस्येवारतिशोकयोर्जघन्यः प्रदेशसंक्रमो भावनीय इत्यर्थः ॥ १०३ ॥

वेउव्विक्कारसगं उव्वलियं बंधिऊण अप्पद्धं । जिट्ठठिई निरयाउ उव्वट्टित्ता अबंधित्तु ॥ १०४ ॥

थावरगयस्स चिरउव्वलणे एयस्स एव उच्चस्स । मणुयदुगस्स य तेउसु वाउसु वा सुहुमबद्धाणं ॥१०५॥

वेउव्वि त्ति–देवद्विकनरकद्विकवैक्रियसप्तकलक्षणं वैक्रियैकादशकं एकेन्द्रियभवे वर्तमानेनोद्वलितं पुनरपि पञ्चेन्द्रियत्वमुपागतेन सता । अद्धाच्छेदकालं अन्तर्मुहूर्तकालं यावद्बध्नाति । ततो ज्येष्ठस्थितिरुत्कृष्टस्थितिस्त्रयस्त्रिंशत्सागरोपमस्थितिक इत्यर्थः । सप्तमनरकपृथिव्यां नारको जातः । ततस्तावन्तं कालं यावत् यथायोगं तद्वैक्रियैकादशकमनुभूय ततो नरकादुद्वृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः । तत्र च तद्वैक्रियैकादशकमबद्ध्वा स्थावरैकेन्द्रियेषु मध्ये समुत्पन्नः । तस्य चिरोद्वलनया पल्योपमासंख्येयभागमात्रेण कालेनोद्वलनया तदुद्वलयतो यत् द्विचरमखण्डस्य चरमसमये प्रकृत्यन्तरे दलिकं संक्रामति, स तस्य वैक्रियैकादशकस्य जघन्यः प्रदेशसंक्रमः । 'एवमेतस्येत्यादि' एतस्यैवानन्तरोक्तस्य जीवस्य पूर्वोक्तेन विधिना तेजोवायुषु मध्ये समागतस्य सूक्ष्मैकेन्द्रियभवे वर्तमानेन यदुच्चैर्गोत्रं मनुजद्विकं च मनुजगतिमनुजानुपूर्वीलक्षणं । ते चिरोद्वलनयोद्वलयतो द्विचरमखण्डस्य चरमसमये परप्रकृतौ यद्दलिकं संक्रामति स तयोर्जघन्यः प्रदेशसंक्रमः । इयमत्र भावना–मनुजद्विकमुच्चैर्गोत्रं च प्रथमतस्तेजोवायुभवे वर्तमानेनोद्वलितं, पुनरपि सूक्ष्मैकेन्द्रियभवमुपागतेनान्तर्मुहूर्तं यावद्बद्धं, ततः पञ्चेन्द्रियभवं गत्वा सप्तमनरकपृथिव्यामुत्कृष्टस्थितिको नारको जातः । तत उद्वृत्य पञ्चेन्द्रियतिर्यक्षु मध्ये समुत्पन्नः । एतावन्तं च कालमबद्ध्वा प्रदेशसंक्रमेण चानुभूय तेजोवायुषु मध्ये समागतः । तस्य मनुजद्विकोच्चैर्गोत्रे चिरोद्वलनयोद्वलयतो द्विचरमखण्डस्य चरमसमये परप्रकृतौ यद्दलं संक्रामति स तयोर्जघन्यः प्रदेशसंक्रमः ॥ १०४–१०५ ॥

हस्सं कालं बंधिय विरओ आहारसत्तगं गंतुं । अविरइ महुव्वलंतस्स जा थोव उव्वलणा ॥ १०६ ॥

हस्सं ति-ह्रस्वं कालं स्तोकं कालं यावत् विरतोऽप्रमत्तसंयतः सन् आहारकसप्तकं बद्ध्वा कर्मोदयपरिणतिवशात् पुनरप्यविरतिं गतः । ततोऽन्तर्मुहूर्तात्परतो महोद्वलनया चिरोद्वलनया पल्योपमासंख्येयभागप्रमाणेन कालेनोद्वलनयोद्वलयतः सतो या स्तोकोद्वलना द्विचरमखंडस्य चरमसमये यत्कर्मदलिकं परप्रकृतिषु प्रक्षिप्यते, सा स्तोकोद्वलना, सा आहारकस्य जघन्यः प्रदेशसंक्रमः ॥ १०६ ॥

तेवट्ठिसयं उदहीण स चउपल्लाहियं अबंधित्ता । अंते अहप्पवत्तकरणस्स उज्जोवतिरियदुगे ॥१०७॥

तेवट्ठिसयं ति-त्रिषष्ट्यधिकमुदधिशतं सागरोपमाणां शतं चतुष्पल्योपमाधिकं च यावत् स क्षपितकर्मांशः सर्वजघन्यतिर्यग्द्विकोद्योतसत्कर्मा उद्योततिर्यग्द्विकं अबद्ध्वा यथाप्रवृत्तकरणस्यान्ते चरमसमये उद्योततिर्यग्द्विकयोर्जघन्यं प्रदेशसंक्रमं करोति । कथं त्रिषष्ट्यधिकं सागरोपमाणां शतं चतुःपल्याधिकं च यावदबद्धेति चेदुच्यते-स क्षपितकर्मांशस्त्रिपल्योपमायुष्केषु मनुजेषु मध्ये समुत्पन्नस्तत्र देवद्विकमेव बध्नाति, न तिर्यग्द्विकं, नाप्युद्योतं । तत्र चान्तर्मुहूर्ते शेषे सत्यायुषि सम्यक्त्वमवाप्य ततोऽप्रतिपतितसम्यक्त्व एव पल्योपमस्थितिको देवो जातः । ततोऽप्यप्रतिपतितसम्यक्त्वो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः । ततस्तेनैवाप्रतिपतितेन सम्यक्त्वेन सहित एकत्रिंशत्सागरोपमस्थितिको ग्रैवेयकेषु मध्ये देवो जातः । तत्र चोत्पत्त्यनन्तरमन्तर्मुहूर्तादूर्ध्वं मिथ्यात्वं गतः । ततोऽन्तर्मुहूर्तावशेषे आयुषि पुनरपि सम्यक्त्वं लभते । ततो द्वे षट्षष्टी सागरोपमाणां यावन्मनुष्यानुत्तरसुरादिषु सम्यक्त्वमनुपाल्य तस्याः सम्यक्त्वाद्धाया अन्तर्मुहूर्ते

शेषे शीघ्रमेव क्षपणाय समुद्यतः । ततोऽनेन विधिना त्रिषष्ट्यधिकं सागरोपमाणां शतं चतुष्पल्याधिकं च यावत्तिर्यग्द्विक-मुद्योतं च बन्धरहितं नयतीति ॥ १०७ ॥

इगविगलिंदियजोग्गा अट्ठ पज्जत्तगेण सह तेसिं। तिरियगइसमं नवरं पंचासीउदहिसयं तु ॥१०८॥

इग त्ति–एकेन्द्रियविकलेन्द्रिययोग्या अष्टौ याः प्रकृतय एकद्वित्रिचतुरिन्द्रियजातिस्थावरातपसूक्ष्मसाधारणलक्षणाः । तासामपर्याप्तकसहितानां नवानां प्रकृतीनां तिर्यग्गतिसमं वक्तव्यं । नवरमत्र पञ्चाशीत्यधिकं सागरोपमशतं चतुष्पल्याधिकं यावदवबन्धेति वक्तव्यं । कथमेतावन्तं कालं यावदबन्ध इति चेदुच्यते–इह क्षपितकर्मांशो द्वाविंशतिसागरोपमस्थितिकः षष्ठपृथिव्यां नारको जातः । तत्राप्यन्तर्मुहूर्तावशेषे आयुषि सम्यक्त्वं प्राप्तवान् । ततोऽप्रतिपतितसम्यक्त्व एव मनुष्यो जातः । ततस्तेनाप्रतिपतितेन सम्यक्त्वेन देशविरतिमनुपाल्य चतुःपल्योपमस्थितिकः सौधर्मदेवलोके देवो जातः । ततस्तेनापतितेन सम्यक्त्वेन सह देवभवाच्च्युत्वा मनुष्यो जातः । तस्मिंश्च मनुष्यभवे संयममनुपाल्य ग्रैवेयके-ष्वेकत्रिंशत्सागरोपमस्थितिको देवो जातः । तत्र चोत्पत्त्यनन्तरमन्तर्मुहूर्तादूर्ध्वं मिथ्यात्वं गतः । ततोऽन्तर्मुहूर्तावशेषे आयुषि भूयोऽपि सम्यक्त्वं प्रतिपद्यते । ततो द्वे षट्षष्टी सागरोपमाणां यावत् सम्यक्त्वमनुपाल्य तस्याः सम्यक्त्वाद्धाया अन्तर्मुहूर्ते शेषे क्षपणाय समुद्यतते । तदेवं पञ्चाशीत्यधिकं सागरोपमशतं चतुःपल्याधिकं यावत्पूर्वोक्तानां नवप्रकृतीनां बन्धाभावः ॥ १०८ ॥

छत्तीसाए सुभाणं सेढिमणारुहिय सेसगविहीहिं। कट्टु जहन्नं खवणं अपुव्वकरणालिया अंते ॥१०९॥

बत्तीसाए त्ति–श्रेणिमनारुह्योपशमश्रेणिमकृत्वा शेषैर्विधिभिः क्षपितकर्मांशसत्कैः षट्त्रिंशत्संख्यानां शुभप्रकृतीनां पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानवज्रर्षभनाराचसंहननतैजससप्तकप्रशस्तविहायोगतिशुक्ललोहितहारिद्रसुरभिगन्धकषाया-म्लमधुरमृदुलघुस्निग्धोष्णागुरुलघुपराघातोच्छ्वासत्रसादिदशकनिर्माणलक्षणानां जघन्यं प्रदेशाग्रं कृत्वा क्षपणायोद्यतस्य क्षपितकर्मांशस्यापूर्वकरणसत्कायाः प्रथमावलिकाया अन्ते चरमसमये तासां जघन्यः प्रदेशसंक्रमो भवति । तत ऊर्ध्वं तु गुणसंक्रमेण लब्धस्यातिप्रभूतस्य दलिकस्य संक्रमावलिकातिक्रान्तत्वेन संक्रमसंभवात् स न प्राप्यते । पञ्चसंग्रहे तु वज्रर्षभनाराचवर्जितानां शेषाणां पञ्चत्रिंशत्प्रकृतीनामेवापूर्वकरणप्रथमावलिकान्ते जघन्यः प्रदेशसंक्रम उक्तः । वज्रर्षभ-नाराचसंहननस्य तु स्वबन्धव्यवच्छेदसमये इति ॥ १०९ ॥

सम्मद्दिट्ठिअजोग्गाण सोलसण्हं पि असुभपगईणं । थीवेएण सरिसगं नवरं पढमं तिपल्लेसु ॥११०॥

सम्मद्दिट्ठि त्ति–सम्यग्दृष्टेरयोग्यानां षोडशानामशुभप्रकृतीनां प्रथमवर्जसंस्थानप्रथमवर्जसंहननाप्रशस्तविहायोगतिदु-र्भगदुःस्वरानादेयनपुंसकवेदनीचैर्गोत्रलक्षणाना स्त्रीवेदेन सदृशं वक्तव्यं । यथा प्राक् स्त्रीवेदस्य जघन्यप्रदेशसंक्रमभा-वना कृता तथात्रापि कर्तव्या । नवरमेतासा जघन्यप्रदेशसंक्रमस्वामी प्रथमं त्रिपल्योपमायुष्केषु मनुष्येषु मध्ये समुत्पन्नो वक्तव्य । अन्तर्मुहूर्तावशेषे चायुषि प्राप्तसम्यक्त्वः । शेषं तथैव वक्तव्यम् ॥ ११० ॥

नरतिरियाण तिपल्लस्संते ओरालियस्स पाउग्गा । तित्थयरस्स य बंधा जहन्नओ आलिगं गंतु ॥१११॥

नर त्ति–नरतिरश्चां त्रिपल्योपमस्यान्ते औदारिकस्य प्रायोग्याः प्रकृतयो जघन्यप्रदेशसंक्रमयोग्याः । इयमत्र भावना–

यो जीवः सकलान्यजीवापेक्षया सर्वजघन्यौदारिकसत्कर्मा सन् त्रिपल्योपमायुष्केषु तिर्यग्मनुष्येषु मध्ये समुत्पन्नः, तस्यौदारिकसप्तकमनुभवतो विध्यातसंक्रमेण परप्रकृतौ संक्रमयतश्च स्वायुषश्चरमसमये तस्यौदारिकसप्तकस्य जघन्यः प्रदेशसंक्रमो भवति । औदारिकस्य प्रायोग्या उक्तौदारिकसप्तक । 'तित्थयरस्सेत्यादि' तीर्थकरनामकर्मणो बन्धं कुर्वता प्रथमसमये बद्धं दलिकं तत् बन्धावलिकातीतं सत् यदा परप्रकृतिषु यथाप्रवृत्तसंक्रमेण संक्रमयति तदा तीर्थकरनाम्नो जघन्यः प्रदेशसंक्रमो भवति । तदेवमुक्तः प्रदेशसंक्रमः । तदुक्तौ च समर्थितं संक्रमकरणम् ॥ १११ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायां संक्रमकरणम् ॥

तदेवमुक्तं संक्रमकरणं । संप्रत्युद्देशक्रमेणोद्वर्तनापवर्तने वक्तुमवसरप्राप्ते । ते च द्वे अपि स्थित्यनुञागविषये । तत्र प्रथमतः स्थितेरुद्वर्तनापवर्तने वक्तव्ये । स्थितौ सत्यामनुञागसंञवात् । तत्राप्युद्देशक्रमप्रामाण्यानुसरणात् प्रथमतः स्थितेरुद्वर्तनामेवाह—

उव्वट्टणा ठिईए उदयावलियाएँ बाहिरठिईणं । होइ अबाहा अइत्थावणाउ जा वालिया हस्सा ॥१॥

उव्वट्टण त्ति–स्थितेरुद्वर्तना उदयावलिकाया बाह्यानां स्थितीनामवगन्तव्या । उदयावलिका तु सकलकरणायोग्येति कृत्वा सा प्रतिषिध्यते । अपि च बध्यमानप्रकृतेर्यावती अबाधा तया तुल्या वा हीना वा पूर्वबद्धप्रकृतीनां या स्थितिः सा नोद्वर्त्यते, सा उत्पाट्य तत ऊर्ध्वं बध्यमानप्रकृतेरबाधाया उपरि न निक्षिप्यत इत्यर्थः, अबाधाकालान्तःप्रविष्टत्वात् । या पुनरबाधाकालादुपरितनी सा उद्वर्त्यत एव । तदेवमबाधान्तःप्रविष्टाः सर्वा अपि स्थितय उद्वर्तनामधिकृत्यातिक्रमणीया ञवन्ति परित्याज्या ञवन्तीत्यर्थः । अतिक्रमणीयस्थितिप्रमाणनिरूपणार्थमेवाह—'होइ इत्यादि' ञवति अबाधा अतीत्थापना उल्लङ्घनीया । एषोत्कर्षतोऽतीत्थापना । सा च हीना हीनतरा तावदवगन्तव्या यावत् ह्रस्वा जघन्याऽतीत्थापना आवलिका आवलिकामात्रा ञवति । इयमत्र ञावना–अबाधान्तर्गतं कर्मदलिकमुद्वर्तनायोग्यं न ञवति, किं त्वबाधायाः परत एव । तथा च सति यैवोत्कृष्टाऽबाधा सैवोत्कृष्टाऽतीत्थापना, समयोना उत्कृष्टाऽबाधा समयोनोत्कृष्टाऽतीत्थापना, द्विसमयोनोत्कृष्टाऽबाधा द्विसमयोनोत्कृष्टाऽतीत्थापना । एवं समयसमयहान्याऽतीत्थापना तावद्वाच्या यावज्जघन्याऽबाधाऽन्तर्मुहूर्तप्रमाणा । ततोऽपि जघन्यतराऽतीत्थापना आवलिकामात्रं ञवति । तच्चोदयावलिकालक्ष-

एमवसेयं । तथाहि—उदयावलिकान्तर्गताः स्थितयो नोद्वर्त्यन्ते "उवट्टणा ठिईए उदयावलियाए बाहिरठिईणं" इतिवचनात् । ननु यदा तदा वा बन्धे सत्युद्वर्तना प्रवर्त्यते "आबाधा उक्कड्डइ" इतिवचनात्, तत उदयावलिकागताः स्थितयोऽबाधान्तर्गतत्वेन नोद्वर्तिष्यन्ते, किमुदयावलिकाग्रहणेन ? तदयुक्तं, अभिप्रायापरिज्ञानात् । अबाधान्तर्गताः स्थितयो नोद्वर्त्यन्त इति किमुक्तं भवति ? अबाधान्तर्गताः स्थितयः स्वस्थानादुत्पाट्याबाधाया उपरि न निक्षिप्यन्ते । अबाधाया मध्ये पुनस्तासां वक्ष्यमाणक्रमेणोद्वर्तनानिक्षेपौ प्रवर्तमानौ न विरुध्येते । तत उदयावलिकान्तर्गता अप्युद्वर्तनीयाः प्राप्नुवन्तीति प्रतिषिध्यन्ते ॥ १ ॥

संप्रति निक्षेपप्ररूपणार्थमाह—

आवलियअसंखभागाइ जाव कम्मठिइ त्ति निक्खेवो । समउत्तरालियाए साबाहाए भवे ऊणे ॥२॥

आवलिय त्ति–इह निक्षेपो द्विधा–जघन्य उत्कृष्टश्च । तत्रावलिकाया असंख्येयभागमात्रासु स्थितिषु यः कर्मदलिकनिक्षेपः स जघन्यः । तथाहि–सर्वोत्कृष्टात् स्थित्यग्रादध आवलिकामावलिकाया असंख्येयं च भागमधोऽवतीर्य ततोऽधस्तनी या स्थितिस्तस्या दलिकमतीत्थापनावलिकामात्रमतिक्रम्योपरितनीष्वेनावलिकाया असंख्येयभागभाविनीषु स्थितिषु निक्षिप्यते, नावलिकाया मध्येऽपि, तथास्वाभाव्यात् । ततोऽसौ जघन्यो दलिकनिक्षेपः । एवं च सति आवलिकाया असंख्येयतमेन भागेनाधिकास्वावलिकामात्रासु स्थितिषु उद्वर्तनं न भवतीति सिद्धं । तथा च सत्युत्कृष्टस्थितिबन्धे उद्वर्तनायोग्याः स्थितयो बन्धावलिकामबाधामुपरितनीमावलिकामसंख्येयभागाधिकां मुक्त्वा शेषा एव द्रष्टव्याः ।

तथाहि—बन्धावलिकान्तर्गतं सकलकरणायोग्यमिति कृत्वा बन्धावलिकान्तर्गताः स्थितयो नोद्वर्तनायोग्याः । तथाऽबाधान्तर्गता अपि नोद्वर्तनायोग्याः, तासामतीत्थापनात्वेन प्राक् प्रतिपादितत्वात् । असंख्येयभागाधिकावलिकामात्रभाविन्यश्चोपरितन्यः स्थितयः प्रागुक्तयुक्तेरेव नोद्वर्तनायोग्याः । इदानीं निक्षेपश्चिन्त्यते । तत्र यदावलिकामावलिकाया असंख्येयभागं चोपरिष्टादधोऽवतीर्य द्वितीयाऽधस्तनी स्थितिरुद्वर्त्यते, तदा समयाधिक आवलिकाया असंख्येयभागो निक्षेपविषयः । यदा तु तृतीया स्थितिरुद्वर्त्यते तदा द्विसमयाधिकः । एवं समयवृद्ध्या तावद्दलिकनिक्षेपो वर्धते यावदुत्कृष्टो भवति । स च कियान् भवतीति चेदुच्यते—'समयेत्यादि' समयाधिकावलिकयाऽबाधया च हीना सर्वा कर्मस्थितिः । तथाहि—अबाधोपरिस्थस्थितीनामुद्वर्तना भवति । तत्राप्यबाधाया उपरितने स्थितिस्थाने उद्वर्त्यमानेऽबाधाया उपरि दलिकनिक्षेपो भवति, नाबाधाया मध्येऽपि, उद्वर्त्यमानदलिकस्योद्वर्त्यमानस्थितेरूर्ध्वमेव निक्षेपात् । तत्राप्युद्वर्त्यमानस्थितेरुपरि आवलिकामात्राः स्थितीरतिक्रम्योपरितनीषु स्थितिषु सर्वासु दलिकनिक्षेपो भवति । अतोऽतीत्थापनावलिकामुद्वर्त्यमानां च समयमात्रां स्थितिमबाधां च वर्जयित्वा शेषा सर्वापि कर्मस्थितिरुत्कृष्टो दलिकनिक्षेपविषयः । उक्तं च पञ्चसंग्रहमूलटीकायां—समयोत्तरावलिकया साबाधया हीना यावदुत्कृष्टा कर्मस्थितिस्तावद्दलिकनिक्षेपो भवति । यतोऽबाधोपरिस्थस्थितीनामुद्वर्तना भवति सापि अतीत्थापनामुल्लंघ्योद्वर्त्यमानायामपि स्थितौ न दलिकनिक्षेपो भवति । अतः समयाधिकावलिकाबाधावर्जितासु शेषासु सर्वासु स्थितिषु दलिकनिक्षेपो भवतीति । तदेवमबाधाया उपरितनं समयमात्रमुद्वर्त्यमानं स्थितिस्थानमधिकृत्योत्कृष्टो दलिकनिक्षेपविषयः प्राप्यते । सर्वोपरितनं तु

स्थितिस्थानमुद्वर्त्यमानमपेक्ष्य जघन्यो दलिकनिक्षेपविषयः । उक्तं च—" आवलीयवरिमाणगदल्वं पडुचेइ परमनिक्खेवो। चरिमुवट्टणगाणं, पडुच्च इह जायइ जहण्णो ॥ १ ॥" इति ॥ २ ॥

एषोऽव्याघाते दलिकनिक्षेपविधिरुक्तः, व्याघाते पुनरेवं—

निव्वाघाएणेवं वाघाए संतकम्महिगबंधो । आवलिअसंखभागादि होइ अइत्थावणा नवरं ॥ ३ ॥

निव्वाघाएण त्ति–एवं पूर्वोक्तेन प्रकारेण दलिकनिक्षेपो निर्व्याघातेन व्याघाताभावेन द्रष्टव्यः । व्याघाते पुनः प्राक्तन-स्थितिसत्कर्मापेक्षयाऽभ्यधिकाभिनवकर्मबन्धरूपे आवलिकाऽसंख्येयभागादिकाऽतीत्थापना भवति । निक्षेपोऽप्याव-लिकागतासंख्येयभागादिकः । इयमत्र भावना–प्राक्तनसत्कर्मस्थित्यपेक्षया समयादिनाभ्यधिको योऽभिनवकर्मबन्धः स व्याघात उच्यते । तस्मिन् सत्यतीत्थापना आवलिकासंख्येयभागादिका भवति । तथाहि–प्राक्तनसत्कर्मस्थितेः सकाशात् समयमात्रेणाभ्यधिकेऽभिनवकर्मबन्धे सति प्राक्तनसत्कर्मणोऽन्त्या वा द्विचरमा वा स्थितिर्नोद्वर्त्यते । एवं समयद्वयेन समयत्रयेण यावदावलिकाया असंख्येयतमेनापि भागेनाभ्यधिकेऽभिनवकर्मबन्धे द्रष्टव्यं । यदा पुनर्द्वा-भ्यामावलिकाया असंख्येयतमाभ्यां भागाभ्यामभ्यधिकोऽभिनवकर्मबन्ध उपजायते तदा प्राक्तनसत्कर्मणोऽन्त्या स्थिति-रुद्वर्त्यते । उद्वर्त्य चावलिकायाः प्रथममसंख्येयतमं भागमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते । एतावतीत्था-पनानिक्षेपौ जघन्यौ । यदा पुनः समयाधिकाभ्यां द्वाभ्यामावलिकाया असंख्येयतमाभ्यां भागाभ्यामधिकोऽभिनवक-र्मबन्धस्तदा आवलिकायाः प्रथममसंख्येयतमं भागं समयाधिकमतिक्रम्य द्वितीयेऽसंख्येयतमे भागे निक्षिप्यते । एवम-

भिनवकर्मबन्धस्य समयादिवृद्ध्यावतीत्थापना प्रवर्धते । सा च तावद्यावदावलिका परिपूर्णा भवति । निक्षेपस्तु सर्वत्रापि तावन्मात्र एव भवति । तत ऊर्ध्वं पुनरभिनवकर्मबन्धवृद्धौ निक्षेप एव केवलो वर्धते, नातीत्थापना । यावच्चाभिनवकर्मबन्ध: प्राक्तनस्थितिसत्कर्मणः सकाशात् द्वाभ्यामावलिकाया असंख्येयतमाभ्यां भागाभ्यामधिको न भवति तावत् प्राक्तनसत्कर्मणश्चरमस्थितेरध आवलिकामसंख्येयभागाधिकामतिक्रम्य ततोऽधस्तनीरेव स्थितीरुद्वर्तयति । तत्रापि यदा आवलिकामसंख्येयभागाधिकामतिक्रम्य ततोऽनन्तरामेवाधस्तनीं स्थितिमुद्वर्तयति, तदा आवलिकामतिक्रम्योपरितने आवलिकाया असंख्येयतमे भागे निक्षिपति । यदा तु द्वितीयामधस्तनीं स्थितिमुद्वर्तयति तदा समयाधिकेऽसंख्येयतमे भागे निक्षिपति । एवंप्रकारेण द्रष्टव्यं । संप्रत्यल्पबहुत्वमुच्यते—या जघन्याऽतीत्थापना यश्च जघन्यो निक्षेप, एतौ द्वावपि सर्वस्तोकौ परस्परं च तुल्यौ । यतो द्वावप्येतौ आवलिकासत्कासंख्येयतमभागमात्रौ, ताभ्याममसंख्येयगुणोत्कृष्टाऽतीत्थापना, तस्या उत्कृष्टाबाधारूपत्वात् । ततोऽप्युत्कृष्टो निक्षेपोऽसंख्येयगुण', यतोऽसौ समयाधिकावलिकयाऽबाधया च हीना सर्वा कर्मस्थितिः । ततोऽपि सर्वा कर्मस्थितिर्विशेषाधिका ॥ ३ ॥

तदेवमुक्ता स्थित्युद्वर्तना, संप्रति स्थित्यपवर्तनामाह—

उवट्टंतो य ठिइं उदयावलिबाहिरा ठिइविसेसा । निक्खिवइ तइयभागे समयाहिए सेसमइवइय ॥४॥
वड्ढइ तत्तो अतित्थावणा उ जावालिगा हवइ पुन्ना । ता निक्खेवो समयाहिगालिग दुगूण कम्मठिई ५

उवट्टंतो त्ति—स्थितिमपवर्तयन् उदयावलिकाया बाह्यान स्थितिविशेषान् स्थितिभेदानपवर्तयति । के ते स्थितिविशेषा

इति चेदुच्यते-उदयावलिकाया उपरि समयमात्रा स्थितिः द्विसमयमात्रा एवं तावद्वाच्यं यावद्बन्धावलिकोदयावलिका-
हीना सर्वा कर्मस्थितिः। एते स्थितिविशेषाः। उदयावलिकाया गता च स्थितिः सकलकरणायोग्येति कृत्वा तां नाप-
वर्तयति। तत उक्तं उदयावलिकाबाह्यानिति। कुत्र निक्षिपतीति चेदत आह-निक्षिपति आवलिकायास्त्रिभागे तृतीये
भागे समयाधिके। शेषं समयोनमुपरितनं त्रिभागद्वयमतिक्रम्य। इयमत्र भावना-उदयावलिकाया उपरितनी या
स्थितिस्तस्या दलिकमपवर्तयन् उदयावलिकाया उपरितनौ द्वौ त्रिभागौ समयोनावतिक्रम्याधस्तने समयाधिके तृतीये
भागे निक्षिपति। एष जघन्यो निक्षेपः जघन्या चातीत्थापना। यदोदयावलिकाया उपरितनी द्वितीया स्थितिरपवर्त्यते
तदाऽतीत्थापना प्रागुक्तप्रमाणा समयाधिका भवति। निक्षेपस्तु तावन्मात्र एव। यदा तूदयावलिकाया उपरितनी
तृतीया स्थितिरपवर्त्यते तदाऽतीत्थापना प्रागुक्तप्रमाणा द्विसमयाधिका भवति, निक्षेपस्तु तावन्मात्र एव। एवमतीत्था-
पना प्रतिसमयं तावद्वृद्धिमुपनेतव्या यावदावलिका परिपूर्णा भवति। ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव
भवति, निक्षेपस्तु वर्धते, स च तावद्यावद्बन्धावलिकातीत्थापनावलिकारहिता अपवर्त्यमानस्थितिरहिता च सकलापि
कर्मस्थितिः। तथाहि—बन्धावलिकायामतीतायां सत्यां कर्मापवर्तयितुमारभते। तत्रापि च यदा सर्वोपरितनं स्थिति-
स्थानमपवर्तयति, तदावलिकामात्रमधोऽवतीर्याधस्तनेषु सर्वेष्वपि स्थितिस्थानेषु निक्षिपति। तस्मादुत्कृष्टो निक्षेपोऽपव-
र्त्यमानस्थितिसमयरहिता बन्धावलिकातीत्थापनावलिकारहिता च सर्वापि कर्मस्थितिः। उक्तं च—" समयाहिअइत्थ-
वणा बंधावलिया य मोत्तु निक्खेवो। कम्मट्ठिई बंधोदय आवलिया मुत्तु उक्कोसं ॥ १ ॥ " कर्मस्थितिं बन्धावलिकामु-

दयावलिकां च मुक्त्वा शेषां सर्वामपि अपवर्तयतीत्यर्थः । तदेवमुदयावलिकाया उपरितनं समयमात्रं स्थितिस्थानं प्रतीत्य प्रवर्तमानायामपवर्तनायां समयाधिकावलिकात्रिभागो निक्षेपः प्राप्यते । स च सर्वजघन्यः सर्वोपरितनं च स्थितिस्थानं प्रतीत्य प्रवर्तमानायामपवर्तनायां यथोक्तरूप उत्कृष्टो निक्षेपः । उक्तं च-" उदयावलिमुपरिल्लं ठाणं अहि-गिच्च होइ अइहीणो । निक्खेवो सव्वोवरि ठिइठाणवसा भवे परमो ॥ १ ॥ " ॥ ४-५ ॥

एष निर्व्याघातेऽपवर्तनाविधिरुक्तः, संप्रति व्याघाते तमाह—

वाघाए समऊणं कंडगमुक्कस्सिया अइत्थवणा । डायठिई किंचूणा ठिइकंडुक्कस्सगपमाणं ॥ ६ ॥

वाघाए त्ति-अत्र व्याघातो नाम स्थितिघातः तस्मिन् सति, तं कुर्वत इत्यर्थः । समयोनं कण्डकमात्रमुत्कृष्टाऽतीत्था-पना । कथं समयोनमिति चेदुच्यते-उपरितनेन समयमात्रेण स्थितिस्थानेनापवर्त्यमानेन सहाधस्तात् कण्डकमतिक्रम्यते । ततस्तेन विना कण्डकं समयोनमेव भवति । कण्डकमानमाह-' डायठिई ' इत्यादि, यस्याः स्थितेरारभ्य तस्या एव प्रकृ-तेरुत्कृष्टं स्थितिबन्धमाधत्ते । ततः प्रभृति सर्वापि स्थितिर्डायस्थितिरित्युच्यते । उक्तं च पञ्चसंग्रहमूलटीकायां-"यस्याः स्थितेरारभ्योत्कृष्टं स्थितिबन्धं विधत्ते निर्मापयति, तस्या आरभ्योपरितनानि सर्वाण्यपि स्थितिस्थानानि डायस्थितिसं-ज्ञानि भवन्ति " । सा डायस्थितिः किंचिदूना कंडकस्योत्कृष्टं प्रमाणं, पञ्चसंग्रहे पुनरेवं मूलटीकाकृता व्याख्या कृता-" सा डायस्थितिरुत्कर्षतः किंचिदूना किंचिदूनकर्मस्थितिप्रमाणा । तथाहि—अन्तःकोटीकोटीप्रमाणं स्थितिबन्धं कृत्वा पर्याप्तसंज्ञिपञ्चेन्द्रिय उत्कृष्टसंक्लेशवशादुत्कृष्टां स्थितिं विधत्ते इति । सा डायस्थितिः किंचिदूनकर्मस्थितिप्रमाणा कण्डकस्यो-

त्कृष्टं प्रमाणमिति"। एतच्चोत्कृष्टं कण्डकं समयमात्रेणापि न्यूनं कण्डकमुच्यते। एवं समयद्वयेन समयत्रयेण एवं तावन्-
न्न्यूनं वाच्यं यावत्तत्पल्योपमासंख्येयभागमात्रप्रमाणं भवति। तच्च जघन्यं कण्डकं। इदं च समयोनं जघन्या व्याघातेऽ-
तीत्थापना। संप्रत्यल्पबहुत्वमुच्यते—तत्रापवर्तनायां जघन्यो निक्षेपः सर्वस्तोकः। तस्य समयाधिकावलिकात्रिभागमा-
त्रत्वात्। ततोऽपि जघन्यातीत्थापना द्विगुणा त्रिसमयोना। कथं त्रिसमयोनं द्विगुणत्वमिति चेदुच्यते—व्याघातमन्त-
रेण जघन्याऽतीत्थापना आवलिकात्रिभागद्वयं समयोनं भवति। आवलिका चासत्कल्पनया नवसमयप्रमाणा कल्प्यते।
ततस्त्रिभागद्वयं समयोनं पञ्चसमयप्रमाणमवगन्तव्यं। निक्षेपोऽपि जघन्यः समयाधिकावलिकात्रिभागरूपोऽसत्कल्प-
नया चतुःसमयप्रमाणो द्विगुणीकृतस्त्रिसमयोनः सन् एतावानेव भवतीति। ततोऽपि व्याघातं विनोत्कृष्टाऽतीत्थापना
विशेषाधिका, तस्याः परिपूर्णावलिकामात्रत्वात्। ततो व्याघाते उत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, किञ्चिदूनकर्मस्थि-
तिप्रमाणत्वात्तस्याः। ततोऽप्युत्कृष्टो निक्षेपो विशेषाधिकः, तस्य समयाधिकावलिकाद्विकोनसकलकर्मस्थितिप्रमाण-
त्वात्। ततः सर्वा कर्मस्थितिर्विशेषाधिका। संप्रत्युद्वर्तनापवर्तनयोः संयोगेनाल्पबहुत्वमुच्यते। तत्रोद्वर्तनाया व्याघाते
जघन्यातीत्थापनानिक्षेपौ सर्वस्तोकौ, स्वस्थाने तु परस्परं तुल्यौ, आवलिकाऽसंख्येयभागमात्रत्वात्। ततोऽपवर्तनायां
जघन्यो निक्षेपोऽसंख्येयगुणः, तस्य समयाधिकावलिकात्रिभागमात्रत्वात्। ततोऽप्यपवर्तनायामेव जघन्यातीत्थापना
द्विगुणा त्रिसमयोना। अत्र भावना प्रागेव कृता। ततोऽप्यपवर्तनायामेव व्याघातं विनोत्कृष्टाऽतीत्थापना विशेषाधिका,
तस्याः परिपूर्णावलिकाप्रमाणत्वात्। तत उद्वर्तनायामुत्कृष्टातीत्थापना संख्येयगुणा, तस्या उत्कृष्टाबाधारूपत्वात्।

ततोऽपवर्तनायां व्याघाते उत्कृष्टाऽतीत्थापनाऽसंख्येयगुणा, तस्याः किंचिदूनडायस्थितिप्रमाणत्वात् । तत उद्वर्तनाया-मुत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽप्यपवर्तनायामुत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽपि सर्वा स्थितिर्विशेषाधिका ॥६॥

तदेवमुक्ते स्थित्युद्वर्तनापवर्तने, संप्रत्यनुभागोद्वर्तनापवर्तने वाच्ये । तत्र प्रथमतोऽनुभागोद्वर्तनामाह-

चरमं नोवट्टिज्जइ जावाणंताणि फड्डगाणि ततो । उस्सक्किय उक्कड्ढइ एवं उव्वट्टणाईउ ॥ ७ ॥

चरमं ति-चरमं स्पर्धकं नोद्वर्त्यते, नापि द्विचरमं । एवं तावद्वाच्यं यावच्चरमात्स्पर्धकादधोऽनन्तानि स्पर्धकानि । इद-मत्र तात्पर्य-यो जघन्यो निक्षेप आवलिकाया असंख्येयभागः सर्वोपरितनो या च तस्याध आवलिकामात्रातीत्थापना तत्स्थितिस्थानगतानि स्पर्धकानि सर्वाण्यपि नोद्वर्त्यन्ते, किंतु तेभ्योऽवष्टक्याधस्तादवतीर्य यानि स्पर्धकानि समयमात्र-स्थितिगतानि तान्युद्वर्तयति । तानि चोद्वर्त्यावलिकामात्रस्थितिगतानि अनन्तानि स्पर्धकान्यतिक्रम्योपरितनेष्वेवाव-लिकासत्कासंख्येयभागमात्रगतेषु स्पर्धकेषु निक्षिपति । यदा पुनरधोऽवतीर्य द्वितीयसमयमात्रस्थितिगतानि स्पर्धकान्यु-द्वर्तयति तदावलिकामात्रस्थितिगतानि स्पर्धकान्यतिक्रम्योपरितनेषु समयाधिकावलिकासत्कासंख्येयभागमात्रगतेषु स्पर्ध-केषु निक्षिपति। एवं यथा यथाऽधोऽवतरति तथा तथा निक्षेपो वर्धते। अतीत्थापना पुनः सर्वत्रापि आवलिकामात्रस्थिति-गतान्येव स्पर्धकानि । कियान् पुनरुत्कृष्टो निक्षेपविषय इति चेदुच्यते-बन्धावलिकायामतीतायां समयाधिकावलिका-बाधागतानि स्पर्धकानि व्यतिरिच्य शेषाणि सर्वाण्यपि निक्षेपविषयः । तथाहि-अबाधागतानि स्पर्धकानि नोद्वर्त्यन्ते। उद्वर्त्यमानानि च समयमात्रस्थितिगतानि स्पर्धकानि न तत्रैव निक्षिपति । आवलिकामात्रगतानि त्वतीत्थापना । ततो

वन्धावलिकायामतीतायां समयाधिकावलिकागतानि अबाधागतानि च स्पर्धकानि व्यतिरिच्य शेषाणि सर्वाणि निक्षेप-
विषयः । संप्रत्यत्रैवाल्पबहुत्वमुच्यते–तत्र सर्वस्तोको जघन्यनिक्षेपस्तस्यावलिकासंख्येयभागगतस्पर्धकमानत्वात् ।
ततोऽतीत्थापनाऽनन्तगुणा, निक्षेपविषयस्पर्धकेभ्य आवलिकामात्रस्थितिगतानां स्पर्धकानामनन्तगुणत्वात् । एवं सर्व-
त्राप्यनन्तगुणता स्पर्धकापेक्षया द्रष्टव्या । ततः उत्कृष्टो निक्षेपोऽनन्तगुणः । ततोऽपि सर्वोऽनुभागो विशेषाधिकः ।
तदेवमुक्तानुभागोद्वर्तना । संप्रत्यनुभागापवर्तनामतिदेशेनाह—'एवं उव्वट्टणाईत्ते' एवमुद्वर्तनाप्रकारेणापवर्तनाप्यनुभाग-
विषया वक्तव्या । केवलमादित आरभ्य । तद्यथा–प्रथमं स्पर्धकं नापवर्त्यते, नापि द्वितीयं, नापि तृतीयं । एवं ताव-
द्वाच्यं यावदुदयावलिकामात्रस्थितिगतानि स्पर्धकानि भवन्ति । तेभ्य उपरितनानि तु स्पर्धकान्यपवर्त्यन्ते । तत्र यदो-
दयावलिकात उपरिसमयमात्रस्थितिगतानि स्पर्धकान्यपवर्तयति, तदा समयोनावलिकात्रिभागद्वयगतानि स्पर्धकान्यति-
क्रम्याधस्तनेष्वावलिकान्तःसमयाधिकत्रिभागगतेषु स्पर्धकेषु निक्षिपति । यदा तूदयावलिकाया उपरि द्वितीयसमयमा-
त्रस्थितिगतानि स्पर्धकान्यपवर्तयति तदा प्रागुक्ताऽतीत्थापना समयोनावलिकात्रिभागद्वयप्रमाणा समयमात्रस्थितिगतैः
स्पर्धकैरधिकावगन्तव्या । निक्षेपस्तु तावन्मात्र एव । एवं समयसमयवृद्ध्याऽतीत्थापना तावद्वृद्धिमुपनेतव्या यावदाव-
लिका परिपूर्णा भवति । ततः परमतीत्थापना सर्वत्रापि तावन्मात्रैव, निक्षेपस्तु वर्धते । एवं निर्व्याघाते सति द्रष्टव्यं ।
व्याघाते पुनः अनुभागकण्डकं समयमात्रस्थितिगतस्पर्धकन्यूनमतीत्थापना द्रष्टव्या । कण्डकमानं समयमात्रन्यूनत्वं च
यथा प्राक् स्थित्यपवर्तनायामुक्तं, तथात्रापि द्रष्टव्यं । अत्राल्पबहुत्वमुच्यते–सर्वस्तोको जघन्यनिक्षेपः । ततो जघन्याती-

त्थापनाऽनन्तगुणा । ततो व्याघातेऽतीत्थापनाऽनन्तगुणा । तत उत्कृष्टमनुभागकंमकं विशेषाधिकं, तस्य समयगतैः स्पर्धकैरतीत्थापनातोऽधिकत्वात् । तत उत्कृष्टो निक्षेपो विशेषाधिकः । ततोऽपि सर्वोऽनुभागो विशेषाधिकः ॥ ७ ॥

संप्रति द्वयोरप्युद्वर्तनापवर्तनयोरल्पबहुत्वं सूत्रकृत्प्रतिपादयति—

थोवं पएसगुणहाणिअंतरे दुसु जहन्ननिक्खेवो। कमसो अणंतगुणिओ दुसु वि अइत्थावणा तुल्ला ॥८॥

वाघाएणणुभागकंडगमेक्काएँ वग्गणाऊणं । उक्कोसो निक्खेवो ससंतबंधो य सविसेसो ॥ ए ॥

थोवं ति—एकस्यां स्थितौ यानि स्पर्धकानि तानि क्रमशः स्थाप्यन्ते । तद्यथा—सर्वजघन्यं रसस्पर्धकमादौ । ततो विशेषाधिकरसं द्वितीयं । ततो विशेषाधिकरसं तृतीयं । एवं यावत्सर्वोत्कृष्टरसमन्ते । तत्रादिस्पर्धकादारभ्योत्तरोत्तरस्पर्धकानि प्रदेशापेक्षया विशेषहीनानि विशेषहीनानि, अन्तिमस्पर्धकादारभ्य पुनरधोऽधः क्रमेण प्रदेशापेक्षया विशेषाधिकानि विशेषाधिकानि । तेषां मध्ये एकस्मिन् द्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा यत्स्पर्धकजातं तत् सर्वस्तोकं । अथवा स्नेहप्रत्ययस्पर्धकस्यानुभागद्विगुणवृद्ध्यन्तरे द्विगुणहान्यन्तरे वा यदनुभागपटलं तत्सर्वस्तोकं। ततः 'दुसु त्ति' द्वयोरप्युद्वर्तनापवर्तनयोर्जघन्यो निक्षेपोऽनन्तगुणः, स्वस्थाने तुल्यः । तत्र यद्यप्युद्वर्तनायामावलिकाऽसंख्येयभागगतानि स्पर्धकानि निक्षेपोऽपवर्तनायां समयाधिकावलिकात्रिभागगतानि स्पर्धकानि, तथाप्यादिमस्थितिषु स्पर्धकानि स्तोकान्येव प्राप्यन्ते, अन्तिमस्थितिषु प्रभूतानीति स्पर्धकसंख्यापेक्षया द्वयोरपि निक्षेपस्तुल्यः । एवमतीत्थापनायामुत्कृष्टनिक्षेपेऽपि च भावनीयं । क्रमश इति च सकलगाथापेक्षया योजनीयं । ततो द्वयोरप्यतीत्थापना व्याघातबाह्याऽनन्तगुणा,

स्वस्थाने तु परस्परं तुल्या । ततः 'वाघाएणेत्यादि' व्याघातेन यदुत्कृष्टमनुभागकण्डकमेकस्यां वर्गणायां कृतमस्मात्स्थिति-गतस्पर्धकसंहतिरूपयोर्न एषोत्कृष्टाऽतीत्थापना साऽनन्तगुणा । तत उद्वर्तनापवर्तनयोरुत्कृष्टो निक्षेपो विशेषाधिकः, स्वस्थाने तु परस्परं तुल्यः । ततः 'स संतबंधो य सनिमेन्नो त्ति' पूर्वस्मादुत्कृष्टस्थितिकर्मानुभागेन सर्वोत्कृष्टस्थित्यनुभा-गबन्धो विशेषाधिक इति ॥ ८-९ ॥

संप्रत्युद्वर्तनापवर्तनयोः कालनियमं विषयनियमं च प्रतिपादयति—

आबंधा उक्कड्ढइ सव्वहितोकड्ढणा ठिइरसाणं । किट्टीवज्जे उभयं किट्टिसु ओवट्टणा नवरं (एक्का) ॥१०॥

आबंध त्ति-आ बंधात् बन्धं यावत्, उत्कर्षयति यावद्बन्धस्तावदुद्वर्तना भवति, परतो न भवतीत्यर्थः । तथा सर्वत्र बन्धकरणकालेऽबन्धकाले वाऽपकर्षणाऽपवर्तना स्थितिरसाना स्थित्यनुभागानां प्रवर्तते । एष कालनियमः । अन्यथा आबन्धादिति यावन्मात्रस्थितिबन्धस्तावन्मात्रस्य स्थितिसत्कर्मणः स्थित्युद्वर्तनानुभागोद्वर्तना चोपजायते । उपरितनस्य कर्मणः स्थित्यनुभागोद्वर्तना न भवति । अपकर्षणाऽपवर्तना पुनः सर्वत्र बन्धप्रमाणादर्वाक् परतो वा स्थित्यनुभागयोः प्रवर्तते । तथा किट्टीकृतवर्जे कर्मदलिके उभयमुद्वर्तनापवर्तनारूपं भवति । किट्टीकृते त्वपवर्तनैव केवला, नोद्वर्तनेति । एष विषयनियमः ॥ १० ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुद्वर्तनापवर्तने समाप्ते ॥

तदेवमुक्ते उद्वर्तनापवर्तने । संप्रत्युद्देशक्रमेणोदीरणा वक्तव्या । तत्र चैतेऽर्थाधिकाराः । तद्यथा–लक्षणं, भेदः, साद्यनादिप्ररूपणा, स्वामित्वं, उदीरणाप्रकृतिस्थानानि, तत्स्वामित्वं चेति । तत्र प्रथमतो लक्षणभेदयोः प्ररूपणार्थमाह—

जं करणेणोकड्ढिय उदए दिज्जइ उदीरणा एसा । पगइठिइअणुभागप्पएसमूलुत्तरविभागा(गो) ॥ १ ॥

जं ति–अत्र पूर्वार्धेन लक्षणमभिहितमुत्तरार्धेन तु भेदः । तत्र यत्परमाण्वात्मकं दलिकं करणेन योगसंज्ञकेन वीर्यविशेषेण कषायसहितेनासहितेन वा उदयावलिकाबहिर्वर्तिनीभ्यः स्थितिभ्योऽपकृष्योदये दीयते उदयावलिकायां प्रक्षिप्यते एषोदीरणा । उक्तं च–"उदयावलियबाहिरिल्लठिईहिंतो कसायसहिएणं असहिएण वा जोगसन्नेण करणेणं दलियमाकड्ढिय उदयावलियाए पवेसणं उदीरणत्ति" । सा च किंभूतेत्यत आह–प्रकृतिस्थित्यनुभागप्रदेशमूलोत्तरविभागा, प्रकृतिस्थित्यनुभागप्रदेशैर्मूलप्रकृतिभिरुत्तरप्रकृतिभिश्च कृत्वा विभागो भेदो यस्याः सा तथा । इदमुक्तं भवति–सोदीरणा चतुर्विधा, तद्यथा–प्रकृत्युदीरणा, स्थित्युदीरणा, अनुभागोदीरणा, प्रदेशोदीरणा च । एकैकापि द्विधा–मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयाऽष्टधा, उत्तरप्रकृतिविषया चाष्टपञ्चाशदधिकशतभेदा ॥ १ ॥

तदेवमुक्तौ लक्षणभेदौ । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा–मूलप्रकृतिविषया, उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषयामाह–

मूलपगईसु पंचण्ह तिहा दोण्हं चउविहा होइ । आउस्स साइ अधुवा दसुत्तरसउत्तरासिं पि ॥ २ ॥

मूलपगईसु त्ति-मूलप्रकृतिषु मध्ये पञ्चानां मूलप्रकृतीनां ज्ञानावरणदर्शनावरणनामगोत्रान्तरायरूपाणामुदीरणा त्रिधा त्रिप्रकारा। तद्यथा-अनादिर्ध्रुवाऽध्रुवा च। तथाहि-ज्ञानावरणदर्शनावरणान्तरायाणां यावत् क्षीणमोहगुणस्थानकस्य समयावलिकाशेषो न भवति तावत्सर्वजीवानामुदीरणाऽवश्यंभाविनी। नामगोत्रयोस्तु यावत्सयोगिचरमसमयस्तावत्। तत एषामनादिरुदीरणा, ध्रुवाऽभव्यानां, अध्रुवा भव्यानां। तथा द्वयोर्वेदनीयमोहनीययोरुदीरणा चतुर्विधा। तद्यथा-सादिरनादिर्ध्रुवाऽध्रुवा च। तत्र वेदनीयस्य प्रमत्तगुणस्थानकं यावदुदीरणा, न परतः। मोहनीयस्य सूक्ष्मसंपरायगुणस्थानकं यावत् न परतः। ततोऽप्रमत्तादिगुणस्थानकेभ्यः प्रतिपततो वेदनीयस्योपशान्तमोहगुणस्थानकाच्च प्रतिपततो मोहनीयस्योदीरणा सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवे पूर्ववत्। आयुषः पुनरुदीरणा सादिरध्रुवा च। तथाहि-आयुषः पर्यन्तावलिकायां नियमादुदीरणा न भवति ततोऽध्रुवा। पुनरपि परभवोत्पत्तिप्रथमसमये प्रवर्तते ततः सादिरिति। तदेवं कृता मूलप्रकृतिषु साद्यनादिप्ररूपणा। संप्रत्युत्तरप्रकृतिषु तां चिकीर्षुराह-'दसुत्तरसउत्तरासिं वि' सादिरध्रुवा चेत्यनुवर्तते। उत्तरासामपि उत्तरप्रकृतीनामपि दशोत्तरशतसंख्यानां पञ्चविधज्ञानावरणदर्शनावरणचतुष्टयमिथ्यात्वतैजससप्तकवर्णादिविंशतिस्थिरास्थिरशुभाशुभगुरुलघुनिर्माणान्तरायपंचकरूपाष्टाचत्वारिंशद्वर्जानां, सर्वशेषप्रकृतीनामित्यर्थः। उदीरणा द्विधा, तद्यथा-सादिरध्रुवा च। सा च साद्यध्रुवताऽध्रुवोदयत्वादेव सिद्धा ॥ २ ॥

मिच्छत्तस्स चउद्धा तिहा य आवरणविग्घचउदसगे। थिरसुभ सेयर उवघायवज्ज धुवबंधिनामे य ॥ ३ ॥

मिच्छत्तस्स त्ति-मिथ्यात्वस्योदीरणा चतुर्धा, तद्यथा-सादिरनादिर्ध्रुवाऽध्रुवा च। तत्र सम्यक्त्वं प्रतिपद्यमानस्योदीरणा

मिथ्यात्वस्य न भवति, उदयाभावात् । सम्यक्त्वात्प्रतिपतितस्य मिथ्यात्वं गतस्य पुनरपि भवति । ततोऽसौ सादिः । तत्स्थानमप्राप्तस्य त्वनादिः । अभव्यानां ध्रुवा । भव्यानामध्रुवा । तथा ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकरूपाणां चतुर्दशप्रकृतीनामुदीरणा त्रिप्रकारा । तद्यथा—अनादिर्ध्रुवाऽध्रुवा च । तथाहि—एतासां प्रकृतीनां ध्रुवोदयत्वादनादिरुदीरणा । अभव्यानां ध्रुवा । भव्यानां तु क्षीणमोहगुणस्थानके आवलिकाशेषे व्यवच्छेदभावादध्रुवा । तथा स्थिरशुभे सेतरे अस्थिराशुभसहिते तयोः, उपघातं वर्जयित्वा शेषनामध्रुवबन्धिनीनां च तैजससप्तकागुरुलघुवर्णादिविंशतिनिर्माणलक्षणानां सर्वसंख्यया त्रयस्त्रिंशत्संख्यानामुदीरणा त्रिधा, तद्यथा—अनादिर्ध्रुवाऽध्रुवा च । तत्रानादित्वं ध्रुवोदयत्वात् । ध्रुवाऽभव्यानां । अध्रुवा भव्यानां सयोगिकेवलिचरमसमये व्यवच्छेदभावात् । शेषाणां चाध्रुवोदयानां दशोत्तरशतसंख्यानामध्रुवोदयत्वादुदीरणा सादिः,अध्रुवा च प्रागेवोक्ता ॥ ३ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति मूलप्रकृत्युदीरणास्वामिनमाह—

घाईणं छउमत्था उदीरगा रागिणो य मोहस्स । तइयाऊण पमत्ता जोगंता उ त्ति दोण्हं च ॥ ४ ॥

घाईणं त्ति—घातिप्रकृतीनां ज्ञानावरणदर्शनावरणान्तरायरूपाणां सर्वेऽपि छद्मस्थाः क्षीणमोहपर्यवसाना उदीरकाः । मोहनीयस्य तु रागिणः सरागाः सूक्ष्मसंपरायपर्यवसाना उदीरकाः । तृतीयस्य वेदनीयस्यायुषश्च प्रमत्ताः प्रमत्तगुणस्थानकपर्यन्ताः सर्वेऽप्युदीरकाः । केवलमायुषः पर्यन्तावलिकायां नोदीरका भवन्ति । तथा द्वयोर्नामगोत्रयोर्योग्यन्ताः

सयोगिकेवलिपर्यवसानाः सर्वेऽप्युदीरकाः । इतिशब्दो निजकमो गाथापर्यन्ते योजनीयः । स च मूलप्रकृत्युदीरणापरिसमाप्तिद्योतको वेदितव्यः ॥ ४ ॥

तदेवं मूलप्रकृत्युदीरणास्वाम्युक्तः । साम्प्रतमुत्तरप्रकृत्युदीरणास्वामिनमाह—

विग्घावरणधुवाणं छउमत्था जोगिणो उ धुवगाणं । उवघायस्स तणुत्था तणुकिट्टीणं तणुगरागा ॥ ५ ॥

विग्घ त्ति-विग्घ त्ति अन्तरायं, ततोऽन्तरायपञ्चकज्ञानावरणपञ्चकदर्शनावरणचतुष्टयरूपाणां चतुर्दशानां ध्रुवोदयप्रकृतीनां सर्वे छद्मस्था उदीरकाः । तथा 'धुवगाणं ति' नामध्रुवोदयानां त्रयस्त्रिंशत्संख्यानां तैजसकार्मणवर्णादिविंशतिस्थिरास्थिरशुभाशुभागुरुलघुनिर्माणरूपाणां योगिनः सयोगिकेवलिपर्यन्ता उदीरकाः । उपघातनाम्नस्तु तनुस्थाः शरीरस्थाः शरीरपर्याप्त्या पर्याप्ता उदीरकाः । तनुकिट्टीनां सूक्ष्मकिट्टीनां अर्थात् लोभसत्कानां तनुकरागाः सूक्ष्मसंपराया यावच्चरमावलिका न भवति तावदुदीरकाः ॥ ५ ॥

तसबायरपज्जत्तग सेयर गइजाइदिट्ठिवेयाणं । आऊण य तन्नामा पत्तेगियरस्स उ तणुत्था ॥ ६ ॥

तस त्ति-त्रसबादरपर्याप्तानां सेतराणां सप्रतिपक्षाणां स्थावरसूक्ष्मापर्याप्तसहितानामित्यर्थः । तथा चतसृणां गतीनां, पञ्चानां च जातीनां, तिसृणां दृष्टीनां दर्शनानां मिथ्यादर्शनादीनां, त्रयाणां च वेदानां नपुंसकवेदादीनां, चतुर्णां चायुषां, सर्वसंख्यया पञ्चविंशतिप्रकृतीनां यथास्वं तन्नामानस्तत्तत्प्रकृतिनामान उदीरकाः । तद्यथा—त्रसनामत्रसाः, ते च शरी-

रेऽपान्तरालगतौ च वर्तमाना उदीरकाः । एवं सर्वेषामपि भावनीयं । तथा प्रत्येकनाम्न इतरस्य च साधारणनाम्नः तनुस्थाः शरीरस्थाः शरीरपर्याप्त्या पर्याप्ता यथाक्रमं प्रत्येकशरीरिणः साधारणशरीरिणश्च सर्वे उदीरकाः ॥ ६ ॥

आहारग नरतिरिया सरीरदुगवेयए पमोत्तूणं । उरालाए एवं तदुवंगाए तसजियाउ ॥ ७ ॥

आहारग त्ति–ये नरा मनुष्यास्तिर्यञ्चश्च आहारका ओजोलोमप्रक्षेपाहाराणामन्यतममाहारं गृह्णन्तस्ते औदारिकशरीरनाम्नः । उपलक्षणमेतदौदारिकबन्धनचतुष्टयस्यौदारिकसंघातस्य चोदीरकाः, किं सर्वेऽपि ? नेत्याह–शरीरद्विकवेदकान् प्रमुच्य, शरीरद्विकमाहारकवैक्रियलक्षणं तत्स्थान् परित्यज्य । ते हि नौदारिकशरीरनामोदये वर्तन्ते, तत्कथं तस्योदीरकाः स्युः ? । तथैवमुक्तेन प्रकारेण । 'तदुवंगाए त्ति' तदंगोपांगनाम्न औदारिकांगोपांगनाम्न उदीरका वेदितव्याः । केवलं ते त्रसकायिका एव, न स्थावराः, तेषां तदुदयाभावात् ॥ ७ ॥

वेउव्विगाए सुरनेरईया आहारगा नरो तिरिउ । सन्नी बायरपवणो य लद्धिपज्जत्तगो होज्जा ॥ ८ ॥

वेउव्विगाए त्ति–वैक्रियशरीरनाम्नः । उपलक्षणमेतद्वैक्रियबन्धनचतुष्टयस्य वैक्रियसंघातस्य च । सुरा नैरयिका वा । आहारका ओजोलोमाद्यन्यतममाहारं गृह्णन्तः । यश्च नरस्तिर्यग्वा संज्ञी वैक्रियलब्धिवा (मा) न् । यश्च बादरपवनो दुर्भगनामोदयी लब्धिपर्याप्तको वैक्रियशरीरलब्ध्या पर्याप्तः । ते सर्वेऽप्युदीरकाः ॥ ८ ॥

वेउव्विउवंगाए तणुतुल्ला पवणबायरं हिच्चा । आहारगाए विरउ विउव्वयंतो पमत्तो य ॥ ९ ॥

वेउव्विउ त्ति–वैक्रियांगोपांगनाम्न उदीरकास्तनुतुल्या वैक्रियशरीरतुल्या वेदितव्याः । ये वैक्रियशरीरनाम्न उदीरकाः प्रागुपदिष्टास्त एव वैक्रियांगोपांगनाम्नोऽपि वेदितव्या इत्यर्थः । किं सर्वेऽपि ? नेत्याह–बादरपवनं बादरवायुकायिकं हित्वा परित्यज्य शेषा द्रष्टव्याः । 'आहारगाए इत्यादि' आहारकशरीरनाम्नो विरतः संयतस्तदाहारकशरीरं कुर्वन् प्रमत्तः प्रमादभावमुपगतः सन् उदीरको भवति ॥ ए ॥

छण्हं संठाणाणं संघयणाणं च सगलतिरियनरा । देहत्था पज्जत्ता उत्तमसंघयणिणो सेढी ॥ १० ॥

छण्हं ति–सकलाः पञ्चेन्द्रियास्तिर्यञ्चो मनुष्याश्च देहस्थाः शरीरनामोदये वर्तमाना लब्ध्या पर्याप्ताः षण्णां संस्थानानां षण्णां च संहनननामुदीरका भवन्ति । इहोदयप्राप्तानामेवोदीरणा प्रवर्तते, नान्येषां । ततो यदा यत्संस्थानं संहननं वोदयप्राप्तं भवति, तत्तदोदीर्यते, नान्यदेति द्रष्टव्यं । तथोत्तमसंहननिनो वज्रर्षभनाराचसंहननिनः श्रेणिः क्षपकश्रेणिं भवति, न शेषसंहननिनः, तेन क्षपकश्रेणिं प्रतिपन्ना वज्रर्षभनाराचसंहननमेवोदीरयन्ति, न शेषसंहननानि, उदयाभावादित्यवसेयं ॥ १० ॥

चउरंसस्स तणुत्था उत्तरतणु सगलभोगभूमिगया । देवा इयरे हुंडं तसतिरियनरा य सेवट्टा(छेवट्ठा) ११॥

चउरंसस्स त्ति–चतुरस्रस्यैव समचतुरस्रसंस्थानस्यैव तनुस्थाः शरीरस्था उत्तरतनव आहारकोत्तरवैक्रियशरीरिणो मनुष्यास्तिर्यञ्चश्च सकलाः सकलेन्द्रियाः पञ्चेन्द्रिया इत्यर्थः । तथा भोगभूमिगता देवाश्चोदीरका भवन्ति । 'इयरे हुंडं त्ति' इतरे उक्तशेषा एकेन्द्रियविकलेन्द्रियनैरयिका अपर्याप्तकाश्च पञ्चेन्द्रियतिर्यग्मनुष्याः । एते सर्वेऽपि शरीरस्था हुंड-

संस्थानस्योदीरका भवन्ति । 'तसतिरियनरा य सेवट्ट त्ति' अत्रेतरे इत्यनुवर्तते, इतरे उक्तशेषास्त्रसा द्वीन्द्रियादयः पञ्चेन्द्रियतिर्यङ्मनुष्याश्च सेवार्ताः सेवार्तसंहननोपेताः सेवार्तसंहननस्योदीरकाः ॥ ११ ॥

संघयणाणि न उत्तरतणूसु तन्नामगा भवंतरगा । अणुपुव्वीणं परघायस्स उ देहेण पज्जत्ता ॥ १२ ॥

संघयणाणि त्ति–उत्तरतनुषु वैक्रियाहारकशरीरेषु संहननानि न भवन्तीति षण्णां संहननानामेकतमदपि संहननं न भवति । तेनैकस्यापि संहननस्योदीरका न भवन्ति । तथानुपूर्वीणां नरकानुपूर्व्यादीनां चतसृणां तन्नामकास्तत्तदानुपूर्व्यनुयायिनारकादिनामानो भवान्तरगा भवापान्तरालगतौ वर्तमाना उदीरका वेदितव्याः । तद्यथा–नारकानुपूर्व्या नारको भवापान्तरालगतौ वर्तमान उदीरकः, तिर्यगानुपूर्व्यास्तिर्यगित्यादि । तथा पराघातनाम्नः शरीरपर्याप्त्या पर्याप्ताः सर्वेऽप्युदीरकाः ॥ १२ ॥

बायरपुढवी आयावस्स य वज्जित्तु सुहुमसुहुमतसे । उज्जोयस्स य तिरिए उत्तरदेहो य देवजई ॥१३॥

बायरपुढवि त्ति–आतपनाम्नो बादरपृथ्वीकायिक उदीरकः । चशब्दस्यानुक्तार्थसमुच्चायकत्वात् बादरपृथ्वीकायिकोऽपि पर्याप्तो द्रष्टव्यः । तथा सूक्ष्मान् सूक्ष्मैकेन्द्रियान् सूक्ष्मत्रसांश्च तेजोवायुकायिकान् वर्जयित्वा शेषास्तिर्यञ्चः पृथिव्यंबुवनस्पतयो विकलेन्द्रियाः पञ्चेन्द्रियाश्च लब्धिपर्याप्ता उद्योतनाम्नो यथासंभवमुदीरकाः । तथोत्तरदेहे उत्तरशरीरे यथासंभवं वैक्रिये आहारके च वर्तमानो देवो यतिश्चोद्योतनाम्न उदीरको भवति ॥ १३ ॥

सगलो य इट्ठखगई(इट्ठ) उत्तरतणुदेवभोगभूमिगया । इट्ठसराएँ तसो वि य इयरासि तसा सनेरइया १४॥

सगलो त्ति–सकलाः पञ्चेन्द्रियतिर्यग्मनुष्या वा शरीरपर्याप्त्या पर्याप्ताः प्रशस्तविहायोगत्युदयं वेदयमानाः । तथोत्तरवैक्रियशरीररूपाया वर्तमानाः सर्वे तिर्यञ्चो मनुष्याश्च । तथा सर्वे देवाः सर्वे च योगलिका । उद्योतस्य प्रशस्तविहायोगतेरुदीरकाः । तथेष्टस्वरनाम्नः सुस्वरनाम्नश्च द्वीन्द्रियादयः । अपि शब्दात् प्रागुक्ताश्च पञ्चेन्द्रियतिर्यगादयो भाषापर्याप्त्या पर्याप्ता यथासंख्यमुदीरकाः । तथेतरयोरप्रशस्तविहायोगतिदुःस्वरनाम्नोस्त्रसा विकलेन्द्रियाः सनैरयिका नैरयिकसहिताः । तथा पञ्चेन्द्रियतिर्यग्मनुष्याः केचन यथासंख्यमुदीरका वेदितव्याः ॥ १४ ॥

उस्सासस्स सराण य पज्जत्ता आणपाणभासासु । सव्वण्णूणुस्सासो भासा वि य जा न रुज्झंति ॥ १५ ॥

उस्सासस्स त्ति–उच्छ्वासस्वरशब्दयोरानप्राणभाषाशब्दाभ्यां सह यथासंख्येन योजना । सा चैवं–उच्छ्वासनाम्नः प्राणापानपर्याप्त्या पर्याप्ताः सर्वेऽप्युदीरकाः । 'सराण य त्ति' द्विवचनेऽपि बहुवचनं प्राकृतत्वात् । ततः स्वरयोः सुस्वरदुःस्वरयोः प्रागुक्ता उदीरकाः सर्वेऽपि भाषापर्याप्त्या पर्याप्ता द्रष्टव्याः । यद्यपि स्वरयोः प्रागेवोदीरका उक्तास्तथापि ते भाषापर्याप्त्या पर्याप्ता एवोदीरका वेदितव्या इति विशेषोपदेश (दर्श) नार्थं पुनरुपादानं । तथा सर्वज्ञानां केवलिनामुच्छ्वासभाषे यावन्नाद्यापि निरोधमुपगच्छतस्तावदुदीर्यंते, तन्निरोधानन्तरं तूदयाभावान्नोदीरणा भवति ॥ १५ ॥

देवो सुभगाएज्जाण गब्भवक्कंतिओ य कित्तीए । पज्जत्तो वज्जित्ता ससुहुमनेरइयसुहुमतसे ॥ १६ ॥

देवो त्ति–'देवो' इत्यादौ जातावेकवचनं । केचिद्देवाः केचित्तिर्यग्मनुष्या गर्भव्युत्क्रान्ताः सुभगादेयनाम्नोरुदीरकाः

ये तदुदये वर्तन्ते । तथा सूक्ष्मैकेन्द्रियसहितान् नैरयिकान् सूक्ष्मत्रसांश्च वर्जयित्वा शेषाः पर्याप्तकनामोदये वर्तमाना यशःकीर्ते (कीर्त्ते) रुदीरकाः ॥ १६ ॥

गोउत्तमस्स देवा नरा य वइणो चउण्हमियरासिं । तव्वइरित्ता तित्थगरस्स उ सव्वणुयाएँ भवे ॥ १७ ॥

गोउत्तमस्स त्ति–सर्वे देवा मनुष्या अपि च केचिदुच्चैःकुलसमुत्पन्नास्तथा व्रतिनो नीचैर्गोत्रिणोऽपि पञ्चमहाव्रतसमलंकृतगात्रयष्टय उच्चैर्गोत्रस्योदीरकाः । तथा इतरासां चतसृणां प्रकृतीनां दुर्भगानादेयायशःकीर्तिनीचैर्गोत्राणां तद्व्यतिरिक्ता उक्तव्यतिरिक्ता वेदितव्याः । तत्र दुर्भगानादेययोरेकेन्द्रियविकलेन्द्रियसंमूर्छिमतिर्यङ्मनुष्यनैरयिकाः, अयशःकीर्तेश्च सर्वे सूक्ष्माः सर्वे च नैरयिकाः सर्वे च सूक्ष्मत्रसाः सर्वेऽप्यपर्याप्तकनामोदये वर्तमानाः । नीचैर्गोत्रस्य पुनः सर्वे नैरयिकाः सर्वे तिर्यञ्चो मनुष्या अपि विशिष्टकुलोत्पन्नान् व्रतिनश्च मुक्त्वा शेषाः सर्वेऽप्युदीरका द्रष्टव्याः । तथा तीर्थकरनाम्नः सर्वज्ञतायां सत्यां भवेदुदीरणा, नान्यदा, उदयाभावात् ॥ १७ ॥

इंदियपज्जत्तीए दुसमयपज्जत्तगाए पाउग्गा । निद्दापयलाणं खीणरागखवगे परिच्चज्ज ॥ १८ ॥

इंदिय त्ति–इन्द्रियपर्याप्त्या पर्याप्ताः सन्तो द्वितीयसमयादारभ्येन्द्रियपर्याप्त्यनन्तरसमयादारभ्येत्यर्थः । निद्राप्रचलयोरुदीरणाप्रायोग्या भवन्ति । किं सर्वेऽपि ? नेत्याह–क्षीणरागान् क्षपकांश्च परित्यज्य । उदीरणा हि उदये सति भवति, नान्यथा । न च क्षीणरागक्षपकयोर्निद्राप्रचलोदयः संभवति "निद्दादुगस्स उदओ खीणगखवगे परिच्चज्ज" इतिवचनप्रामाण्यात् । ततस्तान् वर्जयित्वा शेषा निद्राप्रचलयोरुदीरका वेदितव्याः ॥ १८ ॥

निद्दानिद्दाईण त्ति असंखवासा य मणुयतिरिया य । वेउव्वाहारतणू वज्जित्ता अप्पमत्ते य ॥ १९ ॥

निद्दत्ति–असंख्येयवर्षायुषो मनुष्यतिरश्चो वैक्रियशरीरिण आहारकशरीरिणोऽप्रमत्तसंयतांश्च मुक्त्वा शेषाः सर्वेऽपि निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धीनामुदीरका वेदितव्याः ॥ १९ ॥

वेयणियाण पमत्ता ते ते बंधंतगा कसायाणं । हासाईछक्कस्स य अपुव्वकरणस्स चरमंते ॥ २० ॥

वेयणियाणत्ति–वेदनीययोः सातासातरूपयोः प्रमत्ताप्रमत्तगुणस्थानकपर्यन्ताः सर्वेऽप्युदीरकाः । तथा ये ये जीवा येषां कषायाणां बन्धकास्ते ते तेषां तेषां कषायाणामुदीरका वेदितव्याः । यतो यानेव कषायान् वेदयते तानेव बध्नाति 'जे वेयइ से बंधइ' इतिवचनात् । उदये च सत्युदीरणा । ततो गुरुमुक्तं 'ते ते बंधंतगा कसायाणं' इति । तत्र मिथ्यादृष्टिमासादना अनन्तानुबन्धिनामुदीरकाः तेषां तद्वेदकत्वात् । अप्रत्याख्यानानामविरतसम्यग्दृष्टिपर्यन्ताः, प्रत्याख्यानावरणानां देशविरतिपर्यन्ताः, संज्वलनक्रोधमानमायालोभानां स्वस्वबन्धव्यवच्छेदादर्वाक् उदीरकाः, हास्यादिषट्कस्यापूर्वगुणस्थानकान्ता उदीरकाः ॥ २० ॥

जावूणखणो पढमो सुहरइहासाणमेवमियराणिं । देवा नेरइया वि य भवठिइं केइ नेरइया ॥२१॥

ज त्ति–यावत्प्रथमः क्षणः किंचिदूनो भवति प्रथममन्तर्मुहूर्तं यावदित्यर्थः । तावन्नियमादेवाः सुखरतिहास्यानामुदीरका वेदितव्याः । परतस्त्वनियमः । एवं किंचिदूनं प्रथमं क्षणं यावत् नैरयिका, इतरासामसातवेदनीयारतिशोकप्रकृ-

तीनां नियमादुदीरकाः । परतस्तु तीर्थकरकेवलज्ञानलाभादौ विपर्यासोऽपि भवन्ति । केचित्पुनर्नैरयिकाः सकलामपि भवस्थिति यावदसातवेदनीयारतिशोकानामुदीरका भवन्ति ॥ २१ ॥

एवमेकैकप्रकृत्युदीरणास्वामित्वमुक्तं, संप्रति प्रकृत्युदीरणास्थानान्याह—

पंचण्हं च चउण्हं बिइए एक्काइ जा दसण्हं तु । तिगहीणाइ मोहे मिच्छे सत्ताइ जाव दस ॥ २२ ॥

पंचण्हं ति–द्वितीयकर्मणि दर्शनावरणीयलक्षणे पञ्चानां चतसृणां वा प्रकृतीनां युगपदुदीरणा भवति । तत्र चतसृणां चक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां ध्रुवा छद्मस्थानामुदीरणा । एतासां मध्ये निद्रापञ्चकमध्यादन्यतमप्रकृतिप्रक्षेपे पञ्चानामुदीरणा । तथा मोहे मोहनीये एकादिका त्रिकहीना तावद्द्रष्टव्या यावद्दशानां । एतदुक्तं भवति—मोहनीये कर्मणि उदीरणामधिकृत्यैकादीनि त्रिकहीनानि दशपर्यन्तानि नव प्रकृतिस्थानानि भवन्ति । तद्यथा—एका द्वे चतस्रः पञ्च षट् सप्त अष्ट नव दश । संप्रत्येषामुदीरणास्थानानां स्वामिनमाह—'मिच्छे सत्ताइ जाव दस' मिथ्यादृष्टौ सप्तादीनि दशपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति, तद्यथा–सप्त, अष्टौ, नव, दश । तत्र मिथ्यात्वमप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमे त्रयः क्रोधादिकाः । यत एकस्मिन् क्रोधे उदीर्यमाणे सर्वक्रोधा उदीर्यन्ते । एवं मानमायालोभा अपि द्रष्टव्याः । न च युगपत् क्रोधमानमायालोभानामुदीरणा, युगपदुदयाभावात् । किं तु त्रयाणा क्रोधानां, त्रयाणां वा मानानां, यद्वा तिसृणां मायानां, अथवा त्रयाणां लोभानां युगपदुदीरणेत्यन्यतमे त्रयो गृह्यन्ते । तथा त्रयाणां वेदानामन्यतमो वेदः, तथा हास्यरतियुगलारतिशोकयुगलयोरन्यतरद्युगलं । एतासां सप्तप्र-

कृतीनां मिथ्यादृष्टौ उदीरणा ध्रुवा । अत्र च भंगाश्चतुर्विंशतिस्तथा—हास्यरतियुगले अरतिशोकयुगले च प्रत्येकमेकैको भंगः प्राप्यत इति द्वौ भंगौ । तौ च प्रत्येकं त्रिष्वपि वेदेषु प्राप्यत इति द्वौ त्रिभिर्गुणितौ जाताः षट् । ते च प्रत्येकं क्रोधादिषु चतुर्षु प्राप्यन्ते इति षट् चतुर्भिर्गुणिता जाता चतुर्विंशतिरिति । एतस्मिन्नेव सप्तके भये वा जुगुप्सायां वाऽनन्तानुबन्धिनि वा क्षिप्तेऽष्टानामुदीरणा । तत्र भयादौ प्रत्येकमेकैका भंगकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयोऽत्र द्रष्टव्याः । ननु च मिथ्यादृष्टेरवश्यमनन्तानुबन्धिनामुदयः संभवति, उदये च सत्यवश्यमुदीरणा तत्कथं मिथ्यादृष्टिरनन्तानुबन्ध्युदयरहितः प्राप्यते, येन तस्य सप्तानामष्टानां वाऽनन्तानुबन्धिरहितानामुदीरणा संभवेत् ? उच्यते—इह सम्यग्दृष्टिना सता केनचित्प्रथमतोऽनन्तानुबन्धिनो विसंयोजिताः । एतावतैव च स विश्रान्तो न मिथ्यात्वादिक्षयायोद्युक्तः, तथाविधसामग्र्यभावात् । ततः कालान्तरे मिथ्यात्वं गतः सन् मिथ्यात्वप्रत्ययतो भूयोऽप्यनन्तानुबन्धिनो बध्नाति, ततो बन्धावलिका यावन्नाद्याप्यतिक्रामति तावत्तेषामुदयो न भवति, उदयाभावाच्चोदीरणाया अप्यभावः । बन्धावलिकायां पुनरतीतायामुदयसंभवाद्भावत्वेनोदीरणा । ननु कथं बन्धसमयादारभ्यावलिकायामतीतायामुदयोऽपि संभवति? यतोऽबाधाकालक्षये सत्युदयः, अबाधाकालश्चानन्तानुबन्धिनां जघन्यतोऽन्तर्मुहूर्तमुत्कर्षतश्चत्वारि वर्षसहस्राणि इति ? नैष दोषः, यतो बन्धसमयादारभ्य तेषां तावत्सत्ता भवति, सत्तायां च सत्यां पतद्ग्रहता, तस्यां च सत्यां शेषप्रकृतिदलिकसंक्रान्तिः, संक्रान्तस्य च संक्रमावलिकायामतीतायामुदयः, उदये च सत्युदीरणा । ततो बन्धसमयादनन्तरमावलिकायामतीतायामुदीरणाऽभिधीयमाना न निरुध्यत इति । तथा तस्मिन्नेव सप्तके भय-

जुगुप्सयोरथवा भयानन्तानुबन्धिनोर्यद्वा जुगुप्सानन्तानुबन्धिनोः प्रक्षिप्तयोर्नवानामुदीरणा । अत्रापि चैकैकस्मिन् विकल्पे प्रागुक्तक्रमेण भंगकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयोऽत्र द्रष्टव्याः । तथा तस्मिन्नेव सप्तके भय-जुगुप्सानन्तानुबन्धिषु प्रक्षिप्तेषु दशानामुदीरणा । अत्रैकैव भंगकानां चतुर्विंशतिः ॥ २२ ॥

तदेवं मिथ्यादृष्टेर्मोहनीयस्योदीरणास्थानान्युक्तानि, साम्प्रतं सासादनसम्यग्दृष्ट्यादीनामाह—

सासणमीसे नव अविरए ठाई परम्मि पंचाई । अठ विरए य चउराइ सत्त छच्चोवरिल्लंमि ॥ २३ ॥

सासणमीसे त्ति—सासादनसम्यग्दृष्टौ सम्यग्मिथ्यादृष्टौ च सप्तादीनि नवपर्यन्तानि त्रीणि त्रीण्युदीरणास्थानानि भवन्ति । तद्यथा—सप्त अष्टौ नव । तत्र सासादनसम्यग्दृष्टौ अनन्तानुबन्ध्यप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधादीनामन्यतमे (माः) चत्वारः क्रोधादिकाः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलमिति सप्तानामुदीरणा ध्रुवा । अत्र प्रागुक्तक्रमेण भंगकानामेका चतुर्विंशतिः । तथाऽस्मिन्नेव सप्तके भये वा जुगुप्सायां वा क्षिप्तायामष्टानामुदीरणा । अत्र च द्वे चतुर्विंशती भंगकानां । भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदीरणा । अत्र चैका भंगकानां चतुर्विंशतिः । सम्यग्मिथ्यादृष्टावनन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादयः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, सम्यग्मिथ्यात्वं चेति सप्तानामुदीरणा ध्रुवा । अत्र प्रागुक्तक्रमेण भंगकानामेका चतुर्विंशतिः । तथाऽस्मिन्नेव सप्तके भयजुगुप्सयोरन्यतरस्मिन् प्रक्षिप्तेऽष्टानामुदीरणा । अत्र च द्वे चतुर्विंशती भंगकानां । भयजुगु-

१ अन्यतमस्यापि केषाञ्चिन्मतेन सर्वादित्वात् यत उक्तवानापिशलिः "अन्यतमस्मिन्स्थाने" इति । शब्दानुशासनाचार्या अपि तन्मते डतमन्तसाप्यन्यशब्दस्य सर्वादित्वम्

स्तयोस्तु युगपत्प्रक्षिप्तयोर्नवानामुदीरणा । अत्र चैका चतुर्विंशतिर्भङ्गकानां । तथाऽविरतेऽविरतसम्यग्दृष्टौ षडादीनि नवपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति । तद्यथा—षट्, सप्त, अष्टौ, नव । तत्रौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽविरतस्यानन्तानुबन्धिवर्जास्त्रयोऽन्यतमे क्रोधादिकाः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरयुगलमिति षण्णामुदीरणा ध्रुवा । अत्र प्रागिव भङ्गकानामेका चतुर्विंशतिः । अस्मिन्नेव षट्के भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते सप्तानामुदीरणा । अत्र भङ्गकानां तिस्रश्चतुर्विंशतयः । तत्र तस्मिन्नेव षट्के भयजुगुप्सयोरथवा भयवेदकसम्यक्त्वयोर्यद्वा जुगुप्सावेदकसम्यक्त्वयोर्युगपत् प्रक्षिप्तयोरष्टानामुदीरणा । अत्राप्येकस्मिन् विकल्पे भङ्गकानां चतुर्विंशतिः प्राप्यते इति तिस्रश्चतुर्विंशतयः । भयजुगुप्सावेदकसम्यक्त्वेषु युगपत्प्रक्षिप्तेषु नवानामुदीरणा । अत्र चैका चतुर्विंशतिर्भङ्गकानां । 'पञ्च पंचाइ अट्ठ' इति अविरतसम्यग्दृष्टेः परस्मिन् देशविरते पञ्चादीनि अष्टपर्यन्तानि चत्वारि उदीरणास्थानानि । तद्यथा—पञ्च षट् सप्त अष्टौ । तत्र प्रत्याख्यानावरणसंज्वलनसंज्ञौ क्रोधादीनामन्यतमौ द्वौ क्रोधादिकौ, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, एतासां पञ्चानां प्रकृतीनां देशविरतस्योदीरणा ध्रुवा । एषा चौपशमिकसम्यग्दृष्टेः क्षायिकसम्यग्दृष्टेर्वाऽवगन्तव्या । अत्र च प्रागुक्तक्रमेण भङ्गकानामेका चतुर्विंशतिः । भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिंस्तु प्रक्षिप्ते षण्णामुदीरणा । अत्र भयादिभिस्त्रयो विकल्पाः । एकैकस्मिंश्च विकल्पे भङ्गकानां चतुर्विंशतिरिति तिस्रश्चतुर्विंशतयः । तथा तस्मिन्नेव पञ्चके भयजुगुप्सयोरथवा जुगुप्सावेदकसम्यक्त्वयोर्यद्वा भयवेदकसम्यक्त्वयोर्युगपत्प्रक्षिप्तयोः सप्तानामुदीरणा । अत्रापि तिस्रश्चतुर्विंशतयो भङ्गकानां ।

भयजुगुप्सावेदकसम्यक्त्वेषु तु युगपत्प्रक्षिप्तेषु अष्टानामुदीरणा । अत्र चैका चतुर्विंशतिर्भङ्गकानां । संप्रति प्रमत्ताप्रमत्तयोर्भेदाभावाद्युगपदुदीरणास्थानान्याह—'विरए य चउराइ सत्त' त्ति विरते प्रमत्तेऽप्रमत्ते च चतुरादीनि सप्तपर्यन्तानि चत्वार्युदीरणास्थानानि भवन्ति । तद्यथा—चत्वारि पञ्च षट् सप्त । तत्र संज्वलनक्रोधादीनामन्यतम एकः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, इत्येतासा चतसृणां प्रकृतीनां विरतस्य क्षायिकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेर्वा उदीरणा ध्रुवा । अत्रैका भंगकाना चतुर्विंशतिः । एतस्मिन्नेव चतुष्के भयजुगुप्सावेदकसम्यक्त्वानामन्यतमस्मिन् प्रक्षिप्ते पञ्चानामुदीरणा । अत्र भंगकानां तिस्रश्चतुर्विंशतयः । तथा तस्मिन्नेव चतुष्के भयजुगुप्सयोरथवा भयवेदकसम्यक्त्वयोर्यद्वा जुगुप्सावेदकसम्यक्त्वयोर्युगपत्प्रक्षिप्तयोः षण्णामुदीरणा । अत्रापि तिस्रश्चतुर्विंशतयो भंगकानां । भयजुगुप्सावेदकसम्यक्त्वेषु च युगपत्प्रक्षिप्तेषु सप्तानामुदीरणा । अत्र चैका चतुर्विंशतिर्भंगकानां । संप्रत्यपूर्वकरणस्योदीरणास्थानान्याह—'छच्चोवरिल्लम्मि' विरतादुपरितनेऽपूर्वकरणे चतुरादीनि षट्पर्यन्तानि त्रीण्युदीरणास्थानानि भवन्ति । तद्यथा–चतस्रः पञ्च षट् । तत्र चतुर्णां संज्वलनक्रोधादीनामेकतमः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः, द्वयोर्युगलयोरन्यतरद्युगलं, इत्येतासां चतसृणां प्रकृतीनामपूर्वकरणे उदीरणा ध्रुवा । अत्रैका भंगकानां चतुर्विंशतिः । अस्मिन्नेव चतुष्के भये वा जुगुप्सायां वा क्षिप्तायां पञ्चानामुदीरणा । अत्र द्वे चतुर्विंशती भंगकानां । भयजुगुप्सयोस्तु युगपत्प्रक्षिप्तयोः षण्णामुदीरणा । अत्र चैका चतुर्विंशतिर्भंगकानां । एताश्चापूर्वकरणसत्काश्चतुर्विंशतयः परमार्थतः प्रमत्ताप्रमत्तचतुर्विंशतिकातोऽभिन्नस्वरूपा इति न पृथगग्रे गणयिष्यन्ते ॥ २३ ॥

संप्रत्यनिवृत्तिबादरस्योदीरणास्थानान्याह—

अनियट्टिम्मि दुगेगं लोभो तणुरागेगो (ग एग) चउवीसा। एक्कग छक्केक्कारस दस सत्त चउक्क एक्काउं ॥२४॥

अनियट्टिम्मि त्ति—अनिवृत्तिबादरे द्वे उदीरणास्थाने। तद्यथा—द्वे प्रकृती, एका च। तत्र चतुर्णां संज्वलनक्रोधादीनामेकतमः क्रोधादिः, त्रयाणां वेदानामन्यतमो वेदः। अत्र त्रिभिर्वेदैश्चतुर्भिः संज्वलनैर्द्वादश भंगाः। वेदेषु च क्षीणेषु उपशान्तेषु वा संज्वलनक्रोधादीनामेकतमं क्रोधादिकमुदीरयति। तत्र च चत्वारो भंगाः। 'लोभो तणुरागेगो' (ग एग) तनुरागे तनुरागस्य सूक्ष्मसंपरायस्य सूक्ष्मलोभकिट्टीर्वेदयमानस्य लोभे एकैको मोहनीयस्य उदीरणायोग्यो भवति। संप्रति चतुरादिषु दशपर्यन्तेषु उदीरणास्थानेषु विरतान्तानां यावन्त्यश्चतुर्विंशतयो भवन्ति तावतीर्निरूपयति—'चउवीसे-त्यादि' दशोदीरणायामेका चतुर्विंशतिः, नवोदीरणायां षट्, अष्टोदीरणायामेकादश, सप्तोदीरणायां दश, षडुदीरणायां सप्त, पञ्चकोदीरणायां चतस्रः, चतुरुदीरणायामेकेति। एताश्चतुर्विंशतयः प्रागेव भाविताः। केवलं संकलनमात्रमिहैवं स्वधिया परिभावनीयम् ॥ २४ ॥

तदेवमुक्तानि मोहनीयस्योदीरणास्थानानि, संप्रति नामकर्मण उदीरणास्थानानि प्रतिपिपादयिषुराह—

एगबियालापण्णाइ सत्तपण्णंत गुणिसु नामस्स। नव सत्त तिण्णि अट्ठ य छ पंच य अप्पमत्ते दो ॥२५॥

एक्कं पंचसु एक्कम्मि अट्ठ ठाणक्कमेण भंगा वि। एक्कग तीसेक्कारस इगवीस सयार तिसय य ॥ २६ ॥

इगवीसा उच्च सया छहअहिया नवसया य एगहिया। अउणुत्तराणि चउदस सयाणि गुणनउइ पंचसया॥

एगेत्यादि—नामकर्मण उदीरणास्थानानि दश, तद्यथा—एकचत्वारिंशत्, द्विचत्वारिंशत्, पञ्चाशत्, एकपञ्चाशत्, द्विपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, षट्पञ्चाशत्, सप्तपञ्चाशच्चेति। तत्र तैजससप्तकं वर्णादिविंशतिरगुरुलघु स्थिरास्थिरे शुभाशुभे निर्माणमित्येतासां त्रयस्त्रिंशत्प्रकृतीनामुदीरणा ध्रुवा। तत्र मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तिरूपेऽष्टके प्रक्षिप्ते सति एकचत्वारिंशद्भवति। एतासां चैकचत्वारिंशत्प्रकृतीनां केवलिसमुद्घातगतः कार्मणकाययोगे वर्तमानः केवली उदीरको भवति। एषैव चैकचत्वारिंशत्तीर्थकरनामसहिता द्विचत्वारिंशद्भवति। तस्याश्च तीर्थकरः केवलिसमुद्घातगतः कार्मणकाययोगे वर्तमान उदीरकः। तस्यामेवैकचत्वारिंशति औदारिकसप्तक षण्णां संस्थानानामेकतमत् संस्थानं वज्रर्षभनाराचसंहननमुपघातं प्रत्येकमित्येकादशके प्रक्षिप्ते सति द्विपञ्चाशद्भवति। अत्र षड्भिः संस्थानैः षड्भङ्गाः, ते च वक्ष्यमाणसामान्यमनुष्यभङ्गग्रहणेन गृहीता द्रष्टव्याः, एवमुत्तरत्रापि। एतस्याश्च द्विपञ्चाशतः सयोगिकेवली समुद्घातगत औदारिकमिश्रकाययोगे वर्तमान उदीरकः। एषैव च द्विपञ्चाशत्तीर्थकरनामसहिता त्रिपञ्चाशत्। केवलमिह संस्थानं समचतुरस्रमेव वक्तव्यं। अस्या अप्युदीरकः सयोगिकेवली तीर्थकर औदारिकमिश्रकाययोगे वर्तमानो वेदितव्यः। तथा सैव द्विपञ्चाशत् पराघातनामोच्छ्वासनाम प्रशस्ताप्रशस्तविहायोगत्योरन्यतरा विहायोगतिः सुस्वरदुःस्वरयोरन्यतरस्वरनामेतिचतुष्टयप्रक्षेपात् षट्पञ्चाशद्भवति। एनां च सयोगिकेवली औदारिककाययोगे वर्तमान उदीरयति। पराघातोच्छ्वासप्रशस्तविहायोगतिसुस्वरप्रक्षेपात्त्रिपञ्चाशत् सप्तपञ्चाशद्भवति। एतस्याश्च तीर्थकरः

सयोगिकेवली औदारिककाययोगे वर्तमान उदीरकः । सप्तपञ्चाशदेव वाग्योगनिरोधे षट्पञ्चाशद्भवति । उच्छ्वासेऽपि न
निरुद्धे पञ्चपञ्चाशत् । अतीर्थकरकेवलिनः प्रागुक्ताः षट्पञ्चाशद्वाग्योगे निरुद्धे पञ्चपञ्चाशद्भवति । उच्छ्वासेऽपि च
निरुद्धे चतुःपञ्चाशत् । अत्र द्विपञ्चाशच्चतुःपञ्चाशद्वर्जेषु शेषेषु षट्सु प्रत्येकमेकको विशेषभङ्ग प्राप्यत इति सर्वसं-
ख्यया केवलिनां षड्भङ्गाः । तत्रैकचत्वारिंशत्यतीर्थकृत एकः । शेषेषु तु पञ्चसु तीर्थकृतः । तदेवमुक्तानि केवलिनामुदीर-
णास्थानानि । संप्रत्येकेन्द्रियाणामभिधीयते—एकेन्द्रियाणामुदीरणास्थानानि पञ्च, तद्यथा—द्विचत्वारिंशत् पञ्चाशत्
एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ स्थावरनामैकेन्द्रियजातिर्बादरसूक्ष्मयोरेकतरत्
पर्याप्तापर्याप्तयोरेकतरत् दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरदित्येता नव प्रकृतयः प्रागुक्ताभिर्ध्रुवोदीरणाभिस्त्रय-
स्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशद्भवति । अत्र च भङ्गाः पञ्च, तद्यथा—बादरसूक्ष्माभ्यां प्रत्येकं पर्याप्ता-
पर्याप्ताभ्यामयशःकीर्त्या सह चत्वारः, बादरपर्याप्तयशःकीर्तिनिश्चैकः । सूक्ष्मापर्याप्ताभ्यां सह यशःकीर्तेरुदयो न भवति,
तदभावाच्च नोदीरणेति कृत्वा तदाश्रिता विकल्पा न भवन्ति । एषा द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्य वेदि-
तव्या । ततः शरीरस्थस्यौदारिकशरीरौदारिकसंघातौदारिकबन्धनचतुष्टयहुण्डसंस्थानोपघातप्रत्येकसाधारणान्यतररूपं
नवकं प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, ततः पञ्चाशद्भवति । अत्र च भङ्गा दश, तद्यथा—बादरपर्याप्तस्य प्रत्येकसा-
धारणाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च चत्वारो भङ्गाः, अपर्याप्तबादरस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वौ,
सूक्ष्मस्य च पर्याप्तापर्याप्तप्रत्येकसाधारणैरयशःकीर्त्या सह चत्वार इति दश । बादरवायुकायिकस्य वैक्रियं कुर्वतः औदा-

रिकपङ्कस्थाने वैक्रियपङ्कमवगन्तव्यं । ततश्च तस्यापि पञ्चाशदेवोदीरणायोग्या भवति । केवलमिह बादरपर्याप्तप्रत्येका-यशःकीर्तिभिरेक एव भंगः । तैजस्कायिकवायुकायिकयोर्हि साधारणयशःकीर्त्योरुदयो न भवति, तदभावाच्च नाप्युदी-रणा, ततस्तदाश्रिता भंगा न प्राप्यन्ते । तदेवं सर्वसंख्यया पञ्चाशत्येकादश भंगाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते एकपञ्चाशद्भवति । अत्र च भंगाः षट्, तद्यथा—बादरस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, सूक्ष्मस्य प्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वौ । बादरवायुकायिकस्य च वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य पराघाते क्षिप्ते प्रागुक्ता पञ्चाशत् एकपञ्चाशद्भवति । अत्र च प्राग्वदेक एव भंगः । सर्वसंख्यया चैकपञ्चाशति सप्त भंगाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते द्विपञ्चाशद्भवति । अत्रापि भंगाः प्राग्वत् षट् । अथवा शरीरप-र्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते आतपोद्योतयोरन्यतरस्मिन् उदिते द्विपञ्चाशद्भवति । अत्रापि भंगाः षट्, तद्यथा—बा-दरस्योद्योतेन सहितस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्तिपदैश्चत्वारः, आतपसहितस्य प्रत्येकयशःकीर्त्ययशःकीर्तिप-दैर्द्वौ भंगौ । बादरवायुकायिकस्य च वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते प्रागुक्ता एकपञ्चाशत् द्विप-ञ्चाशद्भवति । तत्र च प्राग्वदेक एव भंगः । तैजस्कायिकवायुकायिकयोर्हि आतपोद्योतयशःकीर्तीनामुदयाभावादुदीरणा न भवति, ततस्तदाश्रिता भंगा अत्र न प्राप्यन्ते । सर्वसंख्यया द्विपञ्चाशति भंगास्त्रयोदश । तथा प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां द्विपञ्चाशति आतपोद्योतयोरन्यतरस्मिन् क्षिप्ते त्रिपञ्चाशद्भवति । अत्र भंगाः षट् ये प्रागात-पोद्योतान्यतरसहिताया द्विपंचाशत्यभिहिताः । सर्वसंख्यया चैकेन्द्रियाणां भंगा द्विचत्वारिंशत् । द्वीन्द्रियाणामुदीर-

णस्थानानि षट्, तद्यथा—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ द्वीन्द्रियजातिस्त्रसनाम बादरनाम पर्याप्तापर्याप्तयोरेकतरत् दुर्भगमनादेयं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्ताभिस्त्रयस्त्रिंशत्संख्याकाभिर्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति । एषा च द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्यावसेया । अत्र च भंगास्त्रयः, तद्यथा—अपर्याप्तकनामोदये वर्तमानस्यायशःकीर्त्या सहैको भंगः, पर्याप्तकनामोदये वर्तमानस्य यशःकीर्त्ययशःकीर्तिभ्यां द्वाविति । ततः शरीरस्थस्यौदारिकसप्तकं हुण्डसंस्थानं सेवार्तसंहननं उपघातनाम प्रत्येकनामेत्येकादशकं प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, ततो जाता द्विपञ्चाशत् । अत्र च भंगास्त्रयः, ते च प्रागिव द्रष्टव्याः । ततः शरीरपर्याप्त्या पर्याप्तस्य विहायोगतिपराघातयोः प्रक्षिप्तयोश्चतुःपञ्चाशद्भवति । अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भंगौ । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव द्वौ भंगौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव द्वौ भंगौ । सर्वेऽपि पञ्चपञ्चाशति चत्वारो भंगाः । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां पञ्चपञ्चाशति सुस्वरदुःस्वरयोरेकतरस्मिन् प्रक्षिप्ते षट्पञ्चाशद्भवति । अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भंगाः । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशद्भवति । अत्र यशःकीर्त्ययशःकीर्तिभ्यां द्वौ भंगौ । सर्वे षट्पञ्चाशति षड् भंगाः । ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां षट्पञ्चाशति उद्योतनाम्नि प्रक्षिप्ते सप्तपञ्चाशद्भवति । अत्र सुस्वरदुःस्वरयशःकीर्त्ययशःकीर्तिपदैश्चत्वारो भंगाः । सर्वे द्वीन्द्रियाणां भंगा द्वाविंशतिः ।

एवं त्रीन्द्रियाणां चतुरिन्द्रियाणां च प्रत्येकमुदीरणास्थानानि भावनीयानि। नवरं द्वीन्द्रियजातिस्थाने त्रीन्द्रियाणां त्रीन्द्रियजातिश्चतुरिन्द्रियाणां चतुरिन्द्रियजातिरभिधातव्या । प्रत्येकं च भङ्गा द्वाविंशतिर्द्वाविंशतिरवसेयाः। सर्वसंख्यया विकलेन्द्रियाणां भङ्गाः षट्षष्टिः । तिर्यक्पञ्चेन्द्रियाणां वैक्रियलब्धिरहितानामुदीरणास्थानानि षट् । तद्यथा—द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र तिर्यग्गतितिर्यगानुपूर्व्यौ पञ्चेन्द्रियजातिस्त्रसनाम बादरनाम पर्याप्तापर्याप्तयोरेकतरत् सुभगादेययुगलदुर्भगानादेययुगलयोरेकतरत् युगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयः प्रागुक्ताभिस्त्रयस्त्रिंशत्संख्याभिर्ध्रुवोदीरणाभिः सह द्विचत्वारिंशद्भवति । एषा च द्विचत्वारिंशदपान्तरालगतौ वर्तमानस्य वेदितव्या । अत्र च भंगाः पञ्च । तत्र पर्याप्तकनामोदये वर्तमानस्य सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिभिश्चत्वारो भंगा', अपर्याप्तकनामोदये वर्तमानस्य तु दुर्भगानादेयायशःकीर्तिभिरेक एव भंगः । इह सुभगादेये दुर्भगानादेये वा युगपदुदयमायातः । तत उदीरणापि युगपदेवेति पञ्चैव भंगाः। अपरे पुनराहुः—सुभगादेययोर्दुर्भगानादेययोर्वा नैकान्तेन युगपदुदयभावनियमः, अन्यथापि दर्शनात् । ततः पर्याप्तकनामोदये वर्तमानस्य सुभगदुर्भगादेयानादेययशःकीर्त्ययश'कीर्तिभिरष्टौ भंगाः, अपर्याप्तकनामोदये वर्तमानस्य तु दुर्भगानादेयायशःकीर्तिभिरेक इति सर्वसंख्यया द्विचत्वारिंशति नव । ततः शरीरस्थस्यौदारिकसप्तकं षण्णां संस्थानानामेकतमत् संस्थानं षण्णां संहननानामेकतमत्संहननं उपघातं प्रत्येकनामेत्येकादशकं प्रक्षिप्यते तिर्यगानुपूर्वी चापनीयते, ततो द्विपञ्चाशद्भवति । अत्र भंगानां पञ्चचत्वारिंशं शतं, तद्य-

या—पर्याप्तकस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगादेयदुर्भगानादेययुगलाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च भङ्गानां चतुश्चत्वारिंशं शतं, अपर्याप्तस्य च हुंडसंस्थानसेवार्तसंहननदुर्भगानादेयायशःकीर्तिभिरेक इति । ये पुनः सुभगादेययोर्दुर्भगानादेययोर्वा केवलयोरप्युदयमिच्छन्ति तन्मतेन द्विपञ्चाशति भङ्गाना द्वे शते एकोननवत्यधिके वेदितव्ये । तत्र पर्याप्तस्य षड्भिः संस्थानैः षड्भिः संहननैः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च भङ्गा द्वे शते अष्टाशीत्यधिके, अपर्याप्तकस्य तु प्रागुक्तस्वरूप एक इति । तस्यामेव द्विपञ्चाशति शरीरपर्याप्त्या पर्याप्तस्य पराघाते प्रशस्ताप्रशस्तान्यतरविहायोगतौ च प्रक्षिप्तायां चतुःपञ्चाशद्भवति । अत्र पर्याप्तानां प्राक् चतुश्चत्वारिंशं शतं भङ्गकानामुक्तं, तदेव विहायोगतिद्विकगुणितमवगन्तव्यं । तथा च सत्यत्र भङ्गानां द्वे शते अष्टाशीत्यधिके भवतः । मतान्तरेण पुनः पञ्च शतानि षट्सप्तत्यधिकानि । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव भङ्गानां द्वे शते अष्टाशीत्यधिके, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि भङ्गानां द्वे शते अष्टाशीत्यधिके, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेन भङ्गकानां पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण तु द्विपञ्चाशदधिकानि एकादश शतानि । ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरदुःस्वरयोरन्यतरस्मिन् क्षिप्ते षट्पञ्चाशद्भवति । तत्र स्वमतचिन्तायां ये उच्छ्वासेन द्वे शते अष्टाशीत्यधिके भङ्गकानां प्राक् लब्धे ते इह स्वरद्विकेन गुण्यते, ततो लब्धानि पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण पुनरिह द्विपञ्चाशदधिकान्येकादश शतानि भङ्गकाना भवन्ति । अथवा

प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते षट्पञ्चाशद्भवति । अत्र च स्वमतचिन्तायां प्रागिव द्वे शते अष्टाशीत्यधिके भङ्गकानां, मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि । सर्वसंख्यया स्वमतेन षट्पञ्चाशति भङ्गा अष्टौ शतानि चतुःषष्ट्यधिकानि, मतान्तरेण सप्तदश शतान्यष्टाविंशत्यधिकानि । ततः स्वरसहिताया षट्पञ्चाशति उद्योतनाम्नि प्रक्षिप्ते सप्तपञ्चाशद्भवति । अत्र ये प्राक् स्वरसहितायां षट्पञ्चाशति भङ्गा अभिहिताः स्वमतेन पञ्च शतानि षट्सप्तत्यधिकानि, मतान्तरेण द्विपञ्चाशदधिकान्येकादश शतानि, त एवात्रापि द्रष्टव्याः । तथा तेषामेव तिर्यक्पञ्चेन्द्रियाणां वैक्रियं कुर्वतामुदीरणास्थानानि पञ्च भवन्ति । तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र वैक्रियसप्तकं समचतुरस्रसंस्थानं उपघातं प्रत्येकमिति प्रकृतिदशकं प्रागुक्तायां तिर्यक्पञ्चेन्द्रियप्रायोग्यायां द्विचत्वारिंशति प्रक्षिप्यते, तिर्यगानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिपर्याप्तपदैश्चत्वारो भङ्गाः, मतान्तरेण पुनः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च पर्याप्तकेन सहाष्टौ भङ्गाः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां त्रिपञ्चाशद्भवति । अत्रापि प्रागिव चत्वारो भङ्गाः, मतान्तरेण पुनरष्टौ । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासनाम्नि प्रक्षिप्ते चतुःपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन भङ्गाश्चत्वारो मतान्तरेण पुनरष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया चतुःपञ्चाशति स्वमतेनाष्टौ भङ्गाः, मतान्तरेण षोडश । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति स्वरे प्रक्षिप्ते

पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेण पुनरष्टौ । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ । भाषापर्याप्त्या स्वमतेन पञ्चपञ्चाशति भङ्गा अष्टौ, मतान्तरेण षोडश । ततः स्वरसहितायां पञ्चपञ्चाशति उद्योते क्षिप्ते षट्पञ्चाशद्भवति । अत्रापि भङ्गाः स्वमतेन चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया वैक्रियं कुर्वतां तिर्यक्पञ्चेन्द्रियाणां भङ्गा अष्टाविंशतिः, मतान्तरेण षट्पञ्चाशत् । सामान्येन सर्वतिर्यक्पञ्चेन्द्रियाणां स्वमतेन भङ्गाश्चतुर्विंशतिशतानि व्यशीत्यधिकानि मतान्तरेण एकोनपञ्चाशच्छतानि द्विषष्ट्यधिकानि । संप्रति मनुष्याणामुदीरणास्थानानि प्रतिपाद्यन्ते-तत्र केवलिनां प्रागेवोक्तानि । अन्येषां तु पञ्च, तद्यथा-द्विचत्वारिंशत् द्विपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि सर्वाण्यपि यथा प्राक् तिर्यक्पञ्चेन्द्रियाणामुक्तानि तथैवात्रापि वक्तव्यानि, नवरं तिर्यग्गतितिर्यगानुपूर्व्योः स्थाने मनुष्यगतिमनुष्यानुपूर्व्यौ वक्तव्ये । पञ्चपञ्चाशत् षट्पञ्चाशच्चोद्योतरहिता वक्तव्या । वैक्रियाहारकसंयतान्मुक्त्वा शेषमनुष्याणामुद्योतोदयाभावात् । भङ्गा अपि सर्वत्राप्युद्योतरहितास्तथैव स्वमतपरमतापेक्षया वक्तव्यास्तद्यथा-स्वमतेन द्विचत्वारिंशति पञ्च, द्विपञ्चाशति पञ्चचत्वारिंशं शतं, चतुःपञ्चाशति द्वे शते अष्टाशीत्यधिके, पञ्चपञ्चाशत्यपि द्वे शते अष्टाशीत्यधिके, षट्पञ्चाशति पञ्च शतानि षट्सप्तत्यधिकानि । परमतेन तु यथाक्रमं ९ । २८९ । ५७६ । ५७६ । ११५२ । वैक्रियमपि कुर्वतां मनुष्याणामुदीरणास्थानानि पञ्च भवन्ति, तद्यथा-एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्चपञ्चाशत्, षट्पञ्चाशच्चेति । तत्रैकपञ्चाशत्त्रिपञ्चाशच्च यथा प्राग्वैक्रियतिर्यक्पञ्चेन्द्रियाणामुक्ता तथात्रापि द्रष्टव्या । चतुःपञ्चाशत्युद्योत-

॥ १३३ ॥

सहितायां प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । उत्तरवैक्रियं कुर्वतां संयतानामुद्योतनामोदयमागच्छति, नान्येषां, ततस्तेन सह चतुःपञ्चाशति प्रशस्त एवैको भङ्गो भवति, संयतानां दुर्भगानादेयायशःकीर्त्युदयाभावात् । सर्वसंख्यया चतुःपञ्चाशति स्वमतेन पञ्च भङ्गाः मतान्तरेण नव । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । अथवा संयतानां स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव एक एव भङ्गः । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेन पञ्च भङ्गा मतान्तरेण नव । पञ्चपञ्चाशति सुस्वरसहितायामुद्योते क्षिप्ते षट्पञ्चाशद्भवति । तस्यां चैक एव प्रशस्तो भंगः । सर्वसंख्यया वैक्रियमनुष्याणां स्वमतेनैकोनविंशतिर्भङ्गाः मतान्तरेण पञ्चत्रिंशत् । संप्रत्याहारकं कुर्वतामुदीरणास्थानान्युच्यन्ते—आहारकसंयतानामुदीरणास्थानानि पञ्च, तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्राहारकसप्तकं समचतुरस्रसंस्थानमुपघातं प्रत्येकमिति प्रकृतिदशकं प्रागुक्तायां मनुष्यगतिप्रायोग्यायां द्विचत्वारिंशति प्रक्षिप्यते, मनुष्यानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । केवलमिह सर्वाण्यपि पदानि प्रशस्तान्येवेति कृत्वा एक एव भंगः । शरीरपर्याप्त्या पर्याप्तस्य प्रशस्तविहायोगतिपराघातयोः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्राप्येक एव भङ्गः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्राप्येक एव भंगः । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशद्भवति । अत्रापि प्रागिवैक एव भंगः । सर्वसंख्यया चतुःपञ्चाशति द्वौ भङ्गौ । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वाससहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्राग्वदेक एव भङ्गः ।

अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशन्नवति । अत्राप्येक एव भंगः । सर्वसंख्यया पञ्चपञ्चाशति द्वौ भंगौ । ततो भाषापर्याप्त्या पर्याप्तस्य स्वरसहितायां पञ्चपञ्चाशत्युद्योते क्षिप्ते षट्पञ्चाशन्नवति । अत्राप्येक एव भंगः । आहारकशरीरिणः सर्वसंख्यया सप्त भंगाः । तदेवं मनुष्याणां सामान्यवैक्रियशरीर्याहारकशरीरिकेवलिनां भंगाः सर्वसंख्यया त्रयोदश शतानि चतुस्त्रिंशदधिकानि भवन्ति । परमतेन तु षड्विंशतिशतानि पञ्चाशदधिकानि । देवानामुदीरणास्थानानि षट्, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र देवगतिदेवानुपूर्व्यौ पञ्चेन्द्रियजातित्रसनाम बादरनाम पर्याप्तनाम सुभगादेययुगलदुर्भगानादेययुगलयोरेकतरद्युगलं यशःकीर्त्ययशःकीर्त्योरेकतरेत्येता नव प्रकृतयो ध्रुवोदीरणाभिस्त्रयस्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशन्नवति । अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिभिश्चत्वारो भङ्गाः, मतान्तरेण पुनः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां चाष्टौ भङ्गाः । ततः शरीरस्थस्य वैक्रियसप्तकं समचतुरस्रसंस्थानं उपघातं प्रत्येकमित्येता दश प्रकृतयः प्रक्षिप्यन्ते, देवानुपूर्वी चापनीयते, तत एकपञ्चाशन्नवति । अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघातप्रशस्तविहायोगत्योः प्रक्षिप्तयोस्त्रिपञ्चाशन्नवति । अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । देवानामप्रशस्तविहायोगतेरुदयाभावात्तदाश्रिता भङ्गा न प्राप्यन्ते । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशन्नवति । अत्रापि स्वमतेन चत्वारो भङ्गाः, मतान्तरेणाष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्योच्छ्वासेऽनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशन्नवति ।

अत्रापि प्रागिव स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया चतुःपञ्चाशति स्वमतेनाष्टौ भङ्गा मतान्तरेण षोडश । ततो भाषापर्याप्त्या पर्याप्तस्योच्छ्वासहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन प्रागिव चत्वारो भंगा मतान्तरेणाष्टौ । अथवा प्राणापानपर्याप्त्या पर्याप्तस्य स्वरेऽनुदिते उद्योतनाम्नि तूदिते पञ्चपञ्चाशद्भवति । अत्रापि स्वमतेन भंगाश्चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया पञ्चपञ्चाशति स्वमतेनाष्टौ भङ्गा मतान्तरेण तु षोडश । ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरसहितायां पञ्चपञ्चाशति उद्योते क्षिप्ते षट्पञ्चाशद्भवति । अत्रापि स्वमतेन त एव चत्वारो भङ्गा मतान्तरेणाष्टौ । सर्वसंख्यया देवानां स्वमतेन द्वात्रिंशद्भंगा मतान्तरेण चतुःषष्टिः । नैरयिकाणामुदीरणास्थानानि पञ्च, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशच्चेति । तत्र नरकगतिनरकानुपूर्व्यौ पञ्चेन्द्रियजातिस्त्रसबादरपर्याप्तदुर्भगानादेयायशःकीर्तय इत्येता नव प्रकृतयो ध्रुवोदीरणाभिस्त्रयस्त्रिंशत्संख्याकाभिः सह सम्मिश्रा द्विचत्वारिंशद्भवति । अत्र च सर्वाण्यपि पदानि अप्रशस्तान्येवेति कृत्वा एक एव भङ्गः । ततः शरीरस्थस्य वैक्रियसप्तकं हुंडसंस्थानं उपघातं प्रत्येकमिति दश प्रकृतयः प्रक्षिप्यन्ते, नरकानुपूर्वी चापनीयते, तत एकपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततः शरीरपर्याप्त्या पर्याप्तस्य पराघाताप्रशस्तविहायोगत्योः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततः प्राणापानपर्याप्त्या पर्याप्तस्योच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्राप्येक एव भंगः । ततो भाषापर्याप्त्या पर्याप्तस्य दुःस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्राप्येक एव भंगः । सर्वसंख्यया नैरयिकाणां पञ्च भङ्गाः । तदेवमुक्तानि नामकर्मण उदीरणास्थानानि । सम्प्रत्येतान्येव गुणस्थानकेषु दर्शयति–'गुणिसु त्ति' नाम्नो नाम-

कर्मणो गुणिषु गुणस्थानेषु मिथ्यादृष्टिप्रभृतिषु सयोगिकेवलिपर्यन्तेषु यथासंख्यं नवादिसंख्यान्युदीरणास्थानानि भवन्ति । तत्र मिथ्यादृष्टेर्नवोदीरणास्थानानि, तद्यथा—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । अमूनि च सर्वाण्यपि मिथ्यादृष्टीनेकेन्द्रियादीनधिकृत्य स्वयं परिभावनीयानि । सासादनसम्यग्दृष्टेरुदीरणास्थानानि सप्त, तद्यथा—द्विचत्वारिंशत् पञ्चाशत् एकपञ्चाशत् द्विपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र द्विचत्वारिंशत् बादरैकेन्द्रियद्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानां सासादनसम्यग्दृष्टीनामपान्तरालगतौ वर्तमानानामवसेया । तथा एकेन्द्रियाणां शरीरस्थानां पञ्चाशत् । देवानां शरीरस्थानामेकपञ्चाशत् । विकलेन्द्रियतिर्यक्पञ्चेन्द्रियमनुष्याणां शरीरस्थानां द्विपञ्चाशत् । देवनैरयिकाणां पर्याप्तानां सासादनसम्यक्त्वे वर्तमानानां पञ्चपञ्चाशत् । तिर्यक्पञ्चेन्द्रियमनुष्यदेवानां पर्याप्तानां षट्पञ्चाशत् । तिर्यक्पञ्चेन्द्रियाणामुद्योतवेदकानां पर्याप्तानां सप्तपञ्चाशत् । सम्यग्मिथ्यादृष्टेस्त्रीण्युदीरणास्थानानि, तद्यथा—पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र देवनैरयिकाणां पञ्चपञ्चाशत् । तिर्यग्मनुष्यदेवानां षट्पञ्चाशत् । तिर्यक्पञ्चेन्द्रियाणामुद्योतकाना सप्तपञ्चाशत् । अविरतसम्यग्दृष्टेरष्टावुदीरणास्थानानि, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति । तत्र नैरयिकदेवतिर्यक्पञ्चेन्द्रियमनुष्याणा द्विचत्वारिंशत् । देवनैरयिकाणामेकपञ्चाशत् । तिर्यक्पञ्चेन्द्रियमनुष्याणां द्विपञ्चाशत् । देवनैरयिकतिर्यग्मनुष्याणां त्रिपञ्चाशत् । देवनैरयिकतिर्यक्पञ्चेन्द्रियवैक्रियतिर्यग्मनुष्याणां चतुःपञ्चाशत् । एतेषामेव पञ्चपञ्चाशदपि । देवतिर्यक्पञ्चेन्द्रियमनुष्याणां षट्पञ्चाशत् ।

तिर्यक्पञ्चेन्द्रियाणामुद्योतवेदकाना सप्तपञ्चाशत्। देशविरतस्योदीरणास्थानानि षट्, तद्यथा—एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्चपञ्चाशत्, षट्पञ्चाशत्, सप्तपञ्चाशच्चेति। तत्रैकपञ्चाशत्त्रिपञ्चाशच्चतुःपञ्चाशत्पञ्चपञ्चाशच्च तिर्यङ्मनुष्याणा वैक्रियशरीरवर्तमानानामवसेया। तिर्यङ्मनुष्याणामेव स्वभावस्थानां वैक्रियशरीरिणां च षट्पञ्चाशत्। तेषामेव तिर्यक्पञ्चेन्द्रियाणामुद्योतसहितानां सप्तपञ्चाशत्। प्रमत्तसंयतानामुदीरणास्थानानि पञ्च, तद्यथा—एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्र पञ्चाप्येतानि वैक्रियशरीरिणामाहारकशरीरिणां वा द्रष्टव्यानि। षट्पञ्चाशत्पुनरौदारिकस्थानामप्यवगन्तव्या। अप्रमत्तसंयतानां द्वे उदीरणास्थाने, तद्यथा—पञ्चपञ्चाशत् षट्पञ्चाशच्चेति। तत्र षट्पञ्चाशदौदारिकशरीरस्थानां। इह केषांचित् वैक्रियशरीरस्थानामाहारकशरीरस्थानां वा संयतानां सर्वपर्याप्त्या पर्याप्ताना कियत्कालमप्रमत्तभावोऽपि लभ्यत इति तेषां द्वे अप्युक्तरूपे उदीरणास्थाने। 'एकं पञ्चसु त्ति' पञ्चसु गुणस्थानकेषु अपूर्वकरणनिवृत्तबादरसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहरूपेषु एकमुदीरणास्थानं भवति—षट्पञ्चाशत्, सा चौदारिकशरीरस्थानामिति। 'एक्कम्मि अट्ठ त्ति' एकस्मिन् सयोगिकेवलिगुणस्थानकेऽष्टावुदीरणास्थानानि, तद्यथा—एकचत्वारिंशत् द्विचत्वारिंशत् द्विपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशत् सप्तपञ्चाशच्चेति। एतानि च प्रागेव सप्रपञ्चं भावितानीति नेह भूयो भाव्यन्ते। तदेवं चिन्तितानि गुणस्थानकेषूदीरणास्थानानि। संप्रति कस्मिन्नुदीरणास्थाने कति भङ्गाः प्राप्यन्त इति चिन्तायां तन्निरूपणार्थमाह—'गाणेत्यादि' स्थानक्रमेणैकचत्वारिंशदादुदीरणास्थाने क्रमेण भङ्गा अपि च वक्ष्यमाणसंख्यया ज्ञातव्याः, तद्यथा—एकचत्वारिंशत्येको भङ्गः, स चातीर्थकरकेव-

ङ्गिनः। द्विचत्वारिंशति त्रिंशद्भङ्गाः, तत्र नैरयिकानधिकृत्यैकः, एकेन्द्रियानधिकृत्य पञ्च द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं त्रिकं प्राप्यत इति नव, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च, मनुष्यानप्यधिकृत्य पञ्च, तीर्थकरमधिकृत्यैकः, देवानधिकृत्य चत्वारः। ये पुनः सुभगादेययोर्दुर्भगानादेययोश्च केवट (ला) केवलयोरप्युदयमिच्छन्ति, तन्मतेन द्विचत्वारिंशति द्विचत्वारिंशद्भङ्गाः, यतस्तन्मतेन तिर्यक्पञ्चेन्द्रियानधिकृत्य नव, मनुष्यानधिकृत्य नव, देवानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते, शेषं तथैव। पञ्चाशत्येकादश भङ्गाः, ते चैकेन्द्रियानेवाधिकृत्य प्राप्यन्ते, अन्यत्र पञ्चाशतोऽप्राप्यमाणत्वात्। एकपञ्चाशत्येकविंशतिर्भङ्गाः, तत्र नैरयिकानधिकृत्यैकः। पञ्चेन्द्रियानधिकृत्य सप्त, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य चत्वारः, वैक्रियमनुष्यानप्यधिकृत्य चत्वारः, आहारकशरीरिणः संयतानधिकृत्यैकः, देवानाश्रित्य चत्वारः इत्येकविंशतिः। मतान्तरेण पुनर्वैक्रियतिर्यग्मनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इत्येकपञ्चाशति तदपेक्षया त्रयस्त्रिंशद्भङ्गाः। 'सत्तार तिसए य त्ति' सप्तादश सप्तादशाधिका त्रिशती भङ्गानां द्विपञ्चाशत्यवगन्तव्याः, तत्रैकेन्द्रियानाश्रित्य त्रयोदश, द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं प्राप्यत इति नव, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्चचत्वारिंशं शतं, मनुष्यानप्यधिकृत्य पञ्चचत्वारिंशं शतमिति। अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियान्मनुष्यांश्चाधिकृत्य प्रत्येकं द्वे द्वे शते भङ्गानामेकोननवत्यधिके प्राप्येते इति तदपेक्षया द्विपञ्चाशति भङ्गानां षट् शतानि प्राप्यन्ते। त्रिपञ्चाशति भङ्गानामेकविंशतिः, तद्यथा—नैरयिकानधिकृत्यैकः, एकेन्द्रियानधिकृत्य षट्, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य चत्वारः, वैक्रियमनुष्यानप्यधिकृत्य चत्वारः, आहारकशरीरिणोऽधिकृत्य पुनरेकः तीर्थकर-

मप्याश्रित्यैकः, देवानप्यधिकृत्य चत्वारः । अत्रापि मतान्तरेण वैक्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इति तदपेक्षया त्रिपञ्चाशति त्रयस्त्रिंशद्भङ्गाः । चतुःपञ्चाशति भङ्गानां षट् शतानि षडुत्तराणि, तद्यथा—नैरयिकानधिकृत्यैकः द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं द्वौ द्वौ प्राप्येते इति षट्, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ, स्वभावस्थान्मनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियमनुष्यानधिकृत्य चत्वारः, संयतान् वैक्रियशरीरिणोऽधिकृत्योद्योतेन सहैकः, आहारकशरीरिणः संयतानधिकृत्य द्वौ, देवानधिकृत्याष्टाविति । अत्रापि मतान्तरेण प्राकृततिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश, मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य षोडश भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया चतुःपञ्चाशति त्र्यधिकानि द्वादश शतानि । पञ्चपञ्चाशति भङ्गानां नव शतानि एकाधिकानि, तद्यथा—नैरयिकानधिकृत्यैकः, द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारः प्राप्यन्ते इति द्वादश, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिणोऽधिकृत्याष्टौ, मनुष्यान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियशरीरिणोऽधिकृत्य चत्वारः, वैक्रियसंयतानधिकृत्योद्योतेन सहैकः आहारकशरीरिणोऽधिकृत्य द्वौ, तीर्थकरमधिकृत्यैकः, देवानधिकृत्याष्टाविति । मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकान्येकादशशतानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश, मनुष्यान् स्वभावस्थानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य

चोदय भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया पञ्चपञ्चाशति एकाशीत्यधिकानि सप्तदश शतानि । षट्पञ्चाशति भङ्गा-नामेकोनसप्तत्यधिकानि चतुर्दश शतानि, तद्यथा–द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं षट् षट् प्राप्यन्ते इत्य-ष्टादश, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्याष्टौ शतानि चतुःषष्ट्यधिकानि, वैक्रियशरीरिणोऽधिकृत्य चत्वारः, मनु-ष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिणः संयतानधिकृत्योद्योतेन सहैकः, आहारकशरीरिणः संय-तानधिकृत्यैकः तीर्थकरमाश्रित्यैकः देवानाश्रित्य चत्वारः । अत्र मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य सप्तदशशता-न्यष्टाविंशत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ, मनुष्यानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि, यानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते, शेषं तथैवेति तदपेक्षया षट्पञ्चाशति एकोनत्रिंशच्छतानि सप्तदशाधिकानि भङ्गानां भवन्ति । सप्तपञ्चाशति भङ्गानां पञ्चशती एकोननवत्यधिका, तद्यथा–द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारश्चत्वारः प्राप्यन्त इति द्वादश, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, तीर्थकरमाश्रित्यैक इति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि भङ्गानां प्राप्यन्ते, शेषं तथैवेति तदपेक्षया सप्तपञ्चाशति पञ्चषष्ट्यधिकानि एकादश शतानि भङ्गानां भवन्ति ॥ २५–२६–२७ ॥

संप्रति गतीराश्रित्य स्थानसंख्यां करोति—

पंच नव नवग छक्काणि गईसु ठाणाणि सेसकम्माणं । एगेगमेव नेयं साहित्तेगेगपगईउ ॥ २८ ॥

पंच ति–तिर्यग्गतावुदयस्थानानि पञ्च, तद्यथा–द्विचत्वारिंशत्, एकपञ्चाशत्, त्रिपञ्चाशत्, चतुःपञ्चाशत्, पञ्च-

पञ्चाशच्चेति । तिर्यग्गतावेकचत्वारिंशद्वर्जानि शेषाणि नवोदीरणास्थानानि । मनुष्यगतावपि सयोगिकेवल्यादीनधिकृत्य पञ्चाशद्वर्जानि शेषाणि नवोदीरणास्थानानि । देवगतौ षडुदीरणास्थानानि, तद्यथा—द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि च सर्वाण्यपि प्राक् सप्रपञ्चं भावितानीति नेह भूयो भाव्यन्ते। तदेवमुक्तानि नामकर्मणः सप्रपञ्चमुदीरणास्थानानि । सांप्रतं शेषकर्मणामुदीरणास्थानप्रतिपादनार्थमाह—'सेसेसु' इत्यादि शेषकर्मणां ज्ञानावरणवेदनीयायुर्गोत्रान्तरायलक्षणानामुदीरणास्थानमेकैकमवगन्तव्यं, तद्यथा—ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकमेकैकमुदीरणास्थानं । वेदनीयायुर्गोत्राणां तु चैकप्रकृत्यात्मकं । न ह्यमीषां द्व्यादिकाः प्रकृतयो युगपदुदीर्यन्ते, युगपदुदयाभावात् । एतच्च ज्ञानावरणादीनामेकैकमुदीरणास्थानं प्रागुक्तैकैकप्रकृत्युदीरणायाः स्वामित्वं साधयित्वा निश्चित्य गुणस्थानकेषु नारकादिगतिषु स्वयमेव ज्ञेय ज्ञातव्यं ॥ २८ ॥

तदेवमुक्ता प्रकृत्युदीरणा, साम्प्रतं स्थित्युदीरणाभिधानावसरस्तत्र चैतेऽर्थाधिकारास्तद्यथा—लक्षणं, भेदः, साद्यनादिप्ररूपणा, अद्धाच्छेदः स्वामित्वं चेति । तत्र लक्षणभेदयोः प्रतिपादनार्थमाह—

संपत्तिए य उदए पओगओ दिस्सए उईरणा सा । सेचीका ठिइहिं ता जाहिं तो तत्तिगा एसा ॥२९॥

संपत्तिए त्ति—इह द्विविध उदयः संप्राप्त्युदयोऽसंप्राप्त्युदयश्च । तत्र यत्कर्मदलिकं कालप्राप्तं सत् अनुभूयते स संप्राप्त्युदयः । तथाहि—कालक्रमेण कर्मदलिकस्योदयहेतुद्रव्यक्षेत्रादिसामग्रीसंप्राप्तौ सत्यामुदयः संप्राप्त्युदयः । यत्पुनरकालप्राप्तं कर्मदलिकमुदीरणाप्रयोगेण वीर्यविशेषसंज्ञितेन समाकृष्य कालप्राप्तेन दलिकेन सहानुभूयते सोऽसंप्राप्त्युदयः । एवं

योदीरणा । तथा चाह—या स्थितिरकालप्राप्तापि सती प्रयोगेन उदीरणाप्रयोगेण संप्राप्त्युदये पूर्वोक्तस्वरूपे प्रक्षिप्ता सती अनुभवति [illegible] सा स्थित्युदीरणा । एष लक्षणनिर्देशः । अधुना भेद उच्यते—'भेदीकृत्यादि' उक्त यासां स्थितीनां भेदमभिधाय सत्तानि ताः पूर्वपुरुषारिजाप्या भेदीका उच्यते । ताश्च द्विधा—उदीरणायाः प्रायोग्या अप्रायो-ग्याश्च । ताः प्रायोग्याः ताश्चाप्रायोग्या इति चेदुच्यते—बन्धावलिकागता संक्रमावलिकागता उदयावलिकागताश्चाप्रा-योग्याः "संकमबंधुदयुव्वट्टणावलिगाइं करणाइं" इति वचनप्रामाण्यात् । शेषाश्च सर्वा अपि प्रायः प्रायोग्याः । ततोऽन्ये इति यासां प्रकृतीनामुत्कृष्टो बन्धः संभवति, तासामुत्कर्षत आवलिकाद्विकहीना सर्वाप्युत्कृष्टा स्थितिरुदीरणाप्रायोग्या । यस्मादि उदयोत्कृष्टबन्धकानां प्रकृतीनां बन्धावलिकायामतीतायामुदयावलिकातद्विर्वर्तिनीः स्थितीः सर्वा अप्युदीरयति । अनुदयोत्कृष्टबन्धानां तु संक्रमेणागतानामुदीरणाप्रायोग्या. आवलिकाद्विकहीनायाश्चोत्कृष्टस्थितेर्यावन्तः समयास्तावन्त उदीरणायाः भेदाः । तथाहि—उदयावलिकाया उपरिवर्तिनी समयमात्रा स्थितिः कस्याप्युदीरणाप्रायोग्या, यस्य ताव-त्येव शेषा तिष्ठति । एवं कस्यापि द्विसमयमात्रा, कस्यापि त्रिसमयमात्रा, एवं तावद्वाच्यं यावदावलिकाद्विकहीना सर्वापि सर्वोत्कृष्टा स्थितिरिति । अत्र योजना किं—भेदीकृतस्थितिरित्य उदीरणाप्रायोग्यान्यो जघन्यो यावतीत्र आवलिकाद्विकहीनोत्कृष्टस्थितिसमयप्रमाणा इत्यर्थः । उदीरणाप्रयोगेण समाकृष्य स्थितिं स्वप्राप्त्युदये दीयते, [illegible] नैवोदीरणा ॥ २९ ॥

तदेवं कृता भेदप्ररूपणा । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा–मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयसाद्यनादिप्ररूपणार्थमाह—

मूलठिई अजहन्ना मोहस्स चउव्विहा तिहा सेसा। वेयणियाऊण दुहा सेसविगप्पा उ सव्वासिं ॥३०॥

मूलठिइ त्ति–मूलस्थितिशब्दाभ्यां प्राकृतत्वात् प्रत्येकं षष्ठीविभक्तिलोपः । ततोऽयमर्थः–मूलप्रकृतीनां मध्ये मोहस्य मोहनीयस्य स्थितेरुदीरणाऽजघन्या चतुर्विधा चतुःप्रकारा । तद्यथा–सादिरनादिर्ध्रुवाऽध्रुवा च । तथा मोहनीयस्य जघन्या स्थित्युदीरणा सूक्ष्मसंपरायस्य क्षपकस्य स्वगुणस्थानकसमयाधिकावलिकाशेषे वर्तमानस्य भवति । ततोऽन्यत्र सर्वत्राप्यजघन्या, सा चोपशान्तमोहगुणस्थानके न भवति, ततः प्रतिपाते च भवति, ततोऽसौ सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, ध्रुवाऽभव्यानां, अध्रुवा भव्यानां । शेषा ज्ञानावरणदर्शनावरणनामगोत्रान्तरायाणां स्थित्युदीरणाऽजघन्या त्रिधा त्रिप्रकारा, तद्यथा–अनादिर्ध्रुवाऽध्रुवा च । तथाहि–ज्ञानावरणदर्शनावरणान्तरायाणां जघन्या स्थित्युदीरणा क्षीणकषायस्य स्वगुणस्थानसमयाधिकावलिकाशेषे वर्तमानस्य भवति, शेषकालं त्वजघन्या । सा चानादिः, सदैव भावात्। ध्रुवाध्रुवे पूर्ववत् । नामगोत्रयोस्तु जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या । सा चानादिः । ध्रुवाध्रुवे पूर्ववत् । वेदनीयायुषोरजघन्या स्थित्युदीरणा द्विधा, तद्यथा–सादिरध्रुवा च । तथाहि–वेदनीयस्य जघन्या स्थित्युदीरणा एकेन्द्रियस्य सर्वस्तोकस्थितिसत्कर्मणो लभ्यते । ततः तस्यैव समयान्तरे प्रवर्धमानसत्कर्मणोऽजघन्या । ततः पुनरपि जघन्येति जघन्याऽजघन्या च सादिरध्रुवा च । आयुषः पर्य-

स्तावलिकायां न भवति, पर्यवोत्पत्तिप्रथमसमये च भवति, ततः सादिरध्रुवा च । तथा सर्वासां प्रकृतीनां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विधा द्विप्रकाराः, तद्यथा—सादयोऽध्रुवाश्च । तथाहि—सर्वेषामपि कर्मणामायुर्वर्जानामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य कियत्कालं प्राप्यते, ततः समयान्तरे तस्याप्यनुत्कृष्टा, ततः पुनरपि समयान्तरे उत्कृष्टा, संक्लेशविशुद्ध्योः प्रायः प्रतिसमयमन्यथाऽन्यथाभावात्, ततो द्वे अपि साद्यध्रुवे । जघन्या च द्विधा प्रागेव भाविता । आयुषां तु विकल्पत्रयेऽपि युक्तिः प्रागुक्त्यैव प्रायोऽवसेया ॥ ३० ॥

तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतिविषयां तां चिकीर्षुराह—

मिच्छत्तस्स चउद्धा अजहण्णा धुवउदीरणाण तिहा । सेस विगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥३१॥

मिच्छत्तस्स त्ति—मिथ्यात्वस्याजघन्या स्थित्युदीरणा चतुर्विधा, तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र मिथ्यादृष्टेः सम्यक्त्वमुत्पादयतो मिथ्यात्वस्य प्रथमस्थितौ समयाधिकावलिकाशेषायां जघन्या स्थित्युदीरणा सादिरध्रुवा च । ततोऽन्यत्र सर्वत्राप्यजघन्या । सा च सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे अभव्यभव्यापेक्षया । तथा ध्रुवोदीरणानां पञ्चज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणपञ्चविधान्तरायतैजससप्तकवर्णादिविंशतिस्थिरास्थिर-शुभाशुभागुरुलघुनिर्माणरूपाणामजघन्या स्थित्युदीरणा त्रिधा । तद्यथा—अनादिर्ध्रुवाऽध्रुवा च । तथाहि—ज्ञानावरणपञ्चकान्तरायपञ्चकचक्षुरचक्षुरवधिकेवलदर्शनावरणरूपाणां चतुर्दशप्रकृतीनां क्षीणकषायस्य स्वगुणस्थानकसमयाधिकाव-लिकाशेषे वर्तमानस्य जघन्या स्थित्युदीरणा, सा च सादिरध्रुवा च । शेषा सर्वाप्यजघन्या । सा चानादिः, सर्वदैव भावात् ।

ध्रुवाध्रुवे पूर्ववत्। तैजससप्तकादीनां च त्रयस्त्रिंशत्संख्याकानां नामप्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये। सा च सादिरध्रुवा च। ततोऽन्या सर्वाप्यजघन्या, सा चानादिः। ध्रुवाध्रुवे पूर्ववत्। एतासामेव मिथ्यात्वादिप्रकृतीनामष्टाचत्वारिंशत्संख्याकानां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विप्रकाराः, तद्यथा—सादयोऽध्रुवाश्च। तथाहि—एतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टे संक्लेशे वर्तमानस्य कियत्कालं लभ्यते। ततः समयान्तरे तस्याप्यनुत्कृष्टा। ततो द्वे अपि साद्यध्रुवे। जघन्या च प्रागेव भाविता। 'सव्वविगप्पा य सेसाणं ति' शेषाणां नामप्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपा द्विविधाः, तद्यथा—सादयोऽध्रुवाश्च। साद्यध्रुवत्वं चाध्रुवोदयत्वाद्भावनीयमिति ॥ ३१ ॥

कृता साद्यनादिप्ररूपणा। संप्रत्यद्धाछेदस्य स्वामित्वस्य च प्रतिपादनार्थमाह—

अद्धाछेओ सामित्तं पि य ठिइसंकमे जहा नवरं(रि)। तव्वेइसु निरयगईएँ वा वि तिसु हिट्ठिमखिईसु॥३२॥

अद्धाछेओ त्ति—अद्धाछेद स्वामित्वं च यथा स्थितिसंक्रमेऽभिहितं तथैवात्राप्यवगन्तव्यं। नवरमयं विशेषः—संक्रमकरणे तदवेदिष्वपि स्थितिसंक्रम उक्तः, उदयाभावेऽपि संक्रमस्य भावात्। उदीरणा पुनरियं तद्वेदिष्वेव वेदितव्या, उदयाभावे उदीरणाया अभावात्। इदमपि संक्षिप्तमुक्तमिति किंचिद्विशेषतो भाव्यते—तत्र येषां कर्मणामुदये सति बन्धोत्कृष्टा स्थितिस्तेषां ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयतैजससप्तकवर्णादिविंशतिनिर्माणास्थिरास्थिरशुभाशुभागुरुलघुमिथ्यात्वषोडशकषायत्रसबादरपर्याप्तप्रत्येकदुःस्वरदुर्भगानादेयायशःकीर्तिवैक्रियसप्तकपञ्चेन्द्रियजातिहुंडोपघातपराघातो-

[illegible] शेषोदयवतीनां [illegible] प्रकृतीनां [illegible] [illegible]त्रिकादिमतीनामायुष्यावलिकायां [illegible] स्थितिः शेषा [illegible], कथं तानि स्थानानि वेद्यमानानां वेदितव्या. उदये सत्यैवोदीरणाया भावात् । सम्या-
[illegible] स्थितिर्यत्स्थितिः । [illegible]त्रिकादिकल्पाउत्कृष्टः तद्वन्नान्नमुदीरणास्वामिनः । येषां तु कर्मणां
[illegible]नां [illegible] [illegible] [illegible]स्थानपञ्चकप्रथमसंहननपञ्चकोद्योतास्वाना-
[illegible] [illegible] तनि [illegible]त्कृष्टा स्थितिः, तेषामावलिकाद्विकहीना सर्वा स्थितिरुदीरणायोग्या,
कथं तानि स्थानि वेद्यमानानां वेदितव्या । अत्र [illegible]त्रिकांकमावलिकाहिना च सर्वा स्थितिर्यत्स्थितिः । उत्का-
[illegible] [illegible] तद्वन्तान्नमुदीरणास्वामिनः । एतदुक्तं भवति यावान् यावानुदीरणाया प्रयोगः कायु-
[illegible] नावलिकाद्वयः, तद्वन्तान्नमुदीरणास्वामिनो वेदितव्याः । तथा महतिशागरोपमकोटीकोटीप्रमाणा मिथ्या-
[illegible] स्थितिं [illegible] [illegible], ततोऽन्तर्मुहूर्तं कालं यावन्निगत्वा [illegible] सम्यक्त्वं प्रतिपद्यते । ततः सम्यक्त्वं
[illegible] सम्यक्त्वं [illegible] स्थितिं [illegible] संक्रमयति । [illegible]त्रिकानां [illegible] योग्या.
[illegible] [illegible] । ततः सम्यक्त्वमनुभवतः [illegible] [illegible] सप्ततिसागरोपमको-
टीकोटीप्रमाणोत्कृष्टा स्थितिरुदीरणायोग्या । ततः कश्चित् सम्यक्त्वेऽन्तर्मुहूर्तं स्थित्वा सम्यग्मिथ्यात्वं प्रतिपद्यते ।
ततः सम्यग्मिथ्यात्वमनुभवतः सम्यग्मिथ्यात्वस्यान्तर्मुहूर्तोना सप्ततिसागरोपमकोटीकोटीप्रमाणोत्कृष्टा स्थितिरुदी-
रणायोग्या भवति । [illegible] [illegible] सता सर्वोत्कृष्टसंक्रमोत्कृष्टस्थितिकं तदं [illegible]त्कृष्टस्थितिसत्क-

प्रकृत्यभिन्नप्रकृत्यन्तरदलिकं च तत्र संक्रमितं ततस्तत्सर्वोत्कृष्टान्तःसागरोपमकोटीकोटीस्थितिकं जातं । बन्धानन्तरं चान्तर्मुहूर्तमतिक्रम्याहारकशरीरमारभते । तच्चारभमाणो लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादभाग्भवति । ततस्तस्य प्रमत्तस्य सत आहारकशरीरमुत्पादयत आहारकसप्तकस्यान्तर्मुहूर्तोनोत्कृष्टा स्थितिरुदीरणायोग्या । अत्र प्रमत्तस्य सत आहारकशरीरारंभकत्वादुत्कृष्टस्थित्युदीरणास्वामी प्रमत्तसंयत एव वेदितव्यः । शेषप्रकृतीनां सूत्रकृदेव विशेषमाचष्टे-'निरयेत्यादि' नरकगतेः, अपिशब्दान्नरकानुपूर्व्याश्च तिर्यक्पञ्चेन्द्रियो मनुष्यो वोत्कृष्टां स्थितिं बद्ध्वा उत्कृष्टस्थिति-बन्धानन्तरं चान्तर्मुहूर्ते व्यतिक्रान्ते सति तिसृष्वधस्तनपृथिवीषु मध्येऽन्यतरस्यां पृथिव्यां समुत्पन्नः, तस्य प्रथमसमये नरकगतेरन्तर्मुहूर्तहीना सर्वाऽपि स्थितिर्विंशतिसागरोपमकोटीकोटीप्रमाणा उदीरणायोग्या भवति । नरकानुपूर्व्याश्चा-पान्तरालगतौ समयत्रयं यावदुत्कृष्टा स्थितिरुदीरणायोग्या । अधस्तनपृथिवीत्रयग्रहणे किं प्रयोजनमिति चेदुच्यते-इह नरकगत्यादीनामुत्कृष्टां स्थितिं बध्नन्नवश्यं कृष्णलेश्यापरिणामोपेतो भवति । कृष्णलेश्यापरिणामोपेतश्च कालं कृत्वा नरकेषूत्पद्यमानो जघन्यकृष्णलेश्यापरिणामः पञ्चमपृथिव्यामुत्पद्यते । मध्यमकृष्णलेश्यापरिणामः षष्ठपृथिव्यां । उत्कृ-ष्टकृष्णलेश्यापरिणामः सप्तमपृथिव्यामित्यधस्तनपृथिवीत्रयग्रहणं ॥ ३२ ॥

देवगतिदेवमणुयाणुपुव्वी आयाव विगलसुहुमतिगे। अंतोमुहुत्त भग्गा तावयगूणं तदुक्कस्सं ॥ ३३ ॥

देवगति त्ति-देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीणामातपस्य विकलत्रिकस्य द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिरूपस्य सूक्ष्म-त्रिकस्य च सूक्ष्मसाधारणपर्याप्तकलक्षणस्य स्वस्वोदये वर्तमाना अन्तर्मुहूर्तं भग्ना उत्कृष्टस्थितिबन्धाध्यवसायादनन्तरम-

न्तर्मुहूर्तं कालं यावत् परिव्रताः सन्तस्तासामन्तर्मुहूर्तोनां तदुत्कृष्टां देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति । उप-
दर्शयति-कश्चित्तथाविधसंक्लेशविशेषवशात्ततो नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटीकोटीप्रमाणां बद्ध्वा
ततः शुभपरिणामविशेषवशात्ततो देवगतेरुत्कृष्टां स्थितिं दशसागरोपमकोटीकोटीप्रमाणां बद्धुमारभते । ततस्तस्यां देवग-
तिस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकाहीनामावलिकात उपरितनीं सर्वामपि नरकगतिस्थितिं संक्रम-
यति । ततो देवगतेरपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थितिरावलिकामात्रहीना जाता । देवगतिं च बध्नन् जघ-
न्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति । तदनन्तरं च कालं कृत्वाऽनन्तरसमये देवो जातः । ततस्तस्य देवत्वमनुभवतो
देवगतेरन्तर्मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उत्कृष्टा स्थितिरुदीरणायोग्या भवति । ननूक्तयुक्त्यनुसारेणाव-
लिकाद्विकान्तर्मुहूर्तोनेति प्राप्नोति कथमुच्यतेऽन्तर्मुहूर्तोनेति ? नैष दोषः, यत आवलिकाद्विकमप्यन्तर्मुहूर्तमेव
केवलं सूक्ष्मत्वान्न विवक्षितमिति । एवं देवानुपूर्व्या अपि वाच्यं । तथा कश्चिन्नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरो-
पमकोटीकोटीप्रमाणां बद्ध्वा ततः शुभपरिणामविशेषतो मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपमकोटीकोटीप्र-
माणां बद्धुमारभते । ततस्तस्यां मनुष्यानुपूर्वीस्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकाहीनामावलिकात उप-
रितनीं सर्वामपि नरकानुपूर्वीस्थितिं संक्रमयति । ततो मनुष्यानुपूर्व्या अपि विंशतिसागरोपमकोटीकोटीप्रमाणा स्थिति-
रावलिकाद्विकहीना जाता । मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्तं कालं यावद्बध्नाति, तथाऽन्तर्मुहूर्तमावलिको-
नां विंशतिसागरोपमकोटीकोटीर्यावद्बध्नाति । तदनन्तरं च कालं कृत्वा मनुष्यानुपूर्वीमनुभवतस्तस्या उत्कृष्टा स्थितिरुद-

मुहूर्तोना विंशतिसागरोपमकोटीकोटीप्रमाणा उदीरणायोग्या । ननु मनुष्यगतेरपि पञ्चदशसागरोपमकोटीकोट्यो बन्धे-
नोत्कृष्टा स्थितिः प्राप्यते, तथा मनुष्यानुपूर्व्या अपि, न त्वेकस्या अपि विंशतिः । तत उभे अपि संक्रमोत्कृष्टे संक्रमो-
त्कृष्टत्वाविशेषे च कथं मनुष्यगतेरिव मनुष्यानुपूर्व्या अपि आवलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्या न भवति ?
तदयुक्तं, मनुष्यानुपूर्व्या अनुदयसंक्रमोत्कृष्टत्वात् । तदुक्तं–"मणुयाणुपुव्विमीसग आहारग देवजुयल विगलाणि । सुहु-
मातितिगं तित्थं अणुदयसंकमणउक्कोसा ॥ १ ॥" अनुदयसंक्रमोत्कृष्टाना न जघन्यतोऽप्यन्तर्मुहूर्तोनाया एवोत्कृष्ट-
स्थितेरुदीरणायोग्यत्वात् । मनुष्यगतिरनुदयसंक्रमोत्कृष्टा । तदुक्तं–"मणुयगइ सायं सम्मं थिर हासाइछ वेयसुभखगई ।
रिसहचउरंसगाई पणुच्चउदसंकमुक्कोसा ॥ १ ॥" ततस्तस्या आवलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्या भव-
तीति । एवमातपादीनामप्यन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भावनीया । नन्वनुदयसंक्रमोत्कृष्टस्थितीनां प्रकृ-
तीनामन्तर्मुहूर्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भवतु, आतपनाम तु बन्धोत्कृष्टं, ततस्तस्य बन्धोदयावलिकाद्विकर-
हितैवोत्कृष्टा स्थितिरुदीरणाप्रायोग्या प्राप्नोति, कथमुच्यतेऽन्तर्मुहूर्तोनेति ? उच्यते–इह देव एवोत्कृष्टे संक्लेशे वर्तमान
एकेन्द्रियप्रायोग्याणामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति, नान्यः । स च तां बद्ध्वा तत्रैव देवत्वेऽन्त-
र्मुहूर्तं कालं यावदवतिष्ठते । ततः कालं कृत्वा बादरपृथ्वीकायिकेषु मध्ये समुत्पद्यते । समुत्पन्नः सन् शरीरपर्याप्त्या
पर्याप्त आतपनामोदये वर्तमानस्तदुदीरयति । तत एवं सति तस्यान्तर्मुहूर्तोनैवोत्कृष्टा स्थितिरुदीरणायोग्या भवति ।
आतपग्रहणं चोपलक्षणं । तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहनननिद्रापञ्चक-

स्यावरेभ्यो निर्गत्य त्रीन्द्रियादिकानामनुदयप्राप्तानामनन्तर्मुहूर्तेना उत्कृष्टा स्थितिरुदीरणायोग्या वेदितव्या । तत्र स्याव-
रैकेन्द्रियादिषु चतुरिन्द्रियतिर्यक्षु काला तावना कृता । शेषाणां किमते—तत्र नारकतिर्यग्द्विकादीनां गताः कालसंज्ञनानां-
मुत्कृष्टां स्थितिं बद्ध्वा ततो गत्यन्तरीभागः सन् तत्रैवान्तर्मुहूर्तं स्थित्वा तिर्यक्‌पञ्च उत्कृष्टामुदीरणां करोति । निद्रा-
पञ्चकस्यापि उत्कृष्टां स्थितिमुत्कृष्टेन संक्लेशेन बद्ध्वा ततोऽन्तर्मुहूर्ते गते सति निद्रोदये उत्कृष्टामुदीरणां करोति॥३३॥

तिरियस्स य पल्लासंखिज्जइमे जहण्णगे इत्तो । थावरजहण्णसंतेण समं अहिगं (हीं) व बंधंतो॥३४॥
गंतुणावलिमित्तं कसायबारसगभयदुगंछाणं । निद्दा य पंचगस्स य आयावुज्जोयनामस्स ॥ ३५ ॥

तिर्यगद्विकस्य पूर्वोक्तनाम्नः स्थितिं पुनरप्यसमाधिकपल्योपमस्य पल्योपमासंख्येयभागमात्रां शेषीकृता ।
ततोऽनन्तरसमये क्रमशस्तदनन्तरं तामुदीरयति । उदीरयतश्च प्रथमसमये उत्कृष्टोदीरणा । तदेव चेयत्वात्तेन
निर्दिष्टा तीर्थंकरनाम्न उदीरणायोग्या प्राप्यते नाधिकेति । तदेवमनुत्कृष्टस्थित्युदीरणास्वामित्वं । संप्रति जघ-
न्यस्थित्युदीरणास्वामित्वमाह—'इत्तो' इत ऊर्ध्वं जघन्ये स्थित्युदीरणायां स्वामित्वमभिधीयते । प्रतिज्ञातमेव
निर्वाहयति—'थावरेत्यादि' स्थावरस्य ततो यत्सत्कर्म सर्वस्तोकं स्थितिसत्कर्म तेन समं तदधिकं वा तत्समानं
बध्नन् स एव पञ्चेन्द्रियस्तिर्यक्‌स्थावरपर्याप्तको सन् तस्याधिकां गता तस्यावलिकायामतीतायामित्यर्थः ।
कषायद्वादशकभयजुगुप्सानिद्रापञ्चकातपोद्योतनाम्नामेकत्रिंशत्प्रकृतीनां जघन्यां स्थित्युदीरणां करोति । तदानीं-

द्योतवर्जानामेकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्तु प्रतिपक्षाभावात् अन्यत्र जघन्यतरा स्थितिर्न प्राप्यते। तत एकेन्द्रिय एव यथोक्तस्वरूप आसां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी ॥ ३४–३५ ॥

एगिंदियजोग्गाणं इयरा बंधित्तु आलिगं गंतुं। एगिंदियागए तट्ठिईए जाईणमवि एवं ॥ ३६ ॥

एगिंदिय त्ति–एकेन्द्रियाणामेवोदीरणां प्रति या योग्याः प्रकृतयस्ता एकेन्द्रिययोग्या एकेन्द्रियजातिस्थावरसूक्ष्मसाधारणनामानस्तासामेकेन्द्रियो जघन्यस्थितिसत्कर्मा । इतरा एकेन्द्रियजात्यादिप्रतिपक्षभूता द्वीन्द्रियजात्यादिकाः प्रकृतीर्बद्ध्वा । तद्यथा–एकेन्द्रियजातेर्द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातीः, स्थावरसूक्ष्मसाधारणानां त्रसबादरप्रत्येकनामानि, तत एकेन्द्रियजात्यादीर्बध्नाति । ततो बन्धावलिका गत्वाऽतिक्रम्य बन्धावलिकायाश्चरमसमये एकेन्द्रियजात्यादीनां जघन्या स्थित्युदीरणां करोति । इयमत्र भावना–एकेन्द्रियः सर्वजघन्यस्थितिसत्कर्मा द्वीन्द्रियादिजातीः सर्वा अपि परिपाट्या बध्नाति । ततस्तद्बन्धानन्तरमेकेन्द्रियजातिं बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धायास्तस्या एकेन्द्रियजातेर्जघन्यां स्थित्युदीरणां करोति । इह बन्धावलिकाया अनन्तरसमये बन्धावलिकाप्रथमसमयबद्धा अपि ल(न)ता उदीरणामायान्ति, ततो जघन्या स्थित्युदीरणा न प्राप्यते इति कृत्वा बन्धावलिकायाश्चरमसमये इत्युक्तं । यावता कालेन प्रतिपक्षभूताः प्रकृतीर्बध्नाति तावता कालेन न्यूना एकेन्द्रियजातेः स्थितिर्भवति, ततः स्तोकतरा प्राप्यते इति प्रतिपक्षभूतप्रकृतिबन्धोपादानं । एवं स्थावरसूक्ष्मसाधारणानामपि भावना कर्तव्या । केवलमेतेषां प्रतिपक्षभूताः प्रकृतयः त्रसबादरप्रत्येकनामानो वेदितव्याः । 'एगिंदियेत्यादि' जातीनामपि द्वीन्द्रियादिजातीनामपि एवं पूर्वोक्तेन प्रकारेण

एकेन्द्रियादागतस्त्वरितिकः । एकेन्द्रियप्रायोग्यजघन्यस्थितिको जघन्यां स्थित्युदीरणां करोति । अत्रायं भावना-एके-
न्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियभवादुद्धृत्य द्वीन्द्रियेषु मध्ये समुत्पन्नः पूर्वबद्धां द्वीन्द्रियजातिमनुभवितुमा-
रब्धः । अनुभवनसमयादारभ्य चैकेन्द्रियजातिं दीर्घकालं बद्धुं लग्नः । तदनन्तरं त्रीन्द्रियजातिं चतुरिन्द्रियजातिं
पञ्चेन्द्रियजातिं च क्रमेण बध्नाति । एवं च महान्ति चत्वार्यन्तर्मुहूर्तानि व्यतिक्रान्तानि । ततो द्वीन्द्रियजातिं बद्धुमार-
ब्धः । ततो बन्धावलिकायामतिक्रान्तायां तस्या द्वीन्द्रियजातेरेकेन्द्रियभवयोग्यजघन्यस्थितिसत्कर्मणोऽन्तर्मुहूर्तचतुष्टय-
बन्धावलिकान्यूनाया जघन्यां स्थित्युदीरणां करोति । बन्धावलिकानन्तरसमयग्रहणं च कारणं प्रागेवोक्तं । एवं त्रीन्द्रि-
यचतुरिन्द्रियजात्योरपि भावना कार्या ॥ ३६ ॥

वेयणिया नोकसायासमत्तसंघयणपंचनीयाए । तिरियदुग अयस दूभगणाइज्जाणं च संनिगए ॥ ३७ ॥

वेयणिय त्ति–सातासातवेदनीययोः अरत्यरतिशोकभयजुगुप्सानामसमस्तसंहननानां तिर्यग्गतितिर्यगानुपूर्व्योरय-
शोदुर्भगानादेयानामित्येतासां सप्तदशप्रकृतीनां संज्ञिपञ्चेन्द्रियगतो जघन्या स्थित्युदीरणा । भावना त्वियं–एकेन्द्रियो जघन्य-
स्थितिसत्कर्मा एकेन्द्रियभवादुद्धृत्य पर्याप्तसंज्ञिपञ्चेन्द्रियेषु मध्ये समुत्पन्नः, उत्पत्तिसमयादारभ्य च सातवेदनीयम-
नुभवन् असातवेदनीयं बृहत्तमान्तर्मुहूर्तं यावद्बध्नाति । ततः पुनरपि सातं बद्धुमारब्धः । ततो बन्धावलिकायाम-
तीतायां पूर्वबद्धस्य सातवेदनीयस्य जघन्यां स्थित्युदीरणां करोति । एवमसातवेदनीयस्यापि वक्तव्यं । किन्तु सातवेदनी-
यस्य स्थाने असातवेदनीयमसातस्थाने सातवेदनीयमिति । हास्यरत्योः सातवत्, अरतिशोकयोरप्येवमेव भावना कार्या । भय-

मासमपर्याप्तकं नाम एकेन्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियभवादुद्धृत्यापर्याप्तसंज्ञिपञ्चेन्द्रियमध्ये समुत्पन्न उत्पत्तिप्रथमसमयादारभ्य च पर्याप्तकनाम बृहत्तरमन्तर्मुहूर्तं कालं यावद्बध्नाति । ततः पुनरपि अपर्याप्तकनाम बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धस्यापर्याप्तकनाम्नो जघन्यां स्थित्युदीरणां करोति । संहननपञ्चकस्य तु मध्ये वेद्यमानं संहननं मुक्त्वा शेषसंहननानां प्रत्येकं बन्धकालोऽतिदीर्घो वक्तव्यः । ततो वेद्यमानसंहननस्य बन्धे बन्धावलिकाचरमसमये जघन्या स्थित्युदीरणा । नीचैर्गोत्रमसातवद्वेदितव्यं । तथा तैजस्कायिको वायुकायिको वा बादरः सर्वजघन्यस्थितिसत्कर्मा पर्याप्तसंज्ञितिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नः । ततो बृहत्तरमन्तर्मुहूर्तं कालं यावन्मनुजगतिं बध्नाति । तद्बन्धानन्तरं च तिर्यग्गतिं बद्धुमारभते । ततो बन्धावलिकायाश्चरमसमये तस्यास्तिर्यग्गतेर्जघन्यां स्थित्युदीरणां करोति। एवं तिर्यगानुपूर्व्या अपि वक्तव्यं । नवरमपान्तरालगतौ तृतीयसमये जघन्या स्थित्युदीरणा वाच्या । अयशःकीर्तिदुर्भगानादेयानां चासातस्येव भावना कार्या । केवलमिह प्रतिपक्षप्रकृतीनां यशःकीर्तिसुभगादेयानां बन्धो वाच्यः ॥ ३७ ॥

अमणागयस्स चिरठिइ अंते सुरनरयगइउवंगाणं । अणुपुव्वी तिसमइगे नराण एगिंदियागयगे ॥३८॥

अमणागयस्स त्ति–अमनस्कादसंज्ञिपञ्चेन्द्रियादुद्धृत्य देवेषु नारकेषु वा मध्ये समागतस्य सुरगतिनिरयगतिवैक्रियांगोपांगनाम्नां स्वस्वायुर्दीर्घस्थित्यन्ते जघन्या स्थित्युदीरणा । एतदुक्तं भवति—असंज्ञिपञ्चेन्द्रियः सर्वजघन्यां सुरगत्यादिस्थितिं बद्ध्वा बन्धानन्तरं च दीर्घकालं तत्रैव स्थित्वा देवेषु नारकेषु वा मध्ये पल्योपमासंख्येयभागमात्रायुःस्थितिकः समुत्पन्नः, ततस्तस्य देवस्य नारकस्य वा स्वस्वायुश्चिरस्थित्यन्ते चरमसमये वर्तमानस्य यथायोगं देवगतिनरकगतिवै-

मिथ्यात्वोऽसंक्लिष्टः जघन्या स्थित्युदीरणा । तथा च पर्याप्तसंज्ञिपञ्चेन्द्रियो देवस्य नारकस्य वा जघन्यायामन्तराद्धायां वर्त-मानो [illegible] तिर्यगानुपूर्व्या नाम्न आनुपूर्व्याश्च तृतीयसमये जघन्यां स्थित्युदीरणां करोति । 'नराणु एगिंदियागयस्स ति' त्ति । [illegible] मनुष्यानुपूर्व्या [illegible] एकेन्द्रियभवादुद्धृत्य मनुष्येषु मध्ये उत्पद्यमानोऽपान्तरालगतौ वर्त-मानो मनुष्यानुपूर्व्यास्तृतीयसमये जघन्यस्थित्युदीरणास्वामी भवति ॥ ३८ ॥

समयाहिगालिगाए पढमठिईए उ सेसवेलाए । मिच्छत्ते वेएसु य संजलणासु वि य सम्मत्ते ॥ ३९॥

समय त्ति-[illegible] प्रथमा स्थितिरुच्यते, उपरितनी तु द्वितीयेति । तत्र प्रथमस्थितेः शेषवेलायां समयाधिकावलिकामात्रायां मिथ्यात्व-वेदत्रिक-संज्वलनचतुष्टय-सम्यक्त्वानां जघन्यस्थित्युदीरणा भवति । [illegible] जघन्या स्थित्युदीरणा द्रष्टव्या ॥ ३९ ॥

पल्लासंखियभागूणुदही एगिंदियागए मिस्से । वेसत्तभागवेउव्वियाए पवणस्स तस्संते ॥ ४० ॥

पल्ल त्ति-[illegible] सागरोपमं [illegible] एकेन्द्रियभवादुद्धृत्य [illegible] । तत्र [illegible] जघन्या स्थित्युदीरणा । एकेन्द्रियस्य [illegible] न भवति । [illegible] मिथ्यात्वोदय[illegible] [illegible] सागरोपमं भवति, [illegible] वैक्रियषट्क [illegible]

वैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य तत् द्विसप्तभागं वैक्रियं, ततो विशेषणसमासः । प्राकृतत्वात्स्त्रीत्वनिर्देशः । इहापि च 'पल्लासंखियभागेण' इत्यनुवर्तते, ततश्च तस्य द्विसप्तभागवैक्रियषट्कस्य पल्योपमासंख्येयभागहीनस्य । पवनस्य बादरवायुकायिकस्य तस्य वैक्रियस्य पर्यन्तसमये जघन्या स्थित्युदीरणा । एतदुक्तं भवति–बादरवायुकायिकः पल्योपमासंख्येयभागहीनसागरोपमद्विसप्तभागप्रमाणवैक्रियषट्कजघन्यस्थितिसत्कर्म बहुशो वैक्रियमारभ्य चरमे वैक्रियारंभे चरमसमये वर्तमानो जघन्यां स्थित्युदीरणां करोति । अनन्तरसमये च वैक्रियषट्कमेकेन्द्रियसत्कजघन्यसत्कर्मापेक्षया स्तोकतरमिति कृत्वा उदीरणायोग्यं न भवति, किं तूद्वलनायोग्यं ॥ ४० ॥

चउरुवसमेत्तु पेज्जं पच्छा मिच्छं खवेत्तु तेत्तीसा । उक्कोससंजमद्धा अंते सुतणूउवंगाणं ॥ ४१ ॥

चउ त्ति–संसारपरिभ्रमणेन चतुरो वारान् प्रेम मोहनीयमुपशमय्य ततो मिथ्यात्वं, उपलक्षणमेतत्सम्यक्त्वं सम्यग्मिथ्यात्वं च क्षपितं, क्षपयित्वा च त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः । ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नः । ततो वर्षाष्टकानन्तरं संयमं प्रतिपन्नोऽप्रमत्तभावे चाहारकसप्तकं बद्धवान् । ततो देशोना पूर्वकोटिं यावत्संयमं परिपालितवान् । ततो देशोनपूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा । 'सुतणु त्ति' आहारकशरीरं । 'उवंग त्ति' आहारकांगोपांगं । बहुवचनादाहारकबन्धचतुष्टयाहारकसङ्घातपरिग्रहः । तेषां जघन्यां स्थित्युदीरणां करोति । इह मोहोपशमं कुर्वन् शेषनामकर्मप्रकृतीना घातादिभिः प्रभूतं स्थितिसत्कर्म घातयति । देवभवे चापवर्तनाकरणेनापवर्तयति ।

तत्र [illegible] मोहनीय स्थितिसत्कर्म संक्रमयतीति चतुःकृत्वो मोहोपशमनं । आहारकसप्तकस्थिति- [illegible] देशोनपूर्वकोटिप्रमाणेन कालेन गत्वा [illegible], ततो देशोनपूर्वकोटिगुणाश्रितं ॥ ४१ ॥

उवसंतखीणमोहे जस्स समयाहिगावलिगठिईए । सेसाणुदीरणंते निद्दासुत्तो ठिईकालो ॥ ४२ ॥

उवसंत [illegible]–उपशान्तक्षीणमोह [illegible] प्रकृतीनां [illegible] स्थितौ जघन्या स्थित्युदीरणा । शेषाणां च प्रकृतीनां [illegible] [illegible] [illegible] प्रकृतीनां पूर्वोक्तानां च नानाभुवोदीरणानां [illegible] प्रकृतीनां [illegible] जघन्या स्थित्युदीरणा । तस्याश्च जघन्यायाः कालो निद्रसुत्तो- [illegible] जघन्या स्थित्युदीरणा ॥ ४२ ॥

[illegible] स्थित्युदीरणा । [illegible] । तत्र [illegible], तद्यथा–संज्ञा शुभाशुभप्रकरणा [illegible] नेति । तत्र [illegible]—

अणुभागुदीरणाए सन्ना य सुभासुभा विवागो य । अणुभागबंधभणिया नाणत्तं पच्चया चेमे ॥ ४३ ॥

[illegible]–अनुभागोदीरणायां संज्ञा शुभाशुभा विपाकश्च यथा [illegible] [illegible] । तत्र संज्ञा द्विविधा–स्थानसंज्ञा घातिसंज्ञा च । स्थानसंज्ञा चतुर्विधा–एकस्थानो द्विस्थान-

स्त्रिस्थानकश्चतुःस्थानकश्च । घातिसंज्ञा त्रिप्रकारा, तद्यथा—सर्वघाती देशघाती अघाती च । तथा शुभकर्मणामनुभागः क्षीरखंडोपमः । अशुभकर्मणां त्वशुभो घोषातकीनिंबरसोपमः । एषा च स्थानसंज्ञा घातिसंज्ञा शुभाशुभप्ररूपणा च प्रागनुभागसंक्रमाभिधानावसरे सप्रपञ्चं कृतेति न भूयो वितायते । विपाकश्चतुर्विधः, तद्यथा—पुद्गलविपाकः क्षेत्रविपाकः भवविपाको जीवविपाकश्च । तत्र पुद्गलानधिकृत्य यस्य रसस्य विपाकोदयः स पुद्गलविपाकः । स च संस्थानषट्कसंहननषट्कातपशरीरपञ्चकाङ्गोपाङ्गत्रयोद्योतनिर्माणस्थिरास्थिरवर्णादिचतुष्कागुरुलघुशुभाशुभपराघातोपघातप्रत्येकसाधारणनाम्नां षट्त्रिंशत्प्रकृतीनामवगन्तव्यः । तथाहि—संस्थाननामादीनि औदारिकादिपुद्गलानेवाधिकृत्य स्वविपाकमुपदर्शयन्ति, तत आसां रसः पुद्गलविपाक एव । नन्वनया युक्त्या रत्यरत्योरपि रसः पुद्गलविपाक एव प्राप्नोति । तथाहि—कंटकादिस्पर्शादरतेर्विपाकोदयो भवति, स्रक्चन्दनादिसंस्पर्शात्तु रतेः, ततः कथं स नोक्तः ? उच्यते—रत्यरतिविपाकस्य पुद्गलव्यभिचारात् । तथाहि—कंटकादिसंस्पर्शव्यतिरेकेऽपि प्रियाप्रियस्मरणादिना कदाचिद्रत्यरत्योर्विपाकोदयो दृश्यते, ततोऽनयोरनुभागो जीवविपाक एव युक्तः, न पुद्गलविपाकः । एवं क्रोधादिविपाकोऽपि भावनीयः । उक्तं च—"अरइरईणं उदओ किन्न भवे पोग्गलानि संपप्पा । अप्पुट्ठेहि वि किन्नो ? एवं कोहाइयाणं पि ॥ १ ॥" अस्याश्चाक्षरगमनिका—अरतिरत्योरुदयो विपाकोदयः पुद्गलान् प्राप्य किं न भवति ? भवत्येवेति भावः । ततः कथं तयो रसः पुद्गलविपाको नोच्यते ? । अत्राचार्यः काक्वा प्रत्युत्तरमाह—'अप्पुट्ठेहि वि किन्नो' अत्र सप्तम्यर्थे तृतीया । ततोऽयमर्थः—अस्पृष्टेष्वपि पुद्गलेषु किं तयो रत्यरत्योर्विपाकोदयो न भवति ? भवत्येवेति भावः । ततः पुद्गलव्यभिचारान्न तयो रसः पुद्गलवि-

[illegible], किन्तु नीचैर्गोत्रविपाक एव । एवं [illegible]नामपि वाच्यं । तथा [illegible]मपि प्राप्य यस्य कस्य [illegible] विपाकोदयः स
[illegible], न तु [illegible] । तथा [illegible]मपि प्राप्य यस्य कस्य [illegible] न [illegible]
[illegible] । [illegible] नामपि [illegible] विपाकोदयो [illegible], ततः कथं [illegible]
[illegible] ? । [illegible] । [illegible] पुनः [illegible]
[illegible] । [illegible] पुनः [illegible] नास्ति ।
[illegible] । [illegible]
[illegible] ॥ १ ॥ " [illegible] । [illegible] प्रकृतीनां [illegible]
[illegible] । '[illegible]' [illegible] विशेषः । [illegible]
[illegible] । [illegible] । तथा [illegible]
[illegible] ॥ ४३ ॥

[illegible]—

मीसं न कुणति [illegible] च । सम्मत्तमंसगयं न देसघाइं अणंतगुं च ॥ ४४ ॥

[illegible], [illegible], [illegible]
[illegible], [illegible], [illegible] न [illegible]

तव्यं । एतच्च तत्र सर्वथा नोक्तं, किं त्विहैव । यतस्तत्रानुभागबन्धमाश्रित्य शुभाशुभप्ररूपणा कृता । न च सम्यक्त्वसम्यग्मिथ्यात्वयोर्बन्धः संभवति, तत एतद्वर्जा एव तत्राशुभप्रकृतयो निर्दिष्टाः । उदीरणा त्वेतयोरपि भवति । तत इह विशेषेणैतयोरुपादानं । तथाऽन्तरायं पञ्चप्रकारमुत्कृष्टामनुभागोदीरणामधिकृत्य द्विस्थानके, एकस्थानके च घातिसंज्ञामधिकृत्य देशघाति वेदितव्यं । बन्धं प्रतीत्य पुनश्चतुःप्रकारेऽपि रसे । तद्यथा—चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च । अचक्षुर्दर्शनं घातिसंज्ञामधिकृत्य देशघाति ॥ ४४ ॥

ठाणेसु चउसु अपुमं दुठाणे कक्खडं च गुरुकं च । अणुपुव्वीउ तीसं नरतिरिएगंतजोग्गा य ॥ ४५ ॥

ठाणेसु त्ति—नपुंसकवेदो बन्धं प्रतीत्य त्रिप्रकारे रसे । तद्यथा—चतुःस्थानके त्रिस्थानके द्विस्थानके च । अत्र तूत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानके । अनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके एकस्थानके च । ननु बन्धाभावे कथमुदीरणायामेकस्थानको रसो नपुंसकवेदस्य प्राप्यते ? उच्यते—क्षपणकाले रसघातं कुर्वतस्तस्यैकस्थानकस्यापि रससंभवात् । तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामधिकृत्य द्विस्थानके । तथा चतस्र आनुपूर्व्यो याश्च नरतिरश्चामुदयं प्रत्येकान्तयोग्यास्त्रिंशत्प्रकृतयः, तद्यथा—मनुष्यायुस्तिर्यगायुस्तिर्यग्गतिर्मनुष्यगतिरेकेन्द्रियजातिर्द्वीन्द्रियजातिस्त्रीन्द्रियजातिश्चतुरिन्द्रियजातिरौदारिकसप्तकमाद्यन्तवर्जसंस्थानचतुष्टयं संहननषट्कमातपं स्थावरं सूक्ष्ममपर्याप्तं साधारणं चेति ता अपि बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामुत्कृष्टामनुत्कृष्टां वाऽधिकृत्य द्विस्थानके रसे वेदितव्याः ॥ ४५ ॥

[illegible] [illegible] ना वचक्कु चरकु य । जम्म त्रि [illegible] अक्खरं तु तस्सेगठाणाणि ॥ ४६ ॥

[illegible] [illegible] चतुःस्थानकादीनि [illegible] द्विस्थानके, अनुत्कृष्टं [illegible] द्विस्थानके एक- [illegible] [illegible] । [illegible] च । [illegible] पुनः [illegible] स्थानके त्रिस्थानके द्विस्थानके वा । [illegible] च [illegible], तद्यथा—चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके [illegible] [illegible] पुनरपि [illegible] ? उच्यते—स्थाननियमार्थं । पूर्व [illegible] [illegible], [illegible] स्थाननियमः । '[illegible]' [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्राप्यते । [illegible] [illegible] तद्यथा—चतुःस्थानकस्त्रिस्थानको द्विस्थानक एक- [illegible] ॥ ४६ ॥

[illegible] [illegible] [illegible] य पावेनु । ठठाणा [illegible] संतु [illegible] उदीरणया ॥ ४७ ॥

[illegible] [illegible] । [illegible] तद्यथा—[illegible] चतु- [illegible] द्विस्थानकस्य च [illegible] [illegible], [illegible] । [illegible] पुनर्मनः- [illegible] [illegible] । [illegible], तद्यथा—चतुःस्थानकस्त्रिस्थानको द्विस्थान- [illegible] । [illegible] [illegible] [illegible] [illegible]

द्वादश कषायाः षड् नोकषायाः नरकायुर्देवायुर्नरकगतिर्देवगतिः पञ्चेन्द्रियजातिस्तैजससप्तकं वैक्रियसप्तकमाहारकसप्तकं समचतुरस्रसंस्थानं हुंडसंस्थानं वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षमृदुलघुशीतोष्णरूपं स्पर्शषट्कं अगुरुलघूपघातं पराघातमुच्छ्वासोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्त्ययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्रनीचैर्गोत्राणि चैतेषां चैकोत्तरशतसंख्यानां शेषकर्मणामुत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानको रसः । अनुत्कृष्टां त्वधिकृत्य चतुःस्थानकस्त्रिस्थानको द्विस्थानकश्च । तथा मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणानामुत्कृष्टामनुभागोदीरणामधिकृत्य रसः सर्वघाती । अनुत्कृष्टां त्वधिकृत्य सर्वघाती देशघाती वा । केवलज्ञानावरणकेवलदर्शनावरणनिद्रापञ्चकमिथ्यात्वद्वादशकषायाणामुत्कृष्टामनुत्कृष्टां वानुभागोदीरणामधिकृत्य रसः सर्वघाती । सातासातवेदनीयायुश्चतुष्टयसकलनामप्रकृतिगोत्रद्विकानामुत्कृष्टामनुत्कृष्टां वोदीरणामधिकृत्य रसः सर्वघातिप्रतिभागः । तथा चतुर्णां संज्वलनाना नवानां नोकषायाणामुत्कृष्टामनुभागोदीरणामधिकृत्य रसः सर्वघाती । अनुत्कृष्टां त्वधिकृत्य सर्वघाती देशघाती वा प्रतिपत्तव्यः । इदानीमशुभप्रकृतिविषये विशेषमाह—'मीसगेत्यादि' अपि च सम्यग्मिथ्यात्वं सम्यक्त्वं चानुभागोदीरणामधिकृत्य पापेषु पापकर्मसु मध्येऽवगन्तव्यं, घातिस्वभावतया तयो रसस्याशुभत्वात् । शेषप्रकृतयस्तु यथा शतकग्रन्थेऽनुभागबन्धे शुभा अशुभाश्चोक्तास्तथाऽत्राप्यवगन्तव्याः । अथ कीदृशेऽनुभागसत्कर्मणि वर्तमान उत्कृष्टामनुभागोदीरणां करोति ? उच्यते—'दव्वाणेत्यादि' अनुभागसत्कर्मणः षट्स्थानपतितहीनादपि उत्कृष्टानुभागोदीरणा प्रवर्तते । एतदुक्तं भवति—यत्सर्वोत्कृष्टमनु-

॥ १३२ ॥

[illegible] वर्जितस्थानगतानि [illegible] वा संख्येयभागहीनानि वा संख्येयगुणहीनानि असंख्येयगुणहीनानि [illegible] षट्स्थानपतितानि प्राप्यन्ते । यतोऽनन्तानन्तानां रसस्थानानामनुभागे स्थितिरपि अनन्तानि स्पर्ध- कानि [illegible] तिष्ठन्ति । यतोऽनन्तभागोऽपि सर्वे [illegible] अनन्तगुणहीनानि [illegible] अनुभागा- [illegible] ॥ ४७ ॥

सम्प्रति विपाकं विभावयति—

[illegible] ॥ ४८ ॥

[illegible] ॥ ४८ ॥

[illegible] ॥ ४९ ॥

[illegible]

त्येव हि विषये चक्षुर्दर्शनादीनि व्याप्रियन्ते तावत्येव विषये चक्षुर्दर्शनावरणादीन्यपि । तत उक्तरूपो विषयनियमो न विरुध्येत । शेषप्रकृतीनां तु यथा प्राक् विपाकोऽभिहितः पुद्गलविपाकादिस्तथैवावगन्तव्यः ॥ ४९ ॥

संप्रति प्रत्ययप्ररूपणा कर्तव्या । प्रत्ययोऽपि द्विधा—परिणामप्रत्ययो भवप्रत्ययश्च । तत्र परिणामप्रत्ययमधिकृत्याह—

वेउव्वियतेयगकम्मवन्नरसगंधनिद्धलुक्खाउं । सीउण्हथिरसुभेयरअगुरुलघुगो य नरतिरिए ॥ ५० ॥

वेउव्विय त्ति—वैक्रियसप्तकं तैजसकार्मणग्रहणात्तैजससप्तकं गृहीतं । तथा वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्ष-शीतोष्णस्थिरास्थिरशुभाशुभागुरुलघूनि चानुभागोदीरणामधिकृत्य तिर्यङ्मनुष्याणां परिणामप्रत्ययानि । वैक्रियसप्तकं हि तिर्यङ्मनुष्याणां गुणविशेषसमुत्थलब्धिप्रत्ययं । ततस्तदुदीरणापि तेषां गुणपरिणामप्रत्यया । तैजससप्तकादयस्तु तिर्यङ्मनुष्यैरन्यथान्यथा परिणमय्योदीर्यन्ते, ततस्तासामपि प्रकृतीनामनुभागोदीरणा तिर्यङ्मनुष्याणां परिणामप्र-त्ययाः ॥ ५० ॥

चउरंसमउयलहुगापरघाउज्जोयइट्ठखगइसरा । पत्तेगतणू उत्तरतणूसु दोसु वि य तणू तइया ॥ ५१ ॥

चउरंस त्ति—समचतुरस्रसंस्थानमृदुलघुपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनामानोऽष्टौ प्रकृतय उत्तरतन्वो-र्वैक्रियाहारकलक्षणयोरनुभागोदीरणामधिकृत्य परिणामप्रत्यया वेदितव्याः । यत उत्तरवैक्रिये आहारके वा शरीरे सति समचतुरस्रादीनामनुभागोदीरणा प्रवर्तमाना उत्तरवैक्रियादिशरीरपरिणामापेक्षा । तत एतापि परिणामप्रत्यया वेदि-तव्या । तथा तृतीया तनुराहारकशरीरं । आहारकशरीरग्रहणादाहारकसप्तकं गृहीतं द्रष्टव्यं । ततोऽनुभागोदीरणा-

[illegible] परिणामप्रत्ययं वेदितव्यं । आहारकसप्तकं हि मनुष्याणां गुणपरिणामप्रत्ययं भवति । ततस्तदनुभागोदीर-णापि गुणपरिणामप्रत्ययैवेति ॥ ५१ ॥

देसविरयविरयाणं सुभगाएज्जजसकित्तिउच्चाणं । पुव्वाणुपुव्विगाए असंखभागो थियाईणं ॥ ५२ ॥

देसविरय त्ति- देशविरतानां विरतानां च सुभगादेयशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा परिणामकृता । तथाहि- [illegible] यो देशविरतिं सर्वविरतिं वा प्रतिपद्यते, तस्यापि देशविरत्यादिगुण-[illegible] प्रकृतीनामुत्कृष्टानुभागोदीरणा प्रवर्तत इति । तथा स्त्रीवेदादीनां नवानां नोकषायाणां पूर्वानु-[illegible] भागो देशविरतानां सर्वविरतानां च प्रत्येकमुदीरणायोग्यो गुणपरिणामप्रत्ययो वेदितव्यः । इदमुक्तं [illegible] भागो देशविरतादीनामुदीरणायोग्यो गुणप्रत्ययो [illegible] नोदीरणायामिति ॥ ५२ ॥

[illegible] च परिणाम (य)पच्चयाणि सेसाई । नरतिरियसुभगाइ पुव्वाणुपुव्वीणं ॥ ५३ ॥

[illegible]

सातवेदनीयायुश्चतुष्टयगतिचतुष्टयजातिपञ्चकौदारिकसप्तकसंहननपट्कप्रथमवर्जसंस्थानपञ्चककर्कशगुरुस्पर्शानुपूर्वीचतुष्टयोपघातातपोच्छ्वासाप्रशस्तविहायोगतित्रसस्थावरबादरसूक्ष्मपर्याप्तापर्याप्तसाधारणदुर्भगदुःस्वरानादेयायशःकीर्तिनिर्माणनीचैर्गोत्ररूपाः पट्पञ्चाशत्संख्या अनुभागोदीरणामधिकृत्य भवप्रत्यया वेदितव्याः । एतासामनुभागोदीरणा भवप्रत्ययतो भवतीत्यर्थः । 'पुव्वुत्तेत्यादि' पूर्वोक्ता अपि प्रकृतयः पूर्वोक्तशेपाणां प्रागुक्ततिर्यङ्मनुष्यव्यतिरिक्तानां भवप्रत्ययाऽनुभागोदीरणा वेदितव्या । तथाहि—देवनारकैर्व्रतरहितैश्च तिर्यङ्मनुष्यैर्नवानां नोकपायाणां पश्चानुपूर्व्या उत्कृष्टानुभागस्पर्धकादारभ्येत्यर्थः । असंख्येया अनुभागा भवप्रत्ययादेवोदीर्यन्ते । तथा वैक्रियसप्तकतैजससप्तकवर्णपञ्चकगन्धद्विकरसपञ्चकस्निग्धरूक्षशीतोष्णस्पर्शस्थिरास्थिरशुभाशुभालघुगुरुप्रकृतीनां देवा नैरयिकाश्च भवप्रत्ययादनुभागोदीरणां कुर्वन्ति । तथा समचतुरस्रसंस्थानस्य भवधारणीये शरीरे वर्तमाना भवप्रत्ययादनुभागोदीरणा देवाः कुर्वन्ति । मृदुलघुस्पर्शपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनाम्नामुत्तरवैक्रियशरीरिणं मुक्त्वा शेपाणां भवप्रत्ययादनुभागोदीरणा प्रवर्तते । सुभगादेययशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा गुणहीनस्य भवप्रत्ययादवसेया । गुणवतां तु गुणप्रत्यया । तथा सर्वेपां घातिकर्मणामनुभागोदीरणा भवप्रत्ययादेव देवनारकाणां ॥ ५३ ॥

तदेवं कृता प्रत्ययप्ररूपणा । संप्रति साद्यनादिप्ररूपणा कर्तव्या । सा च द्विधा—मूलप्रकृतिविपया, उत्तरप्रकृतिविपया च । तत्र प्रथमतो मूलप्रकृतिविपयां तां कुर्वन्नाह—

घाईणं अजघन्ना दोण्हमणुक्कोसियाउ तिविहाउ । वेयणिएणुक्कोसा अजहन्ना मोहणीए उ ॥ ५४ ॥

साइअणाई धुव अधुवा य तस्सेसिगा य दुविगप्पा । आउस्स साइ अधुवा सेसविगप्पा उ विन्नेया ॥५५॥

[illegible] अनुभागोदीरणा [illegible] । तद्यथा- अनादिर्ध्रुवा- [illegible] । तद्यथा— [illegible] अजघन्यानुभागोदीरणा । [illegible] । [illegible] ध्रुवाध्रुवे [illegible] । तथा [illegible] अनुभागोदीरणा [illegible] । तद्यथा—[illegible] । तद्यथा—अनयोरनुत्कृष्टानुभागोदीरणा [illegible] । [illegible] । [illegible] ध्रुवाध्रुवे पूर्ववत् । तथा [illegible] । तद्यथा—[illegible] । तद्यथा—[illegible] [illegible] । [illegible] [illegible] । [illegible] । [illegible] ।

ततो द्वे अपि साद्यध्रुवे । जघन्या च प्रागेव भाविता । तथा नामगोत्रवेदनीयानां जघन्याऽजघन्या चानुभागोदीरणा मिथ्यादृष्टौ पर्यायेण लभ्यते । ततो द्वे अपि साद्यध्रुवे । उत्कृष्टा च प्रागेव भाविता । आयुषां तु सर्वेऽपि विकल्पाः साद्यध्रुवाः । सा च साद्यध्रुवताऽध्रुवोदीरणत्वादवसेया ॥ ५४–५५ ॥

तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा । संप्रत्युत्तरप्रकृतिविषयां तां चिकीर्षुराह—

मउलहुगाणुक्कोसा चउविहा तिण्हमवि य अजहन्ना । णाइगधुवा य अधुवा वीसाए होयणुक्कोसा ॥ ५६ ॥

तेवीसाएँ अजहणा विय एयासि सेसगविगप्पा । सव्वविगप्पा सेसाण वावि अधुवा य साईय ॥ ५७ ॥

मउ त्ति–मृदुलघुस्पर्शयोरनुत्कृष्टाऽनुभागोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तथाहि—अनयोरुत्कृष्टानुभागोदीरणा आहारकशरीरस्थस्य संयतस्य भवति । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यनुत्कृष्टा । सापि चाहारकशरीरमुपसंहरतः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । तथा त्रयाणां मिथ्यात्वगुरुकर्कशानामजघन्यानुभागोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तत्र सम्यक्त्वं संयमं च युगपत्प्रतिपत्तुकामस्य जन्तोर्मिथ्यात्वस्य जघन्यानुभागोदीरणा । सा च सादिरध्रुवा च । ततोऽन्या सर्वाप्यजघन्या । सा च सम्यक्त्वात्प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । कर्कशगुरुस्पर्शयोर्जघन्यानुभागोदीरणा केवलिसमुद्घातान्निवर्तमानस्य पञ्चसमये भवति । सा च सादिरध्रुवा च, समयमात्रत्वात् । ततोऽन्या सर्वाप्यजघन्या ।

सादि [illegible] सम्यक्त्वे [illegible] नादिः । ध्रुवाध्रुवे पूर्ववत् । तथा तैजस [illegible]-
[illegible] [illegible] प्रकृतीनामनुत्कृष्टानुभागोदीरणा [illegible] । तद्यथा—अनादि-
[illegible] । तथाहि—[illegible] अनुत्कृष्टानुभागोदीरणा [illegible] । ततोऽन्या सर्वाप्यनुत्कृष्टा । सा
[illegible] । ध्रुवाध्रुवे पूर्ववत् । तथा [illegible] तीर्थकरनाम्नोऽनुत्कृष्टा-
[illegible] [illegible] प्रकृतीनामनुत्कृष्टानुभागोदीरणा त्रिधा । तद्यथा—
[illegible] च । तथाहि—एतासां [illegible] अनुत्कृष्टानुभागोदीरणा । सा च सादिर्ध्रुवा च । ततो-
[illegible] । सा सादिः, [illegible] । ध्रुवाध्रुवे पूर्ववत् । 'एतासामादि' एतासां पूर्वोक्तानां प्रकृतीनां
[illegible] शुद्धचतुर्विंशतीनां [illegible] मिथ्यात्वनुत्कृष्टानुभागोदीरणा [illegible]
[illegible] । तथाहि—शुद्धचतुर्विंशतीनां [illegible] अनुभागोदीरणा मिथ्यादृष्टि
[illegible] । ततो द्वे अपि सादिध्रुवे । [illegible] च प्रागेव [illegible] । तथा [illegible] प्रकृतीनामनु-
[illegible] अनुभागोदीरणा मिथ्यादृष्टौ सर्वोऽपि [illegible], [illegible] । ततो द्वे अपि सादिध्रुवे । तथा च
[illegible] । [illegible] प्रकृतीनां [illegible] [illegible] अनुत्कृष्टानुभाग [illegible]-
[illegible] । [illegible] सादिध्रुवेतीति भावनीया ॥ ५८–५९ ॥

कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधातव्यं । तच्च द्विधा—उत्कृष्टोदीरणाविषयं जघन्योदीरणाविषयं च । तत्र प्रथमत उत्कृष्टोदीरणाविषयं स्वामित्वमाह—

दाणाइ अचक्खूणं जेट्ठा आइम्मि हीणलद्धिस्स । सुहुमस्स चक्खुणो पुण तेइंदिय सव्वपज्जत्ते ॥ ५८ ॥

दाणाइ त्ति—सूक्ष्मस्य सूक्ष्मैकेन्द्रियस्य हीनलब्धिकस्य सर्वस्तोकदानाद्यचक्षुर्दर्शनविज्ञानलब्धियुक्तस्याद्ये प्रथमसमये वर्तमानस्य पञ्चविधान्तरायाचक्षुर्दर्शनावरणरूपाणां षण्णां प्रकृतीनामुत्कृष्टानुभागोदीरणा भवति । तथा त्रीन्द्रियस्य सर्वाभिः पर्याप्तिभिः पर्याप्तस्य पर्याप्तिचरमसमये चक्षुर्दर्शनावरणस्योत्कृष्टानुभागोदीरणा ॥ ५८ ॥

निद्दाइपंचगस्स य मज्झिमपरिणामसंकिलिट्ठस्स । अपुमाइ असायाणं निरए जेट्ठा ठिइसमत्ते ॥ ५९ ॥

निद्दाइ त्ति—मध्यमपरिणामस्य तत्प्रायोग्यसंक्लेशयुक्तस्य सर्वाभिः पर्याप्तिभिः पर्याप्तस्य निद्रापञ्चकस्योत्कृष्टानुभागोदीरणा अत्यन्तविशुद्धस्यातिसंक्लिष्टस्य वा निद्रापञ्चकोदय एव न भवतीति कृत्वा मध्यमपरिणामग्रहणं । तथाऽपुमादीनां नपुंसकवेदादीनां नपुंसकवेदारतिशोकभयजुगुप्सानामसातस्य चोत्कृष्टानुभागोदीरणास्वामी नैरयिको ज्येष्ठस्थितिक उत्कृष्टस्थितिकः समाप्तः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वसंक्लिष्टो वेदितव्यः ॥ ५९ ॥

पंचिंदियतसबायरपज्जत्तगसाइसुस्सरगईणं । वेउव्वुस्सासाणं देवो जेट्ठठिइसमत्तो ॥ ६० ॥

पंचिंदिय त्ति—देवो ज्येष्ठस्थितिक उत्कृष्टस्थितिकस्त्रयस्त्रिंशत्सागरोपमस्थितिकः समाप्तः सर्वाभिः पर्याप्तिभिः पर्याप्तः

न ३ [illegible] पंचेंद्रिय [illegible] नीचगति [illegible] गति [illegible] पानां [illegible] प्रकृतीनामुत्कृष्टानु-
भागोदीरणास्वामी ॥ ८० ॥

गब्भनरतीसगाणं जे काले गहिट्ठिइत्ति सिज्झत्तं । द्वासरइणं सहस्सारगस्स पज्जत्तदेवस्स ॥ ८१ ॥

[illegible] ति० [illegible] मत्ते [illegible] नरसंज्ञित [illegible]
[illegible] कृष्टानुभागोदीरणा । [illegible] पर्याप्तिभिः पर्याप्तस्य [illegible] त्कृष्टानुभागोदीरणा ॥ ८१ ॥

गब्भमणुआणगाणि०णगइनीयाण उच्चगोअस्स । निरयाउस्ससमत्ते असन्निणाए नरस्संते ॥ ८२ ॥

[illegible] पर्याप्तिभि पर्याप्तः [illegible] नरगति [illegible]
[illegible] 'कुल [illegible] ति' [illegible]
[illegible] त्कृष्टानुभागोदीरणास्वामी । [illegible] मनुष्यो [illegible] पर्याप्तिभिः [illegible]
[illegible] स्वामी । [illegible] इति मनुष्यप्रायोग्यम् ॥ ८२ ॥

[illegible] पुरिसंठाणतिरियनामाणं । पंचिंदिय तिरिक्खो अट्ठमवासट्ठाणगाउ ॥ ८३ ॥

[illegible] तिरश्चां [illegible] स्त्रीपुन्नपुंसक [illegible] संस्थानानां
[illegible] प्रकृतीनां [illegible] पंचेन्द्रिय [illegible] कृष्टानुभागो-
दीरणास्वामी ॥ ८३ ॥

मणुउरालियवज्जरिसहाण मणुउ तिपल्लपज्जत्तो । नियगठिई उक्कोसो पज्जत्तो आउगाणं पि ॥ ६४ ॥

मणु त्ति—मनुष्यः पल्योपमत्रयायुःस्थितिकः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्धो मनुष्यगत्यौदारिकसप्तकवज्रर्षभनाराचसंहननरूपाणां नवानां प्रकृतीनामुत्कृष्टानुभागोदीरणास्वामी । तथा सर्वोत्कृष्टस्वस्वस्थितौ वर्तमानः सर्वाभिः पर्याप्तिभिः पर्याप्तस्त्रयाणामायुषां सर्वविशुद्धो नारकायुषस्तु सर्वसंक्लिष्ट उत्कृष्टानुभागोदीरको भवति ॥ ६४ ॥

हस्सठिइ पज्जत्ता तन्नामा विगलजाइसुहुमाणं । थावरनिगोयएगिंदियाणमवि बायरो नवरिं ॥ ६५ ॥

हस्सठिइ त्ति—ह्रस्वस्थितिकाः पर्याप्तकास्तन्नामानो द्वीन्द्रियादिजातिसूक्ष्मकर्मानुभाविनामानो विकलेन्द्रियजातीनां सूक्ष्मनाम्नश्चोत्कृष्टानुभागोदीरणास्वामिनः । एतदुक्तं भवति—द्वित्रिचतुरिन्द्रियाः सूक्ष्माश्च सर्वजघन्यस्थितौ वर्तमानाः सर्वपर्याप्तिभिः पर्याप्ताः सर्वसंक्लिष्टा यथासंख्यं द्वित्रिचतुरिन्द्रियजातिनाम्नां सूक्ष्मनाम्नश्चोत्कृष्टानुभागोदीरणास्वामिनः । ह्रस्वस्थितौ वर्तमानाः सर्वसंक्लिष्टा भवन्तीति कृत्वा तदुपादानं । तथा स्थावरसाधारणैकेन्द्रियजातिनाम्नां जघन्यस्थितौ वर्तमानो बादरैकेन्द्रियः सर्वपर्याप्तिभिः पर्याप्तः सर्वसंक्लिष्टः, स्थावरनाम्नः स्थावरः, साधारणनाम्नः साधारणः, एकेन्द्रियजातेरपि उत्कृष्टानुभागोदीरणास्वामिनो भवतः । बादरस्य महान् संक्लेशो भवतीति कृत्वा तदुपादानं ॥ ६५ ॥

आहारतणू पज्जत्तगो य चउरंसमउयलहुगाणं । पत्तेयखगइपराघायाहारतणूण य विसुद्धो ॥ ६६ ॥

आहारतणु त्ति—समचतुरस्रसंस्थानमृदुलघुस्पर्शप्रत्येकप्रशस्तविहायोगतिपराघाताहारकसप्तकरूपाणां त्रयोदशप्रकृतीनामाहारकशरीरी संयतः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध उत्कृष्टानुभागोदीरणास्वामी ॥ ६६ ॥

उत्तरवेउव्विजई उज्जोवस्सायवस्स खरपुढवी । नियगगईणं भणिया तइए समए णुपुव्वीणं ॥ ६७ ॥

उत्तर त्ति—उत्तरवैक्रियिको यतिः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध उद्योतनाम्न उत्कृष्टानुभागोदीरणा-स्वामी । तथा खरपृथ्वीकायिको बादरपृथ्वीकायिक उत्कृष्टायां स्थितौ वर्तमानः सर्वाभिः पर्याप्तिभिः पर्याप्तः सर्वविशुद्ध आतप-नाम्न उत्कृष्टानुभागोदीरणास्वामी । तथा मनुष्यदेवानुपूर्व्यौ मुक्त्वा नरकतिर्यगानुपूर्व्योः संक्लिष्टा नियकगतीनां तृतीये समये वर्तमाना उत्कृष्टानुभागोदीरका भवन्ति ॥ ६७ ॥

जोगंते सेसाणं सुभाणमियरासि चउसु वि गईसु । पज्जत्तुक्कडमिच्छस्सोहीणमणोहिलद्धिस्स ॥ ६८ ॥

जोगंते त्ति—योगिनः सयोगिकेवलिनोऽन्त्ये समये वर्तमानस्य शेषाणामुक्तव्यतिरिक्तानां शुभप्रकृतीनां तैज- [illegible] तीर्थकरनाम्नां पञ्चत्रिंशतः [illegible] उत्कृष्टानुभागोदीरणा भवति । इतरासां चाशुभप्रकृतीनां मतिश्रुतमनःपर्यायज्ञान केवलज्ञानावरण केवलदर्शना- [illegible] प्रकृतीनां चतसृष्वपि गतिषु मिथ्या- [illegible] उत्कृष्टानुभागोदीरणा भवति । तथाऽवधिज्ञानावरणावधिदर्शनावरणयो- [illegible] उत्कृष्टानुभागोदीरणा भवति । अवधिलब्धिरहितस्य [illegible] ॥ ६८ ॥

तदेवमुक्तमुत्कृष्टानुभागोदीरणास्वामित्वं । संप्रति जघन्यानुभागोदीरणास्वामित्वं प्रतिपादयन्नाह—

सुयकेवलिणो मइसुयअचक्खुचक्खुणुदीरणा मंदा । विपुलपरमोहिगाणं मणणाणोहीदुगस्सावि ॥ ६९ ॥

सुयकेवलिणु त्ति–मतिश्रुतज्ञानावरणचक्षुरचक्षुर्दर्शनावरणानां श्रुतकेवलिनश्चतुर्दशपूर्वधरस्य क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मन्दा जघन्यानुभागोदीरणा वर्तते । तथा क्षीणकषायस्य विपुलमतिमनःपर्यायज्ञानस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्य मनःपर्यायज्ञानावरणस्य जघन्यानुभागोदीरणा । परमावधियुक्तस्य क्षीणकषायस्य समयाधिकावलिकाशेषायां स्थितौ वर्तमानस्यावधिज्ञानावरणावधिदर्शनावरणयोर्जघन्यानुभागोदीरणा ॥६९॥

खवणाए विग्घकेवलसंजलणाण य सनोकसायाणं । सयसयउदीरणंते निद्दापयलाणमुवसंते ॥ ७० ॥

खवणाए त्ति–क्षपणायोत्थितस्य पञ्चविधान्तरायकेवलज्ञानावरणकेवलदर्शनावरणसंज्वलनचतुष्टयनवनोकषायरूपाणां विंशतिप्रकृतीनां स्वस्वोदीरणापर्यवसाने जघन्यानुभागोदीरणा । तत्र पञ्चविधान्तरायकेवलज्ञानावरणकेवलदर्शनावरणानां क्षीणकषायस्य, चतुर्णां तु संज्वलनानां त्रयाणां च वेदानां अनिवृत्तिबादरस्य स्वस्वोदीरणापर्यवसाने । षण्णां नोकषायाणामपूर्वकरणगुणस्थानकचरमसमये जघन्यानुभागोदीरणा । तथा निद्राप्रचलयोरुपशान्तमोहे जघन्यानुभागोदीरणा उच्यते, तस्य सर्वविशुद्धत्वात् ॥ ७० ॥

निद्दानिद्दाईणं पमत्तविरए विसुज्झमाणम्मि । वेयगसम्मत्तस्स उ सगखवणोदीरणाचरमे ॥ ७१ ॥

निद्रानिद्रादीनां त्रि–निद्रानिद्राप्रचलाप्रचलास्त्यानर्द्धीनां प्रमत्तसंयतस्य त्रिगुणस्थानस्य अप्रमत्ता-
भिमुखस्य जघन्यानुभागोदीरणा प्रवर्तते । तथा क्षायिकसम्यक्त्वमुत्पादयतो मिथ्यात्वसम्यग्मिथ्यात्वयोः क्षपितयो-
र्देशघ्नस्य सम्यक्त्वस्य आवलिकामात्रे तत्र काले चरमोदीरणायां समयाधिकावलिकाशेषायां स्थितौ सत्यां
सम्यक्त्वस्य जघन्यानुभागोदीरणा भवति । सा च चातुर्गतिकानामन्यतरस्य वेदितव्या ॥ ७१ ॥

तेकाले सम्मत्तं सम्मंजमं गिण्हओ य तेवत्तगं । सम्मत्तमेव मीसे आउगा जहन्नगठिइस्सु ॥ ७२ ॥

से ति–तत्काले यदा ति विरति समये यः कश्चित् सम्यक्त्वं संयमं संयमासंयमं प्रतिपद्यते तस्य चरमसमये मिथ्यात्वान-
न्तानुबन्धिनां चतुर्णां तथा अप्रत्याख्यानावरणानां प्रकृतीनां जघन्यानुभागोदीरणा । चशब्दात् संयमम्—यो ऽप्रत्या-
ख्यानावरणानां संयममविरतो प्रतिपद्यते, तस्य मिथ्यादृष्टिमिथ्यात्वानन्तानुबन्धिनां जघन्यानुभागोदीरणा । तथा
योऽविरतसम्यग्दृष्टिरनन्तरसमये संयमं प्रतिपत्स्यते तस्याप्रत्याख्यानावरणानां जघन्यानुभागोदीरणा । यश्च देशविरतो-
ऽनन्तरसमये सर्वं प्रतिपत्स्यति, तस्य प्रत्याख्यानावरणानां जघन्यानुभागोदीरणा । मिथ्यात्वग्रहणेन हि अवि-
रतसम्यग्दृष्टिरनन्तानुबन्धिनश्चापि वेदयितोऽनन्तानुबन्धिचतुष्कस्यापि जघन्यानुभागोदीरणासंभवः । तथा
सम्यक्त्वमेव मीसे इति यः सम्यग्मिथ्यादृष्टिरनन्तरसमये सम्यक्त्वं प्रतिपत्स्यते, तस्य सम्यग्मिथ्यात्वस्य जघन्यानुभागो-
दीरणा । सम्यग्मिथ्यादृष्टिर्यद्यपि तत्काले संयमं च न प्रतिपद्यते, तथापि शुद्धिवशात्, किन्तु केवलं सम्यक्त्वमेवेति
कृत्वा तदेव गृह्यते । तथा चतुर्णामायुषामपि जघन्यस्थितौ वर्तमानाः जघन्यानुभागमुदीरयन्ति । तत्र पर्या-

णामायुषां संक्लेशादेव जघन्यस्थितिबन्धो भवतीति कृत्वा जघन्यानुभागोऽपि तत्रैव लभ्यते । तथा नरकायुषो विशुद्धिवशाज्जघन्यः स्थितिबन्धः, ततो जघन्यानुभागोऽपि नरकायुषस्तत्रैव लभ्यते । तथा च सति त्रयाणामायुषामतिसंक्लिष्टो जघन्यानुभागोदीरकः, नरकायुषस्त्वतिविशुद्ध इति ॥ ७२ ॥

पोग्गलविवागियाणं भवाइसमये विसेसमवि चासिं । आइतणूणं दोण्हं सुहुमो वाऊ य अप्पाऊ ॥ ७३ ॥

पोग्गल त्ति–पुद्गलविपाकिन्यः प्रकृतयः, तासां सर्वासामपि भवादिसमये भवप्रथमसमये जघन्यानुभागोदीरणा । एतच्च सामान्येनोक्तं, ततोऽमुकस्यामुक उदीरक इत्येवंरूपं विशेषमपि चासां प्रकृतीनां वक्ष्यामि । प्रतिज्ञातमेव निर्वाहयति—'आइ इत्यादि' आद्ययोर्द्वयोस्तन्वोः शरीरयोरौदारिकवैक्रियरूपयोर्यथासंख्यं सूक्ष्मो वायुकायिकश्चाल्पायुर्जघन्यानुभागोदीरकः । इह शरीरग्रहणेन बन्धनसंघाता अपि गृहीता द्रष्टव्याः । तत एतदुक्तं भवति—औदारिकशरीरौदारिकसंघातौदारिकबन्धनचतुष्टयरूपस्यौदारिकषट्कस्याप्यपर्याप्तसूक्ष्मैकेन्द्रियो वायुकायिको वैक्रियषट्कस्य च पर्याप्तो बादरो वायुकायिकोऽल्पायुर्जघन्यानुभागोदीरको भवति ॥ ७३ ॥

बेइंदिय अप्पाउग निरय चिरठिइ असण्णिणो वा वि । अंगोवंगाणाहारगाए जइणो (अ)प्पकालम्मि ।७४।

बेइंदिय त्ति–द्वयोरङ्गोपाङ्गयोरौदारिकाङ्गोपाङ्गवैक्रियाङ्गोपाङ्गनाम्नोर्यथासंख्यमल्पायुर्द्वीन्द्रियस्तथाऽसंज्ञी मन् यो जातो नारकश्चिरस्थितिकः स च जघन्यानुभागोदीरको भवति । इयमत्र भावना—द्वीन्द्रियोऽल्पायुरौदारिकाङ्गोपाङ्गनाम्न उदयप्रथमसमये जघन्यमनुभागमुदीरयति । तथाऽसंज्ञिपञ्चेन्द्रियः पूर्वोद्वर्तितवैक्रियो वैक्रियाङ्गोपाङ्गं स्तोककालं बद्ध्वा

[illegible] तिर्यग्गतिको [illegible] तैजसांगोपांगनाम [illegible] उदयप्रथमसमये वर्तमानस्य जघन्यानुभागो-दीरणा । तथा [illegible] निर्देशः । शरीरपर्याप्त्या [illegible] अपि गृह्यन्ते । तत आहार-[illegible] काले प्रथमसमये [illegible] । जघन्यानुभागोदीरणा ॥ ७४ ॥

[illegible] चउरंसुच्चाण [illegible] संघयणाण य मणुओ हुंडुवघायाणमवि सुहुमो ॥ ७५ ॥

[illegible] प्रथमसमये [illegible] आहारकः समचतुरस्रसंस्थान [illegible] [illegible] । [illegible] । [illegible] उत्कृष्टस्थितौ [illegible] [illegible] इति, [illegible] । ततोऽयमर्थः—शेषाणां [illegible] [illegible] । तथा [illegible] शेषाणां [illegible] पूर्वोक्तानुभागस्य [illegible] जघन्यानुभागोदीरणा । [illegible] । [illegible] मनुष्योदीरणाम् । तथा [illegible] आहारकः प्रथमसमये [illegible] [illegible] ॥ ७६ ॥

[illegible] ठिइ [illegible] । [illegible] तिविक्खाणाहारगस्स बीसा अइकिलिट्ठे ॥ ७७ ॥

[illegible] जघन्यानुभागोदीरणा भवति । [illegible] जघन्यानुभागोदीरणा । [illegible]

सस्सकमृडुलघुवर्जशुभवर्णाद्येकादशकागुरुलघुस्थिरशुभनिर्माणरूपाणां विंशतिप्रकृतीनां संक्लिष्टोऽपान्तरालगतौ वर्तमानोऽनाहारको मिथ्यादृष्टिर्जघन्यानुभागोदीरणास्वामी वेदितव्यः ॥ ७६ ॥

पत्तेगमुरालसमं इयरं हुंडेण तस्स परघाउं । अप्पाउस्स य आयावुज्जोयाणमवि तज्जोगो ॥ ७७ ॥

पत्तेग त्ति–प्रत्येकनाम औदारिकेण समं वक्तव्यं औदारिकस्येव प्रत्येकनाम्नोऽपि सूक्ष्मैकेन्द्रियः प्रथमसमये वर्तमानो जघन्यानुभागोदीरको वेदितव्य इत्यर्थः । तथा हुंडेन समानमितरत् साधारणनाम वक्तव्यं । यथा सूक्ष्मैकेन्द्रियस्याहारकस्य प्रथमसमये हुंडनाम्नो जघन्यानुभागोदीरणा प्रागभिहिता, तथा साधारणनाम्नोऽपि वक्तव्येत्यर्थः । तथा तस्य सूक्ष्मैकेन्द्रियस्य शीघ्रपर्याप्तस्याल्पायुषोऽतिसंक्लिष्टस्य पर्याप्तिचरमसमये वर्तमानस्य पराघातनाम्नो जघन्यानुभागोदीरणा । तथा आतपोद्योतनाम्नोस्तद्योग्यः पृथ्वीकायिकः शरीरपर्याप्त्या पर्याप्तः प्रथमसमये वर्तमानः संक्लिष्टो जघन्यानुभागोदीरकः ॥ ७७ ॥

जा नाउज्जियकरणं तिलगरस्स नवगस्स जोगंते । कक्खडगुरूणमंते नियत्तमाणस्स केवलिणो ॥ ७८ ॥

ज त्ति–आयोजिकाकरणं नाम केवलिसमुद्घातादर्वाग् भवति । तत्राङ् मर्यादायां । आ मर्यादया केवलिदृष्टया योजनं व्यापारणं आयोजनं । तच्चातिशुभयोगानामत्रमेयं । आयोजनमायोजिका तस्याः करणं आयोजिकाकरणं । केचिदावर्जितकरणमाहुः, तत्रायं शब्दार्थः—आवर्जितो नाम अभिमुखीकृतः । तथा च लोके वक्तारः—आवर्जितोऽयं मया, संमुखीकृत इत्यर्थः । ततश्च तथाभव्यत्वेनावर्जितस्य मोक्षगमनं प्रत्यभिमुखीकृतस्य करणं शुभयोगव्यापारणं आवर्जि-

भावात् पूर्ववत् । 'सेसविगप्पा दुविह त्ति' एतासां सप्तानामपि मूलप्रकृतीनां शेषा उत्कृष्टानिरिक्ता जघन्याजघन्याः [illegible] द्विविधा विकल्पाः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—एतासां सप्तानामनिर्विकृतं (इत्यनिमे) [illegible] सर्वोत्कृष्टा । सा च सादिरध्रुवा च । [illegible] चतुर्णां मिथ्यादृष्टेरप्यनन्तरा । ततः साऽपि सादिरध्रुवा च । [illegible] च [illegible] ज्ञातव्या । आयुषः सर्वेऽपि विकल्पा जघन्योत्कृष्टानुत्कृष्टाः द्विविधाः, तद्यथा—सादयोऽध्रुवाश्च । सा च [illegible] दर्शनैव ॥ ८० ॥

सम्प्रत्युत्तरप्रकृतीनां साद्यादिप्ररूपणार्थमाह—

मिच्छत्तस्स चउद्धा सगयाउगाण तिहा अणुक्कोसा । सेसविगप्पा दुविहा सव्वविगप्पा य सेसाणं ॥ ८१ ॥

मिच्छत्तस्स त्ति [illegible] अनुत्कृष्टा प्रदेशोदीरणा चतुर्विधा । तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तथाहि—[illegible] [illegible] प्रतिपद्यमानो [illegible] मिथ्यादृष्टिर्मिथ्यात्वस्योत्कृष्टां प्रदेशोदीरणां । सा च सादिरध्रुवा च, [illegible] । ततोऽन्या सर्वाऽप्यनुत्कृष्टा । साऽपि च [illegible] प्रतिपततो [illegible] सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । [illegible] [illegible] प्रकृतीनामनुत्कृष्टा प्रदेशोदीरणा त्रिधा । तद्यथा—अनादिर्ध्रुवाऽध्रुवा च । तथाहि—[illegible] [illegible] चतसृणां प्रकृतीनां क्षीणकषायस्य [illegible] [illegible] उत्कृष्टा प्रदेशोदीरणा । सा च सादिरध्रुवा च । ततोऽन्या सर्वाऽप्यनुत्कृष्टा सा चानादि- [illegible] । ध्रुवाध्रुवे पूर्ववत् । तथा [illegible] [illegible]

त्संख्याकानां प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिनश्च चरमसमये उत्कृष्टा प्रदेशोदीरणा । सा च सादिरध्रुवा च ।
ततोऽन्या सर्वाऽप्यनुत्कृष्टा । सा चानादिः, ध्रुवोदीरणत्वात् । आसां ध्रुवाध्रुवे पूर्ववत् । 'सेसविगप्पा दुविह त्ति' उक्त-
शेषा विकल्पा जघन्याजघन्योत्कृष्टरूपा द्विविधाः । तद्यथा—सादयोऽध्रुवाश्च । तथाहि—सर्वासामप्युक्तप्रकृतीनामति-
संक्लिष्टपरिणामे मिथ्यादृष्टौ जघन्या प्रदेशोदीरणा लभ्यते । अतिसंक्लिष्टपरिणामप्रत्यवने चाजघन्या । ततो द्वे अपि
साद्यध्रुवे । उत्कृष्टा च प्रागेव भाविता । शेषाणां चोक्तव्यतिरिक्तानां प्रकृतीनां दशोत्तरशतसंख्यानां सर्वेऽपि विकल्पा
जघन्याजघन्योत्कृष्टानुत्कृष्टा द्विविधाः । तद्यथा—सादयोऽध्रुवाश्च । साद्यध्रुवता चाध्रुवोदीरणत्वादवसेया ॥ ८१ ॥
कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधातव्यं । तच्च द्विधा—उत्कृष्टप्रदेशोदीरणास्वामित्वं जघन्यप्रदेशोदी-
रणास्वामित्वं च । तत्र प्रथमत उत्कृष्टोदीरणास्वामित्वमाह—

अणुभागुदीरणाए जहन्नसामी पएसजेठाए । घाईणं अन्नयरो ओहीण विणोहिलंभेण ॥ ८२ ॥

अणुभाग त्ति—घातिकर्मणां सर्वेषामपि अनुभागोदीरणायां यो यो जघन्यानुभागोदीरणास्वामी प्राक् प्रतिपादितः
स स एवोत्कृष्टप्रदेशोदीरणास्वामी गुणितकर्मांशो वेदितव्यः । नवरमन्यतर इति श्रुतकेवली इतरो वा । अवधिज्ञाना-
वरणावधिदर्शनावरणयोरवधिलब्धिहीन उत्कृष्टप्रदेशोदीरकोऽवसेयः । अतीवेदमतिसंक्षिप्तमुक्तमिति विशेषतो विभा-
व्यते—अवधिज्ञानावरणवर्जानां चतुर्णां ज्ञानावरणानां चक्षुरचक्षुःकेवलदर्शनावरणानां क्षीणकषायस्य श्रुतकेवलिन इत-
रस्य वा गुणितकर्मांशस्य समयाधिकावलिकाशेषायां स्थितावुत्कृष्टा प्रदेशोदीरणा । अवधिज्ञानावरणावधिदर्शनावरणयोः

[illegible] श्री[illegible] [illegible]शेषायां शिखाप्रकृष्टा प्रदेशोदीरणा । [illegible] [illegible]
[illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] ॥ ८२ ॥

[illegible] [illegible] [illegible] [illegible] । [illegible] अप्पमत्तस्स ॥८३॥

[illegible] [illegible] [illegible] [illegible] [illegible] ॥ ८३ ॥

[illegible] [illegible] [illegible] । [illegible] नि [illegible] अट्ठासाऊ ॥ ८४ ॥

[illegible] [illegible] [illegible] प्रदेशोदीरणा । तथा

नैरयिकस्त्रयस्त्रिंशत्सागरोपमायुःस्थितिको गुरुदुःखोदये वर्तमानो नरकायुष उत्कृष्टप्रदेशोदीरकः । प्रभूतं हि दुःखमनुभवन् प्रभूतान् पुद्गलान् परिशाटयतीति तदुपादानम् । इतरायुषोस्तिर्यग्मनुष्यायुषोर्यथासंख्यं तिर्यग्मनुष्यौ अष्टवर्षायुषौ अष्टमे वर्षे वर्तमानौ गुरुदुःखोदययुक्तौ उत्कृष्टप्रदेशोदीरकौ भवतः ॥ ७४ ॥

एगंत तिरियजोग्गा नियगविसिट्ठेसु तह अपज्जत्ता । संमुच्छिममणुयंते तिरियगई देसविरयस्स ॥ ७५ ॥

एगंत त्ति–एकान्तेन तिरश्चामेवोदयं प्रति या योग्याः प्रकृतयस्तासामेकेन्द्रियजातिद्वीन्द्रियजातित्रीन्द्रियजातिचतुरिन्द्रियजात्यातपस्थावरसूक्ष्मसाधारणनाम्नामष्टानां निजकविशिष्टेषु निजनिजप्रकृतिविशिष्टेषु । यथा एकेन्द्रियजातिस्थावरनाम्नोर्बादरपृथ्वीकायिके सर्वविशुद्धे, आतपनाम्नः खरबादरपृथ्वीकायिके, सूक्ष्मस्य पर्याप्तसूक्ष्मे, साधारणविकलेन्द्रियजातिनाम्नां तन्नामसु पर्याप्तेषु सर्वविशुद्धेषु उत्कृष्टा प्रदेशोदीरणा भवति, तथाऽपर्याप्तनाम्नः संमूर्छिमो मनुष्योऽपर्याप्तश्चरमसमये वर्तमान उत्कृष्टप्रदेशोदीरकः । तथा तिर्यग्गतेरुत्कृष्टा प्रदेशोदीरणा देशविरतस्य, तस्य सर्वविशुद्धत्वात् ॥७५॥

अणुपुव्विगइदुगाणं सम्मद्दिट्ठी उ दूभगाईणं । नीयस्स य से काले गहिहिइ विरय त्ति सो चेव ॥ ७६ ॥

अणुपुव्वि त्ति–चतसृणामानुपूर्वीणां तस्यां तस्यां गतौ वर्तमानस्तृतीये समये सर्वविशुद्धः सम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः । केवलं नरकतिर्यगानुपूर्व्योः क्षायिकसम्यग्दृष्टिर्वक्तव्यः । देवनारकगत्योरपि स एव क्षायिकसम्यग्दृष्टिरुत्कृष्टप्रदेशोदीरकः । तथा योऽनन्तरसमये संयमं प्रतिपत्स्यते स एवाविरतसम्यग्दृष्टिर्दुर्भगादीनां दुर्भगदुःस्वरानादेयायशःकीर्तीनां नीचैर्गोत्रस्य चोत्कृष्टप्रदेशोदीरकः ॥ ७६ ॥

ओगेन्दुदीरणाणं जोगंते सरङ्गणाणुपाणूणं । नियगंते केवलिणो सव्वविसुद्धीए सगासिं ॥ ८७ ॥

[illegible] योगान्तोदीरका [illegible] योगी सयोगिकेवली चरमसमये शरीरको यासां ता योगान्तोदीरका- [illegible] संस्थानषट्क [illegible] गत्यगुरुलघूपघातपराघातविहा- [illegible] निर्माणनीचैर्गोत्र [illegible] द्विपञ्चाशत्संख्यानां प्रकृ- [illegible] । तथा [illegible] स्वरनिरोधकाले [illegible] । तथाहि—स्वरनिरोधकाले [illegible], प्राणापाननिरोधकाले च प्राणापाननाम्न उत्कृष्टा [illegible] परिणामा—यो यः स्वस्वोदीरणाधिकारी स स तस्य स्वामी. [illegible] गुणितकर्मांशः, तेन दानान्तराया- [illegible] गुणितकर्मांशस्य [illegible] वर्तमानस्या- [illegible] ॥

[illegible] । संप्रति [illegible]—

[illegible] । तेयो जहन्नसामी अणुभागुणो य निययरे ॥ ८८ ॥

[illegible] गुणितकर्मांशः [illegible] [illegible] । [illegible], [illegible]-

वरणवर्जानां त्रयाणां दर्शनावरणीयानां, सातासातवेदनीययोः, मिथ्यात्वस्य, षोडशानां कषायाणां, नवानां नोकषायाणां, सर्वसंख्यया पञ्चत्रिंशत्संख्यानां प्रकृतीनां मिथ्यादृष्टिः सर्वपर्याप्तिपर्याप्तः सर्वसंक्लिष्टो निद्रापञ्चकस्य तत्प्रायोग्यसंक्लेशयुक्तो जघन्यप्रदेशोदीरणास्वामी । तथा योऽनन्तरसमये मिथ्यात्वं यास्यति, सोऽतिसंक्लिष्टः सम्यक्त्वसम्यग्मिथ्यात्वयोर्जघन्यप्रदेशोदीरणास्वामी भवति । तथा गतिचतुष्टयपञ्चेन्द्रियजात्यौदारिकसप्तकवैक्रियसप्तकतैजससप्तकसंस्थानषट्कसंहननषट्कवर्णादिविंशतिपराघातोपघातागुरुलघूच्छ्वासोद्योतविहायोगतिद्विकत्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्त्ययशःकीर्तिनिर्माणोच्चैर्गोत्रनीचैर्गोत्रपञ्चविधान्तरायरूपाणामेकोननवतिसंख्यानां प्रकृतीनां संज्ञी पर्याप्तः सर्वोत्कृष्टसंक्लेशयुक्तो जघन्यप्रदेशोदीरणास्वामी । आहारकसप्तकस्य चाहारकशरीरी तत्प्रायोग्यसंक्लेशयुक्तः, आनुपूर्वीणामपि तत्प्रायोग्यसंक्लेशयुक्तः, आतपस्य खरबादरपृथ्वीकायिकः सर्वसंक्लिष्टः, एकेन्द्रियजातिस्थावरसाधारणनाम्नामेकेन्द्रियः सर्वोत्कृष्टसंक्लेशयुक्तः, सूक्ष्मनाम्नः सूक्ष्मैकेन्द्रियः सर्वसंक्लिष्टो जघन्यप्रदेशोदीरणास्वामी । अपर्याप्तकनाम्नः पुनरपर्याप्तमनुष्यः सर्वसंक्लिष्टश्चरमसमये वर्तमानो जघन्यप्रदेशोदीरको भवति । तथा द्वित्रिचतुरिन्द्रियजातीनां यथाक्रमं द्वित्रिचतुरिन्द्रियाः सर्वसंक्लिष्टा जघन्यप्रदेशोदीरणास्वामिनः । 'अणुभागुत्तो य तित्थयरे त्ति' तीर्थंकरनाम्नो य एव जघन्यानुभागोदीरणास्वामी प्राक् प्रतिपादितः, स एव जघन्यप्रदेशोदीरणास्वामी अपि वेदितव्यः । तीर्थकरकेवली यावदायोजिकाकरणमारभते तावत्तीर्थंकरनाम्नो जघन्यप्रदेशोदीरको वेदितव्य इत्यर्थः ॥ ८८ ॥

उद्दीणं उदहिजुए अद्दसुद्दवेईयआउगाणं तु । पढमस्स जहण्णठिई सेसाणुक्कोसगठिईउ ॥ ८९ ॥

[illegible] मनोज्ञिनी [illegible]। [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥ ८५ ॥

॥ इति श्री[illegible] समाप्तम् ॥

तदेवमभिहिता सप्रपञ्चमुदीरणा । संप्रति उपशमनाप्रतिपादनावसरः । तत्र चैतेऽधिकाराः, तद्यथा—प्रथमसम्यक्त्वोत्पादप्ररूपणा, देशविरतिलाभप्ररूपणा, सर्वविरतिलाभप्ररूपणा, अनन्तानुबन्धिविसंयोजना, दर्शनमोहनीयक्षपणा, दर्शनमोहनीयोपशमना, चारित्रमोहनीयोपशमना, देशोपशमना पुनः सप्रभेदेति । तत्रेदमुपशमनाकरणं सप्रभेदं सर्वात्मना व्याख्यातुमशक्यं । ततो यत्रांशे व्याख्यातुमात्मनोऽशक्तिस्तत्रांशे तद्वेदितॄणामाचार्यो नमस्कारं चिकीर्षुराह—

करणकया अकरणा वि य दुविहा उवसामण त्थ बिइयाए। अकरणअणुइन्नाए अणुओगधरे पणिवयामि १

करणकय त्ति–इह द्विविधा उपशमना करणकृताऽकरणकृता च । तत्र करणं क्रिया यथाप्रवृत्तापूर्वानिवृत्तिकरणसाध्यः क्रियाविशेषः, तेन कृता करणकृता । तद्विपरीताऽकरणकृता । या संसारिणां जीवानां गिरिनदीपाषाणवृत्ततादिसंभववद्यथाप्रवृत्तादिकरणक्रियाविशेषमन्तरेणापि वेदनानुभवनादिभिः कारणैरुपशमनोपजायते, साऽकरणकृतेत्यर्थः । इदं च करणकृताकरणकृतत्वरूपं द्वैविध्यं देशोपशमनाया एव द्रष्टव्यं, न सर्वोपशमनायाः, तस्याः करणेभ्य एव भावात् । उक्तं च पञ्चसंग्रहमूलटीकायां—"देशोपशमना करणकृता करणरहिता च । सर्वोपशमना तु करणकृतैवेति" । अस्याश्चाकरणकृतोपशमनाया नामधेयद्वयं, तद्यथा—अकरणोपशमना, अनुदीर्णोपशमना च । तस्याश्च संप्रत्यनुयोगो व्यवच्छिन्नः, तत आचार्यः स्वयं तस्या अनुयोगमजानानस्तद्वेदितॄणां विशिष्टमतिप्रभाकलितचतुर्दशपूर्ववेदिना नमस्कारमाह—'बिइयाए' इत्यादि, द्वितीयाया अकरणकृताया उपशमनाया अकरणानुदीर्णरूपनामधेयद्वययुक्ताया अनुयोगधरान् व्याख्याकुशलान् प्रणिपतामि तेषु प्रणिपातं करोमि ॥ १ ॥

इत्यादि [illegible] नापि च क्रिया । [illegible]—

सव्वस्स य देसस्स य करणुवसमणा दुसन्नि एक्किक्का । सव्वस्स गुणपसत्था देसस्स वि तासि विवरीया ॥२॥

[illegible]—सर्वोपशमना [illegible] । एकैकस्या अपि द्वे द्वे नामनी । तद्यथा—सर्वोपशमना गुणोपशमना प्रशस्तोपशमना चेति, तथा देशस्य देशोपशमनायाम-[illegible] नामधेये । तद्यथा—अगुणोपशमनाऽप्रशस्तोपशमना च ॥ २ ॥

सम्मत्तुप्पा सव्वउवसमणा [illegible] जोगो । पंचिंदिओ उ सन्नी पज्जत्तो लद्धितिगजुत्तो ॥ ३ ॥

पुव्वं पि विसुज्झंतो गंठियसत्ताणइक्कमिय सोहिं । अन्नयरे सागारे जोगे य विसुद्धलेसासु ॥ ४ ॥

ठिइ सत्तकम्म अंतोकोडीकोडी करेत्तु सत्तण्हं । दुट्ठाणं चउट्ठाणं असुभ सुभाणं च अणुभागं ॥ ५ ॥

बंधंतो धुवपगडी भवपाउग्गा सुभा अणाऊ य । जोगवसा य पएसं उक्कोसं मज्झिम जहन्नं ॥ ६ ॥

ठिइबंधद्धापूरे नवबंधं पल्लसंखभागूणं । असुभसुभाणणुभागं अणंतगुणहाणिवुड्ढीहिं ॥ ७ ॥

करणं अहापवत्तं अपुव्वकरणमनियट्टिकरणं च । अंतोमुहुत्तियाइं उवसंतद्धं च लहइ कमा ॥ ८ ॥

[illegible] मोहनीयस्यैव । देशोपशमना तु सर्वेषां कर्मणाम्, तत्र तस्य मोहनी-यस्य [illegible] पर्याप्तिभिः पर्याप्तः । [illegible]

ज्ञित्वपर्याप्तत्वरूपाभिस्तिसृभिर्लब्धिभिर्युक्तः । अथवा उपशमलब्ध्युपदेशश्रवणलब्धिकरणत्रयहेतुप्रकृष्टयोगलब्धिरूपलब्धित्रिकयुक्तः । करणकालात्पूर्वमपि अन्तर्मुहूर्तकालं यावत् प्रतिसमयमनन्तगुणवृद्ध्या विशुद्ध्या विशुद्ध्यमानोऽवदायमानचित्तसंततिः ग्रन्थिकसत्त्वानामभव्यसिद्धिकानां या विशोधिस्तामतिक्रम्य वर्तमानः ततोऽनन्तगुणविशुद्ध इत्यर्थः । तथाऽन्यतरस्मिन्मतिश्रुताज्ञानविभंगज्ञानानामन्यतमस्मिन् साकारे साकारोपयोगे (योगे) चान्यतमस्मिन्मनोयोगे वाग्योगे काययोगे वा वर्तमानः, तिसृणां विशुद्धानां लेश्यानामन्यतमस्या लेश्यायां वर्तमानो, जघन्येन तेजोलेश्यायां, मध्यमपरिणामेन पद्मलेश्यायां, उत्कृष्टपरिणामेन शुक्ललेश्यायां । तथायुर्वर्जानां सप्तानां कर्मणां स्थितिमन्तःसागरोपमकोटीकोटीप्रमाणां कृत्वा, अशुभानां कर्मणामनुभागं चतुःस्थानकं सन्तं द्विस्थानकं करोति । शुभानां च कर्मणां द्विस्थानकं सन्तं चतुःस्थानकं करोति । तथा ध्रुवप्रकृतीः पञ्चविधज्ञानावरणनवविधदर्शनावरणमिथ्यात्वषोडशकषायभययजुगुप्सातैजसकार्मणवर्णगन्धरसस्पर्शागुरुलघूपघातनिर्माणपञ्चविधान्तरायरूपाः सप्तचत्वारिंशत्संख्या बध्नन् परावर्तमानाः स्वस्वभवप्रायोग्याः प्रकृतीः शुभा एव बध्नाति । ता अप्यायुर्वर्जाः । अतीव विशुद्धपरिणामो हि नायुर्बन्धमारभते इति कृत्वा तद्वर्जनं । भवप्रायोग्य इतिवचनाच्चैतदवगन्तव्यं—यदुत तिर्यङ् मनुष्यो वा प्रथमसम्यक्त्वमुत्पादयन् देवगतिप्रायोग्याः शुभाः प्रकृतीर्देवगतिदेवानुपूर्वीपञ्चेन्द्रियजातिवैक्रियशरीरवैक्रियागोपांगसमचतुरस्रसंस्थानपराघातोच्छ्वासप्रशस्तविहायोगतित्रसादिदशकसातवेदनीयोच्चैर्गोत्ररूपा एकविंशतिसंख्या बध्नाति । देवो नैरयिको वा प्रथमसम्यक्त्वमुत्पादयन् मनुजगतिप्रायोग्या मनुजगतिमनुजानुपूर्वीपञ्चेन्द्रियजातिसमचतुरस्रसंस्थानप्रथमसंहननौदारिकशरीरौदारि

[illegible] ग्रन्थोभिनिविशेषतः [illegible] स्थानानि । केवलं यदि [illegible] । ततस्तिर्यग्गतितिर्यगानुपूर्वीनीचैर्गोत्राणि गच्छन्ति । शेषं तथैव । [illegible] तिष्ठति गच्छति [illegible] सागरोपमकोटीकोटीप्रमाणमेव नामैकं । योगस्थान प्रदेशाग्र- [illegible] न गच्छति । तथाहि—जघन्ये योगे वर्तमानो जघन्यं प्रदेशाग्रं गच्छति, मध्यमे मध्यमं, उत्कृष्टे [illegible] । स्थितिरपि न पूर्णं जघन्यं स्थितिस्थानं प्राक्तनस्थितिस्थानापेक्षया पल्योपमसंख्येयभागन्यूनं करोति । [illegible] न चरिमं जघन्यं स्थितिस्थानं प्राक्तनस्थितिस्थानापेक्षया पल्योपमसंख्येयभागन्यूनं करोति । एवमनन्तरं [illegible] पल्योपमसंख्येयभागन्यूनं करोति । अशुभानां च प्रकृतीनां बध्यमानानामनुभागं द्विस्थान[illegible] [illegible] अनन्तगुणहीनं [illegible] गच्छति । ततोऽपि अनिवृत्तिकरणं [illegible] । [illegible] 'करणं गच्छति' इति [illegible] करोति । ततोऽपूर्वकरणं । ततोऽपि अनिवृत्तिकरणं । [illegible] 'करणं परिणामो' इति [illegible] । तानि च त्रीण्यपि करणानि प्रत्येकमन्तर्मु- [illegible] अन्तर्मुहूर्तप्रमाणानि । ततोऽनेन क्रमेण चतुर्गतिपुद्गलानां [illegible] । तानि [illegible]- [illegible] ॥

[illegible]—

[illegible] परिणामठाणाणं दोन्नु ति ओगा असंखिज्जा ॥८॥

अणुसमयं त्ति–अनुसमयं समये समयेऽध्यवसानानामनन्तगुणनया विशुद्ध्या प्रतिसमयमनन्तगुणवृद्ध्याऽध्यवसानानां विशुद्ध्येत्यर्थः । प्रवर्धमानो यावत् करणसमाप्तिर्भवति तावन्निरन्तरं वर्धते । कियन्ति पुनरध्यवसानानि करणेषु प्रत्येकं भवन्तीति चेदुच्यते—'परिणामेत्यादि' द्वयोरपि यथाप्रवृत्तापूर्वकरणयोः परिणामस्थानानामनुसमयं लोका असंख्येया भवन्ति। एतदुक्तं भवति—यथाप्रवृत्तकरणेऽपूर्वकरणे च प्रतिसमयमसंख्येयलोकाकाशप्रदेशराशिप्रमाणानि अध्यवसायस्थानानि भवन्ति । तथाहि—यथाप्रवृत्तकरणे प्रथमसमये विशोधिस्थानानि नानाजीवापेक्षयाऽसंख्येयलोकाकाशप्रदेशप्रमाणानि । द्वितीयसमये विशेषाधिकानि । ततोऽपि तृतीयसमये विशेषाधिकानि । एवं तावद्वाच्यं यावच्चरमसमयः । एवमपूर्वकरणेऽपि द्रष्टव्यम् । अमूनि चाध्यवसायस्थानानि यथाप्रवृत्तापूर्वकरणयोः संबन्धीनि स्थाप्यमानानि विषमचतुरस्रक्षेत्रमास्तृणन्ति । तयोरुपरि चानिवृत्तकरणाध्यवसायस्थानानि मुक्तावलीसंस्थानानि भवन्ति । उपर्युपरिमुखानि चामून्यनुचिन्त्यमानानि प्रतिसमयमनन्तगुणवृद्ध्या प्रवर्धमानान्यवगन्तव्यानि, तिर्यक्षट्स्थानपतितानि । स्थापना चेयम्॥ए

मंदविसोही पढमस्स संखभागाहि पढमसमयम्मि । उक्कस्सं उप्पिमहो एक्केक्कं दोण्ह जीवाणं ॥१०॥

आचरमाउ सेसुक्कोसं पुव्वप्पवत्तमिइनामं । बिइयस्स बिइयसमए जहण्णमवि अणंतरुक्कस्सा ॥ ११ ॥

मंदविसोहीत्यादि–इह कल्पनया द्वौ पुरुषौ युगपत्करणप्रतिपन्नौ विवक्ष्येते । तत्रैकः सर्वजघन्यया श्रेण्या प्रतिपन्नः, अपरस्तु सर्वोत्कृष्टया विशोधिश्रेण्या । तत्र प्रथमस्य जीवस्य प्रथमसमये मन्दा सर्वजघन्या विशोधिः सर्वस्तोका । ततो द्वितीयसमये जघन्या विशोधिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या विशोधिरनन्तगुणा । एवं तावद्वाच्यं यावद्य-

[illegible] नाम्नो मनो नास्ति । ततः प्रथमसमये द्वितीयस्य [illegible] स्थितिस्थानमनन्तगुणं वक्तव्यं । [illegible] चरमे [illegible] अनन्तगुणा । ततोऽपि द्वितीये समये उत्कृष्टा स्थिति-[illegible] अनन्तगुणा । ततः [illegible] जघन्या स्थितिरनन्तगुणा । [illegible] स्थितिस्थानमनन्तगुणतया [illegible] जघन्या स्थितिः । तत [illegible] यान्यनुक्तानि स्थानानि उत्कृष्टानि स्थिति-[illegible] तानि [illegible] अनन्तगुणानि वक्तव्यानि । [illegible] समासं तथाप्रवृत्तकरणं । [illegible] तथाप्रवृत्तकरणस्य [illegible] द्वितीयं नाम, [illegible] पूर्वं करणं प्रवृत्तं [illegible] । [illegible] तथाप्रवृत्तकरणे स्थितिस्थाने [illegible] जघन्या स्थितिरनन्तगुणा । यानि [illegible] स्थितिस्थानानि [illegible] तानि च [illegible] । स्थितिरपि च पूर्वं पूर्वं [illegible] स्थितिस्थानं [illegible] । [illegible]—'[illegible]' द्वितीयस्य [illegible] यो [illegible] स्थितिस्थानमनन्तगुणं [illegible] उत्कृष्टात् स्थितिस्थानात् अनन्तगुणं [illegible] तथाप्रवृत्तकरणे [illegible] जघन्यानि स्थितिस्थानान्यनन्तगुणतया [illegible] । [illegible] जघन्या स्थितिः [illegible] । [illegible] तथाप्रवृत्तकरण [illegible] स्थितिरनन्तगुणा । ततः [illegible] उत्कृष्टा स्थितिरनन्तगुणा । ततोऽपि द्वितीयसमये जघन्या स्थितिरनन्तगुणा । ततोऽपि [illegible] द्वितीयसमये उत्कृष्टा स्थितिरनन्तगुणा । ततोऽपि तृतीयसमये जघन्या

विशोधिरनन्तगुणा। ततोऽपि तस्मिन्नेव तृतीयसमये उत्कृष्टा विशोधिरनन्तगुणा। एवं प्रतिसमयं तावद्वाच्यं यावच्चरमसमये उत्कृष्टा विशोधिरिति ॥ १०–११ ॥

निव्वयणमवि ततो से ठिइरसघायठिइबंधगद्धा उ। गुणसेढी विय समगं पढमे समये पवत्तंति ॥ १२ ॥

निव्वयणं ति–ततः 'से' तस्यापूर्वकरणस्य निर्वचनं निश्चयमन्वर्थानुयायि वचनमभिधानं वक्तव्यं। तद्यथा–अपूर्वाणि अपूर्वाणि करणानि स्थितिघातरसघातगुणश्रेणिस्थितिबन्धादीनां निवर्तनानि यस्मिन् तत् अपूर्वकरणं। तथाहि–अपूर्वकरणे प्रविशन् प्रथमसमय एव स्थितिघातं रसघातं गुणश्रेणिं स्थितिबन्धं चान्यं युगपदारभते। तथा चाह–'ठिइरसेत्यादि' स्थितिघाते रसघातः स्थितिबन्धाद्धा गुणश्रेणिरपिच। एते चत्वारः पदार्थाः समकं युगपत् प्रथमे समये प्रवर्तन्ते॥ १२ ॥

तत्र स्थितिघातप्रतिपादनार्थमाह—

उयहिपुहत्तुक्कस्सं इयरं पल्लस्स संखतमभागो। ठिइकंडगमणुभागाणणंतभागा मुहुत्तंत्तं ॥ १३ ॥

अणुभागकंडगाणं बहुहिँ सहस्सेहिँ पूरए एक्कं। ठिइकंडगं सहस्सेहिं तेसिं बीयं सहस्सेहिं ॥ १४॥

उयहि त्ति–स्थितिसत्कर्मणोऽग्रिमभागादुत्कर्षत उदधिपृथक्त्वं उदधिपृथक्त्वप्रमाणं प्रभूतसागरोपमशतप्रमाणमित्यर्थः। जघन्येन पुनः पल्योपमसंख्येयभागमात्रं स्थितिकंडकमुत्किरति। उत्कीर्य च याः स्थितीरधो न खंडयिष्यति तत्र तद्दलिकं प्रक्षिपति। अन्तर्मुहूर्तेन च कालेन तत् स्थितिकंडकमुत्कीर्यते। ततः पुनरप्यधस्तात् पल्योपमसंख्येयभागमात्रं

[illegible] सर्वेषामपि [illegible] । [illegible] च निर्लेपयति । एवमन्तर्मुहूर्तानां [illegible] स्थिति-
खण्डकसहस्राणि व्यतिक्रामन्ति । तथा च सति यद् अपूर्वकरणस्य प्रथमसमये स्थितिसत्कर्मासीत्, तदन्यैव [illegible]
[illegible] संख्येयगुणहीनं जातं । संप्रति [illegible]— अनन्तानुबन्धिनां [illegible] प्रकृतीनां यदनुभागसत्कर्म तस्यान-
न्तान् भागान् कृत्वा [illegible] अन्तर्मुहूर्तेन कालेनाशेषानपि विनाशयति । ततः पुनरपि तस्य प्राग्-
[illegible] तेषाम् [illegible] अन्तर्मुहूर्तेन कालेन विनाशयति । एवमनेकान्यनुभाग-
खण्डकसहस्राणि एकैकस्मिन् स्थितिखण्डके व्यतिक्रामन्ति । तेषां च स्थितिखण्डकानां सहस्रैरपूर्वकरणं परिसमाप्यते । संप्रति
[illegible] [illegible] स्थितिघात [illegible] आरभ्यते ।
[illegible] न [illegible] ॥ १२–१३ ॥

अधुना गुणश्रेणिनिरूपणा :—

गुणसेढी निक्खेवो समये समये असंखगुणणाए । अद्धादुगाइरित्तो सेसे सेसे य निक्खेवो ॥ १४ ॥

[illegible]

द्धावलिकातिरिक्तः अपूर्वकरणानिवृत्तिकरणकालाभ्यामभ्यधिकः । एष प्रथमसमयगृहीतदलिकनिक्षेपविधिः । एवं द्वितीयादिसमयगृहीतानामपि दलिकानां निक्षेपविधिर्द्रष्टव्यः। अन्यच्च गुणश्रेणिरचनाय प्रथमसमये दलिकं यद्गृह्यते तत्स्तोकं। द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वाच्यं यावद्गुणश्रेणिकरणचरमसमयः । तथाऽपूर्वकरणसमयेषु अनिवृत्तिकरणसमयेषु चानुभवतः क्रमशः क्षीयमाणेषु सत्सु गुणश्रेणिदलिकनिक्षेपः शेषे शेषे भवति, उपरि च न वर्धते ॥१५॥

संप्रत्यनिवृत्तिकरणस्वरूपमाह—

अनियट्टिम्मि वि एवं तुल्ले काले समा तओ नामं। संखिज्जइमे सेसे भिन्नमुहुत्तं अहो मुच्चा ॥ १६ ॥

किंचूणमुहुत्तसमं ठिइबंधद्धाएँ अंतरं किच्चा । आवलिदुगेक्कसेसे आगाल उदीरणा समिया ॥ १७ ॥

अनियट्टिम्मि त्ति—यथाऽपूर्वकरणप्रथमसमयादारभ्य स्थितिघातादयो युगपत्प्रवर्तमाना उक्ता एवमनिवृत्तिकरणेऽपि वक्तव्याः । 'तुल्ले काले समा तओ नामं ति' तुल्ये समाने काले यतः समा सर्वेषामपि तत्प्रविष्टानां विशोधिर्भवति, न विषमा, ततो नाम सान्वयं निर्वचनीयं अनिवृत्तिकरणमिति । एतदुक्तं भवति—अनिवृत्तिकरणस्य प्रथमसमये ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते तेषां सर्वेषामपि समा एकरूपा विशोधिः । द्वितीयसमयेऽपि च ये वर्तन्ते ये च वृत्ता ये च वर्तिष्यन्ते, तेषामपि सर्वेषां परस्परं समा विशोधिः । नवरं प्रथमसमयभाविविशोध्यपेक्षयाऽनन्तगुणा । एवं तावद्वक्तव्यं यावदनिवृत्तिकरणचरमसमयः । तत एवमस्मिन् करणे प्रविष्टानां तुल्यकालानामसुमतां परस्परमध्यवसानानां या निवृत्तिर्व्यावृत्तिः सा न विद्यत इत्यनिवृत्तिकरणमिति नाम । अस्मिंश्चानिवृत्तिकरणे यावन्तः समयास्तावन्ति अध्यवसायस्थानानि पूर्व-

[illegible]नात् तु [illegible] । 'अंतरकरणाइ' अनिवृत्तिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिन् भागे
[illegible] स्थितिं [illegible] अन्तर्मुहूर्तप्रमाणां मुक्त्वा मिथ्यात्वस्यान्तरकरणं करोति । अन्तरकरणकरणकालश्चान्तर्मुहूर्त-
प्रमाणः [illegible] स्थितिबन्धकालेन [illegible] ततः । तथाहि—अन्तरकरणकरणप्रथमसमये एवान्यं स्थिति-
बन्धं [illegible] । स्थितिबन्धान्तरकरणे च युगपदेव परिसमापयति । अन्तरकरणं च क्रियमाणे गुणश्रेणेः संख्ये-
[illegible] उत्किरति [illegible] प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति । अन्तर-
करणस्याधस्तनी स्थितिः प्रथमा स्थितिरित्युच्यते । उपरितनी तु द्वितीया । प्रथमस्थितौ च वर्तमान उदीरणाप्रयोगेण
यद्दलिकं [illegible] समाकृष्योदयसमये प्रक्षिपति सा उदीरणा । यत्पुनः द्वितीयस्थितेः सकाशादुदीरणा-
प्रयोगेण समाकृष्योदये प्रक्षिपति स आगाल इति । उदीरणाया एव विशेषप्रतिपत्त्यर्थमिदं द्वितीयं नाम पूर्वसूरिभिरा-
रोपितम् । उदीरणागालौ च प्रथमां स्थितिमनुभवन् तावत्करोति यावदावलिकाद्विकं शेषं तिष्ठति । तस्मिंश्च स्थिते
आगालं न करोति, किन्तु केवलोदीरणाम् । [illegible] उदीरणापि तावद्यावदावलिकाशेषो न भवति । आवलिकायां च शेषी-
भूतायां [illegible] । ततः केवलोदयेन तामावलिकामनुभवति । तस्यामपि [illegible] मिथ्यात्वस्य
[illegible] । [illegible] सम्यक्त्वमवाप्नोति ॥ १६–१७ ॥

तथा चाह—

मिच्छत्तुदए खीणे लहए सम्मत्तमोवसमियं सो । लंभेण जस्स लब्भइ आयहियमलद्धपुव्वं जं ॥ १८ ॥

मिछत्तुदए त्ति–मिथ्यात्वस्योदये क्षीणे सति स जीव उक्तेन प्रकारेणौपशमिकं सम्यक्त्वं लभते । यस्य सम्यक्त्वस्य लाभेन यदात्महितमलब्धपूर्वमर्हदादितत्त्वप्रतिपत्त्यादि तल्लभते । तथाहि—सम्यक्त्वलाभे सति जात्यन्धस्य पुंसश्चक्षुर्लाभे एव (इ) व जन्तोर्यथावस्थितवस्तुतत्त्वावलोको भवति । महाव्याध्यभिभूतस्य व्याध्यपगमे इव महांश्च प्रमोदः । तदुक्तं–"जात्यंधस्य यथा पुंसश्चक्षुर्लाभे शुभोदये । सद्दर्शनं तथैवास्य सम्यक्त्वे सति जायते ॥ १ ॥ आनन्दो जायतेऽत्यन्तं तात्त्विकोऽस्य महात्मनः । सद्व्याध्यपगमे यद्वद्व्याधितस्य सदौषधात् ॥ २ ॥" इति ॥ १८ ॥

तं कालं वीयठिइं तिहाणुभागेण देसघाइ उ । सम्मत्तं सम्मिस्सं मिछत्तं सव्वघाईउ ॥ १९ ॥

तं त्ति–'तं कालं' तस्मिन् काले यतोऽनन्तरसमये औपशमिकसम्यग्दृष्टिर्भविष्यति, तस्मिन् प्रथमस्थितौ चरमसमये इत्यर्थः । मिथ्यादृष्टिः सन् द्वितीयं द्वितीयस्थितिगतं दलिकमनुभागेनानुभागभेदेन त्रिधा करोति । तद्यथा–शुद्धमर्धविशुद्धमविशुद्धं च । तत्र शुद्धं सम्यक्त्वं, तच्च देशघाति, देशघातिरसोपेतत्वात् । अर्धविशुद्धं सम्यग्मिथ्यात्वं, तच्च सर्वघाति, सर्वघातिरसोपेतत्वात् । अशुद्धं मिथ्यात्वं, तदपि सर्वघाति । तथा चाह–सम्मिश्रं मिश्रमदितं मिथ्यात्वं सर्वघाति॥१९॥

पढमे समए थोवो सम्मत्ते मीसए असंखगुणो । अणुसमयमवि य कमसो भिन्नमुहुत्ता हि विभाउ ॥२०॥

पढमे त्ति–औपशमिकसम्यक्त्वलाभप्रथमसमयादारभ्य मिथ्यात्वदलिकं गुणनं क्रमेण सम्यक्त्वसम्यग्मिथ्यात्वयोः संक्रमयति । तच्चैवं–प्रथमसमये स्तोको दलिकनिक्षेपः सम्यक्त्वे । ततो मिश्रेऽसंख्येयगुणः । ततोऽपि द्वितीये समये सम्य-

[illegible] । [illegible] प्रतिसमयं क्रमशः [illegible] ॥ २० ॥

[illegible] गुणसेढी [illegible] । [illegible] ॥ २१ ॥

[illegible] गुणश्रेणि [illegible] प्रवर्तते । [illegible] पुनः प्रथमस्थितौ [illegible] आवलिका शेषा न [illegible], [illegible] । [illegible] आवलिका [illegible] ॥ २१ ॥

[illegible] —

[illegible] ॥ २२ ॥

[illegible] द्वितीय- [illegible] प्रविशति । [illegible] ॥

कतरस्य दलिकस्योदयो भवति । किंविशिष्टस्येत्याह—अध्यवसायानुरूपस्य । एतदुक्तं भवति—यदि तदानीं शुभः परिणामस्तर्हि सम्यक्त्वदलिकस्योदयः । मध्यमश्चेत्परिणामस्तर्हि सम्यग्मिथ्यात्वदलिकस्य । जघन्यश्चेत्ततो मिथ्यात्वदलिकस्येति ॥२२॥

सम्मत्तपढमलंभो सव्वोवसमा तहा विगिट्ठो य । छालिगसेसाएँ परं आसाणं कोइ गच्छेज्जा ॥ २३ ॥

सम्मत्त त्ति-एष औपशमिकसम्यक्त्वप्रथमलाभो मिथ्यात्वस्य सर्वोपशमाद्भवति, नान्यथा । तथा प्रथमस्थित्यपेक्षया विप्रकर्षश्च बृहत्तरान्तर्मुहूर्तकालप्रमाणश्च । एष सम्यक्त्वप्रथमलाभः । अस्मिंश्च सम्यक्त्वे लभ्यमाने सति कश्चित्सम्यक्त्वेन समं देशविरतिं सर्वविरतिं वा प्रतिपद्यते । उक्तं च शतकबृहच्चूर्णौ—"उवसमसम्मद्दिट्ठी अंतरकरणट्ठिओ कोई देसविरयं पि लभेइ, कोई पमत्तापमत्तभावं पि, सासायणो पुण न किं पि लहेइ त्ति" एतत्सम्यक्त्वाद्धायां च जघन्यतः समयशेषायां परं उत्कर्षतः षडावलिकाशेषायां कश्चित् आसादनं सासादनत्वं याति । स च नियमात्तदनन्तरं मिथ्यात्वमेव प्रतिपद्यते ॥ २३ ॥

संप्रति सम्यग्दृष्टेः स्वरूपमाह—

सम्मद्दिट्ठी जीवो उवइट्ठं पवयणं तु सद्दहइ । सद्दहइ असब्भावं अजाणमाणो गुरुनियोगा ॥ २४ ॥

सम्मद्दिट्ठि त्ति-सम्यग्दृष्टिर्जीवो गुरुनिरूपदिष्टं प्रवचनं नियमात् यथावत् श्रद्धत्ते । एवं तुरेवकारार्थो भिन्नक्रमश्च । यः पुनः सम्यग्दृष्टिरपि असद्भावमसद्भूतं प्रवचनं श्रद्दधाति सोऽवश्यमजानन् स्वयं सम्यक्परिज्ञानविकलः सन् । यत्रा गुरोस्तथाविधसम्यक्परिज्ञानविकलस्य मिथ्यादृष्टेर्वा जमालिप्रख्यस्य नियोगादाज्ञापारतंत्र्यात्, नान्यथा ॥ २४ ॥

[illegible]—

मिच्छद्दिट्ठी नियमा उवइट्ठं पवयणं न सद्दहइ । सद्दहइ असब्भावं उवइट्ठं वा अणुवइट्ठं ॥ २५ ॥

मिच्छद्दिट्ठि त्ति—मिथ्यादृष्टिर्जीवो गुरुनिरूपितं प्रवचनं नियमात् न श्रद्धत्ते न सम्यक्त्वेनात्मनि परिणमयति, [illegible] उपदिष्टमनुपदिष्टं वा [illegible] असद्भूतं मिथ्यात्वमित्यर्थः । श्रद्धत्ते, न सम्यग्यथार्थमिति ॥ २५ ॥

सम्मामिच्छद्दिट्ठी सागारे वा तहा अणागारे । अह वंजणोग्गहम्मि य सागारे होइ नायव्वो ॥ २६ ॥

सम्मामिच्छद्दिट्ठि त्ति—सम्यग्मिथ्यादृष्टिर्जीवो [illegible] साकारोपयोगे वा भवति, अनाकारोपयोगे वा ? । यदि [illegible] ज्ञानत्वे भवति, नानाकारे । यस्मात्संशयज्ञानिमत्त्वो जिन- [illegible] न सम्यक्ज्ञानी । संशयज्ञानित्वेन न व्यञ्जनावग्रहे भवति ॥ २६ ॥

[illegible] । संप्रति चारित्रमोहनीयस्योपशमना [illegible] । तत्र यथाप्रवृत्तमोहनीयोपशम-

[illegible]—

वेयगसम्मद्दिट्ठी चरित्तमोहुवसमाएँ चिट्ठंतो । अजई देसजई वा विरतो व विसोहिअद्धाए ॥ २७ ॥

[illegible] चारित्रमोहनीयोपशमनार्थं चेष्टते । [illegible] । स [illegible] इत्यादि [illegible] वा, [illegible] । [illegible] चारित्रमोहनीयोपशमनार्थं [illegible] ॥ २७ ॥

एतेषां चाविरतादीनां त्रयाणामपीदं लक्षणं—

अन्नाणाणुवगमजयणाइजउ अवज्ञविरईए । एगव्वयाइ चरिमो अणुमइमित्तो त्ति देसजई ॥ २७ ॥
अणुमइविरउ य जई दोण्ह वि करणाणि दोण्हि न उ तईयं । पढमा गुणसेढी सिं तावइया आलिगा जंपि २८

अन्नाणेत्यादि–तत्र यो व्रतानि न जानाति, न चाभ्युपगच्छति, न तत्पालनाय यतते, सोऽज्ञानानभ्युपगमायतनाभ्निरविरतः । अत्र च त्रिभिः पदैरष्टौ भङ्गाः तत्राद्येषु सप्तसु भङ्गेसु नियमादविरतोऽयतो व्रतानि घुणाक्षरन्यायेन पालि-

१ नो जाणइ नो आदरइ नो पालइ जिणधम्मु । तिपएहिं अट्ठ भगा, तेसा चिन्ताया नेया ॥१॥ सम्म न याण (सम्मजाणे) तेगलिंगधारगा अगीयत्थ वेनियाईया । पचुत्तरसुर सविरगपक्खिणो अट्ठमेगु जई ॥२॥ पढमा मिच्छद्दिट्ठी चउरो समारगमणोवेउ ति । इयरा सम्मदिट्ठी, अविहा निव्वाणगमणम्मि ॥ ३॥ स्थापना चेयम्–

१	न जाणइ, न आदरइ न पालइ, सर्वलोक	५	जाणइ, न आदरइ न पालइ, शैनिकादिक
२	न जाणइ, न आदरइ पालइ, तपस्वी	६	जाणइ, न आदरइ पालइ, अनुत्तरदेव
३	न जाणइ, आदरइ न पालइ पार्श्वस्थ,	७	जाणइ, आदरइ न पालइ, श्रेणिकादिक
४	न जाणइ, आदरइ पालइ, अगीतार्थ	८	जाणइ, आदरइ, पालइ, महाव्रतधारी

[illegible] न [illegible] जानाति, किंतु [illegible] । [illegible], [illegible] [illegible] नियमादित्यर्थः । [illegible] नु [illegible] [illegible] । न [illegible], [illegible]. [illegible] [illegible] । [illegible] नु पापं [illegible] । [illegible] [illegible]-प्रति[illegible] [illegible], [illegible], [illegible] । [illegible] पापं [illegible] [illegible], [illegible] । [illegible] पापं [illegible], [illegible], न च [illegible], [illegible] । [illegible] [illegible], [illegible] [illegible] । [illegible], न [illegible], न [illegible] [illegible], न [illegible] । [illegible] ? [illegible] [illegible]. न नु [illegible] [illegible], [illegible] [illegible], [illegible] । [illegible] । [illegible] । [illegible] । [illegible] ।

ततो देशविरतिं सर्वविरतिं वा प्रतिपद्यते। अथ देशविरतस्तर्हि सर्वविरतिमेव। 'पच्छेत्यादि' द्वयोः करणयोर्गतयोः सतोः पश्चा-देशविरतिं सर्वविरतिं वा प्रतिपन्नः सन् उदयावलिकाया उपरि गुणश्रेणिमारचयति। तां च तावतीमन्तर्मुहूर्तप्रमाणां प्रति-समयं दलिकरचनामधिकृत्यासंख्येयगुणवृद्धामारचयति। तथा देशविरतः सर्वविरतो वा स्वप्रतिपत्त्यनन्तरमन्तर्मुहूर्तं कालं यावदवश्यं प्रवर्धमानपरिणामो भवति। तत ऊर्ध्वं त्वनियमः। कोऽपि हि प्रवर्धमानपरिणाम एव भवति। कोऽपि स्वभावस्थः। कोऽपि हीनपरिणामः। तत्र स्वभावस्थे हीनपरिणामे वा देशविरते सर्वविरते वा स्थितिघातरसघातौ न भवतः ॥२८–२९॥

परिणामपच्चया उ णाभोगगया गया अकरणा उ। गुणसेढी सिं निच्चं परिणामा हाणिवुड्ढिजुया ॥३०॥

परिणाम त्ति–परिणामप्रत्ययात् परिणामह्रासात् कारणादित्यर्थः। अनाभोगगता आभोगरहिता ये देशविरतिपरि-णामात् सर्वविरतिपरिणामाद्वा गताः परिभ्रष्टास्ते अकरणाः करणरहिता एव भूयोऽपि तां पूर्वप्रतिपन्नां देशविरतिं सर्व-विरतिं वा प्रतिपद्यन्ते। एतदुक्तं भवति–ये आभोगमन्तरेण कथञ्चित् परिणामह्रासतो देशविरता अविरतिं गताः, सर्वविरताश्च देशविरतिमविरतिं वा गताः, ते परिणामवशेन भूयोऽपि तामेव पूर्वप्रतिपन्नां देशविरतिं सर्वविरतिं वा प्रतिपद्यमाना अकृतकरणा एव प्रतिपद्यन्ते। ये पुनराभोगतो देशविरतेः सर्वविरतेर्वा प्रतिपतिताः, आभोगेनैव च मिथ्यात्वं गताः, ते पुनरपि जघन्यतोऽन्तर्मुहूर्तेन कालेन उत्कर्षतः प्रभूतेन कालेन देशविरतिं सर्वविरतिं वा प्रतिपत्तु-कामा उक्तप्रकारेण करणपुरःसरमेव प्रतिपद्यन्ते। तथा यावद्देशविरतिं सर्वविरतिं वा प्रतिपालयति तावद्गुणश्रेणिमपि समये समये करोति। नवरं प्रवर्धमानपरिणामस्तत्तत्परिणामानुसारेण कदाचिदसंख्येयभागाधिकां कदाचित्संख्येयभा-

[illegible] करोति । [illegible] हीयमानां, अवस्थित- [illegible] । एवं [illegible] द्रष्टव्या । कालतः पुनः सर्वदापि तावन्तीति । [illegible] इति ॥ ३० ॥

[illegible] । [illegible] अनन्तानुबन्धिनां विसंयोजना नोच्यते । अत्र चारित्रमोहनीयोपशमना- [illegible] अनन्तानुबन्धिनां विसंयोजनाऽभिधीयते ? उच्यते—उक्त [illegible] चारित्रमोहनीयमुपशमयितुमारभते [illegible] अनन्तानुबन्धिनां विसंयोजनाऽपि । तेन तद्विसंयोजना नियमादिह वक्तव्या । तत्रानन्तानुबन्धिनः श्रेणिमप्रतिपद्यमाना [illegible] विसंयोजयन्ति । तथा चाह—

चउगइया पज्जत्ता तिन्नि वि संयोयणा विजोयंति । करणेहिं तीहिं सहिया नंतरकरणं उवसमो वा ॥ ३१ ॥

[illegible] पर्याप्तिभिः पर्याप्ताः त्रयोऽपि अविरतदेशविरतसर्व- [illegible], [illegible] मनुष्या वा, सर्वविरता मनुष्या एव, संयोजनान् अन- [illegible] । [illegible] यथाप्रवृत्तादि—करणैस्त्रिभिः सहिताः । करणानि [illegible] । [illegible] न भवन्ति, उपशमो वा । उपशमश्चानन्तानुबन्धिनां न भवतीति गाथाभावार्थः । [illegible] अनन्तानुबन्धिनः [illegible] यथाप्रवृत्तादीनि त्रीणि करणानि प्रारभन्ते । [illegible] । [illegible] अनन्तानुबन्धिनां गुणसंक्रमोऽपि [illegible] । तद्यथा-अपूर्व-

करणस्य प्रथमसमयेऽनन्तानुबन्धिनां दलिकं शेषकषायरूपपरप्रकृतौ स्तोकं संक्रमयति । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणमित्येवं वक्तव्यं । एष गुणसंक्रमः। अनिवृत्तिकरणे च प्रविष्टः सन् प्रागुक्तस्वरूपेणोद्वलनासंक्रमेण निरवशेषान् विनाशयति । किंत्वधस्तादावलिकामात्रं मुञ्चति । तदपि च स्तिबुकसंक्रमेण वेद्यमानासु प्रकृतिषु संक्रमयति । ततोऽन्तर्मुहूर्तात्परतोऽनिवृत्तिकरणपर्यवसाने शेषकर्मणां स्थितिघातरसघातगुणश्रेणयो न भवन्ति, किंतु स्वभावस्थ एव भवति ॥ २१ ॥

तदेवमुक्ताऽनन्तानुबन्धिनां विसंयोजना । ये त्वाचार्या अनन्तानुबन्धिनामप्युपशमनां मन्यन्ते तन्मतेनोपशमनाविधिः षडशीतिवृत्तेरवसेयः । संप्रति दर्शनमोहनीयक्षपणाविधिमाह—

दंसणमोहे वि तहा कयकरणद्धाएँ पच्छिमे होइ । जिणकालगो मणुस्सो पठ्ठवगो अठ्ठवासुप्पिं ॥२२॥

दंसणमोहे वि त्ति—इह दर्शनमोहनीयक्षपणायाः प्रस्थापक आरंभको मनुष्यो जिनकालको जिनकालसंभवी । जिनकालश्च ऋषभजिनविचरणकालप्रभृतिको जंबूस्वामिकेवलोत्पत्तिलाभपर्यवसानो वेदितव्यः। तथा वर्षाष्टकस्योपरि वर्तमानो वज्रर्षभनाराचसंहननश्च भवति । दर्शनमोहेऽपि च क्षपणा तथैव वक्तव्या, यथा प्रागनन्तानुबन्धिनामुक्ता । तत्र यद्यप्येवं सामान्येनोक्तं तथापि किञ्चिद्विशेषतोऽभिधीयते—इह दर्शनमोहनीयक्षपणार्थमभ्युद्यतस्त्रीणि करणान्यारभते । तद्यथा—यथाप्रवृत्तकरणमपूर्वकरणमनिवृत्तिकरणं च । एतानि च त्रीण्यपि करणानि प्रागिव वक्तव्यानि । नवरमपूर्वकरणस्य प्रथमसमये एवानुदितयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोर्दलिकं गुणसंक्रमेण सम्यक्त्वे प्रक्षिपति । उद्वलनासंक्रममपि

तयोरेवमारज्नते । तद्यथा—प्रथमस्थितिखंमं वृहत्तरमुत्त्कलयति । ततो द्वितीयं विशेषहीनं । ततोऽपि तृतीयं विशेषहीनं । एवं तावद्वक्तव्यं यावदपूर्वकरणचरमसमयः । अपूर्वकरणप्रथमसमये च यत् स्थितिसत्कर्मासीत्, तत्तस्यैव चरमसमये संख्येयगुणहीनं जातं । ततोऽनिवृत्तिकरणे प्रविशति । अत्रापि स्थितिघातादीन् सर्वानपि तथैव करोति । अनिवृत्तिकरणप्रथमसमये च दर्शनत्रिकस्यापि देशोपशमनानिधत्तिनिकाचना व्यवच्छिद्यन्ते । दर्शनमोहनीयत्रिकस्य च स्थितिसत्कर्म अनिवृत्तिकरणप्रथमसमयादारन्य स्थितिघातादिन्निर्घात्यमानं स्थितिखंमसहस्रेषु गतेष्वसंज्ञिपञ्चेन्द्रियस्थितिसत्कर्मसमानं ज्ञवति । ततः स्थितिखंमसहस्रपृथक्त्वे गते सति चतुरिन्द्रियस्थितिसत्कर्मसमानं ज्ञवति । ततोऽपि तावन्मात्रेषु खंमेषु गतेषु त्रीन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंमेषु गतेषु द्वीन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंमेषु गतेष्वेकेन्द्रियस्थितिसत्कर्मसमानं । ततोऽपि तावन्मात्रेषु खंडेषु गतेषु पल्योपममात्रप्रमाणं ज्ञवति । एतच्चूर्णिकारमतेनोक्तं । पञ्चसंग्रहकारमतेन तु पल्योपमसंख्येयज्ञागमात्रं । तडुक्तं पञ्चसंग्रहे—"ठितिखंमसहस्साइं एक्केक्के अंतरम्मि गच्छन्ति । पलिउवमसंखंसे दंसणसंते तउे जाए ॥१॥(संखेज्जम) संखेज्जा ज्ञागा खंमेइत्यादि"। 'एकैकस्मिन्नन्तरे इति असंज्ञिपञ्चेन्द्रियचतुरिन्द्रियादिसमानस्थितिसत्कर्मज्ञावनानामपान्तराले इति । तत एकं संख्येयतमं ज्ञागं मुक्त्वा शेषं सर्वमपि त्रयाणां दर्शनमोहनीयानां विनाशयति । ततस्तस्यापि प्राग्मुक्तसंख्येयज्ञागस्यैकं संख्येयज्ञागं मुक्त्वा शेषान् संख्येयान् ज्ञागान् विनाशयति । एवं स्थितिघाताः सहस्रशो व्रजन्ति । तदनन्तरं च मिथ्यात्वस्यासंख्येयान् ज्ञागान् खंडयति । सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु संख्येयान् ज्ञागान् खंमयति । तत एवं स्थितिखंमेषु प्रज्जूतेषु गतेषु सत्सु मिथ्या-

त्वस्य दलिकमावलिकामात्रं जातं । सम्यक्त्वसम्यग्मिथ्यात्वयोस्तु पल्योपमासंख्येयभागमात्रं । अमूनि च स्थितिखंडानि खंड्यमानानि मिथ्यात्वसत्कानि सम्यक्त्वसम्यङ्मिथ्यात्वयोः प्रक्षिपति । सम्यङ्मिथ्यात्वसत्कानि सम्यक्त्वे, सम्यक्त्वसत्कानि त्वधस्तात् स्वस्थाने इति । तदपि च मिथ्यात्वदलिकमावलिकामात्रं स्तिबुकसंक्रमेण सम्यक्त्वे प्रक्षिपति । तदनन्तरं सम्यक्त्वसम्यङ्मिथ्यात्वयोरसंख्येयान् भागान् खंडयति, एकोऽवशिष्यते । ततस्तस्याप्यसंख्येयान् भागान् खंडयति, एकं मुञ्चति । एवं कतिपयेषु स्थितिखंडेषु गतेषु सम्यङ्मिथ्यात्वमावलिकामात्रं जातं । तदानीं च सम्यक्त्वस्य स्थितिसत्कर्म अष्टवर्षप्रमाणं भवति । तस्मिन्नेव च काले सकलप्रत्यूहापगमतो निश्चयनयमतेन दर्शनमोहनीयक्षपक उच्यते । अत ऊर्ध्वं सम्यक्त्वस्य स्थितिखंडमन्तर्मुहूर्तप्रमाणमुत्किरति । तद्दलिकं तूदयसमयादारभ्य प्रक्षिपति । केवलमुदयसमये सर्वस्तोकं । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वक्तव्यं यावद्गुणश्रेणीशिरः । तत ऊर्ध्वं तु विशेषहीन विशेषहीनं तावद्यावच्चरमा स्थितिः । एवमान्तर्मौहूर्तिकान्यनेकानि खंडान्युत्किरति निक्षिपति च तावद्यावद्द्विचरमं स्थितिखंडं । द्विचरमात्तु खंडाच्चरमखंडं संख्येयगुणं । तदपि च गुणश्रेण्याः संख्येयतमो भागः । अन्याश्च तदुपरि संख्येयगुणाः स्थितयः । उत्कीर्य च तद्दलिकमुदयसमयादारभ्यासंख्येयगुणतया प्रक्षिपति । तद्यथा—उदयसमये स्तोकं । ततो द्वितीयसमयेऽसंख्येयगुणं । ततोऽपि तृतीयसमयेऽसंख्येयगुणं । एवं तावद्वाच्यं यावद्गुणश्रेणिशिरः । अत ऊर्ध्वमुत्कीर्यमाणमेव चरमस्थितिखंडं । ततो न तत्र प्रक्षिपति । चरमे च स्थितिखंडे उत्कीर्णे सत्यसौ क्षपकः कृतकरण इत्युच्यते । तथा चाह—'कयकरणद्धाएँ पच्छिमे होइ त्ति' पश्चिमे चरमखंडे उत्कीर्णे कृतकर-

णाद्धायां वर्तते कृतकरणो जवतीत्यर्थः । अस्यां कृतकरणाद्धायां वर्तमानः कश्चित्कालमपि कृत्वा चतसृणा गतीनामन्यतमस्यां गतावुत्पद्यते । लेश्यायामपि च, पूर्व शुक्ललेश्यायामासीत्, संप्रति त्वन्यतमस्या गच्छति । तदेवं प्रस्थापको मनुष्यो निष्ठापकस्तु चतसृष्वपि गतिषु जवति । उक्तं च–“पट्ठवगो य मणुस्सो निट्ठवगो चउसु वि गईसु” । अथोच्येत क्षीणसप्तको गत्यन्तरं संक्रामन् कतितमे जवे मोक्षमुपयाति ? उच्यते—तृतीये चतुर्थे वा जवे । तथाहि–यदि देवगतिं नरकगतिं वा संक्रामति ततो देवजवान्तरितो नरकजवान्तरितो वा तृतीयजवे मोक्षमुपयाति । अथ तिर्यक्षु मनुष्येषु वा समुत्पद्यते, तर्हि सोऽवश्यमसंख्येयवर्षायुष्केषु मध्ये समुत्पद्यते, न संख्येयवर्षायुष्केषु । ततस्तज्जवानन्तरं देवजवे, तस्माच्च देवजवाच्च्युत्वा मनुष्यजवं, ततो मोक्षं यातीति चतुर्थे जवे मोक्षगमनं । उक्तं च–“तइयचउत्थे तम्मि व जवम्मि सिज्झंति दंसणे खीणे । जं देवनिरइ असंखाउचरमदेहेसु ते होंति ॥ १ ॥ तथा क्षीणसप्तकः पूर्वबद्धायुष्कोऽपि यदि तदानीं कालं न करोति, तर्हि कश्चिद्वैमानिकेष्वेव, बद्धायुष्कः चारित्रमोहनीयस्योपशमनार्थमभ्युद्यतते । अथाबद्धायुष्कस्ततः सप्तकक्षयानन्तरं क्षपकश्रेणिमेव प्रतिपद्यते ॥ ३२ ॥

उपशमश्रेणिं प्रतिपत्तुकामस्यैव प्रकारान्तरमाह—

अहवा दंसणमोहं पुव्वं उवसामइत्तु सामन्ने । पढमठिइमावलियं करेइ दोण्हं अणुदियाणं ॥ ३३ ॥

अहव त्ति–अथवेति प्रकारान्तरे । इह यदि वेदकसम्यग्दृष्टिः सन् उपशमश्रेणिं प्रतिपद्यते । ततो नियमाद्दर्शनमोहनीयत्रितयं पूर्वमुपशमयति । तच्च श्रामण्ये स्थितः सन्नुपशमयति । तथा चाह—श्रामण्ये संयमे स्थितः सन् दर्शनमो-

हनीयत्रितयमुपशमय्य, उपशमनाविधिः सकलोऽपि प्रागिव करणत्रयानुगो वेदितव्यः । नवरमन्तरकरणं कुर्वन्ननुदितयोर्मिथ्यात्वसम्यग्मिथ्यात्वयोः प्रथमां स्थितिमावलिकामात्रां करोति । सम्यक्त्वस्य चान्तर्मुहूर्तप्रमाणां । उत्कीर्यमाणं च दलिकमन्तरकरणसत्कं त्रयाणामपि सम्यक्त्वस्य प्रथमस्थितौ प्रक्षिपति। शेषं तथैव वक्तव्यं ॥ ३३ ॥

दर्शनत्रितयमुपशमय्य किं करोतीत्यत आह—

अद्धापरिवित्तीउ पमत्त इयरे सहस्ससो किच्चा। करणाणि तिन्नि कुणए तइयविसेसे इमे सुणसु ॥३४॥

अद्ध त्ति–अद्धापरिवृत्तीः संक्लेशविशोधिवशात् प्रमत्तभावे इतरस्मिंश्चाप्रमत्तभावे कालपरावृत्तीः सहस्रशः कृत्वा चारित्रमोहनीयोपशमनाय त्रीणि करणानि यथाप्रवृत्तादीनि करोति । तानि च प्रागिव वक्तव्यानि । केवलं तृतीयेऽनिवृत्तिकरणे इमान् वक्ष्यमाणान् विशेषान् शृणुत ॥ ३४ ॥

तानेवाह—

अंतोकोडाकोडी संतं अनियट्टिणो य उदहीणं । बंधो अंतोकोडी पुव्वकमा हाणि अप्पबहू ॥ ३५ ॥

अंतो त्ति–अनिवृत्तिकरणस्य प्रथमसमये आयुर्वर्जानां सप्तानां कर्मणां स्थितिसत्कर्म अन्तःसागरोपमकोटीकोटीप्रमाणं । बन्धः पुनरन्तःसागरोपमकोटीकोटीप्रमाणः । सोऽपि च पूर्वक्रमेण हानिं गच्छति । तद्यथा–स्थितिबन्धे पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसंख्येयभागहीनं करोति । तस्मिन्नपि पूर्णे सत्यन्यं स्थितिबन्धं पल्योपमसंख्येयभागहीनं करोतीत्यादि । अल्पबहुत्वमपि पूर्वक्रमेणैव वेदितव्यं । तद्यथा–सर्वस्तोके नामगोत्रे, स्वस्थाने तु परस्परं तुल्ये । ततो

ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणि विशेषाधिकानि, स्वस्थाने तु परस्परं तुल्यानि । ततोऽपि चारित्रमोहनीयं विशेषाधिकं । एतच्चाल्पबहुत्वं सर्वकालमपि द्रष्टव्यं, यावदेतत्स्थानमिति ॥ ३५ ॥

ठिइकंडगमुक्कस्सं पि तस्स पल्लस्स संखतमन्नागो । ठिइबंधबहुसहस्से सेक्केक्कं जं नणिस्सामो ॥३६॥

ठिइ त्ति-उत्कृष्टमपि स्थितिकण्डकं हन्यमानं तस्य चारित्रमोहनीयोपशमकस्यानिवृत्तिकरणे प्रविष्टस्य पल्योपमसंख्येयतमो नागः । जघन्यमपि तस्यैतावदेव । केवलं तल्लघुतरं द्रष्टव्यं । एतदुक्तं नवति-अनिवृत्तिकरणे प्रविष्टस्य स्थितिघात उत्कर्षतोऽपि पल्योपमसंख्येयतमनागप्रमाण एव प्रवर्तते, नाधिकः । अनिवृत्तिकरणप्रथमसमये च तस्याप्रशस्तोपशमनाकरणनिधत्तिकरणनिकाचनाकरणानि व्यवच्छेदमायान्ति । स्थितिघातेषु सहस्रशो गतेषु सत्सु बध्यमानप्रकृतीनां बन्धः सागरोपमसहस्रपृथक्त्वप्रमाणो नवति । ततोऽनिवृत्तिकरणाद्धायाः संख्येयेषु नागेषु गतेषु सत्सु असंज्ञिपञ्चेन्द्रियबन्धतुल्यः स्थितिबन्धो नवति । तदनन्तरं स्थितिखण्डपृथक्त्वे गते सति चतुरिन्द्रियबन्धसमानः स्थितिबन्धः । ततो नूयोऽपि स्थितिखण्डपृथक्त्वे गते सति त्रीन्द्रियबन्धतुल्यः स्थितिबन्धः । तत एवमेव द्वीन्द्रियतुल्यः । ततोऽप्येवमेवैकेन्द्रियबन्धतुल्यः । इत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेषु सत्सु आयुर्वर्जानां सप्तानां कर्मणामेकैकं यन्नवति वक्तव्यं तन्नणिष्यामि ३६

तदेवाह—

पल्लदिवड्ढबिपल्लाणि जाव पल्लस्स संखगुणहाणी । मोहस्स जाव पल्लं संखेज्जइनागहाऽमोहा ॥ ३७ ॥

तो नवरमसंखगुणा एक्कपहारेण तीसगाणमहो । मोहे वीसग हेट्ठा य तीसगाणुप्पि तइयं च ॥३८॥

तो तीसगाणमुप्पिं च वीसगाइं असंखगुणणाए। तईयं च वीसगाहि य विसेसमहियं कमेणेति ॥३९॥

पल्लेत्यादि–पल्योपमसार्धपल्योपमद्विपल्योपमानि यावत् पूर्वक्रमेणैव हानिरल्पबहुत्वं च। इयमत्र भावना–एकेन्द्रियबन्धतु-
ल्यात् बन्धादनन्तरं स्थितिखंडसहस्रेषु गतेषु नामगोत्रयोः स्थितिबन्धः पल्योपममात्रः।ज्ञानावरणदर्शनावरणान्तरायवेदनी-
यानां सार्धपल्योपमप्रमाणः। मोहनीयस्य द्विपल्योपममानः । अमुं च पल्योपमसार्धपल्योपमादिकं स्थितिबन्धं यावत्
प्राक्तनः स्थितिबन्धः सर्वोऽपि पूर्वस्मात् पूर्वस्मात् पल्योपमस्य संख्येयतमेन भागेन हीनो हीनतरो वेदितव्यः। स्थितिसत्क-
र्मणोऽपि चाल्पबहुत्वं तथैव। 'पल्लस्स संखगुणहाणि त्ति' पल्यस्य पल्योपमस्याधः स्थितिबन्धः संख्येयगुणहान्या भवति-
एतदुक्तं भवति–यस्य कर्मणो यदा पल्योपमप्रमाणः स्थितिबन्धस्तस्य तदा तत्कालादारभ्यान्योऽन्यः स्थितिबन्धः संख्ये-
यगुणहीनो भवति। ततश्चेदानीं नामगोत्रयोः पल्योपमप्रमाणात् स्थितिबन्धात् अन्यं स्थितिबन्धं संख्येयगुणहीनं
करोति। शेषाणां तु कर्मणां पल्योपमसंख्येयभागहीनं। एवं कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु ज्ञानावरणदर्शनावर-
णवेदनीयान्तरायाणां पल्योपममात्रः स्थितिबन्धः मोहनीयस्य च सार्धपल्योपममात्रः । ततो ज्ञानावरणादीनामन्यः
स्थितिबन्धः संख्येयगुणहीनः, मोहनीयस्य तु संख्येयभागहीनः । तत ऊर्ध्वं स्थितिबन्धसहस्रेषु गतेषु मोहनीयस्य
स्थितिबन्धः पल्योपमप्रमाणो भवति। ततो मोहनीयस्यान्यः स्थितिबन्धः संख्येयगुणहीनः प्रवर्तते । तदानीं च शेष-
कर्मणां स्थितिबन्धः पल्योपमसंख्येयभागप्रमाणः । अत्राल्पबहुत्वं चिन्त्यते–नामगोत्रयोः स्थितिसत्कर्म सर्वस्तोकं ।
ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणां संख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं। ततोऽपि मोहनीयस्य संख्येयगुणं।

'मोहस्स जाव पल्लं संखिज्जजागह त्ति' यावन्मोहस्य मोहनीयस्य पल्योपममात्रः स्थितिबन्धो न जवति, तावत्प्राक्तनः सर्वोऽपि मोहनीयस्य स्थितिबन्धः पल्योपमसंख्येयतमेन जागेन हीनो हीनतरो वेदितव्यः । पल्योपममात्रे स्थितिबन्धे सत्यन्यं स्थितिबन्धं संख्येयगुणहीनं करोति । एतच्च प्रागेवोक्तं । अस्माच्च संख्येयगुणहीनात् मोहनीयस्य स्थितिबन्धात् प्रजूतेषु स्थितिबन्धेषु गतेषु सत्सु मोहनीयस्यापि स्थितिबन्धः पल्योपमस्य संख्येयजागमात्रो जवति । तदानीं च यज्जवति तदाह–'अमोहा तो नवरमसंखिज्जगुण त्ति' 'अमोह त्ति' मोहनीयवर्जयोर्नामगोत्रयोर्ग्रहणं । सर्वेषां कर्मणां पल्योपमसंख्येय-जागमात्रे स्थितिबन्धे सति अमोहयोर्नामगोत्रयोरसंख्येयगुणहीनमन्यं स्थितिबन्धमारजते । शेषाणां तु संख्येयगुणहीनं । अत्र स्थितिसत्कर्मापेक्षयाऽल्पबहुत्वं चिन्त्यते–सर्वस्तोकं नामगोत्रयोः सत्कर्म । ततो ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणा-मसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततोऽपि मोहनीयस्य संख्येयगुणं । ततः स्थितिघातसहस्रेषु गतेषु सत्सु ज्ञाना-वरणदर्शनावरणवेदनीयान्तरायाणां स्थितिबन्धोऽसंख्येयगुणहीनो जवति । तदानीं च स्थितिसत्कर्मापेक्षयाऽल्पबहुत्वं चिन्त्यते–सर्वस्तोकं नामगोत्रयोः सत्कर्म । ज्ञानावरणीयादीनां चतुर्णामसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततो मोहनीयस्यासंख्येयगुणं । ततः स्थितिघातसहस्रेषु गतेषु सत्सु 'एक्कपहारेण तीसगाणमहो मोहे त्ति' एकप्रहारेणैकहेल-यैव त्रिंशत्कानां त्रिंशत्सागरोपमकोटीकोटीस्थितिकानां ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामधस्तात् मोहनीयस्य स्थितिरसंख्येयगुणहीना जवति । नैवात्रान्यो विकल्पः कश्चित्करणीयः । इयमत्र जावना–पूर्वं मोहनीयस्य सत्कर्म ज्ञाना-वरणीयादीनामुपरिष्टादसंख्येयगुणमासीत्, संप्रति पुनरेकहेलयैव तेषामधस्तादसंख्येयगुणहीनं जातमिति । अत्राल्पब-

हुत्वमुच्यते—सर्वस्तोकं नामगोत्रयोः सत्कर्म । ततो मोहनीयस्यासंख्येयगुणं । ततोऽपि ज्ञानावरणीयादीनां चतुर्णामसंख्येयगुणं, स्वस्थाने तु परस्परं तुल्यं । ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु 'वीसग हेट्ठा य' मोहनीयस्य स्थितिबन्ध एकहेलयैव विंशतिकयोर्विंशतिसागरोपमकोटीकोटीस्थितिकयोर्नामगोत्रयोरधस्तादसंख्येयगुणहीनो जातः । अत्र स्थितिबन्धमाश्रित्याल्पबहुत्वं चिन्त्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो नामगोत्रयोरसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततो ज्ञानावरणीयादीना चतुर्णामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततः कतिपयेषु स्थितिबन्धसहस्रेषु गतेषु सत्सु 'तीसगाणुप्पि तइयं च' तृतीयं वेदनीयं स्थितिसत्कर्माधिकृत्य त्रिंशत्सागरोपमकोटीकोटिस्थितिकानां ज्ञानावरणदर्शनावरणान्तरायाणामुपरि जातं । एतदुक्तं भवति—मोहनीयनामगोत्राणि स्थितिसत्कर्माधिकृत्य प्राक् त्रिंशत्कानामधस्ताज्जातानि, संप्रति पुनस्त्रिंशत्कानामपि मध्ये ज्ञानावरणदर्शनावरणान्तरायाणि वेदनीयस्याधस्ताज्जातानि । वेदनीयं तु सर्वोपरि जातं । तदनन्तरं च तस्य वेदनीयस्यान्यः स्थितिबन्धः सर्वेभ्योऽप्यसंख्येयगुणो जायते । स्थितिबन्धमेवाश्रित्याल्पबहुत्वमुच्यते—सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो नामगोत्रयोरसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः । ततोऽपि ज्ञानावरणदर्शनावरणान्तरायाणामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः, ततोऽपि वेदनीयस्यासंख्येयगुणः । ततोऽनेनैव विधिना स्थितिबन्धसहस्रेषु गतेषु सत्सु ॥ ततस्त्रिंशत्कानां त्रिंशत्सागरोपमकोटीकोटीस्थितिकाना ज्ञानावरणदर्शनावरणान्तरायाणा स्थितिबन्धमधिकृत्योपरिविंशतिके नामगोत्रे जाते । अत्राल्पबहुत्वं—सर्वस्तोको मोहनीयस्य स्थितिबन्धः । ततो ज्ञानावरणदर्शनावरणान्तरायाणामसंख्येयगुणः, स्वस्थाने तु परस्परं तुल्यः ।

ततोऽपि वेदनीयस्य विशेषाधिकः । 'असंखगुणणा ए त्ति' यत्र मोहनीयं ज्ञानावरणादिन्योऽसंख्येयगुणहीनं जातं, ततःप्रनृति सर्वत्राप्यसंख्येयगुणहीनमेव क्रमेणेति आगच्छति । तथा तृतीयं च वेदनीयं विंशतिकान्यां विंशतिसागरोपमकोटीकोटीप्रमाणस्थितिकान्यां नामगोत्रान्यां विशेषाधिकं संजातं सत् सर्वत्रापि विशेषाधिकमेव क्रमेणेति अनुवर्तते ॥ ३७ ॥ ३८ ॥ ३९ ॥

अहुदीरणा असंखेज्जसमयबद्धाण देसघाइ ञ्च । दाणंतराय मणपज्जवं च तो उहिदुगलान्नो ॥ ४० ॥
सुयन्नोगाचक्खूउं चक्खू य ततो मई सपरिन्नोगा । विरियं च असेढिगया वंधंति उ सव्वघाईणि ॥४१॥

अहेत्यादि–अथशब्दोऽधिकारान्तरसूचकः । यस्मिन् काले सर्वकर्मणां पल्योपमासंख्येयन्नागमात्रः स्थितिवन्धस्तस्मिन् कालेऽसंख्येयसमयबद्धानामेव कर्मणामुदीरणा प्रवर्तते । कथमेतदवसीयत इति चेदुच्यते–इह यदा पल्योपमस्य संख्येयन्नागमात्रं स्थितिवन्धं करोति, तदा वध्यमानप्रकृतिस्थित्यपेक्षया याः पूर्वबद्धाः समयादिहीनाः स्थितयस्ता एवोदीरणामुपगच्छन्ति, नान्याः । ताश्च चिरकालबद्धा एव क्षीणशेषाः संन्नवन्तीत्यसंख्येयसमयबद्धानां तदानीमुदीरणा । 'देसघाइ ञ्च' इत्यादि ततः स्थितिवन्धसहस्रेषु गतेषु सत्सु अत्र अस्मिन् प्रस्तावे दानान्तरायं (मनःपर्यवज्ञानावरणं च देशघाति दानान्तराय) मनःपर्यायज्ञानावरणयोरनुन्नागवन्धं देशघातिनं करोतीत्यर्थः । ततः स्थितिवन्धसहस्रेषु गतेषु सत्सु अवधिज्ञानावरणावधिदर्शनावरणलान्नान्तरायाणामनुन्नागं देशघातिनं वध्नाति । ततोऽपि संख्येयेषु स्थितिवन्धसहस्रेषु गतेषु सत्सु श्रुतज्ञानावरणाचक्षुर्दर्शनावरणन्नोगान्तरायाणामनुन्नागं देशघातिनं वध्नाति । ततः संख्येयेषु स्थिति-

वन्धसहस्त्रेषु गतेषु सत्सु चक्षुर्दर्शनावरणीयस्यानुभागं देशघातिनं बध्नाति । ततोऽपि संख्येयेषु स्थितिवन्धसहस्त्रेषु गतेषु सत्सु मतेर्मतिज्ञानावरणीयस्य सपरिभोगान्तरायस्यानुभागं देशघातिनं बध्नाति । ततः पुनरपि स्थितिवन्धसहस्त्रेषु गतेषु सत्सु वीर्यान्तरायानुभागं देशघातिनं बध्नाति । 'असेढिगया' इत्यादि अश्रेणिगताः क्षपकश्रेणिरहिता उपशमश्रेणिरहिता वा बन्धकाः पूर्वोक्तान्यपि कर्माणि सर्वघातीनि बध्नन्ति, पूर्वोक्तप्रकृतीनामनुभागं सर्वघातिनं बध्नन्तीत्यर्थः ॥४०-४१॥

संजमघाईणंतरमेत्थ उ पढमठिइ य अन्नयरो । संजलणावेयाणं वेइज्जंतीण कालसमा ॥ ४२ ॥

संजमघाईणं ति—वीर्यान्तरायदेशघात्यनुभागवन्धानन्तरं संख्येयेषु स्थितिवन्धसहस्त्रेषु गतेषु सत्सु संयमघातिनां कर्मणामनन्तानुबन्धिवर्जानां द्वादशानां कषायाणां नवानां च नोकषायाणां सर्वसंख्यया एकविंशतिप्रकृतीनामन्तरकरणं करोति । तत्र च चतुर्णां संज्वलनानामन्यतमस्य वेद्यमानस्य संज्वलनस्य त्रयाणां च वेदानामन्यतमस्य वेदस्य वेद्यमानस्य प्रथमा स्थितिः स्वोदयकालप्रमाणा । अन्येषां चैकादशकषायाणां अष्टानां च नोकषायाणां प्रथमस्थितिरावलिकामात्रा । स्वोदयकालप्रमाणं च चतुर्णां संज्वलनानां त्रयाणां च वेदानामिदं—स्त्रीवेदनपुंसकवेदयोरुदयकालः सर्वस्तोकः, स्वस्थाने तु परस्परं तुल्यः । ततः पुरुषवेदस्य संख्येयगुणः । ततोऽपि संज्वलनक्रोधस्य विशेषाधिकः । ततोऽपि संज्वलनमानस्य विशेषाधिकः । ततोऽपि संज्वलनमायाया विशेषाधिकः । ततोऽपि संज्वलनलोभस्य विशेषाधिकः । उक्तं च—

"थीअपुमोदयकाला संखेज्जगुणा उ पुरिसवेदस्स । तस्स वि विसेसअहिओ कोहे तत्तो वि जहकमसो ॥ १ ॥" तत्र संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणक्रोधोपशमो न भवति, तावत्संज्वलनक्रोधस्यो-

दयः । संज्वलनमानेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमानोपशमो न नवति, तावत्संज्वलन-मानस्योदयः । मायया चोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणमायोपशमो न नवति, तावत्संज्वल-नमायाया उदयः । संज्वलनलोनेनोपशमश्रेणिं प्रतिपन्नस्य यावदप्रत्याख्यानप्रत्याख्यानावरणलोनोपशमो न नवति, तावद्बादरसंज्वलनलोनस्योदयः । ततः परं सूक्ष्मसंपरायाद्धा । तदेवमन्तरकरणमुपरितननागापेक्षया समस्थितिकं, अधो-नागापेक्षया चोक्तनीत्या विपमस्थितिकमिति । यावता च कालेन स्थितिखंमं घातयति, यद्वाऽन्यं स्थितिबन्धं करोति, तावता कालेनान्तरकरणमपि करोति, त्रीण्यपि युगपदारनते युगपदेव च निष्ठां नयति । तच्चान्तरं प्रथमस्थितेः संख्ये-यगुणं । अन्तरकरणसत्कदलिकप्रक्षेपविधिश्चायं—येपां कर्मणां तदानीं बन्ध उदयश्च विद्यते तेपामन्तरकरणसत्कं दलिकं प्रथमस्थितौ द्वितीयस्थितौ च प्रक्षिपति । यथा पुरुपवेदोदयारूढः पुरुपवेदस्य । येपां तु कर्मणामुदय एव केवलो—न बन्धस्तेपामन्तरकरणसत्कं दलिकं प्रथमस्थितावेव प्रक्षिपति, न द्वितीयस्थितावपि, यथा स्त्रीवेदोदयारूढः स्त्रीवेदस्य । येपां पुनरुदयो न विद्यते, किं तु केवलो बन्धः, तेपामन्तरकरणसत्कं दलिकं द्वितीयस्थितावेव प्रक्षिपति, न प्रथमस्थितौ, यथा संज्वलनक्रोधोदयारूढः शेपसंज्वलनानां । येपां पुनर्न बन्धो नाप्युदयः तेपामन्तरकरणसत्कं दलिकं परप्रकृतिपु प्रक्षिपति, यथा द्वितीयतृतीयकपायाणा । 'अन्नयरे' इति आर्पत्वात् पुंस्त्वनिर्देश एकवचनं च । ततोऽयमर्थः—संज्वल-नवेदानामन्यतरयोर्वेद्यमानयोः प्रकृत्योः प्रथमा स्थितिः कालसमा उदयकालसमा ॥ ४२ ॥

उसमयकयंतरे आविलगाण उण्हं उदीरणाभिनवे । मोहे एक्कट्ठाणे वंधुदया संखवासाणि ॥ ४३ ॥

संखगुणहाणिबंधो एत्तो सेसाण संखगुणहाणी । पढमसमए नपुंसं असंखगुणणाएँ जावंतो ॥ ४४ ॥

दुसमयेत्यादि—'दुसमयकयंतरे' इति अन्तरकरणे कृते सति द्वितीये समये इमे सप्ताधिकारा युगपत्प्रवर्तन्ते, तद्यथा—पुरुषवेदसंज्वलनानामानुपूर्व्यैव संक्रमः, संज्वलनलोभस्य च संक्रमाभावः । तथाऽन्तरकरणे कृते सति अनन्तरादिषु समयेषु याः प्रकृतयो मोहनीयसत्का अमोहनीयसत्का वा बध्यन्ते तासां षण्मामावलिकानां मध्ये उदीरणा न भवति किं तु षट्स्वावलिकास्वतिक्रान्तासु । तथा मोहे मोहनीये रसबन्ध एकस्थानकः । तथा मोहनीयस्य संख्येयवार्षिकः स्थितिबन्धः संख्येयवार्षिकश्च उदीरणोदयः । संख्येयवार्षिकात् स्थितिबन्धात् परतोऽन्योऽन्यः स्थितिबन्धः सर्वोऽपि पूर्वस्मात् पूर्वस्मात् संख्येयगुणहीनो भावी, शेषाणां तु कर्मणामसंख्येयगुणहीनः । तथा 'पढमसमए नपुंस त्ति' अन्तरकरणे कृते सति द्वितीये समये नपुंसकवेदं प्रोपशमयति उपशमयितुमारभते असंख्येयगुणतया, तं च तावद्यावदन्तश्चरमसमयः । तथाहि—नपुंसकवेदस्य प्रथमसमये स्तोकं प्रदेशाग्रमुपशमयति । ततो द्वितीयसमयेऽसंख्येयगुणं । तृतीयसमयेऽसंख्येयगुणं । एवं प्रतिसमयमसंख्येयगुणं तावद्वक्तव्यं यावच्चरमसमयः, परप्रकृतिषु च प्रतिसमयमुपशमितदलिकापेक्षयाऽसंख्येयगुणं तावत्संक्रमयति यावद्द्विचरमसमयः । चरमसमये पुनरुपशम्यमानं दलिकं परप्रकृतिषु संक्रम्यमाणदलिकापेक्षयाऽसंख्येयगुणं द्रष्टव्यं । नपुंसकवेदोपशमनारंभप्रथमसमयादारभ्य च सर्वकर्मणामुदीरणा दलिकापेक्षया स्तोका, उदयस्त्वसंख्येयगुणः । नपुंसकवेदे चोपशान्ते स्त्रीवेदं पूर्वोक्तेनैव विधिनोपशमयितुमारभते ॥ ४३–४४ ॥

एविह्री संखतमे गयम्मि घाईण संखवासाणि । संखगुणहाणि एत्तो देसावरणाणुदगराई ॥ ४५ ॥

एविह्नि त्ति–एवं पूर्वोक्तेन प्रकारेण स्त्रीवेदस्योपशम्यमानस्योपशमनाद्धायाः संख्येयतमे भागे गते सति घातिकर्मणां ज्ञानावरणदर्शनावरणान्तरायाणां संख्येयानि वर्षाणि संख्येयवर्षप्रमाणः स्थितिबन्धो भवति । ततश्च संख्येयवर्षप्रमाणात् स्थितिबन्धात् अन्योऽन्यः स्थितिबन्धो घातिकर्मणां पूर्वस्मात् पूर्वस्मात् संख्येयगुणहीनो भवति । अस्मादेव च संख्येयवर्षप्रमाणात् स्थितिबन्धादारभ्य देशघातिना केवलज्ञानावरणकेवलदर्शनावरणवर्जाना ज्ञानावरणदर्शनावरणाना उदकराजिं उदकराजिसमानं रसं बध्नाति एकस्थानकं रसं बध्नातीत्यर्थः । तत एवं स्थितिबन्धसहस्रेषु गतेषु सत्सु स्त्रीवेद उपशान्तो भवति ॥ ४९ ॥

ता सत्तण्हं एवं संखतमे संखवासितो दोण्हं । विइयो पुण ठिइबंधो सव्वेसिं संखवासाणि ॥ ४६ ॥

तो त्ति–स्त्रीवेदे उपशान्ते ततः शेषान् सप्त नोकषायान् उपशमयितुमारभते । तेषा चैवं पूर्वोक्तेन प्रकारेणोपशम्यमानानामुपशमनाद्धायाः संख्येयतमे भागे गते सति द्वयोर्नामगोत्रयोः संख्येयवार्षिकः स्थितिबन्धो भवति । वेदनीयस्य पुनरसंख्येयवार्षिक एव । तस्मिंश्च स्थितिबन्धे पूर्णे सति अन्यो द्वितीयस्थितिबन्धो वेदनीयस्यापि संख्येयवार्षिको भवति। तथा च सति सर्वेषामपि कर्मणा ततः प्रभृति संख्येयवार्षिक एव स्थितिबन्धः। पूर्वस्माच्च पूर्वस्माच्चान्योऽन्यः स्थितिबन्धः प्रवर्तमानः संख्येयगुणहीनः प्रवर्तते। ततः स्थितिबन्धसहस्रेषु गतेषु सत्सु सप्तापि नोकषाया उपशान्ता भवन्ति ॥४६॥ नवरं

छस्सुवसमिज्जमाणे सेक्का उदयठिई पुरिससेसा । समऊणावलिगदुगे बद्धा वि य तावदद्धाए ॥ ४७ ॥

छस्सु त्ति–षट्सु नोकषायेषु उपशम्यमानेषु यस्मिन् समये षट् नोकषाया उपशान्तास्तस्मिन् समये पुरुषवेदस्य प्रथम-

स्थितौ शेषा एकैवोदयस्थितिः समयमात्रावतिष्ठते। तदानीं च पुरुषवेदस्य स्थितिबन्धः षोडश वर्षाणि भवति। संज्वलनानां पुनः संख्येयानि वर्षसहस्राणि। तथा पुरुषवेदस्य प्रथमस्थितौ द्व्यावलिकाशेषायां प्रागुक्तस्वरूप आगालो व्यवच्छिद्यते, उदीरणा तु भवति। तस्मादेव च समयादारभ्य षण्णां नोकषायाणां सत्कं दलिकं पुरुषवेदे न संक्रमयति, किंतु संज्वलनेषु। यदा च प्रागुक्ता पुरुषवेदस्य सत्का एकाप्युदयस्थितिरतिक्रान्ता तदाऽसाववेदको भवति। अवेदकाद्धायाश्च प्रथमसमये समयद्वयोनावलिकाद्विकेन कालेन यद्बद्धं तदेव केवलमनुपशान्तं तिष्ठति। शेषं पुनः सकलमपि नपुंसकवेदोक्तप्रकारेणोपशान्तं। तदपि च समयोनावलिकाद्विकमात्रेण तावदद्धया तावता कालेन समयद्वयोनावलिकाद्विकप्रमाणेन कालेनेत्यर्थः। उपशमयति। तदुपशमनाविधिश्चायम्—प्रथमसमये स्तोकमुपशमयति। द्वितीयसमयेऽसंख्येयगुणं। तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वाच्यं यावत्समयोनावलिकाद्विकचरमसमयः। परप्रकृतिषु च प्रतिसमयं समयोनावलिकाद्विककालं यावद्यथाप्रवृत्तसंक्रमेण संक्रमयति। परं प्रथमसमये प्रभूतं। द्वितीयसमये विशेषहीनं। तृतीयसमये विशेषहीनं। एवं तावद्यावच्चरमसमयः। ततः पुरुषवेद उपशान्तः। तदानीं च संज्वलनानां द्वात्रिंशद्वर्षप्रमाणोऽन्तर्मुहूर्तोनः स्थितिबन्धो भवति। शेषाणां च ज्ञानावरणदर्शनावरणान्तरायाणां संख्येयानि वर्षसहस्राणि ॥४१॥

तिविहमवेओ कोहं कमेण सेसे वि तिविहतिविहे वि। पुरिससमा संजलणा पढमठिई आलिगा अहिगा

तिविहमवेओ त्ति—यस्मिन् समये पुरुषवेदस्यावेदको जातस्तस्मादेव समयादारभ्याप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनक्रोधान् युगपदुपशमयितुमारभते। उपशमनां च कुर्वतः प्रथमस्थितिबन्धे पूर्णे सत्यन्यः स्थितिबन्धः संज्वलनानां

संख्येयन्नागहीनो न्नवति, शेषाणां च संख्येयगुणहीनः। शेषं स्थितिघातादि तथैव। संज्वलनक्रोधस्य प्रथमस्थितौ समयोनावलिकात्रिकशेषायां अप्रत्याख्यानप्रत्याख्यानावरणक्रोधदलिकं न संज्वलनक्रोधे प्रक्षिपति, किंतु संज्वलनमानादौ। द्व्यावलिकाशेषायां त्वागालो न न्नवति, किंतूदीरणैव। साप्युदीरणा तावत्प्रवर्तते यावदावलिका शेषा न्नवति। उदीरणावलिकायाश्च चरमसमये संज्वलनानां स्थितिबन्धश्चत्वारो मासाः। शेषकर्मणां तु संख्येयानि वर्षसहस्राणि। संज्वलनक्रोधस्य च बन्धोदयोदीरणाव्यवच्छेदः। अप्रत्याख्यानप्रत्याख्यानावरणौ च क्रोधावुपशान्तौ। तदानीमेकामावलिकां समयोनावलिकाद्विकबद्धं च दलिकं मुक्त्वा शेषमन्यत्सर्वं संज्वलनक्रोधस्योपशान्तं, सापि चैका प्रथमस्थितिसत्का चरमावलिका स्तिबुकसंक्रमेण माने प्रक्षिप्यते। समयोनावलिकाद्विकबद्धं च दलिकं पुरुषवेदोक्तप्रकारेणोपशमयति संक्रमयति च। अनेनैव क्रमेण शेषानपि कषायान् त्रिविधान् त्रिप्रकारान् मानमायालोन्नरूपान्। पुनः कथंन्नूतानित्याह—त्रिविधान् प्रत्येकं त्रिप्रकारान्। तथाहि—अप्रत्याख्यानप्रत्याख्यानावरणसंज्वलनन्नेदात् त्रिविधो मानः। एवं मायालोन्नावपि, तान् उपशमयति। तत्र संज्वलनोपशमना पुरुषवेदसमाऽवसेया। अप्रत्याख्यानप्रत्याख्यानावरणमानादीनां चोपशमना षड्नोकषायसमा। नवरं 'पढमठिई आलिगा अहिग त्ति' संज्वलनानां प्रथमस्थितौ पुरुषवेदापेक्षया एका आवलिकाधिका। तथाहि—षट्सु नोकषायेषूपशान्तेषु पुरुषवेदस्य प्रथमा स्थितिरेका समयमात्रा स्थितिरनुपशान्ता आसीत्। अप्रत्याख्यानप्रत्याख्यानावरणमानादिषु पुनरुपशान्तेषु संज्वलनमानादीनामनुपशान्ता प्रथमस्थितेरेकावलिकेति। इदं चातिसंक्षिप्तमुक्तमिति विशेषतो न्नाव्यते—यदा संज्वलनक्रोधस्य बन्धोदयोदीरणा व्यवच्छिन्नाः। तदैव संज्वलनमानस्य

द्वितीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च । तत्रोदयसमये स्तोकं प्रक्षिपति । द्वितीयस्थितावसंख्येयगुणं । तृतीयस्थितावसंख्येयगुणं । एवं तावद्यावत्प्रथमस्थितेश्चरमसमयः । प्रथमस्थितिप्रथमसमये एव संज्वलनमानस्य स्थितिबन्धश्चत्वारो मासाः । शेषाणां तु ज्ञानावरणीयादीनां संख्येयानि वर्षसहस्राणि । तदानीमेव च त्रीनपि मानान् युगपदुपशमयितुमारभते । संज्वलनमानस्य च प्रथमस्थितौ समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमानदलिकं न संज्वलनमाने प्रक्षिपति, किंतु संज्वलनमायादौ । आवलिकाद्विकशेषायां त्वागालो व्यवच्छिद्यते । तत उदीरणैव केवला प्रवर्तते । सापि तावद्यावदावलिकाचरमसमयः । तत एका प्रथमस्थितेरावलिका शेषीभूता तिष्ठति । तस्मिंश्च समये संज्वलनानां द्वौ मासौ स्थितिबन्धः । शेषकर्मणां तु संख्येयानि वर्षाणि । तदानीं च संज्वलनमानस्य बन्धोदयोदीरणा व्यवच्छिन्नाः । अप्रत्याख्यानप्रत्याख्यानावरणमानौ चोपशान्तौ । संज्वलनमानस्यापि च प्रथमस्थितेरेकामावलिकां समयोनावलिकाद्विकबद्धाश्च लता मुक्त्वा शेषमन्यत्सर्वमुपशान्तं । तदानीमेव संज्वलनमायाद्वितीयस्थितेर्दलिकमाकृष्य प्रथमस्थितिं करोति वेदयते च । पूर्वोक्तां च संज्वलनमानस्य प्रथमस्थितिसत्कामेकामावलिकां स्तिबुकसंक्रमेणास्यां संज्वलनमायायां प्रक्षिपति । समयोनावलिकाद्विकबद्धाश्च लताः पुरुषवेदक्रमेणोपशमयति संक्रमयति च । संज्वलनमायोदयप्रथमसमये च मायालोभयोर्द्वौ मासौ स्थितिबन्धः । शेषकर्मणां संख्येयानि वर्षाणि । तत्समयादेव चारभ्य तिस्रोऽपि माया युगपदुपशमयितुमारभते । ततः संज्वलनमायायाः प्रथमस्थितावावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणमायादलिकं संज्वलनमायायां न प्रक्षिपति, किंतु संज्वलनलोभे । आवलिकाद्विकशेषायां त्वागालो

व्यवच्छिद्यते । तत उदीरणैव केवला प्रवर्तते । सापि तावद्यावदावलिकाचरमसमयः । तस्मिंश्च समये संज्वलनमायालोजयोः स्थितिवन्ध एको मासः । शेषकर्मणां तु संख्येयानि वर्षाणि । ततोऽनन्तरसमये संज्वलनमायायां वन्धोदयोदीरणा व्यवच्छिन्नाः । अप्रत्याख्यानप्रत्याख्यानावरणमाये चोपशान्ते । संज्वलनमायायाश्च प्रथमस्थितिसत्कामेकामावलिकां समयोनावलिकाद्विकवद्धाश्च लता मुक्त्वा शेषमन्यत् सर्वमुपशान्तं । तदानीमेव च संज्वलनलोजस्य ।द्वतीयस्थितेः सकाशाद्दलिकमाकृष्य प्रथमस्थिति करोति वेदयते च । पूर्वोक्तां च मायायाः प्रथमस्थितिसत्कामेकामावलिकां स्तिवुकसंक्रमेण सज्वलनलोजे सक्रमयति । समयोनावलिकाद्विकवद्धाश्च लताः पुरुपवेदक्रमेणोपशमयति संक्रमयति च ॥ ४७ ॥

संज्वलनलोजस्य प्रथमस्थितेः प्रम।णनिरूपणार्थमाह—

लोजस्स वेतिजागा ठिइय तिजागोच्छ किट्टकरणद्धा । एगफड्डगवग्गणअणंतजागो ज ता हेठा ॥४७॥

लोजस्स त्ति–संज्वलनलोजस्य प्रथमस्थितेस्त्रयो जागाः । तत्र प्रथमतो द्वौ त्रिजागौ प्रथमस्थितिं करोति द्वयोस्त्रिजागयोर्द्वितीयस्थितेः समाकृष्य दलिकं निक्षिपती।यर्थः । तत्र प्रथमस्त्रिजागोऽश्वकर्णकरणाद्धासंज्ञः, द्वितीयः किट्टिकरणाद्धासंज्ञः । संज्वलनलोजोदयप्रथमसमय एव च त्रीनपि लोजान् अप्रत्याख्यानादीन् युगपदुपशमयितुमारजते । उपशमनाविधिः प्राग्वत् । तत्राश्वकर्णकरणाद्धासंज्ञे प्रथमे त्रिजागे वर्तमानः पूर्वस्पर्धकेन्यः प्रतिसमयं दलिकं गृहीत्वा तस्य चात्यन्तहीनरसतामापाद्यापूर्वाणि स्पर्धकानि करोति । आसंसारं हि परिज्रमता न कदाचनापि वन्धमाश्रित्येदृशानि स्पर्धकानि कृतानि, किंतु संप्रत्येव विशुद्धिप्रकर्षवशात् करोतीत्यपूर्वाण्युच्यन्ते । तत एवमपूर्वस्पर्धकानि कुर्वतः संख्येयेषु

स्थितिवन्धेषु गतेषु सत्सु अश्वकर्णकरणाद्धा व्यतिक्रामति । ततः किट्टिकरणाद्धायां प्रविशति । तदानीं च सञ्ज्वलनलोभस्य स्थितिबन्धो दिनपृथक्त्वप्रमाणः । शेषकर्मणां तु वर्षपृथक्त्वमानः । किट्टिकरणाद्धाया च पूर्वस्पर्धकेभ्योऽपूर्वस्पर्धकेभ्यश्च दलिकं गृहीत्वा प्रतिसमयमनन्ताः किट्टीः करोति । किट्टयो नाम पूर्वस्पर्धकापूर्वस्पर्धकेभ्यो वर्गणा गृहीत्वा तासामनन्तगुणहीनरसतामापाद्य बृहदन्तरालतया यद्व्यवस्थापन । यथा यासामेवासत्कल्पनयाऽनुभागभागानां शतमेकोत्तर द्व्युत्तरं चासीत् । तासामेवानुभागभागाना पञ्चकं पञ्चदशकं पञ्चविंशतिरिति । संप्रति एतासामेव किट्टीनां विशेषप्ररूपणार्थमाह—'एगफड्डगेत्यादि' ताः किट्टीः एकस्मिन् अनुभागस्पर्धके या अनन्तवर्गणास्तासामनन्ततमे भागे यावत्यो वर्गणास्तावत्प्रमाणाः प्रथमसमये करोति । ताश्चानन्ताः । ननु ताः किं सर्वजघन्यानुभागस्पर्धकानुभागेन सदृशाः करोति, उत ततोऽपि हीनाः? उच्यते—ततोऽपि हीनाः, तथा चाह—'हेट्ठा' यत्सर्वजघन्यमनुभागस्पर्धकं तस्याधस्तात् करोति ततोऽप्यनन्तगुणहीनरसाः करोतीत्यर्थः ॥ ४९ ॥

अणुसमयं सेढीए असंखगुणहाणि जा अपुव्वाउ । तव्विवरीयं दलियं जहन्नगाई विसेसूणं ॥ ५० ॥

अणुसमयं ति—या अपूर्वाः प्रतिसमयं नवा नवाः किट्टीः करोति ताः प्रतिसमयं गणनातोऽसंख्येयगुणहानेः श्रेण्या द्रष्टव्याः । नवरं च प्रतिसमयं यथोत्तरमनन्तगुणहीनरसत्वादवसेयं । इयमत्र भावना—प्रथमसमये प्रभूताः किट्टीः करोति । द्वितीयसमयेऽसंख्येयगुणहीनाः । ततोऽपि तृतीयसमयेऽसंख्येयगुणहीनाः । एवं तावद्वाच्यं यावत् किट्टीकरणाद्धायाश्चरमसमयः । 'तव्विवरीयं दलियं ति' दलिकं तद्विपरीतं किट्टिसंख्याविपरीतमवगन्तव्यं । तद्यथा—प्रथमसमये

सकलकिट्टिगतं दलिकं सर्वस्तोकं । ततो द्वितीयसमये सकलकिट्टिगतं दलिकमसंख्येयगुणं । ततोऽपि तृतीयसमये समस्तकिट्टिगतं दलिकमसंख्येयगुणं । एवं तावद्वाच्यं यावत् किट्टिकरणाद्धायाश्चरमसमयः । तथा प्रथमसमयकृतासु किट्टिषु सामान्येनानुभागः सर्वप्रभूतः । ततो द्वितीयसमयकृतासु किट्टिष्वनन्तगुणः । ततोऽपि तृतीयसमयकृतासु अनन्तगुणः । एवं तावद्वाच्यं यावत् किट्टिकरणाद्धाचरमसमयः । संप्रति प्रथमसमये कृतानां किट्टीनां परस्परं प्रदेशप्रमाणनिरूपणार्थमाह—'जहन्नगाई विसेसूणं ति' जघन्या किट्टिमादिं कृत्वा परतः क्रमेण प्रतिकिट्टि विशेषोनं विशेषोनं प्रदेशाग्रमभिधानीयं । इयमत्र भावना—प्रथमसमयकृतासु किट्टिषु मध्ये या सर्वमन्दानुभागा किट्टी तस्याः प्रदेशाग्रं सर्वप्रभूतं । ततोऽनन्तरेणानन्तगुणेनानुभागेनाधिकायां द्वितीयकिट्टौ प्रदेशाग्रं विशेषहीनं । ततोऽप्यनन्तरेणानुभागेनाधिकायां तृतीयकिट्टौ विशेषहीनं । एवमनन्तरानन्तरानुभागाधिकासु किट्टिषु विशेषहीनं विशेषहीनं तावद्वक्तव्यं यावत्प्रथमसमयकृतानां किट्टीनां मध्ये सर्वोत्कृष्टा किट्टिरिति । एवं सर्वेष्वपि समयेषु प्रत्येकं भावनीयम् ॥ ५० ॥

अणुभागो णंतगुणो चाउम्मासाइ संखभागूणो । मोहे दिवसपुहुत्तं किट्टीकरणाइसमयम्मि ॥ ५१ ॥

अणुभागो त्ति–प्रथमसमयकृताना किट्टीनामनुभागो यथोत्तरमनन्तगुणो वाच्यः । तद्यथा—प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टी सा सर्वस्तोकानुभागा । ततो द्वितीयाऽनन्तगुणानुभागा । ततोऽपि तृतीयाऽनन्तगुणानुभागा । एवं तावद्वाच्यं यावत्प्रथमसमयकृतानां किट्टीना मध्ये सर्वोत्कृष्टानुभागा किट्टिरिति । एवं द्वितीयादिष्वपि समयेषु किट्टीनां प्ररूपणा कर्तव्या । संप्रत्यासामेव किट्टीनां परस्परमल्पबहुत्वमुच्यते–प्रथमसमयकृतानां

किट्टीनां मध्ये या सर्वबहुप्रदेशा किट्टी सा स्तोकप्रदेशा । ततो द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वाल्पप्रदेशा किट्टी साऽसंख्येयगुणप्रदेशा । ततोऽपि तृतीयसमयकृतानां किट्टीनां मध्ये या सर्वाल्पप्रदेशा साऽसंख्येयगुणप्रदेशा । एवं तावद्वक्तव्यं यावच्चरमसमयः । तथा प्रथमसमयकृतानां किट्टीनां मध्ये या सर्वमन्दानुभागा किट्टी सा सर्वप्रभूतानुभागा । ततो द्वितीयसमयकृतानां किट्टीनां मध्ये या सर्वोत्कृष्टानुभागा किट्टी साऽनन्तगुणहीना । ततोऽपि तृतीयसमयकृताना किट्टीना मध्ये सर्वोत्कृष्टानुभागाऽनन्तगुणहीना । एवं तावद्वक्तव्यं यावच्चरमसमयः । 'चाउम्मासेत्यादि मोहे मोहनीये संज्वलनानां चातुर्मासिकात् स्थितिबन्धादारभ्यान्योऽन्यः स्थितिबन्धः संख्येयेन भागेनोन ऊनतरस्तावद्वक्तव्यो यावत् किट्टिकरणाद्धायाः प्रथमसमये दिवसपृथक्त्वप्रमाणः स्थितिबन्धो भवति । स च प्रायस्तथैवोक्तः ॥५१॥

भिन्नमुहुत्तो संखिज्जेसु य घाइणि दिणपुहुत्तं ता । वाससहस्सपुहुत्तं अंतोदिवसस्स अंते सिं ॥५२॥

वाससहस्सपुहुत्ता विवस्स अंतो अघाइकम्माणं । लोभस्स अणुवसंतं किट्टीउ जं च पुव्वुत्तं ॥ ५३ ॥

भिन्नमुहुत्तो त्ति–अत्रेति षष्ठीसप्तम्योरर्थं प्रत्यभेदात् अस्या इति द्रष्टव्यं । ततश्चास्याः किट्टिकरणाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु संज्वलनलोभस्य स्थितिबन्धो भिन्नमुहूर्तोऽन्तर्मुहूर्तप्रमाणो भवति । त्रयाणां च घातिकर्मणां दिनपृथक्त्वं दिनपृथक्त्वमानः, नामगोत्रवेदनीयानां वर्षसहस्रपृथक्त्वं प्रभूतवर्षसहस्रप्रमाणः । पृथक्त्वशब्दोऽत्र बहुत्ववाची । तथा किट्टिकरणाद्धाया अन्ते चरमसमये संज्वलनलोभस्य स्थितिबन्धोऽन्तर्मुहूर्तप्रमाणः । केवलमिदमन्तर्मुहूर्तं स्तोकतरमवसेयं । तथा 'सिं ति' तेषां घातिकर्मणामन्तर्दिवसस्याहोरात्रस्य स्थितिबन्धः । अघातिनां पुनर्नामगोत्रवेदनीयानां

वर्षसहस्रपृथक्त्वात् वर्षसहस्रपृथक्त्वप्रमाणात् स्थितिबन्धात् अन्यो हीनो हीनतरः स्थितिबन्धो जवन् तस्मिन् किट्टिकरणाद्धाचरमसमये-द्विवर्षस्य द्वयोर्वर्षयोरन्तर्मध्ये जवति । तथा किट्टिकरणाद्धायां समयोनावलिकात्रिकशेषायामप्रत्याख्यानप्रत्याख्यानावरणलोजदलिकं संज्वलनलोजे न सक्रमयति । किंतु स्वस्थान एव स्थितमुपशमं नीयते । द्व्यावलिकाशेषायां पुनः किट्टिकरणाद्धायां बादरसंज्वलनलोजस्यागालो न जवति, किं तूदीरणैव । सापि तावद्यावदावलिका । तस्याश्च उदीरणावलिकायाश्चरमसमये यत् किट्टीकृतं द्वितीयस्थितिगतं, यच्च पूर्वोक्तं समयोनावलिकाद्विकबद्धमित्यर्थः, या चैकावलिका किट्टिकरणाद्धायाः शेषीजूता, एतत्सर्वं लोजस्य संज्वलनलोजस्यानुपशान्तं वर्तते, शेषं पुनरुपशान्तं । तथा तस्मिन्नेव समये द्वावप्यप्रत्याख्यानप्रत्याख्यानावरणलोजावुपशान्तौ । संज्वलनलोजबन्धव्यवच्छेदो बादरसंज्वलनलोजोदयोदीरणाव्यवच्छेदश्च । एष एव चानिवृत्तिबादरसंपरायगुणस्थानकचरमसमयः ॥ ५२–५३ ॥

सेसद्ध तणुरागो तावईया किट्टिउ य पढमठिई । वज्जिय असंखजागं हेट्ठुवरिमुदीरई सेसा ॥ ५४ ॥

सेसद्ध ति–शेषाद्ध शेषकालं तृतीये विजागे इत्यर्थः । सूक्ष्मरागः सूक्ष्मसंपरायो जवति । ताश्च प्राकृताः किट्टीर्द्वितीयस्थितेः सकाशात् कियतीः समाकृष्य प्रथमस्थितिं तावती सूक्ष्मसंपरायाद्धातुल्यां करोति । किट्टिकरणाद्धायाश्चान्तिममावलिकामात्रं स्तिवुकसंक्रमेण संक्रमयति । तथा प्रथमान्तिमसमयकृताः किट्टीर्वर्जयित्वा शेषाः किट्टयः सूक्ष्मसंपरायाद्धायाः प्रथमसमये उदयमागच्छन्ति । 'वज्जियेत्यादि' चरमसमयकृतानां किट्टीनां अधस्तादसंख्येयं जागं प्रथमसमयकृतानां चोपरितनमसंख्येयतम जागं वर्जयित्वा शेषाः किट्टीरुदीरयति ॥ ५४ ॥

गिण्हंतो य मुयंतो असंखभागं तु चरमसमयम्मि । उवसामेइ य बिइय ठिइं पि पुव्वं व सव्वद्धं ॥ ५५ ॥

गिण्हंतो य त्ति–द्वितीये समये उदयप्राप्तानां किट्टीनामसंख्येयं भागं मुञ्चति उपशान्तत्वादुदये न ददातीत्यर्थः । अपूर्वं चासंख्येयभागमनुभवनार्थमुदीरणाकरणेन गृह्णाति । एवं ग्रहणमोक्षौ कुर्वन् तावज्ज्ञातव्यो यावत्सूक्ष्मसंपरायाद्धायाश्चरमसमयः । द्वितीयस्थितिगतमपि दलिकं सूक्ष्मसंपरायाद्धाप्रथमसमयादारभ्य सर्वाद्धं सकलामपि सूक्ष्मसंपरायाद्धां यावत् पूर्ववदुपशमयति । समयोनावलिकाद्विकबद्धमपि दलिकमुपशमयति । सूक्ष्मसंपरायाद्धायाश्च चरमसमये ज्ञानावरणदर्शनावरणान्तरायाणामान्तर्मौहूर्तिकः स्थितिबन्धः, नामगोत्रयोश्च षोडशमुहूर्तप्रमाणः, वेदनीयस्य च चतुर्विंशतिमुहूर्तमानः । तस्मिन्नेव चरमसमये सकलमपि मोहनीयमुपशान्त । ततोऽनन्तरसमये उपशान्तमोहगुणस्थानकमवाप्नोति ॥५५॥

उवसंतद्धा भिन्नमुहुत्तो तीसे य संखतमतुल्ला । गुणसेढी सव्वद्धं तुल्ला य पएसकालेहिं ॥ ५६ ॥

उवसंतद्ध त्ति–भिन्नमुहूर्तोऽन्तर्मुहूर्तं उपशान्ताद्धा उपशान्तमोहगुणस्थानकाद्धा । तत्र च गुणश्रेणिमारचयति । तस्या उपशान्ताद्धाया यः संख्येयतमो भागस्तावत्प्रमाणा । ताश्च गुणश्रेणीः सर्वा अपि सर्वाद्धां सकलामपि उपशान्ताद्धा यावत् प्रदेशापेक्षया कालापेक्षया च तुल्याः करोति, अवस्थितपरिणामत्वात् ॥ ५६ ॥

उवसंता य अकरणा संकमणोवट्टणा य दिट्ठितिगे । पच्छाणुपुव्विगाए परिवडइ पमत्तविरतो त्ति ॥५७॥

उवसंत त्ति–उपशान्ता मोहनीयप्रकृतयोऽकरणाः करणरहिता भवन्ति संक्रमणोद्वर्तनापवर्तनोदीरणानिधत्तिनिका-

चनाकरणानामयोग्यानि भवन्तीत्यर्थः । दृष्टित्रिके दर्शनमोहनीयत्रिके पुनरुपशान्तेऽपि संक्रमणापवर्तने भवतः । तत्र संक्रमो मिथ्यात्वसम्यग्मिथ्यात्वयोः सम्यक्त्वे, अपवर्तना पुनस्त्रयाणामपि । एवं क्रोधेन श्रेणिं प्रतिपन्नस्य द्रष्टव्यं । यदा तु मानेन श्रेणिं प्रतिपद्यते तदा मानं वेदयन्नेव प्रथमतो नपुंसकवेदोक्तक्रमेण क्रोधत्रिकमुपशमयति । ततः क्रोधोक्तप्रकारेण मानत्रिकं, शेषं तथैव । यदा तु मायया श्रेणिं प्रतिपद्यते तदा मायां वेदयन्नेव प्रथमतो नपुंसकवेदोक्तप्रकारेण क्रोधत्रिकं, ततो मानत्रिकं । ततः क्रोधोक्तप्रकारेण मायात्रिकं, शेषं तथैव । यदा तु लोभेन श्रेणिं प्रतिपद्यते तदा लोभं वेदयन्नेव प्रथमतः क्रोधत्रिकं नपुंसकवेदोक्तक्रमेणोपशमयति । ततो मानत्रिकं, ततो मायात्रिकं, तत उक्तप्रकारेण लोभत्रिकमिति । संप्रति प्रतिपात उच्यते–सोऽपि द्विधा भवक्षयेण अद्धाक्षयेण च । तत्र भवक्षयो म्रियमाणस्य, अद्धाक्षय उपशान्ताद्धाया व्यवच्छेदः । तत्र यो भवक्षयेण प्रतिपतति तस्य प्रथमसमये एव सर्वाण्यपि करणानि प्रवर्तन्ते । प्रथमसमये च यानि कर्माण्युदीर्यन्ते तान्युदयावलिकायां प्रवेशयति । यानि च नोदीरणामागच्छन्ति तेषां दलिकानि उदयावलिकाया बहिस्तान्गोपुच्छाकारसंस्थितानि विरचयति । यः पुनरुपशान्तमोहगुणस्थानकाद्धापरिक्षयेण प्रतिपतति स येनैव क्रमेण स्थितिघातादीन् कुर्वन्नारूढस्तेनैव क्रमेण पश्चानुपूर्व्या स्थितिघातादीन् कुर्वन् प्रतिपतति । स च तावत्प्रतिपतति यावत्प्रमत्तसंयतगुणस्थानकं ॥ ५७ ॥

उवकड्ढित्ता विइठिइहिं उदयादिसुं खिवइ दव्वं । सेढीएँ विसेसूणं आवलिउप्पिं असंखगुणं ॥ ५८ ॥

उवकड्ढित्त त्ति–उपशान्तमोहगुणस्थानकात् प्रतिपतन् क्रमेण संज्वलनलोभादीनि कर्माण्यनुभवति । तद्यथा—प्रथमतः

संज्वलनलोभं, ततो यत्र मायोदयव्यवच्छेदस्तत आरभ्य माया। ततो यत्र मानोदयव्यवच्छेदस्ततोऽर्वाक् मानं। ततो यत्र क्रोधोदयव्यवच्छेदस्तत आरभ्य क्रोधं। एवं च क्रमेणोदयसमयप्राप्तानामनुभवनार्थं तेषां द्वितीयस्थितेः सकाशाद्दलिकमपकृष्य समाकृष्य प्रथमस्थितिं करोति। उदयादिषु चोदयसमयप्रभृतिषु च स्थितिषु श्रेण्या विशेषोनं विशेषोनं प्रक्षिपति। तद्यथा—उदयसमये प्रभूतं। ततो द्वितीयसमये विशेषहीनं। ततोऽपि तृतीयसमये विशेषहीनं। एवं तावद्वाच्यं यावदुदयावलिकायाश्चरमसमयः। तत उदयावलिकाया उपरि असंख्येयगुणं। तद्यथा—उदयावलिकाया उपरि प्रथमसमये प्राक्तनानन्तरसमयदलिकनिक्षेपापेक्षयाऽसंख्येयगुणं। ततोऽपि द्वितीयसमयेऽसंख्येयगुणं। ततोऽपि तृतीयसमयेऽसंख्येयगुणं। एवं तावद्वक्तव्यं यावद्गुणश्रेणीशिरः। ततः परतः पुनरपि प्रागुक्तक्रमेण विशेषहीनो दलिकनिक्षेपः ॥५८॥

वेइज्जंतीणेवं इयरासिं आलिगाए बाहिरउ। न हि संकमोणुपुव्विं णावलिगोदीरणाउप्पिं ॥ ५९ ॥

वेइज्जंतीणेवं ति—एष पूर्वोक्तो दलिकनिक्षेपस्तत्कालवेद्यमानप्रकृतीनामवसेयः। इतरासां त्ववेद्यमानानामावलिकाया उपर्येव दलिकनिक्षेपः। सोऽप्यसंख्येयगुणतया तावद्यावद्गुणश्रेणीशिरः। ततः परतः पुनरपि प्रागुक्तक्रमेण विशेषहीनो विशेषहीनः। 'न हीत्यादि' हिशब्दोऽवधारणे। ततोऽयमर्थः—आनुपूर्व्यैव संक्रमो न भवति, किं त्वनानुपूर्व्याऽपि भवति। तथा बन्धानन्तरं पश्चामावलिकानामुपरि उदीरणा भवतीति प्राक् यदुक्तं तन्न भवति, किं तु बन्धावलिकामात्रातिक्रमेऽपि उदीरणा भवतीति ॥ ५९ ॥

वेइज्जमाणसंजलणद्धाए अहिगा उ मोहगुणसेढी। तुल्ला य जयारूढो अतो य सेसेहिं से तुल्ला ॥६०॥

वेइज्जमाण त्ति–मोहनीयस्य मोहनीयप्रकृतीनां गुणश्रेणिः कालमाश्रित्य वेद्यमानसंज्वलनकालादभ्यधिका प्रतिपतता सता प्रारभ्यते, समारोहकालगुणश्रेण्यपेक्षया तु तुल्या। तथा 'जयं ति' प्राकृतत्वात् स्त्रीत्वनिर्देशः, येन संज्वलनेनोपशमश्रेणिं प्रतिपन्नस्तमुदयेन प्राप्तः सन् ततः प्रभृति तस्य गुणश्रेणिं शेषकर्मसत्कगुणश्रेणिभिः सह तुल्यामारभते। यथा कश्चित्संज्वलनक्रोधेनोपशमश्रेणिं प्रतिपन्नस्ततः श्रेणेः प्रतिपतन् यदा संज्वलनक्रोधमुदयेन प्राप्तस्ततः प्रभृति तस्य गुणश्रेणिः शेषकर्मभिः समाना भवति। एवं मानमाययोरपि वाच्यं। संज्वलनलोभेन पुनरुपशमश्रेणिं प्रतिपन्नस्य प्रतिपातकाले प्रथमसमयादेवारभ्य संज्वलनलोभस्य गुणश्रेणि शेषकर्मगुणश्रेणिभिः सह तुल्या प्रवर्तते। शेषकर्मणां पुनरुपशमश्रेणिमारोहतो यत् यत्र बन्धनसंक्रमादि वृत्तं तत्तथैव प्रतिपततोऽपि क्रमेण पश्चानुपूर्व्या अन्यूनातिरिक्तं वेदितव्यं॥६०॥

खवगुवसामगपडिवयमाणदुगुणो तहिं तहिं बंधो।अणुभागो णंतगुणो असुभाण सुभाण विवरीउ ॥६१॥

खवगुवसामग त्ति–क्षपकस्य क्षपकश्रेणिमारोहतो यस्मिन् स्थाने यावान् स्थितिबन्धस्तस्मिन्नेव स्थाने उपशमश्रेणिमारोहतस्तावान् स्थितिबन्धो द्विगुणो भवति। ततोऽपि तस्मिन्नेव स्थाने उपशमश्रेणीतः प्रतिपततो द्विगुणो भवतीति। क्षपकसत्कस्थितिबन्धापेक्षया चतुर्गुणो भवतीत्यर्थः। तथा क्षपकस्य यस्मिन् स्थानेऽशुभप्रकृतीनामनुभागो यावान् भवति, तदपेक्षया तस्मिन्नेव स्थाने तासामेवाशुभप्रकृतीनामुपशमकस्यानुभागोऽनन्तगुणः। ततोऽपि तस्मिन्नेव स्थाने तासामेवाशुभप्रकृतीनामुपशमश्रेणीतः प्रतिपततोऽनन्तगुणः। 'सुभाण विवरीउ त्ति' शुभप्रकृतीनां पुनरनुभागो विपरीतो वाच्यः। स चैवं—उपशमश्रेणीतः प्रतिपततो यस्मिन् स्थाने शुभप्रकृतीनां यावान् अनुभागो भवति, तदपेक्षया तस्मिन् स्थाने

तासामेव शुभप्रकृतीनामुपशमकस्यानुभागोऽनन्तगुणः । ततोऽपि तस्मिन्नेव स्थाने तासामेव शुभप्रकृतीनां क्षपकस्यानन्तगुणः । शेषं यथाऽऽरोहतस्तथा प्रतिपततोऽपि वेदितव्यं, यावत्प्रमत्तसंयतगुणस्थानं ॥ ६१ ॥

किच्चा पमत्ततदियरठाणे परिवत्ति बहुसहस्साणि। हिठ्ठिल्लाणंतरडुगं आसाणं वा वि गच्छिज्जा ॥ ६२॥

किच्च त्ति–प्रमत्ताप्रमत्तसंयतगुणस्थानकयोः प्रभूतानि सहस्राणि यावत् परिवृत्तीः कृत्वा कश्चिदधस्तनमनन्तरं गुणस्थानकद्विकं याति । कोऽपि देशविरतोऽपि भवति । कोऽपि अविरतसम्यग्दृष्टिरपि भवतीत्यर्थः । येषां मतेनानन्तानुबन्धिनामुपशमना भवति तेषां मतेन कश्चित्सासादनभावमपि गच्छति ॥ ६२ ॥

उवसमसम्मत्तद्धा अंतो आउक्कया धुवं देवो । तिसु आउगेसु बद्धेसु जेण सेढिं न आरुहइ॥६३॥

उवसम त्ति–औपशमिकसम्यक्त्वाद्धायां वर्तमानो यदि कश्चिदायुःक्षयात्कालं करोति तर्ह्यवश्यं देवो भवति । अपि च सास्वादनभावमपि गतः सन् कालं करोति, तथापि स देव एव भवति । यत आह–येन कारणेन देवायुर्वर्जितेषु शेषेषु त्रिष्वायुःषु मध्येऽन्यतमस्मिन्नायुषि बद्धे श्रेणिमुपशमश्रेणिं नारोहति। ततः श्रेणिस्थितः श्रेणीतः कालं कृत्वा देव एव भवति ६३

उग्घाडियाणि करणाणि उदयठिइमाइगं इयरतुल्लं । एगभवे डुक्खुत्तो चरित्तमोहं उवसमेइ॥ ६४ ॥

उग्घाडियाणि त्ति–करणानि बन्धनसंक्रमणादीनि उपशमश्रेणिमारोहतो यत्र यत्र स्थाने यानि यानि व्यवच्छिन्नस्थानानि उपशमश्रेणीतः प्रतिपततः सतस्तत्तत्स्थानं प्राप्तस्य तानि तानि उद्घाटितानि भवन्ति तानि तानि तत्र प्रवर्तन्त-

इत्यर्थः । तथोदयस्थित्यादिकं उदयस्थितिबन्धादिकं, इतरतुल्यं उपशमश्रेण्यारोहणाभ्युदयस्थित्यादितुल्यं, उपशमश्रेणिमारोहतो यत्र यत्र यद्यत् उदयस्थित्यादिकं व्यवच्छिन्नं प्रतिपातेऽपि तत्र तत्र तत्तत् उदयस्थित्यादिकं प्रवर्तत इत्यर्थः । तथैकस्मिन् भवे द्वौ वारौ चारित्रमोहमुपशमयति उपशमश्रेणिं प्रतिपद्यते इत्यर्थः । न तु तृतीयमपि वारं ॥ ६४ ॥

एवं पुरुषवेदोदयेनोपशमश्रेणिं प्रतिपन्नस्य विधिरुक्तः, संप्रति स्त्रीवेदेन प्रतिपन्नस्योच्यते—

उदयं वज्जी इत्थी इत्थिं समयइ अवेयगा सत्त । तह वरिसवरो वरिसवरिं इत्थिं समगं कमारद्धे॥६५॥

उदयं ति-इह स्त्री उपशमश्रेणिं प्रतिपन्ना सती प्रथमतो नपुंसकवेदमुपशमयति, पश्चात् स्त्रीवेदं । तं च तावदुपशमयति यावत्स्वोदयस्य द्विचरमसमयः । तस्मिंश्च समये एकां चरमसमयमात्रामुदयस्थितिं वर्जयित्वा शेषं सकलमपि स्त्रीवेदस्य सत्कं दलिकमुपशमित । ततश्चरमसमये व्यतिक्रान्ते अवेदका सती पुरुषवेदहास्यादिकाः सप्त प्रकृतीर्युगपदुपशमयितुमारभते । शेषं पुरुषवेदेनैव श्रेणिं प्रतिपन्नस्य वेदितव्यं । संप्रति नपुंसकवेदेनोपशमश्रेणिं प्रतिपन्नस्य विधिमाह—'तहेत्यादि' वर्षवरो नपुंसक उपशमश्रेणिं प्रतिपन्नः सन् । तथेति एकामुदयस्थितिं मुक्त्वेत्यर्थः । समकं युगपत नपुंसकवेदस्त्रीवेदावुपशमयति । 'कमारद्धे' इति क्रमेणारब्धे सति । तत्रायं संप्रदायः—स्त्रीवेदेन पुरुषवेदेन वा उपशमश्रेणिं प्रतिपद्यमानो यस्मिन् स्थाने नपुंसकवेदमुपशमयति तद्दूरं यावन्नपुंसकवेदेनापि श्रेणिं प्रतिपन्नः सन् नपुंसकवेदमेव केवलमुपशमयति । तत ऊर्ध्वं पुनर्नपुंसकवेदं स्त्रीवेदं च युगपदुपशमयितुं लग्नः । स च तावद्गतो यावन्नपुंसकवेदाद्धाया द्विचरमसमयः । तस्मिंश्च समये स्त्रीवेद उपशान्तः । नपुंसकवेदस्य च एका समयमात्रोदयस्थितिर्वर्तते ।

शेषं सर्वमुपशान्तं । तस्यामप्युदयस्थितावतिक्रान्तायामवेदको भवति । ततः पुरुषवेदादिकाः सप्त प्रकृतीर्युगपदुपशमयितुं यतते । शेषं तथैव ॥ ६५ ॥

तदेवमुक्ता सर्वोपशमना, संप्रति देशोपशमनामभिधातुकाम आह—

पगइठिई अणुभागप्पएसमूलुत्तराहि पविभत्ता । देसकरणोवसमणा तीए समियस्स अट्ठपयं ॥ ६६ ॥

पगइ त्ति-देशतः करणाभ्यां यथाप्रवृत्तापूर्वकरणसंज्ञाभ्यां कृत्वा प्रकृत्यादीनामुपशमना देशकरणोपशमना । इदमुक्तं भवति—यथाप्रवृत्तकरणापूर्वकरणाभ्यां यत् प्रकृत्यादिकं देशतः उपशमयति, न सर्वात्मना सा देशकरणोपशमना । सा च चतुर्विधा, तद्यथा—प्रकृतिदेशोपशमना, स्थितिदेशोपशमना, अनुभागदेशोपशमना, प्रदेशदेशोपशमना चेति । पुनरप्येकैका द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तथा च देशकरणोपशमनया शमितस्य उपशमं नीतस्य। इदमर्थपदमिदं तात्पर्यं ॥ ६६ ॥

तदेवाह—

उवट्टणउव्वट्टणसंकमणाइं च तिन्नि करणाइं । पगईतयासमईउ पहू नियट्टिंमि वट्टंतो ॥ ६७ ॥

उवट्टणउ त्ति-देशोपशमनया उपशमितस्य कर्मण उद्वर्तनापवर्तनासंक्रमरूपाणि त्रीणि करणानि प्रवर्तन्ते, नान्यानि करणानि उदीरणाप्रभृतीनि । एष देशोपशमनाया विशेषः । तथा मूलप्रकृतिमुत्तरप्रकृतिं वा तया देशोपशमनया उपशमयितुं प्रभुः समर्थो निवृत्तिकरणेऽपूर्वकरणे वर्तमानः । इह निवृत्तिग्रहणं पर्यवसानार्थं वेदितव्यं । तत इदमुक्तं

भवति—सर्वेऽप्येकद्वित्रिचतुरिन्द्रियासंज्ञिसंज्ञिपञ्चेन्द्रियतिर्यङ्नारकदेवा मनुष्याश्च यथासंभवमपूर्वकरणपर्यवसानाः सर्वकर्मणां देशोपशमनास्वामिनोऽवसेयाः ॥ ६७ ॥

एतदेव भावयति—

दंसणमोहाणंताणुबंधिणं सगनियट्टिउ णुप्पिं । जा उवसमे चउद्धा मूलुत्तरणाइसंताउ ॥ ६८ ॥

दंसण त्ति–दर्शनमोहनीयानन्तानुबन्धिनां स्वकीयात् स्वकीयात् अपूर्वकरणात् परतो देशोपशमना न भवति । तत्र दर्शनत्रिकस्य क्षपका अविरता देशविरता विरता वा, उपशमकास्तु विरताः स्वापूर्वकरणान्तसमयं यावद्देशोपशमनां कुर्वन्ति । अनन्तानुबन्धिनां पुनर्विसंयोजने चातुर्गतिका अपि स्वापूर्वकरणान्तिमसमयं यावद्देशोपशमकाः, न परतः । शेषाणां पुनश्चारित्रमोहनीयप्रकृतीनामुपशमनायां क्षपणायां वा यावदपूर्वकरणगुणस्थानकचरमसमयस्तावद्देशोपशमना । शेषाणां सर्वोपशमना न भवति, किं तु देशोपशमनैव । सापि चापूर्वकरणस्थानकं यावदवगन्तव्या । तथा या मूलप्रकृतय उत्तरप्रकृतयो वाऽनादिसत्ताकास्ता उपशमे देशोपशमनामधिकृत्य चतुर्विधाः, तद्यथा—साद्योऽनादयो ध्रुवा अध्रुवाश्च । तत्र मूलप्रकृतयोऽष्टावपि चतुर्विधाः । तथाहि—अपूर्वकरणगुणस्थानकात् परतो गत्वा प्रतिपतता सा देशोपशमना प्रवर्तमाना सादिः । तत्स्थानमप्राप्तानां पुनरनादिः । ध्रुवा अभव्यानां । भव्यानां त्वध्रुवा । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीना सा क्रियते—तत्र वैक्रियसप्तकाहारकसप्तकमनुष्यद्विकदेवद्विकनरकद्विकसम्यक्त्वसम्यग्मिथ्यात्वोच्चैर्गोत्ररूपोद्वलनयोग्यत्रयोविंशतितीर्थकरायुश्चतुष्टयवर्जितं शेषं त्रिंशदुत्तरं प्रकृतिशतं ध्रुवस-

त्कर्म, तस्य देशोपशमना चतुर्विधा, तद्यथा—सादिरनादिर्ध्रुवाऽध्रुवा च । तथाहि—मिथ्यात्वानन्तानुबन्धिनां स्वस्वापूर्वकरणात्परतो देशोपशमना न भवति । शेपकर्मणां त्वपूर्वकरणगुणस्थानकात्परतो न भवति । ततः परतः स्थानात् प्रच्यवमानाना प्रवर्तमाना सादिः । तत्स्थानमप्राप्तानां पुनरनादिः । ध्रुवाध्रुवे पूर्ववत् । शेपाणां तूद्वलनयोग्यत्रयोविंशत्यादीनामष्टाविंशतिप्रकृतीनामध्रुवसत्कर्मत्वादेव देशोपशमना सादिरध्रुवा च विज्ञेया ॥ ६८ ॥

संप्रति देशोपशमनामधिकृत्य प्रकृतिस्थानप्ररूपणार्थमाह—

चउरादिजुया वीसा एक्कवीसा य मोहठाणाणि । संकमनियट्टिपाउग्गाइं सजसाइँ नामस्स ॥ ६९ ॥

चउरादिजुय त्ति–मोहनीयस्य देशोपशमनामधिकृत्य पट् प्रकृतिस्थानानि । तद्यथा—चतुरादियुता विंशतिरेकविंशतिश्च चतुर्विंशतिः, पञ्चविंशतिः, पड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिः, एकविंशतिश्चेत्यर्थः । शेपाणि पुनरनिवृत्तिवादरे प्राप्यन्ते इति कृत्वा न संभवन्ति । तत्राष्टाविंशतिस्थानं मिथ्यादृष्टिसास्वादनसम्यग्मिथ्यादृष्टिवेदकसम्यग्दृष्टीना प्राप्यते । सप्तविंशतिस्थानं उद्वलितसम्यक्त्वस्य मिथ्यादृष्टेः सम्यग्मिथ्यादृष्टेर्वा । पड्विंशतिस्थानं उद्वलितसम्यक्त्वसम्यग्मिथ्यात्वस्यानादिमिथ्यादृष्टेर्वा । पञ्चविंशतिस्थानं पड्विंशतिसत्कर्मणो मिथ्यादृष्टेः सम्यक्त्वमुत्पादयतोऽपूर्वकरणात्परतो वेदितव्य, तस्य मिथ्यात्वदेशोपशमनाया अभावात् । तथाऽनन्तानुबन्धिनामुद्वलनेऽपूर्वकरणात्परतो वर्तमानस्य चतुर्विंशतिस्थानं, चतुर्विंशतिसत्कर्मणो वा चतुर्विंशतिस्थानं । क्षपितसप्तकस्य एकविंशतिस्थानं । संप्रति नामकर्मणः प्रकृतिस्थानान्याह—'संकमेत्यादि' प्रकृतिस्थानसंक्रमे नाम्नो यानि यशःकीर्त्या सह स्थानान्युक्तानि तान्येव निवृत्ति-

प्रायोग्यानि अपूर्वकरणप्रायोग्यानि भवन्ति देशोपशमनायोग्यानि भवन्तीत्यर्थः । तानि चेमानि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं, षण्णवतिः, पञ्चनवतिः, त्रिनवतिः, चतुरशीतिः, द्व्यशीतिश्चेति । तत्रादिमानि चत्वारि यावदपूर्वकरणगुणस्थानकचरमसमयस्तावद्वेदितव्यानि, न परतः । शेषाणि च त्रीणि त्रिनवतिचतुरशीतिद्व्यशीतिरूपाणि एकेन्द्रियादीनां भवन्ति । श्रेणिं प्रतिपद्यमानानां तु न संभवंति । शेषाणि तु स्थानानि अपूर्वकरणगुणस्थानकात्परतो लभ्यन्ते, नार्वागिति देशोपशमनायोग्यानि । ज्ञानावरणदर्शनावरणवेदनीयान्तरायाणामेकैकं प्रकृतिस्थानं देशोपशमनायोग्यं । तत्र ज्ञानावरणान्तराययोः पञ्चप्रकृत्यात्मकं, दर्शनावरणस्य नवप्रकृत्यात्मकं, वेदनीयस्य द्विप्रकृत्यात्मकं । आयुर्गोत्रयोर्द्वे द्वे स्थाने एका द्वे च प्रकृती॥६९॥

उक्ता प्रकृतिदेशोपशमना, संप्रति स्थितिदेशोपशमनामाह—

ठिइसंकम व ठिइउवसमणा णवरि जहन्निया कज्जा। अभवसिद्धि जहन्ना उवलगनियट्टिगे वियरा॥७०॥

ठिइसंकम व त्ति–स्थितिसंक्रमवत् स्थितिदेशोपशमना द्रष्टव्या । नवरमिह जघन्या जघन्यस्थितिदेशोपशमनायोग्या कार्या, अभवसिद्धिकप्रायोग्या जघन्या स्थितिः । एतदुक्तं भवति—स्थितिदेशोपशमना द्विविधा—मूलप्रकृतीनामुत्तरप्रकृतीनां च । एकैकापि द्विधा—जघन्योत्कृष्टा च । तत्र मूलप्रकृतीनामुत्तरप्रकृतीनां वा उत्कृष्टस्थितिदेशोपशमनास्वामी यः प्रागुत्कृष्टस्थितिसंक्रमस्वामी प्रतिपादितः स एव वेदितव्यः । जघन्यस्थितिदेशोपशमनास्वाम्यपि जघन्यस्थितिसंक्रमस्वाम्येव प्रतिपत्तव्यः । केवलं जघन्यस्थितिदेशोपशमनास्वामी अभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमान एकेन्द्रियो द्रष्टव्यः, तस्यैव प्रायः सर्वकर्मणामतिजघन्यायाः स्थितेः प्राप्यमाणत्वात् । याश्चेतराः प्रकृतयोऽभवसिद्धिक-

प्रायोग्यजघन्यस्थितयो न भवन्ति तासामुद्वलकेऽपूर्वकरणे वा जघन्यस्थितिदेशोपशमना वेदितव्या । तत्रोद्वलके उद्वलनप्रायोग्यानां प्रकृतीनामन्तिमे स्थितिखण्डे पल्योपमासंख्येयभागमात्रे वर्तमानस्तत्राप्याहारकसप्तकसम्यक्त्वसम्यग्मिथ्यात्वानामेकेन्द्रियोऽनेकेन्द्रियो वा, शेषप्रकृतीना तूद्वलनयोग्यानां वैक्रियसप्तकदेवद्विकनरकद्विकमनुष्यद्विकोच्चैर्गोत्ररूपाणामेकेन्द्रिय एव, अन्यासां त्वपूर्वकरणचरमसमये वर्तमानो जघन्यां देशोपशमनां करोति ॥ ७० ॥

अणुभागसंकमसमा अणुभागुवसामणा नियट्टिम्मि । संकमपएसतुल्ला पएसुवसामणा चेव ॥ ७१ ॥

अणुभाग त्ति–अनुभागसंक्रमसमा अनुभागदेशोपशमना वक्तव्या । नवरं निवृत्तावपूर्वकरणे चरमसमयं यावत् । इयमत्र भावना—य एवोत्कृष्टानुभागसंक्रमस्वामी प्राक् प्रतिपादितः, स एवोत्कृष्टानुभागदेशोपशमनाया अपि स्वामी । तत्राशुभप्रकृतीनां मिथ्यादृष्टिः, शुभप्रकृतीनां तु सम्यग्दृष्टिः । नवरं सातवेदनीययशःकीर्त्युच्चैर्गोत्राणामुत्कृष्टानुभागसंक्रमस्वामिनोऽपूर्वकरणस्थानकात्परतोऽपि भवन्ति । उत्कृष्टानुभागदेशोपशमनायाः पुनरुत्कर्षतोऽप्यपूर्वकरणगुणस्थानकपर्यवसाना एव वेदितव्याः । जघन्यानुभागदेशोपशमना तीर्थकरवर्जानां सर्वासामपि प्रकृतीनामेकेन्द्रिये अभवसिद्धिकप्रायोग्यजघन्यस्थितौ वर्तमाने द्रष्टव्या । तीर्थकरनाम्नस्तु जघन्यानुभागसंक्रमवत् । प्रदेशादेशोपशमना चात्र प्रदेशसंक्रमतुल्या वेदितव्या । एतदुक्तं भवति—उत्कृष्टप्रदेशदेशोपशमना उत्कृष्टप्रदेशसंक्रमतुल्या । नवरं येषां कर्मणामपूर्वकरणात्परतोऽपि उत्कृष्टः प्रदेशसंक्रमः प्राप्यते, तेषामप्यपूर्वकरणगुणस्थानकचरमसमयमेव यावत् उत्कृष्टप्रदेशोपशमना वाच्या । जघन्या पुनः प्रदेशदेशोपशमना जघन्यप्रदेशसंक्रमतुल्यैवेति ॥ ७१ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुपशमनाकरणं समाप्तम् ॥

तदेवमुक्तमुपशमनाकरणं, संप्रति निधत्तिनिकाचनाकरणे प्रतिपिपादयिषुराह—

देसोवसमणतुल्ला होइ निहत्ती निकाइया नवरं। संकमणं पि निहत्तीएँ नत्थि सेसाण वियरस्स ॥ ७२ ॥

देसोवसमण त्ति—निधत्तिर्निकाचना च देशोपशमनातुल्या । इदमुक्तं भवति—ये देशोपशमनाया भेदा ये च स्वामिनस्तेऽन्यूनातिरिक्ता निधत्तिनिकाचनयोरपि वेदितव्याः । नवरं अर्थपदं निधत्तिनिकाचनयोः। इदं संक्रमणमपि परप्रकृतिसंक्रमणमपि । अपिशब्दादुदीरणादीन्यपि निधत्तौ सत्यां न भवन्ति, उद्वर्तनापवर्तने पुनर्भवत एव। इतरस्यां निकाचनायां शेषे अपि उद्वर्तनापवर्तने अपि न भवतः । सकलकरणायोग्यं निकाचितमित्यर्थः ॥ ७२ ॥

इह यत्र गुणश्रेणिस्तत्र प्रायो देशोपशमनानिधत्तिनिकाचनायथाप्रवृत्तसंक्रमा अपि संभवन्ति, ततस्तत्राल्पबहुत्वमाह—

गुणसेढिपएसग्गं थोवं पत्तेगसो असंखगुणं । उवसामणाइ तीसु वि संकमणेऽहप्पवत्ते य ॥ ७३ ॥

गुणसेढि त्ति—गुणश्रेणीप्रदेशाग्रं स्तोकं । ततः प्रत्येकशः प्रत्येकं प्रत्येकं उपशमनादिषु त्रिषु यथाप्रवृत्ते च संक्रमणेऽसंख्येयगुणं वक्तव्यं । इयमत्र भावना—यस्य तस्य वा कर्मणो गुणश्रेणीप्रदेशाग्रं सर्वस्तोकं। ततो देशोपशमनायामसंख्येयगुणं। ततो निधत्तमसंख्येयगुणं । ततोऽपि निकाचितमसंख्येयगुणं । ततोऽपि यथाप्रवृत्तसंक्रमेण संक्रान्तमसंख्येयगुणं ७३॥

संप्रत्यष्टानामपि करणानां येऽध्यवसायास्तेषां परिमाणनिरूपणार्थमाह—

थोवा कसायउदया ठिइबंधोदीरणा य संकमणा। उवसामणाइसु अज्झवसाया कमसो असंखगुणा ॥७४॥

थोवत्ति—स्थितिबन्धे, उपलक्षणमेतत्, अनुभागबन्धे वा ये कषायोदीरणास्ते सर्वस्तोकाः । प्रकृतिप्रदेशबन्धौ च योगाद्भवत इति ताविह न गृह्येते, अनुभागबन्धश्चोपलक्षणव्याख्यानाद्गृहीतः । ततश्च स्थितिबन्धे कषायोदयाः स्तोका इति । किमुक्तं भवति ? बन्धनकरणाध्यवसायाः सर्वस्तोकाः । तेभ्य उदीरणाध्यवसाया असंख्येयगुणाः । ततोऽपि संक्रमाध्यवसाया असंख्येयगुणाः । संक्रमग्रहणेन चात्रोद्वर्तनापवर्तने अपि गृहीते द्रष्टव्ये, संक्रमभेदत्वात्तयोः । तत उपशमनाध्यवसाया असंख्येयगुणाः । ततोऽपि निधत्त्यध्यवसाया असंख्येयगुणाः । ततोऽपि निकाचनाध्यवसाया असंख्येयगुणाः ॥ ७४ ॥ ३०७ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायां करणाष्टकम् ॥

तदेवमुक्तानि करणानि, संप्रत्युद्देशक्रमप्राप्तमुदयमभिधित्सुराह—

उदउ उदीरणाए तुल्लो मोत्तूण एक्कचत्तालं । आवरणविग्घसंजलणलोभवेए य दिट्ठिदुगं ॥ १ ॥
आलिगमहिगं वेएति आउगाणं पि अप्पमत्ता वि । वेयणियाण य दुसमय तणुपज्जत्ता य निद्दाउ ॥ २ ॥
मणुयगइजाइतसबायरं च पज्जत्तसुभगमाएज्जं । जसकित्तिमुच्चगोयं चाजोगी(गा)केइ तित्थयरं ॥ ३ ॥

उदउ इत्यादि—उदय उदीरणातुल्यः । किमुक्तं भवति ? ये उदीरणायाः प्रकृत्यादयो भेदाः प्रागुक्ताः, या च साद्यनादिप्ररूपणा, यच्च स्वामित्वं, एतत्सर्वमन्यूनातिरिक्तमुदयेऽपि द्रष्टव्यं, उदयोदीरणयोः सहभावित्वात् । तथाहि—यत्रोदयस्तत्रोदीरणा, यत्रोदीरणा तत्रोदयः । किं सर्वत्राप्येवमिति चेदत आह—मुक्त्वा एकचत्वारिंशत्प्रकृतीः । तासामुदीरणामन्तरेणापि कियत्कालमुदयस्य प्राप्यमाणत्वात् । तथाहि—ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकसंज्वलनलोभवेदत्रयसम्यक्त्वसम्यग्मिथ्यात्वरूपा विंशतिप्रकृतीः स्वस्वोदयपर्यवसाने आवलिकामात्रं कालमधिकं वेदयंति उदीरणामन्तरेणापि केवलेनोदयेनावलिकामात्रं कालमनुभवन्तीत्यर्थः । तच्चावलिकामात्रं त्रयाणां वेदानां मिथ्यात्वस्य चान्तरकरणस्य प्रथमस्थितौ आवलिकाशेषायां, शेषाणां तु कर्मणां स्वस्वसत्तापर्यवसाने, तथा चतुर्णामप्यायुषां स्वस्वपर्यवसाने आवलिकामात्रं कालमुदय एव भवति, नोदीरणा । मनुष्यायुर्वेदनीययोर्वाऽप्रमत्ता अप्रमत्तसंयतप्रभृतय उदीरणामन्तरेण केवलेनैवोदयेन वेदयन्ते । तथा तनुपर्याप्ताः शरीरपर्याप्त्या पर्याप्ताः सन्तो द्वितीयसमयादारभ्य शरीरपर्या-

ह्यनन्तरसमयादारभ्येन्द्रियपर्याप्तिचरमसमयं यावदुदीरणामन्तरेणापि केवलेनैवोदयेन निद्राः पञ्चापि वेदयन्ते । तथा मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्त्युच्चैर्गोत्ररूपा नव प्रकृतीरयोगिकेवलिन उदीरणामन्तरेण स्वं कालं यावत् केवलेनैवोदयेन वेदयन्ते । केचित्तीर्थकरमपि ये तीर्थकृतः ॥ १-२-३ ॥

तदेवमुक्तः प्रकृत्युदयः, संप्रति स्थित्युदयमाह—

ठिइउदओ वि ठिइक्खयपओगसा ठिइउदीरणा अहिगो । उदयठिईउ हस्सो छत्तीसा एग उदयठिई ॥ ४ ॥

ठिइउदउ त्ति—इह द्विविध उदयः स्थितिक्षयेण प्रयोगेण च । तत्र स्थितिरबाधाकालरूपा तस्याः क्षयेण द्रव्यक्षेत्रकालभवभावरूपाणामुदयहेतूनां संप्राप्तौ सत्यां यः स्वभावत उदयः प्रवर्तते स स्थितिक्षयेणोदयः । यः पुनस्तस्मिन्नुदये प्रवर्तमाने सति उदीरणाकरणरूपेण प्रयोगेण दलिकमाकृष्यानुभवति स प्रयोगोदयः । तथा चाह—स्थित्युदयोऽपि स्थितिक्षयात् प्रयोगतश्च भवति । स च द्विधा उत्कृष्टो जघन्यश्च । तत्रोत्कृष्टः स्थित्युदीरणात उदयस्थित्याऽभ्यधिकः । तथाहि—उत्कृष्टायां स्थितौ बध्यमानायामबाधाकालेऽपि प्राग्बद्धं दलिकमस्तीति कृत्वा बन्धावलिकायामतीतायामनन्तरस्थितौ विपाकोदयेन वर्तमान उदयावलिकात उपरितनीः सर्वा अपि स्थितीरुदीरयति । उदीर्य च वेदयते । ततो बन्धावलिकोदयावलिकाहीनायाः शेषायाः सर्वस्या अपि स्थितेरुदयोदीरणे तुल्ये । वेद्यमानायां च स्थितावुदीरणा न प्रवर्तते, किंतूदय एव केवलः, ततो वेद्यमानया समयमात्रस्थित्याऽभ्यधिकः स्थित्युदीरणात उत्कृष्टस्थित्युदयः बन्धावलिकोदयावलिकाहीनश्च उत्कृष्टः स्थित्युदयः उदयोत्कृष्टबन्धानां वेदितव्यः । शेषाणां तु यथायोग्यं । तत्राप्युक्तनीत्या

उदयस्थित्याभ्यधिकोऽवगन्तव्यः । तथा ह्रस्वो जघन्यः स्थित्युदयः । षट्त्रिंशत्प्रकृतीनामेका समयमात्रा उदयस्थितिः । एतदुक्तं भवति—षट्त्रिंशत्प्रकृतीनां जघन्यः स्थित्युदयः समयमात्रैकस्थित्युदयप्रमाणो वेदितव्यः, समयमात्रा चैका स्थितिः चरमसमयस्थितिरवसेया । षट्त्रिंशत्प्रकृतयश्च प्रागुक्ता एवैकचत्वारिंशत्प्रकृतयो निद्रापञ्चकव्यतिरिक्ता वेदितव्याः । निद्रापञ्चकस्य ह्युदीरणाया अभावेऽपि शरीरपर्याप्त्यनन्तरं केवलोदयकालेऽपवर्तते । तत एका स्थितिर्न प्राप्यते इति तद्वर्जनं । शेषं जघन्योदीरणातुल्यं निरवशेषमवगन्तव्यं ॥ ४ ॥

तदेवमुक्तः स्थित्युदयः, संप्रत्यनुभागोदयमाह—

अणुभागुदओ वि जहस्र नवरि आवरणविग्घवेयाणं । संजलणलोभसम्मत्ताण य गंतूणमावलिगं ॥ ५ ॥

अणुभाग त्ति—यथाऽनुभागोदीरणा प्राक् सप्रपञ्चमभिहिता, तथाऽनुभागोदयोऽपि वक्तव्यः । नवरं ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयवेदत्रयसंज्वलनलोभसम्यक्त्वानामुदीरणाव्यवच्छेदे सति परत आवलिकां गत्वाऽतिक्रम्य तस्या आवलिकायाश्चरमसमये जघन्यानुभागोदयो वाच्यः ॥ ५ ॥

तदेवमुक्तोऽनुभागोदयः । संप्रति प्रदेशोदयाभिधानावसरः । तत्र चेमौ अर्थाधिकारौ, तद्यथा—साद्यनादिप्ररूपणा स्वामित्वं च । साद्यनादिप्ररूपणा द्विविधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयसाद्यनादिप्ररूपणार्थमाह—

अजहन्नाणुक्कोसा चउ तिहा बण्ह चउव्विहा मोहे । आउस्स साइअधुवा सेसविगप्पा य सव्वेसिं ॥ ६ ॥

अजहण त्ति—मोहनीयायुर्वर्जानां षण्णां कर्मणामजघन्यः प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—कश्चित् क्षपितकर्मांशो देवलोके देवो जातः। स च तत्र संक्लिष्टो भूत्वा उत्कृष्टां स्थितिं बध्नन् उत्कृष्टं प्रदेशाग्रमुद्वर्तयति। ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पन्नः, तस्य प्रथमसमये प्रागुक्तानां षण्णां कर्मणां जघन्यः प्रदेशोदयः, स चैकसामयिक इति कृत्वा सादिरध्रुवश्च, ततोऽन्यः सर्वोऽप्यजघन्यः। सोऽपि तस्य द्वितीयसमये भवन् सादिः, तत्स्थानमप्राप्तस्य पुनरनादिः, ध्रुवाध्रुवौ पूर्ववत्। तथा तेषामेव षण्णां कर्मणामनुत्कृष्टः प्रदेशोदयस्त्रिधा त्रिप्रकारः, तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च। तथाहि—अमीषां षण्णां कर्मणामुत्कृष्टः प्रदेशोदयः प्रागुक्तस्वरूपस्य गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्य प्राप्यते। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः, स चानादिः, सदैव भावात्। ध्रुवाध्रुवौ पूर्ववत्। तथा मोहे मोहनीयेऽजघन्योऽनुत्कृष्टश्च प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च। तथाहि—क्षपितकर्मांशस्यान्तरकरणे कृतेऽन्तरकरणपर्यन्तभाविगोपुच्छाकारसंस्थितावलिकामात्रदलिकान्तसमये मोहनीयस्य जघन्यः प्रदेशोदयः। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यजघन्यः। सोऽपि ततो द्वितीयसमये भवन् सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवौ पूर्ववत्। तथा गुणितकर्मांशस्य सूक्ष्मसंपरायगुणस्थानकान्तसमये उत्कृष्टः प्रदेशोदयः। स चैकसामयिक इति कृत्वा सादिरध्रुवश्च। ततोऽन्यः सर्वोऽप्यनुत्कृष्टः। स चोपशमश्रेणीतः प्रतिपततो भवन् सादिः। तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवाध्रुवौ पूर्ववत्। तथा आयुषश्चत्वारोऽपि भेदा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाः साद्यध्रुवाः, चतुर्णामपि भेदानां यथायोगं नियतकालं भावात्।

तथा सर्वेषां कर्मणां प्रागुक्तानां षणां मोहनीयस्य उक्तशेषौ विकल्पौ उत्कृष्टजघन्यरूपौ साद्यध्रुवौ, तौ च प्रागेव भावितौ ॥ ६ ॥

कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीनां तां चिकीर्षुराह—

अजहन्नाणुक्कोसो सगयालाए चउत्तिहा चउहा। मिच्छत्ते सेसासिं दुविहा सब्वे य सेसाणं ॥ ७ ॥

अजहन्न त्ति—तैजससप्तकवर्णादिविंशतिस्थिरास्थिरनिर्माणागुरुलघुशुभाशुभज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाणां सप्तचत्वारिंशत्प्रकृतीनामजघन्यः प्रदेशोदयश्चतुर्विधः । तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—कश्चित् क्षपितकर्मांशो देव उत्कृष्टे संक्लेशे वर्तमान उत्कृष्टां स्थितिं बध्नन् उत्कृष्टं प्रदेशाग्रमुद्वर्तयति । ततो बन्धावसाने कालं कृत्वा एकेन्द्रियेषूत्पद्यते, तस्य प्रथमसमये प्रागुक्तानां सप्तचत्वारिंशत्प्रकृतीनां जघन्यः प्रदेशोदयः । नवरमवधिज्ञानावरणावधिदर्शनावरणयोर्बन्धावलिकाचरमसमये देवस्य जघन्यः प्रदेशोदयो वेदितव्यः । स चैकसामायिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यजघन्यः । स च द्वितीयसमये भवन् सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् । तथाऽमूषामेव सप्तचत्वारिंशत्प्रकृतीनामनुत्कृष्टः प्रदेशोदयस्त्रिप्रकारस्तद्यथा—अनादिर्ध्रुवोऽध्रुवश्च । तथाहि—गुणितकर्मांशस्य स्वस्वोदयान्ते गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयः । स चैकसामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । स चानादिः, सदैव भावात् । ध्रुवाध्रुवौ पूर्ववत् । तथा मिथ्यात्वे मिथ्यात्वस्याजघन्योऽनुत्कृष्टश्च प्रदेशोदयश्चतुर्विधः, तद्यथा—सादिरनादिर्ध्रुवोऽध्रुवश्च । तथाहि—क्षपितकर्मांशस्य प्रथमसम्यक्त्व-

मुत्पादयतः कृतान्तरकरणस्यौपशमिकसम्यक्त्वात्प्रच्युत्य मिथ्यात्वं गतस्यान्तरकरणपर्यन्तनाविगोपुच्छाकारसंस्थितावलि-
कामात्रदलिकान्तसमये वर्तमानस्य जघन्यः प्रदेशोदयः । स चैकसामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्य-
जघन्यः । सोऽपि द्वितीयसमये भवन् सादिः । वेदकसम्यक्त्वात्तु प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः ।
ध्रुवाध्रुवौ पूर्ववत् । तथा कश्चिद्गुणितकर्मांशो यदा देशविरतिगुणश्रेण्यां वर्तमानः सर्वविरतिं प्रतिपद्यते । तन्निमित्तां
गुणश्रेणिं करोति । कृत्वा च तावद्गतो यावद् द्वयोरपि गुणश्रेण्योर्मस्तकं । तदानीं च कश्चिन्मिथ्यात्वं गच्छति । तस्य
मिथ्यात्वस्योत्कृष्टः प्रदेशोदयः स चैकसामयिक इति कृत्वा सादिरध्रुवश्च । ततोऽन्यः सर्वोऽप्यनुत्कृष्टः । सोऽपि ततो
द्वितीयसमये भवन् सादिः । वेदकसम्यक्त्वाच्च प्रतिपततः सादिः । तत्स्थानमप्राप्तस्य पुनरनादिः । ध्रुवाध्रुवौ पूर्ववत् ।
एतासां च सप्तचत्वारिंशत्प्रकृतीनां मिथ्यात्वस्य चोक्तशेषौ विकल्पौ जघन्योत्कृष्टरूपौ द्विधा द्विप्रकारौ । तद्यथा—सादी
अध्रुवौ च । तौ च भावितावेव । शेषाणामध्रुवोदयानां प्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा जघन्याजघन्यो-
त्कृष्टानुत्कृष्टरूपा द्विधा ज्ञातव्याः, तद्यथा—सादयोऽध्रुवाश्च । सा च साद्यध्रुवताऽध्रुवोदयत्वादेवेति ॥ ७ ॥

कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वमभिधानीयं । तच्च द्विधा—उत्कृष्टप्रदेशोदयस्वामित्वं जघन्यप्रदेशोदय-
स्वामित्वं च । तत्रोत्कृष्टप्रदेशोदयस्वामित्वप्रतिपादनार्थं संभवन्तीर्गुणश्रेणीः सर्वा अपि प्ररूपयति—

सम्मत्तुप्पासावयविरए संजोयणा विणासे य । दंसणमोहक्खवगे कसाय उवसामगुवसंते ॥ ८ ॥
खवगे य खीणमोहे जिणे य दुविहे असंखगुणसेढी । उदओ तव्विवरीओ कालो संखेज्जगुणसेढी ॥ ९ ॥

सम्मत्तुप्पेत्यादि—इहैकादश गुणश्रेणयः । तद्यथा—सम्यक्त्वोत्पादे प्रथमा । द्वितीया श्रावके देशविरते । तृतीया विरते सर्वविरते प्रमत्तेऽप्रमत्ते च । चतुर्थी संयोजनानामनन्तानुबन्धिनां विसंयोजने । पञ्चमी दर्शनमोहनीयत्रितयक्षपणे । षष्ठी चारित्रमोहनीयोपशमके । सप्तमी उपशान्तमोहनीये । अष्टमी मोहनीयक्षपके । नवमी क्षीणमोहे । दशमी सयोगिकेवलिनि । अयोगिकेवलिनि त्वेकादशीति । 'असंखगुणसेढी उदओ त्ति' सर्वस्तोकं सम्यक्त्वोत्पादगुणश्रेण्यां दलिकं । ततोऽपि देशविरतिगुणश्रेण्यामसंख्येयगुणं । ततोऽपि सर्वविरतिगुणश्रेण्यामसंख्येयगुणं । एवं तावद्वाच्यं यावदयोगिकेवलिगुणश्रेण्यां दलिकमसंख्येयगुणं । तस्मात् प्रदेशोदयमप्याश्रित्य एता गुणश्रेणयो यथाक्रममसंख्येयगुणा वक्तव्याः । 'तव्विवरीओ कालो संखिज्जगुणसेढि त्ति' सर्वास्वप्येतासु गुणश्रेणिषु कालस्तद्विपरीत उदयविपरीतः संख्येयगुणश्रेण्या । तद्यथा—अयोगिकेवलिगुणश्रेणिकालः सर्वस्तोकः । सयोगिकेवलिगुणश्रेणिकालः संख्येयगुणः । ततोऽपि क्षीणमोहगुणश्रेणिकालः संख्येयगुणः । एवं तावद्वाच्यं यावत्सम्यक्त्वोत्पादगुणश्रेणिकालः संख्येयगुणः । स्थापना । एषा सम्यक्त्वोत्पादगुणश्रेणिः । पुनर्यथोत्तरमसंख्येयगुणदलिकाः । कालतश्च संख्येयगुणाः । उपरिष्टाच्च पृथक्त्वेन यथोत्तरं विशाला विशालतराः । अथोच्येत—कथं दलिकं यथोत्तरमसंख्येयगुणं प्राप्यते ? उच्यते—सम्यक्त्वं ह्युत्पादयन् मिथ्यादृष्टिर्भवति, ततस्तस्य स्तोकं गुणश्रेणिदलिकं । सम्यक्त्वोत्पत्तौ सत्यां पुनः प्राक्तनगुणश्रेण्यपेक्षयाऽसंख्येयगुणदलिका गुणश्रेणिः, विशुद्धत्वात् । ततो देशविरतस्य गुणश्रेणिरसंख्येयगुणदलिका, सम्यग्दृष्ट्यपेक्षया देशविरतस्यातिविशुद्धत्वात् । ततोऽपि सर्वविरतस्य गुणश्रेणिरसंख्येयगुणदलिका, देशविरतात्सर्वविरतस्य विशुद्धतरत्वात् । ततोऽपि संयत-

स्यानन्तानुबन्धिनां विसंयोजने गुणश्रेणिरसंख्येयगुणदलिका, तस्यातिविशुद्धतरत्वात् । एवमुत्तरोत्तरविशुद्धिप्रकर्षवशाद्यथोत्तरमसंख्येयगुणदलिका भावनीया ॥ ८–९ ॥

संप्रति का गुणश्रेणिः कस्यां गतौ प्राप्यत इत्येतन्निरूपणार्थमाह—

तिन्नि वि पढमिल्लाओ मिच्छत्तगए वि होज्ज अन्नभवे । पगयं तु गुणियकम्मे गुणसेढीसीसगाणुदये ॥ १० ॥

तिन्नि त्ति—आद्यास्तिस्रो गुणश्रेणयः सम्यक्त्वोत्पाददेशविरतिसर्वविरतिनिमित्ता झटित्येव मिथ्यात्वं गतस्य अप्रशस्तेन च मरणेन झटित्येव मृतस्य अन्यभवे नारकादिरूपपरभवे किञ्चित्कालमुदयमाश्रित्य प्राप्यन्ते । शेषास्तु गुणश्रेणयः परभवे नारकादिरूपे न प्राप्यन्ते । नारकादिभवो हि अप्रशस्तमरणेन प्राप्यते । न च शेषासु गुणश्रेणिषु सतीष्वप्रशस्तमरणसंभवः, किंतु क्षीणास्वेव तथा चोक्तं—"कत्ति गुणाओ पडिए मिच्छत्तगयम्मि आइमा तिन्नि । लब्भंति न सेसाओ, जं झीणासु असुभमरणं ॥ १ ॥" तथा प्रकृतमत्र उत्कृष्टप्रदेशोदयस्वामित्वे गुणितकर्मांशेन गुणश्रेणीशिरसामुदये वर्तमानेन ॥ १० ॥

आवरणविग्घमोहाण जिणोदइयाण वावि नियगंते । लहुखवणाए ओहीणणोहिलद्धिस्स उक्कस्सो ॥११॥

आवरण त्ति—आवरणं पञ्चप्रकारं ज्ञानावरणं, चतुःप्रकारं दर्शनावरणं, 'विग्घ त्ति' पञ्चप्रकारमन्तरायं, एतासां चतुर्दशप्रकृतीनां । लघुक्षपणया शीघ्रक्षपणार्थं । अभ्युद्यतस्य । द्विविधा हि क्षपणा—लघुक्षपणा, चिरक्षपणा च । तत्र योऽष्टवार्षिक एव सप्तमासाभ्यधिकः संयमं प्रतिपन्नः, तत्प्रतिपत्त्यनन्तरं चान्तर्मुहूर्तेन क्षपकश्रेणिमारभते, तस्य या

क्षपणा सा लघुक्षपणा । यस्तु प्रभूतेन कालेन संयमं प्रतिपद्यते । संयमप्रतिपत्तेरप्यूर्ध्वं प्रभूतेन कालेन क्षपकश्रेणिमारभते, तस्य या क्षपणा सा चिरक्षपणा । तया च प्रभूताः पुद्गलाः परिसटन्ति, स्तोका एव च शेषीभवन्ति । ततो न तया उत्कृष्टः प्रदेशोदयो लभ्यते । तत उक्तं लघुक्षपणयाऽभ्युत्थितस्येति । तस्य गुणितकर्मांशस्य क्षीणमोहगुणस्थानकचरमसमये गुणश्रेणीशिरसि वर्तमानस्योत्कृष्टः प्रदेशोदयो भवति । नवरं 'ओहीणमोहिलद्धिस त्ति' अवध्योरवधिज्ञानावरणावधिदर्शनावरणयोरनवधिलब्धिकस्यावधिलब्धिरहितस्य क्षपणायोत्थितस्योत्कृष्टः प्रदेशोदयो वाच्यः । अवधिज्ञानं ह्युत्पादयतो बहवः पुद्गलाः परिसटन्ति क्षीयन्ते । ततो नावधियुक्तस्योत्कृष्टप्रदेशोदयलाभ इत्यनवधिलब्धियुक्तस्येत्युक्तं । तथा मोहानां मोहनीयप्रकृतीनां सम्यक्त्वसंज्वलनचतुष्टयवेदत्रयाख्यानामष्टानां गुणितकर्मांशस्य क्षपकस्य स्वस्वोदयचरमसमये उत्कृष्टः प्रदेशोदयः । तथा जिने केवलिनि उदयो यासां ता जिनोदयिकास्तासां मध्ये औदारिकसप्तकतैजससप्तकसंस्थानषट्कप्रथमसंहननवर्णादिविंशतिपराघातोपघातागुरुलघुविहायोगतिद्विकप्रत्येकस्थिरास्थिरशुभाशुभनिर्माणरूपाणां द्विपञ्चाशत्प्रकृतीनां गुणितकर्मांशस्य सयोगिकेवलिगुणस्थानकचरमसमये उत्कृष्टः प्रदेशोदयः । सुस्वरदुःस्वरयोः स्वरनिरोधकाले, उच्छ्वासनाम्नः पुनरुच्छ्वासनिरोधकाले । तथाऽन्यतरवेदनीयमनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकरोच्चैर्गोत्राणां द्वादशप्रकृतीनां गुणितकर्मांशस्यायोगिकेवलिनश्चरमसमये उत्कृष्टः प्रदेशोदयः ॥ ११ ॥

उवसंतपढमगुणसेढीए निद्दादुगस्स तस्सेव । पावइ सीसगमुदयंति जाय देवस्स सुरनवगे ॥ १२ ॥

उवसंत त्ति—उपशान्तकषायस्यात्मीयप्रथमगुणश्रेणीशिरसि वर्तमानस्य गुणितकर्मांशस्य निद्राद्विकस्य निद्राप्रचलयो-
रुत्कृष्टः प्रदेशोदयः । तथा तस्यैवोपशान्तकषायस्यात्मीयप्रथमगुणश्रेणीशीर्षकोदयमनन्तरसमये प्राप्स्यतीति तस्मिन्
पाश्चात्ये समये जाते देवस्य, ततः स्वप्रथमगुणश्रेणीशिरसि वर्तमानस्य सुरनवकस्य वैक्रियसप्तकदेवद्विकरूपस्योत्कृष्टः
प्रदेशोदयः ॥ १२ ॥

मिछत्तमीसणंताणुबंधिअसमत्तथीणगिद्धीणं । तिरिउदएगंताण य बिइया तइया य गुणसेढी ॥ १३ ॥

मिछत्त त्ति—इह केनचिद्देशविरतेन सता देशविरतिप्रत्यया गुणश्रेणिः कृता । ततः स संयमं प्रतिपन्नः । ततः संयम-
प्रत्यया गुणश्रेणिः कृता । ततो यस्मिन् काले द्वयोरपि गुणश्रेण्योः शिरसी एकत्र मिलिते, तस्मिन् काले वर्तमानो
गुणितकर्मांशः कश्चिन्मिथ्यात्वं प्रतिपद्यते तस्य तदा मिथ्यात्वानन्तानुबन्धिनामुत्कृष्टः प्रदेशोदयः । यदि पुनः सम्य-
ङ्मिथ्यात्वं प्रतिपन्नस्तर्हि सम्यङ्मिथ्यात्वस्य, स्त्यानर्द्धित्रिकस्य पुनर्मिथ्यात्वं गतस्यागतस्य वा उत्कृष्टः प्रदेशोदयो
वाच्यः । यतः स्त्यानर्द्धित्रिकस्य प्रमत्तसंयतेऽप्युदयः प्राप्यते । तथा तिर्यक्ष्वेव उदय एकान्तेन यासां तास्तिर्यगुदये-
कान्ताः एकद्वित्रिचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणनामानस्तासां । अपर्याप्तनाम्नश्च तिर्यक्त्वप्राप्तौ सत्यां देशविरति-
सर्वविरतिगुणश्रेणीशिरसोरेकत्र योगे वर्तमानस्य मिथ्यादृष्टेः स्वस्वोदये वर्तमानस्योत्कृष्टः प्रदेशोदयः ॥ १३ ॥

अंतरकरणं होहित्ति जाय देवस्स तं मुहुत्तंतो । अट्ठण्हकसायाणं छण्हं पि य नोकसायाणं ॥ १४ ॥

अंतरकरणं ति—इह कश्चित् उपशमश्रेणिं प्रतिपन्नोऽनन्तरसमयेऽन्तरकरणं भविष्यतीति 'तं ति' तस्मिन् पाश्चात्ये

समये कालं कृत्वा देवो जातः, तस्य देवस्योत्पत्त्यनन्तरमन्तर्मुहूर्तात्परतो गुणश्रेणीशिरसि वर्तमानस्याप्रत्याख्यानप्रत्याख्यानावरणकषायाष्टके वेदत्रिकवर्जषड्नोकषायाणामुत्कृष्टः प्रदेशोदयः ॥ १४ ॥

हस्सठिइं बंधित्ता अद्धाजोगाइठिइनिसेगाणं । उक्कस्सपए पढमोदयम्मि सुरनारगाऊणं ॥ १५॥

हस्सठिइ त्ति—अद्धा बन्धकालः, योगो मनोवाकायनिमित्तं वीर्यं, आदिस्थितिः प्रथमा स्थितिः तस्यां दलिकनिक्षेपः आदिस्थितिदलिकनिक्षेपः, एतेषामुत्कृष्टे पदे सति । किमुक्तं भवति ? उत्कृष्टेन बन्धकालेन उत्कृष्टे योगे वर्तमानो ह्रस्वां जघन्यां स्थितिं बद्ध्वा, प्रथमस्थितौ च दलिकनिक्षेपमुत्कृष्टं कृत्वा मृतः सन् देवो नारको वा जातः, तस्य प्रथमोदये प्रथमस्थित्युदये वर्तमानस्य देवस्य देवायुषो नारकस्य नारकायुष उत्कृष्टप्रदेशोदयः ॥ १५ ॥

अद्धाजोगुक्कोसो बंधित्ता भोगभूमिगेसु लहुं । सव्वप्पजीवियं वज्जइत्तु उव्वट्टिया दोण्हं ॥ १६ ॥

अद्ध त्ति—उत्कृष्टे बन्धकाले उत्कृष्टे च योगे वर्तमानो भोगभूमिगेषु तिर्यक्षु मनुष्येषु वा विषये कश्चित्तिर्यगायुः कश्चिन्मनुष्यायुः उत्कृष्टं त्रिपल्योपमस्थितिकं बद्ध्वा, लघु शीघ्रं च मृत्वा त्रिपल्योपमायुष्केष्वेकस्तिर्यक्ष्वपरो मनुष्येषु मध्ये समुत्पन्नः, तत्र च सर्वाल्पजीवितमन्तर्मुहूर्तप्रमाणं वर्जयित्वाऽन्तर्मुहूर्तमेकं धृत्वेत्यर्थः । शेषमशेषमपि (तौ द्वावपि) स्वस्वायुरपवर्तनाकरणेनापवर्तयतः । ततोऽपवर्तनानन्तरं प्रथमसये तयोस्तिर्यङ्मनुष्ययोर्यथासंख्यं तिर्यङ्मनुष्यायुषोरुत्कृष्टः प्रदेशोदयः ॥ १६ ॥

दूभगणाएज्जाजस गइदुगअणुपुव्वितिगसनीयाणं। दंसणमोहक्खवणे देसविरइ विरइगुणसेढी ॥ १७ ॥

दूभग त्ति—इहाविरतसम्यग्दृष्टिर्दर्शनमोहनीयत्रितयं क्षपयितुमभ्युद्यतो गुणश्रेणिं करोति । ततः स एव देशविरतिं प्रतिपन्नस्तन्निमित्तां गुणश्रेणिं करोति । ततः स एव सर्वविरतिं प्रतिपन्नस्ततः सर्वविरतिनिमित्तां गुणश्रेणिं करोति । ततः करणपरिसमाप्तौ सत्यां संक्लिष्टो भूत्वा पुनरप्यविरतो जातः, तस्य तिसृणामपि गुणश्रेणीनां शिरस्सु वर्तमानस्य तस्मिन्नेव भवे स्थितस्य दुर्भगानादेयायशःकीर्तिनीचैर्गोत्राणामुत्कृष्टः प्रदेशोदयः । अथ नरकेषु बद्धायुष्कत्वान्नारको जातस्तर्हि तस्य पूर्वोक्तानां नरकद्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ तिर्यक्षूत्पन्नस्तर्हि तस्य पूर्वोक्तानां तिर्यग्द्विकसहितानामुत्कृष्टः प्रदेशोदयः। अथ मनुष्यो जातस्तर्हि मनुष्यानुपूर्वीसहितानामिति ॥ १७ ॥

संघयणपंचगस्स य बिइयादीतिन्नि होंति गुणसेढी। आहारगउज्जोयाणुत्तरतणु अप्पमत्तस्स ॥ १८ ॥

संघयण त्ति—इह कश्चिन्मनुष्यो देशविरतिं प्रतिपन्नः, ततः स देशविरतिप्रत्यया गुणश्रेणिं करोति । ततः स एव विशुद्धिप्रकर्षवशतः सर्वविरतिं प्रतिपन्नः, ततः सर्वविरतिप्रत्ययां गुणश्रेणिं करोति । ततः स एव तत्राविधविशुद्धिवशादनन्तानुबन्धिनां विसंयोजनायोत्थितः, ततस्तन्निमित्ता गुणश्रेणिं करोति । एवं द्वितीयादयस्तिस्रो गुणश्रेणयो भवन्ति । ताश्च कृत्वा तासां शिरस्सु वर्तमानस्य प्रथमसंहननवर्जानां पञ्चानां संहननानां यथायोग्यमुदयप्राप्तानामुत्कृष्टः प्रदेशोदयः। तयोत्तरतनौ उत्तरशरीरे आहारके वर्तमानस्याप्रमत्तभावं गतस्य संयतस्य प्रथमगुणश्रेणीशिरसि वर्तमानस्याहारकसप्तकोद्योतयोरुत्कृष्टः प्रदेशोदयः ॥ १८ ॥

बेइंदिय थावरगो कम्मं काऊण तस्समं खिप्पं । आयावस्स उ तव्वेइ पढमसमयम्मि वट्टंतो ॥ १९ ॥

बेइंदिय त्ति—गुणितकर्मांशः पञ्चेन्द्रियः सम्यग्दृष्टिर्जातः, ततः सम्यक्त्वनिमित्तां गुणश्रेणिं कृतवान् । ततस्तस्या गुणश्रेणीतः प्रतिपतितो मिथ्यात्वं गतः । गत्वा च द्वीन्द्रियमध्ये समुत्पन्नः । तत्र च द्वीन्द्रियप्रायोग्यां स्थितिं मुक्त्वा शेषां सर्वामप्यपवर्तयति । ततस्ततोऽपि मृत्वा एकेन्द्रियो जातः । तत्रैकेन्द्रियसमां स्थितिं करोति । शीघ्रमेव च शरीरपर्याप्त्या पर्याप्तः, तस्य तद्वेदिन आतपवेदिनः खरबादरपृथ्वीकायिकस्य शरीरपर्याप्त्यनन्तरं प्रथमसमये आतपनाम्न उत्कृष्टः प्रदेशोदयः एकेन्द्रियो द्वीन्द्रियस्थितिं झटित्येव स्वयोग्यां करोति न त्रीन्द्रियादिस्थितिमिति द्वीन्द्रियग्रहणं ॥ १९ ॥

तदेवमुक्त उत्कृष्टप्रदेशोदयस्वामी, संप्रति जघन्यप्रदेशोदयस्वाम्यभिधीयते—

पगयं तु खवियकम्मे जहन्नसामी जहन्नदेवठिइ । भिन्नमुहुत्ते सेसे मिच्छत्तगतो अतिकिलिट्ठो ॥ २० ॥
कालगएगिंदियगो पढमे समये व मइसुयावरणे । केवलदुगमणपज्जवचक्खुअचक्खूण आवरणा ॥ २१ ॥

पगयं ति—जघन्यस्वामीति भावप्रधानोऽयं निर्देशः, प्राकृतत्वाच्च ततः परस्याः सप्तम्या लुक् । ततोऽयमर्थः—जघन्यप्रदेशोदयस्वामित्वे । प्रकृतमधिकारः क्षपितकर्मांशेन । सूत्रे चात्र सप्तमी तृतीयार्थे वेदितव्या । तत्र कश्चित्क्षपितकर्मांशो देवो जघन्यस्थितिर्दशवर्षसहस्रायुरुत्पत्त्यनन्तरमन्तर्मुहूर्ते गते सति सम्यक्त्वं प्रतिपद्यते । तच्च सम्यक्त्वं दशवर्षसहस्राणि देशोनानि यावत् परिपाल्यान्तर्मुहूर्तावशेषे जीविते मिथ्यात्वं गतः । स चातिसंक्लिष्टपरिणामो वक्ष्यमाणकर्मणामु-

त्कृष्टां स्थितिं बद्धुमारजते । प्रभूतं च दलिक तदानीमुद्वर्तयति तावद्यावदन्तर्मुहूर्तं । ततः संक्लिष्टपरिणाम एव कालं कृत्वा एकेन्द्रियो जातः । तस्य प्रथमसमये मतिज्ञानावरणश्रुतज्ञानावरणकेवलज्ञानावरणकेवलदर्शनावरणमनःपर्यवज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां जघन्यः प्रदेशोदयो जवति । इह हि प्रायेण सर्व दलिकमुद्धर्तितमिति कृत्वा प्रथमसमये स्तोकं प्राप्यते । अन्यच्चोत्कृष्टसंक्लेशयुक्तस्य प्रदेशोदीरणा स्तोका जवति । यतस्तस्यानुजागोदीरणा बह्वी प्रवर्तते । यत्र चानुजागोदीरणा बह्वी प्रवर्तते तत्र स्तोका प्रदेशोदीरणा, ततो मिच्छत्तगतो अतिकिलिठो इत्याद्युक्तं ॥ २०-२१ ॥

उहीणसंजमाउ देवत्तगए गयस्स मिठत्तं । उक्कोसठिइबंधे विकढणा आलिगं गंतुं ॥ २२ ॥

उहीण त्ति—क्षपितकर्मांशः संयमं प्रतिपन्नः समुत्पन्नावधिज्ञानदर्शनोऽप्रतिपतितावधिज्ञानदर्शन एव देवो जातः, तत्र चान्तर्मुहूर्ते गते मिथ्यात्वं प्रतिपन्नः । ततो मिथ्यात्वप्रत्ययेनोत्कृष्टां स्थितिं बद्धुमारजते, प्रभूतं च दलिकं विकर्षयति उद्वर्तयतीत्यर्थः । तत आवलिकां गत्वाऽतिक्रम्य बन्धावलिकायामतीतायामित्यर्थः । अनयोरवधिज्ञानावरणावधिदर्शनावरणयोर्जघन्यः प्रदेशोदयः ॥ २२ ॥

वेयणियंतरसोगारउच्च उहि व निद्दपयला य । उक्कस्स ठिइबंधा पडिजगगपवेश्या नवरं ॥ २३ ॥

वेयणियंतर त्ति—द्वयोर्वेदनीययोः सातासातयोः पञ्चानामन्तरायाणां शोकारत्युच्चैर्गोत्राणां च जघन्यः प्रदेशोदयोऽवधिज्ञानावरणस्येव वेदितव्यः । निद्राप्रचलयोरपि तथैव । केवलमुत्कृष्टस्थितिबन्धात् प्रतिजग्नस्य प्रतिपतितस्य

निद्राप्रचलयोरनुभवितुं लग्नस्य चेति द्रष्टव्यं । उत्कृष्टस्थितिबन्धो हि अतिशयेन संक्लिष्टस्य भवति । न चातिसंक्लेशे वर्तमानस्य निद्रोदयसंभवः, तत उक्तं उत्कृष्टस्थितिबन्धात्प्रतिभग्नस्येति ॥ २३ ॥

वरिसवरतिरियथावरनीयं पि य मइसमं नवरि तिन्नि । निद्दानिद्दा इंदियपज्जत्ती पढमसमयम्मि ॥२४॥

वरिसवर त्ति—वर्षवरो नपुंसकवेदः, ततो नपुंसकवेदतिर्यग्गतिस्थावरनीचैर्गोत्राणां जघन्यः प्रदेशोदयो मतिज्ञानावरणस्येवावसेयः । निद्रानिद्रादयोऽपि तिस्रः प्रकृतयो जघन्यप्रदेशोदयविषये मतिज्ञानावरणवद्भावनीयाः । नवरमिन्द्रियपर्याप्त्या पर्याप्तस्य प्रथमसमये इति द्रष्टव्यं। ततोऽनन्तरसमये उदीरणायाः संभवेन जघन्यप्रदेशोदयासंभवात् ॥ २४ ॥

दंसणमोहे तिविहे उदीरणुदए उ आलिगं गंतुं । सत्तरसण्ह वि एवं उवसमइत्ता गए देवे ॥ २५ ॥

दंसणमोहे त्ति—क्षपितकर्मांशस्य औपशमिकसम्यग्दृष्टेरौपशमिकसम्यक्त्वात् प्रच्यवमानस्य अन्तरकरणे स्थितेन द्वितीयस्थितेः सकाशात् सम्यक्त्वादीनां दलिकानि समाकृष्य यान्यन्तरकरणे चरमे आवलिकामात्रभागे गोपुच्छाकारसंस्थानेन रचितानि, तद्यथा—प्रथमसमये प्रभूतं । द्वितीयसमये विशेषहीनं । तृतीयसमये विशेषहीनं । एवं यावच्चरमसमये विशेषहीनं । तेषामुदय उदीरणोदय उच्यते । तस्मिन् उदीरणोदये आवलिकामात्रं गत्वा आवलिकायाश्चरमसमये सम्यक्त्वमिश्रमिथ्यात्वानां स्वस्वोदययुक्तस्य जघन्यप्रदेशोदयः । तथाऽनन्तानुबन्धिवर्जद्वादशकषायपुरुषवेदहास्यरतिभयजुगुप्सारूपाः सप्तदश प्रकृतीरुपशमय्य देवलोकं गतस्य एवमेवेति उदीरणोदयचरमसमये तासां सप्तदशप्रकृतीनां जघन्यः प्रदेशोदयः । आसां हि सप्तदशानामपि प्रकृतीनामन्तरकरणं कृत्वा देवलोकं गतः सन् प्रथमसमये एव द्विती-

यस्थितेः सकाशाद्दलिकमाकृष्योदयसमयादारभ्य गोपुच्छाकारेण विरचयति । तद्यथा—उदयसमये प्रभूतं । द्वितीयसमये विशेषहीनं । तृतीयसमये विशेषहीनं । एवं यावदावलिकाचरमसमयः । तत आवलिकाचरमसमये जघन्यः प्रदेशोदयो लभ्यते ॥ २५ ॥

चउरुवसमित्तु पच्छा संजोइय दीहकालसम्मत्ता । मिच्छत्तगए आवलिगाए संजोयणाणं तु ॥ २६ ॥

चउरुवसमित्तु त्ति—चतुरो वारान् मोहनीयमुपशमय्य पश्चादन्तर्मुहूर्ते गते सति मिथ्यात्वं गतः । ततोऽपि मिथ्यात्वप्रत्ययेन संयोजनान् अनन्तानुबन्धिनो बध्नाति । ततः सम्यक्त्वं गतः । तच्च दीर्घकालं द्वात्रिंशं सागरोपमाणां शतं यावत् अनुपालयन् सम्यक्त्वप्रभावतः प्रभूतान् पुद्गलान् अनन्तानुबन्धिनां संबन्धिनः प्रदेशसंक्रमतः परिसाटयति । ततः पुनरपि मिथ्यात्वं गतः मिथ्यात्वप्रत्ययेन च भूयोऽप्यनन्तानुबन्धिनो बध्नाति । तस्यावलिकाया बन्धावलिकायाश्चरमसमये पूर्वबद्धानामनन्तानुबन्धिनां जघन्यः प्रदेशोदयः । आवलिकाया अनन्तरसमये हि प्रथमसमयबद्धस्य दलिकस्योदयो भवति । ततो जघन्यः प्रदेशोदयो न लभ्यते इति कृत्वा आवलिकायाश्चरमसमये इत्युक्तं । संसारे चैकजीवस्य चतुःकृत्व एव मोहनीयस्योपशमो भवति, न पञ्चकृत्व इति चतुःकृत्वोग्रहणं । मोहोपशमनेन किं प्रयोजनमिति चेदुच्यते—इह मोहोपशमं कुर्वन्नप्रत्याख्यानादिकषायाणां दलिकमन्यत्र गुणसंक्रमेण प्रभूतं संक्रमयति । ततः क्षीणशेषाणां तेषां अनन्तानुबन्धिषु बन्धकाले स्तोकमेव संक्राम(क्रमय)ति, ततो मोहोपशमग्रहणं ॥ २६ ॥

इत्थीए संजमभवे सव्वनिरुद्धम्मि गंतु मिच्छत्तं । देवीए लहुमिच्छी जेट्ठठिइ आलिगं गंतुं ॥ २७ ॥

इत्थीए त्ति—संयमेनोपलक्षितो भवः संयमभवस्तस्मिन् । सर्वनिरुद्धेऽन्तर्मुहूर्तावशेषे । स्त्रिया मिथ्यात्वं गतायाः, ततोऽनन्तरभवे देवीभूतायाः शीघ्रमेव च पर्याप्ताया उत्कृष्टस्थितिबन्धानन्तरमावलिकां गत्वा आवलिकायाश्चरमसमये स्त्रीवेदस्य जघन्यः प्रदेशोदयः । इयमत्र भावना—क्षपितकर्मांशा काचित् स्त्री देशोनां पूर्वकोटिं यावत्संयममनुपाल्यान्तमुहूर्ते आयुषोऽवशेषे मिथ्यात्वं गत्वा अनन्तरभवे देवी समुत्पन्ना, शीघ्रमेव च पर्याप्ता । तत उत्कृष्टे संक्लेशे वर्तमाना स्त्रीवेदस्योत्कृष्टां स्थितिं बध्नाति, पूर्वबद्धां चोद्वर्तयति । तत उत्कृष्टबन्धारंभात् परत आवलिकायाश्चरमसमये तस्याः स्त्रीवेदस्य जघन्यः प्रदेशोदयो भवति ॥ २७ ॥

अप्पद्धाजोगचियाणाऊणुक्कस्सगठिईणंते । उवरिं थोवनिसेगे चिरतिव्वासायवेईणं ॥ २८ ॥

अप्पद्ध त्ति—अल्पया बन्धाद्धया अल्पेन च योगेन चितानां बद्धानां चतुर्णामप्यायुषां ज्येष्ठस्थितीनामुत्कृष्टस्थितीनामन्तेऽन्तिमे उपरि सर्वोपरितने समये सर्वस्तोकदलिकनिक्षेपे चिरकालं तीव्रासातवेदनाभिभूतानां क्षपितकर्मांशानां तत्तदायुर्वेदिनां जघन्यः प्रदेशोदयः । तीव्रासातवेदनया ह्यभिभूतानां बहवः पुद्गलाः परिसटन्तीति कृत्वा तीव्रासातवेदिग्रहणं ॥ २८ ॥

संजोयणा विजोजिय देवभवजहन्नगे अइनिरुद्धे । बंधिय उक्कस्सठिइं गंतूणेगिंदिया सन्नी ॥ २९ ॥
सव्वलहुं नरयगए निरयगई तम्मि सव्वपज्जत्ते । अणुपुव्वीउ य गइतुल्ला नेया भवादिम्मि ॥ ३० ॥

संजोयणेत्यादि—संयोजनान् अनन्तानुबन्धिनो विसंयोज्य, तद्विसंयोजने हि शेषाणामपि कर्मणां भूयांसः पुद्गलाः परिसटन्ति इति तदुपादानं। ततो जघन्यं देवत्वं प्राप्तः, तत्र चातिनिरुद्धे पश्चिमेऽन्तर्मुहूर्ते प्रतिपन्नमिथ्यात्व एकेन्द्रिय-प्रायोग्यां प्रकृतीनामुत्कृष्टां स्थितिं बद्ध्वा सर्वसंक्लिष्ट एकेन्द्रियेषूत्पन्नस्तत्र चान्तर्मुहूर्तं स्थित्वाऽसंज्ञिषु मध्ये समायातः। देवो हि मृत्वा नासंज्ञिषु मध्ये गच्छतीति कृत्वा एकेन्द्रियग्रहणं। ततोऽसंज्ञिजन्मानन्तरं शीघ्रं मृत्वा नारको जातः, सर्वपर्याप्तिभिश्च शीघ्रं पर्याप्तः। तस्मिन् सर्वपर्याप्तिपर्याप्ते नारके नरकगतेर्जघन्यः प्रदेशोदयः। पर्याप्तस्य हि प्रभूताः प्रकृतयो विपाकोदयमायान्ति, उदयगताश्च स्तिबुकसंक्रमेण न संक्रामन्ति, तेन प्रकृत्यन्तरदलिकसंक्रमाभावात् जघन्यः प्रदेशोदयः प्राप्यत इति सर्वपर्याप्त इत्युक्तं। आनुपूर्व्यश्चतस्रोऽपि गतितुल्याः स्वस्वगतितुल्या ज्ञेया ज्ञातव्याः। केवलं भवादौ भव-प्रथमसमये वेदितव्याः। तृतीये हि समयेऽन्या अपि बन्धावलिकातीताः कर्मलता उदयमागच्छन्ति, ततो भवप्रथमसमय-ग्रहणम्॥ २९–३०॥

देवगई ओहिसमा नवरिं उज्जोयवेयगो ताहे। आहार जाइ अइचिरसंजममणुपालिऊणंते॥ ३१॥

देवगइ त्ति—देवगतिरवधिसमा अवधिज्ञानावरणसमा अवधिज्ञानावरणस्येव देवगतेरपि जघन्यः प्रदेशोदयो ज्ञात-नीय इत्यर्थः। नवरं यदा उद्योतवेदको भवति 'ताहे' तदा देवगतेर्जघन्यः प्रदेशोदयो द्रष्टव्यः। किं कारणमिति चेदु-च्यते—यावदुद्योतस्योदयो न भवति तावद्देवगतौ स्तिबुकसंक्रमेण तं संक्रमयति। ततो जघन्यः प्रदेशोदयो न लभ्यते। तत उदयमाप्तस्य पुनरुद्योतस्य स्तिबुकसंक्रमो न भवति, तत उद्योतवेदकग्रहणं। उद्योतवेदकत्वं च पर्याप्तस्य भवति,

नापर्याप्तस्येति पर्याप्तावस्थायां देवगतेर्जघन्यः प्रदेशोदयः । तथा यश्चिरकालं देशोनपूर्वकोटिरूपं यावत्संयममनुपाल्या-न्तिमे काले आहारकशरीरी जातः, उद्योतं च वेदयते, तस्याहारकसप्तकस्य जघन्यः प्रदेशोदयः । चिरकालसंयमपरि-पालने हि भूयांसः कर्मपुद्गलाः परिसटिता भवन्तीति कृत्वा चिरकालसंयमग्रहणं । उद्योतग्रहणे च कारणं प्रागुक्तमे-वानुसर्तव्यं ॥ ३१ ॥

सेसाणं चक्खुसमं तंमि व अन्नंमि व भवे अचिरा । तज्जोगा बहुगीउ पवेययं तस्स ता ताउ ॥ ३२ ॥

सेसाणं ति—उक्तशेषाणां प्रकृतीनां चक्षुःसमं चक्षुर्दर्शनावरणसमं वक्तव्यं तावद्यावदेकेन्द्रियो जातः, ततो येषां कर्मणां तस्मिन्नेव एकेन्द्रियभवे उदयो विद्यते तेषां तत्रैव जघन्यः प्रदेशोदयो वाच्यः । येषां तु कर्मणां मनुजगतिद्वीन्द्रि-यादिजातिचतुष्टयाद्यसंस्थानपञ्चकौदारिकांगोपांगवैक्रियांगोपांगसंहननपट्कविहायोगतिद्विकत्रससुभगसुस्वरदुःस्वरादेयरू-पाणां न तत्रोदयसंभवः तेषामेकेन्द्रियभवादुद्धृत्य तत्तदुदययोग्येषु भवेषूत्पन्नस्य तास्तास्तद्भवयोग्या बह्वीः प्रकृतीर्वेदय-मानस्य, तत्तद्भवयोग्यबहुप्रकृतिवेदनं च पर्याप्तस्योपपद्यते । ततः सर्वाभिः पर्याप्तिभिः पर्याप्तस्य जघन्यः प्रदेशोदयः पर्याप्तस्य बह्व्यः प्रकृतय उदयमागच्छन्ति, उदयप्राप्तानां च प्रकृतीनां स्तिबुकसंक्रमो न भवति। तथा च सति विवक्षित-प्रकृतीनां जघन्यः प्रदेशोदयो लभ्यते इति पर्याप्तस्येति विवृतं । तीर्थकरनाम्नस्तु क्षपितकर्मांशस्योदयप्रथमसमये जघन्यः प्रदेशोदयो ज्ञेयः, परतो गुणश्रेणिदलिकं प्रभूतमवाप्यते इति स न भवति ॥ ३२ ॥ ४१९ ॥

॥ इति श्रीमलयगिरिविरचितायां कर्मप्रकृतिटीकायामुदयः समाप्तः ॥

तदेवमुक्त उदयः, संप्रति सत्ताभिधानावसरः। तत्र चेमेऽर्थाधिकाराः। तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति। तत्र भेदनिरूपणार्थमाह—

मूलुत्तरपगइगयं चउविहं संतकम्ममवि नेयं। धुवमद्धुवणाईयं अट्ठण्हं मूलपगईणं ॥ १ ॥

मूलुत्तर त्ति—सत्कर्म द्विधा—मूलप्रकृतिगतं उत्तरप्रकृतिगतं च। तत्र मूलप्रकृतिगतमष्टप्रकारं, तद्यथा—ज्ञानावरणीयं दर्शनावरणीयमित्यादि। उत्तरप्रकृतिगतमष्टपञ्चाशदधिकशतप्रकारं, तद्यथा—मतिज्ञानावरणीयमित्यादि। पुनरेकैकं चतुर्विधं, तद्यथा—प्रकृतिसत्कर्म, स्थितिसत्कर्म, अनुभागसत्कर्म, प्रदेशसत्कर्म च। तदेवमुक्तो भेदः, संप्रति साद्यनादिप्ररूपणार्थमाह—'धुवेत्यादि' अष्टानां मूलप्रकृतीनां सत्कर्म त्रिधा, तद्यथा—ध्रुवमध्रुवमनादि च। तत्रानादित्वं सदैव भावात्। ध्रुवाध्रुवताऽभव्यभव्यापेक्षया ॥ १ ॥

संप्रत्युत्तरप्रकृतीनां साद्यनादिप्ररूपणार्थमाह—

दिट्ठिदुगाउगउग्गति तणुचोद्दसगं च तित्थगरमुच्चं। दुविहं पढमकसाया होंति चउद्धा तिहा सेसा ॥२॥

दिट्ठिदुग त्ति—दृष्टिद्विकं सम्यक्त्वसम्यग्मिथ्यात्वरूपं, आयूंषि चत्वारि, 'उग्गइ त्ति' मनुष्यद्विकं देवद्विकं नरकद्विकं च, तनुचतुर्दशकं वैक्रियसप्तकाहारकसप्तकरूपं, तथा तीर्थकरनामोच्चैर्गोत्रं च, एतासामष्टाविंशतिप्रकृतीनां सत्कर्म द्विविधं द्विप्रकारं, तद्यथा—सादि अध्रुवं च। साद्यध्रुवता चाध्रुवसत्कर्मत्वादवसेया। तथा प्रथमकषाया अनन्तानुबन्धिनः

सत्कर्मापेक्षया चतुर्विधाः, तद्यथा—सादयोऽनादयो ध्रुवा अध्रुवाश्च । तथाहि—ते सम्यग्दृष्टिना प्रथममुद्वलिताः, ततो मिथ्यात्वं गतेन यदा भूयोऽपि मिथ्यात्वप्रत्ययेन बध्यन्ते, तदा सादयः । तत्स्थानमप्राप्तस्य पुनरनादयः । ध्रुवाध्रुवता पूर्ववत् । तथा शेषाः षड्विंशतिशतसंख्याः प्रकृतयः सत्कर्मापेक्षया त्रिधा त्रिप्रकाराः, तद्यथा—अनादयो ध्रुवा अध्रुवाश्च । तत्रानादित्वं ध्रुवसत्कर्मत्वात् । ध्रुवाध्रुवता पूर्ववत् ॥ २ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वं वक्तव्यं । तच्च द्विधा—एकैकप्रकृतिगतं प्रकृतिस्थानगतं च । तत्रैकैकप्रकृतिगतं स्वामित्वमभिधित्सुराह—

छउमत्थंता चउदस दुचरमसमयंमि अत्थि दो निद्दा । बद्धाणि ताव आऊणि वेइयाइं ति जा कसिणं ॥३॥

छउमत्थंत त्ति—ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयरूपाश्चतुर्दश प्रकृतयः छद्मस्थान्ताः क्षीणकषायवीतरागछद्मस्थगुणस्थानकं यावत्सत्यो भवन्तीत्यर्थः । परतस्तासामभावः । एवमुत्तरत्राप्युक्तगुणस्थानकात्परतोऽभावो वेदितव्यः । तथा द्वे निद्रे क्षीणकषायवीतरागछद्मस्थगुणस्थानकद्विचरमसमयं यावत्सत्यौ स्तः । आयूंषि चत्वार्यपि बद्धानि तावत्सन्ति यावत्कृत्स्नं निरवशेषं वेदितानि न भवन्ति ॥ ३ ॥

तिसु मिच्छत्तं नियमा अट्ठसु ठाणेसु होइ भइयव्वं । आसाणे सम्मत्तं नियमा सम्मं दससु भज्जं ॥ ४ ॥

तिसु त्ति—त्रिषु गुणस्थानकेषु मिथ्यादृष्टिसासादनसम्यग्मिथ्यादृष्टिलक्षणेषु नियमादवश्यंतया मिथ्यात्वं सत् विद्यमानं । शेषेषु पुनरष्टसु गुणस्थानकेषु उपशान्तमोहगुणस्थानकपर्यवसानेषु भाज्यं । तथाहि—अविरतसम्यग्दृष्ट्यादिना

क्षपिते न भवति, उपशान्ते तु भवति । क्षीणमोहादिषु पुनस्तस्यावश्यमभावः । तथा आसादने सासादने सम्यक्त्वं नियमादस्ति । दशसु पुनर्गुणस्थानकेषु मिथ्यादृष्ट्याद्युपशान्तमोहगुणस्थानकपर्यवसानेषु भाज्यं, कदाचिद्भवति कदाचिन्न भवतीत्यर्थः । तथाहि–मिथ्यादृष्टावभव्ये न भवति, भव्येऽपि कदाचिद्भवति कदाचिन्न । तथा सम्यङ्मिथ्यादृष्टित्वं कियत्कालं सम्यक्त्वे उद्वलितेऽपि भवति, ततस्तत्रापि तद्भाज्यं । अविरतादिषु पुनः क्षपकेषु न भवति, उपशमकेषु तु भवति, अतस्तत्रापि तद्भाज्यं ॥ ४ ॥

बिइयतइएसु मिस्सं नियमा ठाणनवगम्मि भयणिज्जं । संजोयणा उ नियमा दुसु पंचसु होइ भइयव्वं ॥ ५

बिइय त्ति—द्वितीये तृतीये च गुणस्थानके मिश्रं सम्यङ्मिथ्यात्वं नियमादस्ति । यतः सासादनो नियमादष्टाविंशतिसत्कर्मैव भवति, सम्यङ्मिथ्यादृष्टिश्च सम्यङ्मिथ्यात्वं विना न भवति, ततः सासादने सम्यङ्मिथ्यादृष्टौ च सम्यङ्मिथ्यात्वमवश्यमस्ति । स्थाननवके गुणस्थानकनवके मिथ्यादृष्ट्यविरतसम्यग्दृष्ट्यादौ उपशान्तगुणस्थानकान्ते भजनीयं, कदाचिद्भवति कदाचिन्न भवति । भावना च प्रागुक्तप्रकारेण स्वयमेव कर्तव्या, सुगमत्वात् । तथा संयोजना अनन्तानुबन्धिनो द्वयोर्मिथ्यादृष्टिसासादनयोर्नियमाद्भवन्ति । यत एताववश्यमनन्तानुबन्धिनो बध्नाति । पञ्चसु पुनर्गुणस्थानकेषु सम्यङ्मिथ्यादृष्ट्यादिष्वप्रमत्तसंयतपर्यन्तेषु भजनीयाः । यदि उद्वलितास्ततो न सन्ति, इतरथा तु सन्तीत्यर्थः ॥ ५ ॥

खवगानियट्टिअद्धा संखिज्जा होंति अट्ठ वि कसाया । निरयतिरियतेरसगं निद्दानिद्दातिगेणुवरिं ॥ ६ ॥

खवग त्ति—क्षपकस्य अनिवृत्तिबादरसंपरायाद्धाया यावत् संख्येया भागास्तावत् अष्टावपि अप्रत्याख्यानप्रत्याख्या-

नसंज्ञाः कषायाः सन्ति । परतो न विद्यन्ते, क्षीणत्वात् । उपशमश्रेणिमधिकृत्य पुनरुपशान्तमोहगुणस्थानकं यावत् सन्तो वेदितव्याः । निरयतिर्यगेकान्तप्रायोग्यं यन्नामत्रयोदशकं नरकद्विकतिर्यग्द्विकैकद्वित्रिचतुरिन्द्रियजातिस्थावरातपोद्योतसूक्ष्मसाधारणरूपं निद्रानिद्रात्रिकेण सह संयुक्तं कषायाष्टकक्षयादुपरि स्थितिखंडेषु सहस्रेषु गतेषु सत्सु युगपत्क्षयमेति । ततो यावन्न क्षयं याति तावत् सत्, क्षये च सति असत् । उपशमश्रेण्यां पुनरेताः षोडशापि प्रकृतय उपशान्तमोहगुणस्थानकं यावत् सत्यो वेदितव्याः ॥ ६ ॥

अपुमित्थीए समं वा हासछक्कं च पुरिससंजलणा । पत्तेगं तस्स कमा तणुरागंतो त्ति लोभो य ॥ ७ ॥

अपुमिछीए त्ति—पूर्वोक्तप्रकृतिषोडशकक्षयादनन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु नपुंसकवेदः क्षीयते, यावच्च न क्षीयते तावत् सन् । ततः पुनरपि स्थितिखंडेषु संख्येयेषु गतेषु सत्सु स्त्रीवेदः क्षीयते, सोऽपि यावत्क्षयं न याति तावत्सन् । एवं स्त्रीवेदेन पुरुषवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं । नपुंसकवेदेन प्रतिपन्नस्य तु स्त्रीवेदनपुंसकवेदौ युगपत्क्षयमुपगच्छतः, यावच्च न क्षयमुपगच्छतस्तावत्सन्तौ । उपशमश्रेणिमधिकृत्य पुनरुपशान्तमोहगुणस्थानकं यावत्सन्तौ । ततः स्त्रीवेदक्षयानन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु हास्यादिषट्कं युगपत्क्षयमुपयाति, ततः समयोनावलिकाद्विकातिक्रमे पुरुषवेदः । एवं पुरुषवेदेन क्षपकश्रेणिं प्रतिपन्नस्य द्रष्टव्यं । स्त्रीवेदेन नपुंसकवेदेन वा क्षपकश्रेणिं प्रतिपन्नस्य पुनः पुरुषवेदो हास्यादिषट्कं च युगपत्क्षीयते । ततः पुरुषवेदक्षयानन्तरं संख्येयेषु स्थितिखंडेषु गतेषु सत्सु संज्वलनक्रोधः क्षयमुपयाति । ततः पुनरपि संख्येयेषु स्थितिखंडेषु गतेषु सत्सु संज्वलनमानः । ततोऽपि संख्येयेषु स्थिति-

खंरूपु गतेषु संज्वलनमाया । यावच्च हास्यादिप्रकृतयः क्षयं नोपयान्ति तावत्सत्यः । 'तणुरागंतो त्ति लोन्नो य' लोन्नः संज्वलनलोन्नो यावत्तनुरागान्तः सूक्ष्मसंपरायगुणस्थानकान्तः तावत् सन् वेदितव्यः, परतोऽसन् । उपशमश्रेणिमधिकृत्य पुनर्हास्यादिप्रकृतयः सर्वा अपि उपशान्तमोहगुणस्थानकं यावत् सत्योऽवसेयाः ॥ ७ ॥

मणुयगइजाइतसबायरं च पज्जत्तसुन्नगआएज्जं । जसकित्ती तित्थयरं वेयणिउच्चं च मणुयाणं ॥ ८ ॥
न्नवचरिमस्ससमयम्मि उ तम्मग्गिल्लसमयम्मि सेसाउ । आहारगतित्थयरा न्नज्जा डुसु नत्थि तित्थयरं ॥९॥

मणुयगईत्यादि–मनुष्यगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुन्नगादेययशःकीर्तितीर्थकरान्यतरवेदनीयोच्चैर्गोत्रमनुष्यायूरूपा द्वादश प्रकृतयो न्नवचरमसमये सन्ति, अयोगिकेवलिचरमसमयं यावत् विद्यन्ते, परतोऽसत्य इत्यर्थः । शेषाः पुनरुक्तव्यतिरिक्ताः सर्वा अपि त्र्यशीतिसंख्याः । 'तम्मग्गिल्लसमयम्मि त्ति' न्नवचरमसमयपाश्चात्यसमयेऽयोगिकेवलिद्विचरमसमये इत्यर्थः । सत्यो न्नवन्ति, चरमसमये त्वसत्यः । आहारकतीर्थकरनामनी सर्वेष्वपि गुणस्थानकेषु न्नाज्ये । द्वयोः पुनर्गुणस्थानकयोः सासादनसम्यग्मिथ्यादृष्टिरूपयोस्तीर्थकरनाम नियमान्न विद्यते, तीर्थकरनामसत्कर्मणः स्वन्नावत एवोक्तरूपे गुणस्थानकद्विके गमनासंन्नवात् ॥ ८–९ ॥

तदेवमुक्तमेकैकप्रकृतिसत्कर्म, संप्रति प्रकृतिस्थानसत्कर्मप्ररूपणार्थमाह—

पढमचरिमाणमेगं ठन्नवचत्तारि वीयगे तिन्नि । वेयणियाउयगोएसु दोन्नि एगो त्ति दो होंति ॥१०॥

पढम त्ति–प्रथमचरमयोर्ज्ञानावरणान्तराययोरेकैकं पञ्चप्रकृत्यात्मकं स्थानं । तच्च क्षीणकषायचरमसमयं यावत् सत्, परतोऽसत् । तथा द्वितीये दर्शनावरणीये त्रीणि प्रकृतिस्थानानि, तद्यथा—षट् नव चतस्रः । तत्र सकलदर्शनावरणीयप्रकृतिसमुदायो नव । ताश्च नव प्रकृतय उपशमश्रेणिमधिकृत्य उपशान्तमोहगुणस्थानकं यावत् सत्यः । क्षपकश्रेणिमधिकृत्य पुनरनिवृत्तिबादरसंपरायाद्धाया यावत् संख्येयभागास्तावत्सत्यः, परतः स्त्यानर्द्धित्रिकक्षये षट् भवन्ति । ताश्च तावत्सत्यो यावत् क्षीणकषायस्य द्विचरमसमयः । तस्मिन् द्विचरमसमये निद्राप्रचले व्यवच्छिद्येते । ततश्चरमसमये चतस्र एव सत्यः । ता अपि तत्र व्यवच्छिद्यन्ते । तथा वेदनीयायुर्गोत्राणां द्वे प्रकृतिस्थाने, तद्यथा—द्वे एका च । तत्र वेदनीयस्य यावदेकं न क्षीणं तावत् द्वे सत्यौ । एकस्मिंस्तु क्षीणे एका । गोत्रस्य यावदेकं न क्षीणं उद्वलितं तावत् द्वे सत्यौ । नीचैर्गोत्रे क्षपिते उच्चैर्गोत्रे वा उद्वलिते पुनरेका सती । आयुषस्तु यावद्बद्धमायुर्नोदेति तावत् द्वे प्रकृती सत्यौ । उदिते तु तस्मिन् प्राक्तनं क्षीणमिति एका प्रकृतिः ॥ १० ॥

संप्रति मोहनीयस्य प्रकृतिसत्कर्मस्थानप्रतिपादनार्थमाह—

एगाइ जाव पंचगमेक्कारस बार तेरसिगवीसा । बिय तिय चउरो छ सत्त अट्ठवीसा य मोहस्स ॥ ११ ॥

एगाइ त्ति–मोहनीयस्य पञ्चदश प्रकृतिसत्कर्मस्थानानि । तद्यथा–एका, द्वे, तिस्रः, चतस्रः पञ्च, एकादश, द्वादश, त्रयोदश, एकविंशतिः, द्वाविंशतिः, त्रयोविंशतिः, चतुर्विंशतिः, षड्विंशतिः, सप्तविंशतिः, अष्टाविंशतिश्चेति । एतानि सुखावबोधार्थं गाथाक्रमवैपरीत्येन भाव्यन्ते—तत्र मोहनीयस्य सर्वप्रकृतिसमुदायोऽष्टाविंशतिः । सम्यक्त्वे उद्वलिते सप्त-

विंशतिः। ततोऽपि सम्यङ्मिथ्यात्वे उद्वलिते षड्विंशतिः। अथवाऽनादिमिथ्यादृष्टेः षड्विंशतिः। अष्टाविंशतिरनन्तानुबन्धिचतुष्टये क्षीणे चतुर्विंशतिः। ततो मिथ्यात्वे क्षीणे त्रयोविंशतिः। ततः सम्यङ्मिथ्यात्वे क्षीणे द्वाविंशतिः। ततः सम्यक्त्वे क्षीणे एकविंशतिः। ततोऽष्टसु कषायेषु क्षीणेषु त्रयोदश। ततो नपुंसकवेदे क्षीणे द्वादश। ततः स्त्रीवेदे क्षीणे एकादश। ततः षट्सु नोकषायेषु क्षीणेषु पञ्च। ततः पुरुषवेदे क्षीणे चतस्रः। ततः संज्वलनक्रोधे क्षीणे तिस्रः। ततः संज्वलनमाने क्षीणे द्वे। संज्वलनमायायां च क्षीणायामेका ॥ ११ ॥

संप्रत्येतानि प्रकृतिसत्कर्मस्थानानि गुणस्थानकेषु विचिन्तयन्नाह—

तिन्नेग तिगं पणगं पणगं पणगं च पणगमह दोन्नि। दस तिन्नि दोन्नि मिछाइगेसु जावोवसंतो त्ति ॥१२॥

तिन्नेग त्ति–यावदुपशान्तमोहगुणस्थानकं तावन्मिथ्यादृष्ट्यादिषु गुणस्थानकेषु यथासंख्यं त्र्यादीनि प्रकृतिसत्कर्मस्थानानि भवन्ति। तत्र मिथ्यादृष्टिगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि। तद्यथा–अष्टाविंशतिः, सप्तविंशतिः, षड्विंशतिश्च। एतानि प्रागेव भावितानि। सासादनसम्यग्दृष्टिगुणस्थानके एकं प्रकृतिसत्कर्मस्थानं अष्टाविंशतिरूपं। सम्यङ्मिथ्यादृष्टिगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि, तद्यथा—अष्टाविंशतिः सप्तविंशतिश्चतुर्विंशतिश्च। इह योऽष्टाविंशतिसत्कर्मा सन् सम्यङ्मिथ्यात्वं गतस्तमाश्रित्याष्टाविंशतिः। येन पुनर्मिथ्यादृष्टिना सता पूर्वं सम्यक्त्वमुद्वलितं ततः सप्तविंशतिसत्कर्मणा सता सम्यङ्मिथ्यात्वमनुभवितुमारब्धं तं प्रति सप्तविंशतिः। चतुर्विंशतिसत्कर्मणां सम्यङ्मिथ्यादृष्टिं प्रतीत्य पुनश्चतुर्विंशतिः प्राप्यते। तथाऽविरतसम्यग्दृष्टिगुणस्थानके पञ्च प्रकृतिसत्कर्मस्थानानि, तद्यथा–अष्टा-

विंशतिः चतुर्विंशतिः त्रयोविंशतिः द्वाविंशतिः एकविंशतिश्च । तत्राष्टाविंशतिरौपशमिकसम्यग्दृष्टेः क्षायोपशमिकसम्यग्दृष्टेर्वा । अष्टाविंशतिसत्कर्मणोऽनन्तानुबन्धिक्षये वेदकसम्यग्दृष्टेरौपशमिकसम्यग्दृष्टेर्वा चतुर्विंशतिः । वेदकसम्यग्दृष्टेर्मिथ्यात्वे क्षपिते त्रयोविंशतिः । तस्यैव सम्यङ्मिथ्यात्वे क्षपिते द्वाविंशतिः । क्षायिकसम्यग्दृष्टेरेकविंशतिः । तथा देशविरतिगुणस्थानके पञ्च प्रकृतिसत्कर्मस्थानानि, तानि च पूर्वोक्तान्येव । तान्येव प्रमत्तसंयतगुणस्थानके । तान्येव चाप्रमत्तसंयतगुणस्थानके । 'अह दोन्नि त्ति' अथानन्तरं अपूर्वकरणगुणस्थानके द्वे प्रकृतिस्थाने, तद्यथा—चतुर्विंशतिरेकविंशतिश्च । तत्रोपशमश्रेणिं प्रतिपन्नस्य चतुर्विंशतिः, क्षायिकसम्यग्दृष्टिमधिकृत्य द्वयोरपि श्रेण्योरेकविंशतिः । तथाऽनिवृत्तिबादरसंपरायगुणस्थानके दश प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिः एकविंशतिः त्रयोदश द्वादश एकादश पञ्च चतस्रः तिस्रः द्वे एका च । तत्र चतुर्विंशतिरुपशमश्रेणिमधिकृत्य, एकविंशतिः क्षायिकसम्यग्दृष्टेर्द्वयोरपि श्रेण्योः शेषाणि पुनः क्षपकश्रेण्यां, तानि च प्रागेव भावितानि । सूक्ष्मसंपरायगुणस्थानके त्रीणि प्रकृतिसत्कर्मस्थानानि, तद्यथा—चतुर्विंशतिः एकविंशतिः एका च । तत्र चतुर्विंशतिरौपशमिकसम्यग्दृष्टेः, एकविंशतिश्च क्षायिकसम्यग्दृष्टेः, एते च द्वे अपि प्रकृतिसत्कर्मस्थाने उपशमश्रेण्यां, एका च क्षपकश्रेण्या । तथा द्वे प्रकृतिसत्कर्मस्थाने उपशान्तमोहगुणस्थानके, तद्यथा—चतुर्विंशतिरेकविंशतिश्च । एते च द्वे अपि प्रागिव भावनीये ॥ १२ ॥

संप्रति मतान्तरमाह—

संखीणदिट्ठिमोहे केई पणवीसइं पि इच्छंति । संजोयणाण पच्छा नासं तेसिं उवसमं च ॥ १३ ॥

संखीण त्ति—केचिदाचार्याः पञ्चविंशतिलक्षणमपि प्रकृतिसत्कर्मस्थानमिच्छन्ति । ते हि प्रथमतो दृष्टिमोहे दर्शनमोहनीयत्रितये संक्षीणे क्षयमुपगते सति पश्चादनन्तानुबन्धिनां नाशमिच्छन्ति । ततस्तन्मतेन दर्शनमोहनीयत्रितयक्षये सति पञ्चविंशतिरूपमपि प्रकृतिसत्कर्मस्थानं प्राप्यते । यद्येवं तर्हि तन्मतमिह कस्मान्नाभ्युपगम्यते ? उच्यते—आर्षेण विरोधात् । यदाह चूर्णिकृत्—"तं आरिसे न मिलइ तेण न इच्छिज्जइ त्ति" । तथा त एवाचार्यास्तेषामनन्तानुबन्धिनामुपशमं चेच्छन्ति, नान्ये परमार्थवेदिनः । अत एव च प्रागनन्तानुबन्धिनामुपशमनाऽस्माभिर्नोपदर्शिता ॥ १३ ॥

संप्रति नामकर्मणः प्रकृतिसत्कर्मस्थानानि प्रतिपिपादयिषुराह—

तिदुगसयं छप्पंचगतिगनउई नउई गुणनउई य । चउतिगदुगाहिगासी नव अट्ठ य नामठाणाइं ॥१४॥

तिदुगसयं ति—नामकर्मणो द्वादश प्रकृतिसत्कर्मस्थानानि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः त्रिनवतिः नवतिः एकोननवतिः चतुरशीतिः त्र्यशीतिः द्व्यशीतिः नव अष्टौ चेति । तत्र सर्वनामकर्मप्रकृतिसमुदायस्त्र्युत्तरशतं । तदेव तीर्थकररहितं द्व्युत्तरशतं । त्र्युत्तरशतमेवाहारकसप्तकरहितं षण्णवतिः । सैव तीर्थकररहिता पञ्चनवतिः । पञ्चनवतिरेव देवद्विकरहिता नरकद्विकरहिता वा त्रिनवतिः । तथा त्र्युत्तरशतमेव नामत्रयोदशकरहितं नवतिः । सैव तीर्थकररहिता एकोननवतिः । तथा त्रिनवतिर्नरकद्विकवैक्रियसप्तकरहिता देवद्विकवैक्रियसप्तकरहिता वा चतुरशीतिः । षण्णवतिस्त्रयोदशरहिता त्र्यशीतिः । पञ्चनवतिस्त्रयोदशरहिता द्व्यशीतिः, अथवा चतुरशीतिर्मनुजद्विकरहिता द्व्यशीतिः । मनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थंकररूपा नव । ता एव तीर्थंकररहिता अष्टौ ॥१४॥

एतान्येव प्रकृतिसत्कर्मस्थानानि गुणस्थानकेषु चिन्तयन्नाह—

एगे छ दोसु दुगं पंचसु चत्तारि अट्ठगं दोसु । कमसो तीसु चउक्कं छत्तु अजोगम्मि ठाणाणि ॥१५॥

एगे त्ति–एकस्मिन्मिथ्यादृष्टिलक्षणे गुणस्थानके षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा—द्व्युत्तरशतं षण्णवतिः पञ्चन-
वतिः त्रिनवतिः चतुरशीतिः द्व्यशीतिः । ननु षण्णवतिस्तीर्थकरनामसहिता भवति ततः सा कथं मिथ्यादृष्टौ प्राप्यते ?
उच्यते—इह कश्चित् नरकेषु बद्धायुष्कः पश्चात्सम्यक्त्वं प्राप्य, तन्निमित्तं तीर्थकरनामकर्म बद्ध्वा नरकाभिमुखः
सन् सम्यक्त्वं त्यक्त्वा मिथ्यादृष्टिर्जातः, ततो नरके उत्पन्नः सन् अन्तर्मुहूर्तानन्तरं पुनरपि सम्यक्त्वं प्रतिपद्यते, ततोऽ-
न्तर्मुहूर्तं कालं यावत् षण्णवतिर्मिथ्यादृष्टौ प्राप्यते, आहारकसप्तकतीर्थकरनामसत्कर्मा च मिथ्यात्वं न प्रतिपद्यते ।
उक्तं च–"उभए संति न मिच्छो" इति । ततस्त्र्युत्तरशतं मिथ्यादृष्टौ न प्राप्यते । तथा द्वयोः सासादनसम्यग्मिथ्या-
दृष्टिगुणस्थानकयोर्द्वे द्वे प्रकृतिसत्कर्मस्थाने, तद्यथा–द्व्युत्तरशतं पञ्चनवतिश्च । तथा पञ्चसु अविरतसम्यग्दृष्टिगुणस्थान-
कप्रभृतिषु अपूर्वकरणगुणस्थानकान्तेषु चत्वारि चत्वारि प्रकृतिसत्कर्मस्थानानि । तद्यथा–त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः
पञ्चनवतिः । शेषाणि क्षपकश्रेण्यामेकेन्द्रियादौ च संभवन्तीति कृत्वा इह न प्राप्यन्ते । तथा द्वयोरनिवृत्तिबादरसूक्ष्म-
संपरायलक्षणयोर्गुणस्थानकयोरष्टकं अष्टौ प्रकृतिसत्कर्मस्थानानि । तद्यथा–त्र्युत्तरशतं द्व्युत्तरशत षण्णवतिः पञ्चनवतिः
नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिश्च । तत्रानिवृत्तिबादरस्यादिमानि चत्वारि उपशमश्रेण्यां क्षपकश्रेण्यां वा यावन्न
त्रयोदशकं क्षीयते । शेषाणि पुनः क्षपकश्रेण्यामेव । सूक्ष्मसंपरायस्यादिमानि चत्वारि उपशमश्रेण्या, शेषाणि तु क्षपक-

श्रेण्यां । तथा त्रिषु उपशान्तमोहक्षीणमोहसयोगिकेवलिलक्षणेषु गुणस्थानकेषु चत्वारि चत्वारि प्रकृतिसत्कर्मस्थानानि भवन्ति । तत्रोपशान्तमोहे इमानि चत्वारि, तद्यथा—त्र्युत्तरशतं द्व्युत्तरशतं षण्णवतिः पञ्चनवतिः । क्षीणमोहसयोगिकेवलिनोः पुनरमूनि, तद्यथा–नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिश्च । 'ठ तु अजोगम्मि ठाणाणि त्ति' अयोगिकेवलिनि षट् प्रकृतिसत्कर्मस्थानानि, तद्यथा–नवतिः एकोननवतिः त्र्यशीतिः द्व्यशीतिः नव अष्टौ चेति । एतेषामादिमानि चत्वारि अयोगिकेवलिद्विचरमसमयं यावत्, चरमसमये तु तीर्थकरातीर्थकरौ प्रतीत्य द्वे अन्तिमे प्रकृतिसत्कर्मस्थाने १५

तदेवमुक्तं प्रकृतिसत्कर्म । संप्रति स्थितिसत्कर्म वक्तव्यं । तत्र त्रयोऽर्थाधिकाराः, तद्यथा–भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति । तत्र भेदः प्रागिव । साद्यनादिप्ररूपणा च द्विधा–मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र प्रथमतो मूलप्रकृतिविषया साद्यनादिप्ररूपणां चिकीर्षुराह–

मूलठिई अजहन्नं तिहा चउद्धा य पढमगकसाया । तित्थयरुव्वलणायुगवज्जाणि तिहा दुहाणुत्तं ॥ १६ ॥

मूलठिइ त्ति–मूलप्रकृतिस्थितिसत्कर्म अजघन्यं त्रिधा त्रिप्रकारं । तद्यथा–अनादि ध्रुवमध्रुवं च । तथाहि–मूलप्रकृतीनां जघन्यं स्थितिसत्कर्म स्वस्वक्षयपर्यवसाने समयमात्रैकस्थित्यवशेषे भवति, तच्च सादि अध्रुवं च । ततोऽन्यत्सर्वमजघन्यं, तच्चानादि, सदैव भावात् । ध्रुवाध्रुवता पूर्ववत् । उत्कृष्टमनुत्कृष्टं च साद्यध्रुवं द्वयोरपि पर्यायेणानेकशो भवनात् । कृता मूलप्रकृतीनां साद्यनादिप्ररूपणा, संप्रत्युत्तरप्रकृतीनां क्रियते 'चउद्धा य' इत्यादि अत्र षष्ठ्यर्थे प्रथमा, ततोऽयमर्थः–प्रथमकषायाणामनन्तानुबन्धिनामजघन्यं स्थितिसत्कर्म चतुर्धा चतुःप्रकारं, तद्यथा–सादि अनादि ध्रुव-

मध्रुवं च । तथाहि–एषां जघन्यं स्थितिसत्कर्म स्वक्षयोपान्त्यसमये स्वरूपापेक्षया समयमात्रैकस्थितिरूपं, अन्यथा तु द्विसमयमानं, तच्च साद्यध्रुवं, ततोऽन्यत्सर्वमजघन्यं, तदपि चोद्वलितानां भूयो बन्धे सादि, तत्स्थानमप्राप्तानां पुनरनादि, ध्रुवाध्रुवता पूर्ववत् । तथा तीर्थकरनामोद्वलनयोग्यत्रयोविंशत्यायुश्चतुष्टयवर्जितानां शेषाणां षड्विंशत्यधिकशतसंख्यानां प्रकृतीनामजघन्यं स्थितिसत्कर्म त्रिधा, तद्यथा–अनादि ध्रुवमध्रुवं च । तथाहि–एतासां जघन्यं स्थितिसत्कर्म स्वस्वक्षयपर्यवसाने उदयवतीनां समयमात्रैकस्थितिरूपं, अनुदयवतीनां स्वरूपतः समयमात्रैकस्थितिकं । अन्यथा तु द्विसमयमात्रं । तच्च साद्यध्रुवं । ततोऽन्यत्सर्वमजघन्यं । तच्चानादि, सदैव भावात् । ध्रुवाध्रुवता पूर्ववत् । 'उहाणुत्तं त्ति' अनुक्तं उक्तप्रकृतीनामुत्कृष्टानुत्कृष्टजघन्यरूपं तीर्थकरनामोद्वलनयोग्यदेवद्विकनरकद्विकमनुजद्विकवैक्रियसप्तकाहारकसप्तकोच्चैर्गोत्रसम्यक्त्वसम्यङ्मिथ्यात्वरूपत्रयोविंशतिआयुश्चतुष्टयानां जघन्याजघन्योत्कृष्टानुत्कृष्टरूपं विकल्पचतुष्टयं द्विधा द्विप्रकारं, तद्यथा–सादि अध्रुवं च । तथाहि–उक्तप्रकृतीनामुत्कृष्टमनुत्कृष्टं च स्थितिसत्कर्म पर्यायेणानेकशो भवति । ततो द्वितयमपीदं साद्यध्रुवं । जघन्यं च प्रागेव भावितं । तीर्थकरनामादीनां चाध्रुवसत्कर्मत्वाच्चत्वारोऽपि विकल्पाः साद्यध्रुवा अवसेयाः । मूलप्रकृतीनां चानुक्तं जघन्यमुत्कृष्टमनुत्कृष्टं च द्विप्रकारं, प्रागेव चोक्तं ॥ १६ ॥

तदेवं कृता साद्यनादिप्ररूपणा । संप्रति स्वामित्वं वक्तव्यं । तच्च द्विधा–उत्कृष्टस्थितिसत्कर्मस्वामित्वं जघन्यस्थितिसत्कर्मस्वामित्वं च । तत्र प्रथमत उत्कृष्टस्थितिसत्कर्मस्वामित्वमाह–

जेठठिई बंधसमं जेठं बंधोदया उ जासि सह । अणुदयबंधपराणं समऊणा जठिई जेठं ॥ १७ ॥

जेष्ठठिइ त्ति—यासां प्रकृतीनां सह युगपत् वन्धोदयौ जवतः। कासां युगपत् वन्धोदयौ जवत इति चेदुच्यते—ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयासातवेदनीयमिथ्यात्वषोडशकषायपञ्चेन्द्रियजातितैजससप्तकहुंडसंस्थानवर्णादिविंशत्यगुरुलघुपराघातोच्छ्वासाप्रशस्तविहायोगत्युद्योतत्रसबादरपर्याप्तप्रत्येकास्थिराशुजदुर्जगदुःस्वरानादेयायशःकीर्तिनिर्माणनीचैर्गोत्रपञ्चविधान्तरायाणां तिर्यङ्मनुष्यानधिकृत्य वैक्रियसप्तकस्य सर्वसंख्यया षडशीतिप्रकृतीना। तासा ज्येष्ठमुत्कृष्टं स्थितिसत्कर्म ज्येष्ठस्थितिवन्धसमं उत्कृष्टस्थितिवन्धप्रमाणं जवति। तासां हि उत्कृष्टस्थितिबन्धारंजेऽबाधाकालेऽपि प्राग्बद्धं दलिकं प्राप्यते। न च तासां प्रथमस्थितिरन्यत्र स्तिवुकसंक्रमेण संक्रामति, उदयवतीत्वात्। ततस्तासामुत्कृष्टस्थितिवन्धप्रमाणमुत्कृष्टं स्थितिसत्कर्म प्राप्यते। अनुदयबन्धपराणां समयोना ज्येष्ठा स्थितिर्ज्येष्ठमुत्कृष्टं स्थितिसत्कर्म। तत्रानुदये उदयाजावे पर उत्कृष्टः स्थितिवन्धो यासां ता अनुदयवन्धपराः निद्रापञ्चकनरकद्विकतिर्यग्द्विकौदारिकसप्तकैकेन्द्रियजातिसेवार्तसंहननातपस्थावररूपा विंशतिसंख्यास्तासां समयोना उत्कृष्टा स्थितिरुत्कृष्टं स्थितिसत्कर्म। तथाहि—एतासामुत्कृष्टस्थितिवन्धारंजे यद्यप्यबाधाकालेऽपि प्राग्बद्धं दलिकमस्ति तथापि प्रथमस्थितिं तासामुदयवतीषु मध्ये स्तिवुकसंक्रमेण संक्रमयति। तेन तया प्रथमस्थित्या समयमात्रया ऊना उत्कृष्टा स्थितिरुत्कृष्टं स्थितिसत्कर्म। अथोच्येत—कथं निद्रादीनामनुदये सति वन्धेनोत्कृष्टा स्थितिः प्राप्यते? उच्यते—उत्कृष्टो हि स्थितिवन्ध उत्कृष्टे संक्लेशे जवति। न चोत्कृष्टे संक्लेशे वर्तमानस्य निद्रापञ्चकोदयसंजवः। नरकद्विकस्य तिर्यञ्चो मनुष्या वा उत्कृष्टस्थि-

तिबन्धकाः । न च तेषां नरकद्विकोदयः संभवतीति । शेषकर्मणां तु देवा नारका वा यथायोगमुत्कृष्टस्थितिबन्धकाः । न च तेषु तेषामुदयो घटते ॥ १७ ॥

संकमओ दीहाणं सहालिगाए उ आगमो संतो । समऊणमणुदयाणं उभयासिं जट्ठिई तुल्ला ॥ १८ ॥

संकमओ त्ति–यासां प्रकृतीनां संक्रमत उत्कृष्टं स्थितिसत्कर्म प्राप्यते, न बन्धतः, उदयोऽपि च विद्यते तासां संक्रमतो दीर्घाणां संक्रमवशलब्धोत्कृष्टस्थितिकानां य आगमः संक्रमेण आवलिकाद्विकहीनोत्कृष्टस्थितिसमागमः स आवलिकया उदयावलिकया सह उत्कृष्टं स्थितिसत्कर्म। एतदुक्तं भवति–सातं वेदयमानः कश्चिदसातमुत्कृष्टस्थितिकं बध्नाति । तच्च बद्ध्वा सातं बद्धुं लग्नः। असातवेदनीयं च बन्धावलिकातीतं सत् आवलिकात उपरितनं सकलमपि आवलिकाद्विकहीनं त्रिंशत्सागरोपमकोटीकोटीप्रमाणं स्थितिसत्कर्म तस्मिन् सातवेदनीये वेद्यमाने बध्यमाने च उदयावलिकाया उपरिष्टात् संक्रमयति। ततस्तया उदयावलिकया सहितः संक्रमेणावलिकाद्विकहीनोत्कृष्टस्थितिसमागमः सातवेदनीयस्योत्कृष्टं स्थितिसत्कर्म । एवं नवनोकषायमनुजगतिप्रथमसंहननपञ्चकप्रथमसंस्थानपञ्चकप्रशस्तविहायोगतिस्थिरशुभसुभगसुस्वरादेययशःकीर्त्युच्चैर्गोत्राणामष्टाविंशतिप्रकृतीनामावलिकाद्विकहीनः स्वस्वसजातीयोत्कृष्टस्थितिसमागमः उदयावलिकया सहित उत्कृष्टं स्थितिसत्कर्म भावनीयं । सम्यक्त्वस्य पुनरन्तर्मुहूर्तोन उत्कृष्टस्थितिसमागम उदयावलिकया सहित उत्कृष्टं स्थितिसत्कर्म । तथाहि–मिथ्यात्वस्योत्कृष्टां स्थितिं बद्ध्वा तत्रैव च मिथ्यात्वेऽन्तर्मुहूर्तं स्थित्वा ततः सम्यक्त्वं प्रतिपद्यते । तस्मिंश्च प्रतिपन्ने सति मिथ्यात्वस्योत्कृष्टां स्थितिं–आवलिकात उपरितनीं स्थितिं–तथापि संख्यया ऽन्तर्मुहूर्तोनसप्तति-

सागरोपमकोटीकोटीप्रमाणां सकलामपि सम्यक्त्वे उदयावलिकात उपरि संक्रमयति । ततोऽन्तर्मुहूर्तोन एवोत्कृष्टस्थितिसमागम उदयावलिकया सहितः सम्यक्त्वस्योत्कृष्टं स्थितिसत्कर्म । यासां पुनः प्रकृतीनां संक्रमत उत्कृष्टा स्थितिः प्राप्यते, न च संक्रमकाले उदयोऽस्ति, तासा संक्रमकालेऽनुदयानां तावदेव पूर्वोक्तं स्थितिसत्कर्म समयोनमवगन्तव्यं, आवलिकाद्विकहीनोत्कृष्टस्थितिसमागम आवलिकया सहितः समयोनस्तासामुत्कृष्टं स्थितिसत्कर्मेत्यर्थः । तथाहि–कश्चिन्मनुष्य उत्कृष्टसंक्लेशवशादुत्कृष्टां नरकगतिस्थितिं बद्ध्वा परिणामपरावर्तनेन देवगतिं बद्धुमारब्धवान् । तस्यां च देवगतौ बध्यमानायामावलिकाया उपरि नरकस्थितिं बन्धावलिकातीतां उदयावलिकाया उपरितनीं सकलामपि विंशतिसागरोपमकोटीकोटीप्रमाणां संक्रमयति । प्रथमा च स्थितिः समयमात्रा देवगतेः सत्का मनुजगतौ वेद्यमानायां स्तिवुकसंक्रमेण संक्रामति । ततस्तया समयमात्रया स्थित्या ऊन आवलिकयाऽभ्यधिक आवलिकाद्विकहीनोत्कृष्टस्थितिसमागमो देवगतेरुत्कृष्टं स्थितिसत्कर्म । एवं द्वित्रिचतुरिन्द्रियजात्याहारकसप्तकमनुजानुपूर्वीदेवानुपूर्वीसूक्ष्मापर्याप्तसाधारणतीर्थंकराख्यानामपि षोडशप्रकृतीनां यथोक्तमानमुत्कृष्टं स्थितिसत्कर्म भावनीयं । सम्यङ्मिथ्यात्वस्य पुनरन्तर्मुहूर्तोन उत्कृष्टस्थितिसमागम आवलिकयाऽभ्यधिकसमयोन उत्कृष्टं स्थितिसत्कर्म वाच्यं । तच्च सम्यक्त्वोक्तभावनानुसारेण भावनीयं । 'उभयासिं जट्ठिई तुल्ल त्ति' उभयीषामुदयवतीनामनुदयवतीनां च प्रकृतीनां संक्रमोत्कृष्टस्थितीनां संक्रमकाले यत्स्थितिः सर्वा स्थितिस्तुल्या । यतोऽनुदयवतीनामपि तदानीं प्रथमस्थितिः स्तिवुकसंक्रमेणोदयवतीषु संक्रम्यमाणापि दलिकरहिता विद्यते एव । न हि कालः संक्रमयितुं शक्यते, किं तु तत्स्थं दलिकमेव । ततः प्रथमस्थितिगतदलिकसं-

क्रान्तावपि दलिकरहिता प्रथमा स्थितिः तदानीं विद्यत एवेति कृत्वा उभयीषामपि यत्स्थितिः तुल्या । यश्च यासां प्रकृतीनां उत्कृष्टां स्थितिं बध्नाति, यश्च यासूत्कृष्टां स्थितिं संक्रमयति, स तासामुत्कृष्टस्थितिसत्कर्मस्वामी ॥ १८ ॥

तदेवमुक्तमुत्कृष्टस्थितिसत्कर्मस्वामित्वं, संप्रति जघन्यस्थितिसत्कर्मस्वामित्वमाह–

संजलणतिगे सत्तसु य नोकसाएसु संकमजहन्नो। सेसाण ठिई एगा दुसमयकाला अणुदयाणं ॥१९॥

संजलणतिगे त्ति–संज्वलनत्रिकस्य क्रोधमानमायारूपस्य सप्तानां च नोकषायाणां पुरुषवेदहास्यादिषट्करूपाणां जघन्यस्थितिसत्कर्म जघन्यस्थितिसंक्रमो वेदितव्यः । एता हि प्रकृतयो बन्धे उदये च व्यवच्छिन्ने सति अन्यत्र संक्रमेण क्षयं नीयन्ते, तेन कारणेन एतासां य एव चरमसंक्रमः स एव जघन्यं स्थितिसत्कर्म । उक्तं च–"हासाइपुरिसकोहादि तिन्नि संजलण जेण बंधुदये । वोच्छिन्ने संकमइ तेण इहं संकमो चरिमो ॥ १ ॥" जघन्यं स्थितिसत्कर्मेति संबन्धः । शेषाणां पुनरुदयवतीनां ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयवेदकसम्यक्त्वसंज्वलनलोभायुश्चतुष्टयनपुंसकवेदस्त्रीवेदसातासातवेदनीयोच्चैर्गोत्रमनुजगतिपञ्चेन्द्रियजातित्रसबादरपर्याप्तसुभगादेययशःकीर्तितीर्थकरान्तरायपञ्चकरूपाणां प्रकृतीनां चतुस्त्रिंशत्संख्याना स्वस्वक्षयपर्यवसानसमये या एका समयमात्रा स्थितिः सा जघन्यं स्थितिसत्कर्म । अनुदयवतीनां पुनः प्रकृतीनां स्वस्वक्षयोपान्त्यसमये या स्वरूपापेक्षया समयमात्रा स्थितिरन्यथा तु द्विसमयमात्रकाला, सा जघन्यं स्थितिसत्कर्म । अनुदयवतीनां हि चरमसमये स्तिबुकसंक्रमेणोदयवतीषु प्रकृतिषु मध्ये प्रक्षिपति । तत्स्वरूपेण चानुभवति । तेन चरमसमये तासां दलिकं स्वरूपेण न प्राप्यते, किं तु पररूपेण । अत उक्तं 'उपान्त्यसमये स्वरूपापेक्षया समयमात्रा

अन्यथा तु द्विसमयमात्रकालेति । संप्रति सामान्येन सर्वकर्मणां जघन्यस्थितिसत्कर्मस्वामी प्रतिपाद्यते—तत्रानुबन्धिनां दर्शनमोहनीयत्रिकस्य चाविरतादिरप्रमत्तपर्यन्तो यथासंभवं जघन्यस्थितिसत्कर्मस्वामी । नारकतिर्यग्देवायुषां नारकतिर्यग्देवाः स्वस्वभवचरमसमये वर्तमानाः । कषायाष्टकस्त्यानर्द्धित्रिकनामत्रयोदशकनवनोकषायसंज्वलनत्रिकरूपाणां षट्त्रिंशत्प्रकृतीनामनिवृत्तिबादरसंपरायः । संज्वलनलोभस्य सूक्ष्मसंपरायः । ज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकाना क्षीणकषायः, शेषाणां पञ्चनवतिसंख्यानामयोगिकेवली जघन्यस्थितिसत्कर्मस्वामी ॥ १९ ॥

तदेवमुक्तं जघन्यस्थितिसत्कर्मस्वामित्वं । संप्रति स्थितिभेदप्ररूपणार्थमाह—

ठिइसंतट्ठाणाइं नियगुक्कस्सा हि थावरजहन्नं । नेरंतरेण हेट्ठा खवणाइसु संतराइं पि ॥ २० ॥

ठिइसंतट्ठाणाइं त्ति—सर्वेषां कर्मणां स्वकीयात् स्वकीयात् उत्कृष्टात् स्थितिस्थानात् समयमात्रादारभ्याधस्तात्तावदवतरीतव्यं यावत् स्थावरजघन्यं एकेन्द्रियप्रायोग्यं जघन्यं स्थितिसत्कर्म । एतावता स्थितिकण्डके यावन्तः समयास्तावन्ति स्थितिस्थानानि नानाजीवापेक्षया निरन्तरेण नैरन्तर्येण लभ्यन्ते । तद्यथा—उत्कृष्टा स्थितिरेकं स्थितिस्थानं । समयोना उत्कृष्टा स्थितिर्द्वितीयं स्थितिस्थानं । द्विसमयोना उत्कृष्टा स्थितिस्तृतीयं स्थितिस्थानं । एवं तावद्वाच्यं यावदेकेन्द्रियप्रायोग्यं जघन्यं स्थितिसत्कर्म । एकेन्द्रियप्रायोग्याच्च जघन्यस्थितिसत्कर्मणोऽधस्तात् क्षपणादिषु क्षपणे उद्वलने च सान्तराणि स्थितिस्थानानि लभ्यन्ते । अपिशब्दान्निरन्तराणि च । कथमिति चेदुच्यते—एकेन्द्रियप्रायोग्यजघन्यस्थितिसत्कर्मण उपरितनाग्रिमभागात्पल्योपमासंख्येयभागमात्रं स्थितिखण्डं खण्डयितुमारभते । खण्डनारम्भप्रथमसमयादारभ्य य

समये समयेऽधस्तादुदयवतीनामनुभावेनानुदयवतीनां स्तिबुकसंक्रमेण समयमात्रा समयमात्रा स्थितिः क्षीयते । ततः प्रतिसमयं स्थितिविशेषा लभ्यन्ते । तद्यथा—तत्स्थावरप्रायोग्यं जघन्यं स्थितिसत्कर्म प्रथमसमयेऽतिक्रान्ते समयहीनं द्वितीये समयेऽतिक्रान्ते द्विसमयहीनं । तृतीये समयेऽतिक्रान्ते त्रिसमयहीनमित्यादि । अन्तर्मुहूर्तेन च कालेन तत् स्थितिखण्डं खण्डयति । तत एतावती स्थितिर्युगपदेव त्रुटितेति कृत्वाऽन्तर्मुहूर्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि लभ्यन्ते । ततः पुनरपि द्वितीयं पल्योपमासंख्येयभागमात्रमन्तर्मुहूर्तमात्रेण खण्डयति । तत्रापि प्रतिसमयमधः समयमात्रसमयमात्रस्थितिक्षयापेक्षया निरन्तराणि स्थितिस्थानानि पूर्वप्रकारेण लभ्यन्ते । द्वितीये च स्थितिखण्डे खण्डिते सति पुनरपि पल्योपमासंख्येयभागमात्रा स्थितिर्युगपदेव त्रुटितेति न भूयोऽप्यन्तर्मुहूर्तादूर्ध्वं निरन्तराणि स्थितिस्थानानि लभ्यन्ते । एवं तावद्वाच्यं यावदावलिका शेषा भवति । सापि चावलिका उदयवतीनामनुभवेनानुदयवतीनां स्तिबुकसंक्रमेण समये समये क्षयमुपयाति तावद्यावदेका स्थितिः । ततोऽमूनि आवलिकामात्रसमयप्रमाणानि स्थितिस्थानानि निरन्तराणि लभ्यन्ते ॥२०॥

तदेवं स्थितिस्थानभेदोपदर्शनमपि कृतं । संप्रत्यनुभागसत्कर्मप्ररूपणार्थमाह—

संकमसममणुभागे नवरि जहन्नं तु देसघाईणं । छन्नोकसायवज्जाण एगठाणंमि देसहरं ॥ २१ ॥
मणनाणे दुठाणं देसहरं सामि गोयसम्मत्ते । आवरणविग्घसोलसग किट्टिवेएसु य सगंते ॥ २२ ॥

संकमसममित्यादि—अनुभागसंक्रमेण तुल्यमनुभागसत्कर्म वक्तव्यं । एतदुक्तं भवति—यथानुभागसंक्रमे स्थानप्रत्ययविपाकशुभाशुभत्वसाधनादित्वस्वामित्वानि प्राक् प्रतिपादितानि तथैवात्राप्यनुभागसत्कर्मणि वक्तव्यानि । नवरमयं

विशेषो यदुत देशघातिनीनां हास्यादिषट्कवर्जितानां मतिश्रुतावधिज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणसंज्वलनचतुष्टय-
वेदत्रिकान्तरायपञ्चकरूपाणामष्टादशप्रकृतीनां जघन्यानुभागसत्कर्मस्थानमधिकृत्य एकस्थानीयं, घातिसंज्ञामधिकृत्य देश-
हरं देशघाति वेदितव्यं । मनःपर्यायज्ञानावरणे पुनर्जघन्यमनुभागसत्कर्मस्थानमधिकृत्य द्विस्थानं, घातिसंज्ञामधिकृत्य
देशघाति । इहोत्कृष्टानुभागसत्कर्मस्वामिन उत्कृष्टानुभागसंक्रमस्वामिन एव वेदितव्याः । जघन्यानुभागसत्कर्मस्वामिनः
पुनराह—'सामि गोयेत्यादि' । सम्यक्त्वज्ञानावरणपञ्चकदर्शनावरणषट्कान्तरायपञ्चकरूपप्रकृतिपोरुशोककिट्टिरूपसंज्वलन-
लोभवेदत्रयाणां स्वस्वान्तिमसमये वर्तमाना जघन्यानुभागसत्कर्मस्वामिनो वेदितव्याः ॥ २१–२२ ॥

अत्रैव विशेषमाह—

मइसुय चक्खुअचक्खूण सुयसमत्तस्स जेट्ठलद्धिस्स । परमोहिस्सोहिदुगं मणनाणं विउलनाणस्स ॥२३॥

मइसुय त्ति—मतिज्ञानावरणश्रुतज्ञानावरणचक्षुर्दर्शनावरणाचक्षुर्दर्शनावरणानां श्रुतसमाप्तस्य सकलश्रुतपारगामिन-
श्चतुर्दशपूर्वधरस्येत्यर्थः । ज्येष्ठलब्धिकस्य उत्कृष्टायां श्रुतार्थलब्धौ वर्तमानस्य जघन्यमनुभागसत्कर्म । इदमत्र तात्पर्यम्—
मतिज्ञानावरणादीना चतसृणा प्रकृतीनामुत्कृष्टश्रुतार्थसंपन्नश्चतुर्दशपूर्वधरो जघन्यानुभागसत्कर्मस्वामी वेदितव्यः । तथा
परमावधिज्ञानेनावधिद्विकमवधिज्ञानावरणावधिदर्शनावरणरूपं जघन्यानुभागसत्कर्म भवति । एतदुक्तं भवति—अवधि-
ज्ञानावरणावधिदर्शनावरणयोर्जघन्यानुभागसत्कर्मस्वामी परमावधियुक्तो वेदितव्यः । तथा मनोज्ञानं मनःपर्यायज्ञाना-
वरणं जघन्यानुभागसत्कर्म विपुलमनःपर्यायज्ञानिनोऽवगन्तव्यं । स्वामित्वभावनाऽवधिज्ञानावरणवत् । लब्धिसहितस्य

हि प्रभूतोऽनुभागः प्रलयमुपयातीति परमोहिस्सेत्याद्युक्तं । शेषाणां तु प्रकृतीनां य एव जघन्यानुभागसंक्रमस्वामिनस्त एव जघन्यानुभागसत्कर्मणोऽपि द्रष्टव्याः ॥ २३ ॥

इदानीमनुभागसत्कर्मस्थानभेदप्ररूपणार्थमाह—

बंधहयहयहउप्पत्तिगाणि कमसो असंखगुणियाणि। उदयोदीरणवज्जाणि होंति अणुभागठाणाणि २४

बंध त्ति—इहानुभागस्थानानि त्रिधा, तद्यथा—बन्धोत्पत्तिकानि हतोत्पत्तिकानि हतहतोत्पत्तिकानि च। तत्र बन्धादुत्पत्तिर्येषां तानि बन्धोत्पत्तिकानि। तानि चासंख्येयलोकाकाशप्रदेशप्रमाणानि, तद्धेतूनामसंख्येयलोकाकाशप्रदेशप्रमाणत्वात्। तथा उद्वर्तनापवर्तनाकरणवशतो वृद्धिहानिभ्यामन्यथाऽन्यथा यान्यनुभागस्थानानि वैचित्र्यभाञ्जि भवन्ति, तानि हतोत्पत्तिकान्युच्यन्ते। हतात् घातात् पूर्वावस्थाविनाशरूपादुत्पत्तिर्येषां तानि हतोत्पत्तिकानि तानि च पूर्वेभ्योऽसंख्येयगुणानि, एकैकस्मिन् बन्धोत्पत्तिके स्थाने नानाजीवापेक्षया उद्वर्तनापवर्तनाभ्यामसंख्येयभेदकरणात्। यानि पुनः स्थितिघातेन रसघातेन चान्यथाऽन्यथाभवनादनुभागस्थानानि जायन्ते। तानि च हतहतोत्पत्तिकान्युच्यन्ते। हते उद्वर्तनापवर्तनाभ्यां घाते सति भूयोऽपि हतात् स्थितिघातेन रसघातेन वा घातादुत्पत्तिर्येषां तानि हतहतोत्पत्तिकानि। तानि चोद्वर्तनापवर्तनाजन्येभ्योऽसंख्येयगुणानि। संप्रत्यक्षरयोजना क्रियते—यानि उदयत उदीरणातश्च प्रतिसमयं क्षयसंभवात् अन्यथाऽन्यथानुभागस्थानानि जायन्ते, तानि वर्जयित्वा शेषाणि बन्धोत्पत्तिकादीनि अनुभागस्थानानि क्रमशोऽसंख्येयगुणानि वक्तव्यानि उदयोदीरणाजन्यानि कस्माद्वर्ज्यन्त इति चेदुच्यते—यस्मादुदयोदीरणयोः प्रवर्तमानयोर्नियमात् बन्धोद्वर्तनापव-

र्तनास्थितिघातरसघातजन्यानामन्यतमान्यवश्यं संभवन्ति, तत उदयोदीरणाजन्यानि तत्रैवान्तः प्रविशन्तीति न पृथक् क्रियन्ते ॥ २४ ॥

तदेवमुक्तमनुभागसत्कर्म । संप्रति प्रदेशसत्कर्म वक्तव्यं, तत्र चैतेऽर्थाधिकाराः, तद्यथा—भेदः साद्यनादिप्ररूपणा स्वामित्वं चेति । तत्र भेदः प्राग्वत् । संप्रति साद्यनादिप्ररूपणा कर्तव्या, सा च द्विधा—मूलप्रकृतिविषया उत्तरप्रकृतिविषया च । तत्र मूलप्रकृतिविषयां तां चिकीर्षुराह—

सत्तण्हं अजहण्णं तिविहं सेसा दुहा पएसम्मि । मूलपगईसु आउस्सु साई अधुवा य सव्वे वि ॥ २५ ॥

सत्तण्हंति—आयुर्वर्जानां सप्तानां मूलप्रकृतीनामजघन्यं प्रदेशसत्कर्म त्रिविधं त्रिप्रकारं, तद्यथा—अनादि ध्रुवमध्रुवं च । तत्र क्षपितकर्मांशस्य आयुर्वर्जानां सप्तानां कर्मणां स्वस्वक्षयावसरे चरमस्थितौ वर्तमानस्य जघन्यं प्रदेशसत्कर्म । तच्च साद्यध्रुवं । ततोऽन्यत्सर्वमजघन्यं, तच्चानादि, सदैव सद्भावात् । ध्रुवाध्रुवताऽभव्यभव्यापेक्षया । 'सेसा दुह त्ति' शेषा विकल्पा उत्कृष्टानुत्कृष्टजघन्यरूपा द्विधा द्विप्रकाराः, तद्यथा—सादयोऽध्रुवाश्च । तत्रोत्कृष्टप्रदेशसत्कर्म गुणितकर्मांशस्य मिथ्यादृष्टेः सप्तमपृथिव्यां वर्तमानस्य प्राप्यते । शेषकालं तु तस्याप्यनुत्कृष्टं । ततो द्वे अपि साद्यध्रुवे । जघन्यं तु भावितमेव । तथा आयुषः सर्वेऽपि विकल्पा उत्कृष्टानुत्कृष्टजघन्याजघन्यरूपाः सादयोऽध्रुवाश्च, अध्रुवसत्कर्मत्वात् २५

संप्रत्युत्तरप्रकृतीरधिकृत्य साद्यनादिप्ररूपणां चिकीर्षुराह—

बायालाणुक्कस्सं चउवीससया जहन्न चउतिविहं । होइह छण्ह चउध्धा अजहन्नमभासियं दुविहं ॥२६॥

वायाल त्ति—सातवेदनीयसंज्वलनचतुष्टयपुरुषवेदपञ्चेन्द्रियजातितैजससप्तकप्रथमसंस्थानप्रथमसंहननशुभवर्णाद्येकादशकागुरुलघुपराघातोच्छ्वासप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरशुभसुभगसुस्वरादेययशःकीर्तिनिर्माणरूपाणां द्विचत्वारिंशत्प्रकृतीनामनुत्कृष्टं प्रदेशसत्कर्म चतुर्विधं । तद्यथा—साद्यनादि ध्रुवमध्रुवं च । तद्यथा—वज्रर्षभनाराचवर्जानां शेषाणामेकचत्वारिंशत्प्रकृतीनां क्षपकश्रेण्यां स्वस्वबन्धान्तसमये गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्म भवति, तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं । ततोऽन्यत्सर्वमनुत्कृष्टं । तदपि च द्वितीये समये भवत्सादि । तत्स्थानमप्राप्तस्य पुनरनादि, ध्रुवाध्रुवे पूर्ववत् । वज्रर्षभनाराचसंहननस्य तु सप्तमपृथिव्यां सम्यग्दृष्टेर्नारकस्य मिथ्यात्वं गन्तुकामस्योत्कृष्टं प्रदेशसत्कर्म तच्च साद्यध्रुवं, ततोऽन्यदनुत्कृष्टं, तदपि च द्वितीये समये भवत् सादि । तत्स्थानमप्राप्तस्य पुनरनादि । ध्रुवाध्रुवे पूर्ववत् । अनन्तानुबन्धियशःकीर्तिसंज्वलनलोभवर्जितानां चतुर्विंशत्यधिकशतसंख्यानां ध्रुवसत्कर्मप्रकृतीनामजघन्यं प्रदेशसत्कर्म त्रिविधं । तद्यथा—अनादि ध्रुवमध्रुवं च । तथाहि—एतासां क्षपितकर्मांशस्य स्वस्वक्षयचरमसमये जघन्यं प्रदेशसत्कर्म, तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं च । ततोऽन्यदजघन्यं, तच्चानादि, सदैव सद्भावात् । ध्रुवाध्रुवता पूर्ववत् । 'चउतिविहंति' यथासंख्येन योजनीयं, द्विचत्वारिंशत्प्रकृतीनामनुत्कृष्टं चतुर्विधं, ध्रुवसत्कर्मणां चाजघन्यं त्रिविधमिति । तथाऽनन्तानुबन्धिचतुष्टयसंज्वलनलोभयशःकीर्तिरूपाणां षण्णां प्रकृतीनामजघन्यं प्रदेशसत्कर्म चतुर्विधं । तद्यथा—साद्यनादि ध्रुवमध्रुवं च । तथाहि—अनन्तानुबन्धिनामुद्वलके क्षपितकर्मांशे यदा शेषीभूता एका स्थितिर्भ-

वति तदा जघन्यं प्रदेशसत्कर्म। तच्चैकसामयिकमिति कृत्वा साद्यध्रुवं च। ततोऽन्यत्सर्वमजघन्यं। तच्चोद्वलितानां
मिथ्यात्वप्रत्ययेन भूयोऽपि बध्यमानानां सादि। तत्स्थानमप्राप्तस्य पुनरनादि। ध्रुवाध्रुवे पूर्ववत्। यशःकीर्तिसं-
ज्वलनलोभयोः पुनः क्षपितकर्मांशस्य क्षपणायोद्यतस्य यथाप्रवृत्तिकरणस्यान्तिमसमये जघन्यं प्रदेशसत्कर्म। तच्चै-
कसामयिकमिति कृत्वा साद्यध्रुवं च। ततोऽन्यत्सर्वमजघन्यं। तदपि चानिवृत्तिकरणप्रथमसमये गुणसंक्रमेण प्रभूतस्य
दलिकस्य प्राप्यमाणत्वात् अजघन्य भवत् सादि, तत्स्थानमप्राप्तस्य पुनरनादि। ध्रुवाध्रुवता पूर्ववत्। 'अभासियं उ
विहं ति' अभाषितं अनुक्तं सर्वासां प्रकृतीनां द्विविधं द्विप्रकारमवगन्तव्यं। तद्यथा— साद्यध्रुवं च। तत्र द्विचत्वा-
रिंशत्प्रकृतीनामभाषितं जघन्यमजघन्यमुत्कृष्टं च। तत्रोत्कृष्टं द्विप्रकारं भावितमेव। जघन्याजघन्यता च वक्ष्यमाणं स्वा-
मित्वमवलोक्य स्वयमेव भावनीया। ध्रुवसत्कर्मणां च चतुर्विंशतिशतसंख्यानामभाषितमुत्कृष्टमनुत्कृष्टं जघन्यं च। तत्र ज-
घन्यं भावितमेव। उत्कृष्टानुत्कृष्टे मिथ्यादृष्टौ गुणितकर्मांशे प्राप्येते। ततो द्वे अपि साद्यध्रुवे। एवमनन्तानुबन्धिसंज्व-
लनलोभयशःकीर्तीनामपि उत्कृष्टानुत्कृष्टे भावनीये। जघन्यं तु भावितमेव। शेषाणां चाध्रुवसत्कर्मणां चत्वारोऽपि वि-
कल्पाः साद्यध्रुवा अध्रुवसत्कर्मत्वादवसेयाः ॥ २६ ॥

तदेवं कृता साद्यनादिप्ररूपणा। संप्रति स्वामित्वं वक्तव्यं। तच्च द्विधा—उत्कृष्टप्रदेशसत्कर्मस्वामित्वं जघन्यप्रदे-
शसत्कर्मस्वामित्वं च। तत्रोत्कृष्टप्रदेशसत्कर्मस्वामित्वमाह—

संपुन्नगुणियकम्मो पएसउक्कस्ससंतसामी उ। तस्सेव उ उप्पिविणिग्गयस्स कासिंचि वन्नेहिं ॥ २७ ॥

संपुन्न त्ति— उत्कृष्टप्रदेशसत्कर्मस्वामी संपूर्णगुणितकर्मांशः सप्तमपृथिव्यां नारकश्चरमसमये वर्तमानः प्रायः सर्वासामपि प्रकृतीनामवगन्तव्यः । कासांचित्पुनः प्रकृतीनां तस्यैव संपूर्णगुणितकर्मांशस्य सप्तमपृथिव्या विनिर्गतस्योपरिष्टात् विशेषोऽस्ति । ततस्तमहं वर्णयामि वर्णयिष्यामि । वर्तमानसामीप्ये वर्तमानवद्वेति (श्रीम-३-४-७४) भविष्यति वर्तमाना ॥ २७ ॥

प्रतिज्ञातमेवाह—

मिच्छत्ते मीसम्मि य संपक्खित्तम्मि मीससुद्धाणं । वरिसवरस्स उ ईसाणगस्स चरमम्मि समयम्मि ॥२८॥

मिच्छत्ते त्ति— स प्रागभिहितस्वरूपो गुणितकर्मांशः सप्तमपृथिव्या उध्धृत्य तिर्यक्षूत्पन्नः, तत्राप्यन्तर्मुहूर्तं स्थित्वा मनुष्येषु मध्ये समुत्पन्नः, तत्र सम्यक्त्वं प्राप्य क्षपकक्षपणाय शीघ्रमभ्युद्यतः । ततो यस्मिन् समये मिथ्यात्वं सम्यङ्मिथ्यात्वे सर्वसंक्रमेण प्रक्षिपति, तस्मिन्समये सम्यङ्मिथ्यात्वस्योत्कृष्टं प्रदेशसत्कर्म । तदपि च सम्यङ्मिथ्यात्वं यस्मिन् समये सर्वसंक्रमेण सम्यक्त्वे प्रक्षिपति, तस्मिन् समये सम्यक्त्वस्योत्कृष्टं प्रदेशसत्कर्म । अक्षरयोजना त्वियम्— मिथ्यात्वे मिश्रे च यथासंख्यं मिश्रे सम्यक्त्वे च प्रक्षिप्ते सति तयोर्मिश्रशुद्धयोः मिश्रसम्यक्त्वयोरुत्कृष्टं प्रदेशसत्कर्म भवति । तथा स एव गुणितकर्मांशो नारकस्तिर्यग्भूत्वा कश्चिदीशानदेवो जातः । सोऽपि च तत्रातिसंक्लिष्टो भूत्वा भूयो भूयो नपुंसकवेदं बध्नाति । तदानीं च तस्य स्वभवान्तसमये वर्तमानस्य वर्षवरस्य नपुंसकवेदस्योत्कृष्टं प्रदेशसत्कर्म ॥२८॥

ईसाणे पूरित्ता नपुंसगं तो असंखवासासु । पल्लासंखियभागेण पूरिए इत्थिवेयस्स ॥ २९ ॥

ईसाणे त्ति— ईशानदेवलोके उक्तप्रकारेण नपुंसकवेदमापूर्य नपुंसकवेदस्योत्कृष्टं प्रदेशसंचयं कृत्वा ततः संख्येयवर्षायुष्केषु मध्ये समुत्पद्य पुनरसंख्येयवर्षायुष्केषु मध्ये समुत्पन्नः । तत्र च तेन संक्लिष्टेन भूत्वा पल्योपमासंख्येयभागमात्रेण कालेन पूरिते स्त्रीवेदे बन्धेन नपुंसकवेददलिकसंक्रमेण च प्रभूतमापूरिते स्त्रीवेदे सति तदानीं तस्य स्त्रीवेदस्योत्कृष्टं प्रदेशसत्कर्म भवति ॥ २९ ॥

पुरिसस्स पुरिससंकमपएसउक्कस्स सामिगस्सेव । इत्थी जं पुण समयं संपक्खित्ता हवइ ताहे ॥३०॥

पुरिसस्स त्ति—पुरुषस्य पुरुषवेदस्योत्कृष्टं प्रदेशसत्कर्म उत्कृष्टपुरुषवेदसंक्रमस्वामिन एव वेदितव्यं । एतदुक्तं भवति—य एवोत्कृष्टपुरुषवेदसंक्रमस्वामी स एवोत्कृष्टपुरुषवेदप्रदेशसत्कर्मस्वाम्यपि वेदितव्यः । नवरं यं समयं यस्मिन् समये स्त्रीवेदं पुरुषवेदे संप्रक्षेप्ता भवति संक्रमयति "ताहे" तदानीं पुरुषवेदस्योत्कृष्टप्रदेशसत्कर्मस्वामी ॥ ३० ॥

तस्सेव उ संजलणा पुरिसाइकमेण सवसंछोभे । चउरुवसमित्तु खिप्पं रागंते सायउच्चजसा ॥३१॥

तस्सेव त्ति—य एव पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी तस्यैव संज्वलनाश्चत्वारः क्रोधादयः क्रमेण पुरुषवेदादिसत्कदलिकसर्वसंछोभे उत्कृष्टप्रदेशसत्कर्मणो भवन्ति । इयमत्र भावना— य एव पुरुषवेदोत्कृष्टप्रदेशसत्कर्मस्वामी यदा पुरुषवेदं सर्वसंक्रमेण संज्वलनक्रोधे संक्रमयति तदा संज्वलनक्रोधोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनक्रोधं सर्वसंक्रमेण माने संक्रमयति तदा संज्वलनमानोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव संज्वलनमानं सर्वसंक्रमेण संज्वलनमायायां संक्रमयति तदा संज्वलनमायोत्कृष्टप्रदेशसत्कर्मस्वामी । स एव यदा संज्वलनमायां सर्वसंक्रमेण संज्वलनलोभे संक्रमयति

तदा संज्वलनलोभोत्कृष्टप्रदेशसत्कर्मस्वामी। तथा चतुरो वारान् मोहनीयमुपशमय्य गुणितकर्मांशः शीघ्रं क्षपणायोत्थितस्तस्य सूक्ष्मसंपरायगुणस्थानकचरमसमये वर्तमानस्य सातवेदनीयोच्चैर्गोत्रयशःकीर्तीनामुत्कृष्टं प्रदेशसत्कर्म। यस्मादेतासु प्रकृतिषु श्रेण्यामारूढः सन् गुणसंक्रमेण प्रभूतान्यशुभप्रकृतिदलिकानि संक्रमयति। ततः सूक्ष्मसंपरायचरमसमये एतासामुत्कृष्टं प्रदेशसत्कर्म प्राप्यते। उक्तं च— "चउरुवसामिय मोहं जसुच्चसायाण सुहुमखवगंते। जं असुभपगइदलियाण संकमो होइ एयासु ॥ ३१ ॥

देवनिरियाउगाणं जोगुक्कस्सेहिं जेठगद्धाए। बद्धाणि ताव जावं पढमे समए उदिन्नाणि ॥ ३२ ॥

देवनिरियाउगाणं ति—देवनारकायुषोरुत्कृष्टैर्योगैरुत्कृष्टया च बन्धाद्धया बद्धयोः सतोस्तावदुत्कृष्टं प्रदेशसत्कर्म प्राप्यते, यावत्प्रथमे समये उदीर्णे उदयप्राप्ते भवतः। किमुक्तं भवति—बन्धादारभ्योदयप्रथमसमयं यावद्देवनारकायुषोरुक्तप्रकारेण बद्धयोरुत्कृष्टं प्रदेशसत्कर्म भवति ॥ ३२ ॥

सेसाउगाणि नियगेसु चेव आगम्म पुव्वकोडीए। सायबहुलस्स अचिरा बंधंते जाव नोवट्टे ॥ ३३ ॥

सेसाउगाणि त्ति—शेषायुषी तिर्यङ्मनुष्यायुषी। 'पुव्वकोडीए त्ति' पूर्वकोट्योपलक्षिते पूर्वकोटिप्रमाणे।उत्कृष्टया बन्धाद्धया उत्कृष्टैर्योगैर्बद्धे। बध्ध्वा च निजकेषु भवेषु निजनिजभवे समागत्य। सातबहुलः सन् ते आयुषी यथायोगमनुभवति। सुखितस्य हि न भूयांस आयुःपुद्गलाः परिसटन्तीति कृत्वा सातग्रहणं कृतं।ततोऽचिरात् बन्धान्ते इति उत्पत्तिसमयादूर्ध्वमन्तर्मुहूर्तमात्रमेव स्थित्वा मर्तुकामो जातः सन् उत्कृष्टया बन्धाद्धया उत्कृष्टैश्च योगैरन्यत् पारभविकं समानजातीयं

मनुष्यो मनुष्यायुः तिर्यङ् च तिर्यगायुर्बध्नाति। ततो बन्धान्तसमये यावन्नाद्याप्यपवर्तयति तावत्तस्य सातबहुलस्य मनुष्यस्य सतो मनुष्यायुषः तिरश्चः (च) सतस्तिर्यगायुष उत्कृष्टं प्रदेशसत्कर्म भवति । यतस्तस्य तदानीं स्वभवायुः किञ्चिदूनं परभवायुश्च समानजातीयं परिपूर्णदलिकमस्तीति कृत्वा, बन्धान्तरं चायुर्बध्यमानं द्वितीये समयेऽपवर्तयिष्यति, तत उक्तं बन्धान्ते इति ॥ ३३ ॥

पूरित्तु पुव्वकोडीपुहुत्त नारगदुगस्स बंधंते । एवं पल्लतिगंते वेउव्विय सेसनवगम्मि ॥ ३४ ॥

पूरित्तु त्ति— पूर्वकोटिपृथक्त्वं पूर्वकोटिसप्तकं यावत् संक्लिष्टाध्यवसायवशेन नरकद्विकं नरकगतिनरकानुपूर्वीलक्षणं भूयो भूय आपूर्य बन्धेन निचितं कृत्वा नरकाभिमुखो बन्धान्तसमये नरकद्विकस्योत्कृष्टप्रदेशसत्कर्मस्वामी । तथा एवमनेनैव प्रकारेण पूर्वकोटिपृथक्त्वं यावत् भोगभूमिषु मध्ये पल्योपमत्रयं च यावद्विशुद्धाध्यवसायवशेन वैक्रियैकादशकात् नरकद्विकेऽपनीते शेषं यद्वैक्रियनवकं देवद्विकं वैक्रियसप्तकं चेत्यर्थः । तत् बन्धेनापूर्य देवत्वाभिमुखस्तासां देवद्विकवैक्रियसप्तकरूपाणां नवप्रकृतीनामुत्कृष्टप्रदेशसत्कर्मस्वामी ॥ ३४ ॥

तमतमगो सव्वलहुं सम्मत्तं लंभिय सव्वचिरमध्धं । पूरित्ता मणुयदुगं सवज्जरिसहं सबंधंते ॥ ३५ ॥

तमतमगो त्ति—तमस्तमगः सप्तमपृथ्वीनारकः । सर्वलघु अतिक्षिप्रं जन्मानन्तरमन्तर्मुहूर्ते गते सतीत्यर्थः । सम्यक्त्वं लब्ध्वा । ‘ सव्वचिरमद्धं ति ’ अतिदीर्घं कालं यावत् सम्यक्त्वमनुपालयन् । मनुष्यद्विकं वज्रर्षभनाराचसंहननं च बन्धे-

नापूर्य। यतोऽनन्तरसमये मिथ्यात्वं यास्यति तस्मिन् समये बन्धाद्धाचरमभूते तयोर्मनुष्यद्विकवज्रर्षभनाराच संहननयो-रुत्कृष्टं प्रदेशसत्कर्म भवति ॥ ३५ ॥

सम्मद्दिट्ठिधुवाणं बत्तीसुदहीसयं चउक्खुत्तो। उवसामइत्तु मोहं खवेंतगे नियगबंधंते ॥ ३६ ॥

सम्मद्दिट्ठि त्ति— याः प्रकृतयः सम्यग्दृष्टीनां बन्धमाश्रित्य ध्रुवाः पञ्चेन्द्रियजातिसमचतुरस्रसंस्थानपराघातोच्छ्वास-प्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकसुस्वरसुभगादेयरूपा द्वादश तासां द्वात्रिंशदधिकसागरोपमाणां शतं यावद्बन्धे-नोपचितानां चतुःकृत्वश्चतुरो वारान् मोहनीयं चोपशमय्य। मोहनीयं हि उपशमयन् प्रभूतानि दलिकानि गुणसंक्र-मेण संक्रमयतीति कृत्वा चतुःकृत्वो मोहोपशमग्रहणं। ततः क्षपणायोद्यतस्य निजबन्धव्यवच्छेदकाले उत्कृष्टं प्रदेशसत्कर्म भवति ॥ ३६ ॥

धुवबंधीण सुभाणं सुभथिराणं च नवरि सिग्घयरं। तित्थगराहारगतणू तेत्तीसुदही विरचिया य ॥३७॥

धुवबंधीण त्ति— याः शुभध्रुवबन्धिन्यः प्रकृतयस्तैजससप्तकशुभवर्णाद्येकादशकागुरुलघुनिर्माणरूपा विंशतिप्रकृतयः तासां शुभस्थिरयोश्च पूर्वोक्तेन प्रकारेणोत्कृष्टं प्रदेशसत्कर्म भावनीयं। नवरं चतुःकृत्वो मोहनीयोपशमनानन्तरं शीघ्र-तरं क्षपणायोद्यतस्येति वक्तव्यं।शेषं तथैव।तथा तीर्थकरनाम्नो गुणितकर्मांशेन देशोनपूर्वकोटिद्विकाधिकानि त्रयस्त्रिंशत्सा-गरोपमाणि यावद्बन्धेन पूरितस्य स्वबन्धान्तसमये उत्कृष्टं प्रदेशसत्कर्म। आहारकतनोराहारकसप्तकस्य तु विरचितस्य देशोनपूर्वकोटिं यावत् भूयो भूयो बन्धेनोपचितस्य स्वबन्धव्यवच्छेदसमये उत्कृष्टं प्रदेशसत्कर्म ॥ ३७ ॥

तुल्ला नपुंसवेएणेगिंदिए य थावरायवुज्जोवा। विगलसुहुमत्तियावि य नरतिरियचिरज्जिया होंति ॥३८॥

तुल्ल त्ति—नपुंसकवेदेन तुल्या एकेन्द्रियजातिस्थावरातपोद्योता वेदितव्याः। यथा नपुंसकवेदस्य ईशानदेवभवचरमसमये उत्कृष्टं प्रदेशसत्कर्मोक्तं तथा एतेषामपि द्रष्टव्यमित्यर्थः। विकलत्रिकं द्वित्रिचतुरिन्द्रियजातिरूपं, सूक्ष्मत्रिकं सूक्ष्मापर्याप्तसाधारणरूपं यदा पूर्वकोटिपृथक्त्वं यावत् तिर्यङ्मनुष्यभवैरर्जितं भवति तदा स्वबन्धान्तसमये तेषां तिर्यङ्मनुष्याणां तत् विकलत्रिकादिकमुत्कृष्टप्रदेशसत्कर्म भवति ॥ ३८ ॥

तदेवमुक्तमुत्कृष्टप्रदेशसत्कर्मस्वामित्वं। संप्रति जघन्यप्रदेशसत्कर्मस्वामित्वमाह—

खवियंसयम्मि पगयं जहन्नगे नियगसंतकम्मंते। खणसंजोइयसंजोयणाण चिरसम्मकालंते ॥३९॥

खविय त्ति—जघन्ये जघन्यप्रदेशसत्कर्मस्वामित्वे। प्रकृतमधिकारः। क्षपितकर्मांशेन। सूत्रे चात्र सप्तमी तृतीयार्थे वेदितव्या। 'नियगसंतकम्मंते त्ति' स्वस्वसत्ताचरमसमये। एवं तावत्सर्वकर्मणां सामान्येनोक्तं। संप्रति पुनर्येषां कर्मणा विशेषोऽस्ति तानि पृथगेवाह—'खणेत्यादि' इह क्षपितकर्मांशेन सम्यग्दृष्टिना सता अनन्तानुबन्धिन उद्वलिताः। ततः पुनरपि मिथ्यात्वं गतेनान्तर्मुहूर्तं कालं यावदनन्तानुबन्धिनो बद्धाः। ततो भूयोऽपि सम्यक्त्वं प्रतिपन्नः। तच्च सम्यक्त्वं द्वे षट्षष्टी सागरोपमाणां यावत् अनुपाल्य क्षपणार्थमभ्युद्यतस्तस्यानन्तानुबन्धिनं क्षपयतो यदा एका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयावस्थाना शेषीभवति तदा तेषां जघन्यं प्रदेशसत्कर्म ॥ ३९ ॥

उवसमाणीण उवलणा एगठिई दुसामइगा। दिठिदुगे बत्तीसे उदहिसए पालिए पच्छा ॥ ४० ॥

उव्वलमाणीण त्ति—उद्वल्यमानानां त्रयोविंशतिप्रकृतीनामुद्वलनकाले या एका स्थितिः स्वरूपापेक्षया समयमात्राव-स्थाना, अन्यथा तु द्विसमयमात्रावस्थाना, सा तासां जघन्यं प्रदेशसत्कर्म । एतच्च सामान्येनोक्तं । अत्रैव विशेषमाह—'दिद्विगेत्यादि' द्वात्रिंशदधिकं सागरोपमाणां शतं यावत् सम्यक्त्वमनुपाल्य पश्चान्मिथ्यात्वं गतो मन्दोद्वलनया च पल्योपमासंख्येयभागमात्रप्रमाणया सम्यक्त्वमिश्रे उद्वलयितुमारभते स्म । उद्वलयंश्च तद्दलिकं मिथ्यात्वे संक्रमयति । सर्वसंक्रमेण चावलिकाया उपरितनं सकलमपि दलिकं संक्रमितं । आवलिकागतं च दलिकं स्तिबुकसंक्रमेण संक्रमयति । संक्रमयतश्च यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयमात्रावस्थाना, तदा तयोः सम्यक्त्व-मिश्रयोर्जघन्यं प्रदेशसत्कर्म ॥ ४० ॥

अंतिमलोभजसाणं मोहं अणुवसमइत्तु खीणाणं(सेसाणं)। नेयं अहापवत्तकरणस्स चरमम्मि समयम्मि

अंतिम त्ति—अन्तिमलोभः संज्वलनलोभः । ततः संज्वलनलोभयशःकीर्त्योश्चतुरो वारान् मोहनीयमनुपशमय्य मोहस्योपशममकृत्वा उपशमश्रेणिमकृत्वेत्यर्थः । शेषाभिः क्षपितकर्मांशक्रियाभिः क्षीणयोर्यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म ज्ञेयं । मोहनीयोपशमे हि क्रियमाणे गुणसंक्रमेण प्रभूतं दलिकमवाप्यते, न च तेन प्रयोजनमिति कृत्वा मोहनीयोपशमनप्रतिषेधः ॥ ४१ ॥

वेउव्विक्कारसगं खणबंध गते उ नरय जिट्ठठिइं । उव्वट्टित्तु अबंधिय एगेंदिगए चिरुव्वलणे ॥ ४२ ॥

उव्विक्कारसगंति—नरकद्विकदेवद्विकवैक्रियसप्तकरूपं वैक्रियैकादशकं पूर्वं क्षपितकर्मांशेनोद्वलितं । ततो भूयोऽप्यन्त-

मुहूर्तं कालं यावद्बद्धं । ततो ज्येष्ठस्थितौ नरकेऽप्रतिष्ठानाभिधाने नरके जातः । तत्र च सता तेन तत् वैक्रियैकादशकं त्रयस्त्रिंशत्सागरोपमाणि यावत् विपाकतः संक्रमतश्च यथायोगमनुभूतं । ततो नरकादुद्धृत्य तिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नः । तत्र च वैक्रियैकादशकस्य भूयोऽपि बन्धो न कृतः, तथाविधाध्यवसायाभावात् । तत एकेन्द्रियो जातः । स च तद्वैक्रियैकादशकं चिरोद्वलनया उद्वलयितुं लग्नः । चिरोद्वलनया चोद्वलयतः सतो यदैका स्थितिः स्वरूपापेक्षया समयमात्रावस्थाना, अन्यथा तु द्विसमयमात्रावस्थाना शेषीभवति तदा तस्य वैक्रियैकादशकस्य जघन्यं प्रदेशसत्कर्म ॥ ४२ ॥

मणुयदुगुच्चागोए सुहुमखणबद्धगेसु सुहुमतसे । तित्थयराहारतणू अप्पद्धा बंधिया सुचिरं ॥ ४३ ॥

मणुय त्ति—मनुष्यद्विकमुच्चैर्गोत्रं च पूर्वं सूक्ष्मत्रसेन क्षपितकर्मांशेनोद्वलितं । ततः 'सुहुमखणबद्धगेसु त्ति' सूक्ष्मेण सूक्ष्मैकेन्द्रियेण पृथिव्यादिना सता क्षणमन्तर्मुहूर्तकालं यावत् भूयोऽपि बद्धं । ततः सूक्ष्मत्रसेषु तेजोवायुषु मध्ये समुत्पन्नः । तत्र च चिरोद्वलनया उद्वलयितुं लग्नः । उद्वलयतश्च यदा तेषामेका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा तयोर्मनुष्यद्विकोच्चैर्गोत्रयोः सूक्ष्मक्षणबद्धयोर्जघन्यं प्रदेशसत्कर्म । तथा तीर्थकरनाम 'अप्पद्धा बंधिय त्ति' अल्पं कालं चतुरशीतिवर्षसहस्राणि सातिरेकाणि यावद्बद्ध्वा केवली जातः । ततः 'सुचिरं ति' प्रभूतं कालं देशोनपूर्वकोटिरूपं यावत् केवलिपर्यायं परिपाल्यायोगिकेवलिनः सतः क्षपितकर्मांशस्य चरमसमये वर्तमानस्य तीर्थकरनाम्नो जघन्यं प्रदेशसत्कर्म। अन्ये तु ब्रुवते—तीर्थकरनाम्नः क्षपितकर्मांशेन तत्प्रायोग्यजघन्ययोगिना प्रथमसमये या लता बद्धा सा जघन्यं प्रदेशसत्कर्म । 'आहारतणु त्ति' आहारकतनूपलक्षितमाहारकसप्तकं । 'अप्पद्धा बंधिय त्ति' अल्पकालं

वङ्का मिथ्यात्वं गतः, ततः 'सुचिर त्ति' चिरोद्वलनया उद्वलयतः सतो यदा एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा तस्य जघन्यं प्रदेशसत्कर्म ॥ ४३ ॥

तदेवमुक्तं जघन्यप्रदेशसत्कर्मस्वामित्वं । संप्रति प्रदेशसत्कर्मस्थानप्ररूपणार्थं स्पर्धकप्ररूपणामाह—

चरमावलियपविट्ठा गुणसेढी जासिमत्थि न य उदओ। आवलिगासमयसमा तासिं खलु फड्डगाइं तु ॥४४॥

चरमावलिय त्ति—चरमा सर्वान्तिमा या क्षपणकाले आवलिका तां प्रविष्टा गुणश्रेणिर्यासां प्रकृतीनां अस्ति, न च उदयः तासां स्त्यानर्द्धित्रिकमिथ्यात्वाद्यद्वादशकषायनरकद्विकतिर्यग्द्विकपञ्चेन्द्रियजातिवर्जजातिचतुष्टयातपोद्योतस्थावरसूक्ष्मसाधारणरूपाणामेकोनत्रिंशत्संख्यानामावलिकायां यावन्तः समयास्तावन्ति स्पर्धकानि भवन्ति। खलुशब्दो वाक्यालंकारे । तुरेवकारार्थः । आवलिकासमयसमान्येवेत्यर्थः । इयमत्र भावना–अभव्यप्रायोग्यजघन्यप्रदेशसत्कर्मयुक्तस्त्रसेषु मध्ये समुत्पन्नः। तत्र च सर्वविरतिं देशविरतिं चानेकशो लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य भूयोऽप्येकेन्द्रियेषु मध्ये समुत्पन्नः। तत्र च पल्योपमासंख्येयभागमात्रं कालं यावत् स्थित्वा मनुष्येषु मध्ये समुत्पन्नः। तत्र च क्षपणायामभ्युद्यतः। तस्य चरमे स्थितिखण्डकेऽपगते सति चरमावलिकायां स्तिबुकसंक्रमेण क्षीयमाणायां यदा एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभवति तदा सर्वमजघन्यं यत् प्रदेशसत्कर्म तत् प्रथमं प्रदेशसत्कर्मस्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति अन्यत् द्वितीयं प्रदेशसत्कर्मस्थानं भवति । ततो द्वयोः परमाण्वोः प्रक्षिप्तयोरन्यत्तृतीयं प्रदेशसत्कर्मस्थानं। त्रिषु परमाणुषु प्रक्षिप्तेषु अन्यत्। एवमेकैकपरमाणुप्रक्षेपेण प्रदेशसत्कर्मस्थानानि नानाजीवापेक्ष-

याऽनन्तानि तावद्वाच्यानि यावत्तस्मिन्नेव चरमे स्थितिविशेषे गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति । अत ऊर्ध्वमन्यत्प्रदेशसत्कर्मस्थानं न प्राप्यते । तत इदमेकं स्पर्धकं । इदं तु चरमस्थितिमधिकृत्य । एवं द्वयोश्चरमस्थित्योर्द्वितीयं स्पर्धकं वक्तव्यं । तिसृषु च स्थितिषु तृतीयं । एवं तावद्वाच्यं यावत्समयोनावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति । तथा चरमस्थितिघातस्य चरमं प्रक्षेपमादिं कृत्वा पश्चानुपूर्व्या प्रदेशसत्कर्मस्थानानि यथोत्तरं वृद्धानि तावद्वक्तव्यानि यावदात्मीयमात्मीयमुत्कृष्टं प्रदेशसत्कर्म । तत एतावदेतदपि सकलस्थितिगतं यथासंभवमेकं स्पर्धकं विवक्ष्यते । तत एतेन स्पर्धकेन सहावलिकासमयप्रमाणानि स्पर्धकानि भवन्ति ॥ ४४ ॥

संजलणतिगे चेवं अहिगाणि य आलिगाए समएहिं । दुसमयहीणेहिं गुणाणि जोगठाणाणि कसिणाणि

संजलणतिगे त्ति—संज्वलनत्रिके क्रोधमानमायारूपे । एवं पूर्वोक्तेन प्रकारेण स्पर्धकानि वाच्यानि । इयमत्र भावना—क्रोधादीनां प्रथमस्थितिर्यावदावलिकाशेषा न भवति तावत् स्थितिघाते रसघातबन्धोदयोदीरणाः प्रवर्तन्ते । आवलिकाशेषायां तु प्रथमस्थितौ व्यवच्छिद्यन्ते । ततोऽनन्तरसमये समयोनावलिकागतं समयद्वयोनावलिकाद्विकबद्धं च सकृदस्ति, अन्यत् सर्वं क्षीणं । तत्र समयोनावलिकागतस्य दलिकस्य स्पर्धकभावना यथा प्राक् कृता तथात्रापि कर्तव्या । यच्च समयद्वयोनावलिकाद्विकबद्धं दलिकमस्ति तस्यान्यथा स्पर्धकभावना क्रियते, पूर्वप्रकारेणात्र स्पर्धकस्वरूपस्याप्राप्यमाणत्वात् । अथोच्येत कथं स्थितिघातरसघातबन्धोदयोदीरणाव्यवच्छेदानन्तरसमये समयद्वयोनावलिकाद्विकबद्धमेव दलिकमस्ति न शेषमिति ज्ञायते ? उच्यते—इह चरमसमयक्रोधादिवेदकेन यद्बद्धं दलिकं तद्बन्धावलिकातीतं आवलि-

कामात्रेण कालेन निरवशेषं संक्रमयति । तथा च सत्यावलिकाचरमसमये स्वरूपापेक्षयाऽकर्मी भवति । द्विचरमसमय-वेदकेन यद्बद्धं तदपि च बन्धावलिकायामतीतायामन्येनावलिकामात्रेण कालेन संक्रमयति । आवलिकायाश्चरमसमये अकर्मी भवति । एवं यत्कर्म यस्मिन् समये बद्धं तत्तस्मात्समयादारभ्य द्वितीयावलिकाचरमसमयेऽकर्मी भवति । तथा च सति बन्धाद्यभावप्रथमसमये समयद्वयोनावलिकाद्विकबद्धमेव सत्प्राप्यते, न शेषं । तथाहि—तत्त्वतोऽसंख्यातसमयात्मिकाप्यावलिका किलासत्कल्पनया चतुःसमयात्मिका कल्प्यते । ततो बन्धादिव्यवच्छेदचरमसमयादर्वाक् अष्टमे समये यद्बद्धं तद्बन्धावलिकायां चतुःसमयात्मिकायामतीतायां अन्यया चतुःसमयात्मिकया आवलिकया अन्यत्र संक्रम्यमाणं चरमसमये बन्धादिव्यवच्छेदसमयरूपे सर्वथा स्वरूपेण न प्राप्यते, अन्यत्र सर्वात्मना संक्रमितत्वात् । सप्तमे समये यद्बद्धं तच्चतुःसमयात्मिकायामावलिकायामतिक्रान्तायामन्यया चतुःसमयात्मिकया अन्यत्र संक्रम्यमाणं बन्धादिव्यवच्छेदानन्तरसमये स्वरूपेण न प्राप्यते, सर्वात्मनाऽन्यत्र संक्रमितत्वात् । शेषषष्ठादिसमयबद्धं तु प्राप्यते । ततो बन्धादौ व्यवच्छिन्ने सति अनन्तरसमये समयद्वयोनावलिकाद्विकबद्धमेव सत् प्राप्यते नान्यदिति । तत्र बन्धादिव्यवच्छेदसमये जघन्ययोगिना सता यद्बद्धं तस्य बन्धावलिकायामतीतायामन्यया आवलिकयाऽन्यत्र संक्रम्यमाणस्य चरमसमये यत् संक्रमयिष्यति न तावत्संक्रमयति तत् संज्वलनक्रोधस्य जघन्यं प्रदेशसत्कर्मस्थानं । एवं द्वितीययोगस्थानवर्तिना बन्धादिव्यवच्छेदसमये यद्बद्धं तस्यापि दलिकं चरमसमये द्वितीयं प्रदेशसत्कर्मस्थानं । एवं तावद्वाच्यं यावदुत्कृष्टयोगस्थानवर्तिना सता बन्धादिव्यवच्छेदसमये यद्बद्धं तस्य

दलिकं चरमसमये सर्वोत्कृष्टमन्तिमं प्रदेशसत्कर्मस्थानं । एवं जघन्यं योगस्थानमादिं कृत्वा यावन्ति योगस्थानानि भवन्ति तावन्ति प्रदेशसत्कर्मस्थानान्यपि चरमसमये प्राप्यन्ते, इदमेकं स्पर्धकं । एवं बन्धादिव्यवच्छेदद्विचरमसमये जघन्ययोगादिना यद्बध्यते तत्रापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भावनीयानि । केवलं स्थितिद्वयभावीनि तानि प्रतिपत्तव्यानि, बन्धादिव्यवच्छेदचरमसमये बद्धस्यापि दलिकस्य तदानीं द्विसमयस्थितिकस्य प्राप्यमाणत्वात् । इदं द्वितीयं स्पर्धकं । एवं बन्धादिव्यवच्छेदत्रिचरमसमये जघन्ययोगादिना यद्बध्यते तत्रापि द्वितीयावलिकाचरमसमये प्रागिव तावन्ति प्रदेशसत्कर्मस्थानानि भवन्ति । नवरं स्थितित्रयभावीनि तानि भावनीयानि, तदानीं बन्धादिव्यवच्छेदचरमसमयबद्धसत्कस्यापि दलिकस्य त्रिसमयस्थितिकस्य प्राप्यमाणत्वात् । इदं तृतीयं स्पर्धकं । एवं समयद्वयोनावलिकाद्विके यावन्तः समयास्तावन्ति स्पर्धकानि भवन्ति । तत आह—'अहिगाणि य आवलिगाए' इत्यादि । योगस्थानानि कृत्स्नानि समस्तानि समुदायैकरूपतया विवक्षितानि सकलयोगस्थानसमुदाय इत्यर्थः । आवलिकागतैः समयैः समयद्वयहीनैर्गुण्यन्ते । गुणिते सति यावन्तः सकलयोगस्थानसमुदायास्तावन्ति प्रथमस्थितौ व्यवच्छिन्नायामधिकानि स्पर्धकानि भवन्ति । तथाहि—बन्धादिव्यवच्छेदानन्तरसमये समयद्वयोनावलिकाद्विकसमयप्रमाणानि स्पर्धकानि प्राप्यन्ते । एतच्चानन्तरमेव भावितं । बन्धादिव्यवच्छेदादूर्ध्वं च प्रथमस्थितिरावलिकामात्रा तिष्ठति । ततस्तस्यामावलिकामात्रायां प्रथमस्थितौ संक्रमेण व्यवच्छिद्यमानायां परत आवलिकासमयप्रमाणानि स्पर्धकानि अन्यत्र संक्रमेण

व्यवच्छिद्यन्ते। अत एव च तानि पृथक् न गुण्यन्ते। ततस्तेषु व्यवच्छिन्नेषु प्रथमस्थितौ च व्यवच्छिन्नायां शेषाणि समयद्व-योनावलिकासमयप्रमाणान्येवाधिकानि प्राप्यन्ते, नान्यानीति ॥ ४५ ॥

वेएसु फड्डगडुगं अहिगा पुरिसस्स बे उ आवलिया। दुसमयहीणा गुणिया जोगट्ठाणेहिं कसिणेहिं॥४६॥

वेएसु त्ति—वेदेषु स्त्रीवेदपुरुषवेदनपुंसकवेदेषु प्रत्येकं द्वे द्वे स्पर्धके भवतः। कथमिति चेदुच्यते—कश्चिज्जन्तुरभवसिद्धिकप्रायोग्यजघन्यप्रदेशसत्कर्मा त्रसेषु मध्ये समुत्पन्नः। तत्र देशविरतिं सर्वविरतिं च बहुशो लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य द्वात्रिंशदधिकं च सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्याप्रतिपतितसम्यक्त्वो नपुंसकवेदेन क्षपकश्रेणिमारूढः। ततो नपुंसकवेदस्य प्रथमस्थितौ द्विचरमसमये वर्तमाने उपरितनस्थितिखण्डमन्यत्र संक्रमितं। तथा सति उपरितनी स्थितिः सर्वात्मना निर्लेपीकृता। ततः प्रथमस्थितौ चरमसमये सर्वजघन्यं यत् प्रदेशसत्कर्म तत् प्रथमं प्रदेशसत्कर्मस्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। परमाणुद्वयप्रक्षेपे च तृतीयं। एवं नानाजीवापेक्षया एकैकपरमाणुवृद्ध्या प्रदेशसत्कर्मस्थानानि अनन्तानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं। इदमेकं स्पर्धकं। ततो द्वितीयस्थितौ चरमखण्डे संक्रम्यमाणे चरमसमये पूर्वोक्तप्रकारेण सर्वजघन्यं यत् प्रदेशसत्कर्मस्थानं तत् आदि कृत्वा नानाजीवापेक्षया यथासंभवमुत्तरोत्तरवृद्ध्या निरन्तरप्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं। तानि द्वितीयं स्पर्धकं। अथवा यावत्प्रथमा स्थितिर्द्वितीया च स्थितिर्विद्यते तावदेकं स्पर्धकं। द्वितीयस्थितौ च क्षीणायां प्रथमस्थितौ शेषीभूतायां समयमात्रायां द्वितीयं स्पर्धकमिति।

॥ २१४ ॥

एवं प्रकारद्वयेन स्त्रीवेदस्यापि स्पर्धकद्वयं भावनीयं । पुरुषवेदस्य पुनः स्पर्धकद्वयमेवं भावनीयं—उदयचरमसमये जघन्यं प्रदेशसत्कर्म आदि कृत्वा नानाजीवापेक्षया एकैकपरमाणुवृद्ध्या निरन्तरं प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एतानि सर्वाण्यनन्तानि । एतान्येकं स्पर्धकं । उदयचरमसमये च द्वितीयस्थितौ चरमखंडे संक्रम्यमाणे सर्वजघन्यं प्रदेशसत्कर्मस्थानमादि कृत्वा प्रागिव द्वितीयं स्पर्धकं वाच्यं । किं च 'अहिगा पुरिसस्स त्ति' पुरुषवेदस्याधिकान्यपि स्पर्धकानि भवन्ति । कियन्ति भवन्तीति चेदुच्यते—'वे उ आवलिया' इत्यादि, अत्र द्वे आवलिके इत्यत्र तृतीयार्थे प्रथमा, 'जोगट्ठाणेहिं कसिणेहिं' इत्यत्र तु तृतीया प्रथमार्थे । ततोऽयमर्थः—कृत्स्नानि योगस्थानानि सकलयोगस्थानसमुदाय इत्यर्थः । द्वाभ्यामावलिकाभ्यां द्विसमयहीनाभ्यां आवलिकाद्विकसमयैर्द्विरूपहीनैरित्यर्थः । गुण्यन्ते, गुणिते च सति यावन्तः सकलयोगस्थानसमुदायास्तावन्ति स्पर्धकान्यधिकानि भवन्ति, समयद्वयहीनावलिकाद्विकसमयप्रमाणानि अधिकानि भवन्तीत्यर्थः । तथाहि—पुरुषवेदस्य बन्धोदयादिव्यवच्छेदे सति समयद्वयोनावलिकाद्विकबद्धं पुरुषवेदस्य दलिकं विद्यते । ततोऽवेदकस्य सतः संज्वलनत्रिकोक्तप्रकारेण योगस्थानापेक्षया समयद्वयहीनावलिकाद्विकसमयप्रमाणानि स्पर्धकानि वाच्यानि ॥ ४६ ॥

संप्रत्युक्तानां वक्ष्यमाणानां च स्पर्धकानां सामान्यरूपं लक्षणमाह—

सव्वजहन्नाढत्तं खंधुत्तरओ निरंतरं उप्पिं । एगं उव्वलमाणी लोभजसा नोकसायाणं ॥ ४७ ॥

सव्वजहन्न त्ति—सर्वजघन्यात् प्रदेशसत्कर्मस्थानादारभ्यमेकैकेन कर्मस्कन्धेनोत्तरतः पूर्वस्मात्पूर्वस्मादुत्तरोत्तरेण निरन्तरं

प्रदेशसत्कर्मस्थानजातं तावज्ज्ञेयं यावत् 'उप्पिं' उपरितनं सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। इयमत्र भावना—सर्वजघन्यप्रदेशसत्कर्मस्थानादारभ्य योगस्थानापेक्षया एकैकेन कर्मस्कन्धेन वृद्धानि प्रदेशसत्कर्मस्थानानि निरन्तराणि तावन्नेतव्यानि यावदुत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। एकैककर्मस्कन्धेनोत्तरत इति चोक्तं योगस्थानवशलब्धस्पर्धकापेक्षया, अन्यथा "चरमावलिय पविट्ठेत्यादौ" यानि स्पर्धकान्युक्तानि तेष्वेकैकेन प्रदेशेनैवोत्तरोत्तरा वृद्धिः प्राप्यते इति। तदेवमुक्तं सामान्येन लक्षणं स्पर्धकानां। संप्रत्युद्वल्यमानप्रकृतीनां स्पर्धकप्ररूपणार्थमाह—'एगं उव्वलमाणी' एकं स्पर्धकं उद्वल्यमानप्रकृतीनां त्रयोविंशतिसंख्यानां। तत्र सम्यक्त्वस्य भावना क्रियते—अभव्यप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये समुत्पन्नस्तत्र सम्यक्त्वं देशविरतिं चानेकवारान् लब्ध्वा चतुरश्च वारान् मोहनीयमुपशमय्य द्वात्रिंशदधिकं च सागरोपमाणां शतं यावत्सम्यक्त्वमनुपाल्य मिथ्यात्वं गतः, ततश्चिरोद्वलनया सम्यक्त्वमुद्वलयतो यदा चरमखण्डं संक्रान्तं एका च शेषा उदयावलिका तिष्ठति, तामपि स्तिबुकसंक्रमेण मिथ्यात्वे संक्रमयति। संक्रमयतश्च या एका स्थितिर्द्विसमयमात्रावस्थाना शेषीभूता यदावतिष्ठते तदा सम्यक्त्वस्य सा जघन्यं प्रदेशसत्कर्मस्थानं। ततो नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या प्रदेशसत्कर्मस्थानानि तावन्नेतव्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं भवति। इदमेकं स्पर्धकं। एवं सम्यग्मिथ्यात्वस्यापि। एवमेव च शेषाणामप्युद्वलनयोग्यानां वैक्रियैकादशकाहारकसप्तकोच्चैर्गोत्रमनुष्यद्विकरूपाणां प्रकृतीनां। नवरं तासां द्वात्रिंशदधिकसागरोपमशतप्रमाणः सम्यक्त्वकालो मूलत एव न वक्तव्यः। 'लोभजसेत्यादि' संज्वलनलोभयशःकीर्त्योरपि एकं स्पर्धकं। तथाहि—स एवाभवसिद्धिकप्रायोग्यजघन्यस्थितिसत्कर्मा त्रसेषु मध्ये

समुत्पन्नः । तत्र च चतुःकृत्वो मोहोपशममन्तरेण शेषाभिः क्षपितकर्मांशक्रियाभिः कर्मदलिकं प्रभूतं क्षपयित्वा चिरकालं च संयममनुपाल्य क्षपणायोत्थितः । तस्य यथाप्रवृत्तकरणचरमसमये जघन्यं प्रदेशसत्कर्म । ततस्तस्मादारभ्य नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्मस्थानं । एवमेकं संज्वलनलोभयशःकीर्त्योः स्पर्धकं । षण्णामपि च नोकषायाणां प्रत्येकमेकैकं स्पर्धकं । तदपि चैवं—स एवाभवसिद्धिकप्रायोग्यजघन्यप्रदेशसत्कर्मा त्रसेषु मध्ये समुत्पन्नः । तत्र सम्यक्त्वं देशविरतिं चानेकशो लब्ध्वा चतुरश्च वारान्मोहनीयमुपशमय्य स्त्रीवेदनपुंसकवेदौ च भूयो भूयो बन्धेन हास्यादिदलिकसंक्रमेण च प्रभूतमापूर्य मनुष्यो जातस्तत्र चिरकालं संयममनुपाल्य क्षपणायोत्थितः । तस्य चरमखंडचरमसमये यद्विद्यमानं प्रत्येकं षण्णां नोकषायाणां प्रदेशसत्कर्म तत्सर्वं जघन्यं । ततस्तस्मादारभ्य नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि अनन्तानि तावद्वाच्यानि यावद्गुणितकर्मांशस्योत्कृष्टं प्रदेशसत्कर्म । एवमेकं षण्णां नोकषायाणां प्रत्येकं स्पर्धकं ॥ ४७ ॥

संप्रति मोहनीयवर्जानां घातिकर्मणां स्पर्धकनिरूपणार्थमाह—

ठिइखंडग विच्छेया खीणकसायस्स सेसकालसमा । एगहिया घाईणं निद्दापयलाण हिच्चेकं ॥ ४८ ॥

ठिइखंडग त्ति—क्षीणकषायस्य स्थितिखंडव्यवच्छेदात् स्थितिघातव्यवच्छेदात् परतो यः शेषकालस्तिष्ठति तत्समानि शेषकालसमयसमानि स्पर्धकानि एकाधिकानि घातिकर्मणां भवन्ति । निद्राप्रचलयोस्तु हित्वा परित्यज्य एकं चरमं स्थितिगतं स्पर्धकं, शेषाणि वाच्यानि, निद्राप्रचलयोर्हि उदयाभावात् स्वस्वरूपेण चरमसमये दलिकं न प्राप्यते, किं-

तु परप्रकृतिरूपेण, तेन तयोरेकं स्पर्धकं चरमस्थितिगतं परित्यज्यते। स्पर्धकानां चेयं भावना—क्षीणकषायाद्धायाः संख्येयेषु भागेषु गतेषु सत्सु एकस्मिंश्च संख्येयतमेऽन्तर्मुहूर्तप्रमाणे भागेऽवतिष्ठमाने ज्ञानावरणपञ्चकदर्शनावरणचतुष्टयान्तरायपञ्चकानां स्थितिसत्कर्म सर्वापवर्तनयाऽपवर्त्य क्षीणकषायाद्धासमं करोति। निद्राप्रचलयोस्त्वेकसमयहीनं। अत्र च कारणं प्रागेवोक्तं। तदानीं च स्थितिघातादयो निवृत्ताः। यदपि च क्षीणकषायाद्धासमं स्थितिसत्कर्म कृतं, तदपि च क्रमेण यथासंभवमुदयोदीरणाभ्यां क्षयमुपगच्छत्तावद्वक्तव्यं यावदेका स्थितिः शेषीभवति। तस्यां च क्षपितकर्मांशस्य सर्वजघन्यं यत्प्रदेशसत्कर्म तत्प्रथमं स्थानं। तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। एवमेकैकपरमाणुवृद्ध्या निरन्तराणि प्रदेशसत्कर्मस्थानानि तावद्वाच्यानि यावद्गुणितकर्मांशस्य सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं। इदमेकं स्पर्धकं। द्वयोश्च स्थित्योः शेषीभूतयोरुक्तप्रकारेण द्वितीयं स्पर्धकं। तिसृषु स्थितिषु शेषीभूतासु तृतीयं स्पर्धकं। एवं क्षीणकषायाद्धासमीकृते सत्कर्मणि यावन्तः स्थितिविशेषास्तावन्ति स्पर्धकानि वाच्यानि। चरमस्य च स्थितिघातस्य चरमं प्रक्षेपमादौ कृत्वा पश्चानुपूर्व्या प्रदेशसत्कर्मस्थानानि यथोत्तरं वृद्धानि तावद्वक्तव्यानि यावदात्मीयमात्मीयं सर्वोत्कृष्टं प्रदेशसत्कर्म तावदेतदपि सकलनिजनिजस्थितिगतं यथासंभवमेकैकं स्पर्धकं द्रष्टव्यं। ततस्तेनाधिकानि स्थितिघातव्यवच्छेदात् परतः क्षीणकषायाद्धासमयसमानि स्पर्धकानि भवन्ति। निद्राप्रचलयोस्तु द्विचरमस्थितिमधिकृत्य स्पर्धकानि वाच्यानि, चरमसमये तद्दलिकस्याप्राप्यमाणत्वात्। तत एकेन हीनानि तस्य स्पर्धकानि द्रष्टव्यानि ॥ ४८ ॥

सेलेसिसंतिगाणं उदयवईणं तु तेण कालेणं। तुल्ला णेगहियाइं सेसाणं एगऊणाइं ॥ ४९ ॥

सेलेसि त्ति—शैलेशी अयोग्यवस्था तस्या सत्ता यासां प्रकृतीनां ताः शैलेशीसत्ताकाः । ताश्च द्विधा, तद्यथा—उदयवत्योऽनुदयवत्यश्च । तत्रोदयवत्यो मनुष्यगतिमनुष्यायुःपञ्चेन्द्रियजातित्रससुभगादेयपर्याप्तबादरयशःकीर्तितीर्थंकरोच्चैर्गोत्रसातासातान्यतरवेदनीयरूपा द्वादश । तासां प्रकृतीनां तेनायोगिकालेन तुल्यानि स्पर्धकानि एकैकेनाधिकानि भवन्ति, अयोगिकाले यावन्तः समयास्तावन्ति स्पर्धकानि एकेनाधिकानि भवन्तीत्यर्थः । कथमिति चेदुच्यते—अयोगिकेवलिनश्चरमसमये क्षपितकर्मांशमधिकृत्य यत्सर्वजघन्यं प्रदेशसत्कर्मस्थानं तत् प्रथमं स्थानं । तत एकस्मिन् परमाणौ प्रक्षिप्ते सति द्वितीयं प्रदेशसत्कर्मस्थानं। एवं नानाजीवापेक्षया एकैकप्रदेशवृद्ध्या तावत्प्रदेशसत्कर्मस्थानानि द्रष्टव्यानि यावद्गुणितकर्मांशस्य सर्वोत्कृष्टं प्रदेशसत्कर्मस्थानं इदमेकं स्पर्धकं । तत एवमेव द्वयोः स्थित्योः शेषीभूतयोर्द्वितीयं स्पर्धकं, तिसृषु स्थितिषु तृतीयं । एवं निरन्तरं तावदवगन्तव्यं यावदयोगिप्रथमसमयः । तथा सयोगिकेवलिचरमसमये चरमस्थितिखंडसत्कं चरमप्रक्षेपमादिं कृत्वा यावदात्मीयमात्मीयं सर्वोत्कृष्टं प्रदेशसत्कर्म तावदेतदपि सकलस्वस्वस्थितिगतमेकैकं स्पर्धकं द्रष्टव्यं । ततोऽयोगिकेवलिगुणस्थानके यावन्तः समयास्तावन्ति स्पर्धकानि एकाधिकानि उदयवतीनां प्रकृतीनां प्रत्येकं भवन्ति । शेषाणां त्वनुदयवतीनां प्रकृतीनां त्र्यशीतिसंख्यानां तावन्ति स्पर्धकान्येकेन हीनानि भवन्ति । यतस्ता अयोगिकेवलिचरमसमये उदयवतीषु मध्ये स्तिवुकसंक्रमेण संक्रम्यन्ते । ततस्तासां चरमसमयगतं स्पर्धकं न प्राप्यत इति तेन हीनानि तासां स्पर्धकानि भवन्ति । इह यद्यपि मनुष्यगत्यादीनां 'एगं उवलमाणी' इत्यनेन

ग्रन्थेन प्रागेव स्पर्धकप्ररूपणा कृता तथापि इहापि तासां स्पर्धकानि प्राप्यन्त इति भूय उपादानं। एवं करणेष्वपि बन्धनादिषु यथासंभवं स्पर्धकानि वाच्यानि ॥ ४९ ॥

तथा चाह—

संभवतो ठाणाइं कम्मपएसेहिँ होंति नेयाइं। करणेसु य उदयम्मि य अणुमाणेणेवमेएणं ॥ ५० ॥

संभवतो त्ति—संभवतः संभवमाश्रित्य स्थानानि प्रदेशसत्कर्मस्थानानि। करणेषु बन्धनादिषु उदये च। कर्मप्रदेशेभ्यः कर्मप्रदेशानधिकृत्य। ज्ञेयानि ज्ञातव्यानि। कथमित्याह—एवमुपदर्शितेन। एतेन प्रागुक्तेन अनुमानेन प्रकारेण ज्ञातव्यानि। तथाहि–बन्धनकरणे जघन्यं योगस्थानमादिं कृत्वा यावदुत्कृष्टयोगस्थानं एतावन्ति प्रदेशसत्कर्मस्थानानि बन्धमाश्रित्य प्राप्यन्ते, तावन्ति चैकं स्पर्धकं। एवं संक्रमणादिष्वपि प्रत्येकं यथायोगं भावनीयम् ॥ ५० ॥

करणोदयसंताणं पगइट्ठाणेसु सेसगतिगे य। भूयक्कारप्पयरो अवट्ठिओ तह अवत्तव्वो ॥ ५१ ॥

करणोदयसंताणं ति—अष्टानां करणानां उदयसत्तयोश्च प्रकृतिस्थानेषु 'सेसगतिगे य त्ति' शेषके च त्रिके स्थित्यनुभागप्रदेशरूपे प्रत्येकं चत्वारो विकल्पा ज्ञातव्याः। तद्यथा—भूयस्कारः, अल्पतरः, अवस्थितः, अवक्तव्यश्च ॥ ५१ ॥

एतेषां चतुर्णां लक्षणमिदम्—

एगादहिगे पढमो एगाईऊणगम्मि बिइओ उ। तत्तियमेत्तो तईओ पढमे समये अवत्तव्वो ॥ ५२ ॥

एगादहिगे त्ति – इह बन्धमाश्रित्य भावना क्रियते। बन्धो द्विधा–मूलप्रकृतीनामुत्तरप्रकृतीनां च। तत्र मूलप्रकृतीनां बन्धः कदाचित् अष्टानां, कदाचित्सप्तानां, कदाचित् षण्णां, कदाचिदेकस्याः। तत्र यदा स्तोकाः प्रकृतीराबध्नन् परिणामविशेषतो भूयसीः प्रकृतीर्बध्नाति, यथा सप्त बद्ध्वा अष्टौ बध्नाति, यद्वा षट् एका च बद्ध्वा सप्त, तदा स बन्धो भूयस्कारः। तथा चाह–'एगादहिगे पढमो' एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिरधिके बन्धे प्रथमः प्रकारो भवति, भूयस्कारो बन्धो भवतीत्यर्थः। यदा तु प्रभूताः प्रकृतीर्बध्नन् परिणामविशेषतः स्तोका बद्धुमारभते, यथाऽष्टौ बद्ध्वा सप्त बध्नाति, सप्त वा बद्ध्वा षट्, षड्वा बद्ध्वा एकां, तदानी स बन्धोऽल्पतरः। तथा चाह–'एगाईऊणगम्मि बिइओ उ' एकादिभिरेकद्वित्र्यादिभिः प्रकृतिभिरूने बन्धे द्वितीयः प्रकारः अल्पतर इत्यर्थः। तथा स एव भूयस्कारोऽल्पतरो वा द्वितीयादिषु समयेषु तावन्मात्रतया प्रवर्तमानोऽवस्थित इति व्यपदेशं लभते। तथा चाह 'तत्तियमेत्तो तईओ' तावन्मात्रस्तृतीयोऽवस्थित इत्यर्थः। एते त्रयोऽपि प्रकारा मूलप्रकृतीनां संभवन्ति। चतुर्थस्तु न संभवति। न हि मूलप्रकृतीनां सर्वासा बन्धव्यवच्छेदे सति भूयोऽपि बन्धः संभवति येन चतुर्थो बन्धः स्यात्। तत उत्तरप्रकृतीरधिकृत्य स वेदितव्यः। यथा मोहनीयस्य तद्गतसर्वोत्तरप्रकृतिबन्धव्यवच्छेदे सति उपशान्तमोहगुणस्थानकात् प्रतिपाते भूयोऽपि बन्धारंभप्रथमसमये, स हि तदानी न भूयस्कारो वक्तुं शक्यते, नाप्यल्पतरः, नाप्यवस्थितः, तल्लक्षणायोगात्, ततोऽसाववक्तव्य इत्युच्यते, भूयस्कारादिनाम्ना वक्तुमशक्यत्वात्। एवमुत्तरप्रकृतीरधिकृत्य ज्ञानावरणीयादीनां वेदनीयवर्जानामवक्तव्यो भावनीयः। वेदनीयस्य त्ववक्तव्यो न संभवति, तस्य हि सर्वथा बन्धव्यवच्छेदः सयोगिकेवलिचरमसमये। न च ततः प्रतिपातो येन भूयो बन्धः प्रवर्तमानः प्रथमसमयेऽव-

क्तव्यः स्यात् । तदेवं मूलप्रकृतीरधिकृत्यावक्तव्यवर्जाः शेषास्त्रयः प्रकाराः, उत्तरप्रकृतीस्त्वधिकृत्य चत्वारोऽपि प्रकाराः संभवन्ति । यथा च बन्धे चत्वारोऽपि प्रकारा भाविता एवं संक्रमे उद्वर्तनायामपवर्तनायामुदीरणायामुपशमनायामुदये सत्तायां च प्रकृतिस्थानेषु स्थित्यनुभागप्रदेशस्थानेषु च यथायोगं स्वयमेव भावनीयाः ॥ ५२ ॥

करणोदयसंताणं सामित्तोघेहिं सेसगं नेयं । गईयाइमग्गणासुं संभवउं सुहु आगमिय ॥ ५३ ॥

करणोदयसंताणं ति–अष्टानां करणानामुदयसत्तयोश्च यदुक्तं प्रत्येकं सप्रपञ्चं स्वरूपं तत् ओघस्वामित्वमुच्यते। 'सामित्तोघेहिं ति' द्वितीयार्थे तृतीया, व्यक्त्यपेक्षया च बहुवचनं । ततश्च तानि ओघस्वामित्वानि यथोक्तकरणाष्टकोदयसत्तास्वरूपरूपाणि सुष्ठु आगम्य परिभाव्य शेषकमपि ज्ञातव्यं क्व ज्ञातव्यमित्याह–गत्यादिषु चतुर्दशसु मार्गणास्थानेषु । कथमित्याह—संभवतो यथा संभवति यथा घटते तथैव, नान्यथा ॥ ५३ ॥

बंधोदीरणसंकमसंतुदयाणं जहन्नगाईहिं । संवेहो पगइ ठिई अणुभागपएसउं नेउं ॥ ५४ ॥

बंधोदीरण त्ति—बन्धोदीरणासंक्रमसत्तोदयरूपाणां पञ्चानां पदार्थानां प्रकृतिस्थित्यनुभागप्रदेशतः प्रकृतिस्थित्यनुभागप्रदेशानधिकृत्य जघन्याजघन्योत्कृष्टानुत्कृष्टैः संबन्धः परस्परमेककालमागमाविरोधेन मीलनं । यथा ज्ञानावरणीयस्य जघन्ये स्थितिबन्धे जघन्योऽनुभागबन्धः, जघन्यः प्रदेशबन्धः, अजघन्याः स्थित्युदीरणासंक्रमसत्तोदया इत्यादिरूपं, तत्पूर्वापरौ सुष्ठु परिभाव्य ज्ञातव्यम् ॥ ५४ ॥

तदेवमुक्ता सत्ता, तदभिधानाच्च यत्प्राक् प्रतिज्ञातं 'कम्मट्ठगस्स करणट्ठगुदयसंताणि वोच्छामि' इति तत्समर्थितं ।

संप्रति प्रकरणपरिज्ञाननिवन्धनां विशिष्टफलसंप्राप्तिमाह—

करणोदयसंतविऊ तन्निज्जरकरणसंजमुज्जोगा । कम्मट्ठगुदयनिट्ठाजणियमणिट्ठं सुहमुवेंति ॥ ५५ ॥

करणोदय त्ति—करणानामुक्तस्वरूपाणामुदयसत्तयोश्च सम्यक् परिज्ञानयुक्ताः । 'तन्निज्जरकरणसंजमुज्जोग त्ति' तासां करणोदयसत्तानां या निर्जरा तस्याः करणं निर्वर्तनं तदर्थं संयमं प्रति उद्योग उद्यमो येषां ते तन्निर्जराकरणसंयमोद्योगाः । ते इत्थंभूताः सन्तः किमित्याह—कर्माष्टकोदय (सत्ता) निष्ठाजनितं कर्माष्टकस्याष्टानां कर्मणामुदयनिष्ठया, उदयग्रहणं वन्धसत्ताद्युपलक्षणं, ततोऽयमर्थः–वन्धोदयसत्ताक्षयेण जनितमुत्पादितं यत् 'मणिट्ठं ति' मनस इष्टं । अथवा 'अणिट्ठं ति' न विद्यते निष्ठा पर्यवसानं यस्य तदनिष्ठं अपर्यवसानं सुखं । उभयत्रापि मोक्षसुखं । तत् उपयन्ति प्राप्नुवन्ति । तस्मादवश्यमिह प्रकरणे प्रेक्षावद्भिर्निरन्तरमभ्यासः करणीयः, कृत्वा च यथाशक्ति संयमाध्वनि प्रवर्तितव्यं । प्रवृत्तेन च सता संक्लिष्टाध्यवसायरूपकुपथपरिहारे यत्न आस्थेय इति ॥ ५५ ॥

संप्रत्याचार्य आत्मन औद्धत्यं परिहरन्नन्येषां वहुश्रुतानां प्रकरणार्थपरिभावनाविषये प्रार्थनां च कुर्वन् प्रेक्षावतां प्रकरणविषये उपादेयबुद्धिपरिग्रहार्थं प्रकरणस्य परंपरया सर्वविन्मूलतां ख्यापयति—

इय कम्मप्पगडीओ जहासुयं नीयमप्पमइणा वि । सोहियणाभोगकयं कहंतु वरदिट्ठिवायन्नू ॥ ५६ ॥

इय त्ति—अल्पमतिनापि अल्पबुद्धिनापि सता । इत्येवमुक्तेन प्रकारेण गुरुचरणकमलपर्युपासनां कुर्वता गुरुपादमूले यथा मया श्रुतं तथा कर्मप्रकृतेः कर्मप्रकृतिनामकात्प्राभृतात् । दृष्टिवादे हि चतुर्दश पूर्वाणि । तत्र च द्वितीं-

येऽग्रायणीयाभिधानेऽनेकवस्तु समन्विते पूर्वे पञ्चमं वस्तु विंशतिप्राभृतपरिमाणं । तत्र कर्मप्रकृत्याख्यं चतुर्थं प्राभृतं चतुर्विंशत्यनुयोगद्वारमयं । तस्मादिदं प्रकरणं नीतं आकृष्टमित्यर्थः । अस्मिंश्च प्रकरणे यत्किमपि स्खलितमनाभोगकृतमनाभोगजनितं । छद्मस्थस्य हि कृतप्रयत्नस्याप्यावरणसामर्थ्यतोऽनाभोगः संभवति । ततोऽनाभोगजनितं यत्किमपि स्खलितं तत् शोधयित्वाऽपनीय । ये वरा उत्कलितबुद्ध्यतिशयसंपन्ना दृष्टिवादज्ञा द्वादशकांगविदस्ते । ममोपरि महतीमनुग्रहबुद्धिमास्थाय । तत्रान्यत् पदमागमानुसारि प्रक्षिप्य कथयन्तु यथेदमत्र पदं समीचीनं नेदमिति, न पुनरुपेक्षारूपोऽप्रसादस्तैः कर्तव्यः । अत्र 'इय कम्मपयडीउ' इत्यादिना ग्रन्थेन प्रकरणस्य सर्वविन्मूलता ख्यापिता द्रष्टव्या । दृष्टिवादो हि भगवता साक्षादर्थतोऽभिहितः । सूत्रतस्तु सुधर्मस्वामिना । दृष्टिवादान्तर्गतं च कर्मप्रकृतिप्राभृतं । तस्माच्चेदं प्रकरणमुद्धृतमिति परंपरया सर्वविन्मूलम् ॥ ५६ ॥ ४७४ ॥

इह शास्त्रस्यादौ मध्येऽवसाने च मंगलमवश्यमभिधातव्यं । आदिमंगलाभिधाने हि शास्त्रमविघ्नेन परिसमाप्तिमियर्ति, मध्यमंगलाभिधानतश्च शिष्यप्रशिष्यादिपरंपरागमनेन स्थैर्यमाधत्ते, पर्यन्तमंगलाभिधानप्रभावतः पुनः शिष्यप्रशिष्यादिभिरवधार्यमाणं तेषां चेतसि सुप्रतिष्ठितं भवति । तत्रादिमंगलं 'सिद्धं सिद्धत्थसुयं' इत्याद्युक्तं । मध्यमंगलं तु 'अकरण अणुइभाए अणुयोगधरे पणिवयामि' इति । संप्रति पुनः पर्यवसानमंगलमाह—

जस्स वरसासणावयवफरिसपविकसियविमलमइकिरणा । विमलंति कम्ममइले सो मे सरणं महावीरो

जस्स त्ति—यस्य भगवतो महावीरस्य वरमनुत्तरं यच्छासनं तदवयवसंस्पर्शात् ये प्रकर्षेण विकसिता उद्बोधं गता

विमला अपगतमिथ्याज्ञानलक्षणमला मतिकिरणा मतिरश्मयः ते कर्ममलिनान् कर्मतमोमलीमसान् अमुमतो विमल-यन्ति विमलीकुर्वन्ति । स भगवान् महावीरो वर्धमानस्वामी मे मम संसारभयभीतस्य शरणं परित्राणहेतुः, नान्य इति ॥ ५७ ॥ ४७५ ॥

कर्मप्रपञ्चं जगतोऽनुबन्धक्लेशावहं वीक्ष्य कृपापरीतः । उपाय तस्योपदिदेश रत्नत्रयं स जीयाज्जिनवर्धमानः ॥ १ ॥

निरस्तकुमतध्वान्तं सत्पदार्थप्रकाशकम् । नित्योदयं नमस्कुर्मो जैनसिद्धान्तभास्करम् ॥ २ ॥

पूर्वान्तर्गतकर्मप्रकृतिप्राभृतसमुद्धृता येन । कर्मप्रकृतिरियमतः श्रुतकेवलिगम्यभावार्था ॥ ३ ॥ युग्मम्

ततः क्व चैषा विषमार्थयुक्ता क्व चाल्पशास्त्रार्थकृतश्रमोऽहम् । तथापि सम्यग्गुरुसंप्रदायात् किञ्चित्स्फुटार्था विवृता मयैषा ॥ ४

कर्मप्रकृतिनिधानं बद्धं येन मादृशां योग्यम् । चक्रे परोपकृतये श्रीचूर्णिकृते नमस्तस्मै ॥ ५ ॥

एनामतिगम्भीरां कर्मप्रकृतिं विवृण्वता कुशलम् । यदवापि मलयगिरिणा सिद्धिं तेनाश्नुतां लोकः ॥ ६ ॥

अर्हन्तो मंगलं मे स्युः सिद्धाश्च मम मंगलम् । मंगलं साधवः सम्यग् जैनो धर्मश्च मंगलम् ॥ ७ ॥

॥ इति श्रीमलयगिरिविरचिता कर्मप्रकृतिटीका ॥

Puplished by Sheth Naginbhai Ghelabhai, Javeri Bazar, and Printed by R Y Shedge at the Nirnaya-Sagar Press,
23, Kolbhat Lane, Bombay

॥ श्रीमलयगिरिकृता कर्मप्रकृतिटीका समाप्ता ॥

इति श्रेष्ठि-देवचन्द्र लालभाई-जैनपुस्तकोद्धारे-ग्रन्थाङ्कः १७.

शेठ देवचन्द लालभाई जैन पुस्तकोद्धार फण्ड.



जव्हेरी बाजार मुंबई.